This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google books

https://books.google.com

IndL 350.2

Harvard College Library

FROM THE BEQUEST OF

MRS. ANNE E. P. SEVER,

OF BOSTON,

WIDOW OF COL. JAMES WARREN SEVER,

(Class of 1817),

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

VOL. XXIV.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1902.

Digitized by Google

102632
FndL 350.2
~~IX 60~~
Sever fund
Digitized by Google

INDEX TO VOLUME XXIV. NEW SERIES.

BRĀHMASPHUṬASIDDHĀNTA	1, 65, 137, 209, 273, 321, 385, 465, 529, 593, 657, 721.
LAUKIKANYĀYASAṀGRAHA ...	17, 81, 129, 169.
THE SIDDHĀNTALEÇA ...	33.
THE SAMBANDHAVĀRTIKA OF SUREṢVARĀCHĀRYA ...	41, 121, 185, 249, 377, 425, 505 633, 697.
NYĀYASŪTRAVIVARAṆAM ...	49, 105, 153, 193, 257, 361, 433, 449, 513, 577, 641, 705.
THE TĀRKIKARAKṢĀ ...	97, 241, 313, 417, 497, 625, 689, 757.

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 1.] January, 1902 [Vol. XXIV.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1902.

Copyright on each article reserved.

Price Rs. 9-0 *per annum.*]

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
चित्रमीमांसा, अप्पयदीक्षितकृता पं॰ श्री रामशास्त्रिणा संशोधिता	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।=)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालन्टैनाचार्य्येणाङ्ग्लदेशीयभाषायामनुवादिता	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणाङ्ग्लदेशीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका,	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	२॥=)
शीतपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीरामकोल्लूरशास्त्रि- संशोधिता	४)
काव्यप्रदीपः, पं॰ रामशास्त्रिभागवताचार्येण परिशोधितः	२॥।)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	५॥।)

Digitized by Google

दस्तमयोर्दयिको कालो साध्यो । अर्थात् सूर्यास्तात् प्राक् पश्चाद्वा कतिघटिकाभिश्चन्द्रोदयोऽस्तो वा सूर्योदयात् प्राक् पश्चात् कतिघटिकाभिश्चन्द्रोदयोऽस्तो वेति सर्वं प्रसाध्यमित्यर्थः ।

अत्रोपपत्तिः । यद्दार्कान्तरकालानयनेन स्फुटा ॥ ८ ॥

इदानीमिनाख्यभावेन चन्द्रोदयास्तावाह ।

उदयास्तमयाविन्दोः कालांशैरर्कसंमितैः कार्यौ ।
हीनत्वं त्वधिकत्वं तदन्तरे योगकालः स्यात् ॥ ९ ॥

अर्कसंमितैः कालांशैर्योद्वादशकालांशैरिन्दोश्चन्द्रस्योदयास्तमयौ साध्यौ । अत्र पठितकालांशेभ्य इष्टकालांशानां यदि हीनत्वं वाऽधिकत्वं भवेत् तदा तदन्तरे तयोः पठितेष्टकालांशयोरन्तरे योगकालो योगवद्वृद्धयोगवत् कालः स्यादिति सप्तमश्लोकेन स्फुटोऽर्थ इति ॥ ९ ॥

इदानीमुदयास्तयोर्बुधगुर्वोर्विशेषमाह ।

उदयास्तविधौ रविवद्बुधशीघ्रादाप्तफलयुतोनो ज्ञः ।
तैक्ष्ण्याद्गुरुर्विहीनस्तत्समलिप्तेन भागेन ॥ १० ॥

बुधशीघ्राद्बुधशीघ्रोच्चाद्रविवदवाप्तं प्राप्तं फलं मन्दफलं भवेत् तेन यथागतेन बुधो युतो वोनः कार्यः । एतादृशो बुध उदयास्तसाधने ग्राह्यः । अत्रैतदुक्तं भवति । बुधशीघ्रं मध्यरविं प्रकल्प्य तस्मान्मन्दफलमानीय तेन संस्कृतो बुध उदयास्तविधौ ग्राह्यः । एतेन बुधकालांशेषु वैलक्षण्यं सूचितम् । एवं गुरुस्तत्समलिप्तेन मध्यमगुरुसमं मध्यमरविं प्रकल्प्य यन्मन्दफलं भागात्मकं तत्समकलाभिर्युतो भागेनैकेन च विहीन उदयास्तविधौ ग्राह्यः । कस्मात् । तैक्ष्ण्यात् । अर्थाद्गुरुबिम्बं विपुलमत एवं कालांशवैलक्षण्यं भवति ।

अत्रोपपत्तिश्चैव वासना ॥ १० ॥

इदानीं शुक्रकालांशेषु विशेषमाह ।

मानाल्पत्वात् पश्चादुदयोऽस्तमयः सितस्य दशभिः प्राक् ।
पश्चान्मानमहत्त्वादस्तमयोऽष्टाभिरुदयः प्राक् ॥ ११ ॥

Digitized by Google

सितस्य पश्चात् पश्चिमायां दिशि दशभिः कालांशैरुदयः । प्रागस्तमयश्च दशभिरेव भवति मानाल्पत्वात् । यतस्तदा शुक्रो मार्गी भवति । ऋजुगतेरुच्चासन्नत्वाद्बिम्बं लघु भवति तस्मात् कालांशा अधिकाः पठिताः । एवं तस्य पश्चादस्तमयः प्रागुदयश्च नीचासन्नत्वाद्वक्रत्वाच्च बिम्बमानं विपुलं भवति तस्मान्मानमहत्त्वादष्टाभिरेव न्यूनैः कालांशैर्भवति । भास्करेणाप्याचार्योक्तामीदृशीं वैलक्षण्यक्रियामवलम्ब्य तारतम्येन 'ज्ञशुक्रयोर्वक्रगयोर्द्विहीनाः' इत्युक्तम् ।

अत्रोपपत्तिरुपलब्धिरेव ॥ ११ ॥

इदानीमार्यभटदूषणमात्मप्रशंसां चाह ।

आर्यभटः क्षेत्रांशैर्दृश्यादृश्यान्यदुक्तवाँस्तदसत् ।
दृग्गणितविसंवादाद्दृग्गणितैक्यं स्वकालांशैः ॥ १२ ॥

आर्यभटः कालांशान् विहाय क्षेत्रांशैः क्रान्तिवृत्तीयग्रहार्कान्तरांशैरेव ग्रहाणां दृश्यादृश्ययोराचार्योक्तादन्यत् साधनं यदुक्तवान् तद्दृग्गणितविसंवादात् दृग्गणितयोर्विरोधादसत् । स्वकालांशैराचार्योक्तकालांशैश्च दृग्गणितैक्यं भवत्यत आचार्योक्तं साधनमेव समीचीनमिति ॥ १२ ॥

तथा चाचार्यार्यभटः ।

चन्द्रोऽंशैर्द्वादशभिरविक्षिप्तोऽर्कान्तरस्थितैर्दृश्यः ।
नवभिर्भृगुर्भृगोस्तैर्द्व्यधिकैर्द्व्यधिकैर्यथाश्लक्ष्णाः ॥
(गोलपा॰ श्लो॰ ४)

इदानीमध्यायोपसंहारमाह ।

दृग्लग्नदृष्टिभागग्रहोदयास्तमयनाडिकाद्येषु ।
उदयास्तमयाध्यायः षष्ठो द्वादशभिरार्याभिः ॥ १३ ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते उदयास्ताधिकारः षष्ठः ॥ ६ ॥

दृग्लग्नमुदयलग्नमस्तलग्नं च । दृष्टिभागाः कालांशाः । शेषं स्पष्टार्थम् ॥ १३ ॥

Digitized by Google

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितोऽस्तोदयिके सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्त-
नूतनतिलके उदयास्ताधिकारः षष्ठः ॥ ६ ॥

Digitized by Google

अथ चन्द्रशृङ्गोन्नत्यधिकारः ।

तत्रादौ रवेरुपरि चन्द्र इति पुराणमतं खण्डयति ।

सितवृद्धिहानिवीर्यादि शशाङ्काज्जायते कथं गणितात् ।
उपरि रवेरिन्दुश्चेदर्वागर्धं सदा शुक्लम् ॥ १ ॥

चेद्यदि रवेरुपरि इन्दुस्तदा गणिताद्गणितागतात् शशाङ्काच्च-न्द्रात् सितवृद्धिहानिवीर्यादि कथं जायते । अर्थाद्गणितविधिना चन्द्रस्य शुक्लोपचयापचयमानं कृष्णाङ्गुलमानं च कथं जायते यतस्तादृशस्थितो भौमगुरुशनिवत् सदा अर्वागर्धं पूर्वार्धं नृदृश्यं खण्डं शुक्लं स्यात् परन्तु दृष्ट्या सदा शुक्लं नोपलक्ष्यतेऽतो रवेरुपरि नेन्दुरिति स्फुटम् । तथा रवेर-धश्चन्द्रं प्रकल्प्य गणितविधिनाऽऽनीतं शुक्लादि दृष्टियोग्यं भवति तेन रवेरधश्चन्द्र इति स्फुटम् ॥ १ ॥

इदानीं चन्द्रबिम्बे सितमसितं चाह ।

रविदृष्टं सितमर्धं कृष्णमदृष्टं यथाऽऽतपस्थस्य ।
कुम्भस्य तथासन्नं रवेरधःस्थस्य चन्द्रस्य ॥ २ ॥

तथासन्नं तादृगेव । अन्यत् स्पष्टम् ॥ २ ॥

इदानीं गणितेन कथं शृङ्गोन्नतिर्भवतीत्यत्र कारणमाह ।

सितमुन्नतं यतोऽर्कः सितासितं शुक्लपक्षान्ते ।
अर्वागर्धं पश्चाद्गणिताच्छृङ्गोन्नतिस्तस्मात् ॥ ३ ॥

यतो यद्दिशि अर्कस्तत्रैव सितं शुक्लमुन्नतं वृद्धिगतं भवति । शुक्ल-पक्षान्ते पूर्णिमान्ते च अर्वागर्धं पूर्वार्धं रविसंमुखस्थं सितं पश्चादर्धं नृदृश्यखण्डं चासितमुपलक्ष्यते । तस्माद्रविचन्द्रान्तरवशतो गणितात् शृङ्गोन्नतिः साध्या भवतीति ॥ ३ ॥

इदानीं शृङ्गोन्नतिकाले सूर्यास्ताच्चन्द्रास्तपर्यन्तं गतशेषघटीसाधनमाह ।

रविचन्द्रपातलग्नैः स्वक्रान्त्युदयात् स्वलग्नगतशेषाः ।

घटिकाः खचरार्धास्तात् स्वेष्टौ रविशीतगू कृत्वा ॥ ४ ॥

खचरार्धास्ताद्व्यस्तात् स्वलग्नगतशेषाः शशिन उदयलग्नस्य गताः शेषा वा घटिकाः साध्याः । कैः । रविचन्द्रपातलग्नैस्तथा स्वक्रान्त्युदयाच्च । अत्रैतदुक्तं भवति । व्यस्तकाले रविश्चन्द्रः पातो लग्नम् । एतानि कृत्वा तैः स्वक्रान्त्या चन्द्रक्रान्त्या उदयाच्चन्द्रोदयलग्नाच्चोदयलग्नस्य गता वा शेषा घटिका ऊनस्य भोग्योऽधिकभुक्तयुक्तो मध्योदयाद्य इत्यनेन विधिना साध्याः । सूर्यास्तानन्तरं यावतीभिर्घटिकाभिश्चन्द्रास्तस्ता गता घटिकाः । सूर्यास्तात् प्राग् यावतीभिर्घटिकाभिश्चन्द्रास्तस्ता एष्या घटिकाः । एवं प्राक्क्षितिजे रव्युदयाद्गता एष्या वा चन्द्रोदयघटिकाः साध्या इत्यर्थादवगम्यते । यस्मिन् दिने सूर्यास्तादनन्तरं कालांशघटिकातोऽधिकाभिश्चन्द्रास्तः, रव्युदयात् प्राक् कालांशघटिकातोऽधिकाभिश्चन्द्रोदयस्तस्मिन्नेव चन्द्रदर्शनं सति दर्शने शृङ्गोन्नतिः साध्या । सितशृङ्गोन्नतिश्च बिम्बार्धाल्पे चन्द्रसितेऽत एव भास्करेण मासान्तपादे प्रथमे च शृङ्गोन्नतिः साधिता । द्वितीयतृतीयपादयोश्च बिम्बार्धाल्पं कृष्णं भवति । अतस्तत्र कृष्णशृङ्गोन्नतिर्भवति । इत्याचार्येण शृङ्गोन्नतिद्वयं साध्यते तदर्थं पादचर्चा न कृता । भास्करेण नहि स्पष्टा कृष्णशृङ्गोन्नतिर्नरैरुपलक्ष्यत इति मनसि संप्रधार्य सितशृङ्गोन्नतिरेव साधिता । उक्तं च 'द्वितीयतृतीययोरपि चरणयोर्ब्रह्मगुप्तादिभिः कृष्णशृङ्गोन्नतिरानीता सा मम न संमता । नहि नरैः कृष्णशृङ्गोन्नतिः स्पष्टोपलक्ष्यते'। स्वेष्टौ स्वेष्टकालिकौ रविशीतगू रविचन्द्रौ कृत्वा विक्षेपक्रान्त्यंशाः साध्या इत्यध्याहार्यम् ॥ ४ ॥

इदानीं चन्द्रस्पष्टक्रान्तिज्यासाधनमाह ।

विक्षेपशश्यपक्रमधनुषोर्योगान्तरं समान्यदिशोः ।
तज्ज्येन्द्वपक्रमज्या स्वाहोरात्रार्धतो रविवत् ॥ ५ ॥

समान्यदिशोः विक्षेपशश्यपक्रमधनुषोः शशिशरापक्रमचापयोर्योगान्तरं यत् तज्ज्या इन्दूपक्रमज्या शशिनः स्पष्टापक्रमज्या रविवत् स्वाहोरात्रार्धतश्चन्द्रस्य बिम्बीयाहोरात्रवृत्ताद्भवति ।

अत्रोपपत्तिः । गणितागतः कदम्बप्रोतीयश्चन्द्रशर एव ध्रुवाभिमुख आचार्यैः प्रकल्पितः । ततः स्थानीयक्रान्तिशरयोः संस्कारेण विम्बाहोरात्रवृत्तपर्यन्तं चन्द्रस्पष्टक्रान्तिरानीता । अत्र 'ब्रह्मगुप्तादिभिः स्वल्पान्तरत्वाच्च कृतः स्फुटः' इत्यादि भास्करवचनं प्रसिद्धमिति ॥ ५ ॥

इदानीं रविचन्द्रयोर्भुजसाधनमाह ।

स्वक्रान्तिज्ये त्रिज्यागुणे हृते लम्बकेन रविशशिनोः ।
अग्रे पृथक् स्वशङ्कुतलतुल्ययुतिरन्यदिग्वियुतिः ॥ ६ ॥

लम्बकेन लम्बज्यया हृते तदा रविशशिनोरग्रे भवतः । अथ पृथक् स्वशङ्कुतलतुल्ययुतिरन्यदिग्वियुतिः कार्या । एवं रविचन्द्रयोर्भुजौ भवतः । अर्थात् स्वाग्रास्वशङ्कुतलयोः समदिशोर्योगो विभिन्नदिशोरन्तरं संस्कारदिक्को भुजः स्यादिति ।

अत्रोपपत्तिः । क्रान्तिज्यातोऽग्रानयनस्य शङ्कुतलाग्रासंस्कारेण भुजानयनस्यापि सुगमा ॥ ६ ॥

इदानीं स्पष्टभुजं कोटिकर्णौ चाह ।

पृथगन्तरसंयोगौ भुजौ यतोऽर्कात् शशी समान्यदिशोः ।
दृग्ज्यावर्गात् स्वात् स्वात् पृथक् स्ववर्गं विशोध्य पदे ॥ ७ ॥
वियुतसहिते रवीन्द्वोरेकान्यकपालसंस्थयोराद्यः ।
रविशशिदृक्शङ्क्वन्तरमन्योऽदृग्दृश्यशङ्क्वैक्यम् ॥ ८ ॥
आद्यान्यवर्गयोर्युतिमूलं पूर्वापरा भुजात् कोटिः ।
भुजकोटिकृतियुतिपदं तिर्यक् कर्णोऽस्य चन्द्रोऽग्रे ॥ ९ ॥

तयोः पृथक्स्थयोर्भुजयोः समान्यदिशोरन्तरसंयोगौ क्रमशो भुजः स्पष्टो भुजो भवेत् । अर्काद्यतो यद्दिशि शशी सैव भुजस्य दिग्ज्ञेया । स्वात् स्वाद्दृग्ज्यावर्गात् पृथक् स्थापितस्य स्वस्वभुजस्य वर्गं विशोध्य पदे ग्राह्ये । एवं पूर्वापरारेखायां रविशशिनोः कोटी भवतः । एकान्यकपालसंस्थयो रवीन्द्वोस्तयोः कोट्योर्वियुतसहिते ये भवतः स आद्यो ज्ञेयः ।

रविचन्द्रयोरेककपालस्थयोः कोट्योरन्तरं विभिन्नकपालस्थयोश्च योग आढ्यो भवतीत्यर्थः । रविशशिदृक्शङ्क्वन्तरमन्यो भवति । यथा यदि रविचन्द्रौ द्वौ क्षितिजादुपरि तदा तयोर्दृक्शङ्कू एकजातीयौ भवतोऽतस्तयोरन्तरमन्यसंज्ञं भवति । यदि एकः क्षितिजादुपरि अन्यः क्षितिजादधस्तदाऽधःस्थस्यादृक्शङ्कुरूर्ध्वस्थस्य दृक्शङ्कुः । अतोऽनयोरैक्यं तदान्यो भवति ॥ आढ्यान्ययोर्वर्गयुतिमूलं भुजात् पूर्वसाधितात् कोटिः पूर्वापरा भवति । भुजकोटिकृतियुतिपदं तिर्यक् कर्णः स्यात् । अस्य कर्णस्याग्रे चन्द्रश्चन्द्रबिम्बकेन्द्रमिति ॥

अत्रोपपत्तिः । अत्रैकस्मिन् गोले रविचन्द्रौ प्रकल्प्य बिम्बान्तरसूत्ररूपः कर्णः साध्यते। रविकेन्द्राच्चन्द्रशङ्कूपरि यो लम्बस्तन्मूलाच्चन्द्रबिम्बकेन्द्रपर्यन्तमन्यसंज्ञम् । लम्बमूलात् पूर्वापररेखायाः समनान्तरा कृता या रेखा तस्या उपरि रविकेन्द्रात् कृतो यो द्वितीयो लम्बस्तन्मूलात् प्रथमलम्बमूलपर्यन्तमेव क्षेत्रयुक्त्याऽऽढ्यसंज्ञा । तयोराढ्यान्ययोर्वर्गयुतेः पदं द्वितीयलम्बमूलाच्चन्द्रबिम्बकेन्द्रपर्यन्तं रेखा द्वितीयलम्बोपरि रेखागणितैकादशाध्याययुक्त्या लम्बरूपा भवति । द्वितीयलम्बश्च पूर्वसाधितस्पष्टभुजसमः । तयोर्वर्गयोगपदमेकगोलीयरविचन्द्रयोर्बिम्बान्तरसूत्रं कर्णो भवति । एवमत्र भुजकोटिकर्णा यस्मिन् धरातले तत् क्षितिजधरातले समप्रोतधरातलवच्च लम्बरूपमतो द्रष्टुः संमुखे नेदं क्षेत्रमादर्शवत् । अत एवास्य क्षेत्रस्य भास्करेण स्वशृङ्गोन्नतौ खण्डनं कृतम् । रवीन्द्वोरन्तरार्धज्या द्विगुणाऽयमेव कर्णो भवति । भुजकर्णवर्गान्तरपदं चेयमेव कोटिरिति शृङ्गोन्नत्युत्तराधिकारे आचार्येण ।

'व्यर्केन्द्वर्धभुजज्या द्विगुणाऽर्केन्द्वन्तरं भवति कर्णः ।
तद्वर्गान्तरपदमिदमिन्दुभुजायान्तरं कोटिः' ॥

इत्यनेन प्रकारान्तरं दर्शितम् । अत एव भास्करः । 'यत् क्षेत्रं ब्रह्मगुप्तेन रवीन्द्वोरन्तरार्धज्यां द्विगुणां कर्णं प्रकल्प्य तद्भुजवर्गान्तरपदं कोटिरिति यत् त्र्यस्रं प्रकल्पितं तत् तिरश्चीनं जातम् । नहि द्रष्टु-

दृष्टिसंमुखमादर्शवत्' । भास्करब्रह्मगुप्तयोः प्रकारौ शृङ्गोन्नतिर्न समीचीनेति कमलाकरेण तत्त्वविवेके स्पष्टं प्रतिपादितम् । वास्तवा कथं शृङ्गोन्नतिर्भवत्येतदर्थं मद्विरचितं वास्तवचन्द्रशृङ्गोन्नतिसाधनं विलोक्यम् ॥ ७–९ ॥

इदानीं विशेषमाह ।

एवं तावद्यावत् पदयोराद्यन्तयोः शशिनि चार्कात् ।
रविरर्धचक्रयुक्तः कल्प्यो द्वित्रिपदयोरर्कः ॥ १० ॥

एवमर्कात् प्रथमचतुर्थपदयोः शशिनि चन्द्रे सति क्रिया कार्या । अर्थादेवं मासान्तपादे वा प्रथमे भुजकोटिकर्णादिकं भवति । द्वित्रिपदयो रविरर्धचक्रयुक्तः षड्राशिसहितः स चार्कः कल्प्यः । अर्थात् सषड्भमर्कं रविं प्रकल्प्य भुजकोटिकर्णादिकमानेयम् । एवं भुजकोटिकर्णैः कृष्णशृङ्गोन्नतिरप्यत इत्यर्थत एवावगम्यते ॥ १० ॥

इदानीं सिताङ्गुलसाधनमाह ।

व्यर्केन्दुदलभुजांशाः शशिमानगुणाः सितं नवतिभक्ताः ।
द्विगुणांशोत्क्रमजीवा तावद्यावन्नवतिरंशाः ॥ ११ ॥
नवतेरधिकांशानां क्रमज्यया संयुतोत्क्रमा त्रिज्या ।
चन्द्रप्रमाणगुणिता द्विगुणव्यासार्धभक्ताऽन्यत् ॥ १२ ॥
प्रथमं शुक्लं रात्रौ दिवसेऽन्यत् सन्ध्ययोस्तदैक्यार्धम् ।
कर्णो ज्या रविदिग् भवति तस्य सितं श्रवणगत्या ॥ १३ ॥

व्यर्केन्दुदलभुजांशाः शशिबिम्बमानगुणा नवतिभक्ताः फलं सितं सिताङ्गुलानि । अयं प्रथमः प्रकारः । अथ द्वितीयप्रकारः । यावद्रविचन्द्रयोरन्तरांशा नवतिरंशा स्युस्तावत् पूर्वसाधिता व्यर्केन्दुदलभुजांशा द्विगुणाः कार्यास्तत्र येंऽशास्तेषामुत्क्रमज्या कार्या । यद्यन्तरांशा नवतेरधिकास्तदाधिकांशानां या क्रमज्या तया त्रिज्या संयुता । एवमुत्क्रमाऽर्थादुत्क्रमज्या साध्या । एवं योत्क्रमज्या सा चन्द्रप्रमाणेन चन्द्रबिम्बमानेन गुणिता द्विगुणव्यासार्धेन द्विगुणत्रिज्यया भक्ताऽन्यत् सितं सि-

ताङ्गुलानि भवन्ति । यदि रात्रौ शृङ्गोन्नतिः साध्यते तदा प्रथमप्रकारागतं शुक्लं सिताङ्गुलं ग्राह्यम् । दिवसे चेत् तदाऽन्यत् द्वितीयप्रकारागतं शुक्लं ग्राह्यम् । सन्ध्ययोः सूर्योदये सूर्यास्ते च तयोः प्रथमद्वितीयप्रकारागतयोः सितयोरैक्यार्धसमं शुक्लं ग्राह्यम् । रविचन्द्रान्तरांशानां ज्या पूर्णज्येव रविदिक् कर्णो भवति । तस्य चन्द्रस्य सितं च श्रवणगत्या भवति । अर्थाद्रविकर्णगत्यैव शौक्ल्यं दीयते ।

अत्रोपपत्तिः । यदि नवत्यन्तरेण चन्द्रबिम्बार्धसमं शुक्लं तदाऽभीष्टरविचन्द्रान्तरेण किं जातं सिताङ्गुलमानम् $= \frac{\text{अं} \cdot \text{विमा}}{९० \times २}$

$= \frac{\text{अंतरां} \cdot \text{विमा}}{९०}$ । द्वितीयं सितमन्तरांशोत्क्रमज्ययाऽनुपातेन साधितं तल्लोकवत् । द्विसि $= \frac{\text{उज्या} \cdot \text{विंमा}}{\text{त्रि} \times २}$ ।

रात्रौ सुदृशा चन्द्रोज्ज्वलभागो विपुलो विलोक्यते । दिने रवितेजसा दृष्टिदोषादल्पः सितभागो लक्ष्यते । सन्ध्ययोश्चैवं दर्शने सितवैषम्यमुपलक्ष्यत इति तारतम्येनाधिकमल्पं तद्योगार्धसमं च सितं कल्पितमाचार्येण । वास्तवसितं तूत्क्रमज्यातोऽप्यल्पं तदर्थं मदीयं वास्तवचन्द्रशृङ्गोन्नतिसाधनं विलोक्यम् ॥ ११–१३ ॥

इदानीं परिलेखसूत्रसाधनमाह ।

शशिमानवर्गपादो मानार्धसितान्तरार्धभक्तयुतः ।
परिलेखसूत्रमस्मात् शुक्लेऽर्धाल्पे च परिलेखः ॥ १४ ॥

शशिमानवर्गस्य चतुर्थांशो मानार्धस्य सिताङ्गुलस्य च यदन्तरं तस्यार्धेन भक्तः फलं तदर्धेन युतं परिलेखसूत्रं स्यात् । अस्मात् परिलेखसूत्रादर्धाल्पे शुक्ले परिलेखो भवति ।

अत्रोपपत्तिः । मानार्धसितान्तरमेव 'त्र्यर्केन्दुकोट्यंशशरेन्दुभागो हारो भवति स एव कोटिकर्णान्तरम् । शशिमानार्धं च भुजः । ततो 'भुजाद्वर्गितात् कोटिकर्णान्तराप्त' मित्यादिभास्करविधिना कर्णमान-

मेव परिलेखसूत्रम् $= \frac{\text{छा}}{\text{२}} + \frac{\frac{\text{विंभा}^{\text{२}}}{\text{४}}}{\frac{\text{छा}}{\text{२}}}$ । अस्मात् परिलेखस्य भास्करविधिना स्फुटः ॥ १४ ॥

इदानीं चन्द्रादिदर्शनार्थं विधिमाह ।

त्रिप्रश्नोक्त्या शङ्कोः पूर्वापरतो निधाय दिङ्मध्ये ।
छायाग्रं छायाग्राच्छङ्क्वग्रगतोर्ध्वसूत्रवशात् ॥ १५ ॥
कृत्वा वंशद्वितयं दृष्ट्या तत् प्रथममुच्चतरमन्यत् ।
प्रथमाग्रस्थितदृष्ट्या द्वितीयवंशाग्रगं चन्द्रम् ॥ १६ ॥
ग्रहणं ग्रहयोगं वा विस्मयकरणाय दर्शयेद्गणकः ।
लोकस्य नरपतेर्वा दुष्करमन्यैर्हि गणितविद्भिः ॥ १७ ॥

त्रिप्रश्नाधिकारविधिनाऽभीष्टे काले ग्रहशङ्कोर्मानं विज्ञाय यथा दिङ्मध्ये तस्य शङ्कोश्छायाग्रं पतति तथा पूर्वापररेखातो दक्षिणे वोत्तरे तं शङ्कुं निधाय स्थिरः कार्यः । शङ्कुसमो वंश एकः । अथ छायाग्रादर्थाद् दिङ्मध्याच्छङ्क्वग्रगतोर्ध्वसूत्रवशादग्रे वंशद्वितयं द्वितीयं वंशं कृत्वा तं च स्थिरं कुर्यात् । तत् प्रथमं वंशमानं दृष्ट्या समं कार्यम् । अन्यद्द्वितीयवंशमानं प्रथमादुच्चतरं कुर्यात् । अयेतदुक्तं भवति । दिङ्मध्याच्छङ्क्वग्रगामि कर्णसूत्रं स्वगत्या प्रसार्यान्यस्मिन् द्वितीये वंशे बध्नीयात् । तं द्वितीयं वंशं च स्थिरं कुर्यात् । अथ कर्णसूत्रे प्रथमशङ्क्वग्रगतदृष्ट्या द्वितीयवंशाग्रगं चन्द्रं ग्रहणं ग्रहयोगं वाऽभीष्टं गणको लोकस्य जनस्य वा नरपते राज्ञो विस्मयकरणाय दर्शयेत् । इदं दर्शनमन्यैरार्यभटादिभिर्गणितविद्भिर्दुष्करमसाध्यमिति ।

अत्रोपपत्तिः । छायावेधसंस्थयैव स्फुटा किं ग्रन्थगौरवेण ॥ १५-१७ ॥

इदानीमध्यायोपसंहारमाह ।

इति बाहुकोटिकर्णस्फुटसितपरिलेखसूत्रकर्णेषु ।
आर्याष्टादश चन्द्रशृङ्गोन्नतिसप्तमोऽध्यायः ॥ १८ ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते चन्द्रशृङ्गोन्नत्यधि-
कारः सप्तमः ॥ ७ ॥

परिलेखसूत्रमेव कर्ण इति परिलेखसूत्रकर्णः । शेषं स्पष्टार्थम् ॥ १८ ॥

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्तेः ।
हृदि तं विनिधाय नूतनोऽयं रचितः शृङ्गविधौ सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्त-
नूतनतिलके शृङ्गोन्नत्यधिकारः सप्तमः ॥ ७ ॥

अथ चन्द्रच्छायाधिकारः ।

तत्रादौ तदारम्भप्रयोजनमाह ।

प्राक् चन्द्रलग्नयोरस्तलग्नशशिनो यतोऽन्तरं पश्चात् ।
प्रतिदिनमिन्दुच्छाया यतस्तदानयनमभिधास्ये ॥ १ ॥

प्राक् क्षितिजे यतश्चन्द्रलग्नयोरन्तरं पश्चात् क्षितिजेऽस्तलग्नशशिनोरन्तरं च प्रतिदिनं यत् तेनैवेन्दुच्छाया ज्ञायते तथा यत इन्दुच्छायातस्तदन्तरं च ज्ञायतेऽतस्तदानयनं छायानयनमभिधास्ये कथयिष्ये इति ॥ १ ॥

इदानीमितिकर्त्तव्यतामाह ।

प्रग्रहणकालिकैरिष्टकालिकैरर्कलग्नशशिपातैः ।
कृत्वोदयास्तलग्ने स्वचरप्राणान् शशाङ्कस्य ॥ २ ॥

यदि प्रग्रहणे चन्द्रग्रहणस्पर्शकाले छायाज्ञानमभीष्टं तदा प्रग्रहणकालिकैरन्यथेष्टकालिकैः सूर्यलग्नशशिपातैः शशाङ्कस्योदयास्तलग्ने स्वचरप्राणान् चन्द्रचरासूंश्च कृत्वा चनष्टाः साध्या इति ॥ २ ॥

इदानीं चन्द्रस्य दृश्यादृश्यत्वमाह ।

यद्यधिकमुदयलग्नादूनं षड्गृहयुतास्तमयलग्नात् ।
लग्नं तदा शशाङ्को दृश्यः सति दर्शने छाया ॥ ३ ॥

लग्नं तात्कालिकं प्राक्क्षितिजे क्रान्तिवृत्तस्य लग्नप्रदेशः । तद्यदि चन्द्रोदयलग्नादधिकं षड्गृहयुतास्तमयलग्नाच्चोनं तदा चन्द्रो दृश्यो भवति । दर्शने सति छाया साध्या ।

अत्रोपपत्तिः । उदयलग्नसमे लग्ने चन्द्रः प्राक्क्षितिजे उदेति । आचार्येणोदयास्ताधिकारे पश्चिमक्षितिजस्थे ग्रहबिम्बे पश्चिमक्षितिजलग्नस्यापममण्डलप्रदेशस्यास्तलग्नसंज्ञा कृताऽतस्तदा सषड्भास्तलग्नं प्राक्क्षितिजे लग्नं भवति तस्मादिष्टलग्ने न्यूने उदयलग्नाच्चाधिके बिम्बं क्षि-

तिजादुपरि वर्तेत इति गोलयुक्त्या स्फुटम् । अतश्चन्द्रदर्शने सति तच्छायासाधनमुचितमिति 'निशीष्टलग्नादुदयास्तलग्ने न्यूनाधिके यस्य खगः स दृश्यः' इति भास्करोक्तमेतदनुरूपमेव ॥ ३ ॥

इदानीं चन्द्रोन्नतकालसाधनमाह ।

लग्नसममुदयलग्नं षड्गृहयुक्तास्तमयलग्नसमम् ।
पूर्वापरयोः कृत्वा गतशेषाः स्वोदयैर्घटिकाः ॥ ४ ॥

पूर्वापरयोः क्षितिजयोः क्रमेणोदयलग्नं लग्नसमं लग्नं च षड्गृहयुक्तास्तमयलग्नसमं कृत्वाऽर्थात् प्राक् क्षितिजे उदयलग्नभोग्यकालो लग्नभुक्तकालो मध्योदयाश्चैषां स्वदेशोदयैर्योगं कृत्वा पश्चिमक्षितिजे च लग्नभोग्यकालः सषड्भास्तलग्नभुक्तकालो मध्योदयाश्चैषां योगं कृत्वा चन्द्रस्य गतशेषा घटिकाः साध्याः ।

अत्रोपपत्तिः । लग्नात् कालसाधनविधिना स्फुटा ॥ ४ ॥

इदानीं चन्द्रशङ्कुसाधनमाह ।

गतघटिकाः शेषा वा स्वदिनार्धसमा यदेन्दुरस्त्यर्धे ।
गतशेषनाडिकाभिर्नताभिरथ वाऽर्कवच्छङ्कुः ॥ ५ ॥

पूर्वसाधिता गतघटिका वा शेषघटिका यदा स्वदिनार्धसमाश्चन्द्रदिनार्धसमास्तदेन्दुरर्धे याम्योत्तरवृत्तेऽस्तीति ज्ञेयम् । अथ गतशेषनाडिकाभिस्त्रिप्रश्नोक्त्या चन्द्रचरं विधायार्कवच्चन्द्रशङ्कुः साध्यः । अथ वा चन्द्रचराच्चन्द्रदिनार्धं प्रसाध्य गतशेषनाडिकाभिश्चन्द्रनतघटिकाः कृत्वा ततो नताभिरर्कवच्चन्द्रशङ्कुः साध्य इति ।

अत्रोपपत्तिः । शङ्कुसाधने त्रिप्रश्नोक्त्यैव ॥ ५ ॥

इदानीं रविचन्द्रयोः स्फुटशङ्कुसाधनमाह ।

शङ्कुधनुषोऽधिकस्य स्फुटप्रमाणार्धलिप्तिकाभिर्ज्या ।
रविशशिमध्यगतिकलातिथ्यंशेनोनिता छेदः ॥ ६ ॥

स्फुटप्रमाणार्धलिप्तिकाभिरधिकस्य शङ्कुधनुषो ज्या साध्या सा रविशशिमध्यगतिकलातिथ्यंशेनोनिता छेदो हरः स्यात् । द्वादशभिर्गुणि-

Digitized by Google

ताया दृग्ज्याया इत्यविमेष सहान्वयः। अत्रैतदुक्तं भवति। रविस्फुटशङ्कुसाधनार्थं तद्गणितागतशङ्कोश्चापं कार्यम्। तत्र रविबिम्बकलार्धं प्रक्षिप्य ज्या कार्या। सा ज्या च रविमध्यगतिपञ्चदशांशेनोनिता स्फुटशङ्कुः स्यात्। स एव छेदः। चन्द्रस्फुटशङ्कुसाधने च चन्द्रस्य बिम्बकलार्धं चन्द्रगणितागतशङ्कुचापे प्रक्षिप्य या ज्या सा चन्द्रगतिपञ्चदशांशेनोना।

अत्रोपपत्तिः। रविचन्द्रयोरुपरि ये दृङ्मण्डले तत्र केन्द्राद्गर्भक्षितिजावधि गणितागताः शङ्कुचापकलाः। दृङ्मण्डलं च बिम्बोर्ध्वप्रदेशे खार्धासन्ने यत्र लग्नं तस्मात् केन्द्रावधि स्फुटबिम्बार्धकलाः। तदधिका गर्भशङ्कुचापकला गर्भक्षितिजादूर्ध्वबिम्बप्रदेशस्योन्नतांशास्तज्ज्या च तत्प्रदेशस्य गर्भीयः शङ्कुस्तत्र स्वगतिपञ्चदशांशसमाः कुच्छन्नकला विशोध्य पृष्ठशङ्कुरानीत आचार्येण। ऊर्ध्वप्रदेशस्य पृष्ठशङ्कुर्मुनीश्वरेणापि स्वसिद्धान्तसार्वभौमे साधितस्तत्खण्डनं च कमलाकरेण तत्त्वविवेके छायाधिकारे सम्यक् कृतम्। पृष्ठशङ्कोरनुपातेन भास्करादीनां मतेन विजातीयत्रैराशिकत्वाच्च स्फुटा छायाऽऽगच्छति इत्यस्यापि मीमांसा कमलाकरस्यैव तत्र समीचीना। यदि ग्रहणादिना बिम्बस्य सर्वप्रदेश ऊर्ध्वप्रदेशातिरिक्तश्छन्नो भवेत् तदैवोर्ध्वप्रदेशाच्छङ्कोश्छाया स्फुटोपलक्ष्यते। अन्यथा बिम्बकेन्द्रादागता शङ्कूपरि किरणरेखा या तदवरोधवशेनैव शङ्कुच्छाया स्पष्टोपलक्ष्यत इति सिद्धान्तविदामतिरोहितमेवेति ॥ ६ ॥

इदानीं स्फुटच्छायासाधनमाह।

द्वादशभिर्गुणिताया दृग्ज्याया इष्टमङ्कलाप्तं यत्।

तत् प्रग्रहणे छाया स्फुटा विधोरन्यथाऽऽसन्ना ॥ ७ ॥

द्वादशभिर्गुणिताया दृग्ज्यायाश्छेदहृतेन यदिष्टमङ्कुलाप्तं तत् प्रग्रहणे ग्रहणकाले विधोश्चन्द्रस्य स्फुटा छाया स्यादन्यथाऽऽसन्ना स्वल्पान्तरा। अथोक्तवा चन्द्रसर्वग्रहणे उन्मीलनप्रवेश एव विधोर्दृङ्म-

चलतीय ऊर्ध्वप्रदेशस्तदैवानेन साधनेन स्फुटा छायाऽन्यथा तु स्थूलेत्याचार्योक्तं समीचीनमेवेति ।

अत्रोपपत्तिः । 'स्वभुक्तिलिप्तांशविवर्जितो ना महान् लघु'रित्यादिभास्करोक्तेन स्फुटा तत्र या स्थूलता सा कमलाकरेण सम्यगुपपादितेति तत्त्वविवेके तच्छायाधिकारो द्रष्टव्यः ॥ ७ ॥

इदानीं मध्यच्छायासाधनमाह ।

स्पष्टापक्रमभागैर्मध्यच्छायार्कवच्छशाङ्कस्य ।
शशिवद्भौमादीनामृक्षाणां तु स्वकक्षुवशात् ॥ ८ ॥

अर्कवच्छशाङ्कस्य मध्यच्छाया मध्याह्नच्छायाऽर्थाद्याम्योत्तरवृत्तस्थे चन्द्रे तस्य स्पष्टापक्रमभागैः साध्या । अर्थाद्यथा क्रान्त्यक्षांशसंस्कारेण रवेर्मध्यनतांशा उन्नतांशाश्च साधितास्ततः शङ्क्वनुपातेन मध्यच्छाया त्रिप्रश्नाधिकारे साधिता तथैव चन्द्रस्पष्टापमभागैर्याम्योत्तरवृत्तस्थे चन्द्रे तन्मध्यच्छाया साध्या शशिवद्भौमादीनां नक्षत्राणां च स्वकक्षुवशात् स्पष्टापमादिवशात् स्पष्टापमांशैश्छाया साध्येत्यर्थः ॥ ८ ॥

इदानीमुपसंहारमाह ।

इह नोद्दिष्टं यत् तदृग्लवि वक्ष्ये गतशेषनाडिकाद्येषु ।
आर्याभिर्नवभिरयं चन्द्रच्छायाऽष्टमोऽध्यायः ॥ ९ ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते चन्द्रच्छायाधिकारोऽष्टमः ॥ ८ ॥

इह चन्द्रच्छायाधिकारे यद्वस्तु नोद्दिष्टं तदृग्लवि चन्द्रेऽर्थाच्चन्द्रच्छायोत्तराधिकारे वक्ष्ये-इति । गतशेषनाडिकाद्येषु नवभिरार्याभिश्चन्द्रच्छायाऽयमष्टमोऽध्यायो गत इति ।

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितो भेन्दुविधौ सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्तनूतनतिलके चन्द्रच्छायाधिकारोऽष्टमः ॥ ८ ॥

Digitized by Google

अथ ग्रहयुत्यधिकारः ।

तत्रादौ ग्रहाणां मध्यविक्षेपकला मध्यमबिम्बकलाश्चाह ।

शून्येशा ११० यमतिथियः १५२

षडगाः ७६ षट्त्रीन्दवः १३६ खगुणचन्द्राः १३० ।

क्रान्तेर्विक्षेपकलाः कुजबुधगुरुशुक्ररविजानाम् ॥ १ ॥

(भूगजलिप्ता भक्ताः कुजादिदृश्यांशसंमितैर्लब्धाः ।

मध्यममानकलाः स्युः कुजबुधगुरुशुक्ररविजानाम् ॥ २ ॥)

स्पष्टार्थम् । 'विक्षेपलिप्ताः क्षितिजादिकाना'मित्यादि तथा 'व्यङ्घ्रीषवः सचरणा नतवः' इत्यादिभास्करोक्तमेतदनुरूपमेव ।

इहाचार्यमतेनोदयास्ताधिकारस्य ६ श्लोकेन पठितान् दृश्यांशान् संगृह्य भौमादीनां मध्यमबिम्बकलाः ।

भौ = $\frac{८१}{१७}$ = ४′ । ४६″ ॥ बु = $\frac{८१}{१३}$ = ६′ । १४″ ॥ गु = $\frac{८१}{११}$ = ७′ । २२″ ॥ शु = $\frac{८१}{९}$ = ९′ । ० ॥ श = $\frac{८१}{१५}$ = ५′ । २४″ ।

एवं भौ = ४′ । ४६″ ॥ बु = ६′ । १४″ ॥ गु = ७′ । २२″ ॥ शु = ९′ । ०″ ॥ श = ५′ । २४″ ॥ भास्करमतेन भौ = ४ । ४५ ॥ बु = ६ । १५ ॥ गु = ७ । २० ॥ शु = ९ । ० ॥ श = ५ । २० ॥

एता मध्यबिम्बकलाः प्रायः स्वल्पान्तरादाचार्योक्तसमा एव । यथात्र द्वितीयाऽऽर्या पुस्तकेषु नोपलभ्यते । मया वक्ष्यमाणं स्फुटमानकलानयनमाचार्योक्तं मनसि संप्रधार्याचार्यार्थप्रदायिनी द्वितीया नूतना रचिता । मूलपुस्तकेषु त्रुटिरस्ति । यत आचार्योक्तोपसंहारेऽस्मिन्नध्याये षड्विंशतिरार्या न पूर्यतेऽनया सह च पूर्यते । इति सुधीभिर्भृशं विचिन्त्यम् ॥ १–२ ॥

अथ बिम्बकलानां स्फुटीकरणमाह ।

व्यासार्धं संयुक्तं त्रिगुणान्त्यफलज्यया ऽन्त्यकर्णेनम् ।

Digitized by Google

यथासंख्यपाठात् । प्रथमपठितस्य मन्त्रस्य हि कैमर्थ्याकाङ्क्षायां प्रथमतो विहितं कर्मैव प्रथममुपतिष्ठते समानदेशत्वात् । यानि तु वैकृतान्यङ्गानि प्राकृताङ्गानुवादेन विहितानि प्राकृताङ्गाप्राकृताङ्गानुवादेन विहिताङ्गविध्योस्तादृशाङ्गप्रधानविध्योर्वा मध्ये न पठितानि तेषां विकृत्यर्थत्वं सन्निधिपाठात् । पशुधर्माणामग्नीषोमीयार्थत्वमनुष्ठानसादेश्यात् । औपवसथ्येऽहनि अग्नीषोमीयः पशुरनुष्ठीयते तस्मिन्नेव दिने ते धर्माः पठ्यन्ते अतस्तेषां कैमर्थ्याकाङ्क्षायामनुष्ठेयत्वेनोपस्थितपश्वपूर्वमेव भाव्यत्वेन संबध्यते । अतो युक्तमनुष्ठानसादेश्यात्तदर्थत्वं तेषामिति संक्षेपः । समाख्या यौगिकः शब्दः । सा द्विविधा वैदिकी लौकिकी च । तत्र होतुश्चमसभक्षणाङ्गत्वं होतृचमस इति वैदिक्या समाख्यया अध्वर्योस्तत्पदार्थाङ्गत्वं लौकिक्याऽऽध्वर्यवमिति समाख्ययेति । तदेवं निरूपितानां श्रुत्यादीनामुत्तरोत्तरं प्रति पूर्वपूर्वस्य प्राबल्यम् । तदुक्तम् । श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये परदौर्बल्यमर्थविप्रकर्षात् । समवाये समानविषयत्वेन द्वयोर्विरोधे परस्य दौर्बल्यं कुतः अर्थविप्रकर्षात् परस्य पूर्वव्यवधानेन प्रवृत्तेरित्यर्थः । अयं भावः एकत्र विनियुक्तस्य निराकाङ्क्षत्वादन्यत्र विनियोगो विरुद्ध एव परं तु विनियोजकप्रमाणयोः समबलत्वेऽन्यतरविनियोगत्यागायोगादगत्याऽऽकाङ्क्षोत्पादनेन विनियोगः स्वीक्रियते । यथा खादिरो यूपो भवति खादिरं वीर्यकामस्य यूपं कुर्यादिति वाक्याभ्यां क्रतौ विनियुक्तस्य खादिरत्वस्य फले विनियोगः । यत्र तु प्रमाणयोरतुल्यत्वं तत्र न स्वीक्रियते प्रबलेन दुर्बलविनियोगबाधात् । यथा कदाचन स्तरीरसि नेन्द्र सश्चसीत्यस्या ऋच ऐन्द्रया गार्हपत्य-

मुपतिष्ठतइति तृतीयाश्रुत्या ऽन्यनिरपेक्षया गार्हपत्योपस्थानशेषत्वबोधिकयेन्द्रप्रकाशनसामर्थ्यरूपलिङ्गप्राप्तमिन्द्रशेषत्वं बाध्यते । लिङ्गं हि न साक्षाच्छेषत्वं बोधयति । किं त्विन्द्रप्रकाशनमात्रं करोति । तेन च लिङ्गेनानेन मन्त्रेणेन्द्र उपस्थापयितव्य इति श्रुतिः कल्प्या तया शेषत्वबोध इति श्रुतिव्यवधानेन शेषत्वबोधकं लिङ्गं झटिति स्वार्थबोधकश्रुत्या बाध्यम् । तथा लिङ्गेन वाक्यं बाध्यं यथा स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति मन्त्रभागयोः प्रत्येकं सदनकरणे पुरोडाशासादने च तत्प्रकाशनसामर्थ्यलिङ्गेन श्रुतिद्वारा विनियोगे सति प्रतीतमेकवाक्यत्वं बाध्यते । तस्य कृत्स्ने ऽपि मन्त्रे सदनकरणप्रकाशनसामर्थ्यं पुरोडाशासादनप्रकाशनसामर्थ्यं च लिङ्गं कल्पयित्वा श्रुतिकल्पनयोभयत्र कृत्स्नविनियोगबोधने द्वाभ्यां लिङ्गश्रुतिभ्यां व्यवधानेन श्रुत्येकव्यवहितक्लृप्तलिङ्गाद् दुर्बलत्वात् । तथा वाक्येन प्रकरणं बाध्यम् यथा सान्हप्रकरणाम्नातद्वादशोपसदां द्वादशाहीनस्येति वाक्येनाहीनाङ्गत्वबोधकेन प्रकरणप्राप्तसान्हाङ्गत्वबाधादुत्कर्षः प्रधानस्याङ्गाकाङ्क्षारूपं प्रकरणं तस्याङ्गप्रधानवाक्यैकवाक्यतासामर्थ्यश्रुतिभिः कल्प्यमानाभिः स्वार्थविनियोगप्रमितौ व्यवधानेनाङ्गसामर्थ्यश्रुत्योर्द्वयोः कल्पकवाक्यात् दुर्बलत्वात् । तथा प्रकरणेन सन्निधिर्बाध्यः । यथा राजसूयप्रकरणेन तदन्तर्गताभिषेचनीयाख्यसोमयागविशेषसन्निधिपाठप्राप्तं शुनःशेफीयाख्यानादेरभिषेचनीयशेषत्वं बाधित्वा कृत्स्नराजसूयशेषत्वमापादितम् । सन्निधेः प्रकरणादिकल्पकत्वेन क्लृप्तप्रकरणात् दुर्बलत्वात् । तथा संनिधिना समाख्या बाध्यते ।

Digitized by Google

तथा हि पौरोडाशिकसमाख्याके काण्डे आग्नेयपुरोडाशादिकर्मणां क्रमेण मन्त्रा आम्नातास्तत्र दधिपयोरूपसान्नाय्यसन्निधौ शुन्धध्वं दैव्याय कर्मणइति मन्त्र आम्नातस्तत्र समाख्याबलेनास्य मन्त्रस्य पुरोडाशपात्रं शुन्धनशेषत्वं प्राप्तं सन्निधिना बाधित्वा सान्नाय्यपात्रशुन्धनशेषत्वमापाद्यते । पुरोडाशसंबन्धिकाण्डं पौरोडाशिकमिति समाख्यायाः काण्डान्तर्गतमन्त्रस्य पुरोडाशसंबन्धसामान्यबोधकत्वे ऽपि शेषशेषिभावरूपविनियोगबोधकत्वे सन्निध्याद्यपेक्षतया दुर्बलत्वात् । एवं च विरोधे सति श्रुतिर्बाधिकैव समाख्या बाध्यैव । मध्यानां तु पूर्वबाध्यत्वं परबाधकत्वं चेति श्रुतिलिङ्गसूत्रार्थः । तदेवं निरूपितानि विनियोगविधिसहकारीणि प्रमाणानि निरूप्यन्ते तद्बाध्यबाधकभावश्चोपपाद्यते । तत्र क्रमपरं वचनं श्रुतिः । तच्च द्विविधं केवलक्रमपरं तद्विशिष्टपदार्थपरं चेति । तत्र वेदं कृत्वा वेदिं करोतीति केवलक्रमपरम् । वेदिकरणादेर्वचनान्तरेण विहितत्वात् । वषट्कर्तुः प्रथमभक्ष इति तु क्रमविशिष्टपदार्थपरम् । एकप्रसरताभङ्गभयेन भक्षानुवादेन क्रममात्रस्य विधातुमशक्यत्वात् । सेयं श्रुतिरितरप्रमाणापेक्षया बलवती । तेषां वचनकल्पनद्वारा क्रमप्रमाणत्वात् । अत एवाश्विनस्य पाठक्रमात्तृतीयस्थाने ग्रहणप्रसक्तौ अश्विनो दशमो गृह्यतइति वचनाद्दशमस्थाने ग्रहणमित्युक्तम् १ । यत्र प्रयोजनवशेन निर्णयः स आर्थक्रमः । यथा ऽग्निहोत्रहोमयवागूपाकयोः । अत्र हि यवाग्वा होमार्थत्वात्तत्पाकः प्रयोजनवशात्पूर्वमनुष्ठीयते । स चायं पाठक्रमाद्बलवान् । यथापाठे ह्यनुष्ठाने क्रमप्रयोजनबाधः अदृष्टार्थत्वं च स्यात् । न हि होमानन्तरं क्रियमाणस्य किं चिद्दृष्टप्रयोजनमस्ति २ । पदार्थबोधकवाक्यानां

Digitized by Google

यः क्रमः स पाठक्रमः ततः पदार्थानां क्रम आश्रीयते । स च पाठो द्विविधः । मन्त्रपाठो ब्राह्मणपाठश्च । तत्राग्नेयाग्नीषोमीययागयोस्तस्याज्यानुवाक्याक्रमाद्यः क्रम आश्रीयते स मन्त्रपाठात् । सोऽयं ब्राह्मणपाठाद्बलवान् । अनुष्ठाने ब्राह्मणवाक्यापेक्षया मन्त्रवाक्यस्यान्तरङ्गत्वात् । ब्राह्मणवाक्यं हि प्रयोगाद्बहिरेवेदमेवं कर्त्तव्यमित्येवमवबोध्य कृतार्थमिति न पुनः प्रयोगकाले व्याप्रियते मन्त्राः पुनरनन्यप्रयोजनाः प्रयोगसमवेतार्थस्मारकाः ३। प्रकृतौ नानादेशानां पदार्थानां विकृतौ वचनादेकस्मिन्देशे ऽनुष्ठाने कर्त्तव्ये यस्य देशे ऽनुष्ठीयन्ते तस्य प्रागनुष्ठानमितरयोस्तु पश्चादिति क्रमः स्थानक्रमः । स्थानं नामोपस्थितिः । यस्य हि देशे ऽनुष्ठीयन्ते तत्पूर्वतने पदार्थे कृते स एव प्रागुपस्थितो भवतीति युक्तं तस्य प्रागनुष्ठानम् ४। प्रधानक्रमेणाङ्गक्रमो मुख्यक्रमः । येन क्रमेण प्रधानानि क्रियन्ते तेनैव चेत्क्रमेण तेषामङ्गान्यनुष्ठीयन्ते तदा सर्वेषामङ्गानां स्वैः प्रधानैस्तुल्यं व्यवधानं भवति व्युत्क्रमेण त्वनुष्ठाने केषां चिदङ्गानां स्वैः प्रधानैरत्यन्तमव्यवधानम् अन्येषामत्यन्तं व्यवधानं च स्यात् तच्चायुक्तं प्रयोगविध्यवगतसाहित्यबाधापत्तेः । अतः प्रधानक्रमो ऽप्यङ्गक्रमे हेतुः । स चायं मुख्यक्रमः पाठक्रमाद् दुर्बलः । मुख्यक्रमो हि प्रमाणान्तरसापेक्षप्रधानक्रमप्रतिपत्तिसापेक्षतया विलम्बितप्रतिपत्तिः । पाठक्रमस्तु निरपेक्षस्वाध्यायपाठक्रममात्रसापेक्षतया न तथेति बलवान् । प्रवृत्तिक्रमात्तु बलवानयम् । प्रवृत्तिक्रमे ह्याश्रीयमाणे बहूनामङ्गानां प्रधानविप्रकर्षो भवति मुख्यक्रमे त्वाश्रीयमाणे सन्निकर्षः ५। सह प्रयुज्यमानेषु प्रधानेषु सन्निपातिनामावृत्त्या ऽनुष्ठाने कर्त्तव्ये द्वितीयादिपदाथानां प्रथमानुष्ठित-

Digitized by Google

पदार्थक्रमाद्यः क्रमः स प्रवृत्तिक्रमः ६। तदेवमेतेषु बाध्यबाधकभावस्य संप्रतिपादनान्मात्स्यन्यायोदाहरणत्वसामञ्जस्यम्। यथा च तिमिंगिलगिलो ऽप्यस्ति तद्गिलो ऽप्यस्ति राघव इत्युक्तेस्तिमिंगिलबाधकस्य राघवस्य सुतरां तद्बाध्यतिमिंगिलादिबाधकत्वं तथा लिङ्गादिबाधकस्य श्रुत्यादेः सुतरां तद्बाध्यवाक्यादिबाधकत्वमिति सर्वमनवद्यम्। ननु श्रुत्यादिभिर्न हि बाध्यमित्येवं लिङ्गादि बाध्यते किं तु सति विरोधे मत्स्यैस्तु दुर्बलमात्रं बाध्यते तथा च कथमुदाहरणसंगतिरिति चेन्न तद्बाध्यबाधकभावस्यापि विरोधपुरःसरत्वात्। न हि तैः पुत्रपौत्रादयो ऽपि बाध्यन्ते किं तु प्रत्युत लाल्यन्तइति वैष्णवे सौभरेराख्याने प्रसिद्धमिति सर्वं सुस्थमिति मात्स्यन्यायः ३९। ५४।

यत्र निर्बलेनापि प्रबलसहायेन प्रबलो बाध्यते तत्र अत्यन्तबलवन्तो ऽपि पौरजानपदा जनाः। दुर्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैरिति न्यायो ऽवतरति। स्पष्टार्थो ऽयम्। उदाहरणं तुश्रुत्यपेक्षाया दुर्बलाया अपि स्मृतेराचमनरूपप्रबलपदार्थाश्रितत्वेन प्राबल्यम् अतः श्रौतक्रमत्यागेन वेदकरणानन्तरं क्षुते आचमनमेव कार्यमिति दिक्। ४०। ५६।

यत्रान्यत्रातिप्रसक्तादवयवार्थालोचनसव्यपेक्षाद्योगात्समुदायशक्तेः प्राबल्यं विवक्ष्यते तत्र रूढिर्योगमपहरतीति न्यायः। यथा गौरित्यादावन्यत्रातिप्रसक्तप्रकृतिप्रत्यायार्थलोचनसव्यपेक्षगमनकर्तृत्वादिरूपयोगार्थत्यागेन रूढ्या सास्नादिमती व्यक्तिर्गृह्यते तथा वर्षासु रथकारो ऽग्नीनादधीतेत्यत्र रथकारशब्देन व्रात्यवैश्योत्पन्नो

वर्णविशेष उच्यते न तु रथं करोतीति व्युत्पत्त्या द्विजातय इति संक्षेपः । ४१ । ५७ ।

श्रुतयौगिकार्थलाभे सत्यनन्वितरूढार्थस्त्याज्य इति न्यायो विशेषतया ऽस्य बाधकः । दृश्यते हि मण्डपं भोजयेत्यत्र मण्डं पिबतीति यौगिकार्थलाभेनानन्वितगृहरूपरूढार्थत्यागः । ४२ । ५८ ।

एवं प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यमिति न्यायः सामान्यविषयः । औपगवो याचक इत्यादौ हि प्रत्ययार्थस्यापत्यकर्त्रादिरूपस्य प्राधान्यं यातीत्यादिक्रियान्वयात् । एवमन्यत्रापि बोध्यम् । ४३ । ५९ ।

भावप्रधानमाख्यातमिति न्यायः । ४४ । ६० ।

इच्छेष्यमाणसमभिव्याहारइष्यमाणस्यैव प्राधान्यं न त्विच्छाया इति न्यायश्च तद्बाधकः । अश्वेन जिगमिषति असिना जिघांसतीत्यादौ यथेष्यमाणस्य गमजहननादेः प्राधान्यात्तत्रैवाश्वास्यादेः करणत्वेनान्वयस्तथा तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा ऽनाशकेनेत्यत्रेष्यमाणस्य वेदनस्य प्राधान्यात्तत्रैव वेदानुवचनादेर्विनियोग इति दिक् । ४५ । ६१ ।

एतेन कामनागोचरत्वेन शाब्दे बोधएव शाब्दसाधनतान्वय इयि न्यायो ऽपि व्याख्यातः । ४६ । ६२ ।

नन्विच्छागोचरत्वस्य मोक्षसाधारणत्वात्तत्रैव यज्ञादिविनियोगः कुतो न स्यादिति शङ्कानिरासाय शाब्दी ह्याकाङ्क्षा शब्दैनैव पूर्यतइति न्यायः । ४७ । ६३ ।

न हि शाब्दमशाब्देनान्वेतीति न्यायश्च प्रवर्तते दृपष्ठावुभौ । ४८ । ६४ ।

यत्रैकपदवाक्यार्थस्य सारासारभूतमंशद्वयमस्ति त्या-ज्यासाराविनाभूताभीष्टसारजिघृक्षया च तदविनाभूतम-सारमप्यादौ गृह्यते त्यज्यते च गृहीते सारे तत्र म त्स्यक-ण्टकन्यायः । यथा मत्स्यमांसार्थी तत्संबद्धान्कण्टकादी-नपि तावद्गृह्णाति त्यजति च तस्मिन् गृहीते । तथा तत्त्वं-पदलक्ष्यार्थजिघृक्षया तदुपाधी अपि गृह्येते त्यज्येते च भागत्यागलक्षणया सति लक्ष्यार्थग्रहे । उपपादितो ऽय-मर्थः प्राक् । ४६ । ६५ ।

धान्यपलालन्यायो ऽपीदृशः । ५० । ६६ ।

अर्द्धं त्यजति पण्डित इति न्यायो ऽपि भागत्याग-लक्षणास्थलएव प्रसरति । ५१ । ६७ ।

तत्त्वंपदलक्ष्यार्थाभेदे ऽन्यतरपदवैयर्थ्यमिति शङ्को-च्छेदाय पदमप्यधिकाभावात्सारकान्न विशिष्यतइति न्यायो ऽवतरति । तथा च लक्ष्यार्थबोधे प्रमात्वसंपादक-तया पदान्तरसाफल्यमिति बोध्यम् । ५२ । ६८ ।

कुत उपाधेरेव त्यागनियमः । नेतिनेतीत्यादिनिषे-धान्यथाऽनुपपत्त्या सर्वतो बलवती ह्यन्यथाऽनुपपत्ति-रिति न्यायेन तस्मिन्मिथ्यात्वावधारणात् । सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्यय इति न्यायाच्च । ५३ । ६९ ।

सर्वत इति प्रासङ्गिकः । १ । ७० ।

आत्मतादात्म्यापन्नस्यानात्मनो नेतीत्यादिनिषेध-वाक्यैर्बाधे कथं तत्तादात्म्यापन्नस्यात्मनो न बाधः स्या-दिति शङ्कापाकरणाय नागोष्ट्रन्यायावतारः । यथा कश्चि-दुष्ट्रपतिरजगरेण वेष्टितमुष्ट्रं रक्षन्बाणैरजगरं जघानेति लौ-किकी गाथा तथा निषेधवाक्यानि बाधावधित्वेनात्मानं रक्षन्त्यनात्मानं बाधन्तइति । ५४ । ७१ ।

Digitized by Google

स्वमते परेणोद्भाव्यमानानां दूषणानां तन्मते पातने उष्ट्रलगुडन्यायावतारः । यथोष्ट्रेणोह्यमानेनैव लगुडेन तत्प्रहारः क्रियते तथा तार्किकोत्थापितदूषणैस्तन्मतमेव वेदान्तिभिर्निराक्रियते । तथा हि । अद्वैतवादे यद्भोगसांकर्यादिरूपदूषणं तैरुच्यते तदौपनिषदैर्विभ्वनेकात्मवादिनां तेषामेव मते पात्यते तद्यथा यदैकेनात्मना मनः संयुज्यते तदात्मान्तरैरपि तत्संयोगस्यावश्यकत्वेन तदविशेषात्सुखादेरप्यविशेषः स्यात् । अदृष्टाभिसंध्यादेरपि सर्वसाधारणमनःसंयोगासमवायिकारणकत्वेन व्यवस्थापकत्वाभावात्सांकर्यं दुष्परिहरमिति संक्षेपः । ५५ । ७२ ।

एकतान्त्रिकमतनिरासाय प्रयुक्तया युक्त्या तत्सदृशमतान्तरनिराकरणं यदा विवक्ष्यते तदा पुष्टलगुडन्यायप्रवृत्तिः यथा बहूनां मध्यएकस्य शुनः प्रहारार्थं प्रक्षिप्तः पुष्टलगुडस्तं प्रहृत्यान्यानपि प्रहरति । तथा ब्रह्मकारणवादिभिः सांख्याभिमतप्रधानकारणवादनिरासाय प्रयुक्ता ईक्षतेर्नाशब्दम् रचनाऽनुपपत्तेश्च नानुमानमित्यादिसमन्वयाविरोधाध्यायगतसूत्रस्था युक्तयस्तं निरस्य योगाभिमतप्रधानकारणवादमपि साम्यान्निराकुर्वन्तीति दिक् । ५६ । ७३ ।

जामात्रर्थं श्रपितस्य सूपादेरतिथ्युपकारकत्वमिति न्यायः । ५७ । ७४ ।

गृहार्थमारोपितस्य दीपस्य रथ्योपकारकत्वमिति न्यायश्चेह प्रवर्त्तते । ५८ । ७५ ।

एवं तुलोन्नमनन्यायो ऽपि बोध्यः । यथा हि तुलायाः पश्चिमभागस्याधस्तात्कनिष्ठिकाद्याघातेनोन्नमने कृते सति पूर्वभागस्य नमनं यत्नान्तरमन्तरेणैव भवति तथैक-

स्मिन्परमार्थद्वैतवादिनि जिते ऽन्ये विनैवोद्यमं जिता भवन्तीति । ५६ । ७६ ।

एकस्मिन्प्रधाने प्रतिवादिनि जिते ऽन्ये सुखेन जेतुं शक्यन्तइतीदृग्विषये प्रधानमल्लनिबर्हणन्यायः मल्ला बाहुयुद्धविशारदास्तेषु प्रधानस्य निबर्हणं भूमौ प्रतिष्ठापनं तत्पृष्ठभागस्य तया संयोजनमिति यावत् जयकामेन प्रथमं क्रियते तस्मिन्निगृहीते हि तदपेक्षया दुर्बलानामन्येषां जयः सुकर इति न्यायार्थः । ६० । ७७ ।

याभिर्युक्तिभरतिप्रबलशुष्कतर्ककर्कशत्वेन प्रसिद्धो ऽपि द्वैतसत्यत्ववादी वैशेषिकादिर्जय्यस्ताभिरितरे क्षुद्राश्चार्वाकादयस्तु दूरतो निरस्ता भवतीन्ति विवक्षायामाषाढवाते चलति द्विपेन्द्रे चक्रीवतो वारिधिरेव काष्ठेति न्यायप्रवृत्तिः । चलतीति सप्तम्यन्तं पदं देहलीदीपन्यायेनोभयत्र संबध्यते । चक्रीवान् गर्दभः । चक्रीवन्तस्तु वालेया रासभा गर्दभाः खरा इत्यभिधानात् । स्पष्टमन्यत् । ६१ । ७८ ।

देहलीति प्रासङ्गिको ऽत्र । यथा देहल्यां धृतो दीपो बाह्यमाभ्यन्तरं च देशं प्रकाशयति तथा मध्ये निक्षिप्तं पदमुभाभ्यां साकाङ्क्षपदाभ्यां संबध्यतइत्यर्थः । १ । ७९ ।

काकाक्षिन्यायो ऽपीह बोध्यः । काकस्यैकमेव चक्षुरिन्द्रियं गोलकद्वये ऽपि क्रमेण यथा संबध्यते तथा प्रकृते ऽपीत्यर्थः । २ । ८० ।

आषाढवातन्यायविषये कैमुतिकन्यायो ऽपि वर्त्तते। इयांस्तु विशेषो यत्पूर्वो दृष्टान्तदार्ष्टान्तिकयोर्निन्दायां पर्यवस्यति अयं तु स्तुतिनिन्दोभयसाधारणः । तत्र निन्दायां पूर्वमेवोदाहरणं बोध्यम् । स्तुतौ तु मां हि पार्थ-

त्यादि भगवद्गीतायाः सार्द्धश्लोक उदाहरणम् । अपि चेत्सुदुराचार इत्यादावपिशब्देन द्योतितो ऽयं न्यायः सर्वैर्ग्रहैर्गृहीतान्वै सर्वपापसमन्वितान् । स मोचयति सुप्रीतः शरण्यः शरणागतानित्यादावर्थलभ्यः । यदि सदाशिवः सर्वपापयुतानपि शरणागतान्मोचयति तदा ऽल्पपापान्वितान्साधून्वा शरणागतान्मोचयतीति किमु वक्तव्यमिति । ६२ । ८१ ।

मां हि पार्थेत्यादिकैमुतिकन्यायोदाहरणेषु पुण्ययोनयो ब्राह्मणाः क्षत्रियाश्चेशव्यपाश्रयाः सन्तः सुतरां मोक्षं यान्तीत्याद्यर्थसिद्धं दण्डापूपिकान्यायेन दण्डाकर्षणेन तदवलम्बिनामपूपानामाकर्षणं यथा ऽर्थसिद्धं तद्वदित्यर्थ इति केचित् । अन्ये त्वपूपवन्तं दण्डमानयेति स्वाम्यनुशासनाद्गतो भृत्यो मूषकैः किं चित्कचितं दण्डं दृष्ट्वा दण्डस्तु भक्षितो मूषकैरित्युवाचेति लौकिकी गाथा तथा च यथा तद्वाक्यादेवापूपभक्षणं सुखेन प्रतीयते तथा प्रकृतेपी- ऽत्याहुः । ६३ । ८२ ।

घुणाक्षरन्यायादारभ्यैतत्पर्यन्तानां न्यायानां साम्ये ऽपि यत्किंचिद्विशेषमादायाणुरपि विशेषो ऽध्यवसायकर इति न्यायेन भेदसिद्धिर्भिन्नोदाहरणत्वसिद्धिश्च केषांचिदिति बोध्यम् । ६४ । ८३ ।

यत्रायासं विना साक्षात्सिध्यन्तमर्थमुपेक्ष्यायासेन परम्परया स एवार्थः साध्यते तत्र दण्डसर्पमारणन्यायावतरणम् । कश्चित्सर्पं दृष्ट्वा तन्मारणाय दण्डमिच्छंस्तमलभमानश्च कुठारं गृहीत्वा तच्छेदाय प्रवर्त्तते । तस्य यथा ऽऽयासो वृथा कुठारेणैव सर्पस्य शक्यवधत्वात् । तथा यया युक्त्या रज्जुसर्पादिसंसर्गस्यानिर्वचनीयत्वं प्रसाध्य

Digitized by Google

तद्दृष्टान्तेन सर्पाद्यनिर्वचनीयत्वं साध्यते तयैव सर्पाद्यनिर्वचनीयत्वस्य सुसाध्यत्वात्संसर्गानिर्वचनीयत्वसाधनायासो वृथैत्यादि । ६५ । ८४ ।

बकबन्धनन्यायो ऽपीह प्रवर्त्तते । बकं जिघृक्षुः कश्चित्सूर्यरश्मिसंतप्ते तच्छिरसि नवनीतं निधाय विलीनेन तेन तन्नेत्रयोः पूर्णयोरन्धीभूतं जिघृक्षति तस्य यथा नवनीतप्रक्षेपायासो वृथा तं विना ऽपि तदैव ग्रहीतुं शक्यत्वात्तथा प्रकृते ऽपीत्यर्थः । ६६ । ८५ ।

अन्त्ये रण्डाविवाहश्चेदादावेव कुतो न स इति न्यायः । ६७ । ८६ ।

ऋजुमार्गेण सिध्यतो ऽर्थस्य वक्रेण साधनायोग इति न्यायः । ६८ । ८७ ।

शिरोवेष्टनेन नासिकास्पर्शन्यायश्चापीदृशः । अत्र भुजयेत्यादिः । स्पष्टमन्यत् । अयमेव कैश्चिद् द्रविडप्राणायामन्यायो ऽभिधीयते । ६९ । ८८ ।

यत्र न्यायात्सर्वत्यागे ग्रहणे वा प्रसक्ते निर्युक्तिकमेकांशोपादानमंशान्तरत्यागश्च क्रियते तत्रार्द्धजरतीन्यायप्रयोगः । जरत्या वृद्धायाः स्त्रियाः पतिस्तदर्द्धं मुखमात्रं गृह्णाति अवयवान्तरं त्यजतीति यथा युक्तिशून्यं तथा यथाप्तवचनत्वेनागमप्रामाण्यमुपगच्छन्ति तेषां बुद्धवचसामपि प्रामाण्यप्रसङ्गः । वेदस्यापि वा ऽप्रामाण्यापत्तिः यदि चेश्वरवचनत्वसाम्ये ऽपि वेदस्य प्रामाण्यमप्रामाण्यं च बुद्धवचनस्याङ्गीक्रियते तदेदमपि युक्तिशून्यम् । ७० । ८९ ।

तदसंभवविवक्षायामर्द्धवैशसन्यायः । यथा कुक्कुटीमांसभोजनकामस्तत्संततिकामश्च कश्चिदयमस्तद्ग्रीवादिकं छित्त्वा भुङ्क्ते उदरं च संतानार्थं स्थापयति तद् यथा न संभवति तथा प्रकृते ऽपीत्यर्थः । ७१ । ९० ।

एकत्र विरुद्धानेकधर्मसमावेशासंभवविवक्षायां तु सुभगाभिक्षुकन्यायः । यथा सुभगत्वं भिक्षुकत्वं च पुंस्त्वं च तथाविधपदद्वयसामानाधिकरण्यात्प्रतीयमानमपि विरुद्धत्वादेकस्मिन्युगपन्न संभवति तथैकस्मिन्नीशरूपाप्तवचने प्रामाण्याप्रामाण्यलक्षणं विरुद्धं धर्मद्वयं न संभवतीति केचित् । अन्ये तु यथा सुभगाभिक्षुकौ प्रबलघातकभयात्कंचिच्छरणं प्रपन्नौ स च शरणागतत्यागदोषश्रवणात् सर्वप्रयत्नेनोभयो रक्षणे प्रबलारिकृतस्वघातभयेन त्यागे वा प्राप्ते ऽपि सुभगां रक्षति भिक्षुकं त्यजतीति यत्तत्र तस्येच्छैव नियामिका न तु किं चिद्विनिगमकमस्ति तथा प्रकृते ऽपीशवचनत्वादुभयोः प्रामाण्ये पौरुषेयत्वान्मूलप्रमाणसापेक्षतया धर्मादौ तदभावादप्रामाण्ये वा प्राप्ते ऽप्युक्तविभागे तार्किकेच्छैव नियामिकेत्यर्थमाहुः । ७२ । ६१ ।

एवं स्मृत्यादि दृष्ट्वा ऽऽगममूलकतया प्रामाण्यं न तु ऋषिवचनत्वादिना बृहस्पतिप्रणीतनास्तिकशास्त्राणामपि प्रामाण्यापत्तेरित्यादि स्वयमूह्यम् । एकत्र निर्णीतः शास्त्रार्थो ऽन्यत्रापि तथेति न्यायात् । ७३ । ६२ ।

यत्र स्वमतविरुद्धेषु बहुषु मतेष्वेकेन प्रबलवादिमतेन मतान्तरं निरस्य तत्स्वयं निरस्यते तैर्दूषितं च स्वमतं सद्युक्तिभिः सम्यक् स्थाप्यते तत्र कण्टकन्यायप्रवृत्तिः । कण्टकाः प्रसिद्धाः शत्रवश्च तत्र प्रथमपक्षे पादप्रविष्टं कण्टकं तथा दृढेन कण्टकान्तरेण निष्कास्यानेनापि कालान्तरे पीडा मा भवत्विति तमप्यग्न्यादौ प्रक्षिपन्ति प्रथमं पादलग्नेन तदुद्धारायानुप्रविष्टेन च कृतं व्रणादिकं यथा योग्योपायैरुपशमं नयन्ति । द्वितीयकल्पे च तथा ये शत्रवः स्वदेशोपद्रवं कृतवन्तस्तदपेक्षया प्रबलममित्रान्तरं साम-

दानरूपोपायेन वशीकृत्य तद्द्वारा तान्यराजित्य भेददण्ड-रूपोपायेन तमपि पराजयन्ते तैः कृतं स्वप्रजोत्सादना-द्युपद्रवं च स्वस्वस्थाने स्थापनादिना दूरीकुर्वन्ति नीति-निपुणा नृपाः। तथौपनिषदा असख्यात्यात्मख्यात्य-सत्ख्यातिवादानन्यथाख्यातिवादेन निरस्य तमपि नि-राकुर्वन्ति अनिर्वचनीयख्यातौ तैस्तर्कितं च दूषणगण-मुद्धरन्तीति न्यायोदाहरणसङ्गतिः। तत्प्रकारस्तु ग्रन्थवि-स्तरभयान्नेह तन्यते। ७४। ६३।

बाध्यं प्रबाध्य स्वयमेव बाधकनिवृत्तौ विवक्षितायां तु जलकतकरेणुन्यायः। यथा हि सपङ्कजले निक्षिप्ताः कतकस्यौषधिविशेषस्य रेणवो रजांसि तस्माज्जलात्पङ्कं वि-लाप्य स्वयमेव विलीयन्ते तथा तत्त्वज्ञानं सविलासाज्ञानं निवर्त्त्य स्वयमेव निवर्त्तते। ७५। ६४।

दग्धेन्धनवह्निन्यायेऽपीह बोध्यः। दग्धानीन्धनानि येन सोऽग्निर्यथा स्वयमेव शाम्यति तथेति पूर्ववत्। ७६। ६५।

नन्वज्ञानबाधके ज्ञाने विनष्टे पुनरज्ञानोदयेन बन्ध-प्रसङ्ग इति शङ्कायां देवदत्तहन्तृहतन्यायावतारः। यथा देवदत्तहन्तरि हतेऽपि न देवदत्तस्य जीवनं तथा प्रकृते ऽपि। ७७। ६६।

इदं च तुष्यतु दुर्जन इति न्यायेनोपगम्योक्तं वस्तुत-स्त्वज्ञानस्यानादित्वात्तदुदयशङ्कैव नोचिता। ७८। ६७।

ननु यन्निवृत्तिमदस्तु तदुत्पत्तिमदपीति न्यायाद्वि-नाशिनोऽज्ञानस्योत्पत्तिरपि संभाव्यतइति चेत्तर्हि सर्वं कार्यं सकारणकमिति न्यायाद्भावकार्यस्य तत्पूर्वकत्वनियमात्तस्य किं चित्कारणं वाच्यम्। तच्च किमज्ञानं ब्रह्म वा

आद्ये किमिदमेवाज्ञानं किमन्यद्वा आद्ये आत्माश्रयः द्वितीये ऽनवस्थाइत्युभयतःपाशा रज्जुरिति न्यायापातः। आद्यद्वितीये शुद्धं ब्रह्म तत्कारणं विशिष्टं वा नाद्यः मुक्तस्यापि पुनर्बन्धापत्तेः । द्वितीये ऽप्यज्ञानं विशेषणमन्यद्वा आद्ये अज्ञाने ऽप्यज्ञानकारणत्वापत्तिः विशिष्टवृत्तेर्धर्मस्य विशेषणवृत्तित्वनियम इति न्यायात्। अन्यथा व्यापकव्यावृत्त्या व्याप्यव्यावृत्तिरिति न्यायेन कारणत्वधर्मस्य विशिष्टवृत्तित्वाभावापत्तेः। न द्वितीयः । अन्यस्य सर्वस्याज्ञानकार्यत्वेन ततः प्रागसत्त्वात्। व्यभिचारी चायं यन्निवृत्तिमदिति न्यायोक्तो नियमः प्रागभावइति दिक्। ७। ६८।

अथ प्रासङ्गिकाः यन्निवृत्तिमदिति न्या० । १ । ६६ ।

उभयतः पाशारज्जुरितिन्या० यथा मृगादिबन्धनायोभयत्र कृतपाशायां रज्जौ प्रविष्टं मृगादि कुतश्चिदपि मार्गाद्गन्तुं न शक्नोति तथा प्रकृते ऽपि । २ । १०० ।

विशिष्टवृत्तेरिति न्या० । दृश्यते हि कुण्डली यातीत्यादौ विशिष्टवृत्तेर्धर्मस्य गत्यादेः कुण्डलादिरूपविशेषणवृत्तित्वम्। कुण्डली भुङ्क्तइत्यादौ तु कुण्डलादेरुपलक्षणत्वाद्विशेष्यस्यैव भोजनान्वयः । न च पदार्थः पदार्थेनान्वेति न पदार्थैकदेशेनेति न्यायात्तदनुपपत्तिः । तदपवादभूतेन व्यक्तिन्यायेन तदुपपत्तेः । स्वीक्रियते हि जातिविशिष्टव्यक्तौ शब्दशक्तिमुपगच्छद्भिरपि तार्किकैर्गौरनित्येत्यादौ पदार्थैकदेशस्यापि व्यक्तेरनित्यत्वाद्यन्वयः। पुरोडाशकपालेनेत्यादौ मीमांसकैरपि । तथा च परोपमतं पदार्थैकदेशान्वयं निराकृत्य स्वयं तदुपगच्छन्तः श्वश्रूनिर्गच्छोक्तिन्यायविषयतां नातिवर्त्तन्ते यथा भिक्षा-

Digitized by Google

मटते वटवे भिक्षां प्रत्याचक्षाणां स्वस्नुषां भर्त्सयित्वा श्वश्रूः पुनस्तमाहूय समागते तस्मिन्नास्ति भिक्षा निर्गच्छेति तथैव प्रत्याचष्टे। तथैते ऽपीत्यर्थः। ३। १०१।

अत्राप्यनुप्रसक्तं न्यायत्रयं व्याख्यातम्। ४। १०२। ५। १०३। ६। १०४।

व्यापकेतिस्पष्टः। ७। १०५।

प्रकृतमनुसरामः। इदं सविलासाज्ञानं ज्ञानेन बाधितं सद्गजभुक्तकपित्थन्यायेन न ज्ञायते कुत्र गतमिति गजभुक्तं हि कपित्थफलं तदुदरादभग्नमेव निःसरति तच्च भग्नं सन्मज्जादिशून्यं प्रक्षालितमिवाभातीति प्रसिद्धम्। तथा च यथा निरिछद्रादतिकठिनात्तस्मादतिसान्द्रं तन्मज्जादि कथं निःसृतमिति न तर्कगोचरतामेति तथा तत्त्वबोधबाधितं तत्कुत्र गतमिति न तर्कितुं शक्यमित्यर्थः। ८। १०६।

सति तत्त्वज्ञाने सविलासाज्ञानं बाध्यमिति किं वाच्यं तत्त्वज्ञानात्प्रागप्यवाङ्मनसगम्ये निर्विकल्पे शुद्धाद्वितीये सच्चिदानन्दघने परे ब्रह्मणीदं दृश्यं सावयवमशुद्धमसज्जडदुःखात्मकं कथमासीदित्यपि नारिकेलफलाम्बुन्यायेन न तर्कगोचरत्वं याति। यथा ऽतिदृढावयवसंयोगवति नारिकेलफले जलं कथमागतमिति न तर्कगोचरतामेति तथा पूर्वोक्ते ब्रह्मणि तद्विपरीतद्वैतं कथमासीदित्यपि न तर्कितुं पार्यतइति न्यायसंगतिः। ८१। १०।

किं चेदमप्यन्यद्भुक्तमन्यद्वान्तमिति न्यायान्मुमुक्षूत्साहवर्द्धनार्थमेव किं चिदुच्यते तैः। वस्तुतस्तु तदनुभूतं वस्तु न शब्दशक्यम्। कथं तर्हि तद्बोधः लक्षणयेत्यवेहि उपपादितमिदं प्राक्। न्यायस्तु निगदव्याख्यातः। ८२। १०८।

द्वैतबाधकबोधस्यापि बाधो निरूपित इति न तेनापि द्वैतशङ्का । ये त्वाचार्या बाधज्ञानस्य बाध्यबाधकभेदेन द्वे रूपे तत्र बाध्यरूपेणाज्ञानादिवत्तदपि बाध्यं रूपान्तरेण च बाधकम् तथा च न कर्मकर्तृभावविरोधो ऽपि । न चाविशिष्टेन बाधकरूपेण द्वैतापत्तिः बाध्यरूपाद्भेदाभावेनास्य तद्बाधे ऽवस्थानायोगादिति मन्यन्ते तेषां स्वप्नव्याघ्रन्यायो ऽवतरति स्वप्ने दृष्टो व्याघ्रो हि स्वप्नं विलाप्य तत्र वर्त्तमानेन बाध्यरूपेण स्वयमपि विलीयते बाधकरूपस्यापि च बाध्यरूपाद्भेदाभावेनानवशेषः । ८३ । १०९ ।

ननु सविलासाज्ञानबाधकस्वभावत्वं चेद्बोधस्य तदा स्वभावो दुरतिक्रम इति न्यायात्तस्य तत्त्वज्ञानोदयानन्तरं सविलासाज्ञानबाधनाद्देहपातस्तात्कालिकः स्यात् । तथा चोच्छिन्नसंप्रदायत्वादुपनिषदामबोधकत्वलक्षणाप्रामाण्यप्रसङ्ग इति शङ्कानिरासाय यदा ज्ञानस्य नाशे ऽप्यारब्धकर्मणा प्रतिबन्धान्न देहादिक्षयः प्रारब्धकर्मणश्च भोगलक्षणकार्यक्षयादेव क्षय इति समाधीयते तदेषुवेगक्षयन्यायप्रवृत्तिः । धनुषः सकाशान्मुक्तस्येषोर्बाणस्य कर्मणः प्रारब्धवेगक्षयादेव क्षय इति प्रसिद्धम् । ८४ । ११० ।

अत्र स्वभाव इति प्रासङ्गिकः । १ । १११ ।

चक्रभ्रमणन्यायो ऽपीह बोध्यः । चक्रभ्रान्तिहेतौ कुलालव्यापारे निवृत्ते ऽपि हि भ्रान्तिक्षयो वेगक्षयादेव भवति । ८५ । ११२ ।

ननु कर्मोपादानकारणयोरिषुचक्रयोर्नाशाभावाद्युक्तं तस्य वेगक्षयपर्यन्तमवस्थानं धनुःकुलालव्यापृत्योस्तन्निमित्तत्वान्निमित्तापाये च कार्यापायादर्शनादज्ञानस्य च देहाद्युपादानत्वात्तदपाये कारणनाशे कार्यनाश इति न्यायेन

quarters, i. e. in the bile situated in the eye; just as a bird that has soared to a great height in the sky becomes visible even to persons who did not observe it rising from the ground (श्येनवत्). But the illustration is inappropriate; for if these observers place their eyes close to the disordered eye of the first observer, they are near the yellow colour of the bilious eye, and, therefore, (as the illustration implies) they should see the yellow colour, —which, however, is not the case.

Even so, taking all those cases of adhyāsa in which dark colour e. g. is predicated of pure water or of colour-less ether &c., it cannot be said that what is here falsely predicated is an object present to the visual organ; and since the opponent will not admit that in such cases there is a single vṛtti of the visual organ taking the form of the real object *plus* the dark colour in relation with it, he cannot meet the Bhaṭṭa's original objection that in all such cases the visual organ is unnecessary.

And similarly, in regard to the bitter flavour tasted in sweet milk by the new born infant, the Pañcapādikā, explaining this case of adhyāsa as due in part to the mental retentum of bitter flavour which the child had tasted in a former life, makes it clear that a vṛtti of the organ of taste has taken the form of the bitter flavour which is *per se* now falsely predicated (by the child): for if the existence of this vṛtti be denied, it becomes impossible to explain why the functioning of the taste-organ is necessary in this case at all—(for all writers agree that the taste-organ can make known *qualities* only, and not a *substance*, i. e. milk).

Reverting to the cases in which dark colour is falsely predicated, since the necessity for the functioning of the

Digitized by Google

visual organ in regard to them cannot be explained by the opponent's theory (तस्मात्), we are forced to admit (says the Bhaṭṭa) that the falsely predicated dark colour is brought about by contact of the eye with the real object, and is cotemporaneous with the vṛtti that has taken the form of the real object, and is made known by that vṛtti; that is to say, it is an object of visual perception. And since there can be no vṛtti in the form merely of the real thing, e. g. of the water, *minus* its colour, there can be no 'disclosure,' by means of a vṛtti, of the Intelligence which underlies the water; and hence the dark colour and other qualities falsely predicated of the water cannot be (as the opponent declares them to be) *objects illumined by the Witness* (tadbhāsyatva). Then as to the case of the bitter flavour falsely predicated of the (sweet) milk, these two are not perceived by the same sense-organ, but a vṛtti of the touch-organ takes the form of the real milk and 'discloses' the Intelligence underlying the milk, and of this Intelligence is falsely predicated the bitter flavour, when the taste-organ vitiated by bile has come in contact with the (sweet) milk, so that at the same time there arises a vṛtti of the taste-organ in the form of the bitter flavour only: in this way, therefore, it must be admitted that the unreal bitter flavour is an object of perception by the taste-organ. For in no other way can we account for the direct assurance of consciousness (expressed in the words—I *taste* the bitter flavour—); since the necessity for the taste-organ, even indirectly, cannot be shown, if (as the opponent holds) the unreal bitter flavour is a thing illumined by the Intelligence which, underlying the real milk, is disclosed by that vṛtti of the touch-organ which has taken

the form of the milk. Similarly, the direct consciousness expressed in the words—I *see* the silver—must not be rejected as a false deliverance; for we are able to show how the false silver becomes an object of visual perception.

Nor against this view can it be argued that if the false silver, which is not in contact with the eye, be held to be an object of visual perception, then the several ascertained rules as to the causal conditions of sense-perception will have to be rejected; thus, rule (*a*) that a relation between the sense-organ and the object is the necessary condition for all perception; rule (*b*) that *contact* between sense-organ and object is the necessary condition for perception of a *substance*; rule (*c*), that contact between sense-organ and silver is the necessary condition for perception of the silver.

Our author replies that rule (*a*) cannot be proved

Page 43.

for there exists no single universal circumstance common to all the special relations known as *contact* &c., and to be denoted by the term *relation in general* ('sannikarṣatva). As to rule (*b*), it is not in conflict with our author's view; for it applies to a thing which regarded from the standpoint of ordinary sense-experience is held to be the substrate of substantiality. But sometimes substantiality can be falsely predicated of that which is not a substance and which, therefore, cannot enter into the relation technically known as *contact* (which relation holds between substances only). Thus, as explained in the Nyāya System, substantiality is falsely predicated of darkness which is no substance. Similarly, just as *this-ness* i. e. the bare fact of presentation *here* and *now*, which belongs to the real pearl is predicated of the false silver; so the substantiality of the

former may be falsely predicated of the latter, and thus we may explain how a presentation (pratīti) takes place of the latter under the form of substance, though it is not really a substance. As to rule (*c*) its existence cannot be justified; for to postulate it as a special case of causation distinct from the general case under rule (*b*) is to postulate what is unnecessary. Then as to the maxim that a general cause must be assigned for a class of facts and a special cause for a special fact, what this maxim intends is to limit a general case of causal relation, e. g. that of seed and sprout, to individual cases of certain numerically distinct causes and certain numerically distinct products, so that the general relation cannot be unduly extended to imply that any one seed can give rise to any one sprout whatsoever. But from this maxim we cannot prove the existence of a separate and distinct kind of causal relation, which would be as useless as the flesh that hangs like teats from the neck of a goat. Nor against this can it be said that the general case under rule (*b*) may be unduly extended so as to imply that any contact between a certain sense-organ and a certain substance can give rise to the perception of any substance whatever, (and, hence, rule (*c*) is necessary). For rule (*b*) must be understood as restricted by a definite order between certain causes and certain products. And if this restriction be not admitted, then rule (*c*) also is no less open to the logical defect of being too wide. Hence (the Bhaṭṭa concludes) our view does not imply the rejection of any proved rule of causal connexion. And, further, it would not be logically faulty, even if it did imply this in regard to *merely apparent* things (भ्रम). For unless it be assumed that these rules (*a*), (*b*) and (*c*) as previously ascertained are to be

Digitized by Google

restricted to the case of things *practically real* from the standpoint of ordinary sense-experience, it becomes impossible to explain the rise of that direct assurance of consciousness which is expressed in the words—I see this silver—I see this dark coloured water—. Nor can it be retorted that, if this be granted, it will follow that real silver existing elsewhere and not now in contact with the visual organ is falsely surmised in the place of the pearl-shell—which is the anyathākhyāti view of the Nyāya; since it is not possible to make a further restriction in regard to these rules to the effect that a relation between sense-organ and object is the cause of true knowledge but not of false knowledge. The retort is worthless, because the silver, which as existing elsehere has not become one with the Intelligence that underlies the pearl shell and is disclosed by a vṛtti in the form of it, cannot possibly be the object of visual perception in the present case: and, further, because the silver or predicate of the false judgment is proved to be *a something inexplicable* (anirvacanīya) by the fact that our direct consciousness of it (khyāti) cannot be overthrown, and by the fact that this silver comes into and passes out of existence.

Nor again can it be argued that, if (as the Bhaṭṭa holds) the merely apparent silver is to be declared an object of visual perception on the ground that the eye is in contact with the real pearl shell of which the silver is falsely predicated, then there is no reason why a visual perception of a piece of tin should not take place simultaneously with that of silver in the place of the pearl shell—the piece of tin being a possible object of false predication at some other time. The Bhaṭṭa replies

Digitized by Google

that, although the tin and the silver are alike in point of glitter, the man who falsely predicates silver of the pearl shell is at that moment free from any defect, e. g. a desire to possess tin or a notion of it, and, therefore, he does not falsely predicate tin of the pearl shell: hence also the Bhaṭṭa holds that no vṛtti occurs in the form of tin while silver is being falsely predicated.

Summing up Nṛsiṃhabhaṭṭa's view: there is but the one vṛtti, which is produced through contact of sense-organ with the real object, and which makes known the false silver as identical with the general aspect of the real object which is expressed by the word *this*, in—This is silver. Nor prior to this vṛtti was there any separate and distinct vṛtti in the form of the real object. Hence it is useless to discuss whether such a separate and distinct vṛtti could or could not destroy the Nescience that conceals the object.

Page 44.

Other writers, on the strength of their general position that a knowledge of the real object is one of the necessary conditions of adhyāsa, admit a vṛtti in the bare form of the real object, but reject as useless a separate and distinct vṛtti in the form of the unreal silver; for they argue that the false silver can be presented to consciousness by being illumined by the Witness, which is the reality (cetana) underlying the false silver, and which is itself *disclosed* (i. e. has the Nescience concealing it removed) by the vṛtti in the bare form of the real object; and further that a mental retentum of the false silver can be produced by the said vṛtti which, taking the bare form of the real object, serves to "disclose" (or define) the Witness that *illumines* the unreal silver.

Of those who hold to the general position that every adhyāsa consists two of judgments (ज्ञानद्वयपक्षे), viz. one which consists in the vṛtti expressed by the word *this*, and which is one of the necessary conditions of adhyāsa, and another which is the vṛtti that makes known the false silver, some teachers declare that this second vṛtti does not make known the false silver alone as something distinct and separate from the real object denoted by the word *this*; for, say they, the judgment "I know this silver" is a direct assurance that this second vṛtti makes known the false silver as identified with the real thing denoted by the word *this*.

But other teachers declare that just as the Nescince pertaining to the Intelligence that is confined or defined by the real object, e. g. mother-of-pearl, appears to be changed into silver, so the Nescience pertaining to the Intelligence confined by the vṛtti which makes known the real object, appears to be changed into a false presentation (jñānābhāsa) of silver; that is to say, the presentation of the silver is not something practically real (anadhyasta), as is the vṛtti that has taken the form of the real object denoted by the word *this*. And just as on this ground, viz. that the false presentation of silver has as its ultimate basis of reality the Intelligence which is confined by the vṛtti that makes known the mother-of-pearl (तथा च), it is possible to account for the fact that the presentative character really belonging to the mother-of-pearl as something presented here and now, appears to belong to the silver; so, on the same ground, it is possible to explain the fact that the false presentation of silver appears to have the function of making known the mother-of-pearl, a function that really belongs to the vṛtti which has taken

Digitized by Google

the form of mother-of-pearl and which is itself the basis of the false presentation.

Nor can it be argued that since the false presentation of silver makes known a falsely surmised *relation* between *this-ness* and silver, it must also make known the correlate (pratiyogin) of this relation, viz. this-ness, as indeed it makes known silver-ness. For (say these teachers) this-ness is certainly made known by the true presentation of the real object as a mere something here and now, and with this true presentation is identified the false presentation; so that to say that the latter presentation makes known a *relation* between this-ness and the false silver is not a statement open to the charge of being unduly wide.

Nor, again, will they admit the objection that since the Vivaraṇa, in dealing with that part of the Bhāṣya which shows how adhyāsa is possible, lays down the rule that the real and the false object must be made known in one and the same judgment, it must be held that both of them are disclosed by one and only one vṛtti. For (say these teachers) even if there are two vṛttis (one for the real, and another for the false object), it must be held that both real and false object are *illumined* by the One Witness which the vṛtti that takes the form of the real object has *disclosed.*

The next question is—What is the use of the vṛtti, since the 'illumination' of all things is possible by means of the Witness alone? And to postulate the movement of the vṛtti outwards to the external object is unnecessary, even if the existence of the vṛtti be considered a necessary factor in the production of a mental trace or

Digitized by Google

204. You said that all this[1] is a castle in the air, for, you did not believe that the fruit derivable from knowledge was the immediate object of direct perception.

205. Your remark might be plausible, if, even from Scripture,[2] one cannot learn that knowledge bears fruit.

206. A knowledge of the eternal freedom of the soul is derived from the Scriptural passage and from no other source. And an understanding of the meaning of such passage is the result of pondering over the signification of words.

207. The meaning of words is arrived at by the methods of agreement and difference (*anvayavyatirēkābhyām*). Thus does one realise the soul that is free from misery and free from action.

208 and 209. And the accurate conception of the *pratyagātman* becomes clearer, from passages like '*sad ēva* etc.,' as from the exhortation, 'thou art the tenth ;'[3] for, there cannot exist the doubt that the passage is no authority, and it is not in conflict with other proofs (e.g. *pratyaksha*).

210. The commentator (*Ṣankara*) too will deduce later on, from well-established axioms, that the fruit of knowledge is directly established by Scriptural declaration as opposed to the fourfold proof.[4]

---

[1] एतच्छब्देन चिदानन्दैकतानं ब्रह्म तत्र कर्तृत्वादिरारोपितस्तस्याऽऽत्यन्तिकी-ध्वस्तिर्धीफलं विद्वत्प्रत्यक्षाच्च तद्धीरित्येतदाह. Anandagiri.

[2] *i. e.* from passages like तत्त्वमसि.

[3] See verse 211.

[4] शब्दयुक्तिप्रसंख्यानात्मानश्चत्वारः पादाअस्याः प्रमायास्ततोऽपरोक्षज्ञानं शब्दादित्येके सविचारप्रसङ्गेन ततो वाक्यादेवसाक्षात्मानफलमपरोक्षज्ञानमितिवक्ष्यतीत्यर्थः ॥ Anandagiri.

211. The tenth person, deceived by counting nine, as if in dismay, does not know that he is the tenth,[1] though he has the other nine before his very eyes.

212. In the same way, though duality be destroyed, one cannot, without passages like 'that thou art,' realise the One Soul, owing to the illusion and ignorance existing with reference to the Supreme Self.

213. A firm knowledge of the Supreme Self springs only from passages like '*sad asi*,' which quench the thirst for knowledge and destroy ignorance of Self.

214. The renunciation of all action serves the purpose of assisting one in deriving knowledge (of *Brahman*) from the meaning of Scriptural passages; for, it is directly helpful in this way.

215. For, renunciation is the best of all means to liberation; *that* is knowable by him alone who renounces; and only he who renounces reaches the Supreme Self and the highest state.

216. Scripture itself has declared, in passages like 'subdued, self-restrained etc.,' that any method to attain knowledge of Self must be preceded by complete renunciation.

217. Ritual (*yōga*) is dependent on worldly activity, and knowledge on renunciation; hence a wise man should choose knowledge and renounce (ritual).

218. The gods, fearing (men's) liberation, have covered human beings with delusion (*mōha*); hence the unknowing have become worldly and actively perform rites.[2]

---

[1] Unless toll that he is the tenth.

[2] Cf. पशुरेवं सदेवानाम्.

Digitized by Google

219. Hence, renouncing all action, and destroying nescience by a true knowledge of Self, one should, by means of knowledge alone, reach that Supreme seat of Vishnu.[1]

220. So says the Scripture in *Bhāllavi's* section (*ṣākhā*); therefore knowledge of Self springs from renunciation of all action.

221. The sage *Āpastamba*, too, has declared, in the passage, 'truth, falsehood, etc.,'[2] that knowledge of Self should be sought through complete renunciation.

222. "He who has not desisted from evil conduct, who is neither self-controlled nor self-composed, and who has not subjugated his mind, cannot attain him (*Brahman*) by knowledge."[3]

223. The very assumption that the recital of Scripture and other rites are aids to knowledge, indicates that, with respect to the chapter on ritual and the chapter on knowledge, the persons authorised are different in each case.[4]

224. Since knowledge springs from ritual too, it follows that it is *a* cause and no more; it does not follow that ritual is the only cause.[5]

---

1 तद्विष्णोः परमं पदम्.

2 सत्यानृते सुखदुःखे वेदानिमंलोकममुं च परित्यज्याऽऽत्मानमन्विच्छेत्.

3 *Kaṭhōpanishad*, I. 2. 24.

4 For, if the same person be empowered for ritual and for knowledge, there will not be this distinction, namely, that the former is an accessory to the latter.

5 Ritual is also productive of *jnāna* through purification. It is a remote cause. But renunciation of ritual is the direct and proximate cause.

Digitized by Google

225. Clean-shaven, unmarried, non-attached, and pure in mind and pure in body for ever, the ascetic is fit to become *Brahman* itself: so says Scripture.[1]

226. These and other similar passages from Scripture, coupled with millions of passages from the *Smṛitis*, emphatically prescribe the renunciation of all action as the means to knowledge.

227. Even your objection that without rites there can be no authorisation, will not stand, if the means of knowledge is as stated above.

228. For, considerations as to authorisation arise only in the carrying out of injunctions (*vidhimārgē*); but when knowledge of Self becomes the object, there is no question as to authorisation.

229. For, the question of authorisation is pertinent in respect of things that depend on human endeavour, but is out of place in respect of things that are self-dependent (*vastu-tantra*); moreover, knowledge is identical with liberation.[2]

230. The experience of Self to be attained in the *Vedāntas* is the same as the experience which commonly results when the not-self is the object of knowledge.[3]

231. From the Scriptural passages, 'knowledge, bliss, etc.,[4] and 'the soul alone etc.,'[5] it follows that

---

[1] अथ परिव्राड्विवर्णवासा मुण्डोऽपरिग्रहः शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय भवति.

[2] वाक्योत्थबुद्धिव्यक्तमात्मरूपं स्वकार्याविद्याध्वंसित्वाज्ज्ञानं न च तद्ध्वंसस्ततोऽतिरिच्यते. Anandagiri.

[3] शब्दादौ विषये प्रत्यक्षादिप्रमेये फलत्वेन प्रसिद्धायाऽऽत्मस्वरूपभूताऽनुभूतिः सैववाक्यजायां बुद्धौ व्यज्यते.

[4] विज्ञानमानन्दं ब्रह्म.

[5] आत्मैवाऽऽनन्दः

liberation (*pumartha*) is the only knowable thing that does not stand in need of a knower etc. (*mātrutvādyanapekshiṇah*).

232. In whomsoever springs up the knowledge of *that*, to him does knowledge come and to none else, just as it came to the holy sage *Vāmadēva* even while he was yet in the womb.[1]

233 and 234. And such knowledge merely removes nescience. As the idea of being a forester ceases to exist when the prince who has been bred up as a forester is reminded of his birth, in the same way does nescience with all its effects melt away when the nescient soul regains knowledge of the unity of Self from passages like "That thou art."

235. This being so, no injunction whatever should be assumed in this case; it will be useless, even if assumed, for it serves no purpose in this connection.

236. The fruit of injunction is production (*utpatti*), acquisition (*āpti*), purification (*samskāra*), or alteration (*vikāra*).[2] Liberation differs in character from all these; hence, injunction would be purposeless in its case.

237. Since the resulting of the soul's freedom from nescience is not dependent on anything else, there is therefore neither action, nor reward, nor anything like an incentive to action.

238. Hence, the absence of injunction in this case is in no way a defect. On the other hand, it is celebrated as the best ornament of the *Vēdānta* philosophy.

---

[1] Cf. गर्भ एवैतच्छयानो वामदेव एवमुवाच.

[2] पुरोडाशोत्पत्तिः संयवनविधिफलम् । पयसोऽवाप्तिर्दोहनविधिफलम् । प्रोक्षणविधिफलमुलूखलादिसंस्कारः । व्रीह्यादिविकारोऽवघातविधिफलमिति चतुर्विधमेव क्रियाफलं प्रसिद्धमित्यर्थः Anandagiri.

Digitized by Google

239. "I am commanded by injunctions," and "I am *Brahman*," are two ideas which are contradictory to each other, and, therefore, cannot both exist in the same place at the same time.

240. Being himself the lord (over Scripture),[1] he cannot be commanded by his own servant as by a master. He can only be drawn to attention (*sambōdhanīya*), as a king that is asleep is awakened by his bards.

241 and 242. The interpretation (of Scripture) as injunctory etc., must be taken only as referring to prescribed rites (*dharma*); because rites alone are premised as knowable, but not *Brahman*,[2] because it (*Pūrvamīmāṃsā*) begins with "Hence, therefore, rites etc.,' because it explains injunctions as referring to rites, because every word in it refers to rites, and because its passages collectively taken (*āmnāya*) also refer to rites.[3]

243. Words actively referring to rites (*bhāvārthāh karmṣabdāh*) can be understood as referring to rites only.[4] Hence the science of twelve chapters (*Pūrvamīmāṃsā*) must be taken as applying only to rites, which are dependent on human endeavour.[5]

---

[1] विविठिषुरपि संसारमार्गादुत्तीर्णत्वाद्वेदस्य स्वामी.

[2] The reference here is to the *Pūrvamīmāṃsā* aphorisms, which begin with 'अथातोधर्मजिज्ञासा,' and not, like the *Brahmasūtras*, with 'अथातो ब्रह्मजिज्ञासा.'

[3] Cf. तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्. Mīm. Sūt.

[4] Cf. भावार्थाः कर्मशब्दास्तेभ्यः क्रियाप्रतीयेतैषह्यर्थोविधीयते. Mīm. Sūt.

[5] Verses 235 to 243 are to refute the argument that, because the *Mīmāṃsā* is based on an interpretation of the whole Vedas as injunctory, knowledge too must be the object of injunction. Surēṣvara says that the scope of that science must be limited to the topic with which it specially professes to deal.

244 and 245. It (*Pūrvamīmāṃsā*) cannot affect the interpretation of the *Vēdānta*, for, it is no authority therein. An authority cannot be shaken by a thing based on other methods of proof (*mānlaraih mitam*). A proof being effective only so far as its object is concerned, it cannot be an authority elsewhere.

246. "Hence, therefore, a desire to know *Brahman* etc."[1] is consistent in itself, since it is as scrutinising and as logical as the science for the interpretation of rites.

247. This being so, passages like "That thou art," which have the same meaning as the whole *Vēdānta*, are consistent (with the *Karmakāṇḍa*). Otherwise there will be contradiction.[2]

248. Neither instruments nor rules to regulate action are needed, where *Brahman* is explained by Scripture as being identical with Self.

249. Injunction, rules of action, and instruments, are appropriate, in the case of one, who is desirous of fruit, being enjoined to do rites.

250. There can be no such desire (of fruit), in the case of Self, as in regard to not-self, in one who has attained all the four aims (*purushārthās*), and who has, by himself, avoided all misery.

251. When such desire ceases, the need for rules and means of action also ceases; for, all the four aims (*pumartha*) are freed from obstacles and become the very essence of the soul.

---

[1] i.e. *Uttaramīmāṃsā* or *Vēdānta*, whose *sūtrās* begin with 'अथातो ब्रह्मजिज्ञासा.'

[2] Because their objects are different (धर्म and ब्रह्मन्), the two *kāṇḍās* do not contradict each other. If they deal with the same subject, as the opponent contends, it would follow that the *Vedas* themselves are inconsistent.

252. The learned do not approve of a hypothesis (*bhāvanā*) that has not the three component parts; and no injunction is known that is not based on such hypothesis.[1]

253. 'If nescience is the only impediment to liberation, then what you said might be true;[2] but, since the individual soul (*samsārin*) is either a part (*ēkadēṣa*) or a modification (*vikāra*) of the Self (*ātman*), is liberation, even then, possible only by the means you suggest or is it by means of performing rites?'

254. Even then, the duty (of the aspirant for liberation) will be the avoidance (*nivṛitti*) of all future bondage, and not the engagement in rites (*pravṛitti*).

255. Since the individual soul, which owes its separateness to the nescience of Self, is not, in reality, other than the Self, therefore, even on that supposition,[3] the duty (of the *mumukshu*) is to destroy nescience and not to perform rites.

256. So also, even if the individual soul be a modification of Self, it is not necessary to perform rites, since there is nothing to be done, and since the becoming one with the cause (*Brahman*) is brought about by itself (*svataḥ-siddha*).

---

[1] भावना is the necessary basis of every विधि and consists of the three essentials, फलाकांक्षा. इतिकर्तव्य and करण (or साधन). Since there are no two kinds of *vidhi* known to the Vedas, since every *vidhi* is based on भावना, and since all the three elements of भावना are wanting in the aspirant to liberation, it follows that liberation is not subject to injunction.

[2] Namely, that knowledge is the only means, though indirectly, to liberation. This verse is the contention of Surēṣvara's opponent, who argues on the footing that the *jīvātman* is either a part or a modification of the *paramātman*. This is refuted in the following four verses, *et seq.*

[3] That the *jīvātman* is separate from the *paramātman*.

Digitized by Google

सिद्धान्तयति ।

शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानामर्थान्तरभावाच्चाप्रतिषेधः(१) ॥ २ ॥

अप्रतिषेधः प्रमाणस्य न चतुष्ट्वव्याघातः । शब्दे ऐतिह्यस्यानर्थान्तरभावादर्थान्तरत्वाभावादन्तर्भावादिति यावत् । ऐतिह्ये वक्तुराप्तत्वेन सामान्यत आप्तोक्तत्वनिश्चयसम्भवादाप्तोक्तत्वनिश्चयस्य शाब्दाहेतुत्वाच्च । तत्र शाब्दबोधस्य यथार्थयोग्यताज्ञानाधीनत्वे प्रमात्वमिति । तत्करणं शब्द एवेति नैतिह्यं प्रमाणान्तरम् । अर्थापत्त्यादीनां चानुमानान्तर्गतत्वमाह । अनुमान इति । अनुमाने व्याप्तिज्ञाने सति अर्थापत्त्यादीनामर्थान्तरभावादर्थान्तरत्वात् प्रमाणत्वादिति यावत् । अन्तरपदस्य स्वरूपकीर्तनरूपत्वात् । तथा चानुमानान्तर्गतत्वमेवेति भावः । तथाहि बहिःसत्त्वं विना जीवित्वविशिष्टगृहासत्त्वमनुपपन्नमिति ज्ञानं हि बहिःसत्त्वाभावव्यापकीभूताभावप्रतियोगिजीवित्वविशिष्टगृहासत्त्वमिति व्यतिरेकव्याप्तिग्रहरूपं न तु बहिःसत्त्वाभावसमानाधिकरणाभावप्रतियोगित्वमात्रं तद्विषय इति । ब्राह्मणत्वादिकं विद्याविद्याप्यतया गृहीतमेव तद्ग्राहकम् । अभावोऽपि तथा व्याप्यतया गृहीत एव निरुक्तस्थले ग्राहकः । न च प्रतियोग्यनुपलब्धिरज्ञातैवाभावग्राहिका कुतो व्याप्यत्वज्ञानापेक्षेति

(१) यद्यप्येतानि प्रमाणानि किं तर्हि अन्तर्भवन्तीति वक्तव्यम् । अन्तर्भावप्रदर्शनार्थं सूत्रम् । शब्द ऐतिह्येत्यादि वार्त्तिकम् । सिद्धान्तसूत्रम् । शब्द ऐतिह्येत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः । सम्भवाभावानर्थान्तरभावादित्यन्यत्र पाठः ।

Digitized by Google

वाच्यम् । इन्द्रियादिनाऽभावग्रह एवाज्ञाताया योग्यप्रतियोग्यनुपलब्धेः कारणत्वात् ज्ञातायास्तु तस्या अनुमानविधयैवाभावग्राहकत्वादिति ॥ २ ॥

तटस्थः शङ्कते ।

अर्थापत्तिरप्रमाणमनैकान्तिकत्वात्[१] ॥ ३ ॥

अर्थापत्तिरनुपपद्यमानज्ञानमप्रमाणमनुमानविधया स्वातन्त्र्येण वा न प्रमाणमनैकान्तिकत्वात् । क्वचिदुपपादकव्यभिचारिविषयकत्वादित्यर्थः । एवं च कुतोऽयं भवतां विचार इति भावः । व्यभिचारश्च मेघदर्शनेन यत्र वृष्टिज्ञानं तत्र वृष्टिं विनापि मेघसम्भवात् । यद्वा अर्थापत्तिर्न प्रमाणं न प्रमेत्यर्थः । अनैकान्तिकत्वाद् व्यभिचारिलिङ्गज्ञानजन्यत्वात् । प्रामाण्ये प्रमायां चार्थापत्तिशब्दप्रयोगात् । अर्थापत्तिप्रमात्वे व्याप्तिप्रमाजन्यत्वस्यैव प्रयोजकत्वेन वाच्यत्वादिति भावः ॥ ३ ॥

समाधत्ते ।

अनर्थापत्तावर्थापत्त्यभिमानात्[२] ॥ ४ ॥

अर्थापत्तेर्नानैकान्तिकत्वमिति शेष इति भाष्यम्[३] । अनर्थापत्तौ वृष्टिं विनाप्युपपद्यमाने मेघादौ । अर्थापत्त्यभिमानादर्थापत्तित्वाभिमानात् । वृष्टिं विनानुपपन्नत्वभ्र-

---

(१) अस्य सूत्रत्वे प्रमाणं नोपलभ्यत इति केचित् । तटस्थोक्त्याक्षेपसूत्रम् । अर्थापत्तिरप्रमाणमित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(२) यामपि भवाननर्थापत्तिं मन्यते सापि नानैकान्तिकी । अनर्थापत्तावर्थापत्त्यभिमानादिति वार्त्तिकग्रन्थपङ्क्तिः । स्वमतेन दूषयित्वा सौत्रं दूषणमाह । यामपि भवाननितीति तात्पर्यटीका । परिहारसूत्रम् । अनर्थापत्तावित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(३) भाष्ये तु नानैकान्तिकत्वमर्थापत्तेरित्यादिपूरणं दृश्यते ।

मेणार्थापत्तिप्रमाणतया क्वचिदुपन्यासात् । अर्थापत्तेर्मेघं विनानुपपद्यमानस्य वृष्ट्यादेर्न मेघाद्यनैकान्तिकत्वम् । तथा च तत्रैवार्थापत्तिप्रमाणत्वं सम्भवति । अर्थापत्तिजनकस्य कस्यचिदप्रामाण्येन सर्वत्राप्रामाण्ये ऽनुमानस्याप्यप्रामाण्यं स्यादनुमितेरपि क्वचिद् व्यभिचारिलिङ्गकत्वादिति भावः । यद्वा अनर्थापत्तौ प्रमात्मकार्थापत्तिभिन्ने मेघज्ञानाधीनवृष्ट्यादिज्ञाने ऽर्थापत्त्यभिमानादर्थापत्तिप्रमात्वभ्रमेण तत्त्वेन तस्य केनचिदुपन्यासान्न सर्वस्या अर्थापत्तेरप्रामाण्यमिति शेषः । अथवा अनर्थापत्तौ अनर्थाद् व्यभिचारिलिङ्गाद् या आपत्तिरनर्थापत्तिस्तस्यां व्यभिचारिलिङ्गजन्यार्थापत्ताविति यावत् । अर्थापत्त्यभिमानाद् भ्रमत्वात् । तथा च न सर्वत्रार्थापत्तौ भ्रमत्वमिति भावः । इदमुपलक्षणम् । क्वचिद् व्यभिचारिलिङ्गजन्यस्यापि वास्तविकार्थविषयकार्थापत्तिरूपग्रहस्य प्रमात्वेन व्यभिचारिलिङ्गजन्यत्वस्याप्रमात्वाप्रयोजकत्वादिति ॥ ४ ॥

नन्वनुमानमपि न प्रमाणं क्वचिदनैकान्तिकत्वादित्यत आह ।

प्रतिषेधाप्रामाण्यं चानैकान्तिकत्वात्(१) ॥ ५ ॥

प्रतिषेधस्य त्वन्मतसिद्धस्य प्रामाण्यप्रतिषेधकस्यानैकान्तिकत्वादेवाप्रामाण्यं च स्यात् तस्यापि क्वचिदनैकान्तिकत्वात् । तथाहि चक्षुरादौ घटादिप्रमापके घटाद्यनैकान्तिकत्वम् ॥ ५ ॥

क्वचिदनैकान्तिकत्वस्यादोषत्वे ऽर्थापत्तेरपि प्रामाण्यमित्याह ।

(१) न्यायसूचीनिबन्धे दर्शनेन न्यायतत्त्वालोके व्याख्यातत्वेन तात्पर्यटीकायां प्रति-तु इति सूत्रप्रतीकधारणरीतिदर्शनेन चास्य सूत्रत्वमिति सम्भाव्यते ।

तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम्[१]॥ ६ ॥

यद्वा यद्यनुमानस्य क्वचिदनैकान्तिकत्वादप्रामाण्यं तदा तेनैव हेतुना प्रामाण्यप्रतिषेधस्याप्यप्रामाण्यं तस्याप्यनुमानविधयैव प्रतिषेधसाधकत्वात्। क्वचिदनैकान्तिकत्वेऽप्यनुमानप्रामाण्येनानैकान्तिकत्वस्याप्रामाण्यासाधकत्वेऽर्थापत्तेरपि प्रामाण्यं क्वचिदबाधितार्थसाधकत्वस्य तौल्यादित्याह। तत्प्रामाण्ये वेति। केचित्तु अर्थापत्तिरप्रमाणं नानुमानात्मकप्रमाणमनैकान्तिकत्वाद् व्याप्तिविरहात्। तथाहि गृहे देवदत्ताभावस्यार्थापत्तिविधया देवदत्तनिष्ठबहिःसत्त्वकल्पकत्वं तत्र व्याप्तेर्विरहात्। एवं तत्र पक्षधर्मताज्ञानमपि नास्तीति। समाधत्ते। अनर्थापत्तावर्थापत्त्यभिमानात्। अर्थापत्तिभिन्ने देवदत्ताभावादावर्थापत्त्यभिमानाद् देवदत्तनिष्ठबहिःसत्त्वसाधकत्वाभिमानात्। भवतैतदुक्तमिति शेषः। अर्थापत्तिस्तु तत्र जीवित्वे सति गृहासत्त्वं तत्र व्याप्तिरस्ति तज्ज्ञानापेक्षाऽप्यस्तीति भावः। क्वचिद् व्यभिचारस्यानुमानान्तर्भावनिरासकत्वे भवदुक्तस्य प्रतिषेधस्यापि अनुमानानन्तर्भावप्रसङ्ग इत्याह। प्रतिषेधाप्रामाण्यं चानैकान्तिकत्वादिति। प्रतिषेधस्यानुमानत्वेऽर्थापत्तेरपि तत्त्वमविवादमित्याह। तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यमिति सूत्रचतुष्टयार्थ इत्याहुः। न च जीवी देवदत्तः क्वचिदस्ति गृहे नास्तीत्यनयोर्विरोधग्रहः क्वचिदस्तीत्यस्य गृहान्यविषयकत्वं कल्पयतीति व्याप्तिग्रहनिरपेक्षस्य विरोधग्रहस्या-

(१) एतत्सूत्रव्याख्यानावसरे तदिदं सूत्रं व्याघातदेशनार्थं तदुक्तं भवता स्वविषयादन्यत्र वर्तमानमनैकान्तिकं भवति अर्थापत्तिश्चानैकान्तिकीति व्याहतमित्युक्तं वार्त्तिककृद्भिः।

र्थापत्तिप्रमाणान्तरत्वमिति वाच्यम् । किञ्चिद्देशवृत्तित्वगृहावृत्तित्वयोर्विरोधाभावात् । क्वचिद् विरोधस्य विषयभेदव्यवस्थापकत्वमनुमानविषयैवेति बोध्यम् ॥ ६ ॥

नन्वभावो यदि प्रमाणसिद्धस्तदा तस्य प्रमाणत्वमनुमानविषयाऽतिरिक्तत्वेन वा वक्तव्यं स एव नास्ति अर्थक्रियाकारित्वाभावेन तुच्छत्वात् । घटो नास्तीत्यादिव्यवहारस्त्वधिकरणविषयत्वेनैवोपपत्तेः असतोऽपि भानस्वीकाराच्च । एवं घटाद्यनुपलम्भस्याभावादिरेव साध्यस्तस्य च मिथ्यात्वेन तत्साधकस्य कुतः प्रमाणत्वमिति चार्वाकः शङ्कते ।

नाभावप्रामाण्यं प्रमेयासिद्धेः[(१)] ॥ ७ ॥

अभावो न प्रमाणं प्रमेयासिद्धेः प्रमेयाभावात् प्रमेयासाधकत्वाद्वेत्यर्थः ॥ ७ ॥

सिद्धान्तयति ।

लक्षितेष्वलक्षणालक्षितत्वादलक्षितानां तत्प्रमेयसिद्धिः[(२)] ॥ ८ ॥

लक्षितेषु इन्द्रियसन्निकृष्टेषु भूतलादिषु अलक्षितानामसन्निकृष्टानां घटादीनामलक्षणलक्षितत्वादनुपलब्ध्या तत्प्रमेयसिद्धिः अभावात्मकप्रमेयसिद्धिरित्यर्थः । इन्द्रियसंयोगरूपसन्निकर्षेण यथा भूतलादीनां प्रमेयत्वं तथाऽभा-

(१) न्यायसूचीनिबन्धे दर्शनेन न्यायतत्त्वालोके व्याख्यातत्वेन तात्पर्यटीकायां नाभा-द्धेः इति सूत्रप्रतीकधारणरीतिदर्शनेन चास्य सूत्रत्वं सम्भाव्यते ।

(२) तत्रानेकधाभिन्नप्रपञ्चस्योदाहरणार्थं सूत्रम् । लक्षितेष्वलक्षणालक्षितत्वादलक्षितानां तत्प्रमेयसिद्धिरिति वार्त्तिकम् । सिद्धान्तसूत्रम् । लक्षितेष्वित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः । आदर्शपुस्तके तु लक्षणेष्वलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धिरिति पाठः ।

स्यापीन्द्रियसंयुक्तविशेषणतया प्रमेयत्वमन्यथा भूतलादि प्रमेयं न स्यात्। न च संवादिप्रवृत्तिजनकतया भूतलादिग्रहाणां प्रामाण्यमभावग्रहस्य च कुतः प्रमात्वमिति वाच्यम्। तस्यापि घटो नास्तीत्यादिव्यवहारजनकत्वाच्छिद्रेतरघटो जलाहरणसाधनमितिज्ञानेन छिद्रेतरत्वादिना घटादिकमवधार्य तत्प्रवृत्तेरभावविषयकत्वाच्च। एवमसतः सम्बन्धाभावेन ज्ञानविषयत्वानङ्गीकारादिति। केचित्तु तस्याभावप्रमाणस्य प्रमेयसिद्धिः। भावप्रधानो निर्देशः। किं तत् प्रमेयमित्यत्राह। लक्षितेषु घटादिषु अलक्षितानां तत्प्रमेयत्वसिद्धिः। कथं प्रमेयत्वम्। अलक्षणलक्षितत्वात्। यद्यप्यभावस्य गुणकर्मादिभिर्लक्षणं न सम्भवति तथाप्यलक्षणेनैव तल्लक्षितं भवति। अनीलमानयेत्युक्ते नीलाभावो हि इतरव्यावर्तकतया लक्षणमतोऽभावो नाप्रामाणिक इति भाव इत्याहुः॥ ८॥

बाधकमाशङ्क्य निराचष्टे।

असत्यर्थे नाभाव इति चेन्नान्यलक्षणोपपत्तेः[1] ॥ ९॥

असति भूतलादावविद्यमानेऽसन्निकृष्ट इति यावत्। अर्थे प्रतियोगिनि। नाभावोऽभावग्रहो न वक्तव्यो नेत्याकारकप्रत्यक्षानङ्गीकारात्। प्रतियोगिसत्त्वे च तत्र भूतलादौ नास्त्यभावो विरोधादित्यलीकघटाभाव एव प्रतीतिविषय इति चेन्नान्यलक्षणोपपत्तेः लौकिकसन्निकर्षातिरिक्तेन ज्ञानसन्निकर्षेण तत्रास्थितस्यापि घटादेरभावे

(१) एतत्सूत्रव्याख्यानावसरे अयथार्थोऽयमुपालम्भ इत्यत उक्तार्थसूत्रम्। नान्यलक्षणोपपत्तेरितीत्युक्तं वार्त्तिककृद्भिः। आक्षेपसमाधानयोः सूत्रम्। असत्यर्थे नाभाव इत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः।

भावोपपत्तेरित्यर्थः । यद्वा असति प्रतियोगिनि नाभावः । वक्तुं शक्य इति शेषः । सति च प्रतियोगिनि कथं तदभाव इति चेन्नान्यत्र लक्षणेन सत्त्वेनार्थात् प्रतियोगिन उपपत्तेरभावोपपत्तेरित्यर्थः ॥ ९ ॥

नन्वभावो यद्यपि प्रामाणिकस्तथापि तस्य न हेतुत्वमित्याशङ्कते ।

तत्सिद्धेरलक्षितेष्वहेतुः[1] ॥ १० ॥

तत्सिद्धेः तस्याभावस्य सिद्धावपि अलक्षितेषु गुणादिरूपव्यावर्तकधर्मशून्येष्वभावेष्वहेतुत्वमिति भावप्रधाननिर्देशादिति । यद्वा अलक्षितेषु अनुपलब्धेषु प्रतियोगिषु तत्सिद्धेरभावसिद्धेरभावोऽहेतुर्न हेतुरित्यर्थः । प्रतियोगिनिरपेक्षेणाभावत्वेनान्वयव्यतिरेकानुविधानाभावेन तेन कारणत्वाग्रहादभावत्वावच्छिन्नस्य केवलान्वयित्वादिति भावः । यद्वा अलक्षितेषु प्रतियोगिशून्येषु तत्सिद्धेरभावसिद्धेः स न हेतुरित्यर्थः । तथा च प्रतियोगिनः सामानाधिकरण्यसम्बन्धेन व्यावर्तकत्वाभावात् । केवलाभावत्वेन च न हेतुतासम्भव इति भावः ॥ १० ॥

समाधत्ते ।

न लक्षणावस्थितापेक्षसिद्धेः[2] ॥ ११ ॥

नाभावस्याहेतुत्वम् । लक्षणस्य व्यावर्तकस्य प्रतियोगिनो यदवस्थितमवस्थानं ज्ञानमिति यावत् । तदपेक्षा या

(१) असत्यर्थे नाभावस्तत्सिद्धेरलक्षितेष्वहेतुरित्युभे छलसूत्रे इति प्रागुत्पत्तेरभावोपपत्तेरितिसूत्रव्याख्यावसरे वार्त्तिकम् । भाष्यसूत्रम् । तत्सिद्धेरित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः । तत्र च तत्सिद्धेरलक्षितेष्वहेतुरिति सूत्रपाठः ।

(२) अत्रोक्तं नापरिज्ञानादिति । अस्य चार्थस्य ज्ञापनार्थं सूत्रम् । न लक्षणावस्थितापेक्षसिद्धेरिति वार्त्तिकम् । समाधिसूत्रम् । न लक्षणेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

सिद्धिस्तत इत्यर्थः। यद्वा तदपेक्षसिद्धेरभावस्य नाहेतुत्वमित्यर्थः। तथा घाभावाधिकरणे प्रतियोग्यनुपलम्भापेक्षणे ऽपि सामान्यतः प्रतियोगिज्ञानं विना अभावप्रत्यक्षानुपगमात् प्रतियोग्युपरक्ताभावत्वेनान्वयव्यतिरेकानुविधानग्रहेण तेन नियतपूर्ववृत्तित्वरूपहेतुत्वे बाधकाभावादन्यथा भावस्यापि हेतुत्वं न स्यादिति भावः। यद्वा लक्षणस्य व्यावर्तकस्य प्रतियोगिनो यदवस्थानं सम्बन्धः प्रतियोग्यनुयोगिभावरूपस्तदपेक्षसिद्धेरित्यर्थः। तथा च प्रतियोगितासम्बन्धेन प्रतियोगिविशिष्टाभावत्वेनैव हेतुतासम्भव इति भावः॥ ११॥

प्रागभावस्य प्रत्यक्षसिद्धत्वं दर्शयति।

प्रागुत्पत्तेरभावोपपत्तेश्च[१] ॥ १२ ॥

प्रतियोगिन उत्पत्तेः प्रागभावोपपत्तेः प्रत्यक्षसिद्धत्वात्। प्रमेयसिद्धिरिति मण्डूकप्लुत्या पूर्वेणान्वयः। घटो भविष्यतीत्यादिप्रत्यक्षस्य प्रागभावविषयत्वे सर्वसम्मतत्वादिति भावः। चकारेण घटो ध्वस्तो घटो नेत्यादिप्रत्ययेन ध्वंसभेदावपि सिद्धाविति समुच्चीयते॥ १२॥

समाप्तं प्रमाणचतुष्टयपरीक्षाप्रकरणम्॥

ननु वेदस्य कुतः पौरुषेयत्वं येन तत्प्रामाण्यं स्याद् वर्णानां नित्यत्वेन तत्समुदायरूपवेदस्यापि नित्यत्वात्। न चापौरुषेयत्वे ऽपि नित्यनिर्दोषत्वेन महाजनपरिग्रहेण च वेदस्य प्रामाण्यं ग्राह्यमिति तथापि महाजनपरिग्रहस्यान्धपरम्परान्यायप्रसङ्गात् सर्वार्थदर्शी कश्चिदीश्वरो वर्तते तेन सर्वमतीन्द्रियमप्यर्थमाकलय्य वेदकरणादिति

(१) एतत्सूत्रव्याख्यानान्ते इति सूत्रार्थ इत्युक्तं न्यायतत्त्वालोके वाचस्पतिमिश्रैः।

तत्तात्पर्यमादाय वेदस्य प्रामाण्यमिति शब्दानित्यत्वं व्यवस्थापयति ।

आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च(१) ॥ १३ ॥

शब्दोऽनित्य इत्यादि । आदिमत्त्वात् कादचित्कत्वात् । कण्ठताल्वाद्यभिघातव्यङ्ग्यत्वेनैव कादाचित्कत्वव्यवहारोपपत्तेर्न वास्तविकं तदित्यत आह । ऐन्द्रियकत्वादिति । यद्वा आदिमत्त्वात् सकारणकत्वात् । ननु शब्दो न सकारणकः कण्ठताल्वाद्यभिघातादेर्व्यञ्जकत्वेनाप्युपपत्तेरित्यत आह । ऐन्द्रियकत्वादिति । बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयत्वादित्यर्थः । आत्मादिवारणाय बहिःपदम् । मनसोऽनिन्द्रियत्वमते तन्नोपादेयमिति । हेत्वन्तरमाह । कृतकवदुपचारात् । कृतको जन्यो घटादिस्तद्वत्प्रतीतेरित्यर्थः । तथा चोत्पन्नो घट इत्यादिवदुत्पन्नो गकार इतिप्रतीतेः । कृतकवदिति दृष्टान्त उत्पन्नत्वेन प्रतीतिरेव हेतुरिति । यद्वा घटादौ यथा ह्रस्वदीर्घादिभेदस्तथा शब्दे तारमन्दादिभेद इति स च निमित्तवायुसंयोगवैलक्षण्येनेति न शब्दस्य नित्यत्वसम्भव इति भावः ॥ १३ ॥

व्यभिचारमाशङ्कते ।

न घटाभावसामान्यनित्यत्वान्नित्येष्वप्यनित्यवदुपचाराच्च(२) ॥ १४ ॥

(१) आदिमत्त्वादादिः योनिः कारणमिति कारणवत्त्वादनित्य इति सूत्रार्थ इति कृतकवदुपचारादित्यनेन सूत्रेणेति च वार्त्तिकम् । सिद्धान्तसूत्रम् । आदिमत्त्वादित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः । कृतकवदुपचारादितिसूत्रावयवस्येत्यादि तात्पर्यपरिशुद्धावुदयनाचार्याः ।

(२) सूत्रस्य पूर्वहेतूनामनैकान्तिकत्वज्ञापनमर्थ इत्येतत्सूत्रव्याख्याने वार्त्तिकम् । व्यभिचारपदर्शनाय सूत्रम् । न घटाभावेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

नोक्ता हेतवोऽनित्यत्वसाधकाः। घटाभावो घटध्वंसस्तस्य नित्यत्वादविनाशित्वात् सामान्ये घटत्वादिजातौ नित्यत्वाद् ध्वंसप्रागभावाप्रतियोगित्वात्। तथा च ध्वंसे आदिमत्त्वस्य सामान्ये ऐन्द्रियकत्वस्य व्यभिचारादिति पर्यवसितम्। नित्येष्वाकाशादिष्वनित्यवदुपचारादुत्पन्नत्वेन प्रतीतेः। प्रतीतिश्च आकाशमुत्पन्नमहं सुखी जात इत्यादिरूपा। यद्वा घटाकाशगृहाकाशयोर्न्यूनाधिकत्वेनात्मनश्च स्थूलत्वकृशत्वादिना प्रतीतेः। तथा च कृतकवदुपचारस्याकाशादौ व्यभिचारादिति पर्यवसितम् ॥ १४ ॥

आद्ये व्यभिचारमुद्धरति।

तत्त्वभाक्तयोर्नानात्वस्य विभागादव्यभिचारः[1] ॥ १५ ॥

तत्त्वस्य मुख्यनित्यस्य भाक्तस्य गौणनित्यस्य च नानात्वस्य भेदस्य विभागात् सत्त्वान्न व्यभिचारः। आदिमत्त्वस्येत्यादिः। तथाहि ध्वंसेऽविनाशित्वरूपं गौणमेव नित्यत्वम्। ध्वंसप्रागभावाप्रतियोगित्वरूपमुख्यनित्यत्वाभावः साध्यते स च ध्वंसेऽप्यस्तीति न व्यभिचार इति भावः ॥ १५ ॥

द्वितीये व्यभिचारमुद्धरति।

सन्तानानुमानविशेषणात्[2] ॥ १६ ॥

---

(१) एतत्सूत्रव्याख्यानावसरे इति सूत्रार्थं इत्युक्तं न्यायतत्त्वालोके वाचस्पतिमिश्रैः। कारणद्रव्यस्य प्रदेशशब्देनाभिधानादित्यादिसूत्रस्यवार्त्तिकव्याख्यानावसरे तात्पर्यटीकाकृता तत्त्वभाक्तयोर्नानात्वस्य विभागादव्यभिचारः सन्तानानुमानविशेषणात् कारणद्रव्यस्य प्रदेशशब्देनाभिधानादिति सूत्रैरेवानैकान्तिकत्वपरिहारादित्युक्तम्।

(२) पूर्वसूत्रटिप्पणी द्रष्टव्या। पद्यप्यस्मिन्पर्थे सन्तानानुमानविशेषणादिति सूत्रमस्त्येवेति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः।

Digitized by Google

सन्तानेन सामान्येनानुमानस्यैन्द्रियकत्वरूपहेतो-र्विशेषणान्न तस्य व्यभिचार इत्यर्थः । सन्तन्यन्ते ऽनेकपदार्थाः सङ्गृह्यन्ते येनेति व्युत्पत्त्या सन्तानशब्देन सामान्यलाभात् । तथा च सामान्यवत्त्वे सत्यैन्द्रियकत्वं हेतुरिति न तद् व्यभिचारीति भावः ॥ १६ ॥

तृतीये व्यभिचारमुद्धरति ।

कारणद्रव्यस्य विशेषशब्देनाभिधानात्(१) ॥ १७ ॥

कारणद्रव्यस्याकाशादि? विशेषशब्देनाभिधानात् । न च विशेषस्तत्रास्ति । अभिधानं च गौणमेव । आकाशमुत्पन्नमित्यत्रोत्पन्नमभिव्यक्तमित्यर्थः । अहं सुखी जात इत्यादौ सुखाद्युत्पत्तिरेव विषयः । घटाद्युपाधेन्यूनाधिकभावेनैवाकाशादेस्तथा व्यपदेशः । शरीरधर्मस्थूलत्वादिकमादायैवात्मनस्तथा तस्य तादृशोपाधिविरहात् तादृशप्रत्ययस्यौपचारिकत्वमिति भावः ॥ १७ ॥

उत्पन्नो गकार इत्यादिप्रत्ययस्याभिव्यक्तिविषयकत्वं न तूत्पत्तिविषयकत्वं सोऽयं गकार इत्यादिप्रत्यभिज्ञया स्थैर्यसिद्धेः । वर्णानां बहुत्वकल्पने तद्ध्वंसप्राग-

---

(१) अत्र कारणद्रव्यस्य प्रदेशशब्देनाभिधानान्नित्येष्वप्यव्यभिचार इतीत्यन्तः सूत्रपाठः क्वचिद् दृश्यते । कारणद्रव्यस्य प्रदेशशब्देनाभिधानादिति सूत्रमिति न्यायवार्त्तिकतात्पर्यपरिशुद्धिलेखदर्शनेन एतत्सूत्रस्यवार्त्तिकव्याख्यानावसरे तत्त्वभाक्तयोर्नानात्वस्य विभागादव्यभिचारः सन्तानानुमानविशेषणात् कारणद्रव्यस्य प्रदेशशब्देनाभिधानादितिसूत्रैरित्येवंतात्पर्यटीकालेखदर्शनेन न्यायसूचीनिबन्धदर्शनेन नित्येष्वप्यव्यभिचार इति प्रकृतमिति पूर्वसूत्रप्रतीकानुसृत्या भाष्यकारेणैव व्याख्यातत्वादिति न्यायवार्त्तिकतात्पर्यपरिशुद्धिमेलकदर्शनेन च नित्येष्वप्यव्यभिचार इतीत्यन्तो न सूत्रान्तर्गत इति ज्ञायते । परं तु प्रदेशशब्देनेति पाठस्तु यथोक्तग्रन्थेषु सर्वत्र दृश्यते । एतद्व्याख्यानान्ते इति सूत्रार्थ इति लिखितं न्यायतत्त्वालोके वाचस्पतिमिश्रैः ।

भावकल्पने च गौरवाच्च। तारत्वमन्दत्वादयश्च निमित्तवायुगता एव शब्दे उपचर्यन्ते। एवमादिमत्त्वमैन्द्रियकत्वं चाप्रयोजकमित्यतो नित्यत्वबाधकतर्कमाह।

प्रागुच्चारणादनुपलम्भादावरणाद्यनुपलब्धेश्च[१] ॥ १८ ॥

वर्णा न नित्या उच्चारणात् कण्ठताल्वाद्यभिघातात् प्रागनुपलम्भात्। तथा च शब्दो यदि नित्यः स्यात् तदोच्चारणात् प्रागपि सन्निकृष्टतया योग्यतया चोपलभ्येतेति तर्क एव नित्यत्वबाधक इत्यर्थः। ननु न योग्यतासहितसन्निकृष्टतामात्रमुपलम्भापादकमपि तु बाधाभावसहितमित्यत आह। आवरणाद्यनुपलब्धेः। विरोधिनां बाधादिनिश्चयानां दोषविशेषाणां चानुपलब्धेरनुपलब्ध्याऽभावनिर्णयात्। तथा च बाधाभावादिसहितसन्निकृष्टतापि तदानीं वर्तत इति भावः। न च तदानीं शब्दो देशान्तरगतोऽमूर्त्तस्य गमनासम्भवात्। न च तदानीमतीन्द्रियो दोषः कश्चिद्वर्तते यत्प्रतिबन्धेन न शब्दग्रह इति वाच्यम्। तादृशदोषतद्ध्वंसादिकल्पनमपेक्ष्य शब्दानित्यत्वकल्पनस्यैवोचितत्वात्। न च कण्ठताल्वाद्यभिघातादिरेव शब्दव्यञ्जकस्तद्विरहादेव न तत्पूर्वं तद्ग्रह इति वाच्यम्। तद्ग्रहत्वमपेक्ष्य तत्त्वस्यैव कण्ठताल्वाद्यभिघातादिकार्यतावच्छेदकत्वे लाघवादन्यथा घटादयोऽपि नित्याः स्युस्तद्धेतूनां तद्व्यञ्जकत्वेनैवोपपत्तेः। मन्दत्वता-

(१) आदर्शपुस्तके चकाररहितः पाठः। प्रागुच्चारणादनुपलब्धेरित्यन्यत्र पाठः। एतद्व्याख्यानावसरे सतोऽनुपलब्धिकारणाभावे कदाचिदनुपलब्धेरनित्यः शब्द इति सूत्रार्थ इति वार्त्तिकम्। शब्दानित्यत्वे प्रत्यक्षप्रमाणप्रदर्शनाय सूत्रम्। प्रागुच्चारणादित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः। प्रागुच्चारणादनुपलब्धेरावरणानुपलब्धेश्चेत्यत्र सूत्र इति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः।

रत्वादीनां वायुसंयोगविशेषगतत्वे शब्दे तद्भ्रमजनकदोषादिकल्पने गौरवं च । सोऽयं गकार इत्यादिप्रत्यभिज्ञा च सेयं विद्येत्यादिवत् तत्साजात्यमवलम्बत इति दिक् ॥ १८ ॥

आन्तः शङ्कते ।

तदनुपलब्धेरनुपलम्भादावरणोपलब्धिः[१] ॥ १९ ॥

तस्यावरणस्यानुपलब्धेरनुपलम्भात् तदावरणानुपलब्धेरभावस्तदावरणोपलब्धिः । सिद्धेति शेषः ॥ १९ ॥

आवरणानुपलब्धेरनुपलम्भो यदि नावरणानुपलब्धेरभावस्यावरणोपलब्धेः साधकस्तदावरणानुपलब्धिरप्यावरणाभावसाधिका न स्यादित्याह ।

अनुपलम्भादप्यनुपलब्धिसद्भाववन्नावरणानुपपत्तिरनुपलम्भात्[२] ॥ २० ॥

शङ्कां निरस्यति ।

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः[३] ॥ २१ ॥

आवरणानुपलब्धेरनुपलम्भादावरणोपलब्धिरिति जात्युत्तरमहेतुर्न मन्मतप्रतिषेधसाधनम् । अनुपलब्धेराव-

(१) आवरणोपपत्तिरित्यन्यत्र पाठः । अत्र जातिवादिनः सूत्रद्वयम् । तदनुपलब्धेरनुपलम्भादावरणोपपत्तिरिति तात्पर्यटीका ।

(२) द्वितीयं सूत्रम् । अनुपलम्भादित्यादि तात्पर्यटीका । अनुपलम्भादप्यनुपलब्धिसद्भाववन्नावरणानुपपत्तिरनुपलम्भादित्यस्य सूत्रस्यानुपलब्धेरनैकान्तिकत्वमर्थ इति वार्त्तिकम् । शिष्यव्युत्पत्तये जात्या पूर्वपक्षसूत्रे इति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(३) अनया जात्युत्तरेण प्रत्यवस्थानादनुत्तरमिति सूत्रार्थ इत्येतत्सूत्रव्याख्यावसरे वार्त्तिकम् । अस्योत्तरसूत्रम् । अनु-तुः इति तात्पर्यटीका । सिद्धान्तसूत्रम् । अनुपलम्भात्मकत्वादित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

Digitized by Google

थानुपलब्धेरनुपलम्भात्मकत्वादुपलम्भाभावात्मकत्वात्। तथा चोपलम्भस्यासत्त्वेनाग्रहे उपलम्भाभावस्यैव सुग्रहात् तदनुपलब्धिरसिद्धा उपलम्भाभावस्याग्रहे ऽपि तस्योपलम्भासाधकत्वमुपलम्भस्य भावत्वाद् भावभिन्नस्यैव प्रतियोग्यनुपलब्धिग्राह्यत्वादिति भावः॥ २१॥

सत्प्रतिपक्षमाशङ्कते।

अस्पर्शत्वात्[१]॥ २२॥

शब्दो नित्योऽस्पर्शत्वाद् गगनवदिति भावः॥ २२॥

उत्तरयति।

न कर्मानित्यत्वात्[२]॥ २३॥

अस्पर्शत्वं न नित्यत्वसाधकं कर्मणि व्यभिचारादिति भावः॥ २३॥

ननु नित्यद्रव्यमात्रवृत्तित्वमेवात्रास्पर्शत्वमिति घटादिक्रियायां न व्यभिचार इत्यत आह।

नाणुनित्यत्वात्[३]॥ २४॥

नित्यद्रव्यमात्रवृत्तित्वमपि न नित्यत्वसाधकमणोर्नित्यत्वात्। तथा चाणुक्रियायां व्यभिचार इति भावः॥ २४॥

शङ्कते।

सम्प्रदानत्वात्[४]॥ २५॥

गुरुणा शिष्याय प्रदेयत्वाच्छब्दस्य प्राक्सत्त्वं विना दानासम्भवात् प्राक्सत्त्वं सिद्धमनन्तरं च तावत् कालं

(१) पूर्वपक्षसूत्रम्। अस्पर्शत्वादिति न्यायतत्त्वालोके वाचस्पतिमिश्राः।

(२) तस्य व्यभिचारप्रदर्शनार्थं सूत्रम्। न कर्मानित्यत्वादिति वार्त्तिकम्। सिद्धान्तसूत्रम्। न कर्मानित्यत्वादिति न्यायतत्त्वालोके वाचस्पतिमिश्राः।

(३) इदं तु न्यायतत्त्वालोके वार्त्तिके च न धृतम्। न्यायसूचीनिबन्धे वर्तते।

(४) सम्प्रदानादिति पाठोऽन्यत्र सर्वत्र। नित्यत्वानुमानाय सूत्रम्। सम्प्रदानादिति न्यायतत्त्वालोके वाचस्पतिमिश्राः।

स्थिरं चैनं कः पश्चान्नाशयिष्यतीतिन्यायान्नित्यत्वमर्थायातमिति ॥ २५ ॥

उत्तरयति ।

तदन्तरालानुपलब्धेरहेतुः[1] ॥ २६ ॥

अहेतुः सम्प्रदानत्वं न नित्यत्वसाधकम् । गुरुः स्वगुरोरुच्चरितं शब्दं शृणोति स्वशिष्यायोच्चार्य ददाति तदुच्चारणकालयोरन्तरालकाले ऽनुपलब्धेरनुपलब्ध्या शब्दाभावनिश्चयात् । तथा चासिद्धस्य कुतो दानमेवेति भावः ॥२६॥

पुनराशङ्कते ।

अध्यापनादप्रतिषेधः[2] ॥ २७ ॥

तथापि शब्दस्य न नित्यत्वप्रतिषेधोऽध्यापनात् । यद्यन्तराले शब्दो नास्ति तदा कथमध्यापनं स्यादसिद्धस्य ज्ञापनासम्भवात् । अनुपलब्धिस्तु कण्ठताल्वाद्यभिघातरूपव्यञ्जकाभावेनापि सम्भवतीति भावः । आचार्यास्तु सूत्रद्वयमेवं व्याचक्षते । विभक्तिव्यत्यासादहेतोस्तदन्तरालानुपलब्धिस्तथा च हेतोः स्वत्वस्याभावादेवान्तरालस्य स्वत्वध्वंसस्यानुपलब्धिरतो दानमेवासिद्धमिति भावः । प्रतिषेधो न युक्तो न हि दानं समभिप्रेतं किंत्वध्यापनं तच्च विद्यमानस्य शब्दस्यैवेति भावः ॥ २७ ॥

---

(१) अवतिष्ठमानो हि दातृप्रतिग्रहीत्रोरन्तराले उपलभ्येतेति इति सूत्रार्थोविरोध इति वार्त्तिकम् । सिद्धान्तसूत्रम् । तदन्तरालेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः । अत्र परिहारसूत्रम् । तदन्तरालानुपलब्धेरहेतुरिति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः ।

(२) पूर्वपक्षसूत्रम् । अध्यापनादप्रतिषेध इति न्यायतत्त्वालोके वाचस्पतिमिश्राः । अत्र परिहारसूत्रम् । तदन्तरालानुपलब्धेरहेतुरिति बाधोद्भावनम् । न चैतद् योऽप्यनुपलब्धो शब्दस्यान्तराले कार्यधर्मत्वं इति स्वरसतः प्रतिभाति उत्तरसूत्रावतारविरोधात् अध्यापनादप्रतिषेध इति हि तार्किता न्यायवार्त्तिकतात्पर्यपरिशुद्धौ ।

सिद्धान्तयति ।

उभयोः पक्षयोरन्यतरस्याध्यापनादप्रतिषेधः[१] ॥ २८ ॥

उभयोः पक्षयोर्नित्यत्वानित्यत्वयोरन्यतरस्याध्यापनान्न प्रतिषेधः । तथा चाध्यापनं यथा न नित्यत्वप्रतिषेधसाधकं तथा नानित्यत्वप्रतिषेधसाधकमित्यर्थः । तथाहि अध्यापनं शिष्योच्चारणानुकूलोच्चारणं शिष्यबोधानुकूलोच्चारणं वा उच्चारणं च शब्दस्य नित्यत्वपक्षे तदूव्यञ्जककण्ठताल्वाद्यभिघातोऽनित्यत्वपक्षे च शब्दोत्पत्त्यनुकूलकण्ठताल्वाद्यभिघातः तदनुकूलप्रयत्नो वेत्युभयथापि न दोषः । न हि नित्यत्वपक्षेऽपि अध्यापनस्य दानत्वं सम्भवति तस्य स्वस्वत्वध्वंसावच्छिन्नपरस्वत्वोत्पादनरूपत्वात् । शब्दे च नियामकाभावात् स्वत्वासम्भवः अविशेषेण शब्दमात्रे सर्वेषां तुल्यस्वत्वापत्तेश्च । न हि सर्वसाधारणमेकस्मै दातुमेक इति । एकमध्याप्यापराध्यापनानुपपत्तिश्च । शिष्याय ददातीतिवच्छिष्यायाध्यापयतीतिप्रयोगापत्तिश्च । नन्वध्यापनं शास्त्रज्ञापनं शास्त्रं च परमेश्वरोपदिष्टवेदात्मकवर्णसमूहो व्यासादिप्रणीतभारतादिरूपवर्णसमूहश्च तादृशस्य च ज्ञापनं श्रावणप्रत्यक्षजननं प्रत्यक्षं च विषयासत्त्वे न भवतीति परमेश्वरादिप्रणीतशब्दानां नित्यत्वमित्यर्थायातं शब्दमात्रस्य नित्यत्वमिति चेत् । न । अध्यापनस्य निरुक्तोच्चारणरूपत्वेनैवोपपत्तेर्वेदमध्यापयतीत्यादौ परमेश्वरप्रणीतजातीयोच्चार-

(१) केचिदाधुनिकनैयायिकम्मन्या अस्य सूत्रत्वं न मन्यन्ते । सिद्धान्तसूत्रम् । उभयोः पक्षयोरित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् ।	मूल्यम्
श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं॰ श्रीराममिश्रशास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः	७।)
श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा ..	६)
श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा ..	१=)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः	२।)
शेषपूर्त्तेः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं॰स्वामिश्रीराममिश्रशास्त्रि-प्रणीतो निर्विशेषाद्वैतनिराकरणपरः	१॥=)
शेषपूर्त्तिसहितो वेदार्थसंग्रहः	३।।।)
शास्त्रदीपिका	४।)
सङ्कर्ष–काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टचन्द्रिकोपेतम्, पं॰स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् ।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजपं॰दामोदरशास्त्रिणा संशोधिता पूर्वार्द्धरूपा	५।।।)
तथा उत्तरार्द्धम्	८।।।)
माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता	७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता	४॥)
श्रीतिङन्तार्णवतरणिः ।	६)
विग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता	॥=)
जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता ..	५॥)
लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्यायमुक्तावल्याख्यया टीकया सहिता ।	।।।)
सिद्धान्ततत्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम् ।	।।।)
तत्त्वमुक्ताकलापः–सर्वार्थसिद्धियुतः, बोधायनीयार्षसिद्धान्तानुसारी विशिष्टाद्वैतब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्किककेसरिणा सर्वतन्त्रस्वतन्त्रशिरोमणिना श्रीवेङ्कटनाथदेशिकेन प्रणीतः	५॥=)
वेदान्तसिद्धान्तमुक्तावली, आर्थर्वेनिस्साहबकृताङ्गलभाषानुवादयुता ..	१।।।)
काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः	२।।)
अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः	१२)
आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्यकाराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम्	।।।)
तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमच्चिन्नभट्टविरचितया न्यायप्रदीपाख्यटीकया सहिता ॥	१।।।)

Digitized by Google

CONTENTS.

Page.

BRÂHMASPHUṬASIDDHÂNTA, Edited with his own commentary by Mahâmahopâdhyâya Sudhâkara Dvivedin, Professor, Queen's College, Benares 1

LAUKIKANYÂYASAMGRAHA, Ed. Gaṅgâdhara Çâstrin, Professor, Sanskrit College, Benares 17

THE SIDDHÂNTALEÇA OF APPAYADÎKṢITA, Translated by Arthur Venis 33

THE SAMBANDHAVÂRTIKA OF SURESVARÂCHÂRYA, Translated by S. Venkataramana Aiyar, B. A., B. L., High Court Vakil, Triplicane, Madras 41

NYÂYASÛTRAVIVARAṆAM, Ed. Surendralâla Gosvâmin, Professor, Sanskrit College, Benares 49

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 2.] February, 1902. [Vol. XXIV.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1902.

Copyright on each article reserved.

Price Rs. 9-0 *per annum.*]

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
विधिमीमांसा, अप्पयदीक्षितकृता तै॰ श्री रामशास्त्रिणा संशोधिता	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।≡)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनाचार्य्येणेङ्गलण्डीयभाषायामनुवादिता ..	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणेङ्गलण्डीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	२॥≡)
श्रौतपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकोल्लूकशास्त्रि- संशोधिता	४)
काव्यप्रदीपः, पं॰ रामशास्त्रिभागवताचार्येण परिशोधितः	२॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	५॥)

Digitized by Google

स्वरहृगघ्नं स्वदृगंशैर्गुणयाऽन्त्यफलज्यया भक्तम् ॥ ३ ॥
स्फुटमानकला भूमिजबुधसुरगुरुशुक्रसूर्यपुत्राणाम् ।
नाधःस्थयोर्ज्ञसितयोरासन्नत्वाद्रवेरसितम् ॥ ४ ॥

व्यासार्धं त्रिज्यामानं त्रिगुणान्त्यफलज्यया संयुक्तम् । अन्त्यकर्णेन स्थिरीभूतेन शीघ्रकर्णेनोनं सप्तविंशत्या गुणं कालांशैर्गुणयाऽन्त्यफलज्यया भक्तं भूमिजबुधसुरगुरुशुक्रशनीनां स्फुटमानकला भवन्ति । सूर्यादधःस्थयोर्बुधशुक्रयोः शशिवन्नासितं भवति । कस्मात् । रवेरासन्नत्वान्निकटत्वादिति ।

अत्रोपपत्तिः । मध्यमबिम्बमानस्य त्रिभागसममुच्चनीचयोरपचयोपचयमुपलभ्यावान्तरे त्रिज्याकर्णान्तरेणापचयोपचयज्ञानार्थमनुपातः । यद्यन्त्यफलज्यामितेन त्रिज्याशीघ्रकर्णान्तरेण बिम्बमानत्रिभागसमश्चयापचयस्तदा त्रिज्येष्टशीघ्रकर्णान्तरेण किं लब्धं त्रिज्यातोऽधिके शीघ्रकर्णे मध्यमबिम्बाद्विशोध्याल्पे च शीघ्रकर्णे मध्यमबिम्बे प्रक्षिप्य जाताः

$$\text{स्फुटमानकलाः} = \text{मबि} - \frac{\text{मबि}}{3} \cdot \frac{(\text{शीक} - \text{त्रि})}{\text{अंफज्या}}$$

$$= \frac{\text{मबि}}{3\ \text{अंफज्या}} (3\ \text{अंफज्या} + \text{त्रि} - \text{शीक})$$

वा

$$\text{स्फुटमानकलाः} = \text{मबि} + \frac{\text{मबि}}{3} \cdot \frac{(\text{त्रि} - \text{शीक})}{\text{अंफज्या}}$$

$$= \frac{\text{मबि}}{3\ \text{अंफज्या}} (3\ \text{अंफज्या} + \text{त्रि} - \text{शीक})$$

उभयत्र मध्यमबिम्बकलास्थाने $\frac{९१}{\text{दृग्अं}}$ इत्युत्थाप्य जाताः

$$\text{स्फुटबिम्बकलाः} = \frac{२७\,(3\ \text{अंफज्या} + \text{त्रि} - \text{शीक})}{\text{अंफज्या} \cdot \text{दृग्अं}}$$

इत्युपपद्यते स्फुटबिम्बमानकलानयनम् । भास्करोक्तं च तदुपपद्यतेऽनेन । सूक्ष्मदूरदर्शकयन्त्रादिना बुधशुक्रयोरपि शशिवत् सितवृद्धिह्रासित्वं शृङ्गोन्नतिश्चोपलभ्यते । आचार्यसमये तादृशयन्त्राणामभावाद्दृष्ट्या शृङ्गोन्नतिः सितासितबिम्बमितिश्च नोपलब्धाऽतोऽनुमानेन रवेरासन्नत्वादित्यादिकल्पना न समीचीनेति सर्वं स्फुटम् ॥ ३-४ ॥

इदानीं युतिकालज्ञानार्थमाह ।

भुक्त्यन्तरेण भक्तं ग्रहान्तरं फलदिनैरधिकभुक्तौ ।
प्रागूनगतौ पश्चाद्युतिरधिके वक्रिणोर्व्यस्तम् ॥ ५ ॥
एको वक्री भुक्त्योर्युत्योनः प्रागथाधिकः पश्चात् ।
ग्रहयोरन्तरलिप्तास्तथैव भक्ताः स्वभुक्तिगुणाः ॥ ६ ॥

ग्रहान्तरं मार्गयोर्ग्रहयोर्भुक्त्यन्तरेण हृतं फलं दिनानि भवन्ति । अधिकभुक्तौ ग्रहेऽल्पभुक्तेरधिके युतिः प्रागगता वाच्या । ऊनगतौ ग्रहेऽधिकभुक्तेरधिके पश्चादेष्या युतिर्वाच्या । द्वयोर्ग्रहयोर्वक्रिणोर्व्यस्ता युतिरर्थात् पूर्वविधिना गतलक्षणे एष्या । एष्यलक्षणे च गता वाच्या । यद्येको ग्रहो वक्री तदा ग्रहान्तरं भुक्त्योर्युत्या भक्तं फलं दिनानि ग्राह्याणि । वक्री चेन्मार्गग्रहादूनस्तदा फलदिनैर्युतिः प्रागगताऽथाधिकश्चेत् तदा पश्चादेष्या वाच्या । अथ ग्रहयोश्चालनमाह । ग्रहयोरन्तरलिप्तास्तथैव पूर्वप्रतिपादितस्थित्यनुसारेण गत्योरन्तरेण वा योगेन भक्ताः स्वभुक्तिगुणाश्चालनकला भवन्ति । तत्संस्कारं चाग्रिमश्लोकेन वक्ष्यत्याचार्यः ॥

अत्रोपपत्तिः । त्रैराशिकेन 'दिवौकसोरन्तरलिप्तिकौघाद्गत्योर्वियोगेन हृता'दित्यादिभास्करोक्तविधिना स्फुटा । गतैष्या युतिस्तथा चालनफलं च सर्वं सुगममिति ॥ ५-६ ॥

इदानीं चालनफलस्य धनर्णत्वमाह ।

स्वफलमृणं प्राक् पश्चाद्युतौ धनं वक्रिणि व्यस्तम् ।
समलिप्तौ बुधसितशीघ्रचन्द्रपातेषु च स्वफलम् ॥७॥

प्राग्युतौ गते योगे स्वफलं पूर्वागतमृणं पश्चाद्युतावेष्ययोगे धनं भवति । वक्रिणि ग्रहे च चालनं व्यस्तं देयं गतयोगे धनमेष्ययोगे ऋणमित्यर्थः । एवं ग्रहौ युतौ समलिप्तौ तुल्यौ भवतः । एवं यदि केनापि ग्रहेण सह बुधशुक्रचन्द्रा युतिं कुर्वन्ति तदा बुधशुक्रशीघ्रोच्चयोश्चन्द्रपाते च पूर्वागतं स्वचालनफलं देयम् ।

अत्रोपपत्तिः । चालनधनर्णत्वस्यातिसुगमा । बुधशुक्रयोः शरानयनं

तच्छीघ्रोच्चवशाद्भवति । चन्द्रपातस्य च गतिर्दैनन्दिनी वर्त्ततेऽतस्तेषु शरज्ञानाय चालनं युतिकालेऽत्यावश्यकम् । अन्येषां पातानां गतिश्च वर्षेशतेनापि नोपलभ्यतेऽतस्तच्चालनं युतिकाले शून्यमेवेति सर्वं स्फुटम्॥ ७ ॥

इदानीं स्फुटपातसाधनमाह ।

बुधसितपातेऽव्यस्तं मन्दफलमुपान्त्यशीघ्रफलम् ।
शेषाणां स्फुटपाताद्विक्षेपो मध्यमायोगात् ॥ ८ ॥

बुधशुक्रयोर्गणितागतपाते मन्दफलमव्यस्तं यथागतं धनर्णं देयम् । तत्रोपान्त्यशीघ्रफलं व्यस्तशीघ्रफलं च देयम् । एवं तयोः पातौ स्फुटौ भवतः । शेषाणां भौमगुरुशनीनां पाते च केवलमुपान्त्यशीघ्रफलं व्यस्तशीघ्रफलं देयम् । एवं तेषां पाताः स्फुटा भवन्ति । तस्मात् स्फुटपातान्मध्यमायोगाद्विक्षेपो भवति । अत्रैतदुक्तं भवति । स्फुटपाताद्यदि विक्षेपः साध्यस्तदा स्फुटपाते स्फुटं ग्रहं संयोज्य तस्मात् सपाताद्वक्ष्यमाणविधिना शरः साधनीयः । बुधशुक्रयोः शरानयनार्थं च तच्छीघ्रोच्चयोर्यथागतं तात्कालिकं स्फुटशीघ्रफलं संस्कार्य शीघ्रोच्चे स्फुटे कार्ये ततस्ताभ्यां तत्स्फुटपातसहिताभ्यां शरानयनमिति ।

अत्रोपपत्तिः । 'ये चात्रपातभगणाः पठिता ज्ञभृग्वो' रित्यादि तथा 'पातेऽथवा शीघ्रफलं विलोम'मित्यादि भास्करविधिना स्फुटा । तत्र भास्करस्य वासनाभाष्यं च निरीक्षणीयम् ॥ ८ ॥

अथ गणितागतपातादेव शरसाधने विशेषमाह ।

मन्दफलस्फुटशशिनो विक्षेपो भौमजीवरविजानाम् ।
मन्दफलाव्यस्तस्फुटशीघ्राद्बुधशुक्रयोरथवा ॥ ९ ॥

अथवा मन्दफलस्फुटशशिनो मन्दस्पष्टचन्द्रस्य तथा भौमजीवरविजानां मन्दस्पष्टकुजगुरुशनीनां गणितागतात् पातादेव विक्षेपः साध्यः । बुधशुक्रयोश्च मन्दफलाव्यस्तस्फुटशीघ्राद्यथागतमन्दफलसंस्कृतशीघ्रोच्चाद्गणितागतपाताच्च शरः साध्यः । इति सर्वं पूर्वप्रदर्शितभास्करवचनतः स्फुटम् ॥ ९ ॥

Digitized by Google

इदानीं युतिकाले ग्रहशरसाधनमाह ।

समलिप्तस्फुटमध्यात् स्वपातयुक्ताज्ज्ञशुक्रयोः शीघ्रात् ।
जीवा विक्षेपगुणा हृताऽन्त्यकर्णेन विक्षेपः ॥ १० ॥

समलिप्तस्फुटमध्याद्युतिकालिकमन्दस्पष्टात् । शीघ्राद्यथागतमन्दफलसंस्कृतशीघ्रोच्चात् । अन्त्यकर्णेन स्थिरीभूतेन शीघ्रकर्णेन । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । 'मन्दस्फुटात् खेचरतः स्वपातयुक्ताद्भुजज्ये' त्यादिभास्करविधिना स्फुटा ॥ १० ॥

इदानीं युतिकाले ग्रहयोर्दक्षिणोत्तरान्तरमाह ।

अन्तरयोगौ तुल्यान्यदिशोर्विक्षेपयोर्ग्रहान्तरकम् ।
आर्यभटादिष्वेवं समलिप्तिकयोर्युतिर्ग्रहयोः ॥ ११ ॥

तुल्यान्यदिशोर्विक्षेपयोरन्तरयोगौ दक्षिणोत्तरं ग्रहान्तरकं भवति । एवमार्यभटादिष्वार्यभटादितन्त्रेषु समलिप्तिकयोर्ग्रहयोर्युतिर्युतिसाधनमस्ति । एवं गोलयुक्त्या कदम्बप्रोते युतिरार्यभटाद्यैरानीता साऽऽचार्यसंमता न । आचार्यसंमता युतिः समसूत्रे तदर्थमग्रे वक्ष्यति ॥ ११ ॥

इदानीं कदम्बप्रोतीया युतिर्न समीचीनाऽत्र दृष्टान्तमाह ।

चित्रास्वातिवदुदये यथाऽन्यथाऽस्ते तथा युतौ ग्रहयोः ।
न भवति दृग्गणितैक्यं यथा तदैक्यं तदुक्तिरतः ॥ १२ ॥

यथा द्वयोर्ग्रहयोरुदये उदयलग्ने न्यूनाधिके अपि तयोरस्ते अस्तलग्ने अन्यथाऽर्थादधिकन्यूने भवतः परन्तु तयोर्ग्रहयोर्युतिश्चित्रास्वातिवद्भवति । चित्रायाः क्रान्तिवृत्ते यत् स्थानं तदेव स्वात्या न तथापि तयोः प्रतिदिनं षडशीत्यङ्गुलसमे स्वार्कमितव्यासार्धीये शङ्कौ समप्रोतीया युतिर्भवति । एवं ग्रहयोः क्रान्तिवृत्तीयस्थानवैषम्येऽपि युतिर्भवति सा च कदम्बप्रोतीययुतितो भिन्ने काले । अत आर्यभटादिमतेन ग्रहयोर्युतौ समप्रोतीयायां न दृग्गणितैक्यं भवति । अतो यथा तदैक्यं तयोर्ग्रहयो-

रैक्यं युतिर्द्रुग्गणितैक्यया तथा तद्युक्तिस्तद्युतिसाधनोक्तिरुचिता । विज्ञा-स्वात्योर्युत्यर्थं मदीया द्विग्मीमांसा विलोक्या ॥ १२ ॥

इदानीं समप्रोतीययुतिमाह ।

ग्रहयोः स्वोदयलग्ने समलिप्तिकयोस्तदस्तलग्ने च ।
उदयैः स्वोदयलग्ने सषड्ग्रहस्वास्तलग्नसमे ॥ १३ ॥
कृत्वैवं दिनघटिका ग्रहयोः स्वोदयविलग्नयोरूनम् ।
ऊनं चास्तविलग्नादेष्या त्वधिके युतिरतीता ॥ १४ ॥
ऋणमूनं धनमधिकं स्वोदयलग्नात् स्वमस्तलग्नं चेत् ।
भक्तास्तदन्तरकलाः पृथक् पृथक् स्वदिननाडीभिः ॥ १५ ॥
ऋणयोर्वा धनयोर्वाऽन्तरेण युत्या धनर्णयोर्भक्ताः ।
अन्तरलिप्ताः स्वोदयविलग्नयोर्लब्धघटिकाभिः ॥ १६ ॥
उदयास्तविलग्नान्तरकला गुणाः स्वदिननाडिकाभक्ताः ।
लब्धकलाधिकमूनं स्वास्तविलग्नादुदयलग्नम् ॥ १७ ॥
यद्यधिकमूनमेवं समलिप्तौ स्वोदयाद्युतौ ग्रहयोः ।
रात्रिविलग्नादूनावधिकौ षड्गृहयुतावृदश्यौ ॥ १८ ॥

एकस्मिन् कदम्बप्रोते यदा युतिर्जाता तदा तात्कालिकौ ग्रहौ समलिप्तिकौ भवतः क्रान्तिवृत्ते स्थानैक्यात् । अथ तयोः समलिप्तिकयोर्ग्रहयोरुदयास्ताधिकारविधिना तदा स्वोदयलग्ने तदस्तलग्ने च कार्ये । तत उदयैः स्वदेशराश्युदयैः स्वोदयलग्ने सषड्ग्रहस्वास्तविलग्नसमे कृत्वाऽर्थात् स्वोदयैः स्वोदयलग्नस्य भोग्यकालं सषड्भग्रहास्तलग्नस्य भुक्तकालं मध्योदयांश्चैकीकृत्यैवं ग्रहयोर्दिनघटिकाः स्वस्वदिनमानघटिकाः साध्याः । यदि द्वयोर्ग्रहयोरुदयलग्नयोर्मध्ये यदूनं तदन्यग्रहस्वास्तलग्नात् सषड्भादप्यूनं तदा युतिरेष्या वाच्या । चेदूनमुदयलग्नमन्यग्रहास्तलग्नात् सषड्भादधिकं तदा युतिरतीता गता वाच्या ।

एवं गतागतं समागमं परिज्ञाय समप्रोतीययुतिज्ञानार्थं संस्कारार्थे धनर्णत्वमाह । ऋणमूनं धनमधिकमिति । यदि स्वमस्तलग्नं सष-

ड्भस्वास्तलग्नं स्वोदयलग्नादूनं भवति तदा वक्ष्यमाणसंस्कारफलमृणं यद्यधिकं तदा धनं ज्ञेयमिति । भक्तास्तदन्तरकला इति । स्वोदयलग्न-सषड्भास्तलग्नयोरन्तरकला: पृथक् पृथक् स्वदिनमानघटिकाभिराप्ता: । द्वे फले प्राक्प्रतिपादितधनर्णाङ्किते पृथक् स्थाप्ये । अथ फलाभ्यां संस्कारानयनमृणयोर्वा धनयोर्वेति । यदि द्वे फले धने वा ऋणे तदा तयोरन्तरं कार्यम् । यदि एकं धनमन्यदृणं तदा तयोर्युति: कार्या । एवमेतेनान्तरेण युत्या वा ग्रहोदयलग्नयोरन्तरकला विभक्ता लब्धं घटिकादिकं ग्राह्यम् । एतावद्भिर्लब्धघटिकाभिर्दृग्युतिरेष्या वा गता भवतीति ज्ञेयम् । अथोदयास्तविलग्नान्तरकला: स्वोदयलग्नसषड्भास्तलग्नान्तरकला लब्धघटिकाभिर्गुणा: स्वदिनमानघटिकाभिर्भक्ता: फलकलाभिरधिकं स्वोदयलग्नं कार्यं यदि सषड्भास्तलग्नादूनं यद्यधिकं तदोनं कार्यम् । एवं स्वोदयात् स्वस्वोदयलग्नाद्ग्रहयोर्युतौ समप्रोतीयायां युतौ ग्रहौ समलिप्तौ भवत: । तौ च रात्रिविलग्नाद्राशाविष्टलग्नादूनौ सषड्दृष्टादिष्टलग्नाच्चाधिकौ तदा दृश्यौ भवत इति चतुर्वेदाचार्यसंमता व्याख्या ॥

अत्रोपपत्ति: । ग्रहबिम्बं यदा प्राक्क्षितिजस्थं तदा क्रान्तिवृत्तस्य य: प्रदेश: क्षितिजलग्नस्तदुदयलग्नमतस्तात्कालिकग्रहस्थानशरादिनोदयलग्नसिद्धिर्गोलयुक्त्या भवति । इहाचार्येण कदम्बप्रोतीययुतिकालिकमेव स्थानशरादिकं स्वल्पान्तराद्ग्रहबिम्बोदयकालिकमङ्गीकृत्योदयलग्नं साधितम् । तथा तदेव शरादिकं पश्चिमक्षितिजस्थे ग्रहबिम्बेऽपि प्रकल्प्य पश्चिमक्षितिजस्थे ग्रहबिम्बे क्रान्तिवृत्तस्य य: प्रदेश: पश्चिमक्षितिजलग्नस्तदस्तलग्नं साधितं तत् षड्भयुतं ग्रहबिम्बास्तकाले प्राक्क्षितिजे लग्नमिति स्फुटम् । उदयलग्ने ग्रहबिम्बोदय: सषड्भास्तलग्ने चास्त: । अतस्तदन्तरे स्वोदयैर्या 'ऊनस्य भोग्योऽधिकभुक्तयुक्तो मध्योदयाढ्य:' इत्यनेन घटिकास्ता ग्रहदिनमानघटिका: । तावत्कालपर्यन्तं ग्रहबिम्बं क्षितिजोपरि भ्रमतीति ग्रहदिनमानसंज्ञा समुचितेव । अथ यस्य ग्रहबिम्बस्य प्रथममुदय: पश्चादस्तमयस्तेन सहान्यग्रहयोग: क्षितिजादुपरि

भविष्यति यतोऽन्यग्रहः प्रथममुल्लङ्घ्यादावेवास्तमेष्यत्यतस्तदा युतिरेष्याऽन्यथा गतेति युक्तितः सिध्यति ।

उदयलग्नं ग्रहबिम्बोदयेऽस्तलग्नं सषड्भं लग्नं च ग्रहास्तकालेऽतो ग्रहदिनमानघटिकासु उदयलग्नस्य चलनमुदयलग्नसषड्भास्तलग्नान्तरसमम् । तदन्तरं यथाऽल्पं भवति तथा सषड्भास्तलग्नस्य न्यूनाधिकत्वं कल्प्यम् । अर्थात् सषड्भास्तोदयलग्नयोरेकस्मादन्यस्य विशोधनेन यत्राल्पावशेषस्तस्यैवान्यस्य न्यूनत्वमिति युक्तितः सिद्धम् । यथा यदि सषड्भास्तलग्नं तुलान्तम् = ७ । उदयलग्नम् = २ वृषान्तम् । तदा ७ − २ = ५ । २ − ७ = ७ । अत उदयलग्नमूनं सषड्भमस्तलग्नं चाधिकमिति ज्ञेयम् । एवं यत्र सषड्भास्तलग्नम् = १ । उदयलग्नम् = २ । तत्र १ − २ = ११ । २ − १ = १ । अत्रोऽत्र सषड्भास्तलग्नमूनं ज्ञेयम् । अथ ग्रहदिनमानघटिकाभिर्यदि तदुदयलग्नस्य गतिरुदयसषड्भास्तलग्नान्तरसमं तदैकया घट्या किम् । जातैकरूपवेगेनैकघटिकायां स्वस्वोदयलग्नगतिः । यदि उदयलग्नगत्योरन्तरेणैका घटिका तदा स्वोदयलग्नयोरन्तरेण किं लब्धाः समप्रोतीययुतिकाले गता एष्या वा घटिकास्ताभिर्युतिकाले स्वोदयलग्नस्य यावच्चलनं तत्संस्कारेण समप्रोतीयौ समलिप्तिकौ ग्रहौ भवत एव । एवमुदयलग्नस्य समानवेगेन चलनमङ्गीकृत्यानुपातेन युतिकालः स्थूलोऽयनाक्षजदृक्कर्मणोः प्रतिक्षणं वैलक्षण्यादुदयलग्नगतेरसमानवेगत्वादिति स्फुटं सिद्धान्तविद्भिः । विजातीययोरुदयलग्नगत्योरन्तरं तद्योगसमं भवतीति धनर्णवासना सर्वा स्फुटा । भास्करेण ग्रहयोर्ध्रुवसूत्रे युतिरानीता सा च 'चित्रास्वातिव' दिति प्रतिपादयताऽऽचार्येण नाङ्गीकृता । यतो नहि चित्रास्वात्योर्ध्रुवप्रोतीयस्यानैक्यमस्ति । अतस्तयोर्ध्रुवप्रोतीययुतेरसम्भव एव । रात्राविष्टलग्नादूनः सषड्भेष्टलग्नाद्योऽधिकः स क्षितिजोपरिगतत्वाद् दृश्यो भवति । एवं ग्रहस्य स्वल्पे शरे क्रान्तिवृत्तीयस्थानासन्न एवोदयलग्नेऽन्यथा स्वेष्टलग्नाद्यस्योदयलग्नमल्पमस्तलग्नं चाधिकं स एव दृश्य इति युक्तियुतं ग्राह्यमिति ॥ १३–१८ ॥

इदानीं भेदयोगलम्बनज्ञानार्थमाह ।

एवं मानैक्यार्धादधिके मध्यान्तरे युतिर्ग्रहयोः ।
स्थित्यर्धविमर्ददले हीने ताराग्रहोडुयुतौ ॥ १९ ॥
लम्बनमर्कग्रहणवदसकृत् स्वावनतिलिप्तिकास्पष्टौ ।
तात्कालिकविक्षेपौ तदन्तरैक्यं समान्यदिशोः ॥ २० ॥
विक्षेपो मध्यान्तरमूर्ध्वस्थच्छादको ग्रहोऽधःस्थः ।
मानैक्यार्धादधिके नातिस्पष्टा स्फुटोक्तिरतः ॥ २१ ॥

एवं मध्यान्तरे ग्रहयोः केन्द्रान्तरे मानैक्यार्धादधिके ग्रहयोर्युतिर्ज्ञेया । मानैक्यार्धाद्धीने मध्यान्तरे च कदम्बप्रोतीययुतिकालमेव गर्भीयदर्शान्तं प्रकल्प्य सूर्यग्रहणवत् स्थित्यर्धविमर्ददले साध्ये । एवं ताराग्रहोडुयुतौ ताराख्यो यो ग्रहो भौमादिस्तस्योडोर्नक्षत्रस्य च या युतिस्तस्यामपि क्रिया भवतीति प्रसिद्धम् ॥

कदम्बप्रोतीययुतिकाले सूर्यग्रहणवदसकृल्लम्बनं प्रसाध्यम् । ग्रहयोः स्वावनतिलिप्तिकाभिः स्पष्टौ तात्कालिकौ विक्षेपौ च कृत्वा तयोः समान्यदिशोरन्तरैक्यं स्पष्टो विक्षेप एव मध्यान्तरं केन्द्रान्तरं कल्प्यम् । अत्रोर्ध्वस्थस्य ग्रहस्याधःस्थो ग्रहश्छादकः कल्प्यः । एवं सूर्यग्रहणवत् सर्वं प्रकल्प्य स्फुटस्थित्यर्धविमर्ददले साध्ये । इदानीं पूर्वसाधितसमप्रोतीययुतौ विशेषमाह मानैक्यार्धादधिके इति । केन्द्रान्तरे मानैक्यार्धादधिके पूर्वसाधिता समप्रोतीया युतिर्नातिस्पष्टा भवति अर्थात् स्थूला भवति । अतः स्फुटोक्तिः स्फुटयुतिसाधनस्योक्तिरुचिता ।

अत्रोपपत्तिः । 'मानैक्यार्धाद्ग्रहान्तरविवरेऽल्पे भवेद्भेदयोग' इत्यादिभास्करोक्तेन स्फुटा ॥ १९–२१ ॥

अथ स्फुटयुतिसाधनमाह ।

ऊनदिनोदितगुणितादधिकदिनादूनदिनहृताल्लब्धम् ।
अधिकं प्राग्युतिरूनं यद्यधिकदिनोदितात् पश्चात् ॥ २२ ॥
अन्तरमाद्यो भूयोऽन्यदिष्टघटिकाफलोनयुतयोश्च ।

प्राक् पश्चाद्वाऽन्तरयोस्तदन्तरेणोद्धृतादाद्यात् ॥ २३ ॥

युत्याऽन्यथेष्टघटिका-
गुणितात् फलनाडिका यथाऽऽद्यवशात् ।
प्राक् समलिप्तिककालात्
पश्चाद्वा ग्रहयुतिर्भवति ॥ २४ ॥

यस्मिन् काले कदम्बप्रोतीयौ समलिप्तिकौ ग्रहौ जातौ तस्मिन् काले स्वदेशोदयैर्लग्नं साध्यम् । भगोलं परिभ्राम्य तौ ग्रहौ प्राक्क्षितिजस्थौ कृत्वा तयोरुदयलग्ने च साध्ये ततस्तात्कालिकलग्न-ग्रहोदयलग्नान्तरे लग्नात् कालसाधनवद्ग्रहदिनगता घटिकाः साध्याः । ता एवेहाचार्योक्ता दिनोदिता घटिका ज्ञेयाः । दिनमानघटिकाश्च द्वयोर्ग्रहयोः पूर्वमानीता एव । अथ यस्याल्पदिनप्रमाणं तस्य गता घटिका ऊनदिनोदिता घटिकाः । यस्याधिकं दिनप्रमाणं तस्य गता अधिकदिनोदिताः । अल्पदिनप्रमाणमूनदिनमधिकदिनप्रमाणमधिकदिनमित्याचार्यस्य सङ्केतस्तेनायमर्थः । अधिकदिनादूनदिनोदितगुणितादूनदिनहृताद्यल्लब्धं तच्चेदधिकदिनोदितादधिकं तदा युतिः प्राग्जाता गतेत्यर्थः । यद्यूनं तदा युतिः पश्चाद्भविष्यतीति वेदितव्यम् । लब्धघटिकाऽधिकदिनोदितघटिकान्तरमाद्यसंज्ञं भवति । इष्टघटिकाफलोनयुतयोर्द्वयोर्ग्रहयोरेवमन्यदर्थादन्यसंज्ञमानेयम् । एतदुक्तं भवति । गतयुतौ गता एष्ययुतावेष्या इष्टघटिकाः कल्प्यास्ताभिस्तौ ग्रहौ प्रचाल्य तयोरुदयलग्नादिना तयोर्गतघटिका आनीय 'ऊनदिनोदितगुणितादित्यादिना पुनरन्तरं साध्यं तदन्यसंज्ञं ज्ञेयम् । यद्यन्तरद्वयेनापि प्राग्गता वा पश्चादेष्या युतिस्तदा इष्टघटिकागुणितादाद्यात् तदन्तरेणाद्यान्ययोरन्तरेण हृतात् फलं नाडिका आद्यवशात् समलिप्तिककालाद्गता वैष्या भवन्ति । अन्यथा एकेन गताऽपरेणैष्या युतिस्तदाऽऽद्यान्ययोर्युत्या हृतात् फलनाडिका ज्ञेयाः ।

अत्रोपपत्तिः । त्रैराशिकेन यद्यूनदिनमानेनोनदिनोदिता घटिकास्तदाऽधिकदिनमानेन किं युतिकालेऽधिकदिनोदितघटिका भवन्ति । एवमत्राचार्येण ग्रहयोर्दिनमानगतघटिकामध्ये तुल्या निष्पत्तिरङ्गीकृता

स्वल्पान्तरतः । यदि लब्धघटिका अधिकदिनगतघटिकातोऽधिका तदा युतिर्गताऽन्यथैष्येति स्फुटा । द्वयोरन्तरमोत्रसंज्ञं कल्पितम् । इष्ट-घटिकाभिर्ग्रहौ प्रचाल्य पुनरन्तरमन्यसंज्ञं कृत्वाऽनुपातः । यद्याद्या-न्यान्तरतुल्येनापचयेनेष्टघटिकास्तदाऽऽद्यसमापचयेन किं फलनाडि-काभिराद्यकालात् प्राक् पश्चाद्वाऽन्तरस्याऽऽद्यसमापचयादभावोऽतस्तत्र युतिरिति ग्रहगतिग्रगत्योर्वैलक्षण्यादसकृत् कर्म समुचितं तत् स्वल्पान्त-रादाचार्यैस्त्यक्तमिति । विजातीययोराद्यान्ययोरन्तरे बीजक्रियया तयो-र्युतिरुत्पद्यते तथा तदा भक्तात् फलं ग्राह्यमित्यादि स्फुटं बीजविदा-मिति ॥ २२–२४ ॥

इदानीं कदा युतिर्भवतीत्याह ।

स्वदिनघटिकाविभक्तस्तदुदितपरदिवसनाडिकाघातः ।
तुल्यः परोदिताभिर्घटिकाभिर्यदि युतिर्ग्रहयोः ॥ २५ ॥

तदुदितपरदिवसनाडिकाघातः स्वदिनघटिकाविभक्तो यदि परो-दिताभिर्घटिकाभिस्तुल्यस्तदा तयोर्ग्रहयोर्युतिर्भवतीति वेदितव्यम् । अत्रे-तदुक्तं भवति । एकस्य गता घटिकाः परस्य दिनमानघटिकाभिर्गुणा एकस्य दिनमानेन हृताः फलतुल्या यदि परस्य गतघटिकाः स्युस्तदा तयोर्ग्रहयोः कदम्बप्रोतीया युतिर्वाच्येति पूर्वसाधितयुतिकालतः स्फुटम् ॥ २५ ॥

इदानीमुपसंहारमाह ।

विक्षेपमानसमकलदिनघटिकास्वोदयास्तलग्नाद्यैः ।
षड्विंशत्यार्याणां नवमो ग्रहमेलनाध्यायः ॥ २६ ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते ग्रहयुत्यधिकारो नवमः ॥ ९ ॥

समकलौ समलिप्तौ ग्रहौ । शेषं स्पष्टार्थम् ।

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितो योगविधौ सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्त-नूतनतिलके ग्रहयुत्यधिकारो नवमः ॥ ९ ॥

Digitized by Google

अथ भग्रहयुत्यधिकारः ।

तत्रादौ भध्रुवानाह ।

अष्टनखैर्मेषे गवि रदलिप्तोनैर्गुणस्वरैर्मिथुने ।
कर्कटके गुणषोडशधृतिभिः सिंहे नवत्रिघनैः ॥ १ ॥
कन्यायां पञ्चनखैस्तुलिनि त्र्यतिधृतिभिरलिनि सेषुकलैः ।
द्विचतुर्दशातिधृतिभिर्धनुषि शशाङ्कमनुनखतत्त्वैः ॥ २ ॥
मकरेऽष्टनखैः कुम्भे नखषड्विंशैर्झषे मुनित्रिंशैः ।
पृथगश्विन्यादीनां ध्रुवकांशैर्योगतारास्थैः ॥ ३ ॥

अश्विन्यादीनां योगतारास्थैरेतैर्ध्रुवकांशैर्वक्ष्यमाणविधिना ग्रहेण सह योगः साध्यः । कैः । मेषेऽष्टनखैः । अर्थादश्विन्या मेषस्याष्टांशाः । भरण्या विंशत्यंशा ध्रुवकास्तैः । वृषे रदलिप्तोनैस्त्रैरेवाष्टनखैरंशैः । कृत्तिकाया वृषस्याष्टांशा द्वात्रिंशत्कलोनाः । रोहिण्या वृषस्य विंशत्यंशा द्वात्रिंशत्कलोनास्तैः । मिथुने गुणस्वरैः । मृगशीर्षस्य मिथुनस्य त्रयोऽंशाः । आर्द्राया मिथुनस्य सप्तांशास्तैः । कर्कटके गुणषोडशधृतिभिः । पुनर्वसोः कर्किणस्त्रयोऽंशाः । पुष्यस्य कर्किणः षोडशांशाः । आश्लेषायाः कर्किणोऽष्टादशांशास्तैः । सिंहे नवत्रिघनैः । मघायाः सिंहस्य नवांशाः । पूर्वफल्गुन्याः सिंहस्य सप्तविंशत्यंशास्तैः । कन्यायां पञ्चनखैः । उत्तरफल्गुन्याः कन्यायाः पञ्चांशाः । हस्तस्य कन्याया विंशत्यंशास्तैः । तुलिनि त्र्यतिधृतिभिः । चित्रायास्तुलायास्त्रयोऽंशाः । स्वातेस्तुलाया एकोनविंशत्यंशास्तैः । अलिनि सेषुकलैर्द्विचतुर्दशातिधृतिभिः । विशाखानुराधाज्येष्ठानां क्रमेण वृश्चिकस्य पञ्चकलासहिता द्विचतुर्दशैकोनविंशतिभागास्तैः । धनुषि शशाङ्कमनुनखतत्त्वैः । मूलपूर्वाषाढोत्तराषाढाभिजितां क्रमेण धनुष एक–चतुर्दश–विंशति–पञ्चविंशतिभागा ध्रुवास्तैः । मकरेऽष्टनखैः । श्रवणधनिष्ठयोः क्रमेण मकरस्याष्ट–विंशतिभागा ध्रुवास्तैः । कुम्भे नखषड्विंशैः । शततारकापूर्वभाद्रपदयोः क्रमेण कुम्भस्य विंशति–

षड्विंशभागा ध्रुवास्तैः । श्रवणे मुनित्रिंशैः । उत्तरभाद्रपदरेवत्योः क्रमेण मीनस्य सप्त-त्रिंशांशास्तैरिति । अत एवाश्विन्यादीनां ध्रुवांशा भास्करेणापि स्वभग्रहयुत्यधिकारे पठिताः । ध्रुवाश्चैते राश्याद्याः ।

अ·	भ·	कृ·	रो·	मृ·	आ·	पु·	पु·	श्ले·	म·	पू·	उ·	ह·	चि·
०	०	१	१	२	२	३	३	३	४	४	५	५	६
८	२०	७	१९	३	७	३	१६	१८	९	२७	५	२०	३
०	०	२८	२८	०	०	०	०	०	०	०	०	०	०

स्वा·	वि·	अ·	ज्ये·	मू·	पू·	उ·	अ·	श्र·	ध·	श·	पू·	उ·	रे·
६	७	७	७	८	८	८	८	९	९	१०	१०	११	०
१९	२	१४	१९	१	१४	२०	२५	८	२०	२०	२६	७	०
०	५	५	५	०	०	०	०	०	०	०	०	०	०

इदानीं भग्रहयुतेर्गतागतमाह ।

ध्रुवकादूनः पश्चादधिकः प्राग्वक्रितेऽन्यथा योगः ।
अन्यद्ग्रहमेलकवद्ध्रुवकक्रान्तेर्भविक्षेपाः ॥ ४ ॥

ग्रहो भध्रुवकादूनस्तदा योगः पश्चाद्भविष्यति । अधिकस्तदा योगः प्राग्गतः । ग्रहे वक्रिते सति योगोऽन्यथा वाच्यः । अर्थादूने पश्चादधिके गत इति वेदितव्यम् । अन्यद्ग्रहयुतौ ग्रहमेलकवज्ज्ञेयम् । अथ भध्रुवकक्रान्तेरग्राद्भविक्षेपा वक्ष्यमाणा एते ॥ ४ ॥

अथ नक्षत्राणां शरांशानाह ।

सौम्या दशार्कविषया याम्याः शरदश्रभवा रसाः सौम्याः ।
खं सप्त दक्षिणाः खं सौम्याः सूर्यत्रयोदशकाः ॥ ५ ॥
दक्षिणतो भवयमलाः सप्तत्रिंशदुदगंशका याम्याः ।
अध्यर्धत्रिचतुष्कार्धनवमसत्र्यंशविषयशराः ॥ ६ ॥
सौम्या द्व्यधिका षष्टिस्त्रिंशत् षट्त्रिंशदितरलिप्ताः ।
अष्टादशोत्तरा जिनषड्विंशत्यम्बराण्यंशाः ॥ ७ ॥
प्राजेशयोगतारा विक्षेपांशैः कलात्रिघनहीनैः ।
आग्नेयस्य कलानामेकोनत्रिंशता हीनैः ॥ ८ ॥

पञ्चदशकलाहीनैश्चित्रायाः सप्तभिर्विशाखायाः ।
षट्सप्तत्या मैत्रस्यैन्द्रस्य त्रिंशता हीनैः ॥ ९ ॥

अश्विन्यादियोगताराणामेते यथादिक्काः शरांशा ज्ञेयाः । दश द्वादश पञ्च भागा उत्तराः । पञ्च–दश–एकादश भागा याम्याः । षड्भागा उत्तराः । शून्यम् । सप्तभागा दक्षिणाः । शून्यम् । द्वादश–त्रयोदश भागाः सौम्याः । एकादश–यमलं द्वयं भागा दक्षिणाः । सप्तत्रिंशद्भागाः सौम्याः ।

अध्यर्धं सार्धैकभागः १° । ३०′ ॥ अर्धनवमं सार्धाष्टभागाः ८° । ३०′ ॥ सत्र्यंशा विषयाः पञ्च भागाः । ५° । २०′ ॥ शराः पञ्चभागा याम्याः । द्व्यधिका षष्टिर्द्विषष्टिभागाः, त्रिंशद्भागाः, षट्त्रिंशद्भागा उत्तराः । इतरा दक्षिणा अष्टादशलिप्ताः शरकलाः । चतुर्विंशति–षड्विंशतिशून्य-भागा उत्तराः । प्राजेशस्य रोहिण्या योगतारा विक्षेपांशैः पूर्वोदितशरांशैः किं विशिष्टैः कलात्रिघनहीनैः सप्तविंशतिकलारहितैस्तिष्ठति । आग्नेयस्य कृत्तिकायाश्च योगतारा पूर्वोक्तशरांशैरेकोनत्रिंशत्कलाहीनैश्चित्रायाः पञ्चदशकलाहीनैर्विशाखायाः सप्तभिः कलाभिर्हीनैर्मैत्रस्यानुराधायाः कलानां षट्सप्तत्या भागेनैकेन षोडशकलाधिकेन हीनैरैन्द्रस्य ज्येष्ठायाः कलात्रिंशता हीनैर्योगतारा तिष्ठति । अर्थात् पूर्वोदितशरांशाः पठित-कलोनास्तदा तेषां नक्षत्राणां यथोदितदिक्का वास्तवशरभागा वेदितव्या इति ।

नक्षत्राणां शरांशाश्चैते ।

अ॰	भ॰	कृ॰	रो॰	मृ॰	आ	पु॰	पु॰	श्ले॰	म॰	पू॰	उ॰	ह॰	चि॰
१०	१२	४°	४°	१०	११	६	०	७	०	१२	१३	११	१
उ॰	उ	३१′	३३′	द	द	उ॰	द॰	द॰	उ॰	उ॰	उ॰	द॰	४५
		उ॰	द										द॰

स्वा॰	वि॰	अ॰	ज्ये॰	मू॰	पू॰	उ॰	अ॰	श्र॰	ध॰	श॰	पू॰	उ॰	रे॰
३७	१	१	३	८	५	५	६२	३०	३६	०	२४	२६	०
उ	२३	४४	३०	३०	२०	द	उ	उ	उ	१८	उ	उ	उ॰
	द	द	द	द	द					द			

भास्करेण कृत्तिकाया रोहिण्याश्च ४° । ३०′ । विशाखायाः १° । २०′ । अनुराधायाः १° । ४५′ । शततारकायाः ०° । २०′ इति भिन्नाः पठिताः । अन्येषां चाचार्याणां समा एवेति सुधीभिर्विचिन्त्यम् ॥ ५–९ ॥

इदानीं विशेषमाह ।

छादयति योगतारां मानार्धोनाधिकाद्ग्रविक्षेपात् ।
स्फुटविक्षेपो यस्याधिकोनको भवति समदिक्स्थः ॥ १० ॥

भविक्षेपाख्यनक्षत्रशरात् किंविशिष्टात् मानार्धोनाधिकाद्ग्रहबिम्बमानार्धेनोनाद्युताच्च यस्य ग्रहस्य स्फुटविक्षेपो ध्रुवप्रोतीयः शरः क्रमेणाधिकोनो भवति स समदिक्स्थो ग्रहो योगतारां छादयति ।

अत्रोपपत्तिः । कल्प्यते ग्रहशरो नक्षत्रशरदिक्को नक्षत्रशरादल्पस्तदा द्वयोरन्तरेण केन्द्रान्तरम् नश–ग्रश इदं ग्रहबिम्बमानार्धादल्पं तदा ग्रहो योगतारां छादयति । अतस्तदा नश–ग्रश $\angle \frac{\text{विंमा}}{२}$

$\therefore$ नश–$\frac{\text{विमा}}{२}$ $\angle$ ग्रश । एवं यदा नक्षत्रशरदिक्को ग्रहशरोऽधिकस्तदा भेदयोगे ग्रश–नश $\angle \frac{\text{विंमा}}{२}$ $\therefore$ ग्रश $\angle$ नश $+ \frac{\text{विंमा}}{२}$ । अत आचार्योक्तं स्पष्टमुपपद्यते ॥ १० ॥

इदानीं रोहिणीशकटभेदमाह ।

विक्षेपांशद्वितयादधिको वृषभस्य सप्तदशभागे ।
यस्य ग्रहस्य याम्यो भिनत्ति शकटं स रोहिण्याः ॥ ११ ॥

स्पष्टार्थम् ।

अत्रोपपत्तिः । रोहिणीशकटस्य ध्रुवभागा वृषस्य सप्तदशांशाः । याम्यः शरश्चांशद्वयाधिकः । अतो ग्रहस्य तादृशि स्थितौ शकटे प्रवेश इति स्फुटम् ।

अत्राधिकपदेन रोहिणीशरपर्यन्तमेव गृह्यतेऽन्यथा रोहिणीयोगताराताऽपि दक्षिणस्थे ग्रहबिम्बे शकटभेदाभावस्तेनांशद्वयाधिको रोहिणीशरतोऽल्पो याम्यः शरो यस्य स एव रोहिणीशकटं भिनत्ति ॥ ११ ॥

इदानीं भेदे विशेषमाह ।

विक्षेपान्ते सौम्ये तृतीयतारां भिनत्ति पित्र्यस्य ।
इन्दुर्भिनत्ति पुष्यं पौष्णं वारुणमविक्षिप्तः ॥ १२ ॥

इन्दुः सौम्ये विक्षेपान्ते सौम्यशरस्य परमे पित्र्यस्य मघायास्तृतीयतारां भिनत्ति । एवमविक्षिप्तः शररहित इन्दुः पुष्यं पौष्णं रेवतीं वारुणं शततारकां च भिनत्ति ।

अत्रोपपत्तिः । मघातृतीयताराया: शर उत्तरश्चन्द्रपरमशरसमो ध्रुवश्च पूर्वोक्ताः ४ रा । ९ भं । अतस्तत्रैव ग्रहबिम्बे भेदयोगो भवत्येवात्र किं चित्रम् । शेषोपपत्तिरप्यत्र पूर्वयुक्त्या स्फुटा । यस्या मघायोगताराया ध्रुवा: शून्यशरभागाश्च पठितास्तां चाविक्षिप्त एवेन्दुर्भिनत्ति ॥ १२ ॥

इदानीं भादिदृक्कर्मानयने कारणमाह ।

कृत्वाऽपि दृष्टिकर्म श्रीषेणार्यभटविष्णुचन्द्रोक्तम् ।
प्रतिदिनमुदयेऽस्ते वा न भवति दृग्गणितयोरैक्यम् ॥ १३ ॥
भमुनिमृगव्याधानां यतस्ततो दृष्टिकर्म वक्ष्यामि ।
दृग्गणितसमं देयं शिष्याय चिरोषितायेदम् ॥ १४ ॥

श्रीषेणार्यभटविष्णुचन्द्रोक्तं दृष्टिकर्म कृत्वाऽपि प्रतिदिनं भमुनिमृगव्याधानां नक्षत्रागस्त्यलुब्धकानामुदयेऽस्ते वा यतो दृग्गणितयोरैक्यं न भवति ततस्तस्मात् कारणाद्दृग्गणितसमं दृष्टिकर्म वक्ष्यामि । इदं दुर्लभं वक्ष्यमाणं दृक्कर्म चिरोषिताय भक्ताय शिष्याय देयं नान्येभ्य इति ॥ १३–१४ ॥

इदानीं भमुनिव्याधानजदृक्कर्मार्थं स्फुटक्रान्तिज्यामाह ।

क्रान्तिज्या तत्क्रान्तिर्विक्षेपक्रान्तिचापभागानाम् ।
संयोगान्तरजीवा स्वक्रान्तिज्यैकभिन्नदिशाम् ॥ १५ ॥

नक्षत्रमुनिव्याधध्रुवकेभ्यो ध्रुवज्या जिनज्यागुणा त्रिज्याभक्तेति विधिना क्रान्तिज्या साध्या सा तत्क्रान्तिरुच्यते । तत एकभिन्नदिशां विक्षेपक्रान्तिचापभागानां संयोगान्तरजीवा स्वक्रान्तिज्या स्फुटा भवति ।

Digitized by Google

अत्रोपपत्तिः । आचार्येण ध्रुवप्रोतीया ध्रुवाः शरांशाश्च पठिताः । अतो ध्रुवक्रान्तिर्नक्षत्रध्रुवप्रोते नक्षत्रस्थान-नाडीमण्डलान्तरांशास्तत्र ध्रुवप्रोतीयशरसंस्कारेण नाडीमण्डलादवधिबिम्बावधि ध्रुवप्रोतेऽंशाः स्पष्टक्रान्त्यंशा भवन्तीति गोलयुक्त्या स्फुटम् । संस्कारवासना चातिसुगमा ॥ १५ ॥

इदानीं विशेषमाह ।

एवं भमुनिध्रुवयोर्ग्रहतत्क्रान्त्या च दृष्टिकर्मायनम् ।
कृत्वा ग्रहे भमुनिवत् तस्मात् स्वक्रान्तिजीवा च ॥ १६ ॥

एवं भमुनिध्रुवयोः पूर्वप्रकारेण स्पष्टक्रान्तिज्यानयनं कार्यम् । नक्षत्रध्रुवा वेधेनाऽऽयनदृक्कर्मसंस्कृता एव पठिताः । अतो ग्रहतत्क्रान्त्या च ग्रहे चायनं दृष्टिकर्मायनं दृक्कर्म सजातीयत्वात् कृत्वा तस्मादायनदृक्कर्मसंस्कृताद्ग्रहाद्भमुनिवत् स्वक्रान्तिजीवा ग्रहस्पष्टक्रान्तिज्या च साध्या ।

अत्रोपपत्तिः । आचार्येण ग्रहकदम्बप्रोतीयः शर एव स्वल्पान्तराद्ध्रुवप्रोतीयः कल्पितो ग्रहशराणामल्पत्वात् । तत आयनदृक्कर्मसंस्कृतग्रहक्रान्तिशरसंस्कारेण नक्षत्रवत् स्फुटक्रान्तिज्यासाधनं कृतम् । भास्कराचार्येण च 'त्रिज्यावर्गादयनवलनज्याकृतिं प्रोह्य'त्यादिविधिना ध्रुवप्रोतीयः स्फुटशरः क्रान्तिसंस्कारयोग्यः साधितः । स च स्थानीयबिम्बीयाहोरात्रवृत्तयोरन्तरचापसमश्चापीयत्रिकोणमितियुक्त्या न भवतीति भास्करसाधितः स्फुटशरः स्थूलोऽतः कमलाकरेण भास्करशरसाधनस्य यत् खण्डनं कृतं तत् समीचीनमेव । 'ब्रह्मगुप्तादिभिः स्वल्पान्तरत्वान्न कृतः स्फुटः' इत्यादिना भास्करेण स्वदृक्कर्मवासनायां गोलाध्याये ह्याचार्यपक्षः समर्थित इति सर्वं स्फुटं सिद्धान्तविदाम् ॥ १६ ॥

इदानीमायनं दृक्कर्माह ।

त्रिज्याप्तासुभिदुदयैर्घाताद्विक्षेपसत्रिभक्रान्त्योः ।
ऋणधनमेकान्यदिशोस्तयोर्ग्रहे न भमुनिध्रुवके ॥ १७ ॥

विक्षेपस्य सत्रिभग्रहक्रान्तेः सत्रिभग्रहक्रान्तिज्यायाश्च वधात्

देहाद्यवस्थानायोगादिति शङ्कानिरासायोपादाननाशे ऽप्युपादेयं क्षणं तिष्ठतीति समाधानविवक्षायां तन्तुपटन्यायावतारः। स्वीक्रियते हि तार्किकैरपि समवायिकारणतन्त्वादिनाशे ऽपि पटादि क्षणं तिष्ठतीति। ८६। ११३।

अत्र प्रासङ्गिकः कारणनाशे कार्यनाश इति न्यायः। अत्र कारणकार्यशब्दावुपादेयोपादानपरौ। १। ११४।

ननु तन्तुनाशे पटस्य क्षणमात्रमवस्थानं भवति तत्त्वविदां तु लोमशमार्कण्डेयादीनां बहुकल्पपर्यन्तमवस्थानं स्मर्यते तथा च कथमेतन्न्यायसंगतिरिति शङ्कानिरासायोत्पन्नस्य कतिपयदिवसैरुत्पद्य विनष्टानां तन्तूनां यादृशक्षणस्तद्योग्यः स्वीकृतस्तार्किकैरस्माभिरप्यनादेरसंख्यमहाकल्पावस्थितेरज्ञानस्य योग्यस्तादृश एव क्षण उचित उपेतुमिति समाधानराजस्य योग्यो योग्येन संबध्यतइति न्यायः सचिवतामेति। दृश्यते हि लोके ऽन्योन्ययोग्यानामेव नृपशुपक्ष्यादीनां मिथुनत्वादिसंबन्धः। सांप्रदायिकैश्चोक्तम्। तन्तूनां दिनसंख्यानां तैस्तादृक् क्षण ईरितः। भ्रमस्यासंख्यकल्पस्य योग्यः क्षण इहेष्यतामिति। अत्र भ्रमपदमज्ञानपरम्। ८७। ११५।

यावच्छिद्ररस्तावती शिरोव्यथेति न्यायो ऽपीह बोध्यः। ८८। ११६।

जीवन्मुक्तिदशायां च विद्वान्ब्रह्मात्मानं हस्तामलकन्यायेनासंदिग्धाविपर्यस्तं साक्षात्पश्यति। करे स्थितमामलकीफलं निर्मलं जलं वा यथा दृश्यते तथेत्यर्थः। ८९। ११७।

एतेन करस्थबिल्वन्यायोऽपि व्याख्यातः। ९०। ११८।

देहं च बोधात्प्रागात्मत्वेनाभिमतमपि सति बोधे

Digitized by Google

ऽहिनिर्ल्वयिनीन्यायान्न कदा ऽप्यात्मतया पश्यति । यथा सर्पः स्वत्वचं पुरा ऽऽत्मतयोपगतामपि त्यागानन्तरं स्वसमीपे वर्त्तमानामपि न कदा चिदात्मत्वेन जानाति तथेत्यर्थः । ६१ । ११६ ।

प्रपञ्चं च दग्धरशनान्यायेन निःसारतया वेत्ति । यथा दग्धा रज्जुः पूर्ववत्त्रिगुणत्वादिरूपेण प्रतीयमानापि निःसारा बुध्यते बुधैस्तथेत्यर्थः । ६२ । १२० ।

दग्धपटन्यायो ऽप्येतादृशः । ६३ । १२१ ।

कथं चिदपि नानात्वानुभवे कथमद्वैतबोध इत्याकाङ्क्षायां चित्रपटन्यायावतारः । यथा पटे स्थितानां चित्राणां न पटातिरेकेण सत्ता ऽस्ति तथा न ब्रह्मातिरेकेण द्वैतसत्ता ऽस्ति । तथा च चित्रनानात्वज्ञानेन पटैकत्वानुभवाप्रतिबन्धवत्तत्त्वविदो न प्रपञ्चनानात्वधिया ब्रह्माद्वैतधीप्रतिबन्धः । ६४ । १२२ ।

ये कारणं विना कार्यावस्थनासंभवं मन्यमानाश्चम्पकपटवासन्यायेन संस्काराख्याज्ञानालेशावशेषं विक्षेपाख्यशक्त्यवशेषं वोपगच्छन्ति तेषां मते तेन पुनः संसृत्याशङ्कोत्खातदंष्ट्रोरगन्यायेन वारणीया । यथोत्पाटितदन्तपङ्क्तिर्नागो नापकारक्षमस्तथा ऽत्रापि ज्ञेयम् । ६५ । १२३ ।

चम्पकेति प्रासङ्गिकः । यथा दूरीकृतेष्वपि पटनिष्ठचम्पकपुष्पेषु पटउपलभ्यमानो गन्धो निराश्रयगुणावस्थानायोगात्तदाश्रयं द्रव्यं कल्पयति तथा ऽत्रापीत्यर्थः । १ । १२४ ।

अपसारिताग्निभूतलन्यायो ऽपीदृशः । २ । १२५ ।

ननु विहितानिषिद्धादि कर्म कुर्वंस्तत्त्ववित्कथं न तत्फलेन युज्येतेति चेन्न । यतो निरहंकारतया कृतत्वात्त-

त्कर्माणि चित्राङ्गनान्यायेनाकर्माण्येवेति न देहान्तरमारब्धुं क्षमन्ते। यथा चित्राङ्गना स्त्रीव दृश्यमाना ऽपि न चुम्बनालिङ्गनादि फलं जनयितुं शक्नोति तथा प्रकृते ऽपीत्यर्थः। ६६। १२६।

अत्र चित्रामृतन्यायः। ८७। १२७।

चित्रालानन्यायश्च बोध्यः। ६८। १२८।

नन्वादावन्ते च यन्नास्ति वर्त्तमाने ऽपि तत्तथेति न्यायाद्ये तुच्छमेव द्वैतं मन्यन्ते तेषां ब्रह्मबोधेन सविकृत्यविद्याबाधो न स्यात् तस्य ब्रह्मस्वरूपनित्यबोधमहिम्ना सदैव बाधितत्वात्। अदग्धदहनन्यायेनाबाधितस्यैव बाधसंभवात्। न हि वन्हिर्दग्धं दहति। किं च दग्धं तथा ऽऽत्मनः स्वतःसिद्धे द्वैतादर्शने नित्यमुक्तस्यासंसारिणः शास्त्रसाध्यप्रयोजनशून्यतया शास्त्रस्योषरवृष्टिन्यायेनानर्थक्यप्रसङ्ग इति चेन्न। नित्यमुक्तस्यैवासंसारिणो ऽत्यन्तासत्संसारनिवर्त्तकतया शास्त्रप्रामाण्योपपत्तेः। नित्यबोधमहिम्ना बाधिते ऽपि द्वैते वाक्यजबोधस्य धनंजयन्यायेन बाधकत्वोपपत्तेः। यथा ऽऽहुः। नित्यबोधपरिपीडितं जगद्विभ्रमं तुदति वाक्यजा मतिः। वासुदेवनिहतं धनंजयो हन्ति कौरवकुलं यथा पुनरिति। ६६। १२२।

अथ प्रासङ्गिकाः। आदावन्ते चेति न्या०। १। १३०।

अदग्धदहनन्यायो ऽत्र विवृतः २। १३१।

ऊषरवृष्टिन्यायस्तु निगदव्याख्यातः। ३। १३२।

शवोद्वर्त्तनन्यायः। ४। १३३।

अन्धदर्पणन्यायः। ५। १३४।

श्वपुच्छोन्नामनन्यायः। ६। १३५।

अरण्यरोदनन्यायः। ७। १३६।

Digitized by Google

मूर्खसेवनन्यायश्चापीदृशः । सर्वे ऽप्येते वैयर्थ्यबोधकाः स्पष्टाश्च । ८ । १३७ ।

समुद्रवृष्टिन्यायमपि केचिदुदाहरन्ति । ९ । १३८ ।

ननु जीवत्वस्याज्ञानतन्त्रतया तद्बाधे बाधात्तद्विशिष्टस्य जीवस्य बाधः स्यात् । तथा चाद्वैततत्त्वारोहणं जीवस्य तालसर्पन्यायात्स्वनाशाय स्यात् अवरोहणसमयऊर्ध्वमुखैस्तालग्रन्थिभिः सर्पोदरविदारणात्तालारोहणं सर्पस्य स्वनाशायेति प्रसिद्धम् । एवं च प्रेक्षावतां तत्त्वावबोधहेतुश्रवणादिप्रवृत्तिर्न स्यादिति चेन्न रोगिन्यायेन प्रवृत्त्युपपत्तेः । यथा रोगनाशाद्विशेषणाभावे विशिष्टाभाव इति न्यायेन रोगविशिष्टस्य नाशे ऽपि शुद्धस्य तत्स्वरूपस्यानाशाद्रोगिणस्तन्नाशके भेषजादौ प्रवृत्तिस्तथेत्यर्थः । १० । १३९ ।

प्रासङ्गिको ऽत्र तालसर्पन्यायो व्याख्यातः । १ । १४० ।

विशेषणाभाव इति तु स्पष्टः । २ । १४१ ।

नन्वज्ञानकार्यान्तःकरणवृत्त्यात्मकं ज्ञानं कथं स्वकारणीभूताज्ञाननाशाय स्यादुपजीव्यविरोधादिति चेदश्वतरीगर्भन्यायादित्यवेहि । वडवायां गर्दभादुत्पन्ना ऽश्वतरी तस्या गर्भो यथा तन्नाशाय भवति तथा भवतु ज्ञानमपि स्वहेत्वज्ञाननाशायेत्यनवद्यम् । १०१ । १४२ ।

वृश्चिकीगर्भन्यायो ऽपीदृक् । १०२ । १४३ ।

कदलीफलन्यायो ऽपि च । १०३ । १४४ ।

कार्यकारणाभेदपक्षे ऽपि नानुपपत्तिः किमज्ञानस्य दुष्करमिति न्यायात् । १०४ । १४५ ।

अस्मिन्बोधे शमादिसाधनसंपन्नस्यैवाधिकारः । शान्तो दान्त इत्यादिशास्त्रोपदेशो हि व्याघ्रीक्षीरन्यायेन

Digitized by Google

तत्रैव सत्पात्रे प्रतिष्ठां लभते यथा तत्सुवर्णपात्रएव तिष्ठति फलाय च भवति तथेत्यर्थः । १०५ । १४६ ।

शमादिमानप्यमेधावी न श्रवणाद्यधिकारी तत्रापि कृत उपदेशो बधिरकर्णजपन्यायेन पूर्वोक्तान्धदर्पणादिन्यायैश्च व्यर्थतामेति । तदुक्तं वासिष्ठे । यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् । लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यतीति । १०६ । १४७ ।

शिष्यवैराग्यादिपरीक्षा चादावेव कर्त्तव्या न हि विवाहानन्तरं वरपरीक्षा क्रियतइति न्यायात् । १०७ । १४८ ।

पश्चात्कृतायास्तु परीक्षायाः कृते कार्ये किं मुहूर्त्तप्रश्नेनेति न्यायेन व्यर्थता । १०८ । १४९ ।

किं च यः शूर्पन्यायेन सतां गुणानेव गृह्णाति स एव शिष्यत्वेन स्वीकार्यः । शूर्पो हि बुसादि त्यक्त्वा शुद्धमन्नमवशेषयतीति प्रसिद्धम् । १०९ । १५० ।

भ्रमरन्यायो ऽप्येतादृशः । सो ऽपि कण्टकादीन्परित्यज्य पुष्पादीनां गन्धगुणमात्रमादत्ते । ११० । १५१ ।

यस्तु चालिनीन्यायेनासारमात्रग्राही स नादर्त्तव्यः । १११ । १५२ ।

अत्र मक्षिकान्यायः । ११२ । १५३ ।

जलौकान्यायश्च बोध्यः । मक्षिका सर्वं देहं परित्यज्य व्रणमेवावलम्बते । जलौका ऽपि स्त्रीस्तनाग्रे लग्ना क्षीरं त्यक्त्वा रुधिरं पिबतीति प्रसिद्धम् । ११३ । १५४ ।

चिरं परीक्ष्यश्च शिष्यः । यतः केषु चिदव्यवसायात्मकबुद्धिषु विशेषेण दृश्यमानान्यपि साधनानि रासभरटितन्यायेन क्रमेण क्षीयन्ते । यथा गर्दभशब्द आदावत्यु-

Digitized by Google

चैरुपलभ्यते पश्चान्मन्दतां प्राप्नुवन् क्रमेण चीयते तथे-त्यर्थः । ११४ । १५५ ।

अत्र पूर्वाह्णच्छायान्यायः । ११५ । १२६ ।

खलमैत्रीन्यायश्च बोध्यः । ते अप्यादौ वृद्धिं प्राप्य पश्चात्क्रमेण चीयेते । ११६ । १५७ ।

धीरेषु तु सज्जनेष्वादौ स्वल्पान्यपि साधनानि कुक्कुटध्वनिन्यायेन क्रमेण वर्द्धन्ते । ११७ । १५८ ।

इह पराह्णच्छायान्यायः । ११८ । १५६ ।

साधुमैत्रीन्यायश्च बोध्यः । ११६ । १६० ।

अवश्यं परीक्ष्यश्च शिष्यः यतो न हि पवित्रं स्याद्गो-चीरं श्वदृतौ घृतमिति न्यायेनासत्पात्रे सदुपदेशो ऽप्य-पवित्रतां याति । १२० । १६१ ।

अपि च विधेयं हि स्तूयते वस्त्विति न्यायेन विद्यो-पायानतिप्रशस्तबहुफलकथनेन संस्तुत्य तेषु श्रद्धातिशयमु-त्पाद्य शिष्यं प्रवर्त्तयेत् । दृश्यते हि लोके ऽप्येतां गां क्री-णातु भवानिति विधिशेषस्य बहुचीरेत्याद्यर्थवादस्य तत्क्र-यणप्रवृत्तिहेतुत्वम् । १२१ । १६२ ।

किंच कृतकृत्यस्य तत्त्वविदो ऽतत्त्वविदुद्धारातिरि-क्तकर्त्तव्याभावाद्यथा तदुद्धारः स्यात्तथैव कर्त्तव्यम् । सुरेन्द्रादिपूज्येनापि विदुषा पित्रा मृतस्तनन्धयन्यायेनाज्ञो ऽनुसर्त्तव्यः । तैर्निन्द्यमानो ऽपि देहस्य निन्द्यत्वमात्मनो ऽवाङ्मनसगम्यत्वं च जानन्नोद्विजेत् । किं तु प्रत्युत तच्चेष्टानुसारेण स्वयमप्याचरेत् । १२ । १६३ ।

इह राज्ञा ऽनुगतविवाहप्रवृत्तभृत्यन्यायो ऽपि प्रव-र्त्तते । विवाहप्रवृत्तो भृत्यो राज्ञा ऽप्यनुगम्यतइति प्रसि-द्धम् । १२३ । १६४ ।

Digitized by Google

कांस्यभोजिन्यायो ऽप्येतादृशः। तस्यायमर्थः। मया नित्यं गुरूच्छिष्टं भोक्तव्यं कांस्यपात्रे च भोक्तव्यमिति नियमवतो विनेयस्य नियमाभङ्गाय गुरुर्नित्यं कांस्यपात्रे भुङ्क्तइति। यद्यप्ययमशास्त्रीयस्तथा ऽप्येतद्व्यवहारस्य लौकिकत्वात्सुन्दोपसुन्दन्यायवल्लौकिकेषु परिगणिनः सुन्दोपसुन्दवधवृद्धकुमारीवरादिनिरूपकशास्त्राणामपि तदानींतनजनप्रसिद्धतदनुवाद इति बोध्यम्। १२४। १६५।

एवं वैशेष्यात्तु तद्वाद इति न्यायो ऽपि मल्लग्रामादिरूपलौकिकव्यवहारमूलकत्वाल्लौकिकेषु गणनीयः। १२५। १६६।

एवं शिष्येणापि यथाशास्त्रं परीक्ष्यैव परमशीलसंपन्नो ऽनृशंसः श्रोत्रियो ऽद्वैतनिष्ठो गुरुराश्रयणीयः। यदि चापरीक्ष्यैवातिश्रद्धालुतया विप्रलम्भकमेव कं चिदाचार्यत्वेनाश्रयेत मुमुक्षुः। स चाज्ञस्य मुमुक्षोरहंकारादिरूपमचेतनमनात्मानमात्मेत्युपदिशेत्। स च शिष्यः श्रद्धानत्वेनान्धगोलाङ्गूलन्यायेन तदात्मदृष्टिं न परित्यजेत्। तद्व्यतिरिक्तं चात्मानं न प्रतिपद्येत तथा सति पुरुषार्थाद्विहन्येतानर्थं च प्राप्नुयात्। न्यायार्थस्त्वेवम्। कश्चित्किल दुष्टात्मा महारण्यमार्गे पतितमन्धं स्वबन्धुं पुरे जिगमिषुमुवाच किमत्र त्वया दुःखितेन स्थीयतइति। स चान्धः कर्णामृतं वचनमाकर्ण्य तमाप्तं मत्वा बभाषे अहो मद्भागधेयं यदत्रभवान्मां दीनं स्वाभीष्टपुरे प्राप्तुमसमर्थं ब्रूषइति स च विप्रलिप्सुर्दुष्टं गोयुवानमानीय तदीयं लाङ्गूलमन्धं ग्राहयामास उपदिदेश च एष गोयुवा त्वां स्वपुरं नेष्यति मा त्यजैतस्य लाङ्गूलमिति। स चान्धस्तद्वचनश्रद्धया

तदत्यजन्स्वाभीष्टं पुरमप्राप्यानर्थपरम्परां प्राप्तवानिति ।
१२६ । १६७ ।

यो भूलिङ्गन्यायेन परोपदेशमात्रकुशलः स्वयं च यथेष्टाचरणशीलः सो ऽपि दाम्भिकत्वात्त्यक्तव्यः भूलिङ्गाख्यः पक्षी मा साहसं कुर्विति पुनः पुनरुच्चैर्वदन्सिंहदंष्ट्रान्तलग्नं मांसलवं जिघृक्षतीति प्रसिद्धम् । १२७ । १६८ ।

यदि च स प्रतारको न भवति किं तु मूर्खस्तदा ऽपि न स आश्रयणीयः । तदाश्रयणे ऽपि नाभीष्टसिद्धिः । अपि त्वनर्थप्राप्तिरेव भवति । अन्धस्येवान्धलग्नस्य विनिपातः पदे पदइति न्यायात् १२८ । १६९ ।

किमादावेव गुरुपरीक्षणेन चिरसहवासादिना वञ्चकत्वेन मूर्खत्वेन वा ज्ञातश्चेत्त्यक्तव्यः । नैवं प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति न्यायात्परीक्षया पूर्वमेव त्यागस्योचितत्वात् । १२९ । १७० ।

अत्र श्वः कर्त्तव्यमद्य कुर्विति न्यायो ऽप्यवतरति ।
१३० । १७१ ।

ननु किमाचार्यपारतन्त्र्यादिक्लेशेन स्वयमेव मेधाविना वेदान्तविचारेण तत्त्वज्ञानं संपादनीयमिति शङ्कानिरासाय स्वकरकुचन्यायप्रवृत्तिः यथा स्वकरेण स्वकुचयोर्मर्दनं कुर्वती युवती न सुखं लभते तथा जिज्ञासुरपि न स्वतन्त्रविचारेण ज्ञानमाप्नोति । तथा च श्रुतिः । आचार्यवान्पुरुषो वेद प्रोक्तान्येनैव सुज्ञानाप्रेष्ठेत्यादि । १३१ । १७२ ।

ननु स्वतन्त्रविचारेण तत्त्वज्ञानासंभवादुपदेष्टॄणां च प्रतारकत्वशङ्कास्पदत्वात्प्रत्युत तेभ्यो ऽनर्थप्राप्तिशङ्कासंभवेन तद्द्विया त्याज्य एव गुर्वधीनो ब्रह्मविचार इति चेन्न शास्त्रोक्तप्रकारेण सम्यक्परीक्षया साधुत्वासाधुत्वनिर्धा-

Digitized by Google

रणादसाधुत्यागसाध्वाश्रयणयोः संभवेन भिक्षुभिया स्थाल्यनधिश्रयणन्यायेनासाधुकृतप्रतारणभिया ब्रह्मविचारत्यागायोगात् । १३२ । १७३ ।

इह मृगभिया सस्यानाश्रयणन्यायः १३३ । १७४ ।

यूकाभिया कन्थात्यागन्यायश्च प्रवर्त्तते।१३४।१७५।

ननु गुर्वधीनविचारजन्यज्ञानेन पूर्वोक्तप्रकारेण कार्यकारणोपाधिबाधे ऽप्येकदेशविकृतमनन्यवदितिन्यायेन जीवत्वानपायान्नाभीष्टब्रह्मत्वसिद्धिरितिचेन्न । स्फटिकलौहित्यन्यायेन तन्निवृत्त्युपपत्त्या ब्रह्मभावसिद्धेः । न ह्युपाधिजीवयोः पुच्छश्वादिवदवयवावयविभावो ऽस्ति येन च्छिन्नपुच्छादिश्वादेः श्वभावाद्यनिवृत्तिवन्निवृत्तोपाधेरपि जीवस्य जीवत्वानिवृत्तिः स्यात् । किं तु स्फटिके जपाकुसुमादिसन्निधिकृतलौहित्यस्य यथा तन्निवृत्तौ निवृत्तिः । यथा वा घटाद्यवच्छेदककृतस्याकाशे परिच्छिन्नत्वस्य घटाद्यभावे ऽभावः । यथा वा जलाद्युपाधिकृतस्य स्वदेहे ऽधोमुखत्वादेस्तदपगमे ऽपगमस्तथा ऽऽत्मन्युपाधितन्त्रस्य जीवत्वस्य तद्बाधाद् बाधः १३५ । १७६ ।

अत्रैकदेशेति न्यायः प्रसङ्गाद्व्याख्यातः । ११ । १७७॥

आकाशपरिच्छिन्नत्वन्यायः । २ । १७८ ॥

देहाधोमुखत्वन्यायश्च प्रकृतन्यायविषये ऽर्थतः पठितौ । ३ । १७९ ।

कौन्तेयराधेयन्यायस्याप्यत्र संचारः । यथा कर्णः कौन्तेय एव सन्कौन्तेयत्वाज्ञानाद्राधेयमात्मानं मेने पश्चाद्दासोपदेशेन कौन्तेयमात्मानं मन्यते स्म तथा ब्रह्मैव स्वरूपाज्ञानाज्जीवमात्मानं मन्यते गुरूपदिष्टमहावाक्यजबोधादबोधबाधे ब्रह्मैवाहमिति मन्यतइति । १३६ । १८० ।

Digitized by Google

राजपुत्रव्याधन्यायसिंहमेषन्यायावपीह बोध्यौ । राजपुत्रः कश्चित्कया चित्स्वमातृसपत्न्या क चिन्निक्षिप्तो व्याधवशं प्राप्तस्तेन पुत्रत्वेन पालितश्च व्याधमेवात्मानं जानीते स्म । पश्चात्कथं चित्तद्राजपुत्रत्वं निश्चितवतां मन्त्रिणामुपदेशाद्राजानमात्मानं मत्त्वा पैत्र्यसिंहासने प्रतिष्ठां प्राप । सिंहशावको ऽपि कथं चिद् ग्रामीणवशं प्राप्तो मेषैः सह चरन्युवा ऽपि संस्तेषु विविधरूपकृतं लम्बकर्णत्वालम्बकर्णत्वसशृङ्गत्वाशृङ्गत्वादिकृतं च विशेषं पश्यन्नात्मानमपि मेषविशेषमेव मेने दूर्वादिकं च बुभुजे । पश्चाद्वन्यसिंहोपदेशेन मृगराजमात्मानमपश्यदिति गाथे लोकप्रसिद्धे । १३७ । १८१ । १३८ । १८२ । ॥

ननु पूर्वं जीवन्मुक्तिः प्रतिपादिता इदानीमपि बोधेनाबोधबाधे ब्रह्मैवाहमिति मन्यतइत्युक्त्या सूचिता न तु सोपगन्तुं युक्ता निष्प्रयोजनत्वात् । प्रयोजनमनुद्दिश्य न मन्दो ऽपि प्रवर्त्ततइति न्यायेन तदुपगमायोगात् । विदेहमुक्तेरेव सविलासाज्ञानबाधेन सर्वसत्तास्फूर्त्तिप्रदस्वमात्रातर्कितब्रह्मादिब्रह्मानन्दात्मना ऽवस्थानलक्षणायाः परमपुरुषार्थत्वात् । अतः पिण्डं हित्वा करं लेढीति न्यायाद् ब्रह्मानन्दलेशभूतविषयानन्दविद्यानन्दाद्यनुभवहेतुभूताया घटप्रदीपन्यायेन स्वोपाधितत्सम्बद्धार्थमात्रस्फूर्त्तिहेतुभूतायाश्चाङ्गीकृतिर्व्यर्थैव । ब्रह्मर्षिविद्यासंप्रदायस्थित्यर्थं तदुपगम इति चेन्न । स्वाज्ञानकल्पिताचार्येणापि स्वप्नमन्त्रलाभन्यायेन तल्लाभसम्भवादिति चेन्मैवं श्रुत्यादिमानसिद्धाया बहुभिरङ्गीकृतायाश्च प्रयोजनाभावापराधेन निरस्तुमशक्यत्वात् । वस्तूनि मानान्यपेक्षन्ते न प्रयोजनानीति न्यायात् बहूनामनुग्रहो न्याय्य इति न्यायाच्चेत्यलम् । अस्मिन्ग्रन्थसन्दर्भे न्यायषट्कं लिखितं तदमूद्यते

साक्षात्परम्परया च तत्रत्यघटप्रदीपन्यायसङ्गता अन्येऽपि न्याया लिख्यन्ते । प्रयोजनमनुद्दिश्येति न्या० १ । १८२ ।

पिण्डमिति न्या० । २ । १८३ ।

घटप्रदीपन्या० । यथा घटनिष्ठो दीपो घटस्योदरमात्रं भासयति तथा ऽत्रापीत्यर्थः । ३ । १८४ ।

चक्षुरादिद्वारा बहिर्निर्गत्यैव जीवोपाधिभूता धीर्घटादिविषयान्व्याप्नोति तद्योगाच्च चिदाभासो ऽपि निःसृत इव प्रतीयत इति विवक्षायां बहुच्छिद्रघटप्रदीपन्यायो ऽवतरति । अयं भगवत्पादैः संक्षेपेण भाष्यतात्पर्यप्रकाशके श्रीदक्षिणामूर्त्तिस्तोत्रे सोदाहरणमुक्तः । नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते । जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत्तस्मै श्रीगुरुमूर्त्तये नम इदं श्रीदक्षिणामूर्त्तय इति । ४ । १८५ ।

चक्षुरादिद्वारा बहिर्निःसृतस्यान्तःकरणस्य मूषासिक्तताम्रन्यायेन विषयाकारता भवति । तदुक्तं भगवत्पादैः मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा । रूपादीन्व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवमिति । ५ । १८६ ।

ननु ताम्रादेस्तेजः संयोगाद् द्रवस्य शीतलकठिनमूषाभिघातेन शैत्यापत्तौ मूषाकारतापत्तावप्यमूर्त्तस्यान्तःकरणस्य ताम्रादिविलक्षणतया विषयव्याप्तावपि कथं तदाकारतापत्तिरिति शङ्कानिरासाय व्यञ्जकव्यङ्ग्यन्यायो ऽवतरति । यथा व्यञ्जक आतपादिर्व्यङ्ग्यस्य घटादेराकारतामेति तथेत्यर्थः । ६ । १८७ ।

दाहकदाह्यन्यायो ऽपीदृशः । दृश्यते हि विगतज्वालस्य दाहकस्याग्नेर्दाह्यकाष्ठाद्याकारता । एते न्याया आ-

त्यन्यपि प्रवर्त्तन्ते । भवति हि तस्यापि तत्तदुपाधिसंसर्गात्तत्तदाकारतया भानं रूपं रूपं प्रतिरूपो बभूवेत्यादिश्रुतेः । ७ । १८८ ।

क्रमेण स्वेच्छया बुद्धेर्विविधरूपग्राहकत्वविवक्षायां शैलूषीन्यायः । शैलूषी नटी सा यथा क्रमेण विविधरूपाणि धत्ते तथेत्यर्थः । ८ । १८९ ।

एकं विषयमभीष्टतया गृह्णाति ततोऽभीष्टतरविषयान्तरलाभे पूर्वं त्यक्त्वा तं तथात्वेनादत्ते एवमग्रेऽपीति धियः स्वभावः एकस्मिन्विषये बुद्धेः क्रमेण सर्वेन्द्रियविषयसम्बन्धे च नटाङ्गनान्यायोऽवतार्यते । रङ्गभूमावागतां नटभार्यां यो यो नटः पृच्छति कस्य भार्याऽसि सुश्रोणीति सा तं तं प्रति तवैवेति वदतीति प्रसिद्धम् । ९ १९० ।

अन्यासाधारणधर्मस्यान्यत्रारोपविवक्षायां जलौष्ण्यन्यायः । १० । १८१ । वायुशैत्यौष्ण्यन्यायः । ११ । १९२ ।

भूशैत्यौष्ण्यन्यायश्चावतार्यते । जले स्वाभाविकं शैत्यम् । उष्णत्वं तु तेजः संयोगात्तद्धर्माध्यासोऽत्र भुवो वायोश्चानुष्णाशीतत्वं स्वभावः । जलाग्न्यादिसंपर्कादुष्णत्वादितद्धर्मारोपः । एवं प्रकृतेऽपि बोध्यम् । १२ । १९३ ।

लोहाग्निन्यायस्तु परस्परधर्माध्यासतादात्म्याध्यासयोर्विवक्षायां प्रवर्त्तते । लोहो दहति त्रिकोणोऽग्निरित्याद्यनुभवात् । १३ । १९४ ।

अहिभुक्कैवर्त्तन्यायस्तु तादात्म्याध्यासएव ज्ञेयः श्रूयते हि लोके कश्चिदहिभुग्ग्रावमारोह स च तत्र बहुजनसमुदायं दृष्ट्वा केन चिन्मे विनिमयो न स्यादिति धिया स्वपादे रज्जुं बद्ध्वा तन्द्रां प्राप । कैवर्त्तश्चापहासार्थं तत्पा-

दात्तां मोचयित्वा स्वपादे बबन्ध । नावि पारं गतायामवरोहणसमये ऽहिभुक् स्वपादे रज्जुमदृष्ट्वा कैवर्त्तपादे च तां दृष्ट्वा ऽहमवमयमहमिति स्वहृदि निश्चित्यारे कैवर्त्त त्वमहमहं च त्वमिति तेन विवादं कृतवानिति । अहिर्नामोन्मादकर औषधिविशेषः । पोस्तेति पाश्चात्त्यभाषया । एवमन्ये ऽपीदृशा बहवो न्यायाः सन्ति ग्रन्थविस्तरभयात्सामान्याच्च नेह लिख्यन्ते । प्रागपि यत्रैकविषये बहुन्यायप्रदर्शनं तत्रैवमेव बोध्यम् । १४ । १६५ ।

अस्मिंश्चाध्यासे ऽज्ञानं कारणं तत्त्वज्ञाने वातदीपन्यायेन तन्निवृत्तावस्नेहदीपन्यायेन तदध्यासो ऽपि निवर्त्तते । न च ज्ञानेनैवोभयनिवृत्तिः कुतो न स्यात् । ज्ञानमज्ञानस्यैव निवर्त्तकमिति न्यायविरोधत् । द्विविधा हि निवृत्तिः विरोधिना सामग्रीनिवृत्त्या च यथा वातादिना दीपनाशः यथा च तैलवर्त्त्यादिनिवृत्त्या दीपनिवृत्तिः । तत्राद्या निवृत्तिरज्ञानस्य द्वितीया कार्यवर्गस्येति बोध्यम् । अत्र न्यायत्रयं व्याख्यातम् । १५ १६७ । १७ । १६८ ।

जाग्रदादौ बुद्धौ सत्यां दुःखादयो दृश्यन्ते सुषुप्त्यादौ तन्निवृत्तौ नोपलभ्यन्तइति तद्धर्मा एव नात्मधर्माः सुषुप्तावप्युपलब्धिप्रसङ्गादित्यत्र तदागमे हि दृश्यतइति न्यायो ऽवतरति । दृश्यते हि तैलादनुद्भूतस्पर्शतेजोऽवयवागमे संतापोपलब्धिरिति तद्धर्म एव न तैलादिधर्म इति । १८ । १६६ ।

अज्ञाननिवृत्तौ चाप्रतिबद्धसाक्षात्कारो हेतुः अज्ञानोपलब्धौ च वध्यघातकन्यायेन तदभावो ऽवबुध्यते । यथा हि भुजङ्गादिभूषितां वनभूमिं दृष्ट्वा भुजङ्गभुगादेरभावो ऽवगम्यते । २६ । २०० ।

खादकघातकन्यायस्तु तत्र प्रवर्त्तते यत्र कथं चित्परम्परया हेतोरप्युपचारेण साक्षाद्धेतुत्वमुच्यते । यदि च्छागादिखादका नरा नस्युस्तर्हि घातका इति खादका एव घातका इति न्यायार्थः । कुमारीन्यायोदाहरणमस्यापि बोध्यम् । २० । २०२ ।

एतदज्ञानानेकत्ववादिनां कल्पनागौरवशङ्का वालाग्रशतभागो ऽपि न कल्प्यो निष्प्रमाणकः । प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपीति न्यायेन वार्यते । २१ । २०२ ।

सदसतोरुत्पत्तिनिवृत्त्यसंभवेन परस्परविरोधे हि न प्रकारान्तरस्थितिरिति न्यायप्रसिद्धस्य सत्त्वस्यासत्त्वस्य वा ऽनुपपत्तेर्गलेपादुकान्यायेनाज्ञानकार्यस्य बाधानुपपत्त्या चाज्ञानस्यानिर्वचनीयत्वं बलात्स्वीकार्यते । यथा कस्य चिद्गृहस्थस्य गृहे ऽन्नाद्यर्थित्वच्छलेनागतो निषण्णश्च कश्चिद्विटस्तेन तत्त्वतो ज्ञात्वा गच्छ गच्छेति पुनः पुनरुच्यमानो ऽपि यदा धैर्त्येन स्वेच्छया गमनं न स्वीकरोति तदा पादुकासहितं पदं गले निधाय नोदयित्वा च बलान्निःसार्यते तथा प्रकृते ऽपि बोध्यम् । अत्र न्यायद्वयमुदाहृतम् । २३ । २०४ ।

यस्याज्ञानं भ्रमस्तस्य भ्रान्तः सम्यक् च वेद स इति न्यायेन च यस्यानात्मनि देहादावात्मभ्रमो ऽस्ति तस्याज्ञानमस्तीति कल्प्यते । २४ । २२५ ।

विचारपाटवेन यावद्यावद्विवेकदार्ढ्यं भवति तावत्तावद्भ्रमशैथिल्यं जायते तरतमभावापन्नसाधनायत्तं फलं तरतमभावापन्नमिति न्यायात् । २५ । २०६ ।

विचारविषयत्वं च न नाज्ञातस्य नापि निश्चितस्य

किं तु संदिग्धस्य संदिग्धं सप्रयोजनं च विचारमर्हतीति न्यायात् । २६ । २०७ ।

ये तु ब्रह्मावबोधहेतुविचारं विहायान्यत्र रतिं कुर्वन्ति ते चिन्तामणिं परित्यज्य काचमणिग्रहणन्यायं नातिवर्त्तन्ते । २७ । २०८ ।

एतस्माद्विचारादुद्वेगेन न निवर्त्तते चेदवश्यमनर्थनिवृत्तिहेतुं ब्रह्मावबोधं प्राप्नोत्येवेति विवक्षायां टिट्टिभन्यायप्रवृत्तिः । अत्र संप्रदायविद आख्यायिकामाचक्षते कस्य चिट्टिट्टिभाख्यस्य पक्षिणोऽण्डानि तीरस्थान्युदधिरुत्सेकेनापजहार । स च पक्षी एनं शोषयामीति प्रवृत्तो भार्यादिभिर्बहुधा वार्यमाणोऽपि नोपरराम । प्रत्युत तानपि सहकारिणो दध्रे । तांश्च पतनोत्पतनाभ्यां बहुधा क्लिश्नतः सर्वानवलोक्य कृपालुर्नारदस्तत्समीपे गरुडं प्रेषयामास ततस्तत्पक्षवातेन शुष्यन्समुद्रो भीतोऽण्डान्यानीय पक्षिणे ददाविति । तथा च यथा दृढाध्यवसायस्य पक्षिणो गरुडसाहाय्यादण्डलाभस्तथा दृढबुद्धेर्जिज्ञासोरतिदुर्लभस्यापि तत्त्वज्ञानस्येशानुग्रहात्सुखेन लाभो भवति । २८ । २०९ ।

यः सारासारविवेकधिया समूलं द्वैतमसारं मत्वा त्यक्त्वा च सारं वस्तु गृह्णाति तस्य न ततोऽर्थान्तरेऽभीप्सुत्वमतिर्भवतीति विवक्षायां पतिंवरान्यायावतारः । यथा स्वयंवरा कन्याऽन्यांस्त्यक्त्वा सर्वोत्तमत्वेनाभिमतं यमभीप्सितमत्वेनादत्ते न ततोऽन्यत्राभीप्सुत्वमतिं कुरुते तथा प्रकृतेऽपीत्यलम् । २९ । २१० ।

स्वप्ने मन्त्रलाभन्या० । उपासकस्य स्वप्ने दृष्टात्स्वेष्टदेवान् मन्त्रलाभस्तज्जपादिष्टसिद्धिश्च भवतीति तान्त्रिकेषु प्रसिद्धम् । तथा पुण्यपुञ्जसहकृतस्वाविद्याकल्पितेन गुरुणा ब्रह्मविद्यालाभो भविष्यतीत्यर्थः । ३० । २११ ।

Digitized by Google

वस्तूनीति न्या० । १३८ । २१३ ।

बहूनामनुग्रहो न्याय्य इति न्या० । अत्र न्यायषट्के इदं न्यायद्वयं प्राधान्येन विवक्षितम् । अनुग्रहः साहाय्यं न्याय्यः न्यायादनपेतो ऽर्थात्तदुपेतः कार्यसाधक इति यावत् । यथा ऽऽहुः । बहूनामप्यसाराणां मेलनं कार्यसाधकम् । तृणैः संपाद्यते रज्जुस्तया नागो ऽपि बध्यत इति १३९ । २१४ ।

के चित्त्वेतन्न्यायान्तरत्वेनोदाहरन्ति । असाराणामपि बहूनामित्यन्वयः । १४० । २१५ ।

पूर्वोक्तस्य तत्त्वज्ञानस्य जीवन्मुक्तिसुखातिशयाविर्भावकत्वे वैराग्यदि सहकारि भवति । ज्ञानं च विषयमिथ्यात्वबोधनेन वैराग्यादिपोषकं भवतीति तयोरन्योन्यसाहाय्यं वनव्याघ्रन्यायाद्भ्रदनकन्यायाच्च बोध्यम् । यथा वनव्याघ्रयोर्ह्रदनक्रयोश्च परस्परवियुक्तयोः शबरधीवराभ्यां प्रधर्षणीयता भवति युक्तयोस्तु परस्परसाहाय्यमाचरतोर्दुर्धर्षता भवति तथा प्रकृते ऽपि बोध्यम् । किं च यतो वेत्याद्यागमस्य क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वादित्याद्यनुमानस्य चेतरेतरसाहाय्यमप्यनयोर्न्याययोरुदाहरणम् । तथा हि । सत्यप्यागमश्रवणे जगतः कर्त्ता कश्चिदस्ति न वेति संदिहानं प्रति यत्र यत्र घटादिषु कार्यत्वमस्ति तत्र सर्वत्र सकर्तृकत्वं दृष्टमिति कार्यत्वं भूयोगृहीतसहचारत्वेन कर्तुरस्तित्वकोटिमुत्कटामापादयति । तावन्मात्रेण संभावितमतिर्बोध्यः श्रुत्या सुखेन बोधयितुं शक्यः । एवं न केवलानुमानेनापि परात्मा यथावदवगन्तुं शक्यः । अनेन हि जगदुपयोगिकृत्यादिमानेकस्तद्गतं कृत्यादिकं नित्यं सर्वविषयं च यदि सिध्ये-

१४

क्षत्वमात्रेण वा पूर्ववत् तुल्यो भवतीति । वादिनः पञ्चमं पक्षमाह । प्रतिषेधदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानदोषप्रसङ्गो मतानुज्ञा । प्रतिषेधे द्वितीयपक्षे तृतीयपक्षस्थेन मयोक्तं दोषमनुद्धृत्य प्रतिषेधविप्रतिषेधे तृतीयपक्षे समानदोषप्रसङ्गो मतानुज्ञा नाम निग्रहस्थानं भवतीति । अथ प्रतिवादी द्वितीयपक्षस्थेन मया प्रथमपक्षे समुद्भावितदोषमनुद्धृत्य तृतीयपक्षस्थेन त्वया द्वितीयपक्षे क्रियमाणः समानदोषप्रसङ्गो मतानुज्ञा भवेदिति षष्ठं पक्षमाह । स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात् समानो दोष इति । अत्र स्वशब्देन वादी निर्दिश्यते । तस्य पक्षः स्थापना तं लक्षीकृत्य प्रवृत्तो द्वितीयः पक्षः स्वपक्षलक्षणः । तस्यापेक्षाभ्युपगमः । ततः परपक्षे ऽप्युपपत्त्युपसंहारे प्रतिषेधे ऽपि समानो दोष इति परापादितदोषोपसंहारे एवंत्वादिति हेतुनिर्देशे च क्रियमाणे समानो मतानुज्ञा दोष इति । किमर्थमिदं षट्पक्षीप्रदर्शनं त्रिपक्षादावप्युभयोरसदुत्तरप्रयोगे कथाभासो दर्शयितुं शक्यत एवेति चेत् । सत्यं तथापि षट्पक्षीं नातिवर्तते । ततः परं सभ्यैरेव वादिनौ निवार्य कुकथात्वप्रदर्शनमिति प्रदर्शयितुं तदिति मन्येथाः कुतः पुनः सभ्यास्तृतीया-

कार्यसमा । षष्ठपक्षे सूत्रतात्पर्यं पूर्वमेवाह । अथ प्रतिवादीति । पूर्वोक्त एवार्थे सूत्रं योजयति । अत्र स्वशब्देनेति ।

दिषु कुकथात्वमनुद्भावयन्तश्चतुर्थादिपक्षमनुमन्यन्ते। श्रूयतामवहितैः। सभ्यास्तावत्कथायां स्वयं कर्तृत्वेनानन्वयादुत्थाप्य विवक्षाः तदुत्थापनं च प्रश्नेन चोभयोरप्रतिभया वा कथाभासप्रबन्धेन वा भवति। पर्यनुयोज्योपेक्षणं च सभ्यैरुद्भाव्यम्। तत्र सत्साधनोपक्रमायां कथायां प्रथमद्वितीययोरसम्भावितमेव। तृतीये वादिनः सम्भावितमप्यनुद्भाव्य प्रतिवाद्यनुयोगमपेक्षमाणास्तूष्णीमासते। तत्र चतुर्थः पक्षः प्रवर्तते। तत्र सम्भावितस्यापि वाद्यनुयोगापेक्षयाऽनुद्भावने पञ्चमः पक्षः वादिनोः स्तम्भरूपमनुविधेयप्रश्नावसरमपेक्षमाणेषु षष्ठः। प्रश्नसमयातिक्रमे पुनरननुयुक्तावपि वादिनौ निवार्य कुकथात्वमावेदयन्ति। अन्यथावसरप्राप्तपर्यनुयोज्योपेक्षणानुद्भावने तेषामज्ञत्वप्रसङ्गात्। प्रतिवाद्यादिप्रश्ने त्रिपक्षादिषु पर्य-

---

त्रिपक्षादौ चतुःपञ्चपक्षाणामन्यतमे। नदितिषट्पक्षीप्रदर्शनमिति। येन केनचिदापादिता वक्तुमिच्छा येषां तदेतदुत्थाप्य विवक्षा निमित्तवशाद्दोषवादिन इत्यर्थः। तदुत्थापनं च विवक्षाजननं च वादिनः प्रतिवादिनोऽनुविधेयस्य वानुयोगेन पर्यनुयोज्योपेक्षणग्रहणान्निग्रहान्तराणि वादिभ्यामेव मुखत उद्भावनीयानीति दर्शयति। समयातिक्रमे प्रश्नत्रयस्यावसरे गच्छति सति कथाभासप्रबन्धे चानुवर्तमान इत्यर्थः। अन्यथा षट्पक्षानन्तरं वादिनौ निवार्य। प्रतिवादीति प्रतिवादिप्रश्ने त्रिपक्षः

वस्यति । वादे तु तृतीयकक्षायां वादिनोरनुयोज्या-नुयोगमुद्भाव्य सदुत्तरेण कथा प्रवर्तनीया । तदनुद्भा-वने चतुर्थ्यां स्वदोषोद्भावनम् । पञ्चम्यामपि तथा । अप्रतिभाप्रतीत्यर्थं षष्ठस्यावकाशः । परस्परं स्वयं चानुद्भावनेन निरङ्कुशकथाप्रवृत्तौ सभ्यानामवसर इति सङ्क्षेपः ॥ ३३ ॥ ३४ ॥ ८८ ॥

इति श्रीवरदराजविरचिते तार्किकरक्षाव्या-ख्याने सारसंग्रहे द्वितीयः परिच्छेदः ॥

वादिप्रश्ने वा पञ्चपक्षिकया पर्यवस्यति तत ऊर्ध्वं न सानुवर्तेत इत्यर्थः । निरनुयोज्यानुयोगं प्रतिवादिन इति शेषः । स्वदोषोद्भावनं प्रतिवादिना कर्तव्यमिति शेषः । पञ्चम्यामपि तथा । वादिना स्वदोषोद्भावनं कर्तव्यमित्य-र्थः । परस्परं स्वयं चेत्यभिधानेन वीतरागत्वाद् वादे न जयपराजयप्रश्नावकाश इति गम्यते ॥ ३३ ॥ ३४ ॥ ८८ ॥

इति तार्किकरक्षायां ज्ञानपूर्णमुखोद्गता ।
चतुर्विंशतिजातीनां सम्पूर्णा लघुदीपिका ॥

Digitized by Google

सटीकतार्किकरक्षायाम्

तृतीयः परिच्छेदः।

अथ निग्रहस्थानम्। तत्र सूत्रम्। अप्रतिपत्तिर्विप्रतिपत्तिश्च निग्रहस्थानमिति। अत्र परोक्तस्वोक्तयोरज्ञानमप्रतिपत्तिः। तयोरेव विरुद्धा प्रतिपत्तिर्विप्रतिपत्तिः। अन्यथाप्रतीतिरिति यावत्। तयोश्च प्रत्येकं समुच्चये चाव्यापकत्वात् क्वचिदप्रतिपत्तिः क्वचिद्विप्रतिपत्तिरिति व्यवस्थाश्रयणे ऽप्यनुगताकाराभावेनालक्षणत्वादुभयानुगततत्त्वाप्रतिपत्तिस्ताभ्यां लक्ष्यते। सा च परबुद्धेरप्रत्यक्षत्वात् स्वरूपतो न निग्रहस्थानं भवतीति स्वज्ञापकं न लक्षयति। ततश्च तत्त्वाप्रतिपत्तिलिङ्गं निग्रहस्थानमित्युक्तं भवति।

कृता जातिपरिच्छेदव्याख्या लघुतरा मया।
क्रियते निग्रहस्थानपरिच्छेदस्य साधुना॥

तयोश्चेति। अप्रतिपत्तिर्निग्रहस्थानलक्षणं चेद् विप्रतिपत्तिर्न स्यादेषा चेदितरा न स्यात् उभयं चेदेकैका न स्यात् विषयभेदेनोभयं चेदनुवृत्तलक्षणं नास्ति अत उभयगततत्त्वाप्रतिपत्तिस्ताभ्यां लक्ष्यते। सा चात्मगता पराप्रत्यक्षेति तया तज्ज्ञापकं लक्ष्यते ततो लक्षितलक्षणन्याये-

अत्र निग्रहस्थानप्रवृत्तिनिमित्तानुसारेण लक्षणमाह ।

अखण्डिताहङ्कृतिना पराहङ्कारखण्डनम् ।
निग्रहस्तन्निमित्तस्य निग्रहस्थानतोच्यते ॥ १ ॥

अत्र कथायामित्युपस्कर्तव्यम् । अन्यथातिप्रसङ्गात् । यथोक्तमाचार्यैः । कथायामखण्डिताहङ्कारेण परस्याहङ्कारखण्डनमिह पराजयो निग्रह इति । तानि च द्वाविंशतिः परिसंख्यानात् । तदुक्तम् । प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानीति । चशब्दस्त्वर्थः । तेन कथामध्ये भूतावेशापन्नानि झटितितिरोधानेन गलितोद्भावनावसरा-

---

न तत्त्वाप्रतिपत्तिलिङ्गं निग्रहस्थानमिति सामान्यलक्षणं सूत्रतात्पर्यार्थ इत्याहत्यार्थः । अत्र निग्रहस्थानेति । एवं सूत्रस्य दुर्घटत्वात् तदर्थं हृदि कृत्य प्रकारान्तरेण मूलग्रन्थकारः सामान्यलक्षणमाहेत्यर्थः ।

उपस्कर्तव्यमुत्तरपद्यगतमाकर्षणीयम् । अतिप्रसङ्गात् कथाव्यतिरेकेण परस्परं विवदमानानामनिषृष्टवचसां निग्रहस्थानप्रसङ्गादित्यर्थः । तानि तत्त्वाप्रतिपत्तिलिङ्गानि । परिसंख्यानात् सूत्रकारेण तावतामेव निग्रहस्थानत्वेनोक्तत्वात् । भूतावेशाभिभूतप्रलापापस्माराद्यावेशेनो-

णि पुरःस्फूर्तिकान्यनधिकृतोद्भावनानि च व्यवच्छि-न्दन्ति । प्रतियोग्यपेक्षया तात्कालिकातस्त्वज्ञानलिङ्ग-स्य निग्रहस्थानत्वात् तेषां चानेवंविधत्वादिति ॥ १ ॥

कथायां यत्र पक्षादि येन निर्दिष्टमादितः ।
तस्य तेन पुनस्त्यागः प्रतिज्ञाहानिरुच्यते ॥ २ ॥

वादिना प्रतिवादिना वा येन कथायां यत्प-क्षहेतुदृष्टान्तदूषणानामन्यतमं प्रथमं निर्दिष्टं तस्य दूषणसमुन्मेषेण तथा निर्वाहमपश्यता तेन पुनस्त्या-गः प्रतिज्ञाहानिर्नाम निग्रहस्थानं भवति । त्यागश्च यदि दुष्टमेतत् तन्माभूदिति कण्ठतोर्थतश्च द्विधा भवति । पक्षे तावत् साध्यसाधनधर्मिणां तद्विशेषणानां च त्यागाः षड् भवन्ति । तत्राद्यो यथा । अनित्यः शब्दः ऐन्द्रियकत्वादित्युक्ते सामान्यमैन्द्रियकं नित्यं दृष्टमि-

---

क्तानि । झटितीति । केनचित् समोदं निग्रहं स्पष्टमुक्त्वा स्ववचनं स्वयमेव बुद्ध्या परिहृतत्वादुच्यमानो का उक्ता तस्योद्भावनकालतया स्पष्टा (?)। पुरः स्फूर्तिकेति । प्रति-वादिवचनात् पूर्वमेवातितिक्षमति केनचित् पार्श्वस्थेनो-द्भावितानि । तेषां चेति । आद्ये त्वज्ञानलिङ्गत्वाभावात् द्वितीये तदवसानानर्हतया अज्ञानलिङ्गत्वाभावात् तृतीये ऽन्योक्तत्वेन प्रतिवादिनो विजयाभावाच्चेत्यर्थः ॥ १ ॥

आद्यः साध्यत्यागात् द्वितीयः साधनत्यागात् तृतीयः धर्मित्यागात् मनसः परिग्रहे ऽपि पूर्वोक्तस्य वि-शिष्टस्य त्यागाद्धर्मिहानिरिति द्रष्टव्यम् । चतुर्थः साध्य-

त्यनैकान्तिकत्वेन प्रत्युक्ते तर्हि शब्दोऽपि नित्यः स्यादिति । द्वितीयस्तु तस्मिन्नेव हेतौ तथैव प्रत्युक्ते तर्हि कृतकत्वादस्त्विति । तृतीयस्तु अनित्ये वाङ्मनसे मूर्तत्वादित्युक्ते भागासिद्धया च प्रत्युक्ते तर्हि मन एवास्त्विति । चतुर्थस्तु क्षित्यादिकं बुद्धिमत्कर्तृपूर्वकमित्युक्ते उपादानादिगोचरज्ञानचिकीर्षाप्रयत्नवत एव कर्तृत्वाद्बुद्धिमदिति विशेषणवैयर्थ्ये ऽभिहिते तर्हि सकर्तृकमेवास्त्विति । पञ्चमस्तु अनित्यः शब्दः प्रयत्नकार्यत्वादित्युक्ते विशेषणवैयर्थ्योक्तौ तत्परित्यागः । षष्ठस्तु ऐन्द्रियकः शब्दो नित्यः कार्यत्वादित्युक्ते तथैव प्रत्युक्ते शब्द एवास्त्विति ॥

दृष्टान्ते ऽपि हानेः पूर्ववत् षट् प्रकाराः । आद्यो यथा । अनित्यः शब्दः ऐन्द्रियकत्वात् घटवदित्युक्ते सामान्येनानैकान्तिकत्वोद्भावने घटोऽपि तर्हि नित्योऽस्त्विति । द्वितीयस्तु तस्यामेव प्रतिज्ञायां प्रत्यक्षगुणत्वाद् द्व्यणुकरूपवदित्युक्ते साधनवैकल्योद्भावने कार्यत्वहेत्वाधारतया स एव दृष्टान्त

विशेषणत्यागः वैयर्थ्ये पुनरुक्तत्वेन दुष्टत्वे । पञ्चमः हेतुविशेषणत्यागः । विशेषणेति । प्रयत्नविशेषणस्य व्यावृत्त्यभावेन कृतकत्वोक्तौ । षष्ठः धर्मिविशेषणत्यागः । तथैव प्रत्युक्ते ऽपि सिद्धसाधनपरिहारार्थं हि धर्मिविशेषणमत्र त्वैन्द्रियकत्वं विशेषणम् ।

तदभावार्थमित्युक्ते सति दृष्टान्ते चाद्यद्वितीयादि-

इति। तृतीयस्तु तस्मिन्नेव दृष्टान्ते तथैव प्रत्युक्ते घटरूपं तर्हि भविष्यतीति। यथा च साधर्म्यदृष्टान्तत्वेन प्रत्युक्ते माभूदयं वैधर्म्यदृष्टान्तोऽस्त्विति। चतुर्थस्तु यत्कार्यं तद्बुद्धिमत्कर्तृपूर्वकं यथा घट इत्युदाहृते पूर्ववद्विशेषणवैयर्थ्योक्तौ तत्परित्यागः। पञ्चमस्तु यत्प्रयत्नकार्यं तदनित्यं यथा घट इत्युक्ते प्रयत्नविशेषणस्य वैयर्थ्योक्तौ त्यागः। षष्ठस्तु यथा स्थूलपदानर्थक्योद्भावने तस्य त्यागः॥

दूषणहानिस्तु स्वरूपतो विशेषणतश्च द्विधा तत्राद्यो यथा। अनित्यः शब्दः कृतकत्वादित्युक्ते अनैकान्तिकत्वोद्भावने निरनुयोज्यानुयोगत्वेन दूषिते स्वरूपासिद्धिस्तर्हीति। द्वितीयस्तु स्वरूपासिद्धिपरिहारे व्याप्यत्वासिद्धिस्तर्हीति॥

ननु यद्दर्शनेनायमुक्तं त्यजति स एव दोषो

शब्दानामित्यर्थः पूर्ववत्। यथा च साधर्म्येति। द्व्यणुकरूपान्वयदृष्टान्तत्वाभावे यदनित्यं न भवति तत्प्रत्यक्षमपि न भवति यथा द्व्यणुकरूपमिति। अयमेव व्यतिरेकदृष्टान्तः। यद्वा एवमपि दृष्टान्ते दूषिते तर्हि व्यतिरेकेणापि परमाणुरूपवदित्यर्थः।

निरनुयोज्यानुयोगत्वेन अविद्यमानदोषोद्भावनत्वेन। स्वरूपासिद्धिपरिहारे ऽनभिव्यञ्जकप्रयत्नानन्तरभावित्वेन हेतुना शब्दस्य कृतकत्वहेत्वसिद्धपरिहारे ऽभिहिते सतीत्यर्थः॥

थानुकूलकृतिमानित्यादिबोधस्वीकाराच्च । अन्यथा नृत्याध्यापनादिप्रयोगेण नृत्यस्यापि नित्यत्वापत्तिरिति भावः ॥ २८ ॥

पूर्वपक्षान्तरम् ।

अभ्यासात्(१) ॥ २९ ॥

एककर्मकैकजातीयक्रियायाः पुनःपुनः करणमभ्यासः । तथा च यथा दशकृत्वो रूपं पश्यति तथा शतकृत्वोऽनुवाकमधीत इत्यभ्यासाच्छब्दस्य स्थैर्यं सिध्यतीति ॥ २९ ॥

सिद्धान्तमाह ।

नान्यत्वे ऽप्यभ्यासस्योपचारात्(२) ॥ ३० ॥

अभ्यासो न शब्दस्य स्थैर्यसाधकोऽन्यत्वे ऽपि अभ्यासकर्मणो भेदे ऽपि अभ्यासस्य उपचारात् सम्भवात् । एकजातीयस्यैकजातीयक्रियायाः पुनः करणमेवाभ्यासो द्वियागं करोतीतिप्रयोगादिति भावः ॥ ३० ॥

तटस्थः शङ्कते ।

अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताभावः(३) ॥ ३१ ॥

अन्यस्माद् यदन्यदुच्यते तदनन्यत् स्वाभिन्नं कुतः अनन्यत्वात् स्वभिन्नभिन्नत्वात् । स्वभिन्नभेदस्य स्वाभेदरूपत्वादिति भावः । इति रीत्या सर्वत्रैव स्वाभेदस्य वर्तमानतयाऽन्यत्वाभावः सर्वत्रैवान्यत्वाभावः । अन्यत्वस्य

(१) एतत्सूत्रव्याख्यानावसरे इति सूत्रार्थं इति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(२) सिद्धान्तसूत्रम् । नान्यत्वे ऽप्यभ्यासोपपत्तेरिति न्यायतत्त्वालोके वाचस्पतिमिश्राः । तत्र चायमेव सूत्रपाठः ।

(३) एतत्सूत्रव्याख्यानान्ते इति सूत्रार्थं इति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

Digitized by Google

भेदरूपस्याभेदेन विरोधात्। एवं चान्यत्वस्याप्रसिद्ध्या नान्यत्वे ऽप्यभ्यासस्योपचारादिति सूत्रमसङ्गतमिति भावः। यद्वा यद् वस्त्वन्यस्मादन्यदुच्यते तत् स्वस्मादनन्यदभिन्नं तत् कथमन्यद् भेदाभेदयोर्विरोधादिति भावः। स्वाभेदस्यावश्यकत्वादिति हृदयम् ॥ ३१ ॥

समाधत्ते।

तदभावे नास्त्यनन्यता तयोरितरेतरापेक्षसिद्धेः[(१)] ॥ ३२ ॥

तदभावे ऽन्यत्वस्याभावे। अनन्यता नास्ति अनन्यतापि न स्यात्। तयोर्मध्ये इतरस्यैकतरस्यानन्यत्वस्य इतरापेक्षसिद्धेः इतरत्वस्य ज्ञानापेक्षा सिद्धिर्यस्य तादृशत्वादित्यर्थः ॥ ३२ ॥

शङ्कते।

विनाशकारणानुपलब्धेः[(२)] ॥ ३३ ॥

विनाशकारणानुपलब्ध्या विनाशकारणाभावेन विनाशाभावसिद्धेरविनाशित्वेन हेतुना शब्दे नित्यत्वं साधनीयमिति भावः ॥ ३३ ॥

अनुपलब्धिरप्रत्यक्षमज्ञानं वा तत्राद्ये प्रतिबन्धिमाह।

अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः[(३)] ॥ ३४ ॥

---

(१) परिहारसूत्रम्। तदभाव इत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः। एतत्सूत्रव्याख्यानावसरे सूत्रस्यार्थोऽविरोध इति वार्त्तिकम्। तस्य परिहारसूत्रम्। तद-द्धेः इति तात्पर्यटीका।

(२) पूर्वपक्षसूत्रम्। विनाशकारणानुपलब्धेरिति न्यायतत्त्वालोके वाचस्पतिमिश्राः। न्यायसूचीनिबन्धे चकारयुक्तः पाठः।

(३) अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्ग इति। शेषं भाष्य इति वार्त्तिकम्। सिद्धान्तसूत्रम्। अश्रवणेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः।

Digitized by Google

यदि विनाशकारणाप्रत्यक्षेण विनाशकारणाभावस्तदा शब्दस्याप्यन्यदा अश्रवणेन शब्दस्याभावप्रसङ्ग इत्यायातं शब्दानित्यत्वं साधनीयमिति भावः ॥ ३४ ॥

द्वितीये त्वाह ।

उपलभ्यमाने चानुपलब्धेरसत्त्वादनपदेशः[१] ॥ ३५ ॥

अनुमानादिनोपलभ्यमाने विनाशकारणानुपलब्धेरसत्त्वादभावात् अनपदेशो विनाशकारणाभावेन शब्दस्य विनाशाभावापदेशो नेत्यर्थः । जन्यभावत्वेन शब्दस्य विनाशित्वं कल्पयित्वा उत्पत्तिमत्त्वेन तद्विनाशस्य सकारणकत्वकल्पनादिति भावः ॥ ३५ ॥

विनाशकारणोपलब्धिं दर्शयति ।

पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः[२] ॥ ३६ ॥

शब्दायमानमुरजादौ पाणिरूपशब्दाभावनिमित्तस्य प्रश्लेषात् संयोगाच्छब्दाभावे उपलभ्यमाने शब्दाभावकारणस्य नानुपलब्धिरिति यथाश्रुतार्थ इति केचिदाहुः । अन्ये तु पाणिरूपनिमित्तस्य प्रश्लेषः कार्यत्वरूपसम्बन्धो यत्र स शब्दोऽर्थादुत्तरशब्दः । तेन शब्दाभावे शब्दध्वंसे सति न विनाशकारणानुपलब्धिरित्यर्थ इत्याहुः ॥ ३६ ॥

(१) एतत्सूत्रव्याख्यानान्ते इति सूत्रार्थ इति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(२) पाणिनिमित्तप्रश्लेषाच्छब्दाभावे नानुपलब्धिः । उत्तार्थं सूत्रमिति वार्त्तिकम् । नन्वनुपलम्भात् संस्कारो नास्त्येवेत्यत्र सूत्रम् पाणिनिमित्तेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(१)ननु पाणिमुरजादिसंयोगान्मुरजादौ प्रथमशब्दो जन्यते उत्तरशब्दस्त्वाकाश इति वैयधिकरण्यात् कथमुत्तरशब्दस्य नाशकत्वमित्यत आह ।

अस्पर्शत्वादप्रतिषेधः(२) ॥ ३७ ॥

अस्पर्शत्वादस्पर्शधर्मत्वात् । शब्दस्येति शेषः । तथा च प्रथमशब्दोऽपि गगन एवेति न वैयधिकरण्यम् । अस्पर्शत्वे प्रमाणं च शब्दो न स्पर्शवद्विशेषगुणोऽग्निसंयोगासमवायिकारणकत्वाभाववदकारणगुणपूर्वककार्यत्वादित्यादि ॥ ३७ ॥

एतदेव सम्पादयति ।

विभक्त्यन्तरोपपत्तेश्च समासे(३) ॥ ३८ ॥

समासे सम्यक्स्थितौ । आश्रयस्येति शेषः । पाकं विनेति यावत् । विभक्त्यन्तरस्य विभक्तान्तरस्य तारमन्दादिनानाविधस्येति यावत् । उपपत्तेः स्पर्शवद्भिन्नविशेषगुणत्वे सत्येवोपपत्तेः । स्पर्शवद्विशेषगुणानां गन्धादीनां परावृत्तिस्तु पाकं विना नेति भावः ॥ ३८ ॥

(१) अत्र विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्ग इत्येकं सूत्रमधिकं न्यायसूचीनिबन्धन्यायसूत्रोद्धारयोर्दृश्यते । न्यायसूत्रोद्धारटिप्पण्यां च सिद्धान्तिनः सूत्रान्तरमिति वृत्तिरिति प्रमाणमप्युपन्यस्तम् । विश्वनाथकृतवृत्तिदर्शनाज्ज्ञायते पाणिनिमित्तेत्यादिसूत्रावतरणिकायामेव सिद्धान्तिनः सूत्रान्तरमित्युक्तं विश्वनाथेन एतत्सूत्रस्य धारणं व्याख्यानमपि तत्र नास्तीति अस्थाने प्रमाणोपन्यासस्तत्र भवतामिति । यथोक्तवाक्यं सूत्रतया न्यायतत्त्वालोके वाचस्पतिमिश्रैरपि न धृतम् । सिंहावलोकितन्यायेन पूर्वोक्तं हेतुं दूषयति । विनाशेति । इति तात्पर्यटीकायां भाष्यप्रतीकधारणरीतिरप्यत्र द्रष्टव्या ।

(२) अस्पर्शद्रव्याश्रयः शब्द इति सूत्रार्थ इति वार्तिकम् । अस्योत्तरसूत्रम् । अस्प-धः इति तात्पर्यटीका ।

(३) विभ-से इति धृत्वा व्याख्याय सूत्रव्याख्ययैव भाष्यवार्तिके व्याख्याते इति तात्पर्यटीकायामुक्तम् ।

समाप्तं शब्दानित्यत्वप्रकरणम् ॥

प्रसङ्गाच्छब्दपरिणामवादं दूषयितुं संशयं प्रदर्शयति ।

विकारादेशोपदेशात् संशयः (१) ॥ ३९ ॥

विकारोपदेशादादेशोपदेशाच्च संशयो वर्णा विकारिणो न वेति संशयः । तत्रेकारादेर्विकारो यकारादिरिति सांख्या व्याचक्षते । अपरे तु इकारादीनां न विकारो यकारादिः किं तु इकारप्रयोगस्थले यकारादिः प्रयोक्तव्य इत्यादेशवादिनः । तत्र विकारो नाम तन्नाशजन्यत्वे सति तदवयवारब्धः । यथा दुग्धादेर्दध्यादिर्बीजादेर्वृक्षादिः । सुवर्णादेरपि लौहाद्यभिघातजावयवसंयोगनाशेनावयवविनाशादेव कुण्डलाद्युत्पत्तिरिति कुण्डलादिकं तद्विकारः । न च कपालादिविकारत्वं घटादेर्न स्यात् कपालाद्यविनाशेनैव तदुत्पत्तेरिति वाच्यम् । इष्टत्वात् । खण्डघटादेर्महाघटाद्यविकारत्वे तज्जनकावयवसंयोगजातीयाजन्यत्वं विशेषणं देयम् । जातीयत्वनिवेशाद् विभिन्नसंयोगजन्ये पूर्वघटावयवजन्ये उत्तरघटे न पूर्वघटविकारत्वप्रसङ्गः । न च वर्णस्य विकारित्वे सावयवद्रव्यत्वापत्तिरिति वाच्यम् । इष्टत्वात् । अथवा तत्समवायिसमवेतत्वे सति तन्नाशाधीनत्वमेवात्र तद्विकारत्वम् । इकारयकारयोश्चैकस्मिन्नेव गगने समवेतत्वान्नाप्रसिद्धिरिति ॥ ३९ ॥

तत्र विकारित्वं खण्डयति ।

प्रकृतिविवृद्धौ विकारविवृद्धेश्च(२) ॥ ४० ॥

---

(१) संशयकारणज्ञापनार्थं सूत्रमिति वार्तिकम् । विप्रतिपत्तिप्रदर्शनाय सूत्रं विकारेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(२) प्रकृतिविवृद्धौ विकारविवृद्धेरिति सूत्रमिति वार्तिकम् । अत्र चकाररहितः सूत्रपाठो न्यायतत्त्वालोके ।

Digitized by Google

महदल्पदुग्धादितो दध्यादेर्महदल्पत्ववत् ह्रस्वेकारजन्ययकारादितो दीर्घेकारजन्ययकारादेर्वृद्धिः स्याद्यदि यकारादेरिकारादिविकारत्वं स्यादिति न वर्णा विकारिण इति भावः ॥ ४० ॥

अथ प्रकृतिवैलक्षण्यं न विकारवैलक्षण्यनियामकमित्याशङ्कते ।

न्यूनसमाधिकोपपत्तेर्विकाराणामहेतुः[(१)] ॥ ४१ ॥

निरुक्तवृद्धिप्रसङ्गोऽहेतुर्न विकारित्वप्रतिषेधकः । विकाराणां प्रकृत्यपेक्षया क्वचिन्न्यूनत्वस्य क्वचित् समत्वस्य क्वचिदाधिक्यस्य चोपपत्तेर्दर्शनात् । यथा तूलपरिमाणापेक्षया तद्विकारस्तन्तुरल्पपरिमाणकः वटबीजादुत्कृष्टेन नारिकेलबीजेन न्यग्रोधादल्पो नारिकेलतरुर्जन्यते कनकादिसमपरिमाणं कटकादि न्यूनाधिकपरिमाणनारिकेलादिबीजाभ्यां समौ वृक्षौ न्यूनपरिमाणाच्च वटबीजान्महान् तरुरिति ॥ ४१ ॥

[(२)] अत्राह ।

नातुल्यप्रकृतीनां विकारविकल्पात्[(३)] ॥ ४२ ॥

नोक्तदूषणोद्धारः । अतुल्यप्रकृतीनां विलक्षणप्रकृ-

(१) न्यूनसमाधिकोपलब्धेरित्यन्यत्र पाठः । अस्याक्षेपसूत्रम् । न्यून-तुः । इति तात्पर्यटीका । आक्षेपसूत्रम् । न्यूनेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(२) अत्र द्विविधस्यापि हेतोरभावादसाधर्म्यं दृष्टान्त इति सूत्रमधिकं न्यायसूचीनिबन्धे दृश्यते । अस्य प्रत्याख्यानसूत्रम् । द्विविधस्यापि हेतोरिति । इति तात्पर्यटीकायां च । परं तु न्यायतत्त्वालोके विश्वनाथकृतवृत्तौ न्यायसूत्रोद्धारे चेदं न धृतम् ।

(३) समाधिसूत्रम् । नातुल्यप्रकृतीनामित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

तिकानां विकाराणां विकल्पात् प्रकृतिवैलक्षण्येन वैलक्षण्यात् । न हि वटनारिकेलबीजाभ्यामेकजातीयो वृक्षो जन्यते । एवं चेकारस्य ह्रस्वदीर्घवैलक्षण्येन तद्विकारयकारस्यापि ह्रस्वदीर्घवैलक्षण्यापत्तिर्दुष्परिहरा भवदुक्तन्यूनसमाधिकोपपत्तिर्न तत्र बाधिका तथा च त्वदुक्तमुपचारच्छलमिति भावः ॥ ४२ ॥

पुनराशङ्कते ।

द्रव्यविकारवैषम्यवद् वर्णविकाराद्विकल्पः(१) ॥ ४३ ॥

वटादिबीजविजातीयबीजात् प्रकृतिभूताद् वटविजातीयो वृक्षो जन्यते । एवमिवर्णविजातीयादेवोवर्णादेर्यकारादिविजातीयो वकारादिर्जन्यते न त्विवर्णत्वेनैकजातीययोर्ह्रस्वदीर्घयोरपीकारयोर्यकारवैलक्षण्यमिति भावः ॥ ४३ ॥

शङ्कां निरस्यति ।

न विकारधर्मानुपपत्तेः(२) ॥ ४४ ॥

न यकारादेरिकारविकारत्वं विकारधर्माभावात् । विकारधर्मः प्रकृत्यवयवारब्धत्वं तद् वर्णस्यासम्भवि निरवयवत्वात् । यद्वा नात्र द्रव्यविकारतुल्यता विकारधर्मो हि प्रकृतिवैजात्येन वैजात्यं तदत्र नास्ति ह्रस्वत्वदीर्घत्वादिप्रकृतिवैजात्ये ऽपि यकारादेरैकजात्यादिति ॥ ४४ ॥

---

(१) वर्णविकारविकल्प इत्यन्यत्र पाठः। द्रव्यविकारे वैषम्यवदपि क्वचित् पाठः। आक्षेपसूत्रम् । द्रव्यविकार इतीति तात्पर्यटीका ।

(२) नव प्रत्याख्यानसूत्रम् । न विकारधर्मेति तात्पर्यटीका । समाधिसूत्रम् । न विकारधर्मत्वादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

समाधानान्तरमाह ।

विकारप्राप्तानामपुनरापत्तेः[१] ॥ ४५ ॥

अपुनरापत्तेः पुनःप्रकृतिरूपत्वादर्शनात् । न खलु दध्यादिकं कदाचिदपि क्षीरतामासादयति । विदुषः पुत्र इत्यत्र वकाराडुकारः पुनरपि समासे षष्ठीलोपेन उकारस्य वकारप्राप्त्या विद्वत्पुत्र इत्यादिप्रयोग इति वकारादेर्नोकारादिप्रकृतित्वसम्भव इति भावः ॥ ४५ ॥

सुवर्णादीनां पुनरापत्तेरहेतुः[२] ॥ ४६ ॥

पुनःप्रकृतिभावो न विकारत्वाभावसाधकः सुवर्णादीनां सुवर्णादिविकाराणां कटकादीनां पुनरापत्तेः कटकादिभावं विहाय पूर्ववत् सुवर्णत्वदर्शनात् । यद्वा सुवर्णादीनां कटकादिभावनिरासेन कुण्डलादिभावप्राप्त्या पुनरपि कटकादिभावदर्शनादित्यर्थः ॥ ४६ ॥

समाधानमाह ।

न तद्विकाराणां सुवर्णभावाव्यतिरेकात्[३] ॥ ४७ ॥

वर्णानां विकारत्वाभावसाधकपुनरापत्तिरूपहेतौ न व्यभिचारः तद्विकाराणां सुवर्णविकाराणां कटकादीनां सुवर्णभावाव्यतिरेकात् सुवर्णत्वादित्यर्थः । तथा च वि-

---

(१) एतद्व्याख्यानान्ते इति सूत्रार्थं इति लिखितं न्यायतत्त्वालोके वाचस्पतिमिश्रैः ।

(२) विकारप्राप्तानां पुनरापत्तिदर्शनादनैकान्त इति सूत्रार्थ इति वार्त्तिकम् । अस्याक्षेपः सुवर्णादीनामिति सूत्रमिति तात्पर्यटीका । आक्षेपसूत्रं सुवर्णादीनामित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(३) समाधिसूत्रम् । तद्विकाराणामित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः । तत्र च नकाररहितः सूत्रपाठः ।

कारो द्विविधः प्रकृतिजातीयस्तद्विजातीयश्चेति । तत्राद्यः सुवर्णकटकादिः । द्वितीयः काष्ठभस्मादिः । तत्र प्रकृतिविजातीयविकारत्वं वर्णे वक्तव्यं तन्न भवति पुनरापत्तेरित्यत्र न व्यभिचार इति भावः । यद्वा सुवर्णविकारस्थले हि सुवर्णत्वादिना प्रकृतिता न तु कटकत्वादिना तत्रोभयमपि सुवर्णभावं न जहाति यदि हि सुवर्णतामपहाय कटकतापन्नं पुनः सुवर्णता तदा व्यभिचारः सम्भाव्येत प्रकृते च वकारतां विहाय उकारताप्राप्तस्य पुनर्वकारतेति यथोक्तदूषणं दुष्परिहरमिति भावः ॥ ४७ ॥

निरुक्तहेतोरप्रयोजकत्वशङ्कया युक्त्यन्तरमाह ।

नित्यत्वे ऽविकारादनित्यत्वे चानवस्थानात्(१) **॥ ४८ ॥**

वर्णानां नित्यत्वे विकारासम्भवादनित्यत्वे च क्षणद्वयमात्रस्थायितया इकारादेः प्रत्यक्षानन्तरमेव तद्विनाशाद्विकारानुपपत्तिरित्यर्थः ॥ ४८ ॥

नित्यमते पूर्वपक्षयति ।

नित्यानामतीन्द्रियत्वाद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः(२) **॥ ४९ ॥**

न निषेधो नित्यानामतीन्द्रियत्वाद् धर्मविकल्पाच्चेत्यर्थः । धर्मस्यातीन्द्रियत्वस्य विकल्पो विरुद्ध ऐन्द्रियकत्वं तस्मात् । चकारादन्ये ऽपि विरुद्धधर्मा लक्ष्यन्ते । तथा च यथा नित्यानामाकाशादीनामतीन्द्रियत्वे ऽपि गोत्वादीनां

---

(१) एतत्सूत्रव्याख्यानान्ते इति सूत्रार्थ इति लिखितं न्यायतत्त्वालोके वाचस्पतिमिश्रैः ।

(२) पूर्वपक्षसूत्रम् । नित्यानामित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

नित्यानामैन्द्रियकत्वं तथान्येषां नित्यानामविकारित्वेऽपि वर्णानां विकारिता स्यादिति जातिवचनम् ॥ ४९ ॥

अनित्यत्वपक्षे जात्या पूर्वपक्षयति ।

अनवस्थायित्वे च वर्णोपलब्धिवत्तदुपपत्तिः(१) ॥ ५० ॥

वर्णानामनवस्थायित्वेऽपि यथा प्रत्यक्षं भवति तथा विकारोऽपि स्यादित्यर्थः ॥ ५० ॥

पक्षद्वये समाधानमाह ।

विकारधर्मित्वे नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः(२) ॥ ५१ ॥

नित्यत्वासम्भवात् नित्यत्वेन विकारित्वस्य विरोधात् । तथाहि नित्यत्वं ध्वंसाप्रतियोगित्वघटितं विकारित्वं च वस्त्वन्तरानुगुणध्वंसप्रतियोगित्वघटितमिति स्फुटो विरोधः । न च मृदोऽविनाशेन मृद्विकारो घटादिर्यथा तथा इकारादेरविनाशेनैव यकारादिविकार इति वाच्यम् । यकारादिप्रयोगे इकाराद्यनुपलब्धेः । अनित्यत्वपक्षेऽपि वर्णविकारो न सम्भवतीत्याह । कालान्तर इति । इकारादिविनाशानन्तरं यकारादिप्रयोगात् । अप्रतिषेधो वर्णस्याविकारित्वप्रतिषेधो नेत्यर्थः । तथा च वर्णस्य द्वितीयक्षणे प्रत्यक्षं सम्भवति विषयस्य वर्णस्य सत्त्वात् । प्रकृते तु दधिशब्दप्रयोगानन्तरमत्रेतिप्रयोग एव दृश्य-

(१) एतत्सूत्रव्याख्यानान्ते इति सूत्रार्थ इति लिखितं न्यायतत्त्वालोके वाचस्पतिमिश्रैः । तत्र वर्णोपलब्धिवद्विकारोपपत्तिरिति पाठः । तद्विकारोपपत्तिरित्यन्यत्र पाठः ।

(२) भाष्यकारोऽत्रैवार्थे सूत्रं पठति । विकारधर्मित्व इति । इति तात्पर्यटीका ।

ऽ्रेतिभावात् तदानीमिकारस्यासत्त्वादुत्तरवर्णस्य पूर्ववर्णविनाशकत्वात् न हि प्रकृतेस्तदवयवस्य वा असत्त्वे विकारः सम्भवतीति भावः ॥ ५१ ॥

युक्त्यन्तरमाह ।

प्रकृत्यनियमात्(१) ॥ ५२ ॥

कदाचिद्यकारस्थले इकारो यथा विध्यतीति । कदाचिदेकारस्थाने यकारो यथा दध्यत्रेति । एवं सति प्रकृतिविकृतिभावो न सम्भवति न हि कदाचित् क्षीरं दधिविकृतिरिति भावः । सूत्रार्थस्तु प्रकृत्यनियमात् प्रकृत्यनियमप्रसङ्गादिति ॥ ५२ ॥

छलेन शङ्कते ।

अनियमे नियमान्नानियमः(२) ॥ ५३ ॥

प्रकृत्यनियमस्य नियमान्न प्रकृत्यनियम इत्यर्थः ॥ ५३ ॥

दूषयति ।

नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः(३) ॥ ५४ ॥

अनियमे नियमाद्योऽनियमप्रतिषेध उक्तः स न सम्भवति कुतः नियमानियमयोर्विरोधात् । अनियमो निय-

(१) एतत्सूत्रव्याख्यानान्ते इति सूत्रार्थ इति लिखितं न्यायतत्त्वालोके वाचस्पतिमिश्रैः । क्वचित्तु प्रकृत्यनियमाद्वर्णविकाराणामिति सूत्रपाठो दृश्यते । न्यायसूचीनिबन्धन्यायतत्त्वालोकवार्त्तिकेषु तु प्रकृत्यनियमादित्येतावन्मात्रं सूत्रमिति दृश्यते ।

(२) अनियमे नियमाच्चानियमः । सूत्रार्थोऽनियमो नास्तीतीति वार्त्तिकम् । एतद्व्याख्यानान्ते इति सूत्रार्थ इति लिखितं न्यायतत्त्वालोके वाचस्पतिमिश्रैः ।

(३) अनुज्ञातप्रतिषिद्धयोरेकत्वानुपपत्तेरिति विरोधः सूत्रार्थ इति वार्त्तिकम् । उपोद्घातसूत्रम् । नियमानियमेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः । व्याख्यानान्ते च इति सूत्रार्थ इति तत्रैव ।

माभावस्तस्मिन् सति नियमासम्भवादिति भावः। चका-रादनियमस्य नियमे ऽपि प्रकृत्यनियमस्तद्वस्य एवेति सूचितम् ॥ ५४ ॥

ननु वर्णस्याविकारित्वे कथं वर्णविकारव्यवहार इत्यतस्तमुपपादयति ।

गुणान्तरापत्त्युपमर्दह्रासवृद्धिलेशश्लेषेभ्य-स्तु वर्णविकारोपपत्तेर्वर्णविकारः(१) ॥ ५५ ॥

तुरवधारणे। वर्णविकारोपपत्तेरेव वर्णे विकारसादृश्यादेव वर्णविकारव्यवहार इत्यर्थः। तथा च भाक्त एव व्यवहार इति। सादृश्यं विवृणोति। गुणान्तरेत्यादि। गुणान्तरापत्तिर्धर्मिणि सत्येव धर्मान्तरापत्तिः। यथोदात्ते ऽनुदात्तत्वम्। उपमर्दो धर्म्यन्तरप्रयोगो यथा अस्तेर्भूः। ह्रासो दीर्घस्य ह्रस्वत्वम्। वृद्धिर्ह्रस्वस्य दीर्घत्वम्। लेशः स्वल्पता यथा अस्तेरकारलोपः। श्लेष आगम इति ॥ ५५ ॥

समाप्तं शब्दपरिणामप्रकरणम् ॥

शाब्दबोधे पदपदार्थयोः सम्बन्धो नियामको ऽन्यथा-ऽतिप्रसङ्गस्तत्र यादृशशब्दस्य यादृशार्थे तादृशसम्बन्धस्य तादृशार्थबोधप्रयोजकत्वं तादृशशब्दं तादृशार्थांश्च क्रमे-णाह।

ते विभक्त्यन्ताः पदम्(२) ॥ ५६ ॥

ते शब्दाः। विभक्तिश्च सुप्तिङ्भेदेन द्विविधा। बहुवचनान्ता गणस्य संसूचका इतिन्यायेन बहुवचन

(१) श्लेषेभ्यस्तु विकारोपपत्तेरिति पाठोऽन्यत्र। सूत्रार्थो गुणान्तरापत्त्यादेरादेश इति वार्त्तिकम्।

(२) तत्र पदार्थः प्रथममेतस्य निरूपयितुं न शक्य इत्यादौ तत्त्वबोधाय सूत्रम्। ते विभक्त्यन्ताः पदमिति न्यायतत्त्वालोके वाचस्पतिमिश्राः।

निर्देशात् लुप्तविभक्तिकानामपि ग्रहणम् । वस्तुतस्तु विभक्त्यन्तानां लुप्तविभक्तिकानां च शब्दानां तत्तदानुपूर्वीविशेषेणैव पदशब्दशक्यत्वमितिसूचनाय बहुवचनम् । पदशब्दस्य नानार्थत्वमिष्टमेव । विभक्त्यन्तत्वस्य पदशब्दशक्यतावच्छेदकत्वे घटसुइत्यादेरपि तदापत्तेः । एवं च शक्तिसम्बन्धेन पदशब्दवत्त्वमेव तल्लक्षणम् । यद्यपि शाब्दबोधौपयिकशक्तिग्रहे विभक्त्यन्तत्वादिभानमनपेक्षितं तथापि विभक्त्यन्तपदज्ञानानामाकाङ्क्षाज्ञानरूपतया स्वातन्त्र्येण शाब्दहेतुतालाभाय वचनमिदम् । अन्यथा निर्विभक्तिकादपि पदाच्छाब्दबोधापत्तेः । वस्तुतः कीदृशशब्दः शाब्दबोधोपयोगीति प्रश्ने सूत्रमिदम् । तस्य च विभक्त्यन्ताः शब्दाः पदं प्रत्यायकमिति तदर्थः । प्रत्येकरूपेण शाब्दबोधोपयोगितालाभाय बहुवचनं वेदाः प्रमाणमितिवदेकवचनान्तता नपुंसकलिङ्गता चेति । पदशब्दशक्यतावच्छेदकं तु शक्तिमत्त्वमेव लाघवात् । पद्यते ज्ञायते ऽनेनेतिव्युत्पत्तेः शक्तिमतामेव पदव्यवहारः । केचित्तु विभक्तिः शक्तिरन्तः सम्बन्धस्तेन शक्तिमन्त इत्यर्थः । अत्र बहुत्वमविवक्षितं सूत्रे लिङ्गसंख्याकालाश्चातन्त्राणीतिन्यायादित्याहुः ॥ ५६ ॥

यस्य पदस्य योऽर्थः स तेन प्रतीयते । पदस्येति षष्ठ्यर्थो वृत्तिरूपसम्बन्धः वृत्तिश्च शक्तिलक्षणान्यतररूपा । तत्र शक्यसम्बन्धो लक्षणा शक्तिश्च अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छाविषयता सा च व्यवहाराद्यनुमेया क्वचिदुपमानगम्या च । धातुविशेषादेरर्थविशेषे शक्तिस्तु व्याकरणाद्यनुशासनतो निर्णीयते । पश्वादिपदानामपि लोमवल्लाङ्गूलवत्स्वरूपपशुत्वे पश्वादिपदस्य मुख्यप्रयोग

विरहेण तद्विशिष्ट एव शक्तिर्निरूपिता। गवादिपदशक्तिस्तु गवादौ सन्दिग्धेति तन्निर्णयाय संशयं दर्शयति।

तदर्थे व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः[१] ॥ ५७ ॥

व्यक्तिर्गवादिः। आकृतिरवयवसंस्थानविशेषः। जातिर्गोत्वादिः। तासां सन्निधौ एकदा उपचारात् पदज्ञानानन्तरोपस्थितौ। तदर्थे तदर्थत्वस्य तच्छक्तेरिति यावत्। संशयो जातौ वा व्यक्तौ वा आकृतौ वा तत्समुदाये वेति संशय इत्यर्थः। तदर्थ इति भाष्यकारेण पूरितम्। केचित्तु सूत्रमिदं भाष्यकारस्येत्याहुः ॥ ५७ ॥

तत्र व्यक्तिशक्तिवादिमतमाह।

याशब्दसमूहत्यागपरिग्रहसंख्यावृद्ध्यपचयवर्णसमासानुबन्धानां व्यक्तावुपचाराद् व्यक्तिः[२] ॥ ५८ ॥

पदार्थ इति शेषः। या गमनम्। समासः सम्यक्स्थितिः सम्बन्धो वा। अनुबन्धः प्रयोजनम्। एतेषामुपचाराद् गोपदार्थान्वयित्वेन प्रयोगाद् व्यक्तिरेव गवादिपदशक्येत्यर्थः। जात्याकृत्योस्त्वन्वये बाधादिति भावः। उदाहरणं यथा। गौर्गच्छति गौः शब्दायते गवां समूहः गां ददाति गां प्रतिगृह्णाति दश गावः गौः स्थूला गौः कृशा गौः कपिला गौः शेते गोर्मुखं गौः प्रसूते इत्यादि ॥ ५८ ॥

---

(१) इदं भाष्यमिति केचित्। वस्तुतस्तु दुर्बोधादिस्वरसात् सूत्रमेव तदर्थे इत्यंशस्तु भाष्यकृतः पूरणमिति प्रतिभातीति विश्वनाथपञ्चाननाः। इतस्सूत्रव्याख्यानान्ते इति सूत्रार्थ इति लिखितं न्यायतत्त्वालोके वाचस्पतिमिश्रैः। तत्र न्यायसूचीनिबन्धे च तदर्थे इति सूत्रपाठो नास्ति।

(२) शब्दस्य प्रयोगसामर्थ्यात् पदार्थावधारणमिति प्रयोगप्रदर्शनार्थं याशब्दादिसूत्रमिति वार्त्तिकम्। पूर्वपक्षसूत्रं याशब्देत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः।

प्रतिक्षिपति ।

न तदनवस्थानात्[१] ॥ ५६ ॥

व्यक्तिर्न पदार्थः तन्मात्रस्यानवस्थानादनुपस्थितेः । जात्यादिपुरस्कारेणैव गवादेः शाब्दबोधे भानात् । व्यक्तिमात्रस्य शक्यत्वे गवादिपदाद् गोव्यक्तिमात्रस्य बोधः स्याच्छाब्दबोधविषयत्वस्य वृत्तिप्रयोज्यत्वनियमादिति भावः ॥ ५६ ॥

गमनाद्युपचारस्तु लक्षणयापि सम्भवतीति न शक्तिसाधक इत्यभिप्रायेण तदृष्टान्तमाह ।

सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाकटान्नपुरुषेष्वतद्भावेऽपि तदुपचारः[२] ॥ ६० ॥

सहचरणादिसम्बन्धेभ्यो ब्राह्मणादौ अतद्भावे ऽपि तत्पदाशक्यत्वे ऽपि तदुपचारः तत्पदव्यवहारः । यष्ट्यादिपदाशक्यत्वे ऽपि यष्ट्यादिप्रयोग इति यावत् । एवं गोपदाशक्यत्वे ऽपि गवादौ गौर्गच्छतीत्यादिव्यवहारसम्भव इति भावः । क्रमेणोदाहरणं यथा यष्टिं भोजयेत्यत्र सहचरणात् संयोगविशेषाद् यष्टिपदस्य यष्टिधरे ब्राह्मणे लक्षणा । मञ्चाः क्रोशन्तीत्यत्र स्थानात् स्थितेर्मञ्चपदस्य

(१) न तदनवस्थानादिति सूत्रम् । नानेन गोशब्देन व्यक्तिमात्रं मुख्यमुच्यते । यद्ययं व्यक्तिमात्राभिधायकोऽभविष्यत् तेन यस्यां कस्याञ्चिद् व्यक्तौ प्रत्ययोऽभविष्यदिति सूत्रार्थ इति वार्त्तिकम् ।

(२) क्व पुनर्निमित्तादतद्भावे ऽपि तदुपचारो दृष्ट इति तस्योपपादनार्थं सहचरणादिसूत्रमिति वार्त्तिकम् । क्वचिच्च व्यक्तिमात्रे प्रयोग उपचारात् तन्निमित्तोपदर्शनाय सूत्रं सहचरणेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

मञ्चस्थे लक्षणा। सूत्रे मञ्चपदमपि मञ्चस्थपरम्। कटमानयतीत्यत्र तदर्थकत्वाद् वीरणे कटपदस्य लक्षणा। सूत्रस्थं कटपदमपि वीरणपरम्। नियमाद् बिभेतीत्यत्र वृत्तादनुशासनादितो नियमपदस्य राज्ञि लक्षणा। आढकं शक्तव इत्यत्र मानादाढकपदस्याढकपरिमिते लक्षणा। तुलाचन्दनमित्यत्र धारणात् तुलापदस्य तुलाधृते लक्षणा। गङ्गायां घोष इत्यत्र सामीप्याद् गङ्गापदस्य तीरे लक्षणा। सूत्रस्थगङ्गापदमपि तीरपरम्। कृष्णः शकट इत्यत्र योगात् कृष्णपदस्य कृष्णद्रव्यवति लक्षणा। अन्नं प्राणा इत्यत्र साधनात् प्राणपदस्य प्राणसाधने लक्षणा। राजायं गच्छतीत्यत्र आधिपत्याद्राजपदस्य राजपुरुषे लक्षणेत्यादि ॥ ६० ॥

आकृतिरेव शक्येतिमतमुपन्यस्यति।

आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः[१] ॥ ६१ ॥

आकृतिः शक्या कुतः सत्त्वस्य प्राणिनो गवादेर्व्यवस्थानसिद्धेर्व्यवस्थितत्वसिद्धेस्तदपेक्षत्वादाकृत्यपेक्षत्वात्। गौरयमित्यादिव्यवहारस्याकृत्यपेक्षत्वादाकृतिरेव शक्येत्यर्थः। अथवा आकृतिसहितव्यक्तिः पदार्थः तदपेक्षत्वादित्यादेः पूर्वोक्त एवार्थः ॥ ६१ ॥

आकृतिशक्तिपक्षं निरसन् जातिशक्तिपक्षमाह।

व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः[२] ॥ ६२ ॥

व्यक्त्याकृतियुक्ते मृद्गवके मृत्तिकारचितगवाकृति-

(१) एतद्व्याख्यानान्ते इति सूत्रार्थ इति न्यायतत्त्वालोके वाचस्पतिमिश्राः।

(२) एतद्व्याख्यानान्ते इति सूत्रार्थ इति न्यायतत्त्वालोके वाचस्पतिमिश्राः।

Digitized by Google

257. As the pot is transformed into clay, in the same way indeed does the modification of the Self (*jīva*) become the unmodified Self. And this is the result of understanding the truth (*tattvāvabōdha*).

258. If the effect and cause are different, where then is the relation of cause and effect? And, if they are not different, then, since they are identical, where again is the relation of cause and effect?

259. Liberation consists in the modification (individual soul) of the Self which is pure knowledge, becoming one with its cause (the Self); and, since this is brought about by itself, the argument that liberation has to be accomplished (by rites), fails.

260 and 261. Therefore, whether the individual soul be a part or a modification (of *Brahman*), on either supposition, the performance of rites is fruitless; nay, instead of tending to liberation, it may even be productive of misery; nay, more, rites, when engaged in, will certainly create impediments to liberation too. Hence the performance of rites serves no purpose with regard to liberation.

262. If it be said that the modification (*jīva*) is entirely different from the modified (*paramātman*), then liberation would mean the complete annihilation of the modification (*jīva*).

263. Herein also ritual is useless, since there is no fruit derivable therefrom. And like ritual, knowledge too is purposeless in this case for want of fruit (*phalābhāvāt*).

264. If bondage is natural, it cannot then be the

Digitized by Google

mere result of nescience;[1] and if the *jīva* be considered to be a part (*ēkadēṣa*) of *brahman*, then too, as before, the fallacy of the very thing being destroyed (*svarūpa-nāṣadōsha*) would follow.

265 and 266. If, on the other hand, bondage be not natural, but is the result of nescience, then, whether the *jīva* be a modification or a part of *brahman*, the view[2] already advanced will have to be maintained. That view is also acceptable to us, and does not conflict with any demonstrated conclusion. Hence, injunction is not necessary for liberation.

267. If so, the suppositions that *jīva* is a modification, a part, etc., are all in vain, for, nescience will include all these cases.

268 and 269. Wholeness is liberation; hence, it is through nescience that it falsely appears as not-whole. Therefore, when nescience is destroyed by a knowledge of the true Self, what remains is the whole.[3] Therefore, too, any kind of injunction is useless with regard to liberation.

270. So much is logically established. Your suggestion 'because Scripture aims at ritual etc.,' is further refuted as follows.[4]

---

[1] For, what is natural or *svābhāvika*, and not the result of *avidyā*, cannot be destroyed by *vidyā*. This holds good whether *jīva* be a *vikāra* or *amṣa* of *brahman*.

[2] viz. that the two *kāṇḍas* are different, the persons authorised in each case are different, etc.

[3] Cf. पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

[4] See verse 199, 'will further be met etc.' For the opponent's argument see verse 36, 'आम्नायस्य क्रियार्थत्वात् etc.'

271. Since the word 'Scripture' there[1] means only a part of Scripture, it follows that injunctory passages alone aim at ritual, since otherwise the rest would be meaningless.[2]

272. While there are passages in the chapters on ritual which are clearly injunctory, by holding that the word 'Scripture' means otherwise, passages which do not intend any rites are rendered meaningless.

273. Hence, for the reasons aforesaid, it is not right to say that the *Upanishads* are injunctory, since their object is entirely different (*pārthagarthyāt*).[3]

274. With reference to your argument, 'because they occur in the same context as injunction etc.,' that will apply only to such passages, since otherwise they themselves would be meaningless.[4]

275. This reasoning cannot apply to Vedantic passages, for, the fruit in their case is directly perceived.[5] It has already been pointed out in great detail that the fruit derivable from a knowledge thereof (i. e. of *Vēdānta*) is entirely different. Further, a different (injunctory) meaning will not suit the Vedantic passages at all.

---

1 viz. in the *sūtra* आम्नायस्य क्रियार्थत्वात्.

2 The word *āmnāya* must mean only such passages as are injunctory; for, if it includes declaratory passages also, it would be meaningless to say that the latter too prescribe rites.

3 Therefore they cannot be said to be meaningless if they do not aim at ritual.

4 See verse 36. विधिनात्वेकवाक्यत्वात्. Thus the passage वायुर्वै क्षेपिष्ठा देवता may be taken along with वायव्यं श्वेतमालभेत. But this reasoning cannot apply to a merely declaratory Vedantic passage occurring in an entirely different context by itself.

5 वेदान्त is दृष्टफल. The fruits of ritual, like स्वर्ग etc. are अदृष्ट and stand in need of injunction.

276. "But the rule is that, when there is unity of signification, it is illogical to create multiplicity of contexts; for example, the passage '*dēvasya tvā* etc.'"[1]

277. Since the rule also is that, when the meaning is different, the contexts are different, as, in the passage '*ishētvā* etc.,'[2] it is equally illogical to assume unity of context.

278 and 279. On the other hand, the inclusion of the chapter on ritual in the chapter on knowledge, can only be by reason of the one being useful[3] to the other, the relation between them being that between a general and a particular passage (*vākyaikavākyatva*). This will be further explained by arguments to be advanced hereafter.

280. It is therefore established that the whole of the *Upanishads* have a separate fruit of their own (*pārthagarthya*), that they negative all injunctory signification, and that the knowledge of Self alone is the means to liberation.

281. It should also be known that perfection in the path above specified consists in the cessation of all activity of speech, mind, or body.[4]

---

1 Compare अर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यात्. Thus the passage देवस्य त्वा सवितुः etc. needs completion of meaning by the passage निर्वपामि etc. Hence these two are एकवाक्य. Hence also the कर्मकाण्ड and the ज्ञानकाण्ड must have unity of context.

2 इषे त्वेति शाखां छिनत्त्यूर्जे त्वेत्यनुमार्ष्टीति छेदनानुमार्जनयोर्भेदेन विनियोगात्............भिन्ने वाक्ये इति राद्धान्तितम्. Anandagiri.

3 Ritual, being a means of purification, is a help to knowledge. Anandagiri says, by way of analogy 'द्रव्यार्जनविधेः क्रतुविधिभिर्वाक्यैकवाक्यत्ववत्...........तयोर्वाक्यैक्येऽपि साधनादिभिर्धर्मितिभावः'.

4 The mere study of the *Vēdānta* does not endow one with knowledge, unless it is coupled with *ṣama*, *dama*, etc.

Digitized by Google

282. It follows too that the person authorised in this case is the aspirant to knowledge who has renounced all action, and not the performer of rites who is ever striving after performance.

283. Authority is given even for the ignorant person, who, on learning from Scripture about the true nature of *Brahman* and the Self, cherishes a desire for knowledge and liberation.[1]

284. "Not so. It has been pointed out, in a former place, by a consideration of the beginning and the conclusion of Scripture, that, by reason of consistency of meaning, the performance of rites is its sole aim.

285. "Hence, the person authorised is he who performs everything that is ordained by Scripture. Otherwise, if diversity of context be established, diversity must also be assumed in the persons that are authorised."

286. Not so. We have already demostrated the divergence of context. Therefore there is no room for the objection you put forward.

287. Moreover, it is not possible for a man, even within the whole period of a man's life, to accomplish all that is ordained by Scripture, so that (as you say) he may be authorised for a knowledge of the Self.[2]

288. Rewards have a secondary significance (*arthavâda*), and, in the case of knowledge that is derivable

[1] The opponent's argument is that, if one has no idea of *Brahman* at all, there can be no desire in him for knowing it, and, if he has already known *Brahman*, a desire for knowledge is out of question. Hence there is no *adhikāra* at all either way. *Surēşvara's* answer is contained in this verse.

[2] See verse 285 *supra*.

Digitized by Google

from *Vēdānta*, since there will be no one that is authorised, Scripture will cease to be an authority by itself.[1]

289. Further, liberation would not be desired, until it is understood by any proof (*māna*); and, if it has been understood, then, *a fortiori*, there would be no desire for it, since it is no other than the natural condition of one's own Self.[2]

290. It is not right to contend that there can be, in men, no desire for liberation; for, it is seen also that such kinds of happiness etc. are desired as are not limited by space and time.[3]

291. Again, if the fruit of knowledge were as uncertain as the fruit of *agnihōtra* etc., then there might be some difficulty as to the person authorised, since there would be the doubt that, even if performed, it will not bear fruit.

292. *Agnihōtra* etc. will not bear fruit if performed by a *Ṣūdra* who is unauthorised, though he too is desirous of fruit. Hence it (authorisation) is laid down with precision.

293. But, here, nothing more is sought from the *Ṣāstra* than liberation, which depends solely on the springing up of knowledge that destroys nescience.[4]

---

[1] Verses 288 and 289 are the several consequences following from the argument of the opponent that both the *karmakāṇḍa* and the *jnānakāṇḍa* have the same *adhikārin*.

[2] Hence, if there could be no desire, there could be no *adhikārin*, and both the *kāṇḍas* would therefore lose their inherent authority.

[3] And liberation is such a kind of happiness

[4] Hence there is no difficulty as to the *adhikārin*, in regard to liberation.

294. If it be asked whence arises that knowledge, the answer is that it springs from the cessation of bondage. That bondage is either past, or future, or present.

295. It is for this reason alone that liberation is not attained even after a complete study of Scripture and its interpretation. The same is pointed out in Scripture by the illustration of the golden mine.[1]

296. 'The knot that ties the heart is rent asunder, all doubts are destroyed, and all actions fall into non-existence, when That which is both greatest and least (*parāvara*) is realised.'[2]

297. By this passage and others, it is declared that the fruit of knowledge is not unperceived. The same is shown by the passage "How shall he become a *Brāhmaṇa?* By his attributes etc."[3]

298. Why should not liberation be the object of desire, since we commonly find excessive liking in men who long for the attainment of eternal happiness and the destruction of everlasting misery?

299. Since there is no difference in the degree of excessive desire (*prītyutkarsha*) with regard to fruits perceived and unperceived, the wise person chooses nothing but the highest bliss (liberation).

300. The happiness that is the reward of ritual, is transitory, since it has to be achieved by means (*sādhanasādhya*); but liberation is declared to be eternal, since

[1] viz. that people, other than professional detectives of mines, will not discover a rich mine of gold hidden deep beneath the surface of the earth, though they may walk over it never so frequently.

[2] This verse is taken *verbatim* from *Muṇḍakōpanishad*, II 2. 9.

[3] सब्राह्मणः केनस्याद्येन etc.

Digitized by Google

it is dependent on manifestation alone (*abhivyanjaka-tantra*).

301. 'All rites are either useful by being productive of purification, or, are included in the chapter relating to knowledge. Hence their fruit is not different.'[1]

302 and 303. This cannot establish syntactical unity, for, none longs for an end (*pumartha*) which consists in the attainment of an unprofitable fruit at the termination of the performances prescribed. He who thirsts to attain complete bliss will not be content with gaining but an insignificant portion of it.[2]

304. "Perfection of bliss (or liberation) is also denoted by such words as heaven, the dominion of heaven, etc. Nor does the word heaven indicate any degree of bliss."[3]

305. No wise man exerts himself without rightly understanding the object he strives after. If the word heaven be taken to denote any indefinite degree of bliss, then sacrifices like the *agnishṭōma* in the month of *chitrā* will be connected with the fruit derivable from the animal etc.[4]

---

[1] Hence, knowledge is the primary aim, and rites are but accessory thereto. Therefore the opponent again presses the argument contained in verse 285 *supra*.

[2] *i. e.* he who longs for *mōksha* will not even dream of *svarga* and such other evanescent fruits.

[3] The opponent argues, from the passage स्वर्गकामोयजेत स्वाराज्यकामोयजेत etc., that the word *svarga* implies liberation, and hence there is no साध्यभेद in the two *kāṇḍas*.

[4] The fruit of *chaitra-agnishṭōma* is the gain of cattle. And the pleasure derivable from drinking their milk etc. will hardly be different from the pleasure of *svarga*, if the opponent's view were to be adopted.

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् ।	मूल्यम्
श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं· श्रीराममिश्र-शास्त्रिप्रणीतकाचित्कविषमपदटिप्पणीसमेतः	७।)
श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा ..	६)
श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा ..	३=)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः	२।)
वेदपूर्त्तः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं·स्वामिश्रीराममिश्रशास्त्रि-प्रणीतो निर्विशेषाद्वैतनिराकरणपरः	१॥=)
वेदपूर्त्तिसहितो वेदार्थसंग्रहः	३॥)
शास्त्रदीपिका	६।)
सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-न्द्रिकोपेतम्, पं·स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् ।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजप·दामोदर-शास्त्रिणा संशोधिता पूर्वार्द्धरूपा	५॥)
तथा उत्तरार्द्धम्	८॥)
माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता	७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता	६॥)
श्रीतिकल्पार्णवतरणिः ।	६)
दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता	॥=)
जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता ..	५॥)
लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्याय·मुक्तावल्याख्यया टीकया सहिता ।	॥)
सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम् ।	॥)
तत्त्वमुक्ताकलापः-सर्वार्थसिद्धियुतः, बोधायनीयार्थसिद्धान्तानुसारी विशिष्टाद्वै-तब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्कि-ककेसरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीवेङ्कटनाथदेशिकेन प्रणीतः	५॥=)
वेदान्तसिद्धान्तमुक्तावली, श्रार्यवीनिस्प्राहबकताङ्गलभाषानुवादयुता ..	१॥)
काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः	२॥)
अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः	१२)
आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्य-काराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम्	॥)
तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदी-पाख्यटीकया सहिता ।	१॥)

CONTENTS.

Page.

BRÂHMASPHUṬASIDDHÂNTA, Edited with his own commentary by Mahâmahopâdhyâya Sudhâkara Dvivedin, Professor, Queen's College, Benares 65

LAUKIKANYÂYASAṂGRAHA, Ed. Gaṇgâdhara Çâstrin, Professor, Sanskrit College, Benares 81

THE TÂRKIKARAKṢÂ AND SÂRASAMGRAHA OF VARADARÂJA, with the glosses Niṣkaṇṭakâ of Mallinâtha Kolâcala and Laghudîpikâ of Jñânapûrṇa, Ed. Vindhyeçvarîprasâda Dvivedin, Librarian, Sanskrit College, Benares 97

NYÂYASÛTRAVĪVARAṆAM, Ed. Surendralâla Gosvâmin, Professor, Sanskrit College, Benares 105

THE SAMBANDHAVÂRTIKA OF SUREṢVARÂCHÂRYA, Translated by S. Venkataramana Aiyar, B. A., B. L., High Court Vakil, Triplicane, Madras 121

Digitized by Google

16

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 3.] March, 1902. [Vol. XXIV.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1902.

Copyright on each article reserved.

Price Rs. 9-0 per annum.]

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
चित्रमीमांसा, अप्पयदीक्षितकृता तै॰ श्री रामशास्त्रिणा संशोधिता	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।=)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनाचार्य्येणाङ्गलदेशीयभाषायामनुवादिता	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणाङ्गलदेशीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका,	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	०॥=)
श्रौतपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकोल्लूकशास्त्रि- संशोधिता	३)
काव्यप्रदीपः, पं॰ रामशास्त्रिभागवताचार्येण परिशोधितः	२॥)
वेदान्तसिद्धान्तादर्शः, पं॰ मन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	५॥)

Digitized by Google

सदा खलु संसारिवैलक्षण्यं तत्र सिध्येन्न तु तदस्ति कार्यत्वहेतोस्तत्र सामर्थ्याभावात् । स हि कर्त्तारमपेक्षते तदेकत्वे कृत्यादिनित्यत्वादौ चोदासीन एव । किं च यथा किंचित्कार्यमसंप्रदानकं किंचिन्नेति किंचित्कार्यं सोपदानकं किंचिन्नेति तथा किंचित्सकर्त्तृकं किंचिन्नेत्यस्तु । एवं च लोके कृतकत्वेन घटादिव्यवहारो ऽकृतत्वेनाङ्कुरादिव्यवहारश्चोपपद्यते । तस्मान्न केवलानुमानेनेशसिद्धिः । अनुमानापेक्षा च श्रुतेरसंभावनादिपुरुषापराधनिवृत्तये न तु प्रमित्युत्पत्तौ तत्फले वा वेदान्तानां सापेक्षताप्रसङ्गात् । तदुक्तं सर्वज्ञमुनिभिः । स्वाध्यायवन्न घटते करणं विचारो नाप्यङ्गमस्य परमात्मधियः प्रसूतौ । सापेक्षता ऽऽपतति वेदगिरस्तथात्वे ब्रह्मात्मनः प्रमितिजन्मनि तन्न युक्तमिति । १४ । २१६ १४२ । २१७ ।

रथवडवान्यायो ऽपीह प्रवर्त्तते । रथे नियुक्ते वडवे रथवडवे तद्विषयो न्यायः । ते यथा मिलित्वैव रथं वाहयतः वियुक्ते तु न शक्नुतो वोढुं परस्परस्नेहातिशयात्कुरुतश्च हेषणं तथा श्रुतियुक्ती अप्रतिबद्धसाक्षात्कारं बोधं शमादिरूपं च जीवन्मुक्तिसखं मिलित्वैव निर्वाहयन्ति वियुक्ताश्च तदर्थमितरेतरमाकाङ्क्षन्तीति पूर्वोक्तं सर्वमनुसंधेयम् । १४३ । २१८ ।

ननु निर्दोषमानजस्य तत्त्वसाक्षात्कारस्य पुरुषापराधमात्रात्कथमबोधनिवर्त्तनाक्षमत्वं येन तन्निरासायानुमानाद्यपेक्षा भवेदिति चेद्भच्छुन्यायेन भैरवन्यायेन चेत्यवेहि । इत्थं हि लौकिकी गाथा । भच्छुर्नाम कस्य चिद्राज्ञः सचिवस्तदाज्ञया दूरदेशं तत्रत्यदस्युवधार्थं गतः । तान्हत्वा ऽपि तद्देशमर्यादास्थापनार्थं तत्र चिरं विलम्बिते तस्मिंस्तच्छत्रुभूताः सचिवा दस्युकर्त्तृकं तस्य वधं निश्चि-

त्तनगरे घोषयित्वा राज्ञे ऽपि साभिज्ञानं निवेदितवन्तः आगतांस्तत्समाचारपत्रांश्च मध्ये विलोपयामासुः स च कियत्कालानन्तरं स्वस्यानुयायिनः कांश्चित्तत्र स्थापयित्वा नृपदर्शनायागतो मार्गे स्वारिभिः समस्तपुरे घोषयित्वा राज्ञे निवेदितं स्ववधवृत्तान्तं श्रुत्वा] दैवविपर्यया-द्विपरीतबुद्धिः सेना बहिः स्थापयित्वैकाकी राजसद्मान प्रविश्य नृपं दिदृक्षुः क चिद्गृहारामकुञ्जे तस्थौ राजा च प्रातर्बहिर्निःसृतस्तं साक्षाद्दृष्ट्वा ऽपि पूर्वोक्तमन्त्रिवाक्य-स्मरणजविपरीतभावनावशात्पिशाचतां गतो ऽयमिति मेने इति]। १४४ । २१६ ।

एवं भैरवनामा] कश्चिद्विप्रश्चक्रं सेव्यं नृपः सेव्यो न सेव्यः केवलो नृप इति न्यायमुल्लङ्घ्य क्षितिपतिकृ-तसत्कारातिशयजनितोत्सेकोद्रेकात्कमप्यगणयन्सर्वैर्नृपा-नुगैर्विरुरोध । अतस्तैस्तावत्तस्य राजसभाप्रवेशं निरुध्य तन्मरणं च राज्ञे निवेद्य कतिपयदिनानन्तरं तत्पिशाच-भावो ऽपि निवेदितः । स च कदा चिद्राज्ञि मृगयाविहा-रिणि सति तत्समागमेच्छया निरोधकभिया मा ऽश्वत्थ-मारुह्य तस्थौ राजा चाश्वत्थारूढमूर्द्ध्वबाहुं भैरवो ऽहं नृप-शार्दूल मां द्रष्टुमर्हसीत्याद्याक्रोशन्तं तं पिशाचमवधार्य ततो विमुखो बभूवेत्यपि लौकिकी गाथा । तथा च यथा ऽत्रोभयत्रापि करणापाटवमन्दान्धकारादिदोषाभावे ऽपि पुरुषापराधादेव नृपनिष्ठसाक्षात्कारस्याबोधनिवर्त-नाक्षमत्वं तथा प्रकृते ऽपि बोध्यम् । १४ । २२० ।

चक्रमिति प्रासङ्गिकः । अस्योदाहरणं तु तत्त्वबुभु-त्सुना केवलं श्रवणमेव न सेव्यं किं तु तदङ्गभूताः शमा-दयो मननादयश्च सेव्याः । एवं स्वर्गादिकामेन न केवलं

प्रधानकर्मैव सेव्यं किं तु तदङ्गजातमपीत्यादि बोध्यम् । १ । २२१ ।

शमादेस्तत्त्वज्ञानस्य चान्योन्यसापेक्षत्वे किमपि न सिध्येदित्याशङ्कायां वन्हिधूमन्यायः । यथोत्पत्तिप्रतीतिरूपद्वारभेदाद्वह्निधूमयोरितरेतरापेक्षत्वं न विरुध्यते तथा स्वरूपलाभदार्ढ्यरूपद्वारभेदान्नात्रापि विरोधः । २।२२२।

नन्वेतावता ग्रन्थेन मननादिना पुरुषापराधापगमे प्रतिबन्धरहितेन तत्त्वसाक्षात्कारेण ज्ञानं बाध्यते इत्युक्तं भवति बाध्यबाधकभावश्च विरोधपूर्वक एव अतो ज्ञानाज्ञानयोर्विरोधः क इति निरूपणीयं येन बाध्यबाधकता स्यात् । स किं गोमहिषादिन्यायेन नैमित्तिकः । यथा गवादेर्महिषादेश्च केन चिन्निमित्तेनान्योन्यं मैत्री भवति केन चिच्च विरोधः । किं वा ऽहिनकुलन्यायेन शाश्वतिक इति चेच्छृणु । चैतन्यमेव ज्ञानमिति पक्षे रश्मितृणादिन्यायेनागन्तुकः । यथा ऽऽदित्यरश्मयः स्वभावतस्तृणादेर्भासका अपि सूर्यकान्तमण्यारूढास्तद्दाहका भवन्ति । तथा ऽज्ञानप्रकाशकमपि चैतन्यमखण्डाकारवृत्त्यारूढं तद्बाधकं भवतीति बोध्यम् । अखण्डाकारान्तःकरणवृत्तिर्ज्ञानमिति पक्षे तु तमःप्रकाशन्यायेनोपमर्द्योपमर्दकभावलक्षण इति । १४६ । १२३ ।

तमःप्रकाशन्यायो ऽपि मुख्यो बोध्यः । १४७ । २२४ ।

गोमहिषादिन्यायो ऽत्र प्रसङ्गाख्यातः । १ । १२४ ।

अहिनकुलन्यायस्तु स्पष्टः । २ । २२६ ।

सिंहमृगन्यायो ऽपीदृशः । ३ २२७ ।

प्रत्यक्षादिविरोधेनानुमानस्य बाधितत्वे गोमयपायसन्यायप्रवृत्तिः । यथा गोमयं पायसं गोविकारत्वात्संमतवदित्यस्य प्रत्यक्षबाधितत्वं न पयआदावनैकान्तिकत्वेन चाप्रमात्वं तथा ऽन्येष्वप्येतादृशेषु बोध्यम् । १४८ । २२८ ।

प्रत्यक्षविरोधेन तदितरसर्वबाध्यत्वे विवक्षिते उपजीव्योपजीवकयोरुपजीव्यप्राबल्यमिति न्यायः अयमन्यत्रापि सत्युपजीव्योपजीवकभावे प्रवर्त्तते । १४९ । २२९ ।

उपदेशानुपदेशत्वे विपरीतं बलाबलमिति न्यायो ऽस्य बाधकः । दृश्यते हि चन्द्रादावतिविपुलप्रमाणोपदेशेन प्रादेशप्रमाणग्राहिणः प्रत्यक्षस्य बाधः । दृश्यते च व्योम्नि शब्दैकविशेषगुणत्वोपदेशसहकृतेन नीलाद्यभावानुमानादिनोपजीव्यस्यापि नीलादिरूपप्रतियोगिप्रत्यक्षस्य बाधः । १५० । २३० ।

दामव्यालकटन्यायो न तत्र स्यात्कदा च न । भीमभासदृढन्यायात्त्वं यास्यति विशोकतामित्यादिना वासिष्ठइदं न्यायद्वयं सप्रपञ्चमुपन्यस्तम् । तत्राद्यस्योन्नततरां दशामापन्नस्याप्यज्ञस्यातिनीचदशाप्राप्तिरवश्यं कालेन भवतीति तत्त्वबोधो ऽवश्यं संपाद्य इति विवक्षायां प्रवृत्तिः । दामव्यलकटाख्यास्त्रयो ऽसुरः शम्बरेण स्वमायया निर्मितास्ते च तलप्रहारादिना मेर्वादिचूर्णीकरणे शक्ता अप्यज्ञानप्रभावात्कालेन मशकादियोनिं प्रापुरिति प्रसिद्धं तत्र । १५१ । २३१ ।

तत्त्वविन्न कदा ऽपि स्वपदात्पततीति विवक्षायां द्वितीयस्यावतारः । ते ऽप्यसुरास्तेनैव तथा निर्मिताश्चिरं जीवन्मुक्तिसुखमनुभूय निर्वाणपदं प्राप्ता इति संक्षेपः ।

प्रपञ्चस्तु तत्रैव द्रष्टव्यः। सुन्दोपसुन्ददामाद्याख्यानवद्-न्यान्यप्याख्यानानि प्रायो न्यायतयोदाहर्त्तुं शक्यन्ते। एवं सर्वे लौकिका दृष्टान्ता लौकिक्यो गाथाश्च सर्वा न्याय-त्वेनोदाहर्तुं शक्यन्तेइत्यलमतिप्रपञ्चेन। १५२। २३२।

व्याख्यातं न्यायवृन्दं निजमतिमनतिक्रम्य यावन्मयाऽस्य पारं प्राप्तुं तु शक्तो न हि भवति गुरुः कः पुनर्मादृशो ना॥ सर्वः सर्वं न वेत्ति प्रथितमिदमतो नास्ति मे ऽत्रापराधः शिष्टा ज्ञेयाः स्वयं वै सुविमलमतिभिः सम्यगाराधितार्यैः १।

अत्र प्रथमपादे यावत्तैलं तावद्व्याख्यानमिति न्याय-विषयत्वं बोध्यम्। १५३। २३३।

यावत् स्नाता तावत्पुण्यमिति न्यायो ऽपीह बो-ध्यः। १५४। २३४।

द्वितीये ऽनवबुद्धार्थे प्रवृत्तिर्बिलवर्त्तिगोधाविभज-नन्यायेनाशक्येति ध्वनितम्। १५५। २३५।

यत्राधिकार्थालाभे ऽल्पार्थे प्रवृत्तिर्न दोषायेति वि-वक्षा तत्रालाभे मत्तकाशिन्या दृष्टा तिर्यञ्चु कामितेति न्यायः मत्ताकाशिनी स्त्रीविशेषः। १५६। २३६।

तृतीये न हि सर्वः सर्वं जानातीति न्यायो ऽर्थतः पठितः। १५७। २३७।

न हि सर्वत्रानीशशक्तिरिति न्यायः। १५८। २३८।

सर्वासाध्यान्निवृत्तिर्नापवादायेति न्यायश्चात्र ध्व-नितः १५९। २३९।

पूर्वार्द्धन्यायाः १६। २। मिलिताः। ४०।

वेदाश्चाम्नाय ४०४ संख्याकलौकिकन्यायसंग्रहः। शिवयोः प्रीतये ऽयं स्यात्पित्रोर्बालस्य गीरिव। २॥ गङ्गाम्भोमिलितस्य वीथिपयसः सत्सेव्यतां वीक्ष्य मे

चेतो याति मुदं ध्रुवं मम वचो मिश्रं वचोभिः सताम् ।
श्रुत्यादेर्वचनैश्च लब्धमिलनं याता सतां सेव्यतां
साफल्यं भविता ततो मम कृतेः स्वाभीष्टसंप्रापणात् । ३ ।
यो ब्रह्मा यश्च विष्णुर्वसुतनुरपि यो यश्च गौर्यादिमूर्त्ति-
र्यश्चात्मा सर्वजन्तोः श्रुतिशिखरगिरां यश्च तात्पर्यभूमिः ।
यस्याबोधात्समुत्थो व्रजति च विलयं यस्य बोधात्प्रपञ्च-
स्तं शुद्धं संप्रपद्ये शिवममरमजं शंभुमीशानमीड्यम् । ४ ॥

इति श्रीसाधुवृन्दवन्दितपादारविन्दवैराग्यादिरत्नाकरविद्वद्वरश्रीमद्रामदयालुशिष्येण सोमवंशीयविन्दरायकुलोत्तंसभगवत्परायणश्रीसेवादेव्याश्रितपादारविन्दश्रीगुलाबरायवर्मात्मजेनोदासीनावस्थेन रघुनाथवर्मणा विरचितो लौकिकन्यायसंग्रहः समाप्तः ॥

Digitized by Google

Digitized by Google

त्रिज्यया याऽऽप्ता तैरसुभिरुदयैर्निरक्षराश्युदयैर्या: क्षेत्रकलास्तास्तयो: शरसत्रिभक्रान्त्योरेकान्यदिशोर्ग्रहे ऋणं धनं कार्या:। एवमायनं दृक्कर्म ग्रहे देयम्। भमुनिध्रुवके वेधेनैव दत्तायनदृक्कर्मोपलब्धेर्न देयमित्यर्थाज्ज्ञायते।

अत्रोपपत्ति:। उदयास्ताधिकारे सत्रिभग्रहक्रान्तिज्यामायनं वलनं त्रिज्यासमां द्युज्यां क्षेत्रकलामितानायनदृक्कर्मासून् प्रकल्प्यायनं दृक्कर्म साधितम्। इहायनदृक्कर्मासुभ्य: क्षेत्रकलानयनं 'यद्युदयासुभिरष्टादशशतक्षेत्रकलास्तदाऽऽयनदृक्कर्मासुभि: कि' मित्यनुपातेन सूक्ष्ममानीतम्। तच्च 'आयनं वलनमस्फुटेषुणा संगुणं द्युगुणभाजितं हृत' मित्यादि-भास्करविधिना $\frac{\text{आव} \times \text{श} \times १८००}{\text{द्यु} \times \text{नि उ}} = \frac{\text{स· ग्र· क्राज्या} \times \text{श} \times १८००}{\text{त्रि} \times \text{नि उ}}$ स्वल्पान्तरादित्युपपद्यते। नक्षत्राणां ध्रुवा: कृतायनदृक्कर्मका:। अतस्तत्र पुनरायनदृक्कर्मसंस्कारोऽनुचित:। अत्र चतुर्वेदाचार्येण सत्रिभग्रहक्रान्ति: सत्रिभग्रहोत्क्रमज्यावशेन या क्रान्तिरिति व्याख्याता तदर्थं 'ब्रह्मगुप्तकृतिरत्र सुन्दरी साऽन्यथा तदनुगैर्विचार्यते'—इत्यादि भास्करेण लिखितमिति।

चतुर्वेदाचार्यवाक्यं च 'ग्रहस्फुटविक्षेपसत्रिराश्युत्क्रमक्रान्त्योर्यो घातस्तस्मात्' ॥ १७ ॥

इदानीं चन्द्रादीनां शरे महति सति सूक्ष्ममक्षजं दृक्कर्माह।

तत्स्वक्रान्तिज्याभ्यां चन्द्रादीनां पृथक् चरप्राणान्।
कृत्वाऽर्कवत् तदन्तरसंयोगौ तुल्यभिन्नदिशो:॥ १८॥
तत्प्राणैर्विक्षेपे सौम्ये हीनो ग्रहोऽधिको याम्ये।
उदये भध्रुवको वागस्त्यध्रुवकोऽथवा लग्नम्॥ १९॥
उदये ग्रहभमुनीनामस्तमये षड्गृहाधिकात् सौम्ये।
अधिको याम्ये हीन: षड्राशियुतोऽस्तमयलग्नम्॥ २०॥

चन्द्रादीनां चन्द्रनक्षत्रादीनां शरे महति तत्स्वक्रान्तिज्याभ्यां स्थानीयबिम्बीयक्रान्तिज्याभ्यां पृथक् पृथगर्कवच्चरप्राणान् चरासून् कृत्वा तयोस्तुल्यभिन्नदिशोश्चरासुमानयोर्यथाक्रममन्तरसंयोगौ कार्यौ। एव-

मवलनदृक्कर्मासवो भवन्ति । सौम्ये विक्षेपे तैरसुभिर्ग्रहो हीनो याम्ये शरे चाधिकोऽर्थात् सौम्ये शरे कृतायनदृक्कर्मग्रहाद्विपरीतं याम्ये शरे चानुलोमं तैरसुभिर्यल्लग्नं स्वदेशे तदुदये ग्रहबिम्बोदये लग्नं भवेत् । एवं भध्रुवकोऽथवाऽगस्त्यध्रुवकश्च हीनो वाऽधिकः कार्योऽर्थात् तत्स्थानीयविक्षेपीयक्रान्तिभ्यां पृथक् पृथक् चरासून् प्रसाध्य तद्योगान्तरतोऽक्षजदृक्कर्मासून् विधाय तैरसुभिः शरवशाद्भचध्रुवतोऽगस्त्यध्रुवतश्च क्रमेणोत्क्रमेण वा स्वदेशे लग्नं प्रसाध्य तयोरुदयलग्ने साध्ये । एवं ग्रहभमुनीनामुदये लग्नसाधनम् । अस्तमये च सौम्य उत्तरशरे सप्तभाद्ग्रहाद् ध्रुवाद्वा तैरसुभिरधिकोऽर्थात् क्रमलग्नं याम्ये शरे च हीनोऽर्थादुत्क्रमलग्नं यत् प्राक्क्षितिजे तत् षड्राशिसहितं ग्रहनक्षत्रबिम्बे पश्चिमक्षितिजस्थेऽस्तमयलग्नं भवेत् ।

अत्रोपपत्तिः । 'स्फुटास्फुटक्रान्तिजयोश्चरार्धयो'रित्यादिभास्करविधिना स्फुटा । भास्करेण पश्चिमक्षितिजस्थे बिम्बे प्राक्क्षितिजे क्रान्तिवृत्तस्य यः प्रदेशस्तदस्तलग्नमुच्यते । इहाऽऽचार्येण तदा पश्चिमक्षितिजे क्रान्तिवृत्तस्य यः प्रदेशस्तदस्तलग्नमन्वर्थकमेव साधितमिति ॥ १८–२० ॥

इदानीं दृश्यादृश्यत्वमाह ।

*उदयविलग्नादधिके षड्राशियुतास्तलग्नभाद्धीने ।
रात्रिविलग्ने दृश्यो दिनेऽपि चन्द्रोऽन्यथाऽदृश्यः ॥ २१ ॥

स्पष्टार्थम् । उपपत्तिश्चोदयास्ताधिकारे प्रतिपादितैव ॥ २१ ॥

इदानीं ग्रहोदयस्य गतागतत्वमाह ।

प्रागुदयलग्नमूनं लग्नादधिकं ग्रहोदयः पश्चात् ।
ऊनमधिकेन तुल्यं कृत्वा घटिकाः स्वराश्युदयैः ॥ २२ ॥

लग्नादिष्टलग्नादुदयलग्नमूनं तदा ग्रहोदयः प्रागगतः । यद्यधिकं तदा ग्रहोदयः पश्चाद्भविष्यतीति । स्वराश्युदयैरूनमधिकेन तुल्यं कृत्वा-

* स्तोदयलग्नादधिके इति पाठान्तरम् ।

ऽर्थो'वूनस्य भोग्योऽधिकभुक्तयुक्' इत्यादिना तदन्तरघटिकाः साध्या इति ।

अत्रोपपत्तिः । इह भगोलस्य पश्चिमभ्रमेण ग्रहस्य नित्यमुदयो यस्तस्यैव गतेष्यत्वं प्रदर्श्यते । उदयकाले प्राक्क्षितिजस्थे ग्रहोदयोऽतस्त-स्मिन् इष्टलग्नादूने ग्रहबिम्बोदयो जातः क्षितिजोपरि गतत्वादन्यथा क्षितिजाधःस्थत्वाद् ग्रहबिम्बमुदेष्यतीति । अन्तरघटिकासाधनोपपत्तिल-ग्नात् कालसाधनोपपत्तिवत् स्पष्टा ॥ २२ ॥

इदानीं ग्रहास्तस्य गतागतत्वमाह ।

प्रागस्तमयो लग्नादूनं षड्राशिसंयुतास्तमयलग्नम् ।
अधिकं घटिकाः पश्चात् कृत्वा समभूनमधिकेन ॥ २३ ॥

कालादिष्टलग्नाद्यदि षड्राशिसंयुतास्तलग्नमूनं तदा ग्रहबिम्बा-स्तमयः प्राग्जात इति । अधिकं चेत् तदाऽस्तमयः पश्चाद्भविष्यति । अत्राप्यधिकेन सममूनं कृत्वाऽर्थो'वूनस्य भोग्योऽधिकभुक्तयुक्' इत्यादि-विधिना तदन्तरघटिकाः साध्याः ।

अत्रोपपत्तिः । आचार्यसाधितमस्तलग्नं सषड्भं ग्रहबिम्बास्त-काले प्राक्क्षितिजस्थं लग्नं भवेत् । तत्समे स्वेष्टलग्ने पश्चिमक्षितिजे ग्रहा-स्तमयः । ऊने ग्रहबिम्बस्य क्षितिजाधःस्थत्वादस्तमयो गतः । अधिके च बिम्बस्य क्षितिजोपरिवर्त्तमानत्वादस्तं यास्यतीति स्फुटा वासना ॥ २३ ॥

इदानीं चन्द्रस्य विशेषमाह ।

तात्कालिकोपकरणादसकृद्गतनाडिकाभिरह्नीन्दोः ।
रात्रौ वा प्रतिघटिकं प्राग्वत् शृङ्गोन्नतिः कार्या ॥ २४ ॥

गतनाडिकाभिः पूर्वागताभिस्तात्कालिकोपकरणादिन्दोरसकृद्गता नाड्योऽह्नि दिवसे वा रात्रौ स्फुटाः साध्यास्ततः प्रतिघटिकं प्राग्वत् शृङ्गोन्नतिः कार्या ।

अत्रोपपत्तिः । यस्मिन् काले गतो वेष्य उदय इति परीक्षा क्रियते तस्मिन् काले तात्कालिकग्रहज्ञानात् तस्मादेव ग्रहादुदयल-

Digitized by Google

ग्नमस्तलग्नं च साधितम् । अर्पेवितं तु चितिजस्थे ग्रहबिम्बे । अतोऽसकृद्विधिना तात्कालिकेन ग्रहशरदृक्कर्मादिना स्फुटमुदयलग्नमस्तलग्नं च भवति । एवं या असकृद्विधिना नाड्यस्ता आर्य्यैस्ताभिर्ग्रहं प्रचाल्याये क्रिया समुचिता । अन्येषां ग्रहाणामल्पगतित्वादसकृद्विधिं हित्वाऽऽचार्येण चन्द्रस्यैवासकृद्विधिरुक्तः । एवमसकृद्विधिनाऽऽनीता नाड्य आर्य्यो भवन्ति ताभ्यश्चन्द्रस्य छाया न साध्या । चन्द्रस्य छाया तु तत्साधनाभिरिष्टकालिकोदयलग्नेष्टलग्नान्तरभवाभिः साध्येति सर्वं भास्करेण छायाधिकारे ग्रहगणिताध्याये स्पष्टमुपपादितम् ॥ २४ ॥

इदानीं विशेषमाह ।

मध्यच्छाया रविवत् स्वक्रान्त्या दर्शने सतीष्टा च ।
एवं ग्रहभमुनीनामन्तरघटिकागुणां भुक्तिम् ॥ २५ ॥

ग्रहस्य भस्य वा दर्शने सति स्वक्रान्त्या ग्रहस्य वा भस्य स्फुटक्रान्त्या रविवत् इष्टा मध्यच्छाया याम्योत्तरवृत्तस्थे बिम्बे छाया साध्या । एवं ग्रहभोदययोर्वा ग्रहभास्तयोरथवा ग्रहमुन्युदययोर्वाऽस्तमययोः स्फुटान्तरघटिकाज्ञानार्थमादाविष्टकालिकग्रहवशेन तदुदयास्तलग्ने कृत्वा ग्रहभोदययोरस्तयोर्वा पूर्ववदन्तरघटिकाः साध्याः । ताभिर्भुक्तिं ग्रहभुक्तिंगुणामित्यस्यार्थे सम्बन्धः ।

अत्र चतुर्वेदाचार्यः । 'पलालभक्षणमेतत्' । अर्थाद्यथा पलालस्य नीरसशुष्कतृणस्य (लोके पुआल इति प्रसिद्धस्य) भक्षणे रसप्राप्तिर्न तथैवेतत्प्रकारेणाऽऽचार्यस्य यशःप्राप्तिर्न यत इदं सर्वमानयनं सर्वत्रैव प्रसिद्धमिति ॥ २५ ॥

इदानीं नक्षत्रोदयास्तवशेन ग्रहोदयास्तावाह ।

षष्ट्या विभजेल्लब्धं प्रागुदयास्तमययोर्ग्रहे शोध्यम् ।
पश्चात् क्षेप्यं प्रतिदिनमुदयास्तमयावसकृदेवम् ॥ २६ ॥

पूर्वागतघटीगुणां भुक्तिं षष्ट्या गणको विभजेत् । लब्धं चालनफलं पूर्वप्रकारेणोदयास्तमययोः प्रागगते लक्षणे ग्रहे शोध्यं पश्चाद्दृश्य-

लवणे ज्ञेयमेवं चालितग्रहात् पुनस्तदुदयास्तलग्ने कृत्वा ग्रहभोदययो-रस्तमययोर्वाऽन्तरघटिकाः साध्याः । एवमसकृद्विधिना प्रतिदिनं ग्रहस्यो-दयास्तमयौ भवत इति ।

अत्रोपपत्तिः । पूर्वविधिना स्फुटा ॥ २६ ॥

इदानीं ग्रहोदयास्तौ प्रकारान्तरेणाह ।

इष्टात् कालाद्भानोरुदयास्ताद्वा ग्रहोदयास्तमयौ ।
तात्कालिकैर्विलग्नं ग्रहोदयास्तमयलग्नाद्यैः ॥ २७ ॥

इष्टात् कालाद्वा भानोरुदयास्तात् पूर्वविधिना ग्रहोदयास्तमयौ साध्यौ किं नक्षत्रव्यपदेशेन । अत्र यदीष्टलग्नमपेक्षितं तदा तात्कालि-कैर्ग्रहोदयास्तमयलग्नाद्यैर्लग्नं साध्यम् । अर्थाद्ग्रहस्य तात्कालिकोदय-लग्नमस्तलग्नं वा रविं ग्रहदिनगतशेषा घटिका इष्टघटिकाः प्रकल्प्य स्वदेशोदयैर्लग्नमपि साध्यं भवतीति सर्वं स्फुटम् ।

अत्र चतुर्वेदाचार्यः । 'एवमेतत् क्रियते कर्म कः सन्देहोऽथान्यथा कर्त्तनजातिमूर्खोऽपि जानाति' ॥ २७ ॥

इदानीं पुनः ग्रहोदयास्तावाह ।

प्रागुदयलग्नमुदयैर्लग्नसमं लग्नमुदयलग्नेन ।
पश्चात् तद्घटिकाभिः कृत्वा तात्कालिकैरसकृत् ॥ २८ ॥
उदयः प्रागस्तमयो लग्नेन सषड्गृहास्तमयलग्नम् ।
पश्चाल्लग्नं चक्रार्धसंयुतास्तमयलग्नेन ॥ २९ ॥

तात्कालिकैर्ग्रहशराद्यैरसकृदुदयः साध्यः । शेषं 'प्रागुदयलग्नमूनं' तथा 'प्रागस्तमयो लग्नादूनम्' इत्यार्याद्वयेन स्पष्टार्थम् ।

अत्र चतुर्वेदाचार्यः । 'पिष्टपेषणमेतत्' ॥ २८–२९ ॥

इदानीं ग्रहोदयास्तदिग्ज्ञानमाह ।

ऊनोऽल्पभुक्तिरुदितः प्रागथवोदेष्यति ग्रहः सूर्यात् ।
पश्चादधिकोऽधिकगतिरल्पगती वक्रिणौ ज्ञसितौ ॥ ३० ॥
प्रागूनोऽधिकभुक्तिः पश्चादधिकोऽल्पभुक्तिरस्तमितः ।

Digitized by Google

यास्यत्यथवाऽस्तमयं यतस्ततो दृश्यघटिकोक्तिः ॥ ३१ ॥

अल्पभुक्तिर्ग्रहः सूर्यादूनस्तदा प्राक् प्राच्यां दिशि उदितो वोदेष्यति । अर्कग्रहान्तरघटिकानां दृश्यघटिकातोऽधिकन्यूनवशात् । एवमधिकगतिर्ग्रहः सूर्यादधिकः पश्चादुदितो वोदेष्यति–इति वेदितव्यम् । बुधशुक्रौ यदा वक्रिणौ भवतस्तदा तावल्पगती कल्प्यौ । अर्थात् तदा तयोः पूर्वदिश्युदय इति वेदितव्यम् । एवं सूर्यादधिकगतिर्ग्रह ऊनः प्राक् प्राच्यां दिशि अल्पभुक्तिर्ग्रहश्चाधिकः पश्चात् पश्चिमायां दिशि अस्तमितोऽस्तं गतो वाऽस्तमयं यास्यति । यत उदयास्तगतैष्यज्ञानं दृश्यघटिकाभिः कालांशघटिकाभिरतो दृश्यघटिकोक्तिरुचितेति ।

अत्रोपपत्तिः । 'रवेरूनभुक्तिर्ग्रहः प्रागुदेति' तथा 'ज्ञशुक्रावृजू मन्दगुत्वस्य वक्रां गतिं प्राप्य'त्यादिभास्करविधिना स्फुटा ।

अत्र चतुर्वेदाचार्यः । 'प्रागूनभुक्तिरून'इत्यार्यया गतार्थमिदमार्याद्वयम् । विशेषश्च यदुक्तमूनोऽल्पभुक्तिरित्यादिना बुधसितयोर्वक्रिणोरेव संभवति स्वल्पगतित्वं तदा च तयोः पश्चादस्तमयः प्रागुदयश्चे'त्यादि ॥ ३०–३१ ॥

इदानीं दृश्यघटिका अर्थात् कालांशघटिका आह ।

घटिकाद्वयेन चन्द्रो दृश्योऽर्कात् सितगुरुज्ञशनिभौमाः ।
अध्यर्धया घटिकया त्रिभागघटिकोत्तराधिकया ॥ ३२ ॥

अर्काद्घटिकाद्वयेनान्तरितश्चन्द्रो दृश्यो भवति । शुक्रगुरुबुधशनिभौमाश्च अध्यर्धया घटिकया सार्धैकघट्या किंविशिष्टया त्रिभागघटिकोत्तराधिकया दृश्या भवन्ति । अर्थात् शुक्रस्य कालांशघटिका सार्धैका १ । ३० । गुरोः सार्धैका त्रिभागाधिका १ । ५० । एवं बुधस्य १ । ५० + २० = २ । १० । शनेः २ । १० + २० = २ । ३० । भौमस्य २ । ३० + २० = २ । ५० । एताः षड्गुणाश्चन्द्रादीनां कालांशाः च = १२ । शु॰ = ९ । गु॰ = ११ । बु॰ = १३ । श = १५ । मं॰ = १७ । द्वादशभिः शीतांशु'रित्यादिपाठपठितसमाः ॥ ३२ ॥

इदानीमन्तरघटिकाभिस्तात्कालिकीकरणं कालज्ञानं चाऽऽह ।

ग्रहसूर्यान्तरघटिकास्वदृश्यघटिकान्तरं ततो लिप्ताः ।
प्राग्वत् तदन्तरहृता हीनाधिकनाडिका दिवसाः ॥ ३३ ॥
विपरीतमृणधनं सौम्यशुक्रयोर्वक्रिणोः स्वभुक्तिकलाः ।
एवमुदयास्तमययोर्विपरीतं वक्रिणि स्वफलम् ॥ ३४ ॥

ग्रहसूर्यान्तरघटिकानां स्वदृश्यघटिकानां चान्तरं कार्यम् । तत-स्तदन्तराल्लिप्ताः साध्याः । यथोदन्तरघटिकास्ताश्चाऽष्टादशशतकलाभिः सङ्गुण्य ग्रहाधिष्ठितराश्युदयासुभिर्भाज्याः फलं शेषकलाः स्युः । ततस्ताः शेषकलाः प्राग्वत् तदन्तरहृतास्तयो रविग्रहयोर्भुक्त्यन्तरेण हृताः शुक्रबुध-योर्वक्रिणोः सतोस्तद्रविभुक्तियोगेन हृताः फलं हीनाधिकनाडिकादिवसाः एष्यगतदिवसा भवन्ति । यदा दिष्टकालांशाः पठितेभ्योऽल्पास्तदा हीन-सम्बन्धिनो दिवसा अधिकास्तदाऽधिकसम्बन्धिनो दिवसा ज्ञेयाः । तैर्दि-वसैः स्वभुक्तिकलाः स्वभुक्तितश्चालनकलाः साध्यास्तत्संस्कारेण ग्रहोद-यास्ते ग्रहो रविश्च भवति । ततः पुनस्तदन्तरघटिकाः साध्याः । एव-मसकृद्यावत् तदन्तरघटिका दृश्यघटिकासमाः स्युः । स्थिरीभूते काले च ग्रहार्कान्तरघटिकानां दृश्यघटिकासमत्वाद्ग्रहस्योदयो वाऽस्त इति । बुध-शुक्रयोर्वक्रिणोस्तयोः स्वभुक्तिकलाश्चालनकला विपरीतमृणधनं कार्यम् । एवं ग्रहे वक्रिणि सति स्वचालनफलमुदयास्तमययोर्विपरीतं धने ऋण-मृणे धनमिति ज्ञेयमिति ।

अत्रोपपत्तिः । 'उक्तेभ्य ऊनाभ्यधिका यदीष्टाः' इत्यादिभास्करवि-धिना स्फुटा ॥ ३३–३४ ॥

इदानीमगस्त्यध्रुवशरभागांस्तदुदयास्तार्कसाधनं चाह ।

विक्षिप्तो दक्षिणतस्तत्क्रान्तेर्भागसप्तसप्तत्या ।
मिथुनस्य सप्तविंशे भागेऽगस्त्यो नतैर्भागैः ॥ ३५ ॥
नक्तेरूनैर्दृश्यो घटिकाद्वितयेन तदुदयविलग्नम् ।
उदयैरधिकं कृत्वा तदुदयसूर्योऽस्तमयलग्नम् ॥ ३६ ॥

षड्भयुतमूनमुदयैः षड्राशियुतं तदस्तमयसूर्यः।
घटिकाद्वितयेनैवं षड्भागयुतेन मृगहर्त्तुः ॥ ३७ ॥

अगस्त्यो मिथुनस्य सप्तविंशे भागे तत्क्रान्त्या स्थानीयक्रान्त्यया- द्भागसप्तसप्तत्या दक्षिणतो विक्षिप्तः। अर्थात् सप्ताशीतिभागा ध्रुवः सप्तसप्तत्यंशा दक्षिणः शरोऽगस्त्यस्य। अयमगस्त्यो नवतेरूनैर्भागैर्नेतैर्दृश्योऽर्थादवाऽगस्त्यस्य खस्वस्तिकाबवतेरल्पा नतभागास्तदैव क्षितिजोपरि स्थितत्वादगस्त्यो दृश्यः। एवं सूर्याद्घटिकाद्वयेनान्तरितोऽगस्त्यो दृश्यो भवति। अर्थादगस्त्यस्य द्वादश कालांशा इति। अथ तदुदयलग्नं घटिकाद्वितयेनोदयैः स्वदेशोदयैरधिकं कृत्वाऽगस्त्यस्योदयसूर्यः साध्यः। उदयलग्नं तात्कालिकमर्कं प्रकल्प्य घटीद्वयमिष्टं च यल्लग्नं भवति सोऽगस्त्यस्योदयसूर्यः। तादृशेऽर्केऽगस्त्यः स्वदेशे उदेतीति। एवं षड्भयुतमस्तलग्नमुदयैः स्वदेशोदयैर्घटिकाद्वयेनोनं कृत्वा तत् षड्राशियुतमगस्त्यस्यास्तसूर्यो भवति। अगस्त्यास्तलग्नं सषड्भं तात्कालिकमर्कं घटीद्वयमिष्टं च प्रकल्प्योत्क्रमविधिना यल्लग्नं तत् षड्राशियुतमस्तसूर्यः स्यादिति। तादृशे सूर्येऽगस्त्योऽस्तमेतीति। एवं षड्भागयुतेन घटिकाद्वितयेन मृगहर्त्तुर्व्याधस्योदयास्तसूर्यौ भवतः। अर्थाद्व्याधस्य चयोदश- कालांशास्तेभ्यस्तदुदयास्तसूर्यसाधनं कार्यम्।

अत्रोपपत्तिः। आचार्योक्तमस्तलग्नं गृहीत्वा 'दृक्कर्मणा पलभवेन तु केवलेन भानां मुनेर्मृगरिपोरुदयास्तलग्ने' इत्यादिभास्करविधिना स्फुटा ज्ञेयेति। एवं मध्याह्ननतांशाः परमाल्पा भवन्ति ते च क्रान्त्यक्षसंस्कारेण भवन्ति। अगस्त्यस्फुटक्रान्तिश्च स्वल्पान्तरात् ७७–२४=५३° दक्षिणा अतो यत्राक्षांशाः ३७ सप्तत्रिंशतोऽधिकास्तत्र मध्यनतांशानां नवतेरधिकत्वादगस्त्यो न दृश्यो भवतीति स्फुटम्।

अत्र टीकायां चतुर्वेदाचार्येण कान्यकुब्जस्य २६°। ३५′ अक्षांशान् विलिख्य कान्यकुब्जेऽगस्त्यमध्यनतांशाः ७९°। ३७′ एते साधिताः। अगस्त्यस्य सूक्ष्मा स्फुटक्रान्तिश्च ५३°। २ दक्षिणाऽऽनीता ॥ ३५–३७ ॥

इदानीं विशेषमाह ।

एवं नक्षत्राणां घटिकाद्वितयेन सत्रिभागेन ।
उदयार्कोऽस्तमयार्काद्यस्योनस्तत् सदा दृश्यम् ॥ ३८ ॥

एवमन्यनक्षत्राणां घटिकाद्वितयेन त्रिभागाधिकेनोदयास्तसूर्यौ साध्यौ । अर्थादन्येषां तारतम्येन चतुर्दशकालांशाः कल्प्याः । यस्यास्तमयार्कादुदयार्क ऊनस्तद्भं सदा दृश्यं भवति । तिग्मांशुसान्निध्यवशेन तस्यास्तो नेति । आचार्योक्तास्तसूर्यः सषड्भो वा विभार्धो भास्करास्तमयसूर्यो भवति तेन 'यस्योदयार्कादधिकोऽस्तभानुः प्रजायते सौम्यशरातिदैर्घ्यात्' इत्यादि भास्करोक्तमेतदनुरूपमेव ।

अत्रोपपत्तिः । नक्षत्रबिम्बोदये उदयलग्नं तदुदयाद्दृश्यघटिकानन्तरमुदयसूर्योदयः । एवमाचार्योक्तास्तसूर्योस्तानन्तरं दृश्यघटीमिते काले नक्षत्रास्तलग्नस्यास्तमयः । कल्प्यते भोदयलग्नोदयानन्तरं द्विगुणदृश्यघटीतोऽधिके काले सषड्भास्तलग्नोदयः । रविश्च भोदयलग्नोदयार्कमध्ये किल वर्तते । तदा प्राक्क्षितिजे नक्षत्रोदयानन्तरं दृश्यघटीतोऽल्पेन कालेनार्कोदयात् प्राक्क्षितिजे नक्षत्रदर्शनाभावः । भबिम्बोदयानन्तरं दृश्यघटीमितेन कालेन तदुदयार्कचिह्नस्योदयः सषड्भास्तलग्नोदयात् प्राग् दृश्यघटीमितेन कालेन सषड्भास्तसूर्यचिह्नस्योदयोऽत उदयार्कात् सषड्भार्कोऽधिकस्तथाऽऽचार्योक्तास्तसूर्यश्चोदयार्कादल्प इति स्थितिः । अस्यां स्थितौ प्राक्क्षितिजे दर्शनाभावः परन्तु पश्चिमक्षितिजे सूर्यास्तानन्तरमुदयसूर्यचिह्नस्य ततोऽस्तसूर्यचिह्नस्य ततोऽस्तलग्नस्यार्थाद्भबिम्बस्यास्तमयः । अतः पश्चिमक्षितिजे नक्षत्रबिम्बदर्शनं भवति । एवं यदि पश्चिमक्षितिजे नक्षत्रास्तसूर्यास्तलग्नमध्ये सूर्यस्य स्थितत्वाद्भबिम्बदर्शनाभावस्तदा तस्मिन्नेव दिने प्राक्क्षितिजे रात्रिशेषे भबिम्बदर्शनं भवति । अत एतादृशस्थितौ रविसान्निध्यवशेन भबिम्बादृश्यत्वं नेति सुधीभिः सम्यग्विचार्यम् । अनेन भास्करोक्तमपि स्पष्टमुपपद्यते ॥ ३८ ॥

अत एवाह मदीयो विशेषः ।

यस्योदयार्कादधिकोऽस्तभानुरित्यत्र वक्ष्ये बहुधा विशेषम् ।

Digitized by Google

यद्गूढतां दूरत एव बुद्ध्वा बुधाः पलायन्त अहो नवीनाः ॥
धिष्ण्योदयाख्यारिभभास्तकाख्यलग्ने तु हत्वेनविलग्नमाने ।
य इष्टकालो दलितः स चेत् स्याद्गुणेष्टघट्येव समः सदोदयः ॥
स एव कालोऽधिक इष्टघट्या यदा तदाऽप्यत्र सदोदयः स्यात् ।
न्यूनो न नूनं हि सदोदयः स्याद्धिष्ण्यस्य साविध्रुवशात् शरांशैः ॥
यद्बोदयाख्यस्य विलग्नकस्य चरं स्फुटक्रान्तिचरं च साध्यम् ।
धिष्ण्यस्य चेत् तद्विधुतिः समाना निजेष्टघट्याऽस्य सदोदयः स्यात् ॥

इदानीं कदा नक्षत्रबिम्बं दृश्यत इत्याह ।

उदयास्तसूर्ययोरन्तरे रवौ दृश्यतेऽन्यथाऽस्तमितम् ।
ऊनाधिका रविकला रविभुक्त्या भाजिता दिवसाः ॥ ३९ ॥

नक्षत्रोदयास्तसूर्ययोरन्तरे रवौ सति नक्षत्रबिम्बं क्षितिजोपरि-स्थितत्वाद्दृश्यते । अन्यथाऽस्तमितं गतम् । अत्रोदयार्कादस्तार्काद्वा तात्कालिकरविकला ऊनाधिका रविभुक्त्या भाजितास्तदेष्या गता वा दिवसा भवन्ति ।

अत्रोपपत्तिः । 'अत्राधिकोनकलिका रविभुक्तिभक्ता' इत्यादिभा-स्करविधिना स्फुटा ॥ ३९ ॥

इदानीं लुब्धकस्य ध्रुवशरांशानाह ।

षड्विंशे मिथुनांशेऽंशकचत्वारिंशता मृगव्याधः ।
तत्क्रान्तेर्दक्षिणतो विक्षिप्तोऽगस्त्यवच्छेषम् ॥ ४० ॥

शेषमुदयास्तार्कसाधनमगस्त्यवत् । शेषं स्पष्टार्थम् ॥ ४० ॥

इदानीमयासाधनमाह ।

गुणिता व्यासार्धेन स्वक्रान्तिज्यावलम्बकहृताऽग्रा ।
प्रतिदिनमुदयास्तमयावग्राग्रे भग्रहमुनीनाम् ॥ ४१ ॥

स्वक्रान्तिज्या व्यासार्धेन त्रिज्यया हताऽवलम्बकेन लम्बज्यया हृताऽग्रा भवति । भग्रहमुनीनां प्रतिदिनमग्राग्रे उदयास्तमयौ भवतः ।

अत्रोपपत्तिः । लम्बज्याकोट्या त्रिज्याकर्णस्तदा क्रान्तिज्याकोट्या

क इति ज्ञाताऽग्रा । अग्रायेर्योगोऽर्धं सूत्रमुदयास्तसूत्रमुच्यते ततस्तदग्रे भस्य ग्रहाग्रामगस्त्यस्य चोदयास्तौ—इति सर्वं स्फुटम् ॥ ४१ ॥

इदानीं भुजसाधनमाह ।

अग्राशङ्कुतलैक्यं तुल्यदिशोरन्तरं तथाऽन्यदिशोः ।
प्राच्यपरायाः शङ्कोस्तलं तदग्रे ग्रहो भं च ॥ ४२ ॥

तुल्यदिशोरग्राशङ्कुतलयोरैक्यं तथाऽन्यदिशोरन्तरं प्राच्यपरायाः पूर्वापरतः शङ्कोस्तलं शङ्कोर्मूलपर्यन्तं स्यात् । तदग्रे शङ्क्वग्रे ग्रहो वा भं च भवति ।

अत्रोपपत्तिः । शङ्कुमूलप्राच्यपरान्तरं भुजसाधनं सिद्धान्तयुक्त्या स्फुटम् । शङ्क्वग्रे ग्रहो भवतीति स्पष्टम् ॥ ४२ ॥

इदानीं पूर्वापरकोटिसाधनमाह ।

शङ्कुतलप्राच्यपरान्तरं भुजो दक्षिणोत्तरं कर्णः ।
दृग्ज्या तद्वर्गान्तरमूलं दिङ्मध्यतः कोटिः ॥ ४३ ॥

स्पष्टार्थमुपपत्तिश्च ज्ञात्यद्येचतः स्फुटा ॥ ४३ ॥

इदानीं भग्रहयुतिदर्शनविधिमाह ।

ऊनाधिकशङ्कुगुणा स्वशङ्कुभक्ता पृथक् स्वदृग्ज्याग्रे ।
कृत्वोनाधिकशङ्कू दृष्टिं कृत्वोनशङ्क्वग्रे ॥ ४४ ॥
प्रतिघटिकमधिकशङ्कोर्ग्रहमध्ये दर्शयेच्च भानि ।
त्रिप्रश्नोक्त्या रविवत् शङ्कुभ्रमणादिकमशेषम् ॥ ४५ ॥

भग्रहयुतिकाले यस्योना पूर्वसाधिता कोटिः साऽधिककोटेः शङ्कुना गुणा स्वशङ्कुना भक्ता फलमधिककोटेः कोटिर्भवति । अथ पृथक् पृथक् स्वदृग्ज्याग्रे ऊनाधिकशङ्कू कृत्वा ऊनशङ्क्वग्रे दृष्टिं च कृत्वाऽधिकशङ्कोर्ग्रहमध्ये प्रतिघटिकं भानि दर्शयेत् । अर्थादधिकशङ्क्वग्रे ग्रहबिम्बकेन्द्रं प्रकल्प्य तद्बिम्बं विलेख्यम् । तन्मध्ये युतिकाले गणको लोकस्य नरपतेश्च विनोदाय भानि दर्शयेत् । भानामशेषं सर्वं शङ्कुभ्रमणादिकं च त्रिप्रश्नोक्त्या रविवत् साध्यम् ।

अत्रोपपत्तिः । भग्रहयुतिकाले दृष्टिस्थानाद्ग्रहकेन्द्रोपरिगतं सूत्रं भबिम्बोपरिगतं भवति । अतस्तदा तयोर्नतांशसाम्यात् स्वस्वगोलीयानि भुजकोटिदृग्ज्याशङ्कुयोजनानि मिथः सजातीयानि । अत एकस्य कोटिरपरशङ्कुना गुणा स्वशङ्कुभक्ताऽपरकोटिर्भवति । ततः परिलेखरचना च सजातीयक्षेत्रत्वात् स्फुटा । अन्यत् सर्वं च प्रसिद्धम् ।

अत्राभीष्टाङ्केन ग्रहकर्णं भकर्णं चापवर्त्य सुखार्थं तद्व्यासार्धेन ग्रहगोलस्य भगोलस्य च रचनां कृत्वा स्वस्वगोलीयं दृग्ज्यादिकं विरचय्य भग्रहयुतिं प्रदर्शयेदित्यनुक्तमपि बुद्धिमता ज्ञायते ॥ ४४–४५ ॥

इदानीं लघुशङ्कुभुजतः क्रान्तिसाधनमाह ।

शङ्कुप्राच्यपरान्तरविषुवच्छायैक्यमुत्तरे नृतले ।
याम्येऽन्तरं गुणहृतं स्वक्रान्तिर्लम्बकर्णाभ्याम् ॥ ४६ ॥

पूर्वापररेखात उत्तरे नृतले शङ्कुतलेऽर्थादुत्तरे भुजे शङ्कुप्राच्यपरान्तरपलभयोरैक्यं कार्यं याम्ये भुजेऽन्तरं कार्यमेवं कर्णवृत्ताग्रा त्रिप्रश्नाधिकारे साधितैव। तदैक्यं वाऽन्तरं लम्बकर्णाभ्यां गुणाहृतमर्थात् पूर्वागता कर्णवृत्ताग्रा लम्बेन लम्बज्यया गुणा कर्णेनेष्टभाकर्णेन हृता भस्य स्वक्रान्तिर्बिम्बीयस्पष्टापमज्या भवति ।

अत्रोपपत्तिः । त्रिप्रश्नोक्त्या स्फुटा ॥ ४६ ॥

इदानीं नक्षत्रशरानयनमाह ।

तच्चापांशाः सदृशैर्भध्रुवकापक्रमांशकैरूनाः ।
विक्षेपांशा व्यस्ता व्यस्तविशुद्धा विसदृशांशैः ॥ ४७ ॥
सहिता विक्षेपांशास्तच्चापांशकवशादुदग्याम्याः ।
एवं विक्षेपांशैस्तत्क्रान्त्यंशा ध्रुवो रविवत् ॥ ४८ ॥

तच्चापांशाः पूर्वसाधितबिम्बीयस्पष्टापमज्याचापांशाः स्पष्टक्रान्त्यंशा इत्यर्थः । सदृशैरेकजातीयैर्भध्रुवकापक्रमांशैर्हीना भस्य विक्षेपांशाः स्पष्टक्रान्तिदिक्का भवन्ति । व्यस्तविशुद्धा विक्षेपांशा व्यस्ता व्यस्तदिक्का

भवन्ति । अथोत्क्रान्ति स्पष्टक्रान्त्यंशा एव शोधने ध्रुवक्रान्तिभागेभ्यो विशुद्धा भवन्ति तदा विक्षेपांशाः स्पष्टक्रान्तिभिन्नदिक्का ज्ञेयाः । यदि भध्रुवक्रान्तिभागा भिन्नदिक्का विजातीयास्तदा विसदृशांशैर्ध्रुवापमभागैः सहितास्ते स्पष्टापमांशास्तच्चापांशकवशात् स्पष्टापमदिग्वशादुदग्याम्या विक्षेपांशा भवन्ति । एवं व्यस्तविधिना स्पष्टापमज्ञाने विक्षेपांशैस्त-त्क्रान्त्यंशा भस्य स्थानापमभागा भवन्ति । तेभ्यो रविवत् 'जिनज्यया विज्या तदा क्रान्तिज्यया किम्'इत्यनुपातादिना भस्य ध्रुवो भवतीति ।

अत्रोपपत्तिः । गोलसंस्थानतः स्फुटा ॥ ४७–४८ ॥

इदानीं युतिलक्षणमाह ।

ऊने मानैक्यार्धाद्ग्रहयोर्मध्यान्तरे युतिर्ग्रहयोः ।
समलिप्तिकयोर्ग्रहणवदधिके स्फुटमानयोगार्धात् ॥ ४९ ॥

'मानैक्यार्धादधिके' इति ग्रहसमागमोक्तेन स्फुटा व्याख्योपप-त्तिश्च ॥ ४९ ॥

इदानीं समलिप्तिककाले ग्रहयोर्दिनगतघटीसाधनमाह ।

समलिप्तकालिकार्कात्
कृत्वा लग्नं स्वदेशराश्युदयैः ।
ग्रहयोः समलिप्तिकयोः
स्वदिनोदितनाडिकाः प्राग्वत् ॥ ५० ॥

अत्रैवाध्याये प्रागुदयलग्नमूर्नमित्यादिनाऽऽचार्योक्तेन व्याख्योपप-त्तिश्च स्फुटा ॥ ५० ॥

इदानीं स्फुटयुतिकालसाधनमाह ।

अधिकदिनोदितघटिका-
भिरूनदिननाडिका गुणा भक्ताः ।
अधिकदिननाडिकाभिः
फलनाड्यो यदि भवन्त्यूनाः ॥ ५१ ॥
ऊनदिवसोदिताभ्यो घटिकाभ्यः प्रागथाधिकाः पश्चात् ।

Digitized by Google

योगस्तद्घटिकान्तरमाद्यं कृत्वेष्टघटिकाभिः ॥ ५२ ॥
गुणिताः स्वभुक्तिलिप्ताः षष्टिहृताः प्रागृणं धनं पश्चात् ।
आद्यवदन्तरमन्यं प्राक् पश्चाद्वाऽन्तरह्रितयम् ॥ ५३ ॥
घद्याद्यान्यान्तरयोरन्तरहृतमन्यथा तदैक्येन ।
आद्यान्तरमिष्टाभिर्घटिकाभिर्गुणितमाप्ताभिः ॥ ५४ ॥
घटिकाभिराद्यवशतः प्राक् पश्चाद्वा युतिः प्रथमकालात् ।
कृत्वा पृथग्दिनोदितघटिकास्तात्कालिकग्रहयोः ॥ ५५ ॥

उदितघटिका यदि हृता
गुणिताश्च स्वान्यदिवसघटिकाभिः ।
अन्योदितघटिकाभि-
स्तुल्या योगो न चेदसकृत् ॥ ५६ ॥

उदितघटिकाः स्वदिवसघटिकाभिर्हृता अन्यदिवसघटिकाभिर्गुणाः । शेषं ग्रहसमागमाध्यायोक्तेन 'ऊनदिनोदितगुणितादित्यादिना' स्पष्टार्थम् । इहाऽऽचार्येण साधनात्पूर्वमूनदिनोदितस्थानेऽधिकदिनोदितग्रहयं कृतमित्येव विशेषः ॥ ५१-५६ ॥

इदानीमेकस्थितया दृष्ट्या समागमे ग्रहदर्शनार्थमाह ।

अन्येष्टनाडिकाभिः कृत्वा तुल्या यदा तदा योगः ।
कार्यौ श्रृङ्गोन्नतिवद् ग्रहयोर्मध्यान्तरे योगे ॥ ५७ ॥
बाहू संयोगान्तरमग्राशङ्कग्रयोः समान्यदिशोः ।
कर्णौ दृग्ज्ये कोटी स्वकर्णभुजकृतिवियोगपदे ॥ ५८ ॥
कोटिभुजकर्णशङ्कून् यष्टिगुणान् व्यासदलहृतान्मध्यात् ।
कोटी पृथक् प्रसार्ये प्राच्यां प्राणपरयोः पश्चात् ॥ ५९ ॥
कोट्यग्राभ्यां बाहू कर्णौ दिङ्मध्यतो भुजाग्रान्तौ ।
बाह्वग्रयोः स्वशङ्कू यष्टीमध्यात् तदग्रान्ते ॥ ६० ॥
दिङ्मध्यस्थितदृष्ट्या पृथग्ग्रहौ दर्शयेत् स्वशङ्क्वग्रे ।
योगेऽग्राङ्क्वग्रान्तरमन्तरमेवान्यदा हि तयोः ॥ ६१ ॥

भुजकोटिकर्णानां षष्ठिव्यासार्धे परिणामनार्थं तान् षष्टिगुणान् व्यासार्धहृतान् गणकः कुर्यात् । एवं ग्रहयोर्योगे तयोरशङ्क्वन्तरं भवेदर्थात् शङ्क्वन्तराभावः शङ्कुभुजादीनां च समत्वात् । अन्यदा तयोः शङ्क्वन्तरं भवेदेव । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । गोलयुक्त्या भुजकोटिकर्णशङ्कुसंस्थानवशतः स्फुटा शङ्कुच्छायाध्याये चापीदृशी युक्तिराचार्येण प्रतिपादिता ॥ ५७-६१ ॥

इदानीमात्मगणितस्य प्रशंसामाह ।

नाचार्यो ज्ञातैरपि तन्त्रैरार्यभटविष्णुचन्द्राद्यैः ।
यो ग्राम्यधूलिकर्मविदाचार्यत्वं भवति तस्य ॥ ६२ ॥

आर्यभटविष्णुचन्द्राद्यैस्तन्त्रैर्ज्ञातैरपि गणको ज्योतिषशास्त्रे चार्यो न भवति । यो गणको ग्राम्यधूलिकर्मविद्ग्रस्तोकगणितवेत्ता तस्यैवाऽऽचार्यत्वं भवतीति स्फुटोऽर्थः ॥ ६२ ॥

इदानीं ग्रहगतिज्ञस्य फलं प्रदर्शयति ।

रविशशितमस्त्रिचरितं ब्रह्मोक्तं पुण्यमद्भुतं ज्ञात्वा ।
रविचन्द्रराहुलोकान् प्राप्नोति पुमानिह यशश्च ॥ ६३ ॥

रवेः शशिनस्तमसो राहोरिति त्रिचरितम् । शेषं स्पष्टार्थम् ॥ ६३ ॥

इदानीमन्यमतेनाप्यदृष्टफलमाह ।

अन्यैरप्युक्तमिदं योऽमुं सम्यग्ग्रहं विजानाति ।
याति स हि ग्रहलोकं ग्रहाष्टकज्ञः परं ब्रह्म ॥ ६४ ॥

अन्यैराचार्यैरपीदमुक्तमदृष्टफलम् । ग्रहाष्टकज्ञोऽष्टग्रहाणां रविचन्द्रकुजबुधगुरुशुक्रशनितमसां गतिज्ञः ।

तथा च भगवान् गर्गः ।

न संवत्सरपाठी च नरकेषूपपद्यते ।
ब्रह्मलोकप्रतिष्ठां च लभते दैवचिन्तकः ॥ इति ॥ ६४ ॥

* याति च तद्ब्रह्मलोकम्—इति पाठान्तरम् ।

Digitized by Google

इदानीमध्यायनाम ग्रन्थसंख्यां चाह ।

मध्यगतिस्पष्टगतित्रिप्रश्नाश्चन्द्रभास्करग्रहणे ।
उदयास्तमयौ प्रतिघटिकमिन्दुशृङ्गोन्नतिच्छाये ॥ ६५ ॥
ग्रहयोगो भग्रहयुतिरार्यास्त्रिशती युताऽष्टसप्तत्या ।
अध्यायैर्दशभिर्धूलिकर्म दोषैर्विना ब्राह्मे ॥ ६६ ॥

ब्राह्मे सिद्धान्ते दशभिरध्यायैर्यद् धूलिकर्म गणितं तद्दोषैर्विनाऽस्तीति । शेषं स्पष्टार्थम् ॥

अत्र चतुर्वेदाचार्यः । 'यदि नामार्यााणां त्रीणि शतानि पञ्चसप्ततियुतानि अस्माभिर्व्याख्यातानि दशसु मध्यगत्याद्येष्वध्यायेषु परास्तिसोऽन्यार्या न पूर्यन्तेऽत्र शृङ्गोन्नत्यध्याये के चिद्विंशतिमार्याणां पठन्ति तथा समागमे षड्विंशतिं तथा च संख्या पूर्यते । बलभद्रस्यायं पाठः 'आर्यास्त्रिशती युताष्टसप्तत्या'—इति ॥

एतेन ब्रह्मसिद्धान्तोपरि बलभद्रस्यापि टीका वर्तत इत्यनुमीयते ।

अत्रोपलब्धपुस्तकानुसारेण ।

मध्यमाध्याये	= ६३
स्पष्टाध्याये	= ६७ (योगसाधनश्लोकं हित्वा)
त्रिप्रश्ने	= ६६
चन्द्रग्रहणे	= २०
सूर्यग्रहणे	= २७
उदयास्तयोः	= १३
शृङ्गोन्नतौ	= १८
चन्द्रच्छायाधिकारे	= ९
ग्रहयुत्यधिकारे	= २६ (मद्विरचितमध्यबिम्बकलापाठश्लोकं गृहीत्वा)
भग्रहयुतौ	= ६६ (उपरिलिखितार्यापर्यन्तम्)
आर्यायुतिः	= ३७५

उपरिलिखिताध्यायश्लोकसंख्याऽध्यायोपसंहारश्लोकसंख्यासहि-

Digitized by Google

व्यक्तौ प्रोक्षणादीनामप्रसङ्गादसम्बन्धात् गां प्रोक्षयेदित्यादिविधिप्राप्तप्रोक्षणादिप्रसङ्गादिति यावत् । व्यक्तिराकृतिर्वा न शक्या किं तु जातिरेव मृद्गवके तादृशजातिविरहान्न दोष इति भावः ॥ ६२ ॥

जातिशक्तिं निराकरोति ।

नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेश्च(१) ॥ ६३ ॥

न जातिमात्रं पदार्थः । जात्यभिव्यक्तेर्जातिशाब्दबोधस्य । आकृतिव्यक्त्यपेक्षत्वादाकृतिव्यक्तिविषयकत्वनियमात् । तथा च जातिमात्रस्य पदार्थत्वे तन्मात्रतात्पर्येण गौर्नित्येत्यादिप्रयोगः स्यात् गौर्गच्छतीत्यादिमुख्यप्रयोगोऽपि न स्यात् । न च गोपदधर्मिकशक्तिसंसर्गकगोत्वप्रकारकं ज्ञानं गोत्वप्रकारेण गोः स्मरणे तादृशशाब्दबोधे च हेतुरिति नाप्रसङ्गातिप्रसङ्गाविति वाच्यम् । तद्विषयकशाब्दबोधे तदंशे वृत्तिज्ञानस्यापेक्षितत्वादन्यथा लक्षणामात्रोच्छेदापत्तेः गङ्गाप्रवाहादौ गङ्गापदशक्तिग्रहस्येव गङ्गाप्रवाहस्येव तीरस्यापि शाब्दबोधहेतुत्वोपगमस्यापि सम्भवात् । तात्पर्यज्ञानादिकमेव तयोः कालभेदनियामकम् । न च प्रवाहे शक्तिरूपसम्बन्धज्ञानं कथं तीरस्मारकं स्यादिति वाच्यम् । तथा सति गोत्वशक्तिज्ञानस्यापि गोस्मारकत्वानुपपत्तेः । न च गोत्वशक्तिज्ञानं परम्परासम्बन्धेन कर्मत्वादौ गोत्वशाब्दबोधजनकमनन्तरं च परम्परासम्बन्धेन गोत्वहेतुनैव गवादिव्यक्त्यनुमानमिति वाच्यम् । तादृशानुमानं विनापि गोपदश्रवणानन्तरं गोबोधस्यानु-

(१) चकाररहितः सूत्रपाठोऽन्यत्र । एतच्चाव्यामान्ते इति सूत्रार्थ इति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

भविकत्वाद् गोत्वत्वेनोपस्थित्यनियमेन तेनानुमानासम्भवाच्च। न च गोत्वत्वावच्छिन्न एव शक्तिरिति तद्ग्रहे नियतगोत्वत्वोपस्थितिरिति वाच्यम्। गोत्वत्वेन शक्तिस्वीकारे तदपेक्ष्य लाघवात् स्वरूपतो गोत्वविशिष्टे शक्तिस्वीकारस्योचितत्वादिति दिक्॥ ६३॥

सिद्धान्तमाह।

जात्याकृतिव्यक्तयस्तु पदार्थः(१) ॥ ६४ ॥

पदार्थ इत्येकवचनमेकशक्तिसूचनाय। एकवचनार्थस्यैकत्वस्य शक्तिरूपपदार्थत्वेऽन्वयात्। जातौ शक्तिस्वीकारो गवादिपदानां मुख्यप्रयोगे गोत्वादिना गवादेः शाब्दबोधो न तु द्रव्यत्वादिनेतिनियमाय। आकृतौ शक्तिस्तु तादृप्येण बोधस्यानुभविकत्वात्। न चेश्वरेच्छाविषयत्वरूपशक्तेर्विषयभेदविभिन्नतया कथमेका शक्तिस्त्रिष्विति वाच्यम्। गौर्गोपदजन्यबोधविषयो भवत्वितीश्वरेच्छाविषयता गोपदशक्तिस्तत्र बोधविषयता स्वरूपसम्बन्धेन व्यक्तौ भासते समवायसम्बन्धावच्छिन्नावच्छेदकतासम्बन्धेन जातौ भासते विशिष्टाधिकरणकवैशिष्ट्यबोध इव तादृशेच्छायां विशेष्यतावच्छेदके विधेयस्य भानस्वीकारात्। एवं च तादृशबोधविषयत्वप्रकारतानिरूपितविशेष्यतात्मकशक्तिस्त्रिष्वेव तादृशविशेष्यतानां मिथो भिन्नत्वेऽपि तादृशबोधविषयताप्रकारतानिरूपितविशेष्यत्वत्वेनानुगमादैक्योक्तिः। एवं यत्र तादृशबोधविषयता स्वरूपसम्बन्धेन इच्छायां भासते तस्य विशेष्यतया

(१) सिद्धान्तसूत्रम्। व्यक्त्याकृतिजातयस्तु पदार्थ इति न्यायतत्त्वालोके वाचस्पतिमिश्राः। तस्मात् साधु धारमवं सूत्रं व्यक्त्याकृतिजातयस्तु पदार्थ इतीति तात्पर्यटीका। एवमन्यत्रापि व्यक्त्याकृतीत्यादिपाठक्रमो दृश्यते।

Digitized by Google

शाब्दबोधे भानं यत्र च यादृशसम्बन्धावच्छिन्नावच्छेदकतासम्बन्धेन भासते तस्य तादृशसम्बन्धेन तत्र भानमिति नियमस्तेन जात्यादेर्न स्वातन्त्र्येण विशेष्यविधया वा भानम् । अत एव जात्याकृतिविशिष्टे गवादिपदानां शक्तिरिति व्यवह्रियते । तद्विशिष्टे शक्तिरित्यनेन तदंशे अवच्छेदकतासम्बन्धेन विशेषणतापन्नबोधविषयताप्रकारतानिरूपितविशेष्यताया बोधनात् विशिष्टशक्तिज्ञानमेव शाब्दबोधहेतुरिति विशेषणं परित्यज्य केवलविशेष्ये शक्तिज्ञानान्न व्यक्तिशाब्दबोध इति । इदं च गवादिपदाभिप्रायेण तत्रैवाशङ्कनात् तेन पश्वादिपदस्थले पशुत्वाद्युपाधिविशिष्टे शक्तिः । गुणादिपदस्थले गुणत्वादिजातिविशिष्ट एव शक्तिस्तत्राकृतिविरहादिति दिक् ॥ ६४ ॥

व्यक्तेर्विशेष्यतया मुख्यत्वेन प्रथमत एव तत्र जिज्ञासोदयात् तां लक्षयति ।

व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिः(१) ॥ ६५ ॥

गुणविशेषो धर्मविशेषो जातिरिति यावत् । तदाश्रयत्वं समवायेन । मूर्त्तिः स्वाश्रयसमवेतत्वसम्बन्धेनाकृतिविशिष्ट इत्यर्थः । न च निरुक्तसम्बन्धेनाकृतिमत्त्वमेवास्तु किं जात्याश्रयत्वविशेषणेनेति वाच्यम् । प्रत्येकं लक्षणद्वये तात्पर्यात् । न च जात्याश्रयत्वरूपलक्षणमात्मादावतिव्याप्तं तस्याकृतिविरहेण निरुक्तत्रितयात्मकपदार्थव्यक्तित्वाभावादलक्ष्यत्वादिति वाच्यम् । गुणविशेषपदेनावच्छिन्नपरिमाणस्य नित्यावृत्तिजातेर्वा उक्तत्वात् । अथवा गुणविशेषाश्रयो व्यक्तिर्मूर्त्तिश्चेत्यर्थः । तथा च निरुक्तगुणविशेषाश्रयत्वं

(१) व्यक्तिलक्षणप्रतिपादनार्थं व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिरिति सूत्रमिति वार्त्तिकम् । व्यक्तिलक्षणाय सूत्रं व्यक्तिरित्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

लक्षणम् । व्यक्तिपदमूर्त्तिपदयोः पर्यायतेति भावः । इदं च गवादिपदशक्यव्यक्तिलक्षणम् । व्यक्तिपदप्रवृत्तिनिमित्तं च ज्ञेयत्वं पदार्थमात्र एव व्यक्तिपदप्रयोगात् । प्रमेयत्वं तु न तथा तस्य ज्ञेयत्वापेक्षया गुरुत्वात् । वस्तुतो गुणविशेषाश्रयो मूर्त्तिरित्येकं लक्षणम् । आत्मादिवारणाय मूर्त्तिपदम् । द्व्यणुकपदाद् द्व्यणुकादेराकृतिपुरस्कारेण बोधस्य नियमात् तत्रातिव्याप्तिवारणाय गुणविशेषाश्रयत्वम् । तदर्थस्तु महत्त्वाश्रयत्वं लौकिकप्रत्यक्षविषयत्वं वेति । आकृतेर्विशेषणविधया पदशक्यत्वे ऽपि न प्रवृत्तिनिमित्तत्वं किं तु जातेरेव शक्यत्वे सति शक्यवृत्तित्वे सति शक्योपस्थितिप्रकारत्वमिति प्रवृत्तिनिमित्तलक्षणात् । द्रव्यत्वादेर्गवादिपदप्रवृत्तिनिमित्ततावारणाय शक्यत्वे सतीति । आकृतिवारणाय शक्यवृत्तित्वे सतीति । दध्यादेः समवायसम्बन्धेन दधिवृत्तितया दध्यादिपदप्रवृत्तिनिमित्ततावारणाय विशेष्यदलमिति ॥ ६५ ॥

विपरीतक्रमलब्धामाकृतिं लक्षयति ।

आकृतिर्जातिलिङ्गाख्या(१) ॥ ६६ ॥

जातेर्लिङ्गं व्यञ्जकं तदेवाख्या यस्याः सा । आकृतिश्च स्वसमवायिसमवेतत्वलक्षणपरम्परासम्बन्धेन गवाद्यवयवसंस्थानरूपाकृतिप्रकारकज्ञानस्य गोत्वादिप्रत्यक्षहेतुत्वादिति भावः । केचित्तु जातिर्द्रव्यासमवायिकारणतावच्छेदिका जातिलिङ्गं धर्मो यस्याः सेत्यर्थ इत्याहुः ॥ ६६ ॥

जातिं लक्षयति ।

समानप्रसवात्मिका जातिः(२) ॥ ६७ ॥

---

(१) न्यायसूचीनिबन्धे दर्शनेन न्यायतत्त्वालोके व्याख्यातत्वेन आकृ-ख्या इति तात्पर्यटीकालंकारदर्शनेन चेदं सूत्रमिति प्रतीयते ।

(२) जातिलक्षणाय सूत्रम् । समानप्रसवात्मिका जातिरिति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

प्रसवो लौकिकप्रत्यक्षात्मकं ज्ञानम् । समानमेकाकाराकलनं धर्मिविषयकं तादृशज्ञानं यस्मात् तादृश आत्मा स्वरूपं यस्याः सेत्यर्थः । तादृशज्ञाने लौकिकप्रत्यक्षरूपे विषयविधया जातेर्हेतुत्वसम्भवादिति भावः । एतेन तादृशजातौ प्रत्यक्षं प्रमाणं दर्शितम् । एवं च लौकिकप्रत्यक्षविषयमात्रसमवेतत्वं गोत्वादिजातिलक्षणम् । जातिसामान्यलक्षणं तु नित्यानेकसमवेतत्वमिति ॥ ६७ ॥

समाप्तं शब्दशक्तिपरीक्षाप्रकरणम् ॥

इति द्वितीयाध्यायस्य विभागपरीक्षाद्वारकसाङ्गप्रमाणपरीक्षणं द्वितीयमाह्निकम् ॥

इति द्वितीयोऽध्यायः ॥

इति द्वितीयाध्यायविवरणं समाप्तम् ॥

Digitized by Google

न्यायसूत्रविवरणे

तृतीयोऽध्यायः ।

सपरिकरं प्रमाणं निरूप्य क्रमप्राप्तं प्रमेयं यथाविभागं परीक्षणीयमिति प्रथमत आत्मानं चैतन्याश्रयत्वेन परीक्षयति ।

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्[१] ॥ १ ॥

दर्शनस्पर्शनाभ्यां चाक्षुषस्पार्शनज्ञानप्रकारेण । एकस्यैवार्थस्य वस्तुनो ग्रहणात् प्रत्यक्षात् । योऽहं घटं स्पृशामि सोऽहं घटमद्राक्षमितिप्रत्यक्षेणेन्द्रियव्यतिरिक्त आत्मा गृह्यते । इन्द्रियाणां चैतन्यस्वीकारे चक्षुरिन्द्रियस्य चाक्षुषवत्त्वं त्वचः स्पार्शनवत्त्वं स्वीकार्यम् । अन्यथोपहतनयनस्य स्पार्शनं कुष्ठादिरोगोपहतत्वचश्चाक्षुषं न स्यात् । एवं चैकस्य चाक्षुषस्पार्शनवत्त्वानुभवेन नेन्द्रियाणां तद्वत्त्वं सम्भवतीत्यतिरिक्त एक आत्मा सिध्यतीति भावः ॥ १ ॥

अत्र पूर्वपक्षमाह ।

न विषयव्यवस्थानात्[२] ॥ २ ॥

इन्द्रियस्य न चैतन्यविरहः । विषयव्यवस्थानात् विषयस्य चाक्षुषादिमत्त्वेनानुभूयमानस्य भेदात् । आत्मपदस्य

---

(१) एतत्सूत्रव्याख्यानावसरे यच्च मन्यसे यावेतौ दर्शनस्पर्शनप्रत्ययौ तौ घटादिविषयौ न व्यतिरेकमात्मनो व्यधिकरणत्वाद् गमयत इति । न सूत्रार्थापरिज्ञानात् । दर्शनस्पर्शनप्रत्ययावेककर्तृकाविति सूत्रार्थ इति भावस्य भविष्यपेक्षत्वाद्धेति सूत्रार्थ इति च वार्त्तिकम् । सिद्धान्तसूत्रं दर्शनेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः । दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्यनेन हि सूत्रेणेति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः ।

(२) पूर्वपक्षसूत्रम् । न वि–त् । इति तात्पर्यटीका ।

नानार्थकत्वमिष्टमेव । योऽहं स्पृशामि सोऽहमद्राक्षमित्यादिप्रत्यक्षं तु गौरोऽहमित्यादिवद्भ्रम एवेति भावः ॥ २ ॥

समाधत्ते ।

तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेधः(१) ॥ ३ ॥

तद्व्यवस्थानादेव दर्शनस्पर्शनयोराश्रयभेदादेव इन्द्रियभेदादेवेति वा । आत्मसद्भावादतिरिक्तात्मस्वीकारावश्यकत्वादिन्द्रियाणां चैतन्यविरहप्रतिषेधो नेत्यर्थः । चक्षुरादौ प्रत्येकं विनिगमनाविरहेणानुमित्यादिस्वीकारासम्भवः । न च चक्षुरादेरनित्यत्वेन तद्विनाशे ऽप्यनुमित्याद्युत्पादात् श्रवणेन्द्रिय एव तत्स्वीकार इति वाच्यम् । श्रवणेन्द्रियस्याकाशस्य कर्णशष्कुल्यवच्छिन्नस्यैव तथात्वं वाच्यमन्यथा विनिगमनाविरहेण कालादावपि चैतन्यापत्तेरिति कर्णशष्कुल्युपघाते ऽनुमित्यनुत्पादापत्तेरिति भावः । अन्ये तु दर्शनस्पर्शनाभ्यामेकस्यार्थस्य विषयस्य ग्रहणात् । तथा च घटादिप्रत्यक्षं विनिगमनाविरहेण चक्षुस्त्वचोर्वक्तुमशक्यमित्यतिरिक्त आत्मा सिध्यति । श्रवणादीनां विषयभेदसत्त्वादेव दर्शनस्पर्शनमात्रोक्तिः । शङ्कते । न विषयव्यवस्थानात् । विनिगमनाविरहेण चक्षुस्त्वचोर्न चैतन्यस्वीकारो विषयव्यवस्थानात् चक्षुस्त्वचोरपि रूपस्पर्शयोर्विषययोर्भेदात् । एवं च रूपं पश्यामि न स्पृशामीत्यनुभवेन चाक्षुषात्मकविजातीयज्ञानस्य स्पर्शं स्पृशामि न पश्यामीतिप्रतीत्या स्पार्शनात्मकविजातीयज्ञानस्य च सिद्धौ चक्षुषि चाक्षुषस्य त्वचि त्वाचस्य स्वीकारेण न वि-

(१) विपर्ययसाधकत्वज्ञापनार्थं च तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेध इति सूत्रमिति वार्त्तिकम् । शेषे त्वयं सूत्रं तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेध इति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः ।

निगमनाविरह इति भावः। इदमुपलक्षणम्। विषयैक्ये ऽपि ज्ञानवैलक्षण्येन विनिगमनासम्भव इति। समाधत्ते। तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेधः। विषयभेदादेवास्मातिरिक्तः स्वीकार्यः। अन्यथा चक्षुरादिबहिरिन्द्रियाणां नियमितमहत्त्वादिमद्वस्तुविषयकज्ञानजननस्वाभाव्यादतीन्द्रियपरमाण्वादिविषयकानुमित्यादिर्न स्यात् समवायिकारणाभावात् चक्षुरादेस्तदजनकत्वात्। न च चक्षुरादेश्चाक्षुषादिजनन एव विषयभेदव्यवस्था न त्वनुमित्यादाविति वाच्यम्। विनिगमनाविरहाच्चक्षुरादौ तत्स्वीकारासम्भवात्। एवं चाक्षुषाधीनं स्मरणं चक्षुषि स्वीकार्यं न त्वगादौ वैयधिकरण्येनासम्भवात्। तथा च चक्षुरुपघाते तत्स्मरणं न स्यादात्मनस्तु नित्यत्वान्नैष दोषः। मनसः स्मृत्यादिसमवायित्वसम्भवे ऽपि अग्रे दृष्यत्वादिति जन्यज्ञानत्वावच्छिन्नसमवायिकारणतयात्मा सिध्यतीति प्राहुः॥३॥

समाप्तमिन्द्रियभेदप्रकरणम् ॥

इन्द्रियभेद आत्मनीत्यादिः ॥

ननु गौरो ऽहं जानामीत्यादिप्रतीतिबलाच्छरीरमेव चेतनमस्तु किमतिरिक्तेनात्मनेत्यत आह।

शरीरदाहे पातकाभावात्[1] ॥ ४ ॥

पातकपदं शरीरहेत्वदृष्टपरं तेन पुण्यपापलाभः। तथा च शरीरनाशे पुण्यपापयोरभावप्रसङ्गान्न शरीरमात्मेति पुण्यपापयोरभावे तदुत्तरकालीनभोगादिकं न स्यात् तद्बोधकशास्त्रादेरप्रामाण्यं च स्यात्। शास्त्रप्रामाण्यं च प्राग्व्यव-

(१) एतत्सूत्रव्याख्यानावसरे तदिदं सूत्रं यस्यात्मा नास्ति तस्यायं दोष इति दोषप्रतिपादनार्थमिति वार्त्तिकम्। सिद्धान्तसूत्रम्। शरीरदाह इत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः।

स्थापितमेवेति भावः । शरीरस्य मृतशरीरस्य दाहे पातका-भावात् पापानुत्पत्तेः शरीरस्यात्मत्वे च तद्दाहे हिंसात्वेन पापं तत्कर्तुः स्यादिति भावः । हिंसायां पापं वदतां बौद्धानां मते ऽपि समाधानमिदं सम्भवतीति कश्चित् ॥ ४ ॥

शङ्कते ।

तदभावः सात्मकप्रदाहे ऽपि तन्नित्यत्वात्[1] ॥ ५ ॥

सात्मकस्यापि शरीरस्य नाशे तदभावप्रसङ्गः तन्नित्यत्वात् तस्य शरीरस्य नित्यत्वादावश्यकत्वात् । शरीरं विना भोगाभावेन शरीर एवादृष्टकल्पनादित्यर्थः । यद्वा तन्नित्यत्वात् तस्यात्मनो नित्यत्वान्निर्विकारत्वाज् जन्यधर्मानाश्रयत्वादिति यावत् । तथा च शरीरस्यादृष्टस्वीकारेण तदभावे भोगानुत्पत्तिप्रसङ्ग इति भावः । तन्नित्यत्वात् शरीरविशिष्टात्मव्यतिरेकस्य नियतत्वादित्यपि वदन्ति । सात्मकशरीरदाहे ऽपि तदभावः पापानुत्पादः । स्यादिति शेषः । तस्यात्मनो नित्यत्वाच्छरीरदाहकस्य पापानुत्पत्तेर्भवतैवोक्तत्वादिति भाव इति कश्चित् ॥ ५ ॥

शङ्कां निरस्यति ।

न कार्याश्रयकर्तृबाधात्[2] ॥ ६ ॥

न शरीरदाहे ऽदृष्टनाशः कार्यमदृष्टं तदाश्रयस्य कर्तुरात्मनः शरीरस्य नाशे बाधानाशाभावात् । तथा चात्मन्येवादृष्टं तदधीनोत्तरभोगस्तु शरीरान्तराश्रयणेनेति

(१) न्यायसूचीनिबन्धे दर्शनात् न्यायतत्त्वालोके व्याख्यातत्वात् तात्पर्यटीकायां तद-त् इति दर्शनादिदं सूत्रमिति प्रतीयते ।

(२) अस्यार्थस्य ज्ञापनाय न कार्याश्रयकर्तृवधादिति सूत्रमिति वार्त्तिकम् । वधादिति पाठोऽन्यत्रापि ।

भावः । न सात्मकशरीरदाहे पापानुत्पादः कार्यं शरीरं तदाश्रयस्य तत्सम्बन्धस्य कर्तुरात्मनो बाधात् । तथा च शरीरविशिष्टात्मव्यतिरेकसाधनस्यैव पापजनकत्वादिति भाव इति कश्चित् । व्याख्यानमिदं चिन्त्यम् । प्राणवियोगानुकूलव्यापारस्यैव पापजनकत्वात् तदभावेन मृतशरीरदाहकस्य पापानुत्पादो जीवच्छरीरदाहकस्य पापोत्पत्तिश्चेति नात्मसिद्धिरिति सूत्रत्रयमसमञ्जसं स्यादिति ॥ ६ ॥

समाप्तं देहभेदप्रकरणम् ॥

आत्मनीति पूरणीयम् ॥

प्रसङ्गादाह ।

सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात्(१) ॥ ७ ॥

सव्येन वामेन दृष्टस्येतरेण दक्षिणेन चक्षुषा प्रत्यभिज्ञानादिति । वामगोलकावच्छिन्नचक्षुषा घटग्रहानन्तरं तदेवेदं घटग्राहकं चक्षुरितिदक्षिणचक्षुःप्रत्यभिज्ञानाच्चक्षुषोरभेदसिद्धिरित्यर्थः ॥ ७ ॥

ननु चक्षुषोरैक्ये कथं द्वित्वव्यवहार इत्यत आह ।

नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानात्(२) ॥ ८ ॥

एकस्मिन्नेव चक्षुषि द्वित्वाभिमानाद् द्वित्वभ्रमात्

---

(१) सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् । सव्येन चक्षुषा दृष्टमितरेण प्रत्यभिजानातीति सूत्रमिति वार्त्तिकम् । अत एव सव्यदृष्टस्येतरेण प्रत्यभिज्ञानादित्येतदवोच्यमानः । पूर्वोक्तमेवेन्द्रियभेदेऽपि प्रतिसन्धानं प्रकारान्तरेण सूचयति । इन्द्रियान्तरविकारादितीति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः ।

(२) द्वित्वोपलम्भप्रतिपादनार्थं नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानादिति सूत्रमिति वार्त्तिकम् । आदर्शपुस्तके नकाररहितः सूत्रपाठः ।

तद्व्यवहारः । नासास्थिव्यवहितत्वमेव भ्रमजनको दोषः सेतुव्यवहितत्वमिव नद्याः ॥ ८ ॥

शङ्कते ।

एकविनाशे द्वितीयाविनाशान्नैकत्वम्[१] ॥ ९ ॥

एकविनाशे एकगोलकावच्छिन्नचक्षुर्नाशे द्वितीयस्यापरगोलकावच्छिन्नस्याविनाशादविनाशप्रत्ययाच्च चक्षुरद्वैतम् । अत एव तदाश्रयस्य काणत्वं नान्धत्वं चेति व्यवहारः ॥ ९ ॥

शङ्कां निरस्यति ।

अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः[२] ॥ १० ॥

अवयवनाशेऽपि शाखाद्यवयवनाशेऽपि । अवस्थितावयवैः खण्डवृक्षाद्यवयव्यन्तरोपलब्धेरत्रापि एकगोलकावच्छिन्नावयवनाशेऽपि गोलकान्तरावच्छिन्नावयवैश्चक्षुरन्तरोत्पत्तेर्नैकनाशेऽप्यपरसत्ता चक्षुर्भेदसिद्धौ हेतुरित्यर्थः । न च शाखाद्यवयवनाशेऽपि सोऽयं वृक्ष इतिप्रत्यभिज्ञानात् कथं खण्डवृक्षान्तरस्वीकार इति वाच्यम् । परिमाणभेदेन द्रव्यभेदात् । प्रत्यभिज्ञानं च यथावस्थितपूर्वावयवसमवेतत्वनिबन्धनम् । एवमवयवनाशस्य तत्संयोगनाशस्य चावयविनाशकत्वमन्यथाऽवयविनो नित्यत्वापत्तिः सर्वावयवनाशस्य तत्संयोगनाशस्य च तथात्वे गौरवादिति भावः । न च वृक्षादेरेकत्वस्य सिद्धत्वादवयवनाशे वृक्षान्तरस्वीकार इह तु द्वित्वग्रहेण भेदसिद्धिरस्तु ताद-

(१) न्यायसूचीनिबन्धे न्यायतत्त्वालोके च दर्शनात् तात्पर्यटीकायाम् एकत्वम् इति दर्शनाच्च सूत्रमिति प्रतीयते । नैकत्वमित्यादर्शपुस्तके नास्ति ।

(२) अवयवविनाशे इति न्यायतत्त्वालोके पाठः । अस्यापि सूत्रत्वे युक्तिः पूर्वसूत्रवत् ।

शक्तित्वग्रहस्य भ्रमत्वकल्पकाभावादिति वाच्यम् । चक्षुषि न प्रत्यक्षं प्रमाणं किं त्वनुमानं तत्र लाघवादेकस्यैव सिद्धेः । भेदप्रत्ययस्तु गोलकरूपाश्रयभेदेन नासास्थिव्यवधानेन च सम्भवतीति ॥ १० ॥

ननु वामचक्षुर्नष्टं दक्षिणं तु न नष्टमितिप्रतीत्या नाशप्रतियोगित्वतदभावयोर्विरोधेन चक्षुर्द्वयसिद्धा वृक्षादेर्दृष्टान्तस्य वैषम्यमित्यत आह ।

दृष्टान्तविरोधादप्रतिषेधः[१] ॥ ११ ॥

दृष्टान्तविरोधात् सुसदृशदृष्टान्तासत्त्वात् । अप्रतिषेधः चक्षुरद्वैतप्रतिषेधो नेत्यर्थः । तथा च यथा शाखाविशिष्टो वृक्षो नष्टो न तु मूलविशिष्ट इत्यत्र शाखानाशेन वृक्षनाशो न तु मूलनाशेनेति प्रतीयते तथा वामगोलकावच्छिन्नावयवनाशेन चक्षुर्नष्टं न तु दक्षिणगोलकावच्छिन्नावयवनाशेनेति प्रतीयत इति भावः ॥ ११ ॥

ननु कतिपयावयवनाशेनेन्द्रियान्तरं न दृष्टमित्यत आह ।

इन्द्रियान्तरविकारात्[२] ॥ १२ ॥

इन्द्रियान्तरस्य रसनादेरम्लद्रव्यादिभावनया विकारस्य दर्शनादित्यर्थः । इदमुपलक्षणम् । घर्षणादिना पूर्वचक्षुर्नाशेन चक्षुरन्तरोत्पादाच्च ॥ १२ ॥

---

(१) तस्योत्तरं दृष्टान्तविरोधादप्रतिषेध इति सूत्रमिति वार्त्तिकम् ।

(२) इदं तु न्यायतत्त्वालोके न धृतम् । न्यायसूचीनिबन्धे दृश्यते । तात्पर्यटीकायां तु इन्द्रि-त् इति सूत्रप्रतीकधारणारीतिर्दृश्यते । तात्पर्यपरिशुद्धिमते ऽपीदं सूत्रमिति ७सूत्रस्य टिप्पणी द्रष्टव्या । तदात्मगुणसद्भावादप्रतिषेध इतिसूत्रस्य वार्त्तिककारिकाव्याख्यानन्तरं तात्पर्यटीकाकृता एतेनेन्द्रियान्तरविकारादिति सूत्रं व्याख्यायेत्युक्तम् ।

ननु येनेन्द्रियेण यद्विषयकानुभवो जातः स्मृतिरपि तद्विषयिका तदिन्द्रियजन्येति नियम इति पूर्वचक्षुषा दृष्टस्य कथं सव्यचक्षुषा स्मृतिरित्यत आह ।

न स्मृतेः स्मर्तव्यविषयत्वात्[(१)] ॥ १३ ॥

नोक्तदोषः । स्मृतेः स्मर्तव्यविषयत्वात् पूर्वानुभूतविषयत्वमात्रनियमात् । न तु तदिन्द्रियजन्यत्वनियमोऽपीति भावः ॥ १३ ॥

ननु स्मृतिसमवायित्वं तत्तदिन्द्रिये स्वीकार्यं तदन्यस्यानुपस्थितेरिति कथं पूर्वचक्षुर्नाशे स्मृत्युपपत्तिरित्यत आह ।

तदात्मगुणत्वसद्भावादप्रतिषेधः[(२)] ॥ १४ ॥

तस्याः स्मृतेरात्मगुणत्वसद्भावादात्मसमवायित्वयानुभवात् प्रतिषेधो यथोक्तप्रतिषेधो नेत्यर्थः । अनुभवाकारश्च स्मरामीत्यादिरूपः ॥ १४ ॥

अथ चक्षुरादिकं चाक्षुषादिसमवायि स्यात् स्मृत्यादिकं तु विषयसमवेतमस्तु चक्षुरादिनिष्ठत्वे पूर्वचक्षुरनुभूतस्य सव्यचक्षुषा स्मरणं न स्यात् । अनुव्यवसायस्तु अवच्छेदकतासम्बन्धेन शरीरे स्मृतिविषयक एव शरीरे आत्मत्वाभिमानात्मकश्चेत्यतो भाष्यकारसूत्रं यथा ।

---

(१) न्यायतत्त्वालोके नकाररहितः सूत्रपाठः । अस्याक्षेपसूत्रम् न स्म-तृ इति तात्पर्यटीका ।

(२) एतत्सूत्रव्याख्यावसरे अथवा एकस्यानेकविषयोपलब्धिप्रतिसन्धानमनेन सूत्रेणोपदर्शयंत इत्युक्तं वार्त्तिककृद्भिः । परं तु तदेवं भाष्यमतेनेन्द्रियान्तरविकारादिति-सूत्रं व्याख्याय वार्त्तिककारः स्वमतेन व्याचष्टे अथवैकस्येति । उक्तमेव प्रतिसन्धानं पुनरिन्द्रियान्तरविकारद्वारेण दर्शयति सूत्रमित्यादितात्पर्यटीका द्रष्टव्या । न्यायतत्त्वालोकेऽपीदं व्याख्यातं न्यायसूचीनिबन्धेऽपि दृश्यते तात्पर्यटीकायां च तदा-ध इति सूत्रप्रतीकधारणेनेतिदृश्यते । तदात्मगुणसद्भावादिति पाठोऽन्यत्र ।

अपरिसंख्यानाच्च स्मृतिविषयस्य(१) ॥ १५ ॥

अपरिसंख्यानादानन्त्यात्। तथा च लाघवादतिरिक्त आत्मा कल्पनीयः। इदमुपलक्षणम्। स्मृतेरतीतादिविषयकत्वाच्छरीरस्यानित्यतया पूर्वशरीरानुभूतस्य स्वशरीरे स्मरणं न स्यादन्यथा स्मृतेः पुरुषविशेषीयत्वनियामकालाभश्चेति। इदमपि सूत्रं मुनेरिति कश्चित् ॥ १५ ॥

समाप्तं चक्षुरद्वैतप्रकरणम् ॥

केचित्तु चक्षुर्द्वैतमेव सूत्रार्थं मन्यमाना व्याचक्षते। तत्र सिद्धान्तिनः सूत्रम्। सव्येति। शङ्कते। नैकस्मिन्निति। समाधत्ते। एकेति। शङ्कते। अवयवेति। निराकरोति। दृष्टान्तेति। शाखानाशे वृक्षनाशस्यावश्यकत्वाद् दृष्टान्तो न युक्तः। यद्वा दृष्टान्तगोलकभेदविरोधादन्यथानुपपन्नत्वात्। दृष्टं हि मृतस्य चक्षुरधिष्ठानगोलकद्वयं भेदेनैवोपलभ्यत इति वदन्ति। तच्चिन्त्यम् ॥

मनस्येव चैतन्यादिकमस्तु तस्य नित्यत्वेन स्मरणाद्युपपत्तिरित्याशङ्कते।

नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात्(२) ॥१६॥

अतिरिक्त आत्मा न कल्पनीयः। आत्मप्रतिपत्तिहेतूनामात्मसाधकलिङ्गानां ज्ञानादीनां मनसि सम्भवात् स्वीकारात् ॥ १६ ॥

शङ्कां निरस्यति।

ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम्(३) ॥१७॥

---

(१) इदं तु न्यायतत्त्वालोके न्यायसूचीनिबन्धे वार्त्तिके च न धृतम्। वृत्तिकृताऽपि नेदं सूत्रं किं तु भाष्यमिति केचिदित्युक्तम्।

(२) अत्र पूर्वपक्षसूत्रं नात्मप्रतिपत्तिहेतूनां मनसि सम्भवादिति न्यायवार्त्तिकतात्पर्यपरिशुद्ध्याद्युद्धृतमाचार्यैः। पूर्वपक्षसूत्रं नात्मेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः।

(३) इदं न्यायसूचीनिबन्धे दृश्यते व्याख्यातं च न्यायतत्त्वालोके।

ज्ञानसाधनोपपत्तेर्ज्ञानसाधनस्य जन्यज्ञानसामान्यकरणस्य उपपत्तेः स्वीकारात् । संज्ञाभेदमात्रं संज्ञाभेदस्य चाक्षुषादिरूपस्य मात्रं नियमः । अन्यथा चक्षुःसन्निकृष्टस्य त्वगादिसन्निकर्षे चाक्षुषत्वाचादेर्युगपदुत्पादप्रसङ्ग इति यत्संयुक्ततया चक्षुरादिकं चाक्षुषाद्युपधायकं तदेव मनः । तस्य महत्त्वे चक्षुस्त्वगादौ युगपत्संयोगसम्भवेन तद्दोषतादवस्थ्यमिति तस्याणुत्वं स्वीकार्यं तस्य च चैतन्यस्वीकारे चैतन्यस्याप्रत्यक्षत्वापत्तिः साक्षात्परम्परया वा महत्त्वशून्यत्वादिति महत्त्वाश्रयश्चेतनोऽवश्यं स्वीकार्य इति । अथवा ज्ञानसाधनस्य सुखादिप्रत्यक्षासाधारणकारणस्य स्वीकारात् ज्ञातुः संज्ञाभेदमात्रमात्मेति संज्ञामात्रम् । अतः सातत्यगमने इति सर्वे गत्यर्था ज्ञानार्थाश्चेतिस्मरणात् । व्युत्पत्तिसिद्धमिति शेषः । इत्थं च सुखादिप्रत्यक्षमिन्द्रियकरणकं प्रत्यक्षत्वादित्यनुमानेनेन्द्रियकरणकत्वसिद्धौ पक्षधर्मताबलान्मनः सिध्यति । ततश्च मनः सकर्तृकं करणत्वाद् वास्यादिवदित्यनुमानेन मनोभिन्नस्य कर्तुः सिद्धिः । तादृशकरणस्य मनःपदवाच्यता श्रुत्यादितः सिद्धेति भावः ॥ १७ ॥

ननु व्यासङ्गानुरोधान्न मनः स्वीक्रियते चाक्षुषादीनां यौगपद्यनिरासश्च एकतरसामग्र्या अपरफलप्रतिबन्धनियमाधीन इत्यत आह ।

नियमश्च निरनुमानः(१) ॥ १८ ॥

एकतरसामग्रीदशायामपरसामग्र्या फलानुत्पादनियमश्च निरनुमानोऽनुमानादिना न निर्णेय इत्यर्थः । (यथा वायोरतीन्द्रियत्वेऽपि तद्गतस्पर्शादेः प्रत्यक्षत्वमभ्युपेयते

(१) सूत्रमपि पूर्ववत् ।

तथा मनसोऽतीन्द्रियत्व ऽपि तद्गतज्ञानसुखादेः प्रत्यक्षत्वमभ्युपेयते । वस्तुतो मानसेतरप्रत्यक्ष एव महत्त्वस्य हेतुता वाच्येति मनसोऽपि नातीन्द्रियत्वं द्रव्यमानसे मनस्त्वेन हेतुतया न परमाण्वादीनां मानसप्रत्यक्षविषयतेति तस्यापि सुखाद्याश्रयस्याणुत्वे एकदा कराद्यवच्छेदेन सुखस्य पादाद्यवच्छेदेन दुःखस्य चानुत्पादापत्तेः मनसोऽणुत्वेन एकदा करचरणयोरसंयुक्तत्वात् असंयुक्तस्य चावच्छेदकत्वासम्भवादिति । एवमात्मनो विभुत्वे श्रुतिरपि मानमस्तीति)(१) ॥ १८ ॥

समाप्तं मनोभेदप्रकरणम् ॥

आत्मनीति शेषः ॥

सिद्धे चात्मनि तदनादित्वं विना संसारानुपपत्तिरनादित्वे च तस्य भावतया नित्यत्वमिति जन्मान्तरीयानुभूतस्य स्मरणोपपत्तिरित्यभिप्रायेणाह ।

पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेः(२) ॥ १९ ॥

जातस्य बालकस्य पूर्वाभ्यस्तानां पूर्वजन्मानुभूतवस्तूनां स्मृत्यनुबन्धात् स्मरणाधीनप्रवृत्त्यादितो ये हर्षादयस्तेषां हास्यरोदनादितः सम्प्रतिपत्तेर्दर्शनात् । आत्मनः स्थिरत्वमिति शेषः । एकस्यानुभवाधीनान्यस्मरणस्वीकारेऽतिप्रसङ्ग इति भावः ॥ १९ ॥

ननु हास्यादयो लोकानां क्रियाविशेषाधीना एव पद्मादीनां विकाशा इवेति कथं तन्निमित्ततया हर्षादयस्त-

(१) ( ) एतन्मध्यस्थग्रन्थस्याभिप्रायश्चिन्तनीयः ।

(२) पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेरिति सूत्रमिति वार्त्तिकम् । सिद्धान्तसूत्रम् । पूर्वाभ्यस्तेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

90

॥ श्रीः ॥

लौकिकन्यायसंग्रहः ।

उदासीनश्रीरघुनाथवर्मविरचितः ।

काशिकराजकीयसंस्कृतपाठशालायाम् ।
साहित्यदर्शनप्रधानाध्यापकेन महामहोपाध्याय-
श्रीगङ्गाधरशास्त्रिणा संशोधितः ।

LAUKIKANYĀYASAṀGRAHA

BY

RAGHUNĀTHA VARMA UDĀSĪNA

EDITED BY

MAHĀMAHOPĀDHYĀYA GANGĀDHARA ŚĀSTRĪ,
PROFESSOR, SANSKRIT COLLEGE, BENARES.

काश्याम् ।

ई॰ जे॰ लाजरसकम्पन्याख्येन मुद्रयित्वा प्रकाशितः ।

सं॰ १९५८ । सन् १९०२ ईस्वी ।

Digitized by Google

Digitized by Google

॥ श्रीः ॥

भूमिका ।

अथेह प्रकाश्यते लौकिकन्यायसंग्रहनामा निबन्धो मुद्रयित्वा । अस्य निर्माता किलोदासीनसंप्रदायस्थो रघुनाथवर्मा नाम कश्चिदभिनवो विपश्चित् । सोऽयमद्वैतमतश्रद्धालुः संगृह्य भूयसो लौकिकान् शास्त्रीयांश्च न्यायान् परस्परासंबद्धानपि तान् वेदान्तनिबन्धं प्रस्तुत्य पूर्वपक्षोत्तरपक्षोपपादकतया कृतसंगतीन् संजग्रन्थेति प्रशंसनीयमस्य तत्संगतिसंपादनकौशलम् । अयं चान्तरा प्रसङ्गमापाद्य तत्तद्दैवतोत्कर्षमभ्युपयतां तदभ्युपगमप्रमाणवचनकदम्बं तन्निरासोपयिकप्रमाणयुक्तीः काशीमुक्तिविचारं जैमिनीयनयोपयोगिश्रुत्यादिबलाबलचिन्तां तदपेक्षितविषयांश्च प्रकृतानुपयोगिनो ऽपि विषयान् तथा निबबन्ध यथैते ऽसंबद्धा इति न प्रतिभासेरन् प्रमोदयेयुश्च विस्तरभीरुणामव्युत्पित्सुजनचेतांसीति मामकीनो विश्वासः ।

पुरा किल काशीविद्यासुधानिधिनामके काशिकराजकीयसंस्कृतपाठशालास्थपण्डितोपक्रमे मासिकपुस्तके मुद्रयितुमुपक्रान्ते मदीयगुरुचरणश्रीद्राजारामशास्त्रिश्रीद्बालशास्त्रिभ्यामनुपलब्धलौकिकन्यायविवरणतमप्राचीननिबन्धाभ्यामारभ्यत स्वयमेव तादृशो निबन्धो जिज्ञासुजनोपकृतये न त्वसावन्तरायबाहुल्येन समपूर्यत । तदनु तथाविधनिबन्धप्रकाशनावश्यकतां तेन विना शास्त्रेषु प्रसङ्गादापतितानां तथाविधन्यायानां विषयस्वरूपनिर्धारणस्य दुःसंपादतां च निश्चिन्वद्भिः साम्प्रतिककाशिकराजकीयपाठशाला-

Digitized by Google

प्रधानाध्यक्षैरार्थर्व्वेनिससाहिबमहोदयैः समादिष्टो ऽहं मार्गयमाणस्तादृशं निबन्धं समासादयमस्मदाप्ततमश्री५नेपालराजगुरुश्रीहेमराजशर्मपण्डितवरेभ्यः शुद्धप्रायमेकमेव पुस्तकम् । आलोचयन्निदं तत्र बहूनां न्यायानामसंग्रहमाकलयन्नपि मीमांसातन्त्रवार्त्तिकसंशोधनपाठालयपरीक्षोपयिकभागपाठनादिकार्यव्यापृततया ऽलब्धतत्पूरणावकाशः सांप्रतमियतैव निर्वाहयन्तु कार्यमुत्साहिनः सत्यवसरे ऽत्रानिबद्धान् न्यायान् क्रमेण संगृह्य विवृत्य च यथामति तत्स्वरूपविषयोपयोगान् प्रकाशयेयं समयान्तरइति मन्यमानः प्रारभे सत्वरमिदं कार्यं समापयं च । समापिते मुद्रणे द्वितीयपुस्तकदर्शनावसरोपलब्धमधिकं पाठं तत्स्थले शुद्धिपत्रे च समयोजयम् । तमिमं निबन्धमालोच्यावगच्छन्तु तत्प्रस्तुतन्यायस्वरूपं जिज्ञासवः संगृह्य चात्रानुद्दिष्टान् न्यायान् प्रबोधयन्तु मां क्षाम्यन्तु चैकमात्रपुस्तकावलम्बेनाशक्यप्रतीकाराणि स्खलितानि गुणैकपक्षपातिन इति । शुभम् ।

महामहोपाध्यायो
गङ्गाधरशास्त्री ।

॥ श्रीः ॥

लौकिकन्यायसंग्रहस्य शुद्धिपत्रम् ।

पृ०	पं०	अशुद्धम्	शुद्धम्	पृ०	पं०	अशुद्धम्	शुद्धम्
१	५	प्रेक्ष्य	प्रक्षेक्ष्य	४८	२५	वेद्या	वेद्यो
५	५	ह्रिरुधर्म	ह्रिरुद्धधर्म	४९	२४	न्यत्कि	न्यत्किं
९	१३	तत्वात्	सत्वात्	४९	२६	हन्तारा	हन्ता
१०	२०	सूक्ष्म	सूक्ष्मश्च	५१	१९	सव	सवै
१०	२७	नाऽनन्द	नाऽऽनन्द	५५	१७	च्छिवा	च्छिवो
१४	८	विनाम	वीनाम	५६	११	युक्तं	युक्तं
१६	१८	पृच्छ्य	पृच्छ्य	५८	२७	च्छुमतु	च्छुद्धमतु
२०	७	यथो	यथे	५९	६	विषयत्रता	विषयवत्ता
२०	८	यथा	यथा	६०	१९	नभ्त्र	मन्त्र
२२	९	भूति	भूत	६३	२६	प्रद्र	प्रद्र
२६	११	याच्य	याच्य	६५	११	सिद्ध	सिद्धे
२७	११	दीमय	दिमय	६६	३	नाऽऽस्ति	नाऽस्ति
२९	१३	ग्रीह	ग्रीहि	६६	१६	ऽऽपि	ऽपि
३२	२	मूत्तु	मूत्तु	६६	२६	भय	भटा
३३	४	मपर	मम्भर	७३	१२	शक्यम्	शक्यम्
३४	१७	विष्णू	विष्णु	७३	२०	भिक्षक	भिक्षुक
३५	६	वाऽवि	वाऽऽवि	७४	८	काङ्क्ष	काङ्क्षा
३७	१०	स्वाव	स्वीव	७६	२१	मात्र	मीत्र
३७	२६	तिपा	तिप	७७	२१	धिक्कारे	धिक्कार
३८	१२	कारो	कारे	७८	१४	मह	महा
३८	१७	नाऽऽपा	नाऽपा	७९	२१	दयमा	दर्शनमा
३९	२६	तोऽप्या	तोऽप्य	७९	२५	तथ	यत
४१	१८	कया	कर्या	८२	१७	पूवा	पूर्वा
४४	६	यिकः	यिकाः	८४	८	मुक्त	मुक्ति
४५	१६	पायेन	पापेन .	८७	२०	वग	वेश
४६	६	यवत्रर्तीः	यपवतीः	८८	६	मूमूर्षा	मुमूर्षा
४७	५	यथाऽह	यथाऽऽह	९२	२५	सव	सर्वं
४८	१२	च्छमुत्वं	च्छेमुत्वं	९३	१९	ष्टयं	ष्टय

Digitized by Google

पृ॰	पं॰	अशुद्धम्	शुद्धम्
९५	१०	प्रांह्रि	प्रोहि
९६	१२	षेवर्ग	षोवर्ग
१०३	२५	सोपकारा	सोपकाराका
१०६	२६	शत्वं	शकत्वं
१११	२२	अत्रप्र	आत्रप्त
११२	५	सिद्ध	सिद्धे
११६	६	तार्थ्यं	तार्थ्ये
११६	११	ग्रेध	ग्रेबध
११६	२५	निबद्ध	निबिद्ध
१२३	२४	राज	राज्य
१२४	२२	त्रेन	त्वेन
१२७	३	कारक	कारका
१३७	६	युक्तिभ	युक्तिभि
१४१	१	तान्यरा	तान्परा
१४१	१४	न्याये	न्यायो
१४२	३	ताये	तीये
१४२	४	पतेः	पत्तेः
१४२	१३	वृति	वृत्ति
१४२	१७	वृते	वृत्ते
१४३	१८	फल	फला
१४६	२०	ख्विपि	ख्यपि
१४८	१८	कारणी	कारणी
१५१	२१	स्याय	स्योय
१५२	२६	सम्प	सम्य
१५४	२६	बटकं	बद्कं
१५६	१६	तेजः सं	तेजाऽसं
१५८	३	घात	न घात
१५९	६	पश्च	पश्चि
१६०	११	ग्यदि	ग्याद्वि
१६२	६	क्मान	क्मानि
१६२	२०	मुखे	मुखो
१६४	२०	सुरः	सुराः

पृ॰ पं॰

१३३ १३ आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीति न्यायोऽत्र प्रासङ्गिकः। शक्तिः पुरुषसामर्थ्यम् स्पष्टमन्यत्तत्रैव १। ५५ एतावान् ग्रन्थोऽत्रापेक्षितः।

Digitized by Google

॥ श्रीः ॥

लौकिकन्यायसंग्रहधृतन्यायानां सूचीपत्रम् ।

पृष्ठ	पङ्क्ती	विषयाः ।
		अ
११	२३	अक्के चेदिति न्या· ।
१५१	१७	अग्धगोलाङ्गूलन्या· ।
६६	७	अग्न्यानयनन्या· ।
७३	१४	अजाकृपाणीयन्या· ।
६५	२६	अज्ञातपुत्रनामोत्कीर्तनन्या· ।
१३८	१८	अणुरपि विशेषोऽध्यवसायकरः ।
११७	८	अण्डकुक्कुटीन्या· ।
१३३	१५	अत्यन्तबलवन्तोऽपि ।
१४७	१०	अदग्धदहनन्या· ।
१४	१६	अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते ।
१२०	१८	अनन्तरस्य विधिर्वा ।
११	१६	अनन्यलभ्यः शब्दार्थः ।
२३	२३	अनधीते महाभाष्ये ।
६५	११	अन्ते या मतिः सा गतिः ।
७४	२०	अन्धगजन्या· ।
१५१	१७	अन्धगोलाङ्गूलन्या· ।
७७	३	अन्धचटकन्या· ।
१४७	२४	अन्धदर्पणन्या· ।
१०७	२०	अन्धपङ्गुन्या· ।
१२ ख	११	अन्धपरं परान्या० ।
१५२	१२	अन्धस्यैवान्धलग्नस्य ।
१३६	६	अन्त्ये रयडाविवाहयेत् ।
१४३	२३	अन्यद् भुक्तमन्यद् वान्तम् ।
१००	१६	अपन्थानं तु गच्छन्तम् ।
१४६	२४	अपसारिताग्निभूतलन्या· ।
११३	२०	अभ्रहन्या· ।
१४७	२६	अरण्यरोदनन्या· ।
१	१८	अर्थादर्थो न शब्दार्थन्या· ।
१३५	१०	अर्धं त्यजति पण्डितः ।
१३६	१७	अर्धजरतीन्या· ।
१३६	२४	अर्धवैशसन्या· ।
१११	१५	अल्पस्य हेतोर्बहु हातुमिच्छन् ।
१६५	१६	अलाभे मत्तकाशिन्या· ।
७४	१	अवश्यापेक्षितानपेक्षितयोरिति न्या· ।
३२	२	अवयुत्यानुवादन्या· ।
१२०	२५	अव्यविक्रन्या· ।
१११	२२	अशोकवनिकान्या. ।
६६	१६	अश्मलोष्टन्या· ।
१४८	१८	अश्वतरीगर्भन्या· ।
११७	३	अश्वभृत्यन्या· ।
१६०	६	असाराणामपि बहूनाम् ।
१०४	१५	अहिकुण्डलन्या· ।
१६३	१३	अहिनकुलन्या· ।
१४६	१	अहिनिर्ल्वयिनीन्या· ।
१५६	२३	अहिभुक्कैवर्तन्या· ।
१५३	१६	आकाशपरिच्छिन्नत्वन्या· ।
१४७	२०	आदावन्ते चेति न्या· ।
६६	१	आभाणकन्या· ।
१२ ख·	१८	आम्रवणन्या· ।
१११	१२	आयुर्घृतम् ।
१३७	१२	आषाढवाते चलति द्विपेन्द्रे ।

Digitized by Google

पृष्ठ पङ्क्ती विषयाः ।

इ

९६ ८ इक्षुरसन्या· ।
९६ ९ इक्षुविकारन्या· ।
१३४ १२ इच्छेद्यमाणसमभिव्याहारे ।
१४४ १६ इषुवेगन्या· ।

उ

१५६ १८ उत्खातदंष्ट्रोरगन्या· ।
९९ १४ उदकनिमज्जनन्या· ।
११९ २१ उपजनिष्यमाणनिमित्तो· ।
१६४ ६ उपजीव्योपजीवकयोरुपजीव्यस्य प्राबल्यम् ।
७७ २६ उपयवयवन् धर्मा· ।
१०२ ८ उपवासाद्वरं भिक्षा· ।
१४२ १३ उभयतःपाशा रज्जुः ।
१३६ २ उष्ट्रलगुडन्या· ।

ऊ

१४७ २२ ऊषरवृष्टिन्या· ।

ऋ

१३९ ११ ऋजुमार्गेण सिध्यतः ।

ए

१०१ ५ एकं संधित्सतोऽपरं प्रच्यवते ।
१४० १६ एकत्र निर्णीतः शास्त्रार्थः ।
१५३ ७ एकदेशविकृतमनन्यवत् ।
१०० १८ एकवाक्यतापन्नानाम् ।
१०२ २५ एकाकिनी प्रतिज्ञा हि ।
७७ २० एकामसिद्धिं परिहरतः ।
१२ क १० एकसंबन्धिदर्शनन्या· ।

औ

१०५ ८ औपाधिकाकाशभेदन्या· ।

क

१४० २० कण्टकन्या· ।
११ १९ कण्ठचामीकरन्यायः ।
१२१ १७ कदम्बमुकुलन्या· ।
१४८ २३ कदलीफलन्या· ।
१४५ २५ करस्थबिल्वन्या· ।
११५ ६ करिबृंहितन्या· ।
१५१ १ कांस्यभोजिन्या· ।
७२ २१ काकतालीयन्या· ।
९९ २३ काकदधिघातकन्या· ।
११२ १४ काकदन्तपरीक्षान्या· ।
१३७ २० काकाक्षिगोलकन्या· ।
१२ १४ कारणगुणप्रक्रमन्या· ।
१४५ ५ कारणनाशे कार्यनाशः ।
१२ १० कार्येण कारणसंप्रत्ययः ।
१४८ २४ किमज्ञानस्य दुष्करम् ।
९६ १६ कीटभृङ्गन्या· ।
१५० ७ कुक्कुटध्वनिन्या ।
११३ २४ कुम्भीधान्यन्या· ।
१२ १ कुशकाशावलम्बनन्या· ।
१०२ ११ कूपखानकन्या· ।
७५ १० कूपमण्डूकन्या· ।
१०७ ५ कूर्माङ्गन्या· ।
७४ २ कृताकृतप्रसङ्गी यो विधिः स नित्यः ।
१४९ ११ कृते कार्ये किं मुहूर्तप्रश्नेन ।
१२१ १ कृदभिहितो भावो द्रव्यवत्प्रकाशते ।
१३७ २३ कैमुतिकन्या· ।
९७ ३ कोशपानन्या· ।
१५३ २१ कौन्तेयराधेयन्या· ।
७२ १३ क्रिया हि विकल्प्यते न वस्तु ।

ख

१५० ४ खलमैत्रीन्या· ।
१०९ ११ खलेकपोतन्या· ।
१५८ १ खादकघातकन्या· ।

पृष्ठ	पङ्क्ती	विषयाः ।
		ग
१९५	१४	गजघटान्या० ।
१४३	८	गजभुक्तकपित्थन्या० ।
८	११	गड्डलिकाप्रवाहन्या० ।
९९	२६	गणपतिन्या० ।
११२	१५	गर्दभरोमगणनन्या० ।
१५८	१२	गलेपादुकान्या० ।
१०४	१८	गुडजिह्विकान्या० ।
१३६	२२	गृहार्थमारोपितस्य दीपस्य ।
११४	१६	गोबलीवर्दन्या० ।
१६४	७	गोमयपायसन्या० ।
१६३	११	गोमहिषन्या० ।
		घ
१०३	५	घट्टकुटीप्रभातन्या० ।
७७	७	घुणाक्षरन्या० ।
१५४	२०	घटप्रदीपन्या० ।
		च
१४४	२०	चक्रभ्रमणन्या० ।
१६२	११	चक्रं सेव्यं नृपः सेव्यो० ।
१४१	१४	चण्डेन्धनवह्निन्या० ।
७६	१	चतुर्वेदविन्न्या० ।
१४६	१५	चम्पकपटवासन्या० ।
७७	१३	चर्मतन्तौ महिषीं हन्ति ।
१४६	१८	चालिनीन्या० ।
१४६	१०	चित्रपटन्या० ।
१४७	५	चित्रमतन्या० ।
१४७	१	चित्राङ्गनान्या० ।
१४७	६	चित्रालानन्या० ।
१५६	४	चिन्तामणिं परित्यज्य काचमणिग्रहणन्या० ।
९९	७२	चौरापराधान्माण्डव्यनिग्रहन्या

पृष्ठ	पङ्क्ती	विषयाः ।
		ज
१२ क	१	जलतुम्बिकान्या० ।
१४१	१०	जलकतकरेणुन्या० ।
१५२	१३	जलमन्थनन्या०
९६	३	जलानयनन्या० ।
१४६	२१	जलौकान्या० ।
१४६	१३	जलौषधन्या० ।
१३६	२०	जामात्रर्थं श्रपितस्य सूपस्य ।
७२	१७	ज्ञानादेर्निष्कर्षवदुत्कर्षोऽप्यङ्गीकार्यः ।
१५७	१२	ज्ञानमज्ञानस्यैव निवर्तकम् ।
		ट
१५६	७	टिट्टिभन्या० ।
		त
११७	१८	तक्रकौण्डिन्यन्या० ।
९७	१७	तण्डुलभक्षणन्या० ।
७४	१४	तदभिन्नाभिन्नस्य तदभिन्नत्वम् ।
१५७	१६	तत्रागमे हि दृश्यते ।
१३	११	तद्धेतोरेव तदस्तु किं तेन ।
१४५	२	तन्तुपटन्या० ।
९८	५	तप्तपरशुग्रहणन्या० ।
९६	१२	तप्तमाषविधिः ।
१६३	२१	तमःप्रकाशन्या० ।
१५८	२४	तरतमभावापन्नसाधनायत्तं ।
१००	२६	तात्स्थ्यात्ताच्छब्द्यम् ।
१५८	६	तालसर्पन्या० ।
१००	१	तिलतण्डुलन्या० ।
१२६	२४	तुलोन्नमनन्या० ।
१०१	१२	तुल्यायव्ययन्या० ।
१४१	२१	तुष्यतु दुर्जन इति न्या० ।
१०८	२७	तुष्यन्त्वितिन्या० ।
१२ क	८	तृणजलौकान्या० ।

पृष्ठ	पङ्क्ती	विषयाः ।
११०	६	त्यजेदेकं कुलस्यार्थे ।
६६	२१	त्याज्या दुस्तटिनीतिन्या॰ ।
६	१५	त्रिपुत्रो द्विपुत्रः ।
		द
१४६	८	दग्धपटन्या॰ ।
१४१	१४	दग्धेन्धनावह्निन्या ।
१४६	५	दग्धरशनान्या॰ ।
१३८	२२	दण्डसर्पमारणन्या॰ ।
१३८	१०	दण्डापूपिकान्या॰ ।
१११	१३	दधिपयसी प्रत्यक्षो ज्वरः ।
१६४	१५	दामव्यालकटन्या॰ ।
१५५	२५	दाहकदाहन्या॰ ।
१४१	१८	देवदत्तहन्तृहतन्या॰ ।
६	१७	देवदत्तापुत्रन्या॰ ।
१२ ख	२४	देवदत्तपुत्रन्या॰ ।
१३७	१७	देहलीदीपन्या॰ ।
१५३	२०	देहाधोमुखत्वन्य॰ ।
१३६	१४	द्रविडप्राणायामन्या॰ ।
		ध
६८	१५	घटारोहणन्या॰ ।
६८	२६	धर्माधर्मविधिः ।
१२	२१	धर्मिकल्पनातः ।
१३५	६	धान्यपलालन्या॰ ।
		न
१५६	१०	नटाङ्गनान्या॰ ।
१०३	१२	नष्टाश्वदग्धरथन्या॰ ।
१०४	२५	न हि करकङ्कणदर्शनायादर्शापेक्षा ।
१०४	२४	न हि दृष्टेऽनुपपन्नं नाम ।
१०२	३	न हि निन्दा निन्दितुं प्रवर्तते ।
१५०	११	न हि पवित्रं स्याद् गोक्षीरं ।
७३	२०	न हि भिक्षुको भिक्षुकमितिन्या. ।
१४६	८	न हि विवाहानन्तरं वरपरीक्षा ।
१३४	२४	न हि ग्राह्यमग्राह्येणान्वेति ।
१६५	३०	न हि सर्वत्रागोमशक्तिः ।
१६५	१८	न हि सर्वः सर्वं जानाति ।
११७	१४	नहि सुतीक्ष्णाऽप्यसिधारा स्वयं छेत्तुमाहितव्यापारा ।
१२ ख	२०	न हि त्रिपुत्रन्या॰ ।
११७	१२	नहि सुशिक्षितोऽपि बटुः स्व स्कन्धमारोढुं पटुः ।
१३५	२३	नागोष्ठन्या॰ ।
११०	३	नाज्ञातविशेषणा ।
७	६	नान्यदृष्टं स्मरत्यन्यः ।
१४३	१८	नारिकेलफलाम्बुन्या॰ ।
१०३	१५	निम्नगाप्रवाहन्या॰ ।
१००	२	नीरक्षीरन्या॰ ।
११५	१६	नीलेन्दीवरन्या॰ ।
७६	९	नृपनापितपुत्रन्या॰ ।
११७	१०	नौनाविकन्या॰ ।
		प
८	१५	पञ्चकोशावतरणन्या॰ ।
१२	१७	पञ्जरचालनन्या॰ ।
१२ क॰	२	पञ्जरमुक्तपक्षिन्या॰ ।
१०१	१४	पतन्तमनुधावतो बद्धोऽपि गतः ।
१५६	२०	पतिंवरान्या॰ ।
१३५	१३	पदमप्यधिकाभावात् ।
१५८	१०	परस्परविरोधे हि ।
१५१	८	पराह्णच्छायान्या॰ ।
११५	१७	पर्वताधित्यकान्या॰ ।
११५	१८	पर्वतोपत्यकान्या॰ ।
१२ क॰	२३	पारिषदन्या ।
६६	२२	पाषाणेष्टिकान्या॰ ।
१५४	१८	पिण्डं हित्वा करं लेढि ।

पृष्ठ पङ्क्ती विषयाः ।
११२ ११ पिष्टपेषणन्या० ।
७७ १० पुत्रलिप्सया दैवं० ।
११८ १६ पुरस्तादपवादन्या० ।
१३६ १२ पुष्टलगुडन्या० ।
११६ १ पूर्वं ह्यपवादा अभिनिविशन्ते ।
१२० ६ पूर्वात्परबलीयस्त्वन्या० ।
१५० ३ पूर्वाह्णच्छायान्या० ।
११६ ६ प्रकल्प्यापवादविषयम् ।
१०४ १६ प्रकाशाश्रयन्या० ।
१३४ ७ प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यम् ।
१५२ १५ प्रक्षालनाद्धि पङ्कस्य ।
१०५ १ प्रत्यक्षे किमनुमानम् ।
१०७ ४ प्रदीपन्या० ।
११७ ४ प्रधानमल्लनिबर्हणन्या० ।
१५४ १४ प्रयोजनमनुद्दिश्य० ।
१२ ७ प्रासादवासिन्या० ।

फ

७४ ८ फलवत्सहकारन्यायः ।

ब

१३६ ४ बकबन्धनन्या० ।
१४६ ४ बधिरकर्णजपन्या० ।
१५५ ८ बहुच्छिद्रघटन्या० ।
७ ६ बहुवृक्षाकृष्टगन्या० ।
१२ क २७ बहुराजकपुरन्या० ।
१५४ २६ बहूनामनुग्रहो न्याय्यः ।
१६५ १३ बिलवर्तिगोधाविभजनन्या० ।
६६ २४ बिल्वखल्वाटन्या० ।
११७ ७ बीजवृक्षन्या० ।
११४ ८ ब्राह्मणपरिव्राजकन्या० ।
११४ १६ ब्राह्मणवसिष्ठन्या० ।
६५ १३ ब्राह्मणश्रमणन्या० ।
१२ ख १८ ब्राह्मणग्रामन्या० ।

भ

१०५ ३ भक्षिते ऽपि लशुने ।
१६१ २३ भक्षुन्या० ।
१३४ ११ भावप्रधानमाख्यातम् ।
१०६ २४ भामतीन्या० ।
१२ २५ भिक्षुपादप्रसारणन्या० ।
१५३ १ भिक्षुभिया स्थाल्यनधिश्रयणन्या० ।
१६४ १५ भीमभासदृठन्या० ।
१५२ ३ भूलिङ्गन्या० ।
१५६ १५ भूयस्त्वोपचयन्या० ।
१६२ ११ भैरवन्या० ।
१४६ १६ भ्रमरन्या० ।
१०७ १० भ्राड्न्या० ।

म

१४६ २० मक्षिकान्या० ।
११ २३ मज्जनोन्मज्जनन्या० ।
७७ १६ मण्डूकतोलनन्या० ।
१३५ ३ मत्स्यकपटकन्या ।
७७ २ मक्षिकोपसर्पणौत्सुक्ये ।
११८ २४ मध्येऽपवादन्या० ।
१०२ २३ मरणाद्वरं व्याधिः ।
१५१ ६ मल्लग्रामन्या० ।
१२२ ११ मात्स्यन्या० ।
७४ १५ मानाधीना मेयसिद्धिः ।
१०२ २१ मारणाय गृहीतो ऽङ्कच्छेदं स्वीकरोति ।
८ १ मुञ्जादिषीकोद्धरणन्या० ।
१४८ १ मूर्खसेवनन्या० ।
१५५ १५ मूषासिक्तताम्रन्या० ।
१५३ ४ मृगभिया सस्यानाश्रयणन्या० ।
११५ २० मृगवागुरान्या० ।

Digitized by Google

पृष्ठ पङ्क्तौ विषयाः ।

११२ १२ मतमारणन्या० ।

१५० २१ मतस्तनंधयन्या० ।

य

७२ १५ यः कारयति स करोत्येव ।

६६ १५ यः कुरुते स भुङ्क्ते ।

१०४ २३ यत्कृतकं तदनित्यम् ।

११ १७ यत्परः शब्दः ।

१०० २२ यत्नाये म्रियते ।

११३ ५ यथासंख्यन्या० ।

७४ १८ यद्विवाहस्तद्गीतमिति न्या० ।

१४२ १२ यद्विवृत्तिमर्टिति न्या० ।

११ १२ यच्चार्थादर्थो न स चोदनार्थः ।

१०२ ७ यश्चोभयोः समो दोषः ।

१५८ २० यस्याज्ञानं भ्रमस्तस्य ।

१०२ १६ यादृशं मुखं तादृशी चपेटा ।

१०२ १८ यादृशो यक्षस्तादृशो बलिः ।

१४५ १६ यावच्छिरस्तावती शिरोव्यथा ।

१६५ ११ यावत् स्नाता तावत् पुण्यम् ।

१६५ ६ यावत्तैलं तावद् व्याख्यानम् ।

१५३ ५ यूकाभिया कन्यात्यागन्या० ।

११६ ३ येन नाप्राप्तिन्या० ।

१०० ५ येनोपक्रम्यते येन चोपसंह्रियते स वाक्यार्थः ।

१४५ १३ योग्यो योग्येन संबन्धः ।

७३ २१ योजनप्राप्यायां कावेर्यां मल्लबन्धनन्या० ।

र

१०३ २२ रक्तपटन्या० ।

१०५ ४ रज्जुसर्पन्या० ।

१६१ १४ रथबडवान्या० ।

१६३ १४ रश्मितृणादिन्या० ।

१५४ १ राजपुत्रव्याधन्या० ।

६६ १४ राजसं तामसं चेतिन्या० ।

१५० २५ राज्ञाऽनुगतविवाहप्रवृत्तभृत्यन्या० ।

१४९ २५ रासभरटितन्या० ।

१३३ २२ रूढिर्योगमपहरति ।

१४ २२ रेखागवयन्या० ।

ल

७४ १५ लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः ।

१११ ११ लाङ्गलं जीवनम् ।

१०८ १६ लोहचुम्बकन्या० ।

१५६ २० लोहाग्निन्या० ।

व

१२ ख १३ वटयक्षन्या० ।

१५७ २४ वध्यघातकन्या० ।

१०० २० वध्यतां वध्यताम् ।

१६० १३ वनव्याघ्रन्या० ।

१६३ ४ वह्निधूमन्या० ।

१०३ १० वरघाताय कन्यावरणम् ।

१२ ख १ वरगोष्ठीन्या० ।

१५४ २५ वस्तूनि मानान्यपेक्षन्ते न प्रयोजनानि ।

११५ १६ वाजिमन्दुरान्या० ।

१५७ ६ वातदीपन्या०

१०७ ७ वामादिन्या० ।

११३ २३ वायुभक्षन्या० ।

१५६ १४ वायुर्येत्यौष्ण्यन्या० ।

१५८ ४ वालाग्रशतभागोऽपि ।

१५० १४ विधेयं हि स्तूयते वस्तु० ।

१६४ ६ विपरीतं बलाबलम् ।

१४२ १६ विशिष्टवृत्तेरिति न्या० ।

११० १ विशिष्टवैशिष्ट्यन्या० ।

पृष्ठ	पङ्क्ती	विषयाः ।
१००	२१	विषवृक्षोऽपि ।
१०६	१६	विशेष्ये विशेषणान्या० ।
१११	१०	विषं मत्युरिति न्या० ।
१४८	१४	विशेषणाभावन्या० ।
६७	२४	विषभक्षणन्या० ।
१२१	७	वीचीतरङ्गन्या० ।
१५	२५	वृक्षप्रकम्पनन्या० ।
७८	१४	वृद्धकुमारीवाक्यन्या० ।
७७	१२	वृद्धिमिष्टवतो मूलं० ।
१४८	२२	वृश्चिकीगर्भन्या० ।
१००	३	वेश्याकाशन्या० ।
१	२४	वैशेष्यात्तु तद्वादन्या० ।
१५५	२२	व्यञ्जकव्यङ्ग्यन्या० ।
१४८	२६	व्याघ्रीक्षीरन्या० ।
१४३	६	व्यापकव्यावृत्त्या व्याप्यव्यावृत्तिः ।
७८	३	व्रणं शिशमयिषोः शस्त्रपतण-न्या० ।
६६	१३	व्रीहिबीजन्या० ।

श

पृष्ठ	पङ्क्ती	विषयाः ।
१०३	३	शतपत्रपत्रशतभेदन्या० ।
१०२	१७	शते पञ्चाशत् ।
१४७	२३	शवोद्वर्तनन्या० ।
१५	३	शाखाचन्द्रन्या० ।
१३४	१६	शाब्दे बोध एव शाब्दसाधनता-न्वयः ।
१३४	२२	शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यते ।
१०२	१०	शालिसमृद्धो कोद्रवाशन-त्यागन्या० ।
१३६	१३	शिरोवेष्टनेन नासिकास्पर्शन्या० ।
१४१	१३	शूर्पन्या० ।
१५६	५	शैलूषीन्या० ।
१०१	१८	श्यालशुनकन्या० ।
१३४	३	श्रुतयौगिकार्थलाभे ।
१४७	२५	श्वपुच्छोन्नामनन्या० ।
१४२	२६	श्वमूर्निगच्छोक्तिन्या० ।
१५२	१८	श्वः कर्तव्यमद्य कुर्वीतिन्या० ।

स

पृष्ठ	पङ्क्ती	विषयाः ।
७७	१६	सच्छिद्रघटाम्बुन्या० ।
१५६	१	संदिग्धं सप्रयोजनं च विचार-मर्हति ।
१२	२३	संभवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यते ।
१४८	३	समुद्रवृष्टिन्या० ।
१३५	१८	सर्वं ज्ञानं धर्मिण्यभ्रान्तम् ।
७८	७	"सर्वं वाक्यं सावधारणम् ।
७८	५	सर्वं विशेषणं सावधारणम् ।
१३५	१७	सर्वतो बलवती ह्यन्यथाऽनु-पपत्तिः ।
६३	१६	सर्वशाखाप्रत्ययन्या० ।
१६५	२१	सर्वासाध्याविवृत्तिर्नापवादाय ।
१०४	३	सविशेषणे हि वर्तमानौ ।
१४	१६	साक्षात् प्रकृतौ ।
१५०	६	साधुमैत्रीन्या० ।
१०४	१४	सावकाशनिरवकाशन्या० ।
१६३	२६	सिंहमृगन्या० ।
१५४	१	सिंहमेषन्या० ।
१२ क	१८	सिंहावलोकनन्या ।
१०१	८	सुतजनिमृतिन्या० ।
१२१	२४	सुन्दोपसुन्दन्या० ।
१४०	१	सुभगाभिक्षुकन्या० ।
११२	२४	सूचीकटाहन्या० ।
६५	२२	सूत्रशाटिकान्या० ।
१३	८	सोपानारोहणन्या० ।

पृष्ठ	पङ्क्ती	विषयाः ।
१३	१५	सोपानावरोहणन्या० ।
११२	१७	स्थालीपुलाकन्या० ।
१२०	१०	स्थावरजङ्गमविषन्या० ।
१२ क	१५	स्थूणानिखनन ।
६	१३	स्थूलारुन्धतीन्या० ।
१५३	८	स्फटिकलौहित्यन्या० ।
१५२	२२	स्वकरकुचन्या० ।
१५४	२३	स्वप्नमन्त्रलाभन्या० ।

पृष्ठ	पङ्क्ती	विषयाः ।
१४४	६	स्वप्नव्याघ्रन्या० ।
१५६	२४	स्वप्ने मन्त्रलाभन्या० ।
१४४	१६	स्वभावो दुरतिक्रमः ।
७७	१	स्वच्छिन्नमपि चुम्बनम् ।
७	१२	स्वामिभृत्यन्या० ।
		ह
१४५	२१	हस्तामलकन्या० ।
१६०	१३	हृदनक्रन्या० ।

Digitized by Google

Digitized by Google

Digitized by Google

306. If it be said that it denotes a degree of bliss comparatively higher than that derivable from sons or cattle, even then heaven will not mean liberation, since it does not admit of any known criterion.

307. If liberation be the fruit of performing rites with special objects (*kāmya*), then, as soon as any such rite is performed only once, the aim is fully accomplished, since some bliss of indefinite description is at once obtained.[1]

308. That liberation cannot result from rites, is evident from passages like 'they perish,'[2] 'having examined etc.,'[3] and 'those who here etc.'[4]

309. "But, I imagine that it is extreme rashness to renounce, for no reason whatever, rites such as sacrifices etc., which are prescribed by Scriptural passages that are clearly injunctory."

310. If so, it is greater rashness to give up the perfecting of the knowledge of the unity of Self, which is clearly ordained by the passages of the *Upanishads*.

311 and 312. If the authorisation be closely examined with reference to each chapter of Scripture, no such rashness will appear, for the very reason that the Scriptural passages themselves establish a difference of authorisation (for the two *kāṇḍas*). Hence it follows that they too are authorised who are desirous of becoming *Brahman*.

---

[1] This is Sureṣvara's argument, even granting that heaven means some indefinite bliss and, therefore, liberation.

[2] 'प्लवा ह्येते' इत्येतद्यज्ञनिर्वर्तकाः यज्ञमार्गाद्वयः प्लवन्ते गच्छन्ति नश्यन्ति· Anandagiri.

[3] परीक्ष्य लोकान्कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन etc. See verse 25.

[4] तद्य इह रमणीयचरणा रमणीयां योनिमापद्यन्ते etc.

313. "Why is it that the commentator, even after affirming that the said chapter is connected with the chapter on ritual, has not stated in detail the particulars of such connection?

314. "Such detail is not given even in the commentary beginning with 'it is presently explained,' for, what follows deals only with the authority of Scripture as to a thing that is self-established."

315. After establishing the authority of Vedantic utterances, the connection above-mentioned will be explained. Therefore the commentary, 'even all etc.,' is first written to establish that very authority.

316. "Does he at least refer to the connection later on? How is it that no connection is referred to, coupled with a locative phrase[1]?" This is the answer.

317. There will be no such connection, if the two chapters differ in aim, since one is independent of the aim of the other. Nor will there be such connection, if the two chapters are identical in aim, since then there will be syntactical unity.[2]

318. So, too, no connection can exist between the two chapters, if both of them are not authoritative. Nor can any connection be predicated, if both or either of them is authoritative.[3]

---

[1] ज्ञानकाण्डस्य धर्मकाण्डे सम्बन्धो नोच्यत इति सप्तम्यन्तपदं कृत्वा नञ मुद्राख्याक्षेपो द्रष्टव्य इत्यर्थः. Anandagiri.

[2] 'Connection' implies duality and is incompatible with unity.

[3] मानत्वे द्वयोर्मिथो वाक्याभिन्नत्वान्मानामानयोश्च संगतेरवाच्यत्वात्। द्वयोर्मानत्वे च नतत्त्वातत्त्वमानव्यवस्था। अन्यतरस्यैव मानत्वे च साधर्म्यादिभेदासिद्धिः. Anandagiri.

Digitized by Google

319. Further, the said connection is indicated by the Vedic passage "*tam ētam* etc." itself, when closely examined. Bearing this in mind, the teacher has not explained the connection in detail.

320. Having established by argument the authority of the *Vēdāntas*, he will clearly explain later on the connection with the chapter on ritual.[1]

321. "The passage, '*tam ētam*, etc.,' enjoins only prescribed rites (*nitya*), like recitation of Vedas etc., as being instrumental in giving rise to a knowledge of the unity of Self."[2]

322. The passage '*tam ētam*, etc.' points out that all rites whatsoever have for their aim the creation of a desire for knowledge. This is because the application is different.[3]

323. "The only purpose of the ritual chapter of the *Vēda* is to take such common instruments as sheep, corn, etc., and to enjoin which of them ought to be offered and which not.

324. "It conveys no real meaning to say that the chapter on ritual deals with objects and means which are established by entirely different proofs.

---

[1] viz. the connection of ritual with *vividishā*, (the former being the cause of the latter), which is established by the passage "*tam ētam* etc.," this passage being known as the विविदिषावाक्य.

[2] *Nitya* as opposed to *kāmya* rites, which, having each a special object of its own, cannot also be instrumental to *vividishā*.

[3] From the two passages "अग्निहोत्रं दध्ना जुहोति" and 'दध्नेन्द्रियकामो जुहुयात्", we gather that the offering of curd is both *nitya* and *kāmya*. So, *kāmya* rites, though they have their special objects like heaven etc., may yet have, apart from these, the object of creating *vividishā*. This difference of application is called संयोगपृथक्त्व.

325. "The *Vēda*, as a whole, has, for its object, the attainment of a knowledge of the unity of Self. Apart from this, there is no other connection between the chapters on ritual and knowledge.

326. "Prescribed rites and occasional rites (*nitya-naimittika*) have for their final object, the knowledge of the unity of Self through the purification of the doer, and nothing else.

327. "As for rites with special objects they are not even fit to be performed, since they are censured by the Vedic passages[1] 'They perish etc.,' 'having examined etc.' and 'They who here etc.'"

328. The co-existence in this manner of injunction and prohibition, is not at all consistent. It will be consistent, if the censure be confined merely to the desire of fruit.[2]

329. "Further, passages, occurring in the chapter on knowledge, which enjoin worship of some kind or other, are also intended to make one fit for the knowledge of the unity of Self."

330. From the passage 'being released etc.,' and the passage about flame etc., it is clear that acts of worship do not directly lead to liberation (*svārtha*).[3]

331. Such[4] is the proper connection of the chapter on ritual (with the chapter on knowledge). And there is no reason to support any other kind of connection.

---

[1] See verse 308 *supra*.

[2] It is not the very performance of *kāmya* rites that is prohibited, but their performance with desire of fruit.

[3] They indirectly lead to liberation through the attainment of *satyalōka*, etc.

[4] viz. that rites are a help to knowledge by way of purification.

332. It cannot be said that, like the knowledge of the *Sāmavēda* etc., the knowledge of the unity of Self is subservient to ritual, for, there is no means by which this knowledge may be so connected.

333. Nowhere does Scripture connect with ritual the knowledge of the unity of Self, in the same way as the '*aindri*' hymn defines the particular worship that is intended. Nor is such connection indicated at least, as in the passage, "I cut *darbhā* grass, the abode of gods" etc.

334. Nor can it be said that, as in the instance of the ladle and its being made of *parṇa* wood, knowledge too, by virtue of any passage,[1] connects itself through the doer with ritual; for, it is not in that context at all.

335. It may be that the direction about *parṇa* wood is auxiliary to sacrifice, since it is necessary to explain the quality and the material of the ladle, and it explains the nature of such ladle.

336. But the knowledge of the unity of Self, which destroys the nature of doer etc. that are essential for ritual, cannot be auxiliary to ritual, since, it will not be objectless even if it is self-dependent.

337. The ladle etc. may refer to sacrifice, because their application to it is invariable; but the soul (*kartā*) cannot refer to it, because it exists elsewhere too,[2] and therefore deviates in its application (*vyabhichārāt*).

338. It is not even in the same context, since it is not spoken of where rites are begun to be dealt with.

[1] e. g. the passage "The Self must be realised etc."

[2] For, the doer is present not only in *vaidika* rites, but in all secular movements too.

339. The rule is that, when once a connection in general with rites is established by inference (*linga*), that connection is particularised therefrom by name (*nāmnah*) and by order (*kramāt*).

340. But the connection of the knowledge of the unity of Self is not like that of the several rites mentioned in the chapter on rites with special objects. Therefore, there is no connection with rites at all of the knowledge of the unity of Self, since there is no kind of proof whatever to establish it.

341. Nor can it[1] be construed to be an explanatory remark (*arthavāda*), for, it is syntactically distinct from the injunction, and, further, since the knowledge derivable from it has perceptible fruit, it cannot be inferred that the fruit of such study is unperceived (*adṛishṭa*).

342. On the other hand, from the passage "*tam ētām* etc.," we may conclude that sacrifices etc. are part of ritual.

343. Others contend that, with the mind sullied by desire, one cannot hope to realise the Supreme Secondless Self, since every desire is not fully accomplished.

344. Having, by a contemplation of the unity in duality and other actions, attained the fruit which is the very end of the thread,[2] a man enjoys the world of *Prajāpati*, and then realises the unity of Self.

345. It is not so. Not by the fulfilment of desire can such desire be destroyed even after hundreds of years.

[1] viz. the passage which speaks of knowledge as fruit.

[2] The thread (*sūtra*) has reference to the different kinds of enjoyments which form a series in the ascending scale.

It will wax stronger by being adhered to, and its cessation can only be by knowing its evil.

346. Never does desire cease by the enjoyment of desires, but will increase more and more, as fire by the addition of fuel.

347. Therefore, since this expedient fails, one should give up all desire, and take to the understanding of the Self by which all misery will cease.

348. Further, the mere learning from Scripture about supreme bliss (*ānanda*) without grasping it by direct perception, is not sufficient even to retard the desire for such kinds of happiness as are directly perceived.

349. Therefore, the means for the cessation of desire is the contemplation of arguments against it. The performance of such actions will only lead to the contrary.[1]

350. The seat of *Prajāpati*[2] is not the invariable means to liberation; for, no difference whatever is seen, as between the various limitations of the one Reality.

351. There is no difference in the atmosphere, as limited by a pot or by a bucket, by distance or by nearness, by things existent or non-existent.

352. It cannot be said that all manifested things are identical with Brahman, having regard to the quality of pure existence, for, that will destroy their very relation to one another.[3] Hence the so-called distinction is purely external.

[1] i. e. to the continuance of desire.

[2] See verse 344 *supra*.

[3] By destroying their mutual distinctions they are identical with *Brahman* and he is without distinction.

Digitized by Google

353. Even if the relation be said to be that of cause and effect, the effect is not distinct from the cause. Nor is there any difference in the one Reality, as bracelets etc. create difference in gold.

354. Hence, the one Reality does not differ in *Prajāpati* or in the insect. This is established by logic as well as by Vedic passages like "therefore whosoever etc."

355. When all the desires that dwell in his heart are forsaken, then does the mortal become immortal, then does he realise *Brahman*.[1]

356. The one God, that is contained in every creature, all-pervading, the soul within every being, the doer of all action, in whom all creatures live, the all-seer, the self-conscious, the absolute, the attributeless.

357. If it be said that, in one of three ways,[2] there is a coordinate relation (*samuchchaya*) between knowledge and ritual, this too is untenable, since, as pointed out before, the whole aim of the Veda[3] is to teach the unity of Self.

358. As the two are not enjoined by the same passage (or context), and as there is no identity of fruit (*sādhya*) between them, how can there be coordination between knowledge and ritual as between matter and its attribute?

---

[1] This verse is taken *verbatim* from the *Kaṭhopanishad*, II. 6. 14.

[2] The three possible coordinations are गुण (ritual being secondary to knowledge), विपरीत (*vice versa*), and समप्रधानत्व (equal importance).

[3] i. e. the *Vedānta*.

Digitized by Google

दिगम्बराः । इति जलतुम्बिकान्या० ॥ ८ ॥

तदेकदेशिनस्तु पञ्जरमुक्तपक्षिन्यायेन सदोर्ध्वगमनमेव तस्य मोक्षं मन्यन्ते ॥ ९ ॥

विक्षेपबहुलं धावनमेव पुरुषार्थं मन्यमाना बालैरप्युपहसनीया इत्यलम् उन्मत्तवचांसि काव्यदूषणोद्भावनेनेति न्यायेन नेह निरस्यते ॥ १० ॥

जीवः स्वविद्यादिभिर्देहान्तरं निष्पाद्यैव पूर्वं त्यजतीति विवक्षायां तृणजलौकान्यायः सापि हि तृणान्तरमाश्रित्यैव पूर्वं त्यजति ॥ ११ ॥

एकसम्बन्धिदर्शनमपरसम्बन्धिस्मारकमिति न्यायेन मज्जनोन्मज्जनन्यापादनन्तरा न्यायाः स्मृत्वोदाहृताः । हस्तिपकदर्शनस्य हस्तिस्मारकत्ववन्नद्यादिज्ञानस्य तत्सम्बन्धिकुश्यादिस्मारकत्वम् इतरन्यायद्वये ऽपि पञ्जरमुक्तेत्यस्य तथैवोदाहरणम् द्वितीयस्य त्वाक्षेपसङ्गत्योदाहृतिः ॥ १२ ॥

स्थूणानिखननन्यायः । स्थूणा यथा ऽसकृत्सञ्चाल्य निखनने क्रियमाणे दृढा भवति तथोत्तरग्रन्थेन प्रागुपपादितार्थदार्ढ्यं भवतीत्यर्थः ॥ १३ ॥

सिंहावलोकनन्यायः । सिंहो यथा कञ्चिन्मृगं हत्वा ऽग्रे गच्छन्नन्योपि चेत्स्यात्तमपि हन्यामिति धिया पश्चात्पश्यति हन्ति च दृष्टिपथमागतं तथा बुद्धिपथमागतस्वपक्षपरिपन्थिपरपरिकल्पितयुक्त्याभासान्तरनिरासायाप्युत्तरग्रन्थप्रवृत्तिः इत्यर्थः ॥ १४ ॥

पारिषदन्यायः । यथा पारिषदानामेकस्मिन्मृते ऽप्यवशिष्टैस्तत्कार्य्यनिर्वाहस्तथेत्यर्थः ॥ १५ ॥

नान्यदृष्टमिति ॥ १६ ॥

बहुवृकाकृष्टेति च स्पष्टौ ॥ १७ ॥

बहुराजकपुरन्यायो ऽप्येतादृशः ॥ १८ ॥

Digitized by Google

बरगोष्ठिन्या० । गोष्ठिरन्योन्यवार्त्ता वरलाभाय गोष्ठिर्वरगोष्ठिस्तया यथा वरवधूबन्धूनामैकमत्ये सति विवाहरूपमेकं कार्य्यं निष्पाद्यते तथेत्यर्थः ॥ १९ ॥

स्वामिभृत्यन्यायः ॥ २० ॥

मुञ्जादिति न्यायः । मुञ्जाख्यतृणादिषीकाख्यं गर्भस्थं मृदुतृणं यथा बहिरावरकतया स्थितानां मुञ्जाख्यतृणानां विभजनेन समुद्भ्रियये तथेत्यर्थः ।

गड्डुलिकाप्रवाहन्यायः ॥ २१ ॥

गड्डुलिकानामवीनां गणादेका चेत्कूपे पतिता तदा वार्य्यमाणा अपि सर्वाः तत्र पतन्तीति प्रसिद्धम् ॥ २२ ॥

एतादृश एवान्धपरम्परान्यायः सो ऽप्यूर्ध्वमुख्यनवस्थास्थलएवोदाह्रियते ॥ २३ ॥

वटयक्षन्याये यदि वक्तृपरम्परोपदेशस्य मूलभूतो ऽनुभवो नास्ति तदा सो ऽप्येतादृशः सत्त्वे तु विलक्षण इति बोध्यम् ॥ २४ ॥

मल्लग्रामन्यायः । यथा ऽन्येषु सत्स्वपि मल्लानां बहुत्वान्मल्लग्राम इत्युच्यते तथेत्यर्थः ॥ २५ ॥

एतेन ब्राह्मणग्रामाम्रवनादयो ऽपि न्याया विवृताः ॥ २६ ॥ २७ ॥

न हि त्रिपुत्र इति स्पष्टार्थः ॥ २८ ॥

देवदत्तापुत्रन्यायः । न हि देवदत्ताया एव पुत्रो भवति किन्तु देवदत्तस्यापि तथाऽपि मातुः प्राधान्यविवक्षायां देवदत्तापुत्र इत्युच्यते ॥ २९ ॥

पितुः प्राधान्यविवक्षायान्तु देवदत्तपुत्रन्यायेनेत्युदाह्रियते ॥ ३० ॥

अत्रैव

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् ।	मूल्यम्
श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं· श्रीराममिश्र-शास्त्रिप्रणीतक्काचित्कविषमपदटिप्पणीसमेतः	७।)
श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा ..	६)
श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा ..	१=)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः	२।)
सेतुपूर्त्तिः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं· स्वामिश्रीराममिश्रशास्त्रि-प्रणीता निर्विशेषाद्वैतन्निराकरणपरः	१॥=)
सेतुपूर्त्तिसहितो वेदार्थसंग्रहः	३॥)
शास्त्रदीपिका	६।)
सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-न्द्रिकोपेतम्, पं·स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् ।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजपं·दामोदर-शास्त्रिणा संशोधिता पूर्वार्द्धरूपा	५॥)
तथा उत्तरार्द्धम्	८॥)
माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता	७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता	६॥)
श्रीतिरुन्तार्णवतरणिः ।	६)
दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता	॥=)
जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता ..	५॥)
लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्याय-मुक्तावल्याख्यया टीकया सहिता ।	॥)
सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम् ।	॥)
तत्त्वमुक्ताकलापः-सर्वार्थसिद्धियुतः, बोधायनीयार्षसिद्धान्तानुसारी विशिष्टाद्वै-तब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्कि-ककेसरिणा सर्वतन्त्रस्वतन्त्राधिवरेण श्रीवेङ्कटनाथदेशिकेन प्रणीतः	५॥=)
वेदान्तसिद्धान्तमुक्तावली, आर्यवीनिस्प्राहबकृताङ्गलभाषानुवादयुता ..	१॥)
काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः	२॥)
अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः	१२)
आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्य-काराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम्	॥)
तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदी-पाख्यटीकया सहिता ।	१॥)

Digitized by Google

CONTENTS.

Page.

LAUKIKANYÂYASAMGRAHA, Errata and Contents, &c. Ed. Gangâdhara Çastrin, Professor, Sanskrit College, Benares ... ... 129 & 167

BRÂHMASPHUṬASIDDHÂNTA, Edited with his own commentary by Mahâmahopâdhyâya Sudhâkara Dvivedin, Professor, Queen's College, Benares 137

NYÂYASÛTRAVIVARAṆAM, Ed. Surendralâla Gosvâmin, Professor, Sanskrit College, Benares 153

THE SAMBANDHAVÂRTIKA of SUREṢVARÂCHÂRYA, Translated by S. Venkataramana Aiyar, B. A., B. L., High Court Vakil, Triplicane, Madras 185

Digitized by Google

24

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 4.] April, 1902. [Vol. XXIV.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1902.

Copyright on each article reserved.

Price Rs. 9-0 per annum.]

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्रार्थनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
विधिमीमांसा, अप्पय्यदीक्षितकृता पं० श्री रामशास्त्रिणा संशोधिता	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।=)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनार्य्येणाङ्ग्लदेशीयभाषायामनुवादिता ..	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	=)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणाङ्ग्लदेशीयभाषायामनूदितम्	४)
मानवधर्म्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	=॥=)
श्रौतपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकोल्लूकशास्त्रि- संशोधिता	४)
काव्यप्रदीपः, पं० रामशास्त्रिभागवताचार्य्येण परिशोधितः	=।।।)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्य्येण प्रणीतः	१)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	५॥।)

Digitized by Google

न्निमित्ततया च प्रागनुभूतस्मरणादयः स्वीकार्या इत्याशङ्कते ।

पद्मादिषु प्रबोधसम्मीलनविकारवत् तदुपपत्तेः(१) ॥ २० ॥

तदुपपत्तेः हास्याद्युत्पत्तेः ॥ २० ॥

सिद्धान्तमाह ।

नोष्णशीतवर्षाकालनिमित्तत्वात् पञ्चात्मकविकाराणाम्(२) ॥ २१ ॥

पाञ्चभौतिकपद्मादीनां विकाशमुद्रादिरूपा ये विकारास्तेषामुष्णादिकालनिमित्तकत्वात् तथैव तेषामन्वयव्यतिरेकात् । मनुष्यादीनां मुखविकाशादौ कालविशेषस्यानियतत्वात् हर्षविषादादिनियतत्वाच्च न पद्मविकाशादिदृष्टान्तेन हर्षादिकमन्तरेण मुखविकाशादिसम्भव इत्यर्थः ॥ २१ ॥

हेत्वन्तरमाह ।

प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात्(३) ॥ २२ ॥

प्रेत्य मृत्वा जातमात्रस्य बालकस्याहाराभ्यासकृतात् प्राग्जन्मभवस्याहारस्याभ्यासो यत्र इष्टसाधनता-

(१) पद्मादिषु प्रबोधसम्मीलनविकारवत् तद्विकार इति वार्त्तिकादिषु पाठः । विकारे तद्विकार इति न्यायतत्त्वालोके पाठः । एतद्व्याख्यावसरे अनित्ये ऽपि विकारदर्शनादनैकान्त इति सूत्रार्थ इति वार्त्तिकम् ।

(२) एतद्व्याख्यावसरे नायमाकस्मिकः पद्मादिप्रबोधसम्मीलनविकार इति सूत्रार्थ इति वार्त्तिकम् ।

(३) एतत्सूत्रव्याख्यावसरे किमर्थं पुनरिदं सूत्रमारभ्यते यद्ययमर्थः पूर्वोक्तस्तद्रूपे ऽवगतः । सामान्यतोऽवगतस्य विशेषज्ञापनार्थं सूत्रमित्यदोष इति वार्त्तिकम् ।

Digitized by Google

दिष्टधीनिश्चयात् तत्कृतस्तज्जनितसंस्कारात् जीवनादृष्टो-द्बोधितात् समुत्पन्नेष्टसाधनतादिधीजनित एवंभूतात् स्तन्याभिलाषात् स्तन्यपानादिप्रवृत्तेः । अभिलाषपदेन तत्कार्यप्रवृत्तिबोधनात् । अभ्यासोपन्यासात् पुनःपुनः स्मरणाद् दृढतरः संस्कारो जायत इत्यभियुक्तवचनात् संस्कारस्य दृढतरत्वं लभ्यते । दृढतरत्वं च झटित्युद्बोधकसमवहितत्वम् । तादृशाभ्यासश्च जातमात्रस्य प्रवृत्तिदर्शनेन कल्प्यः । कथमन्यथा तस्येष्टसाधनताधीरनुमानादीनां कालविलम्बसाध्यत्वादिष्टसाधनादिधियं च विना प्रवृत्त्यनुपपत्तेरित्यात्मनोऽनादित्वेन नित्यत्वमिति भावः ॥ २२ ॥

शङ्कते ।

अयसोऽयस्कान्ताभिगमनवत् तदुपसर्पणम्[1] ॥ २३ ॥

अयसो लोहस्य अयस्कान्तो मणिविशेषस्तत्सन्निधाने तदभिमुखगमनवत् तदुपसर्पणं बालकस्य सन्निधाने स्तनाभिमुखसर्पणम् । न च तत्रेष्टसाधनतादिज्ञानापेक्षेति भावः ॥ २३ ॥

समाधत्ते ।

नान्यत्र प्रवृत्त्यभावात्[2] ॥ २४ ॥

नोक्तदूषणमन्यत्र अन्यदा प्रवृत्त्यभावात् । स्तनसन्निधानस्य तदुपसर्पणहेतुत्वे क्षुन्निवृत्तावपि तदुपसर्पणं स्यादिति भावः ॥ २४ ॥

(१) प्रवृत्तिमात्रस्य नैकान्तिकत्वज्ञापनार्थमयसोऽयस्कान्ताभिगमनवत् तदुपसर्पणमिति सूत्रमिति वार्त्तिकम् ।

(२) नान्यत्र प्रवृत्त्यभावादिति सूत्रमिति न्यायवार्त्तिकतात्पर्यपरिशुद्ध्यावुदयनाचार्याः । आकस्मिकत्वप्रतिषेधार्थं च नान्यत्र प्रवृत्त्यभावादिति सूत्रमिति वार्त्तिकम् ।

Digitized by Google

न केवलं मनुष्य एव जातमात्रः स्तन्यपानादौ प्रवर्तते पश्वादयोऽपि जातमात्राः कणादिभक्षणे प्रवर्तन्त इत्याह ।

वीतरागजन्मादर्शनात्[1] ॥ २५ ॥

रागशून्यस्य जन्मादर्शनात् । रागश्च जातमात्रस्य प्राग्भवीयेष्टसाधनताज्ञानाधीन एवेति भावः ॥ २५ ॥

ननु प्रवृत्तिरागादयो गुणा एव तथा च यथा घटोत्पत्त्यनन्तरमेव तत्र रूपादिगुणोत्पत्तिस्तथा आत्मन उत्पत्त्यनन्तरमेव तत्र रागादिगुणोत्पत्तिः स्यादिति कथमात्मनोऽनादित्वमित्याशङ्कते ।

सगुणद्रव्योत्पत्तिवत् तदुत्पत्तिः[2] ॥ २६ ॥

सगुणद्रव्यं घटादि । तदुत्पत्तिः सरागात्मोत्पत्तिः ॥ २६ ॥

समाधत्ते ।

न सङ्कल्पनिमित्तत्वाद्रागादीनाम्[3] ॥ २७ ॥

नात्मोत्पत्त्यनन्तरं तत्र रागाद्युत्पत्तिः सङ्कल्पो ज्ञानं सुखसाधनतादिज्ञानमिति यावत् । तन्निमित्तत्वात् तद्धेतुकत्वात् । रागादीनामित्यत्रादिपदेन द्वेषादिपरिग्रहः । रागे इष्टसाधनताज्ञानादेर्द्वेषे च द्विष्टसाधनताज्ञानादेश्च हेतुत्वमावश्यकमन्यथा रागादेरात्मनि नियतत्वे सर्वदैवैकत्र प्रवृत्तिनिवृत्त्यापत्तेः । एवं रागस्य प्रवृत्तिहेतुत्वं द्वेषस्य निवृत्तिहेतुत्वं प्रवृत्तेश्च चेष्टाहेतुत्वमन्वयव्यतिरेकादिना क-

(१) एतद्व्याख्यावसरे नाभिप्रायापरिज्ञानात् । नैवमभिप्रायः कारणनियमेन रागोऽपि तु पूर्वशरीरसम्बन्धप्रतिपादनं सूत्रार्थ इति वार्त्तिकम् ।

(२) सगुणद्रव्योत्पत्तिवत् तदुत्पत्तिरित्यनैकान्तिकपक्षे सूत्रमिति वार्त्तिकम् ।

(३) इदं तु न्यायसूचीनिबन्धे वर्तते व्याख्यातं च न्यायतत्त्वालोके ।

ल्प्यमिति जातमात्रस्य चेष्टादर्शनेन रागादिकं कल्प्यं तेन च प्रागभवीयेष्टसाधनतादिज्ञानं कल्प्यमित्यनादित्वमात्मन इति भावः । इदमुपलक्षणम् । सरागात्मन आकस्मिकत्वे तद्वैचित्र्यं क्रमिकत्वं च न स्यादिति ॥२७॥

समाप्तमनादिनिधनप्रकरणम् ॥

आत्मन उत्पत्तिविनाशराहित्यप्रकरणमित्यर्थः ॥

क्रमप्राप्तेऽर्थे परीक्षणीये प्रत्यक्षतया मानुषादिशरीरं पार्थिवतया परीक्षयति ।

पार्थिवं गुणान्तरोपलब्धेः(१) ॥ २८ ॥

प्रकरणक्रमेण पक्षतया शरीरस्य लाभः । तत्र च प्रसिद्धतया मानुषादिशरीरमेव पक्षः पर्यवसितः । पार्थिवं पृथिवीसमवायिकारणकं पृथिवीति यावत् । गुणान्तरस्य तेजआदिव्यावृत्तगन्धनीलरूपादेरुपलब्धेरित्यर्थः ॥ २८ ॥

मतान्तरमाह ।

पार्थिवाप्यतैजसं तद्गुणोपलब्धेः(२) ॥ २९ ॥

मानुषादिशरीरं पृथिवीजलतेजःसमवायिकारणकं तद्गुणोपलब्धेः तेषां पृथिवीजलतेजसां ये गुणा गन्धस्नेहोष्णस्पर्शास्तेषामुपलब्धेरित्यर्थः । श्रुतिरपि । सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतंत्रिवृतमेकैकं करवाणीति । ईक्षित्वा सा परमा देवता सृष्टानां देवतानां

(१) पार्थिवं तद्विशेषगुणोपलब्धेरितिसूत्रस्यावतार इति न्यायवार्त्तिकतात्पर्यपरिशुद्ध्याचुदयनाचार्याः । तत्र चायमेव पाठः । सिद्धान्तसूत्रमिति वृत्तिकृतः ।

(२) मतान्तराभिधानाय त्रिसूत्रीति वृत्तिकृतः । अन्यथासिद्धिज्ञापनपूर्वकाणि पूर्वपक्षसूत्राणीति न्यायतत्त्वालोके वाचस्पतिमिश्राः । न्यायसूचीनिबन्धेऽप्येतानि वर्तन्ते ।

तेजोऽबन्नात्मिकानां मध्ये एकैकं देवतां त्रिवृतं त्रिरूपां-त्रिरूपामकरोत् । त्रिवृत्करणं नाम तेजोऽबन्नानां त्रयाणा-मेकैकं द्विधा संविभज्य पुनरेकैकभागस्य द्विधा विभागं कृत्वा स्वस्वद्वितीयं स्थूलभागं परित्यज्यान्यदीयस्थूलभा-गयोरेकैकस्य योजनम् ॥ २९ ॥

मतान्तरमाह ।

निःश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम्[१] ॥ ३० ॥

निःश्वासोच्छ्वासौ प्राणवायोर्व्यापारविशेषौ । तथा चैतादृशकार्येण तत्कारणवायोरपि शरीरघटकत्वम् ॥ ३० ॥

मतान्तरमाह ।

गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्च-भौतिकम्[२] ॥ ३१ ॥

क्लेदो जलविशेषो जलविशिष्टपृथिवी वेत्युभयथापि जलमावश्यकम् । पाकस्य तेजःसंयोगाधीनत्वात् तेजः-सिद्धिः । व्यूहो निःश्वासादिः । अवकाशदानं छिद्रम् । न चास्मिन् पक्षे त्रिवृत्करणश्रुतिविरोधः तस्य च पञ्ची-करणोपलक्षकत्वात् । यद्वा आकाशस्य सर्वावकाशतया सर्वाव्यतिरेकाद् वायोश्च सर्वचेष्टाहेतुत्वेन सर्वाविना-भूतत्वात् तयोस्तेजःप्रभृतिष्वन्तर्भावं सिद्धवत् कृत्वा त्रिवृत्करणं प्रयोगसौकर्यार्थं श्रुतिराहेति । एतन्मतत्रयं दूषितं भाष्यकारैः । अत्र सन्निहितानां तद्गुणोप-लब्धेरिति भाष्यसिद्धान्तः । अत्र शरीरे सन्निहितानां

---

(१) पूर्वसूत्रटिप्पणी द्रष्टव्या ।

(२) पूर्वपूर्वसूत्रटिप्पणी द्रष्टव्या ।

Digitized by Google

निमित्तीभूतानां संयुक्तानां जलादीनां तद्गुणोपलब्धेः स्नेहादिगुणोपलब्धेरित्यर्थः । अत्रायमाशयः । एकस्मिन् शरीरे पृथिवीत्यादिनानाजातिस्वीकारे साङ्कर्यप्रसङ्गो द्रव्यस्य विजातीयद्रव्यानारम्भकत्वनियमभङ्गश्च । नापि पृथिव्यादिभिर्विचित्रं द्रव्यं शरीरं जन्यते मानाभावात् । न च त्रिवृत्करणश्रुतिरेव मानमिति वाच्यम् । जलादीनां निमित्ततयैव श्रुतेरुपपत्तेः । एवमाकाशस्य रूपादिराहित्येनैकत्वेन च नारम्भकत्वं वायोरपि नीरूपतया तत्त्वम् । नापि तज्जलमात्रारब्धं नियतगन्धवत्त्वानुपपत्तेः क्लेदादिरहितेऽपि शरीरव्यवहारात् । अत एव न तत् तैजसं किंतु मानुषादिशरीरं पार्थिवमेवेति । न च क्लेदोष्मादेरुपचयापचये शरीरोपचयापचयानुपपत्तिः क्लेदोष्मादेरवयवाघटकत्वादिति वाच्यम् । क्लेदादेरवयवाघटकत्वेऽपि तद्योगे शिथिलसंयोगापन्नावयवैः शरीरस्थूलतादि तदयोगे कार्श्यादि तथान्यत्र दर्शनादिति । जलादीनां निमित्ततया प्रवेशादेव पाञ्चभौतिकत्वेन व्यपदिश्यत इति ॥ ३१ ॥

एवं तस्य पार्थिवत्वे श्रुतिरपि मानमित्याह ।

श्रुतिप्रामाण्याच्च[१] ॥ ३२ ॥

सूर्यं ते चक्षुः स्पृणोमीतिमन्त्रान्ते पृथिव्यां ते शरीरमिति हि श्रुतिः । तत्र पृथिव्यां शरीरस्य लयाभिधानेन पृथिव्या एव शरीरारम्भकत्वं प्रकृतावेव कार्यविलयादिति । एवं वरुणलोके जलीयं स्वर्गे तैजसं वायुलोके वायवीयं शरीरम् । तेष्वपि पृथिव्याद्युपष्टम्भोऽन्यथा भोगसाधनानुपपत्तिरित्याह भाष्यम् । अप्यतैजसवायव्यानि लोकान्तरे शरीराणि तेष्वपि भूतसंयोगः पुरुषार्थतन्त्र

(१) इदं तु न्यायसूचीनिबन्धे वर्तते व्याख्यातं च न्यायतत्त्वालोके।

इति । भूतसंयोगः पृथिव्युपष्टम्भः । पुरुषार्थतन्त्रो भोगसम्पादक इति ॥ ३२ ॥

समाप्तं शरीरपरीक्षाप्रकरणम् ॥

अथेन्द्रियाणि गोलकातिरिक्तत्वेन भौतिकत्वेन च परीक्षणीयानि । तत्र संशयमाह ।

कृष्णसारे सत्युपलम्भाद्व्यतिरिच्य चोपलम्भात् संशयः[1] ॥ ३३ ॥

कृष्णसारे चक्षुर्गोलके सति विषयोपलम्भात् । असति च तस्मिन्ननुपलम्भादिति पूरणीयम् । चकारेण वा व्यतिरेकदर्शनम् । गोलकमेवेन्द्रियमिति बौद्धाः । व्यतिरिच्य गोलकान्निर्गत्य विषयं प्राप्येन्द्रियेणोपलम्भाद् विषयोपलम्भादन्यथा नेति गोलकातिरिक्तमिन्द्रियमिति विशेषदर्शिन इति तटस्थानां संशयो गोलकमिन्द्रियं न वेति इन्द्रियं गोलकातिरिक्तं न वेति । अत्र व्यतिरिच्य चेत्यादिविशेषविवेचने बौद्धमतनिरासान्न संशय इति सूत्रतात्पर्यम् । तथाहि गोलकं न विषयग्राहकं तदसम्बन्धात् तदसम्बद्धेन तद्ग्रहणेऽतिप्रसङ्गात् । तथा च विषयसाक्षात्कारकरणस्यैवेन्द्रियत्वाद् गोलकस्य चातत्त्वेन नेन्द्रियत्वमिति सिद्धमिन्द्रियं गोलकातिरिक्तम् ॥ ३३ ॥

तत्रातिरिक्तत्वेऽपि न भौतिकत्वं किं त्वाहङ्कारिकत्वमितिसांख्यमतमाह ।

महदणुग्रहणात्[2] ॥ ३४ ॥

---

(१) संशयकारणप्रतिपादनार्थं सूत्रम् कृष्णसार इत्यादि वार्त्तिकम् । विप्रतिपत्तिहेतुप्रदर्शनाय सूत्रम् कृष्णसार इत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(२) सांख्यसूत्रं महदणुग्रहणादिति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

महतो वस्तुनोऽनुग्रहणात् चक्षुषा साक्षात्कारजननाच्चक्षुर्न भौतिकम् । भौतिकत्वे हि न्यूनपरिमाणेन चक्षुषा महतो व्यापनासम्भवेन तत्साक्षात्कारानुपपत्तिरिति । अथवा महदणुग्रहणादिति पाठः । अणोर्न्यूनपरिमाणस्य यथा चक्षुषा ग्रहणं तथाधिकपरिमाणस्यापि ग्रहणादित्यर्थः । तत्र महतो ग्रहणं चक्षुषो भूतत्वे न सम्भवतीत्युक्तम् । केचित्तु पूर्वसूत्रं संशयप्रदर्शनपरम् । तत्र बौद्धनिरासेन संशयनिरासकमिदं सूत्रम् । तथा च कदाचिन्महतः कदाचिदणोश्च ग्रहणाद् विषयेन्द्रियसम्बन्ध एव नियामको वाच्य इति गोलकस्य तद्बाधात् तदतिरिक्तमिन्द्रियं स्वीकार्यं यत्सम्बन्धासम्बन्धाभ्यां विषयग्रहणाग्रहणनियम इति । नन्वतिरिक्तत्वे ऽपि कथं तत्सम्बन्धोऽतिरिक्तमपि किं क्लृप्तान्तर्गतमुत नेत्यत आह । रश्म्यर्थेतीति प्राहुः । अभौतिकानीन्द्रियाणीत्यवतारभाष्यं सूत्रादौ केचिल्लिखन्ति ॥ ३४ ॥

सिद्धान्तयति ।

रश्म्यर्थसन्निकर्षविशेषात् तद्ग्रहणम्(१) ॥ ३५ ॥

रश्मि चक्षुर्गोलकावच्छिन्नं तेजः तेनार्थस्य घटादे रूपादेश्च सन्निकर्षविशेषःसंयोगसंयुक्तसमवायादिरूपस्तस्मात् । तद्ग्रहणं महदादिवस्तुग्रहणम् । दीपान्महदणुप्रकाशवद् भौतिकत्वे ऽपि सर्वव्यापकत्वमङ्गीकार्यमन्यथा तद्दोषतादवस्थ्यम् । तथा च पुरःपश्चाद्वर्तिनां सर्वेषामेव वस्तूनां ग्रहणप्रसङ्ग इति भावः ॥ ३५ ॥

---

(१) नैयायिकः सांख्यं दूषयति । रश्म्य-नम् इति तात्पर्यटीका । सिद्धान्तसूत्रम् । रश्म्यर्थेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

गोलकातिरिक्तेन्द्रियस्य बाधमाशङ्कते बौद्धः ।

तदनुपलब्धेरहेतुः[१] ॥ ३६ ॥

तद् गोलकातिरिक्तमिन्द्रियम् । न हेतुः न साक्षात्कारकारणम् । अनुपलब्धेः अनुपलब्धिबाधितत्वात् । परेषामसतोऽपि भानान्नाश्रयासिद्धिः । अथवा गोलकातिरिक्तं न साक्षात्कारकारणमिन्द्रियं तत्त्वेनाप्रतीयमानत्वादिति ॥ ३६ ॥

समाधत्ते ।

नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः[२] ॥ ३७ ॥

अनुमीयमानस्य रूपादिसाक्षात्कारः सकरणको बुद्धित्वादित्याद्यनुमानगम्यस्यायोग्यस्य वस्तुनः । प्रत्यक्षतोऽनुपलब्धिः साक्षात्काराभावः । नाभावहेतुः न सर्वकालवृत्त्यभावग्राहक इत्यर्थः । तथा च योग्यानुपलब्धिरेवाभावग्राहिका न त्वनुपलब्धिमात्रम् । योग्यता च महत्त्वे सत्युद्भूतरूपवत्त्वं निरुक्तरश्मेश्चोद्भूतरूपविरहान्न योग्यत्वमिति तदनुपलब्धिर्न तदभावसाधिकेति भावः ॥ ३७ ॥

ननु महतो द्रव्यस्य चक्षुषः कुतो नोपलम्भ इत्यत आह ।

द्रव्यगुणधर्मभेदाच्चोपलब्ध्यनियमः[३] ॥ ३८ ॥

(१) तदनुपलब्धेरहेतुः । न चाक्षुषो रश्मिर्गृह्यत इति सूत्रार्थ इति वार्त्तिकम् ।

(२) एवं तर्हीदं सूत्रं नोपलब्धेः कारणप्रतिपादकमिति वार्त्तिकम् ।

(३) उपलब्ध्यनियम इत्यन्यत्र पाठः । इदं न्यायसूचीनिबन्धे दृश्यते न्यायतत्त्वालोके च व्याख्यातम् । द्रव्यगुणधर्मभेदाच्चोपलब्ध्यनियम इति । शेषं भाष्य इति वार्त्तिकम् ।

Digitized by Google

द्रव्यमात्रस्योपलब्धिनियमो न द्रव्यगुणधर्मभेदात् द्रव्यगुणधर्मविशेषाणां प्रत्यक्षनियामकत्वात् । तत्र द्रव्यधर्मो महत्त्वरूपादिकं गुणधर्म उद्भूतत्वादिः तथा चोद्भूतरूपवत्त्वविरहादेव न चक्षुषः प्रत्यक्षं तादृशरूपविरहश्च प्रत्यक्षाभावादनुमेयः । यद्वा द्रव्यधर्मो महत्त्वोद्भूतरूपादिर्गुणधर्मोऽदृष्टभिन्नत्वादिः । उपलब्ध्यनियमो द्रव्यमात्रस्य गुणमात्रस्य च न प्रत्यक्षनियमः । चकारात् क्रियादीनामप्येवमनियमः[१] ॥ ३८ ॥

ननु चक्षुरादावुद्भूतरूपमेव कुतो न स्वीक्रियत इत्यत आह ।

कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः[२] ॥ ३९ ॥

कर्मणे कार्याय प्रत्यक्षात्मककार्याय कारितः स्वीकृत इन्द्रियाणां व्यूहो रचनाविशेषः समूह इति वा । पुरुषार्थसाधक इत्यर्थः । तथा च प्रयोजनविरहेणोद्भूतरूपं न स्वीक्रियत इति भावः । केचित्तु कर्मकारितोऽदृष्टविशेषाधीन इत्यर्थः । तथा चादृष्टविशेष एवोद्भूतरूपविरहे प्रयोजक इत्याहुः । सूत्रमिदं भाष्यकारस्येति केचित्[३] ॥ ३९ ॥

(१) अत्र अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिरित्येकं सूत्रं न्यायसूचीनिबन्धे दृश्यते । न्यायतत्त्वालोके तु तत्र कणादसम्मतिप्रदर्शनाय तत्सूत्रम् महत्यनेकद्रव्यवत्त्वाद्रूपाच्चोपलब्धिरिति दृश्यते । एवं च सूत्रमिति वार्त्तिकम् । कणादसूत्रं तु अ० ४ आ० १ सू० ८ दृश्यते ।

(२) एतत्सूत्रोक्तधारणानन्तरं शेषं भाष्य इति वार्त्तिकम् । व्याख्यातमिदं न्यायतत्त्वालोके वर्तते च न्यायसूचीनिबन्धे ।

(३) अत्र न्यायसूत्रोद्धारे मध्यभिचाराच्च प्रतिघातो भौतिकधर्म इत्येकमधिकं सूत्रं दृश्यते तत्तु कुतो न्यायतत्त्वालोके न्यायसूचीनिबन्धे च नास्ति । वार्त्तिके तु अव्यभिचारी चेति पाठः ।

नतु महत्त्वे सति रूपवत्त्वमेव प्रत्यक्षप्रयोजकमस्तु किमर्थमुद्भूतत्वं रूपविशेषणमित्यत आह ।

मध्यन्दिनोल्काप्रकाशानुपलब्धिवत् तदनुपलब्धिः[१] ॥ ४० ॥

महतो रूपवतश्चोल्काप्रकाशस्य मध्याह्नसम्बन्धिनः सौरालोकेनाभिभवादनुपलब्धिवत् तस्य चक्षुषोऽनुपलब्धिरित्यर्थः । तथा च रूपमात्रस्य व्यभिचारेण न प्रत्यक्षहेतुता । व्यभिचारवारणाय यद्यनभिभूतत्वं रूपविशेषणमुच्यते तदा प्रत्यक्षकरणतया सिद्धस्य चक्षुरादेर्व्यभिचारवारणायानुद्भूतत्वमपि रूपविशेषणं देयमिति भावः ॥४०॥

ननु चक्षुषो रूपे सौरालोकाभिभवादेव न प्रत्यक्षमित्येव किं नोच्यत इत्यत आह ।

न रात्रावप्यनुपलब्धेः[२] ॥ ४१ ॥

न चक्षूरूपं सौरालोकेनाभिभूतत्वेनाप्रत्यक्षं रात्रावप्यनुपलब्धेः । तथा च चक्षुषो रात्रावनुपलब्धिसम्पादनाय तद्रूपस्यानुद्भूतत्वमेव स्वीकार्यमिति भावः ॥ ४१ ॥

दिवसेऽपि चक्षुषो रूपस्य सौरालोकाभिभवो न भवतीत्याह ।

बाह्यप्रकाशानुग्रहाद् विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः[३] ॥ ४२ ॥

---

(१) इदं तु न्यायतत्त्वालोके व्याख्यातम् न्यायसूचीनिबन्धे ऽपि दृश्यते ।

(२) तदेतदुत्तरसूत्राङ्कं सूत्रं न रात्रावप्यनुपलब्धेरिति वार्त्तिकम् । न रात्रावपीति सूत्रमतादिति तात्पर्यटीका ।

(३) एतत्प्रतीकधारणानन्तरं दृष्टान्तव्याख्यान एवैतत् सूत्रमिति वार्त्तिकम् ।

न अभिव्यक्तिर्यत इतिव्युत्पत्त्या कार्याभावप्रयोजकतया कारणाभावस्य क्लृप्तत्वादनभिव्यक्तिपदेन उद्भूतरूपविरहो बोध्यते । तेन चक्षुषोऽनुपलब्धिर्न त्वभिभवात् । अभिभवे बाधकमाह । बाह्यप्रकाशानुग्रहात् । सौरालोकादिसहकृताच्चक्षुष इति शेषः । विषयोपलब्धेरित्यर्थः । सौरालोकाभिभूतत्वे तत्सहकारेण प्रत्यक्षजननं न स्यादभिभूतस्य कार्याक्षमत्वात् । उद्भूतरूपवत्त्वे चक्षुरालोकाद्विषयप्रकाशसम्भवेनेतरालोकापेक्षा न स्यादिति भावः ॥ ४२ ॥

नन्वभिभूतस्यापि भर्जनकपालस्थवह्नेर्दाहजनकत्वं दृष्टं तथाभिभूतस्य चक्षुषो विषयग्राहकत्वं कल्प्यम् । एवमनभिभूतालोकसंयोगस्यैव विषयप्रकाशकत्वं वाच्यं नातो वह्निप्रकाशानपेक्षा तथाऽभिभवश्च दिवसे सौरालोकेनेव रात्रावपि केनचिद्वस्तुना कल्पनीय इत्यत आह ।

अभिव्यक्तौ चाभिभवात्[(१)] ॥ ४३ ॥

अभिव्यक्तिमात्रे भवन्मतेऽभिभवकल्पनात् । अभिव्यक्तिश्च स्वस्येव परस्यापि न सम्भवति तत्प्रयोजकस्यानभिभूतत्वाभावात् । स्वाभिव्यक्तौ तस्य प्रयोजकत्वकल्पने गौरवादन्यथा भर्जनकपालस्थवह्निना परप्रकाशो भवेत् । एवं रात्रावभिभावकवस्त्वन्तरकल्पने गौरवम् । एवमुष्मादेरप्रत्यक्षाय प्रत्यक्षप्रयोजकमुद्भूतत्वं क्लृप्तं तद्विरहादेव चक्षुषोऽनुपलब्धिः । ननु चक्षुषस्तैजसत्वे किं मानमिति चेत् चक्षुस्तैजसं परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवदित्यनुमानेनैव तत्सिद्धेः । तत्र मन-

(१) इदं तु न्यायतत्त्वालोके व्याख्यातत्वात् न्यायसूचीनिबन्धे सत्त्वात् अभि-न इति तात्पर्यटीकायां सूत्रश्लोकधारणीतेन च सूत्रमिति प्रतीयते ।

मादौ व्यभिचारवारणाय सत्यन्तम् । घटादौ व्यभिचारवारणाय विशेष्यदलम् । पटादौ स्वीयरूपव्यञ्जकत्वाद् द्वितीयं परकीयेति । दृष्टान्ते प्रदीपादावसिद्धिवारणाय प्रथमं परकीयेति । प्रभाया दृष्टान्ततासम्भवात् तदपि वा नोपादेयम् । चक्षुःसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं विशेषणं देयम् । एतदनुमानं च रश्म्यर्थसन्निकर्षविशेषात् तद्ग्रहणमिति प्रागुक्तसूत्रादवसेयम् । अग्रे च स्पष्टं वक्ष्यति ॥ ४३ ॥

क्वचित् प्रत्यक्षमपि प्रमाणयति ।

नक्तञ्चरनयनरश्मिदर्शनाच्च(१) ॥ ४४ ॥

नक्तञ्चराणां बिडालादीनां गोलकरश्मिदर्शनादन्यथा तमसि तस्य प्रत्यक्षं न स्यात् । तथा च तद्दृष्टान्तेन मानुषादीनां गोलकरश्म्यनुमानमिति भावः ॥ ४४ ॥

सन्निकर्षो न हेतुरित्याशङ्कते ।

अप्राप्य ग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः(२) ॥ ४५ ॥

सिद्धान्तयति ।

कुड्यान्तरितानुपलब्धेरप्रतिषेधः(३) ॥ ४६ ॥

अप्रतिषेधः सन्निकर्षहेतुताऽप्रतिषेधः ॥ ४६ ॥

ननु सन्निकर्षहेतुता काचाद्यन्तरितविषयकप्रत्यक्षे व्यभिचारान्न सम्भवतीत्युक्तं तत् कथमप्रतिषेध इति व्यभिचारमुद्धरति ।

(१) नक्तञ्चरनयनरश्मिदर्शनाच्चेति दृष्टान्तसूत्रमिति वार्त्तिकम् । दृष्टान्ताय सूत्रम् । नक्तञ्चरेत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

(२) इदं न्यायतत्त्वालोके व्याख्यातं न्यायसूचीनिबन्धे च वर्त्तते ।

(३) इदमपि पूर्ववत् । कुड्यान्तरितानुपलब्धेरप्रतिषेधः । अप्राप्यकारित्वे इन्द्रियस्य न कुड्याद्यावरणमस्तीत्युक्तं ग्रेथे भाष्य इति वार्त्तिकम् ।

Digitized by Google

अप्रतिघातात् सन्निकर्षोपपत्तिः[1] ॥ ४७ ॥

काचादिस्वच्छद्रव्येणाप्रतिघातादप्रतिबन्धात् सन्निकर्ष उपपद्यत इत्यर्थः । एतेन चक्षुषि तेजस्त्वमपि साधितं तेजस एव स्वच्छद्रव्येणाप्रतिघातात् प्रदीपादौ तथादर्शनात् ॥ ४७ ॥

अत एव तेज एव दृष्टान्तमाह ।

आदित्यरश्मेः स्फटिकान्तरितेऽपि दाह्येऽभिघातात्[2] ॥ ४८ ॥

अभिघातात् संयोगात् ॥ ४८ ॥

शङ्कते ।

नेतरेतरधर्मप्रसङ्गात्[3] ॥ ४९ ॥

अप्रतिघातो न युक्त इतरस्य कुड्यादेः स्फटिकादेर्वा इतरस्य स्फटिकादेः कुड्यादेर्वा यो धर्मोऽप्रतिघातः प्रतिघातो वा तत्प्रसङ्गात् । तथा च कुड्यादेः स्फटिकादिधर्मप्रसङ्गेन तदन्तरितस्य प्रत्यक्षं स्फटिकादेः कुड्यादिधर्मप्रसङ्गेन स्फटिकान्तरितस्याप्रत्यक्षं वा स्यादिति भावः ॥ ४९ ॥

समाधत्ते ।

आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिवत् तदुपलब्धिः[4] ॥ ५० ॥

---

(१) इदमपि न्यायतत्त्वालोके न्यायसूचीनिबन्धे च वर्तते ।

(२) इदमपि पूर्ववत्, एतद्व्याख्यानन्तरं शेषं भाष्य इति वार्त्तिकम् । न्यायसूचीनिबन्धादौ दाह्येऽविघातादिति पाठः ।

(३) इदं च न्यायतत्त्वालोके न्यायसूचीनिबन्धे च दृश्यते ।

(४) एतद्व्याख्यानानन्तरं शेषं भाष्य इत्युक्तं वार्त्तिककृद्भिः । न्यायतत्त्वालोके व्याख्यातमिदं न्यायसूचीनिबन्धे च वर्तते ।

आदर्शे उदके च प्रसादस्वाभाव्यात् स्वच्छस्वभावत्वात् तत्संयुक्तनयनरश्मीनामुच्छलितानां मुखादौ संयोगात् मुखादिरूपोपलब्धिर्न तु भित्त्यादौ तथा भवति तथा स्फटिकादेः स्वाभाव्यात् नयनरश्म्यप्रतिघातात् तदन्तरितस्य तथात्वं न कुड्यादेस्तथास्वभावाकल्पनात् । न च वह्न्यादेर्घटादिनाऽप्रतिघातवच्चक्षुषोऽपि तेनाप्रतिघातः स्यादिति वाच्यम् । वह्न्यादेरतिवेगवत्तयाऽप्रतिघातः स्याच्चक्षुषस्तु दीपालोकादेरिव प्रतिघात एवेति ॥ ५० ॥

चक्षुषः केनचित् प्रतिघातः केनचिन्नेति नियमः कथमित्यत आह ।

दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः[१] ॥ ५१ ॥

दृष्टानामिवानुमितानामपि पदार्थानां नियोगप्रतिषेधानुपपत्तिः स्वभावप्रतिषेधो नेत्यर्थः । फलानुरोधित्वात् कल्पनाया इति भावः । यद्वा नियोग इतरधर्मकल्पनं प्रतिषेधः स्वधर्मनिषेधः तयोरनुपपत्तिः । न ह्यप्रामाणिकं कल्पयितुं शक्यते प्रामाणिकं निषेद्धुं वेति भावः । एवं घ्राणादिकमपि नासारन्ध्राद्यतिरिक्तमतीन्द्रियं प्राप्यकारित्वादिति बोध्यम् । तेषां पार्थिवत्वादिकमग्रे व्यक्तीभविष्यतीति ॥ ५१ ॥

सामान्यमिन्द्रियपरीक्षाप्रकरणम् ॥

नन्वेकमेवेन्द्रियं विषयभासकं तस्य काचाद्यप्रतिहतत्वे काचाद्यन्तरितस्य स्पार्शनापत्तिः । एवं स्पर्शाद्यग्राहकत्वविशिष्टरूपग्राहकत्वेन न चक्षुषस्तैजसत्वानुमानं स्पर्श-

(१) इदं न्यायतत्त्वालोके व्याख्यातं न्यायसूचीनिबन्धे च वर्त्तते ।

ग्राहकस्यैव रूपग्राहकत्वादिति तस्यैकत्वनिराकरणाय संशयमाह ।

स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशयः[1] ॥ ५२ ॥

केचित्तु दर्शनस्पर्शनाभ्यामित्यादिकमिन्द्रियनानात्वे युज्यत इत्युपोद्घातेनेन्द्रियनानात्वं परीक्षणीयं तत्र संशयमाह । स्थानेत्यादीत्याहुः । स्थानान्यत्वे आश्रयभेदे घटपटादीनां नानात्वदर्शनादवयवात्मकस्थानभेदेऽप्यवयविनो घटादेरेकत्वदर्शनाच्चेन्द्रियाणामेकत्वं नानात्वं वेति संशयः । स्थानभेदस्य नानात्वाप्रयोजकत्वादिति पर्यवसितार्थः ॥ ५२ ॥

अत्र पूर्वपक्षमाह ।

त्वगव्यतिरेकात्[2] ॥ ५३ ॥

सर्वेन्द्रियस्थाने त्वचोऽव्यतिरेकात् सत्त्वात् । चक्षुर्गोलकाद्यवच्छेदेनापि स्पार्शनोत्पत्तेरिति लाघवात् त्वगेवैकमिन्द्रियमस्तु तस्याश्च वायुविशेषत्वेनाप्रत्यक्षत्वमिति भावः ॥ ५३ ॥

---

(१) एके तु स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशय इति च स्थित-पन्यपङ्क्तिः । स्थाना-यः । तत्र केचिदिदं सूत्रं भाष्यमतानपेक्षं यथाश्रुति व्याचक्षते । तदवज्ञापुरःसरं भाष्यव्याख्यानं यत्तु यथाश्रुति व्याख्यानं परेषां सूत्रपाठपूर्वकमुपन्यस्यति एके त्वितीति तात्पर्यटीका । संशायकधर्मप्रदर्शनाय सूत्रम् । स्थानान्यत्व इत्यादि न्यायतत्त्वालोके वाचस्पतिमिश्राः । अत्र स्थानान्यत्वे नानात्वादित्यादि सूत्रमिति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः । यथाश्रुतसूत्रे स्थानान्यत्वे नानात्वमुक्तमिति न्यायनिबन्धप्रकाशे वर्धमानोपाध्यायाः ।

(२) त्वगव्यतिरेकादित्यस्य सूत्रतां सूचयतीति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः । पूर्वपक्षसूत्रम् त्वगव्यतिरेकादिति न्यायतत्त्वालोके वाचस्पतिमिश्राः ।

Digitized by Google

ता । अतः सूर्यग्रहणाधिकारे उपसंहारश्लोके ‘षड्विंशत्या’ इत्यत्र ‘नगविंशत्या’ तथोदयास्ताधिकारोपसंहारे ‘द्वादशभिः’ इत्यत्र त्रयोदशभिरिति पाठः समुचितम् । चतुर्वेदाचार्यलिखितानुसारेण ग्रहसमागमे २५ श्लोकाः । अतो मद्विरचितो नोपयुक्तः श्लोकः । एवमत्र योगसाधनश्लोकं गृहीत्वा स्पष्टगतौ ६८ संख्या भवेत् तदा सर्वयुतिः ३७५ । एवं चेत् ग्रहयुत्युपसंहारे षड्विंशतिस्थाने पञ्चविंशतिरिति पाठः समुचितमिति सर्वं धीमद्भिर्भृशं विचिन्त्यम् ॥

उदयास्ताधिकारे २५, स्पष्टाधिकारे ६७, अस्याधिकारस्योपसंहारपर्यन्तं ७० गृहीत्वा यदि युतिः क्रियते तदा ३६८ इयं युतिरायातीति ॥ ६५–६६ ॥

इदानीं पिशुनायेदं न देयमित्याह ।

गुरुणा न धूलिकर्म प्रतिकञ्चुककारिणे प्रदातव्यम् ।
तस्य सुकृतप्रणाशः कुरुते प्रतिकञ्चुकं योऽस्य ॥ ६७ ॥

गुरुणा महानुभावेन ज्योतिःशास्त्रविदा पुरुषेणेदं धूलिकर्म गणितं प्रतिकञ्चुककारिणे पिशुनाय न प्रदातव्यम् । योऽस्य शास्त्रस्य प्रतिकञ्चुकं निन्दां कुरुते तस्य सुकृतप्रणाशो भवतीति ॥ ६७ ॥

इदानीमात्मप्रशंसामाह ।

ग्रहमेलके यदुक्तं तत् स्थूलं स्पष्टमिह यदुक्तं तत् ।
ग्रहभमुनीन्दुच्छायाशृङ्गोन्नतिभग्रहाद्येषु ॥ ६८ ॥
सूर्यास्तमयादिष्टाद्रात्रिगताद्वेष्टभोदयास्तमयौ ।
जानाति न कश्चिदपि* ब्राह्मोक्तादन्यतन्त्रज्ञः ॥ ६९ ॥

स्पष्टार्थमार्याद्वयम् ॥ ६८–६९ ॥

इदानीमुपसंहारमाह ।

भमुनिग्रहविक्षेपग्रहोदयास्तमयनाडिकाद्येषु ।

---

* ब्राह्मं मुक्त्वाऽन्यतन्त्रज्ञः । इति पाठान्तरम् ।

अध्यायो भग्रहयुतिरार्याणां सप्ततिर्दशमः ॥ ७० ॥

स्पष्टार्थम् ॥ ७० ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते ग्रहताराद्विक्षेपाधि-
कारो दशमः ॥ १० ॥

सम्पूर्णा पूर्वा दशाध्यायी ।

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितो भग्रहयोः सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्त-
नूतनतिलके भग्रहयुत्यधिकारो दशमः ॥ १० ॥

अथ तन्त्रपरीक्षाध्यायः ।

तत्र तावत् कान् दोषान् वक्ष्यामीत्याह ।

येऽज्ञानपटलरुद्धदृशोऽन्यं ब्राह्माद्वदन्ति सिद्धान्तम् ।
तेषां युगादिभेदे ये दोषास्तान् प्रवक्ष्यामि ॥ १ ॥

अज्ञानपटलेनाज्ञानावरणेन रुद्धे दृशौ येषां ते । शेषं स्पष्टार्थम् ॥ १ ॥

इदानीं संहिताकारमतं निराकरोति ।

युगमाहुः पञ्चाब्दं रविशशिनोः संहिताङ्गकारा यत् ।
अधिमासावमरात्रस्फुटतिथ्यज्ञानतस्तदसत् ॥ २ ॥

संहिताङ्गकारा लगधादयः । तेषां मते अधिमासानामवमरात्राणामूनाहानां स्फुटतिथीनां च ज्ञानं न भवति । अतस्तदज्ञानतस्तन्मतमसत् । संप्रति यो ग्रन्थो लगधकृतो ज्यौतिषवेदाङ्गनाम्ना प्रसिद्धस्तत्रैव युगं पञ्चाब्दमित्यादि सर्वं स्थूलं विलिखितमस्ति । आचार्यमते तदेव संहिताकारमतं वराहमिहिरमते च तदेव पितामहमतम् । तत्र त्रिंशद्भिः सौरमासैरेकोऽधिमास इत्यादि सर्वं स्थूलं लिखितमस्ति तदर्थं पञ्चसिद्धान्तिका विलोक्या ॥ २ ॥

इदानीं 'दो चन्दा दो सुज्जा' इत्यादि जैनमतं निराकरोति ।

भानि चतुष्पञ्चाशद्द्वौ द्वावर्केन्दवौ जिनोक्तं यत् ।
ध्रुवमत्स्यस्यावर्तो भवति यतोऽह्ना ततस्तदसत् ॥ ३ ॥

स्पष्टार्थम् । 'किं गण्यं तव वैगुण्यं द्वैगुण्यं यो वृथाऽकथाः' इत्यादि भास्करोक्तं तदीयगोलाध्यायभुवनकोशे एतदनुरूपमेव । तद्व्याख्ययाऽस्यापि व्याख्या स्फुटा ॥ ३ ॥

इदानीमार्यभटोक्तयुगं निराकरोति ।

आर्यभटो युगपादांस्त्रीन् यातानाह कलियुगादौ यत् ।
तस्य कृतान्तर्यस्मात् स्वयुगाद्यन्तौ न तत् तस्मात् ॥ ४ ॥

आर्यभटः कलियुगादौ त्रीन् युगपादान् यातान् आह कथितवान्। यच्च प्रसिद्धं तद्धयन्यतः । (द्रष्टव्या मध्यमाधिकारेऽष्टाविंशतिश्लोकस्य मदीया व्याख्या) यस्मात् कारणात् तन्मते तस्य स्वयुगाद्यन्तौ तदेक-युगस्यादिरन्यस्यान्त इति द्वौ कृतान्तः कृतयुगमध्ये भवतस्तस्मात् तद्युगं न सत् ।

अत्रोपपत्तिः । आर्यभटमते एकयुगान्तादन्यस्यारम्भात् कलियुगादि-पर्यन्तं त्रयो युगपादाः $= \frac{३ \times ४३२००००}{४} = ३२४००००$ । आचार्यमते च,

$$कृ + त्रे + द्वा = \frac{४३२०००० \times ९}{१०} = ३८८८०००$$ द्वयोरन्तरे वर्षाणि $= ६४८०००$ एतानि चाचार्यमतेन संध्याधिकत्वात् कृतयुगमध्येऽत आर्य-भटोक्तयुगाद्यन्तौ कृतयुगान्तः । इहाचार्येण स्वकृतयुगमध्ये आर्यभटोक्तौ युगाद्यन्तौ प्रतिपादितौ । तत्र यदि आचार्योक्तयुगादौ ग्रहाणां मेषमुखे स्थितिः स्यात् तदेदं सपडनमुचितमन्यथा वाग्बलमेतदिति ज्योतिर्विदां स्फुटमेव ॥ ४ ॥

इदानीमार्यभटग्रन्थयोर्मतभेदं निराकरोति ।

युगरविभगणाः ख्युघृिति यत् प्रोक्तं तत् तयोर्युगं स्पष्टम् ।
त्रिशती रव्युदयानां तदन्तरं हेतुना केन ॥ ५ ॥

आर्यभटेन ग्रन्थद्वयं रचितम् । तत्रैकस्मिन् ग्रन्थे युगरविभगणाः ख्युघृ $= ४३२००००$ । सावनदिनानि $= १५७७९१७५००$ सृष्टिश्च लङ्कायां सूर्योदये इत्यभिहितम् । अन्यस्मिन् ग्रन्थे युगरविभगणास्तावन्त एव ४३२०००० । सावनदिनानि $= १५७७९१७८००$ । सृष्टिश्च लङ्कायामर्धरात्रे । तेनायमर्थः । आर्यभटेन 'युगरविभगणाः ख्युघृ-इति यत् तयोर्ग्रन्थयोरे-कमेव स्पष्टं युगं प्रोक्तं तर्हि केन हेतुना रव्युदयानां त्रिशती तदन्तरं तयोर्ग्रन्थयोर्युगसावनदिनान्तरं यतो मतद्वयेन रविभगणसाम्येऽर्थाद्युगव-र्षसाम्ये युगसावनदिनमध्येऽन्तरं त्रिशती कथमुत्पन्नमिति वदतो व्याघात-दोष इति ॥ ५ ॥

इदानीमार्यभटस्फुटयुगं खण्डयति ।

युगवर्षादीन् वदता चैत्रसितादेः समं प्रवृत्तान् यत् ।
तदसत् यतः स्फुटयुगं तत् स्थैर्यान्मन्दपातानाम् ॥ ६ ॥

आर्यभटेन लघ्वार्यभटीयतन्त्रे चैत्रसितादेः सकाशाद्युगपद्युगव-र्षादीनां प्रवृत्तिर्लिखिता । चन्द्रमन्दोच्चपातौ विहायान्ये मन्दोच्च-पाताश्च स्थिराः पठिता अतस्तन्मते युगादौ सर्वेषां मेषादौ स्थितिर्नेति स्फुटमिति । तेनायमर्थः । आर्यभटेन चैत्रसितादेः सकाशात् समं युगपत् प्रवृत्तान् युगवर्षादीन् वदता कथयता यत् स्फुटयुगमुक्तं तदसत् । यतो मन्दपातानां स्थैर्यात् तत् स्फुटयुगं कथमिति ।

तथा चाचार्यभटः ।

'युगवर्षमासदिवसाः समं प्रवृत्तास्तु चैत्रशुक्लादेः ।
कालोऽयमनाद्यन्तो ग्रहभैरनुमीयते क्षेत्रे' ॥ ६ ॥

इदानीं मन्दोच्चं न स्थिरमिति प्रतिपादयति ।

ग्रहभुक्तेरूनायां मन्दोच्चं भवति शीघ्रमधिकायाम् ।
उच्चगतौ मन्दोच्चं न विना भुक्त्येन्दुवर्ज्यमतः ॥ ७ ॥

यत उच्चगतौ ग्रहभुक्तेरूनायां मन्दोच्चमधिकायां च शीघ्रं शी-घ्रोच्चं भवति । अत आर्यभटमते इन्दुवर्ज्यमिन्दुमन्दोच्चं विहायान्येषां मन्दोच्चं भुक्त्या विना न सिध्यति तद्भगणानां पाठाभावादिति ॥ ७ ॥

इदानीं पाता न स्थिरा इति प्रतिपादयति ।

आर्याष्टशते पाता भ्रमन्ति दशगीतिके स्थिराः पाताः ।
भुक्त्येन्दुपातमपमण्डले भ्रमन्ति स्थिरा नातः ॥ ८ ॥

आर्यभटीयतन्त्रे आर्या अष्टाधिकं शतमतस्तत् तन्त्रमार्याष्टश-तमिति चोच्यते । तत्र दशभिरार्याभिर्भगणादिमानानि लिखितानि ता आर्या दशगीतिकमित्युच्यते । तत्र चन्द्रस्य पातभगणा एव पठिता नान्ये-षाम् । आर्याष्टशते गोलपादे ग्रहस्थानवर्णने च पाता भ्रमन्तीत्यभि-हितम् । तेनायमर्थः । आर्यभटेनाऽऽर्याष्टशते पाता भ्रमन्ति दशगीतिके

चेन्दुपातं मुक्त्वा विहायान्ये स्थिराः पाताः सन्ति इति लिखितम् । गोलयुक्त्या च सर्वे पाता अपममण्डले क्रान्तिमण्डले भ्रमन्ति अतस्ते स्थिरा नेति वदतो व्याघातदोषः । भौमादिमन्दपातानां वर्षशतेनापि गतिर्नोपलक्ष्यत इति स्वसमये आर्यभटेन स्थिराः पठिता इति वस्तुतो न किमपि दूषणमिहाचार्यस्याग्रह एव स्पष्टः ॥ ८ ॥

इदानीमार्यभटराहुं खण्डयति ।

आर्यभटो जानाति ग्रहाष्टगतिं यदुक्तवाँस्तदसत् ।
राहुकृतं न ग्रहणं तत्पातो नाष्टमो राहुः ॥ ९ ॥

आर्यभटो ग्रहाष्टगतिमष्टानां ग्रहाणां चलनं जानातीति कश्चिदार्यभट एव वा यदुक्तवान् तदसत् । यतस्तन्मते राहुकृतं ग्रहणं परन्तु वस्तुतो राहुकृतं ग्रहणं न भवति । तत्पातश्चाष्टमो ग्रहो राहुर्न भवति । अर्थात् तद्गणितेन यश्चन्द्रपातः स दृष्टियोग्यो नेति । वाग्बलमेतत् । आर्यभटेन राहुकृतं ग्रहणं नोक्तम् ।

तथा च तद्वाक्यम् ।

छादयति शशी सूर्यं शशिनं महती च भूच्छाया । (गोलपा· श्लो· ३७) ॥ ९ ॥

इदानीं पुनरार्यभटं दूषयति ।

न समा मनुयुगकल्पाः कल्पादिगतं कृतादियातं च ।
स्मृत्युक्तैरार्यभटो नातो जानाति मध्यगतिम् ॥ १० ॥

आर्यभटोक्ता मनुयुगकल्पाः स्मृत्युक्तैर्मनुस्मृत्याद्युक्तैर्न समास्तथा तदुक्तं कल्पादिगतं कृतादियातं च स्मृत्युक्तेन न सममत आर्यभटो मध्यगतिं मध्यग्रहाणां चलनं न जानाति । इति सर्वं मध्यगत्यध्यायस्य ९, २८ श्लोकतः स्फुटम् ॥ १० ॥

इदानीमार्यभटमतेन कल्पादौ वारो न समीचीन इत्याह ।

ओङ्कारो दिनवारो गुरुरौदयिकोऽस्य भवति कल्पादौ ।
न भवत्यर्को यस्मादोङ्कारो विस्तरस्तस्मात् ॥ ११ ॥

Digitized by Google

आर्यभटेन स्वतन्त्रे 'गुरुदिवसात् भारतात् पूर्वं'मित्यनेन कल्पादौ गुरुवारः स्वीकृतः । तेनायमर्थः । यस्मादस्यार्यभटस्योक्तारः स्वीकारः कल्पादावौदयिको दिनवारो गुरुर्भवति रविर्न भवति तस्मादस्योक्तारः स्वीकारो विस्तर आधाररहितोऽर्थादप्रामाणिकः (स्तरः स्तरणमास्तरणम् । विगतः स्तरो यस्य स विस्तर इति) ।

आर्यभटमते द्वापरान्ते कल्पाद्गतयुगानि ४३२३ (मध्यमाधिकारे २८ श्लोकटीका द्रष्टव्या)

एतानि युगसावनदिवसैः–१५७७९१७५०० गुणानि जातः सावनाहर्गणः = ४३२ × १५७७९१७५०० + $\frac{१५७७९१७५०० \times ३}{४}$

= ४३२ × १५७७९१७५०० + ३९४४७९३७५ × ३ । अयं सप्ततष्टो जातो द्वापरान्ते वारः = ५ × ५ + ३ × ३ = २५ + ९ = ३४ = ६ । अयं सैकः कलियुगादौ वारः ७ = ० । अतो यदि गुरुवाराद्गणनाऽऽरभ्यते तदा कलियुगादौ गतवारः ० । वर्तमानो गुरुरेव सिध्यत्यत आर्यभटमतेन कल्पादौ गुरुवार आयाति ॥ ११ ॥

इदानीमार्यभटस्य वारप्रवृत्तिं दूषयति ।

सूर्योदयश्चतुर्था दिनवारा यदुवाच तदसदार्यभटः ।
लङ्कोदये यतोऽर्कस्यास्तमयं प्राह सिद्धपुरे ॥ १२ ॥

आर्यभटेन 'शीघ्रक्रमाच्चतुर्था भवन्ति सूर्योदया दिनपाः' । इति स्वतन्त्रे लिखितम् । च(१), बु(२), शु(३), र(४), कु(५), गु(६), श(७) । कक्षाक्रमेण ग्रहाणां संस्था । तत्र शीघ्रक्रमात् सूर्यादयो ग्रहाः र, चं, मं, बु, गु, शु, श । उपरिष्ठा ग्रहा मन्दगतयोऽधःस्थाः शीघ्रगतयो भवन्ति । ते च रवितः शीघ्रक्रमादधःस्थग्रहगणनया विपरीतगणनया रवेरनन्तरं शुक्रस्तदनन्तरं बुध इत्यादिगणनयेति स्फुटम् । अथ गोलपादे च तेनैवार्यभटेन 'उदयो यो लङ्कायां सोऽस्तमयः सवितुरेव सिद्धपुरे' इत्युक्तम् । तेनायमर्थः । सूर्योदयश्चतुर्था दिनवारा दिनपा भवन्तीति

Digitized by Google

यदार्यभट उवाच तदसत् । यतः स एव लङ्कोदये सिद्धपुरेऽर्कस्यास्तमयं प्राह । अर्थाद्यदि लङ्कोदये वारादिस्तर्हि सिद्धपुरेऽपि कथं न स एव वारादिरतो वारगणना स्थिरा न । यतस्तदुक्ताः सूर्योदयचतुर्थ्यां दिनपाः स्थिरा न समीचीनाः । आर्यभटेनैकदेशस्थितिवशेन दिनवारगणना प्रदर्शिताऽतोऽसद्दूषणमेतत् ॥ १२ ॥

इदानीं पुनरार्यभटवारादिं निराकरोति ।

अधिकैः शतैश्चतुर्भिर्वर्षसहस्रैश्चतुर्दशभिरेकः ।

युगयातैर्दिनवारान्तरमौदयिकार्धरात्रिकयोः ॥ १३ ॥

आर्यभटेन यन्थद्वयं रचितम् । एकस्मिन् युगसावनदिनानि १५७७९१७५०० । लङ्कायामर्कोदये सृष्टिः । अन्यस्मिन् युगसावनदिनानि १५७७९१७८०० । लङ्कायामर्धरात्रे सृष्टिः । उभयत्र युगवर्षसंख्या ४३२०००० एतावती तुल्यैव । अतो यन्थद्वयतो वारगणनया युगवर्षैर्दिनशतत्रयान्तरं तथाऽनुपातेनैकदिनवारान्तरं च $\frac{४३२००००}{३००}$ = १४४०० एतैर्युगयातवर्षैः । तेनायमर्थः । आर्यभटमतेनौदयिकार्धरात्रिकयोर्दिनवारमध्ये चतुर्दशभिर्वर्षसहस्रैश्चतुर्भिः शतैर्वर्षैरधिकैर्युगयातैर्दिनवारान्तरं दिनवारयोरेकमन्तरं पततीति वारगणना न स्थिरेति ॥ १३ ॥

इदानीमार्यभटग्रहो खण्डयति ।

औदयिकाद्दिनभुक्तेस्तुर्यांशेनार्धरात्रिको भवत्यूनः ।

कतरं स्फुटं न निश्चितमनयोः स्फुटमेकमपि नातः ॥ १४ ॥

आर्यभटस्य प्रथमग्रन्थेनौदयिको ग्रहो य आगच्छति तस्माद् द्वितीयग्रन्थागत आर्धरात्रिको ग्रहो दिनगतिचतुर्थांशेनोनो भवति अर्थाद्द्वयोर्ग्रहयोरन्तरे ग्रहगतिचतुर्थांशकला भवन्ति । यतोऽनयोः कतरं स्फुटं शास्त्रमित्यार्यभटेन न निश्चितमतस्तन्मतेनैकमपि न स्फुटमिति ॥ १४ ॥

इदानीमार्यभटोक्तभूव्यासं खण्डयति ।

षोडशगणियोजन परिधिं प्रतिभूव्यासं पुलावदता ।

आत्मज्ञानं ख्यापितमनिश्चयस्तनिकृतकन्यात् ॥ १५ ॥

(नृषि—योजनभूपरिधिं प्रति भूव्यासं पुनर्ञिला वदता ।
आत्मज्ञानं ख्यापितमनिश्चयस्तत्कृतव्यासः ॥ १५ ॥)
(अत्र कोष्ठान्तर्गतो मच्छोधितः पाठः साधुः ।)

आर्यभटेन 'ङहस्तो ना' चतुर्हस्तः पुरुष इत्युक्तम् । तथा नृषियोजनं नरप्रमाणानां षि—अष्टसहस्रं योजनमुक्तम् । तैर्योजनैर्या भूपरिधिरस्ति तं प्रति भूव्यासस्त्व ञिला ञि सहस्रं ला पञ्चाशत् पञ्चाशदधिकसहस्रयोजनानि भूव्यासस्तेनार्यभटेनोक्तः स च न समीचीनः । आचार्ययोजनमानमार्यभटयोजनमानं त्वेकमेव परन्तु भूव्यासमाने भेदोऽत आचार्यस्य 'आर्यभटेन पुनर्भूव्यासं ञिला वदताऽऽत्मज्ञानमात्रमेव ख्यापितं प्रसिद्धीकृतं वस्तुतस्तत्कृतो भूव्यासोऽनिश्चयोऽस्ति न समीचीन' इति खण्डनम् । वाग्बलमेतद्युक्त्यप्रतिपादनादिति ।

तथा चार्यभटः ।

'नृषि योजनं ञिला भूव्यास' इति (गीतिकापा० ५ श्लो०)
'ङहस्तो ना (गीतिकापा० ६ श्लो०) ॥ १५ ॥

भूव्यासस्याज्ञानाद्व्यर्थं देशान्तरं तदज्ञानात् ।
स्फुटतिथ्यन्ताज्ञानं तिथिनाशाद्ग्रहणयोर्नाशः ॥ १६ ॥

भूव्यासस्याज्ञानाद्देशान्तरं व्यर्थमशुद्धं भवति । तदज्ञानाद्देशान्तराज्ञानात् स्फुटतिथ्यन्तस्याज्ञानम् । तिथिनाशाद्ग्रहणयोर्नाश इति प्रसिद्धमेव ॥ १६ ॥

इदानीं भूभ्रमणं खण्डयति ।

प्राणेनैति कलां भूर्यदि तर्हि कुतो व्रजेत् कमध्वानम् ।
आवर्त्तनमुर्व्याश्चेन्न पतन्ति समुच्छ्रयाः कस्मात् ॥ १७ ॥

आर्यभटेन भूश्चला भगणाः 'स्थिरा' इति कल्पितम् । यथाऽन्येऽहोरात्रासुभिर्भ्रमादेकं भदिनं मन्यन्ते तथाऽऽर्यभटोऽहोरात्रासुभिः स्वाक्षोपरि भूभ्रमणं मन्यते । तेनायमर्थः । यदि भूः प्राणेनैकेनासुना एकां

कलामेति गच्छति तर्हि नरः कुतः कस्मात् स्थानात् कमध्वानं कं मार्गं प्रव्रजेत् । अर्थात् मानवाः श्येनादयः पक्षिणश्च पृथिव्याः प्राग्भ्रमणेन स्वस्थानतोऽन्यत्र गताः पुनः स्वस्थानं न प्राप्नुयुस्तयोर्ध्वा भूमेर्यद्यध ऊर्ध्व-मावर्त्तनं भ्रमणं भवेत् तर्हि समुच्छ्रयाः प्रासादभूधरादयः कस्मान्न पतन्ति । अतो भूमेः प्राग्भ्रमणं नेत्याचार्याशयः । भूवायुसहिताया भूमेः प्राग्-भ्रमणं भवतीत्यज्ञात्वाऽऽचार्येणेदं खण्डितमतोऽसदूषणमेतत् ॥

तथा चार्यभटः ।

अनुलोमगतिर्नौस्थः पश्यत्यचलं विलोमगं यद्वत् ।
अचलानि भानि तद्वत् समपश्चिमगानि लङ्कायाम् ॥

अत्रार्यभटाभिप्रायमबुद्ध्वैव परमेश्वरेण स्वटीकायामन्यथा व्या-ख्यातं तत् सुधीभिर्नादरणीयमिति । यदि परमेश्वरव्याख्या समीचीना स्यात् तर्हि ब्रह्मगुप्तखण्डनस्यावसरो नैव भवेत् 'प्राणेनैति कलां भ'मिति तत्कल्पितः पाठोऽपि नार्यभटसंमत इति सुधीभिर्भृशं विचिन्त्यम् ॥ १७ ॥

इदानीं मन्दपरिधिखण्डनं चाह ।

औदयिको यः परिधिर्विषमेऽन्योऽन्यः समे भुजस्य गुणः ।
तदसद्विषमान्तफलं यतो न युग्मादिफलतुल्यम् ॥ १८ ॥

आर्यभटेन भौमादीनां परिधयो विषमपदेऽन्ये समे चान्ये पठिताः । ततः समपदीयकेन्द्रभुजज्या समपदीयमन्दपरिधिगुणा भांश-हृता फलचापं मन्दकलाः । एवं विषमपदीयकेन्द्रभुजज्या विषमपदीय-मन्दपरिधिगुणा भांशहृता फलचापं मन्दकलाः । तेनायमर्थः । आर्यभ-टेन विषमेऽन्यः समे पदे चान्यो य औदयिको मन्दपरिधिर्भुजस्य मन्द-केन्द्रभुजज्याया गुणः पठितस्तदसदस्ति । यतः सन्धिस्थाने ओजान्ते युग्मादौ च विषमपदीयपरिधिना यद्विषमान्ते फलं तदेव तदन्येन समप-दीयपरिधिना युग्मादौ यत् फलं तेन न तुल्यम् । अतसदूषणमेतत् । आर्य-भटेन पदयोः परिधिपाठभेदादवान्तरेऽनुपातः परिधिर्वाह्य इति सूचि-तम् । एवमिष्टकालिकमन्दपरिधिवशाच्च फलभेदः ।

Digitized by Google

तथा चार्यभटः ।

झार्धानि मन्दवृत्तं शशिनः छ ग छ घ ढ छ झ यथोक्तेभ्यः ।

झ ग्ड ग्ल झ्न द्ड तथा शनिगुरुकुजभृगुबुधोच्चशीघ्रेभ्यः ॥

मन्दात् ङ ख द ज डा वक्रिणां द्वितीये पदे चतुर्थे च ।

जा ण क्ल ढ्ल झ्नो ज्याच्छीघ्रात् गियिङश कुवायुकक्षाऽन्त्या ॥

झार्धानि सार्धैश्चतुर्भिरपवर्तितानि वृत्तानि ज्ञेयानि । यथोक्तेभ्यः सूर्यबुधशुक्रकुजगुरुशनिभ्यः । वक्रिणां बुधशुक्रकुजगुरुशनीनाम् ।

चन्द्रस्य मन्दपरिधिः ─ ७ । सूर्यस्य ३ ।

अन्येषां प्रथमतृतीयपदयोः । बु॰ ७ । शु॰ ४ । कु॰ १४ । गु॰ ७ । श॰ ९ ।

द्वितीयचतुर्थपदयोः । बु॰ ५ । शु॰ २ । कु॰ १० । गु॰ ८ । श॰ १३ ।

एवं शन्यादीनां शीघ्रपरिधयः ।

प्रथमतृतीयपदयोः श॰ ९ । गु॰ १६ । कु॰ ५३ । शु॰ ५९ । बु॰ ३१ ।

द्वितीयचतुर्थपदयोः श॰ ८ । गु॰ १५ । कु॰ ५१ । शु॰ ५७ । बु॰ २९ ।

इह संख्यासङ्केतार्थे गणकतरङ्गिणी द्रष्टव्या ॥ १८ ॥

इदानीं शीघ्रपरिधीन् खण्डयति ।

विषमेऽन्योऽन्यो युग्मे परिधिर्गुणकः क्रमोत्क्रमज्यानाम् ।
चक्रार्धे फलनाशो न भवति यस्मादसत् तदपि ॥ १९ ॥

एवं शीघ्रपरिधिभेदात् स्पष्टाधिकारस्य १५ सूत्रानुसारेण विषमपदेऽन्यः समपदे चान्यः परिधिः क्रमोत्क्रमज्यानां गुणो भवति । एवं चक्रार्धे युग्मपदान्ते विषमपदादौ च सन्धित्वात् परिधिद्वयवशेन यस्मात् फलनाशो न भवति तस्मादार्यभटोक्तं तच्छीघ्रपरिधिमानं चासदिति । मन्दपरिधिखण्डनवदिदं खण्डनमप्यसत् ॥ १९ ॥

इदानीमनुपातेन यदि परिधिस्तन्मतेन स्फुटः क्रियते
तदाऽपि न समीचीन इति निराकरोति ।

व्यासार्धहृतो बाहुः परिधिविशेषाहतः फलोनयुतः ।
प्रथमोऽधिकोनको यत् तदसत् पदयोः परिधिपाठात् ॥२०॥

Digitized by Google

बाहुर्भुजज्या परिधिविशेषाहतः परिध्यन्तरहृतो व्यासार्धेन त्रिज्यया हृतः । प्रथमः परिधिर्यदि द्वितीयादधिकोनकस्तदा क्रमेण प्रथमः परिधिः फलोनयुतः स्फुटः परिधिर्भवेदिति यत् स्पष्टपरिध्यानयनं प्रसिद्धं तदप्यार्यभटमतेनासद्भवति । कस्मात् । पदयोः परिधिपाठात् । अर्थात् तन्मते पदयोः परिधिद्वयम् । तत्र कुत्र चित् प्रथमः समपदीयः कुत्र चिच्च विषमपदीयः परिधिर्भवति । अतः संस्कारविधिर्व्यभिचरति । वाग्बलमेतत् । प्रथमान्यमतेऽपि तात्कालिकसंस्कारस्य समीचीनत्वादिति सुधीभिर्भृशं विचिन्त्यम् ॥ २० ॥

इदानीं साधारण्येन परिधीन् निराकरोति ।

विषमसमयोर्यदि द्वौ परिधी किं सूर्यचन्द्रयोर्नोक्तौ ।
घटते च कथं चिदियं स्फुटक्रियौदयिकतन्त्रोक्ता ॥ २१ ॥

यदि तन्मते विषमसमयोः पदयोर्भेदाद् द्वौ परिधी अपेक्षितौ तदा गोलयुक्तिसाम्यात् तेन सूर्यचन्द्रयोर्द्वौ द्वौ परिधी किं नोक्तौ ।

अत आर्यभटीयौदयिकतन्त्रोक्तेयं स्फुटक्रिया कथं चिच्च घुणाक्षरन्यायेन कदाचित् घटत इत्यर्थः । यस्मिन् तन्त्रे सूर्योदये अहसाधनं तत्रौदयिकतन्त्रम् । सूर्यचन्द्रयोर्न द्वौ द्वौ परिधी अन्येषां च द्वौ द्वौ । इत्यनेन न काचिद्धानिः फलवासनाविचित्रत्वादत इदमपि वाग्बलमिति ॥ २१ ॥

इदानीमर्काग्राग्रवशेनार्कस्य सममण्डलप्रवेशं निराकरोति ।

उत्तरगोलेऽग्रायां विषुवज्ज्यातो यदुक्तमूनायाम् ।
सममण्डलगस्तदसत् क्रान्तिज्यायां यतो भवति ॥ २२ ॥

आर्यभटेन स्वगोलपादे 'उत्तरगोले यदाऽग्रा विषुवज्ज्यातोऽक्षज्यात ऊना भवति तदैव रवेः सममण्डलप्रवेशः' इत्यभिहितं परन्तु गोलयुक्त्या तु सौम्यापमज्याऽक्षज्योना तदा रवेः सममण्डलप्रवेशो भवत्यतो विषुवज्ज्यात उत्तरगोलेऽग्रायामूनायां रवेः सममण्डलप्रवेशो भवतीति यदुक्तमार्यभटेन तदसदतः क्रान्तिज्यायां विषुवज्ज्यातो न्यूनायामर्कस्य सममण्डलप्रवेशो भवति ।

आर्यभटवाक्यं च।

परमापक्रमजीवामिष्टज्यार्धाहतां ततो विभजेत्।

ज्यालम्बकेन लब्धाऽर्काग्रा पूर्वापरे क्षितिजे॥

सा विषुवज्ज्योना चेद्विषुवदुदग्लम्बकेन सङ्गुणिता।

विषुवज्ज्यया विभक्ता लब्धः पूर्वापरे शङ्कुः॥ (गोलपा० श्लो० ३०–३१)॥ २२॥

इदानीमार्यभटोक्तलम्बनावनत्यानयनं निराकरोति।

व्यासार्धेन विभक्ता दृग्गतिजीवा चतुर्गुणा लब्धम्।

लम्बननाड्यः पञ्चदशगुणितया त्रिज्यया भक्ता॥ २३॥

दृक्क्षेपज्या भुक्त्यन्तराहता लब्धमवनतिर्भवति।

स्फुटयोजनकर्णाभ्यां भूव्यासेन च विना स्पष्टे॥ २४॥

आर्यभटेनास्मिन् सति लघुनि किमर्थं महत् कृतं कर्म।

गणिताज्ञानाज्जाड्यं विजानता यदि ततः सुतराम्॥२५॥

यदि रविकर्णेन त्रिज्या तदा भूव्यासार्धेन किं जातं रविपरमलम्बनम्। एवं चन्द्रयोजनकर्णभूव्यासार्धाभ्यां चन्द्रपरमलम्बनमार्यभटेनानीतं तत इष्टलम्बनं नतिश्चानीता। एवं योजनकर्णभूव्यासार्धवशेन क्रियागौरवमतः खण्डयति यद्दृग्गतिजीवा चतुर्गुणा व्यासार्धेन त्रिज्यया विभक्ता लब्धं लम्बननाड्यः स्युः। दृक्क्षेपज्या च रविचन्द्रभुक्त्यन्तरहता पञ्चदशगुणया त्रिज्यया हृता लब्धमवनतिर्भवति। एवं ते स्पष्टे लम्बनावनती स्फुटयोजनकर्णाभ्यां विना भूव्यासेन च विना सिद्धे भवतः। एतादृशेऽस्मिन् लघुनि साधने सत्यपि योजनकर्णवशेनार्यभटेन किमर्थं महत् कर्म कृतम्। यदि गणिताज्ञानात् कृतं तर्हि तस्य जाड्यमेव। यदि मदुक्तप्रकारं विजानता कृतं तर्हि ततोऽपि सुतरामतिशयेन तस्य जाड्यं यतो लघु कर्म ज्ञात्वाऽपि किमर्थं गौरवं कर्म लिखितमिति।

इहाचार्योक्तलम्बनानयनोपपत्तिः 'त्रिभोनलग्नस्य रवेश्च शङ्क्वोर्वा दृग्ज्ययोर्वर्गवियोगमूल'मित्यादिभास्करविधिना स्फुटा॥ २३–२५॥

Digitized by Google

इदानीमार्यभटलम्बनं खण्डयति ।

लम्बनमृणधनमुक्तं पूर्वापरयोस्तिथौ दिनार्धस्य ।
युक्तोऽभावो यदि भवति तदृणधनयोस्तिथौ कतरत् ॥ २६ ॥

आर्यभटेन पूर्वापरकपालयोर्यथाक्रमं तिथौ लम्बनमृणं धनं चोक्तम् । तदुक्तं स्यात् यद्यपि दिनार्धस्य लम्बनस्याभावो भवेत् परन्तु दिनार्धे लम्बनं भवति तत् तिथौ ऋणधनयोर्मध्ये कतरद्युक्तं तन्मते । आर्यभटेन दृक्क्षेपमण्डलवशतः पूर्वापरकपालयोर्लम्बनमुक्तमत इदं दूषणं न सत् ।

तथा च चतुर्वेदाचार्यः ।

'स्याद्दूषणमेतद्यद्यार्यभटो वदेत् ।

तद्वाक्यं च ।

दृक्क्षेपमण्डलमपि प्राग्लग्नं स्यात् त्रिराश्यूनम् ।

दृक्क्षेपमण्डलं चानेन वाक्येन त्रिविभलग्नं भवति । तच्च चापमण्डलस्यात्युच्चता युज्यते यतः सर्वदाऽपमण्डलार्धमेव दृश्यतेऽतस्तच्च तस्य लम्बनचयस्तस्मादार्यभटस्य नायं दोषः । भास्करादीनामेव भवतु तैर्न बुद्धस्तदभिप्राय इति' ।

एतेन ब्रह्मसिद्धान्तोपरि भास्करादीनां प्राचीनानां ज्योतिर्विदां च टीकेति स्फुटं भवति ॥ २६ ॥

इदानीमार्यभटोक्तलम्बनक्षेत्रसंस्थानं दूषयति ।

दृक्क्षेपज्या बाहुर्दृग्ज्या कर्णोऽनयोः कृतिविश्लेषात् ।
मूलं दृग्गतिजीवा संस्थानमयुक्तमेतदपि ॥ २७ ॥

दृक्क्षेप एव ज्या दृक्क्षेपज्या त्रिविभनतांशज्या भुजः । रविदृग्ज्या कर्णः । अनयोः कृतिविश्लेषात् कृत्यन्तरात् मूलं दृग्नतिजीवा भवति । भास्करादीनामार्यभटानुयायिनां मतेन भुजकोटिकर्णानां संस्थानमयुक्तमस्ति । एतदपि चिन्त्यम् । अर्थात् तेषां मतेन स्थानविशेषे दृग्नतिदृक्क्षेपयो व्यभिचरत इति । तद्यथा । यत्र चतुर्षष्टिरक्षांशास्तत्र मिथु-

नान्तस्थेऽर्के तेषामुदयज्याऽग्राद्या व्यासार्धतुल्या । अर्कोदयकाले तेषां मध्यज्याऽग्रादृग्गतलग्ननतांशज्या च व्यासार्धतुल्या भवत्यपममण्डलस्य क्षितिजानुकारत्वात् । ततो 'मध्यज्योदयजीवासंवर्गे व्यासदलहृते' इत्यादिनितदीयविधिना फलं विचिभदृशमान्तरज्या त्रिज्यातुल्यं भवति । तन्मध्यज्ययोर्वर्गान्तरमूलं तन्मते दृक्क्षेपः शून्यसमोऽत्र आर्यभटपक्षे तदाऽवनतेरभावः परन्तु गोलयुक्त्या तदा परमावनतिर्भवति । अतस्तदीयो दृक्क्षेपोऽस्मिन् स्थाने व्यभिचरति । अथ तत्रस्य एव रवौ तन्मते दृक्क्षेपः शून्यसमो रविदृग्ज्या च त्रिज्यासमा । अतस्तयोर्वर्गान्तरपदं दृग्गतिज्जीवा त्रिज्यासमा जाता तद्वशतः परमलम्बनं घटीचतुष्टयमार्यभटपक्षत उत्पद्यते । गोलयुक्त्या च क्रान्तिवृत्तस्य क्षितिजानुकाराद्दृङ्मण्डलगत्या परमं लम्बितोऽपि चन्द्रः स्थानीयलम्बितकदम्बप्रोतयोरैक्यात् तत्र स्फुटलम्बनाभावः । एवमार्यभटपक्षतः संस्थानमयुक्तमिति सद्दूषणम् । चतुर्वेदाचार्येणापीदमेवोदाहरणं प्रदर्शितम् ॥ २७ ॥

इदानीं येर्लम्बनावनत्योरानयनं दृशज्यया कृतं तन्मतं खण्डयति ।

लम्बनघटिकालिप्ता दृग्ज्ययाऽर्केन्दुदृग्गतिकलानाम् ।
यस्माच्च समास्तस्माद्दृग्ज्यया लम्बनं स्थूलम् ॥ २८ ॥

पुलिशादिभिर्दृग्ज्यया या लम्बनघटिकाकला उत्पादितास्ता आचार्यसाधितानामर्केन्दुदृग्गतिकलानाम् (अर्केन्द्वोर्दृग्गती ये ताभ्यां याः पृथक् पृथक् कला लम्बनकलास्तासां) यस्माच्च समास्तस्माद् दृग्ज्यया लम्बनं स्थूलं भवति । २७ श्लोके यथा क्षेत्रसंस्थानमयुक्तं प्रदर्शितं तथाऽत्र पृथक् पृथक् रविचन्द्रयोर्लम्बनक्षेत्रे अयुक्ते । तद्वशतः स्फुटलम्बनं स्थूलमिति । सूर्यग्रहणाधिकारस्य प्रथमश्लोकव्याख्यायां चन्द्रज्या दृग्ज्या चास्माभिः प्रदर्शिता । वस्तुतो लम्बनमशुद्धमेवायाति तर्हि इहाचार्येण स्थूलग्रहणं किमर्थं कृतमित्यत्र ३२ श्लोकटीकायां चतुर्वेदाचार्यः । 'अत्र स्थूलग्रहणं महापुरुषतया कृतमन्यथा वासनाविरोधाल्लम्बनावनती एव तेनैव ज्ञाते इति' ॥ २८ ॥

इदानीं भास्करं दृक्क्षेपसंस्थानं प्रदर्शयति ।

त्रिभलग्ने दृक्क्षेपमण्डलं तदपमण्डलयुतौ ज्या ।
मध्या दृक्क्षेपज्या नार्यभटोक्ताऽनया तुल्या ॥ २९ ॥

वित्रिभलग्ने यद्दृक्क्षेपमण्डलं दृङ्मण्डलं तस्यापमण्डलस्य च या युतिस्तस्यां युतौ मध्या या ज्याऽर्थात् खस्वस्तिकाद्युतिपर्यन्तं दृक्क्षेपमण्डले ये भागास्तेषां ज्या दृक्क्षेपज्या (दृक्क्षेप एव ज्या) अनया तुल्याऽऽर्यभटोक्ता न भवति ॥ २९ ॥

इदनीं दृक्क्षेपाशुद्धितोऽन्यद्दूषयति ।

दृक्क्षेपज्याऽनोऽसत् तन्नाशादवनतेर्नाशः ।
अवनतिनाशात् ग्रासस्योनाधिकता रविग्रहणे ॥ ३० ॥

अतः पूर्वप्रतिपादितसंस्थानत आर्यभटीया दृक्क्षेपज्याऽसज्जाता । तन्नाशाद्दृक्क्षेपाशुद्धेरवनतेर्नाशस्तस्या गणनायास्तदधीनत्वात् । अवनतिनाशात् (स्फुटशरनाशस्ततो) रविग्रहणे ग्रासस्योनाधिकता भवतीति स्फुटम् ॥ ३० ॥

इदानीं श्रीषेणविष्णुचन्द्रकृतार्कग्रहणं निराकरोति ।

पञ्चज्यया यतोऽर्कग्रहणं श्रीषेणविष्णुचन्द्रकृतम् ।
आर्यभटोक्तान्यनयोरर्कग्रहदूषणानि ततः ॥ ३१ ॥

यतः श्रीषेणविष्णुचन्द्रकृतमर्कग्रहणं चाऽऽर्यभटोक्तवत् पञ्चज्ययैव । ततस्तस्मादार्यभटोक्तान्यर्कग्रहदूषणान्यनयोः श्रीषेणविष्णुचन्द्रयोरपि ज्ञेयानि ॥ ३१ ॥

इदानीं निर्गलितार्थमाह ।

एवं विचार्यमाणे पञ्चज्यालम्बनं महास्थूलम् ।
स्थूलाऽवनतिश्च तथा दृशज्यया लम्बनावनती ॥ ३२ ॥

एवं पूर्वोक्तदूषणे विचार्यमाणे पञ्चज्यालम्बनं पञ्चज्यया लम्बनं महास्थूलं जातमवनतिश्च स्थूला जाता । तथा दशज्ययाऽप्येवमेव लम्बनावनती महास्थूले ॥ ३२ ॥

Digitized by Google

इदानीं स्वसिद्धान्तमाह ।

नाडीचतुष्कविधिना सर्वत्र समो यतस्ततः स्थूलः ।
मानार्थं कर्म महत् कृतमार्यभटेन लघुनि सति ॥ ३३ ॥

यतो मदुक्तेन नाडीचतुष्कविधिना लम्बनानयनप्रकारः सर्वत्र समः समानोऽर्थात् कुत्र चिन्न व्यभिचरति ततस्तस्मात् कारणादन्योक्तः प्रकारः स्थूलो ज्ञेयः । तथा मदुक्ते साधने लघुनि सति आर्यभटेन लम्बनमानार्थं महत् कर्म कृतं तच्चादरणीयं सिद्धान्तप्रपञ्चकुशलैरिति ॥ ३३ ॥

इदानीमार्यभटोक्ताक्षजदृक्कर्म निराकरोति ।

विक्षेपगुणाऽक्षज्या लम्बकभक्ता ग्रहे धनमृणं यत् ।
उक्तमुदयास्तमययोर्न प्रतिघटिकं यतस्तदसत् ॥ ३४ ॥

आर्यभटेनाक्षसद्भावेन यौ ग्रहाणामुदयास्तमयौ तयोः 'अक्षज्या विक्षेपगुणा लम्बकेन लम्बज्यया भक्ता' इत्यक्षजं दृक्कर्म यद्ग्रहे धनमृणं वोक्तं तद्यतः प्रतिघटिकमर्थात् प्रवहवशेन नित्योदयास्तयोः प्रतिवेलं नोक्तमतस्तदानयनमसदेकदेशीयत्वादिति ।

अत्र चतुर्वेदाचार्यः ।

'असद्दूषणमेतत् सामान्येन तन्त्रोक्तत्वादिति' ॥ ३४ ॥

इदानीमार्यभटोक्तमायनं दृक्कर्म खण्डयति ।

त्रिज्याकृतिभक्ता विक्षेपापक्रमगुणोत्क्रमज्येन्दोः ।
अयनान्ते यदृणधनं तत् तस्यादौ ततोऽसत् तत् ॥ ३५ ॥

इन्दोश्चन्द्रस्योत्क्रमज्या विक्षेपापक्रमगुणा विक्षेपेण शरेण गुणाऽपक्रमेण परमापक्रमज्यया च गुणा ततस्त्रिज्याकृतिभक्ता फलमायनदृक्कर्मैकमेति यदुक्तमार्यभटेन तत् ततस्तस्मात् कारणाच्चासत् । कस्मात् । यतोऽयनान्ते गोलसन्धौ यदृणधनं फलमुत्पद्यते तत् तस्य मते आदावयनादावेवोत्पद्यतेऽतस्तदसदित्यर्थः । गोलयुक्त्या खेटकोटिफलं समुचितं तच्चार्यभटेन खेटभुजफलं कृतं तेनायनादौ ग्रहे कोटिः शून्यमिता भुजः परमो नवतिसमः । गोलयुक्त्या तच्चायनचलनाभावादायनं दृक्कर्म

Digitized by Google

शून्यमार्यभटमतेन च तत्र भुजस्य परमत्वात् तत् फलमुत्पद्यते यच्च गोलयुक्त्या गोलसन्धौ परमायनवलनत्वादुत्पद्यत इति । अतस्तदसत् ।

अत्र चतुर्वेदाचार्यः । 'सदूषणमेतद्यत आर्यभटीयं वाक्यमेतदर्थे—

विक्षेपापक्रमगुणमुत्क्रमज्यं विस्तरार्धकृतिभक्तम् ।'

अत्र भटदीपिकायां परमेश्वरः । 'सायनचन्द्रस्योत्क्रमज्या कोट्या उत्क्रमज्येत्यर्थः'। एवं चेत् तदाऽऽर्यखण्डनं न समीचीनम् । इदं कर्म क्रमज्यया कर्तव्यमार्यभटादिभिरुत्क्रमज्यया यत् कृतं तत्र तथ्यमिति भास्करखण्डनं वस्तुतो गोलयुक्तियुतं वास्तवमिति स्फुटं चापवेचकुशलानाम् ॥ ३५ ॥

इदानीं दृक्कर्माज्ञानाद्ये दोषास्तानाह ।

दृक्कर्माविज्ञानात् कालाविज्ञानमकथितत्वाच्च ।
कालाज्ञानात् शङ्कोरज्ञानं कोटिनाशोऽतः ॥ ३६ ॥
शशिशङ्कोः प्राच्यपरा कोटिः कोटिभुजकृतियुतेर्मूलम् ।
तिर्यक् कर्णो न भवति यतोऽर्कचन्द्रान्तरं कर्णः ॥ ३७ ॥
कोटिश्रवणाज्ञानात् शशिनः शृङ्गोन्नतिर्विसंवदति ।
उदयास्तयोर्दिनकृतः प्रतिघटिकमतीव चाज्ञानात् ॥ ३८ ॥

दृक्कर्माविज्ञानादकथितत्वात् कालसाधनानयनस्याकथितत्वाच्च कालाविज्ञानं कालाज्ञानात् शङ्कोरज्ञानमतः शङ्कोरज्ञानात् कोटिनाशः । ततश्चन्द्रशृङ्गवतो या शङ्कोः प्राच्यपरा कोटिः साधिता तस्या नाशो भुजस्यापि नाशः । ततः कोटिभुजकृतियुतेर्मूलं तिर्यक् कर्णोऽपि न भवति । यतो रविचन्द्रान्तरं रविचन्द्रबिम्बान्तरसूत्रमेव कर्णस्तस्य नाशे महान् विरोधः । एवं कोटिश्रवणाज्ञानाद् दिनकृतः सूर्यस्योदयादस्ताद्वा चन्द्रस्य प्रवहवशेन प्रतिघटिकं प्रतिवेलमुदयास्तयोश्चातीवाज्ञानात् शशिनश्चन्द्रस्य शृङ्गोन्नतिर्विसंवदति विसंवादमायाति न घटत इत्यर्थः ॥ ३६-३८ ॥

इदानीं शृङ्गोन्नतौ चाऽऽर्यभटोक्तं शुक्लं दूषयति ।

अर्केन्द्वन्तरघटिका व्यस्तज्या चन्द्रमानगुणिता यत् ।
व्यासविभक्ता शुक्लं यतो न दृक्तुल्यमसदस्मात् ॥ ३९ ॥

अर्केन्द्वन्तरघटिकातो येऽन्तरांशा रविचन्द्रयोस्तेषां व्यस्तज्योत्क्रमज्या चन्द्रबिम्बमानगुणिता व्यासेन द्विगुणत्रिज्यया विभक्ता शुक्लं भवतीत्यार्यभटोक्तं यतो दृक्तुल्यं सर्वदा नास्मात् तच्छुक्लमसत् ।

आचार्येणेदमानयनं दिनशृङ्गोन्नत्यर्थं शृङ्गोन्नत्यध्याये प्रदर्शितमार्यभटेन सर्वकालिकशृङ्गोन्नत्यर्थं तदुक्तमतोऽसदिति ।

अत्र चतुर्वेदाचार्यः ।

'चन्द्रान्तरस्थितघटिकानां प्रागानीतानामुत्क्रमेण या ज्या साऽर्केन्द्वन्तरघटिकाव्यस्तज्योच्यते रविचन्द्रान्तरस्थानां कालांशानामुत्क्रमज्येत्यर्थः । युज्यते रविचन्द्रान्तरस्थानां भागानामपमण्डलभोगेनोत्क्रमजीवया शुक्लानयनम् । असद्दूषणमेतत् । यत आर्यभटीयोऽयमर्थो नास्ति । शृङ्गोन्नतौ च तेनैतावदेव सूचितम् ।

भूरविभानां गोलार्धानि स्वच्छायया विवर्णानि ।
अर्धानि यथासारं सूर्याभिमुखानि दीप्यन्ते ॥

इत्यवस्थिते यथा गोलवासनया शृङ्गोन्नतिर्न विरुध्यते तथा व्याख्यातुं युज्यत इति' ।

मन्मते चेहाचार्य आर्यभटानुयायिनां भास्करादीनां शुक्लं दूषयति । शिष्यधीवृद्धिदे तथैव तत्प्रोक्तानयनोल्लेखादिति ॥ ३९ ॥

इदानीमार्यभटसाधितचन्द्रदिनगतशेषं दूषयति ।

प्राक् प्रागुदिताभ्यधिकः पश्चादुदितोनकोऽपरे व्यस्तः ।
कालो यदछायार्थं तदसत् स्फुटभुक्तिगमनात् प्राक् ॥ ४० ॥

प्राक् प्राक्क्षितिजे प्रागुदिताभ्यधिकः कार्यः । पश्चादुदितोनकः कार्यः । अर्थात् प्राक्क्षितिजे यदि चन्द्रः प्रागुदितस्तदा सोऽधिकेन तात्कालिकलग्नेन समः कार्यः । चन्द्रभोग्यकालस्य लग्नभुक्तकालस्य मध्यो-

दयानां च योगः कार्य इत्यर्थः । एवं यदीष्टलग्नानन्तरं चन्द्रोदयस्तदा लग्नभोग्यकालस्य चन्द्रभुक्तकालस्य मध्योदयानां च योगः कार्यः । अपरे प्रत्यक्क्षितिजे तु पूर्वोक्ततो व्यस्तस्तदा चन्द्रस्य गतो वा शेषः कालः स्यादिति । एवमार्यभटेन छायातो यः कालः साधितस्तन्मानमसज्ज्ञेयं प्राक्स्फुटभुक्तिगमनात् । अर्थाद्यदि चन्द्रो नक्षत्रवत् स्थिरस्तदाऽऽर्यभटकर्मणा लग्नात् कालसाधनवत् कालो भवेत् परन्तु स्फुटभुक्त्या चन्द्रः प्राग्गच्छति अतोऽसकृत्कर्मणा तात्कालिकचन्द्रोदयास्तलग्नवशेन स्फुटकालसाधनं युक्तमत आर्यभटोक्तं सकृत् कालसाधनं न समिति ।

अत्र चतुर्वेदाचार्यः ।

'अयमप्यर्थस्तत्र (आर्यभटतन्त्रे) नास्ति तस्मादसद्दूषणमेतत् स्यात् । सद्व्याख्यातॄणां यद्भवति तद्भवतु का नः क्षतिः' ॥ ४० ॥

इदानीं दिनगतघटिकाद्यज्ञाने ये दोषास्तान् वक्ति ।

उदितानुदितास्तमितावशेषकालान्न वेत्ति यः स कथम् ।
आर्यभटज्ञः शशिनश्छायाशृङ्गोन्नती वेत्ति ॥ ४१ ॥

आर्यभटज्ञ आर्यभटतन्त्रज्ञो वाऽऽर्यभट एव ज्ञः पण्डित इत्यार्यभटज्ञः । शेषं स्पष्टार्थम् ॥ ४१ ॥

इदानीं पुनरार्यभटं दूषयति ।

स्वयमेव नाम यत् कृतमार्यभटेन स्फुटं स्वगणितस्य ।
सिद्धं तदस्फुटत्वं ग्रहणादीनां विसंवादात् ॥ ४२ ॥
जानात्येकमपि यतो नार्यभटो गणितकालगोलानाम् ।
न मया प्रोक्तानि ततः पृथक् पृथग्दूषणान्येषाम् ॥ ४३ ॥
आर्यभटदूषणानां संख्या वक्तुं न शक्यते यस्मात् ।
तस्मादयमुद्देशो बुद्धिमताऽन्यानि योज्यानि ॥ ४४ ॥

आर्यभटेन स्वयमेव स्वगणितस्य नाम स्फुटमिति यत् कृतं ग्रहणादीनां विसंवादात् तदस्फुटत्वं सिद्धम् । अर्थात् पूर्वदर्शितग्रहणादि-

दोषैव तद्गणितस्यास्फुटत्वं सिद्धमतस्तेन व्यर्थमेव स्वगणितस्य स्फुटं नामकरणं कृतमिति ।

यतो गणित-काल-गोलानां मध्ये चार्यभट एकमपि न जानाति । ततस्तस्मादेषां गणित-काल-गोलानां पृथक् पृथग्दूषणानि मया न प्रोक्तानि । अर्थात् तद्गणितपादे तत्कालपादे तद्गोलपादे च दूषणबाहुल्यमस्ति किं तदुल्लेखेन ।

यस्मादार्यभटदूषणानां मया संख्या वक्तुं न शक्यते तस्मादयं पूर्वप्रतिपादितो दोषोच्चय उद्देश उदाहरणरूप एव ज्ञेयः । तदुदाहरणबलेन बुद्धिमताऽन्यानि दूषणानि योज्यानि । इति सर्वमाचार्यस्यानर्गलवाक्यम् ।

अत एव चतुर्वेदाचार्यः ।

'स्पष्टार्थमिदमार्यात्रयम् । राजाज्ञेयम्' । अर्थादीदृशानर्गलवाक्यप्रतिपादनेनाचार्यो निर्भयो राजाज्ञया प्रतीयतेऽन्यथा विदुषामीदृशं वाक्यं वक्तुमर्हमिति ॥ ४२–४४ ॥

इदानीं विशेषमाह ।

कालान्तरेण दोषा येऽन्यैः प्रोक्ता न ते मयाऽभिहिताः ।
किं ते दूष्येष्वथ दूषकेषु कोशोऽत्र येयः स्यात् ॥ ४५ ॥

अन्यैरार्यभटानुयायिभिर्भास्करादिभिरार्यभटतन्त्रे कालान्तरेण यत्नादिषु ये दोषाः प्रोक्तास्ते चात्र मया नाभिहिताः । दूष्येषु दुष्टजनेषु । अथ दूषकेषु च ते तव प्रति कोंशः किमत्र येयो लभ्यः स्यात् । आर्यभटपक्षवादिने 'ते' प्रयोगः कृत आचार्येण । यदि दूष्यदूषकाणां गणना क्रियेत तर्हि मम किं लभ्यो भवेदिति हेतोर्मया ते दोषा न लिखिता इति ।

अत्र चतुर्वेदाचार्यः ।

'स्पष्टार्थेयं नियोजना च' ॥ ४५ ॥

इदानीं श्रीषेणादीन् दूषयति ।

श्रीषेणविष्णुचन्द्रप्रद्युम्नार्यभटलाटसिंहानाम् ।
ग्रहणादिविसंवादात् प्रतिदिवसं सिद्धमज्ञत्वम् ॥ ४६ ॥

श्रीषेण–विष्णुचन्द्र–प्रद्युम्न–आर्यभट–लाटसिंहानां प्रतिदिवसं प्रतिदिनमज्ञत्वं आद्यं द्विगुणं द्विगुणोत्तरं वर्धते । कस्मात् । ग्रहणादि-विसंवादात् ग्रहणादिषु दृग्विरोधादिति ॥ ४६ ॥

इदानीं दूषणे विशेषमाह ।

युक्त्याऽऽर्यभटोक्तानि प्रत्येकं दूषणानि योज्यानि ।
श्रीषेणप्रभृतीनां कानि चिदन्यानि वक्ष्यामि ॥ ४७ ॥

आर्यभटोक्तानि प्रत्येकं दूषणानि युक्त्या श्रीषेणप्रभृतीनामपि योज्यानि तेषामपि तथोक्तत्वात् । अथ तेषां कानि चिदन्यानि विशिष्टानि दूषणानि चाहं वक्ष्यामीति ॥ ४७ ॥

इदानीं तेषां दूषणान्याह ।

लाटात् सूर्यशशाङ्कौ मध्याविन्दूच्चचन्द्रपातौ च ।
कुजबुधशीघ्रबृहस्पतिसितशीघ्रशनैश्चरान् मध्यान् ॥ ४८ ॥
युगयातवर्षभगणान् वासिष्ठाद्विजयनन्दिकृतपादात् ।
मन्दोच्चपरिधिपातस्पष्टीकरणाद्यमार्यभटात् ॥ ४९ ॥
श्रीषेणेन गृहीत्वा रत्नोच्चयरोमकः कृतः कन्था ।
एतानेव गृहीत्वा वासिष्ठो विष्णुचन्द्रेण ॥ ५० ॥
अनयोर्न कदाचिदपि ग्रहणादिषु भवति दृग्गणितैक्यम् ।
यद्भवति तद्घुणाक्षरमतोऽस्फुटाभ्यां किमेताभ्याम् ॥ ५१ ॥

'श्रीषेणाचार्यकृतो रोमकसिद्धान्तो यश्च वासिष्ठो विष्णुचन्द्रेण तयोर्दूषणमाहार्याचतुष्टयेने'ति चतुर्वेदाचार्योक्तिः । तेनायमर्थः । श्रीषेणेन लाटात् लाटदेवकृतात् सिद्धान्तात् सूर्यचन्द्रौ चन्द्रोच्चचन्द्रपातौ च गृहीत्वा कुजादीन् मध्यान् युगयातवर्षभगणान् वासिष्ठाद्वसिष्ठसिद्धान्ताद्विजयनन्दिकृतपादात् विजयनन्दिकृतात् पादकरणादधमकरणाच्च गृहीत्वा मन्दोच्चपरिधिपातस्पष्टीकरणाद्यं चार्यभटात् गृहीत्वा रत्नोच्चयरोमको भस्मसमूहरूपो रोमकः कन्था कृतः । तत्र भस्मरूपाणि सर्वाणि वस्तून्यपवित्राणि । अत एव रोमकः कन्थाकारो यत्र मासि-

न्यानां भस्मादीनामेवोच्चयः। एतानेव सर्वान् गृहीत्वा विष्णुचन्द्रेण वासिष्ठो वसिष्ठसिद्धान्तः कृतः। अनयोर्ग्रहणादिषु कदा चिदपि दृष्टिगणितैक्यं न भवति। कदा चिद्यद्दृग्गणितैक्यं भवति तद्घुणाक्षरं घुणाक्षरन्यायेन भवति न तद्गणितकर्मणा। अत एताभ्यामस्फुटाभ्यां रोमकवासिष्ठाभ्यां किमिति।

अत्र चतुर्वेदाचार्यः।

'स्पष्टार्थमार्याचतुष्टयम्। कुलशोभेयमाचार्यस्य'।

वर्णोच्चादृशी वाणी ('कन्या' घुणाक्षरमित्यादि) आचार्येणानुचिते स्थानेऽत्र तयाऽवगम्यते आचार्यकुलनीचता। यतः पण्डितकुलोत्पन्नानां नेदृशी वाणी भवतीति॥ ४८–५१॥

इदानीमार्यभटस्यान्यद्दूषणमाह।

नीचोच्चवृत्तमध्यस्य गोलपादेन नाम कृतमुच्चम्।
तस्योच्चो न भवत्युच्चो यतस्ततो वेत्ति नोच्चमपि॥ ५२॥

गोलपादेनार्यभटेन नीचोच्चवृत्तमध्यस्य नीचोच्चवृत्तकेन्द्रस्य नामोच्चं कृतम्। परन्तु यतस्तस्य उच्चो न भवति स च भुवो दूरे तिष्ठति। तत आर्यभट उच्चमपि न वेत्तीति स्फुटम्।

अत्र चतुर्वेदाचार्यः।

'वाग्जालमेतत्'॥ ५२॥

इदानीं स्थिरपातमन्दान् दूषयति।

अन्या विक्षेपकला मन्दान्यत्वात् फलाधिकाः स्पष्टाः।
यस्मान्महायुगादौ न राहुमन्दाः स्फुटास्तस्मात्॥ ५३॥

यस्मात् पातानां स्थिरत्वान्महायुगादावप्यन्या विक्षेपकलाः सिध्यन्ति सपातमन्दस्पष्टभुजभावात्। एवं फलाधिकाः स्पष्टाश्चान्ये सिध्यन्ति मन्दान्यत्वात् तस्मात् तदुक्ता राहुमन्दा न स्फुटाः। महायुगादौ सर्वे मेषमुखे भवन्ति तत्र शराभावोऽपि युक्तः। पातानां सत्त्वे तत्र महच्छर उत्पद्यते। एवं मन्दोच्चानां भावे मन्दफलमुत्पद्यते यद्वशाद्ग्रहादीनां न मेषमुखे स्थितिरिति तद्राहुमन्दा न समीचीना इति॥५३॥

इदानीं विष्णुचन्द्रादीनामयनचलनं खण्डयति ।

परमाल्पा मिथुनान्ते द्युरात्रिनाड्योऽर्कगतिवशादृतवः ।
नायनयुगमयनवशात् स्थिरमयनद्वितयमपि तस्मात् ॥ ५४॥

अस्मदादीनां परमाल्पा द्युरात्रिनाड्यो दिवसाधिकवशाद्या रात्रिस्तस्या नाड्यो मिथुनान्ते मिथुनान्तस्थे रवावेव भवन्ति । अर्कवशात्रिरयणार्कवशादृतवश्च भवन्ति । अतोऽयनवशाच्चायनयुगमर्थाद्यथा ग्रहचलनाद्ग्रहयुगं मेषान्मीनान्तपर्यन्तं भवति तथाऽयनचलनवशादयनयुगं नोत्पद्यते तस्मादयनद्वितयमपि स्थिरमिति ।

विष्णुचन्द्रेणायनयुगमुक्तं तथा च तद्वाक्यम् ।

'तस्य चाद्य युगं रुद्रकृतनन्दाष्टकेन्दवः १८९४११ ।
अयनस्य युगं प्रोक्तं ब्रह्मार्कादिमतं पुरा'—इति ॥

मुञ्जालमते चायनयुगभगणाः १९९६६९ ।

अत्र चतुर्वेदाचार्यः ।

'असद्दूषणमेतदस्मात् संप्रत्येव मिथुनान्ते न रात्रिदिनयोः परमापचयोपचयौ' ॥ ५४ ॥

इदानीं महायुगलक्षणं श्रीषेणादियुगखण्डनं चाह ।

यद्युगवधिर्महायुगमुक्तं श्रीषेणविष्णुचन्द्राद्यैः ।
तत् स्थूलं दृग्लिप्ताः महायुगादौ ग्रहेषु यतः ॥ ५५ ॥

येषां सर्वेषां ग्रहभगणानां पातमन्दोच्चशीघ्रोच्चानां युगवधिरर्थात् सर्वेषां मेषादिप्रवृत्तेः पुनर्यावता कालेन मेषादिप्रवेशस्तदेव महायुगमुच्यत इति । श्रीषेणविष्णुचन्द्राद्यैर्यद्युगमुक्तं तत् स्थूलं यतस्तन्मतेन महायुगादौ ग्रहेषु दृग्लिप्ताः शरकला मेषादितश्च क्रान्तिवृत्तस्थानकलाश्चोत्पद्यन्ते । अर्थात् तन्मतेन यदि मन्वादिप्रणीते स्मृतिसंमते महायुगादौ ग्रहगणना क्रियते तदा भौमादीनां न मेषमुखे स्थितिरित्याचार्याभिप्रायः । वस्तुतः श्रीषेणप्रणीते रोमके 'युगमन्वन्तरकल्पाः' इत्याचार्योक्तमध्यमाधिकारवचनेन न महायुगादिचर्चेति । अतोऽत्र महायुगवचनेनाचार्योक्तमहायुगखण्डनमिति स्फुटम् ॥ ५५ ॥

इदानीं पुनः श्रीषेणादियुगं खण्डयति ।

कदिनादौ स्मृतिषूक्तं ग्रहभोत्पत्तिर्दिनक्षये प्रलयः ।
तान्यतिबहूनि यस्मात् महायुगेऽतोऽप्रसिद्धमिदम् ॥ ५५ ॥

कदिनादौ ब्रह्मदिनादौ ग्रहनक्षत्रोत्पत्तिर्दिनक्षये ब्रह्मदिनावसाने च ग्रहभानां प्रलय इति स्मृतिषूक्तमस्ति । एवं ब्रह्मदिनसमे महायुगे यस्मात् तानि श्रीषेणाद्युक्तानि युगानि अतिबहूनि भवन्ति । अत इदं तदुक्तमप्रसिद्धं न कुत्रापि स्मृत्यादौ तच्चर्चा । अतोऽनेकयुगग्रहणेन गौरवकर्मणा किमिति । वाग्जालमेतत् । यतोऽनेकयुगग्रहणेनापि ग्रहगणनायां न काचिद्धानिस्तत्स्वभगणग्रहणादिति स्फुटं गणितविदामिति ॥ ५६ ॥

इदानीं पादकरणानि दूषयति ।

प्रतिदिवसविसंवादाद् ग्रहतिथिकरणर्क्षदिवसमासानाम् ।
ग्रहणग्रहयोगादिषु पादं पादेन कः स्पृशति ॥ ५७ ॥
अक्कुचितिविजयनन्दिप्रद्युम्नादीनि पादकरणानि ।
यस्मात् तस्मात् तेषां न दूषणान्यत्र लिखितानि ॥ ५८ ॥

ग्रह-तिथि-करण-नक्षत्र-दिवस-मासानां तथा ग्रहण-ग्रहयोगादिषु च प्रतिदिवसविसंवादात् प्रत्यहं दृग्विरोधात् पादं करणाधमं कः पादेनापि स्पृशति अधोऽधमाऽङ्गेषु अधोवर्त्तित्वात् पादोऽधमस्तथा दृग्गणितयोरसाम्यात् पादमधमं यत् करणं तत् पादेनापि स्पर्शानर्हं 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्'—इति न्यायात् । तस्मान्मलमयस्य खण्डनेन वाणीमालिन्यमात्रमेव । 'पादं पादेन न स्पृशेत्'—इति स्मृत्यादिषु तत्स्पर्शनिषेधाच्चेति ।

यस्मादक्कुचिति-विजयनन्दि-प्रद्युम्नादीनि पण्डितैर्निर्मितानि करणानि सर्वाणि पादकरणानि करणाधमानि तस्मात् 'पादं पादेन कः स्पृशति'—इति न्यायात् मया तेषां दूषणान्यत्र न लिखितानीति ।

अत्र चतुर्वेदाचार्यः ।

'यथार्यभटादयो दूष्यन्ते तथ पादेनापि पादकरणानि कः स्पृशति । का तेषु गणनेत्यर्थः' ।

ग्रहतिथिकरणर्क्षदिवसमासानामित्यत्र योगपद्याभावात् स्पष्टीकरणाध्याये योगसाधनं नाचार्यस्येति स्पष्टं प्रतीयते ॥ ५७–५८ ॥

इदानीं दूषणान्युपसंहरति ।

इति बहुधा विवदन्ते ग्रहार्थिनः साग्रहा इव प्रसभम् ।
ब्राह्मस्फुटसिद्धान्ते रवीन्दुभूयोगमज्ञात्वा ॥ ५९ ॥

एवं ब्राह्मस्फुटसिद्धान्ते आचार्यकृतेऽस्मिन् सिद्धान्ते यो रविः । इन्दुः । भूः भूपरिमाणम् । योगो ग्रहयुत्याद्यधिकारः । तत् सर्वमज्ञात्वा ग्रहार्थिनो ज्योतिर्विदः प्रसभं हठात् साग्रहा आग्रहिण इव बहुधा विवदन्ते विवादं कुर्वन्ति दृग्गणितैक्ययोरसाम्यादिति आचार्यस्यात्मप्रशंसेव ।

अत्र चतुर्वेदाचार्यः ।

'एतद्वाक्यमाचार्यस्येति' ॥ ५९ ॥

इदानीमितिकर्त्तव्यतामाह ।

तन्त्रभ्रंशे प्रतिदिनमेवं विज्ञाय धीमता यत्नः ।
कार्यस्तस्मिन् यस्मिन् दृग्गणितैक्यं सदा भवति ॥ ६० ॥

तन्त्रभ्रंशे सति तदीयतन्त्रगणनया दृग्विरोधे सति एवं पूर्वोक्त प्रतिदिनं स्पष्टीकरणाद्यं वेधादिना विज्ञाय तस्मिन् तन्त्रे बीजादिना तथा यत्नः कार्यो यथा दृग्गणितैक्यं भवति । एवं यस्मिन् तन्त्रे सदा दृग्गणितैक्यं भवति तदेव तन्त्रमादरणीयमिति ।

अत्र चतुर्वेदाचार्यः ।

'मध्यस्थमवलम्ब्य स्वार्थं कुरुत इत्यर्थः' ॥ ६० ॥

इदानीं स्वसिद्धान्तप्रशंसामाह ।

चन्द्ररविग्रहणेन्दुच्छायादिषु सर्वदा यतो ब्राह्मे ।
दृग्गणितैक्यं भवति स्फुटसिद्धान्तस्ततो ब्राह्मः ॥ ६१ ॥

यतो ब्राह्मे ब्रह्मसिद्धान्ते मद्रचितेऽस्मिन् तन्त्रे चन्द्ररविग्रहणेन्दुच्छायादिषु सर्वदा दृग्गणितैक्यं भवति ततस्तस्मादयं ब्राह्मो मदीयः एव स्फुटसिद्धान्त आदरणीय इति ॥ ६१ ॥

इदानीं गोलज्ञप्रशंसामाह ।

गोलज्ञो जानात्येषां सर्वं दूषणानि कथितानि ।
आर्यभटाद्युक्तानां तन्त्राणां दूषणाध्याये ॥ ६२ ॥

सर्वा गोलज्ञ इह दूषणाध्याये एषामार्यभटाद्युक्तानां तन्त्राणां कथितानि दूषणानि जानाति मूर्खोऽस्य प्राचीनतन्त्रदूषणेन मामुपहसन्तो निन्दयिष्यन्तीत्येवाचार्याशयः ।

अत्र चतुर्वेदाचार्यः ।

'गोलज्ञः सर्वेषामेव सर्वाणि दूषणानि वेत्तीत्यर्थः' ॥ ६२ ॥

इदानीमुपसंहारमाह ।

इति कथिततन्त्रगणकान् पठितैरपि दूषणैः करोत्यज्ञान् ।
तन्त्रपरीक्षार्याणां त्रिषष्टिरेकादशोऽध्यायः ॥ ६३ ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते दूषणाध्यायो
नाम एकादशोऽध्यायः ॥ ११ ॥

इत्येवमयमार्याणां त्रिषष्टिस्तन्त्रपरीक्षानामैकादशोऽध्यायः पठितैर्दूषणैरपि कथिततन्त्रगणकान् आर्यभट-श्रीषेण-विष्णुचन्द्रानुयायिनोऽज्ञान् मूर्खान् करोति । खण्डनमाकर्ण्य ते विवर्णवदना मूर्खा इव भवन्तीत्यर्थः ॥ ६३ ॥

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितो दूषणके सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्तनूतनतिलके तन्त्रपरीक्षाध्यायो नामैकादशोऽध्यायः ॥ ११ ॥

Digitized by Google

अथ गणिताध्यायः ।

तत्रादौ तदारम्भप्रयोजनमाह ।

परिकर्मविंशतिं यः सङ्कलिताद्यां पृथग्विजानाति ।
अष्टौ च व्यवहारान् छायान्तान् भवति गणकः सः ॥ १ ॥

यः सङ्कलिताद्यां परिकर्मविंशतिं छायाव्यवहारान्तानष्टौ व्यवहारांश्च पृथक् पृथग्विजानाति स गणको गोलप्रश्नाधिकारी भवति । अतस्तद्वर्णनमावश्यकम् ।

सङ्कलितम् । व्यवकलितम् । प्रत्युत्पन्नो गुणनम् । भागहारः । वर्गः । वर्गमूलम् । घनः । घनमूलम् । पञ्च जातयः । त्रैराशिकम् । व्यस्तत्रैराशिकम् । पञ्चराशिकम् । सप्तराशिकम् । नवराशिकम् । एकादशराशिकम् । भाण्डप्रतिभाण्डं चेति कर्मविंशतिः । व्यवहाराश्च—मिश्रकः । श्रेढी । क्षेत्रम् । खातम् । चितिः । क्राकचिकः । राशिः । छाया चेत्यष्टौ ॥ १ ॥

इदानीं सङ्कलितव्यवकलिते चाह ।

विपरीतच्छेदगुणा राश्योश्छेदांशकाः समच्छेदाः ।
सङ्कलितेऽंशा योज्या व्यवकलितेऽंशान्तरं कार्यम् ॥ २ ॥

राश्योश्छेदांशका विपरीतच्छेदगुणा मिथश्छेदगुणा एवं समच्छेदास्तुल्यहरा भवन्ति । शेषं स्पष्टार्थम् । 'अन्योन्यहाराभिहतौ हरांशौ राश्योः समच्छेदविधानमेवम्'—इत्यादि भास्करोक्तमेतदनुरूपमेव ।

अत्र चतुर्वेदाचार्योक्तमुदाहरणम् ।

सत्रिभागं तथा सार्धं रूपं षड्भागसंयुतम् ।
एकीकृतं भवेत् किं स्वं रूपचयसमन्वितम् ॥

न्यासः । $\begin{matrix}१\\१\\३\end{matrix}\Big|\begin{matrix}१\\१\\२\end{matrix}\Big|\begin{matrix}१\\१\\६\end{matrix}\Big|\begin{matrix}४\\१\end{matrix}$ यथोक्तकरणेन जातो राशिः ४ ॥

Digitized by Google

अत्र चतुर्वेदाचार्यः । 'यच्च स्कन्दसेनाचार्येण पेठीन्यायेन सङ्कुलितं प्रदर्शितं तत् सङ्कलनं बेत्रप्रदर्शनाय' ।

इत्यनेन स्कन्दसेनोऽपि कश्चित् प्राचीनो गणक इत्यवगम्यते ॥ २ ॥

इदानीं प्रत्युत्पन्ने करणसूत्रम् ।

रूपाणि च्छेदगुणान्यंशयुतानि द्वयोर्बहूनां वा ।

प्रत्युत्पन्नो भवति च्छेदवधेनोद्धृतोऽंशवधः ॥ ३ ॥

रूपाणि छेदगुणानि अंशयुतानि कार्याणि । एवं द्वयोर्वा बहूनां भिन्नानां सवर्णनं भवति । सवर्णनानन्तरं भिन्नयोर्वा बहूनां भिन्नानामंशानां वधश्छेदानां वधेनोद्धृतः फलं प्रत्युत्पन्नो गुणनफलं भवति । 'छेदघ्नरूपेषु लवा धनर्णम्'-इत्यादि तथा 'लवा लवघ्नाश्च हरा हरघ्नाः' इत्यादि 'अंशाहतिश्छेदवधेन भक्ता' इत्यादि च सर्वं भास्करोक्तमेतदनुरूपमेव ॥

अत्र चतुर्वेदाचार्योक्तोद्देशकः ।

द्वय सार्धा भुजो यत्र कोटिः षड्भागसप्ततिः ।

तत्रायते फलं किं स्यात् वद शीघ्रं निगद्यताम् ॥

न्यासः । भु $\frac{११}{२}$ । को $\frac{४१}{६}$ उक्तवज्जातः प्रत्युत्पन्नः १२२ $\frac{३}{४}$ ।

अन्योद्देशकः ।

मरिचानां पलं षड्भिर्यदि सार्धैः पणैर्भवेत् ।

पलर्षाड्भिर्गतैर्मूल्यं सङ्कुर्बाय वद स्फुटम् ॥

इदानीं भागहारे करणसूत्रम् ।

परिवर्त्य भागहारच्छेदांशौ छेदसङ्गुणच्छेदः ।

अंशोऽंशगुणो भाज्यस्य भागहारः सवर्णितयोः ॥ ४ ॥

भागहारच्छेदांशौ भाजकस्य छेदांशौ परिवर्त्य भाज्यस्य छेदः परिवर्तितच्छेदसङ्गुणश्छेदो भवति । एवं भाज्यस्यांशः परिवर्तितांशगुणोऽंशो भवति । एवं सवर्णितयोर्द्वयोर्भिन्नयोर्भागहारो भवति । सवर्णनं तु 'रूपाणि च्छेदगुणानि'-इति विधिना । भास्करभागहारोऽप्येतदनुरूप एव ।

Digitized by Google

उद्देशकश्चतुर्वेदोक्तः ।

यत्रायते फलं दृष्टं सार्धनेत्रयमेन्दवः ।
सार्धा दश भुजश्चैव कोटिस्तत्राभिधीयताम् ॥

न्यासः । क्षेत्रफलम् १२२ १/२ भुजः १० १/२ ।

उक्तवज्जाता कोटिः ११ २/३ ।

अत्र पुनश्चतुर्वेदाचार्यः ।

'अन्ये पुनरिहापि त्रैराशिकात्मकमुदाहरणं वदन्ति ।

यथा ।

रूपत्रिभागसंयुक्तं रूपलक्षं ददौ नृपः ।
दशभ्यो द्विजमुख्येभ्यः किमेकस्य धनं ततः' ॥

इदानीं वर्गे मूले च करणसूत्रम् ।

**संवर्णितांशवर्गश्छेदकृतिविभाजितो भवति वर्गः ।
संवर्णितांशमूलं छेदपदेनोद्धृतं मूलम् ॥ ५ ॥**

संवर्णितः सवर्णितः । शेषं स्पष्टार्थम् । वर्गे कृती इत्यादिभास्करोक्तमेतदनुरूपमेव ।

अत्र चतुर्वेदाचार्योक्तोद्देशकः ।

भुजकोटी समे यत्र सप्तार्धपरिसङ्ख्यया ।
चतुरस्रे समे तत्र क्षेत्रे फलमिहोच्यताम् ॥

सपादाङ्काः फलं यत्र चतुरस्रे समे स्थितम् ।
भुजकोटी समे तत्र ब्रूहि त्वं यदि वर्गवित् ॥

वर्गलक्षणं समद्विवधो वर्ग इति चतुर्वेदाचार्यः ।

इदानीं घने करणसूत्रम् ।

**स्थाप्योऽन्त्यघनोऽन्त्यकृति-
स्त्रिगुणोत्तरसङ्गुणा च तत्प्रथमात् ।
उत्तरकृतिरन्त्यगुणा
त्रिगुणा चोत्तरघनश्च घनः ॥ ६ ॥**

स्पष्टार्थम् । 'स्थाप्यो घनोऽन्त्यस्य ततोऽन्त्यवर्ग' इत्यादि भास्करोक्तमेतदनुरूपमेव ।

अत्र चतुर्वेदोक्तोद्देशकः ।

चतुरस्रा समा वापी हस्तत्रिघनसंमिता ।
वेधेन च तथा तस्याः फलं ब्रूहि घनात्मकम् ॥

इदानीं घनमूले करणसूत्रम् ।

छेदो घनाद्द्वितीयाद्घनमूलकृतिस्त्रिसङ्गुणाप्तकृतिः ।
शोध्या त्रिपूर्वगुणिता प्रथमाद्घनतो घनो मूलम् ॥७॥

अत्र चतुर्वेदाचार्यः ।

'अन्त्योद्दिष्टघनराशेः प्रथमस्थानस्य घनसंज्ञा ततो विलोमतः स्थानद्वयस्य अघनसंज्ञा ततः परं पुनरेकस्य घनसंज्ञा ततश्च द्वयोरघनसंज्ञैवमापादसमाप्तेः । एवं स्थिते सूत्रावतारः । आदिभाजकः घनमूलकृतिस्त्रिसङ्गुणा कुत इत्याह । अघनाद् द्वितीयात् ततो यदाप्तं तस्य कृतिः शोध्या किन्तु सा त्रिगुणिता पूर्वगुणिता च कुतः प्रथमादघनात् ततश्च घनतो घनः शोध्यः । एवं कृते घनमूलं भवति ।

अत्रोद्देशकः ।

घनात्मकं फलं यत्र सप्ताष्टिरब्रिभिः समम् ।
पार्श्वात्त्रिधाः समास्तत्र चितौ ब्रूहि घनात् पदम् ।

इदानीं प्रथमद्वितीयजात्योः सवर्णनमाह ।

सदृशच्छेदांशयुतिश्छेदविभक्ता फलं प्रथमजातौ ।
अंशैरंशा गुणिताश्छेदैश्छेदा द्वितीयायाम् ॥ ८ ॥

सदृशच्छेदांशानां युतिश्छेदविभक्ता समच्छेदहृता फलं प्रथमजातौ सवर्णनं स्यादिति 'योगोऽन्तरं तुल्यहरांशकाना'मित्यादिभास्करोक्तमेव । एवं द्वितीयायां प्रभागजातौ अंशा अंशैर्गुणिता अंशो भवति । छेदाश्छेदैर्गुणिताश्छेदो भवतीत्येतदनुरूपमेव 'लवा लवघ्नाश्च हरा हरघ्नाः' इत्यादि भास्करोक्तम् ।

Digitized by Google

अत्र चतुर्वेदोक्तोद्देशकः ।

रूपार्धं रूपषड्भागो रूपांशो द्वादशस्तथा ।
रूपस्य च तुरीयांशः कोऽर्थः सम्पिण्डिते भवेत् ॥

न्यासः । $\frac{१}{२}$ | $\frac{१}{६}$. $\frac{१}{१२}$ | $\frac{१}{४}$ उक्तवज्जातो योगः १ ।

अन्योद्देशकः ।

द्वियमा रसषट्काश्च वसुनागा नवाग्नयः ।
त्रीन्दवः शतरुद्राश्च छेदस्थाने प्रकल्पिताः ॥
पञ्चबाणा नव रूपं च वेदा रुद्रास्तदंशकाः ।
मिलिता यत्र दृश्यन्ते कस्तत्र धनसञ्चयः ॥

न्यासः । $\frac{५}{२२}$ | $\frac{९}{६६}$ | $\frac{६}{८८}$ $\frac{१}{३९}$ | $\frac{४}{१३}$ | $\frac{११}{१११४}$ उक्तवज्जातो योगः १ ।

प्रभागजातौ चतुर्वेदोद्देशकः ।

पादार्धं पादषड्भागं पादांशद्वादशं तथा ।
दशघ्नादष्टमं पादात् सप्तघ्नात् पञ्चमं तथा ॥
सम्पीड्याऽऽवक्ष्व मे शीघ्रं विंशत्यंशैस्त्रिभिर्युतम् ।
धनं तद्वयमस्माभिर्ज्ञातिःशास्त्रविदे सदा ॥

न्यासः । $\frac{१}{४}$ $\frac{१}{२}$ | $\frac{१}{४}$ $\frac{१}{६}$ | $\frac{१}{४}$ $\frac{१}{१२}$ | $\frac{१०}{४}$ $\frac{१}{८}$ | $\frac{७}{४}$ $\frac{१}{५}$ | $\frac{३}{२०}$ ।

सवर्णिते $\frac{१}{८}$ | $\frac{१}{२४}$, $\frac{१}{४८}$ $\frac{१०}{३२}$ | $\frac{७}{२०}$ $\frac{३}{२०}$ उक्तवज्जातो योगः $\frac{३१}{३२}$ ।

इदानीं तृतीयजातौ सवर्णनमाह ।

ऊर्ध्वांशाश्छेदगुणास्तृतीयजातौ द्वयोः प्रथमपरयोः ।
छेदैश्छेदा गुणिताः स्वांशयुतोनैरुपरिगांशाः ॥ ९ ॥

ऊर्ध्वांशाश्छेदगुणाः कार्यास्तदा तृतीयजातौ सवर्णनं भवति ।

अत्र चतुर्वेदाचार्यः ।

'ऊर्ध्वांशा उपरि स्थितांशाश्छेदगुणाः सन्तोऽधःस्थितस्य छेदांशा भवन्त्यधःस्थितच्छेदास्त्यज्यन्ते । एवं कृत्वा सदृशच्छेदविधानेन फलं कार्यम् । एतदुक्तं भवति । भाज्यराशिरूर्ध्वांशशब्देनोच्यते । अधःस्थराशिश्च

निग्रहस्थानमस्तु न हानिरिति चेत् । न सतस्त्यागे तावद्धानिरेव निग्रहस्थानम् असतस्त्यागे ऽपि त्यागेनैव पूर्वदोषस्य परिहृतत्वादियमेव निग्रहस्थानम् । इयं तु प्रत्युत्तरानुपातिनी तदुत्तरकक्ष्योद्भाव्या । तत्रोपेक्षितानुद्भावयितुं निग्रहापादिका सतस्त्यागे तु प्रतिवादिनोऽसद्दोषोद्भावनेन निरनुयोज्यानुयोगापातात् तदनुद्भावनेनोक्तं त्यजतः पर्यनुयोज्योपेक्षणसहचारिणी हानिरवश्योद्भाव्या आत्मन एकनिग्रहापत्तेः परस्य रुद्धयापत्तेरवष्टम्भविजयावहत्वात् । वादि तु सद्धानिरुद्भाव्या नेतरा । अत्र निर्वाह्यमेव वदेदुक्तं च निर्वहेदिति रहस्यम् ॥ २ ॥

यद्दर्शनेन यस्यानैकान्तिकत्वभागासिद्ध्यादेर्दर्शनेन । सतस्त्यागे प्रामाणिकसाध्यसाधनादिपरित्यागे सति हानिरेव यथोक्तदोषस्याभासत्वात् तदधीननिग्रह इति भावः । असतः प्रमाणिकत्वाभाववतः । प्रत्युत्तरानुपातिनीति । प्रथमद्वितीयपक्षयोस्त्यागायोगात् तृतीयचतुर्थादिपक्षेषु सम्भाविता चतुर्थपञ्चमादिपक्षेषूद्भाव्या । तत्रोपेक्षिता प्रतिवाद्यादेः पर्यनुयोज्योपेक्षणप्रदेत्यर्थः । वादिनः अवश्योद्भाव्या प्रतिवादिनेति शेषः । स्वस्यापि निगृहीतत्वात् कथं परदोषोद्भावनमिति चेत् तत्राह । आत्मन इति । अवष्टम्भविजयो नाम न्यूनदोषवता परस्याधिकदोषोद्भावनम् ॥ २ ॥

एवं तर्ह्युक्तहानिरिति व्यपदेशः स्यात् तत्राह ॥

अत्र[1] प्रतिज्ञाग्रहणमुक्तमात्रोपलक्षणम् ।

सत्यम् अन्वर्थसञ्ज्ञेयमेव । उपलक्षणनामैव प्रतिज्ञाहानिरिति । कथं तर्हि सूत्रम् प्रतिदृष्टान्तधर्मानुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिरिति । इदं हि दृष्टान्ते साध्यधर्महानिः प्रतिज्ञाहानिरित्याह । यद्वा दृष्टश्चासौ अन्ते निगमने व्यवस्थित इति दृष्टान्तशब्देन पक्षमभिधाय स्वीयपक्षे प्रतिपक्षधर्मानुज्ञानरूपा साध्यधर्मो हानिः प्रतिज्ञाहानिरिति । सत्यम् तथापि लक्ष्यलक्षणपदानामुक्तमात्रोपलक्षणत्वान्न कश्चिद्दोष इति ।

एवं तर्हि धर्मिसाध्यहेतुदृष्टान्तानां दूषणतद्विशेषणानां हानिरियमिति सिद्धे सति ।

उक्तस्यार्थजातस्य सूत्रं नानुगुणमिति शङ्कते । कथं तर्हीति । पूर्वपक्षी स्वयमेव सूत्रार्थमाह । इदं हीति । घटोऽपि तर्हि नित्योऽस्त्वित्येकैवेयमिति सूत्रस्य वाचनिकोऽर्थः नान्या हानिरित्यर्थः । यद्वेति । सूत्रस्यार्थान्तरविवक्षायां शब्दोऽपि तर्हि नित्यः स्यादित्येकैवेयं नान्येत्युक्तं भवति । अतः सूत्रानुक्तः प्रपञ्च इति भावः । सत्यमित्यर्द्धाङ्गीकारसूचनम् । लक्ष्यलक्षणपदानां प्रतिज्ञाहानिप्रतिदृष्टान्तधर्मेषु दृष्टान्तशब्दानाम् । एवमियं प्रतिज्ञाहानिः पक्षदृष्टान्तदोषभेदाच्चतुर्दशविधा सा च माभूत् तर्हीत्यन्यथास्त्विति च प्रत्येकं द्विधा अतोऽष्टाविंशतिभेद इति द्रष्टव्यम् ॥

---

(१) तत्र—पा॰ A पु॰ ।

Digitized by Google

अविशेषितपूर्वोक्ते साध्यांशे दूषिते पुनः ॥ ३ ॥
तद्विशेषणनिक्षेपः प्रतिज्ञान्तरमिष्यते[१] ।

द्व्यंशो ह्यनुमानप्रयोगः । साध्यांशः साधनांशश्चेति । तत्र साध्यांशः प्रतिज्ञोदाहरणे प्रयोज्यभागो निगमनं चेति । शेषः साधनांशः । तत्र निर्विशेषणं प्रयुक्तस्य साध्यांशस्य दूषणोद्भावने परेण कृते सति तत्परिजिहीर्षया पुनर्विशेषणं प्रक्षिप्य पूर्वोक्तस्यैव निर्देशः प्रतिज्ञान्तरम् । तथा च सूत्रम् । प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात् तदर्थनिर्देशः प्रतिज्ञान्तरमिति । अविशिष्टस्य साध्यभागस्य प्रतिषेधे कृते धर्मविकल्पं प्रक्षिप्य तदर्थस्य तस्यैव पूर्वोक्तस्यार्थस्य तदर्थं साध्यसिद्ध्यर्थं वा निर्देशः प्रतिज्ञान्तरमित्यर्थः । तच्च पक्षतद्विशेषणसाध्यतद्विशेषणप्रक्षेपेण चतुर्विधम् यथा नित्या वर्णाः श्रावणत्वाच्छब्दत्ववदित्युक्ते ध्वनिभिरने-

उदाहरणे प्रयोज्यभागः यत् कृतकं तदनित्यं दृष्टमित्यादौ तदनित्यं दृष्टमित्यादिः शेषः हेतुरुदाहरणे यत् कृतकमित्यादिः उपनयश्च निर्विशेषणं निरुपपदं प्रक्षिप्य उक्तदोषनिवारकमर्थान्तरमुक्त्वा धर्मविकल्पं प्रक्षिप्य धर्मो ध्वनिर्वर्णात्मकत्वादिः तस्य विकल्पः पक्षतद्विशेषणत्वादिरूपेण योजनं तथोक्त्वेत्यर्थः । अर्थान्तरमाह । तदर्थमिति । साध्यसिद्ध्यर्थमित्यत्र प्रतिषेधनिवृत्त्यर्थमिति द्रष्टव्यम् ।

(१) मुच्यते-पा॰ A पु॰ ।

कामिकत्वेन दूषिते सध्वनयो वर्णा नित्या इति पक्षा-न्तरप्रक्षेपः । तद्विशेषणप्रक्षेपस्तु अनित्यः शब्दः कार्यत्वादित्युक्ते ध्वनिभागे सिद्धसाध्योद्भावने वर्णा-त्मकः शब्द इति । अग्निमदिदं सुरभिमलिनधूमवत्त्वा-दित्युक्ते विशेषणासामर्थ्ये साधिते साग्निकृष्णागरुदा-रुमदिति साध्यान्तरप्रक्षेपः । विवादाध्यासितं बुद्धिम-त्पूर्वकमित्युक्ते सिद्धसाध्यताभिधाने उपादानादि-गोचरबुद्धिमत्पूर्वकमिति साध्यविशेषणप्रक्षेपः । उदा-हरणे प्रयोज्यभागे यथा । यत् सुरभिमलिनधूमवत् तदग्निमदित्युक्ते प्रयोज्यांशे न्यूनतया प्रत्युक्ते तत् साग्निकृष्णागरुदारुमदिति । निगमने ऽपि प्रतिज्ञा-यामिवाविशिष्टप्रतिज्ञैकदेशोपसंहारे तथैव प्रत्युक्ते चतुर्विधो विशेषणप्रक्षेपः स्वयमेवोदाहरणीयः । न

ध्वनिभिः अनित्यत्वेनोभयसम्बन्धात् तीव्रत्वादिसामा-न्याभिव्यञ्जकैः । विशेषणासामार्थ्यम् सुरभिमलिनविशे-षणयोर्व्यावर्त्याभावेन वैयर्थ्यम् । सिद्धसाध्यत्वाभिधाने भोक्तृत्वहेत्वदृष्टजन्यत्वेन परम्परया बुद्धिमात्रपूर्वकत्वात् सिद्धसाधनमित्युक्ते सति । उपादानादीत्यादिशब्देन उप-करणसम्प्रदानप्रयोजनानि गृह्यन्ते । दारुमदित्यादिशब्देन ईश्वरानुमानस्योदाहरणे प्रयोज्यभागे साध्ये विशेषणप्रक्षे-पो गृह्यते । निगमने ऽपीति । तस्मान्नित्या वर्णाः तस्मादिदम-ग्निमत् तस्मादिदं बुद्धिमत्पूर्वकमित्येतेषु पूर्वदूषितेषु पूर्व-वत् पक्षतद्विशेषणसाध्यतद्विशेषणप्रक्षेपेण विशेषणाभा-

चैवं हानिरेवाविशिष्टस्य परित्यागादिति वाच्यम् । पूर्वोक्तस्यापरित्यागात् त्यक्तस्य विशेषणाभावस्य प्रागनुक्तत्वादिति । अत्र कक्ष्यान्तरे न विशेषणीयमिति रहस्यम् ॥ ३ ॥ ऽऽ ॥

पदयोर्वाक्ययोर्वा य एकवक्तृकयोर्मिथः ॥ ४ ॥
व्याघातो निग्रहस्थानं स्यात् प्रतिज्ञाविरोधतः ।

एकवक्तृकयोः पदयोर्वाक्ययोर्वा यः परस्परव्याघातः स प्रतिज्ञाविरोधो नाम निग्रहस्थानं भवति । तदुक्तं प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोध इति ।

योपि निरस्तः । एवमनुपन्यस्ते इत्युक्तहानिरत्र नास्तीति मतं (बहिर्भावेन प्रस्तुतसाध्यं शब्दानित्यत्वं प्रतीत एव व्याकरणादिमतानुसारेण। अत्र न्यूनादिति उदाहरणावयवान्तरवचनादयं हेतुः हेतुं स्वत्यादि वचनाच्च न्यूनपुनरुक्तादिसम्भेदे सत्यपि उक्तग्राह्यत्वात् वादिवाक्योपरमानन्तरं ग्राह्यत्वात् उच्यमानग्राह्यत्वात् वादिवाक्योच्चारणसमयवेद्यत्वेन प्रथमप्रतिपन्नत्वादित्यर्थः) । (१)शेषमवशेषं हानिवद्द्रष्टव्यम् । कक्ष्यान्तरे तृतीयादिपक्षे । एवं प्रतिज्ञान्तरस्य दशविधो भेदः ॥ ३ ॥ ऽऽ ॥

एकवक्तृकयोरिति विशेषणस्य तात्पर्यं वक्ष्यति । अवान्तरवाक्ययोः प्रतिज्ञाहेत्वादिपञ्चसु मध्ये द्वयोर्द्वयोरुक्तयोरन्योन्यविरोध उक्तविरोध इति सूत्रतात्प-

---

(१) ( ) एतच्चिह्नितपाठो मूलासम्बद्धः ।

अत्र प्रतिज्ञाहेतुपदाभ्यां प्रतियोगिद्वयमुपलक्ष्यते। लक्ष्यगतेन च प्रतिज्ञापदेनोक्तमात्रं प्रतिज्ञाहेतुविरोध इति लक्ष्यनिर्देशे कर्तव्ये एकपदनिर्देशेन एकस्मिन्नप्यवयवे तदंशयोर्विरोधं सूचयति। स च प्रतिज्ञायां धर्मधर्मिनिषेधात् तयोरेव विधानाच्चतुर्विधः। तत्र प्रथमो यथा ईश्वरो न कर्तेति द्वितीयस्तु नास्तीश्वर इति। तृतीयस्तु ईश्वरः किञ्चिद्ज्ञ इति। चतुर्थस्तु अतीतमस्तीति। प्रतिज्ञाहेत्वोर्विरोधो यथा गुणव्यतिरिक्तं द्रव्यातिरिक्तत्वादिति। प्रतिज्ञादृष्टान्तयोर्यथा अनित्यः शब्दः प्रमेयत्वात् यत्प्रमेयं तदनित्यं यथा व्योमेति। प्रतिज्ञोपनययोस्तु हेतुविरोधाविरोधाभ्यामनवकाशः। प्रतिज्ञानिगमनयोस्तु यथा अनित्य इति प्रतिज्ञाय तस्मान्नित्य इति। हेतुदृष्टान्तयोर्यथा अनित्यः शब्द ऐन्द्रियकत्वात् द्व्यणुकादिवदिति।

योर्थ इत्याह। अत्र प्रतिज्ञेति। सूत्रकारस्य सकलावान्तरवाक्यविरोधे तात्पर्यम्। भवतु पदयोर्विरोधः तत्रलब्ध इत्याशङ्क्याह। प्रतिज्ञाहेतुविरोध इतीति। तत्र प्रथमो यथेति। द्वितीयस्त्विति। ईश्वरसिद्धावसिद्धौ च निषेधो न युक्तः निषेधविरोध इत्यर्थः। तृतीयस्त्विति जगत उपादानगोचरबुद्धिमत्त्वेन सर्वज्ञस्यैवेश्वरत्वात् तस्य किञ्चिद्ज्ञत्वविधारणं विरुद्धमिति भावः। चतुर्थस्त्विति। गतकालस्यातीतत्वात् तस्य वर्तमानकालत्वं विरुद्धमित्यर्थः।

Digitized by Google

हेतूपनययोर्यथा तत्रैवानैन्द्रियकश्च शब्द इति । एवं तर्क्ये दूषणवाक्ये ऽपि विरोधः स्वयमेवोहनीयः । न चायमपसिद्धान्तः एकवक्तृकवाक्यविषयत्वात् । न च विरुद्धहेत्वाभाससङ्करः । तत्र साध्यविपर्ययव्याप्तिनिदर्शनेन विरोधस्योद्भाव्यत्वात् । अत्र चास्ति नास्तीतिवदुक्तिमात्रेण विरोधस्फुरणादिति । एवंविधानां च दुरवलेपात् प्रमादाद्वोक्तिसंभवः । अयं च प्रथमकक्ष्यातिपाती तदुत्तरकक्ष्योद्भाव्यः । मिथो व्याहतं न वदेदिति तत्त्वम् ॥ ४ ॥ ऽऽ ॥

स्वयमुक्तापलापेन प्रतिज्ञान्यासनिग्रहः ॥ ५ ॥

स्वोक्तस्य स्वयमेवापलापः प्रतिज्ञासंन्यासः । तदुक्तम् पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः । अत्र पक्षशब्द उक्तमात्रपरः । तथा प्रतिज्ञातार्थशब्दश्च । अपनयनमपलापः । ततश्चोक्तप्रतिषेधे परेण कृते तत्परिजिहीर्षयोक्तापलाप उक्तसंन्यास इत्यर्थः । स च चतुर्विधः । केनेदमुक्तमिति वा परमतमेतन्मयोक्तमिति वा स्वयमेवोक्त्वा त्वयेदमुक्तमिति

तत्रैव अनन्तरप्रस्तुतशब्दानित्यत्वानुमाने । एवं तर्क्य इति । नित्यत्वे ऽविनाशित्वप्रसङ्गः । कृतकत्वहेतुर्यदि पक्षविपक्षयोरेव वर्तते तर्ह्यनैकान्तिकोऽयमित्यादिकमूहनीयमित्यर्थः । तदुत्तरकक्ष्योद्भाव्यः द्वितीयपक्षादावुद्भाव्यस्ततोऽपेक्षितो निग्रहाय भवतीति तात्पर्यम् । एवं प्रतिज्ञाविरोध एकादशविध इति द्रष्टव्यम् ॥ ४ ॥ ऽऽ ॥

वा परोक्तमेव मयानूदितमिति वा। न चेदमसंभवदुक्तिकम् दूषणोद्भावने ह्यस्फूर्तिदशायां त्यागवदपलापस्यापि संभवात्। न च कापालवादित्रादिनेवापलापेनापि पूर्वदोषो न परिहृतः। यतः स एव निग्रहस्थानं भवेत् वादे स्खलितसंगूहनाभावे ऽपि प्रमादात् कथञ्चित् संभवादुद्भाव्यम्। शेषमशेषं हानिवत्। प्राश्निकाद्यवगतं नापलपेदिति रहस्यम् ॥ ५ ॥

हेत्वन्तरं साधकांशे दूषिते तद्विशेषणम्।

अविशेषोक्तसाधकभागे दूषिते सति तद्दोषपरिजिहीर्षया पूर्वोक्तस्यैव पुनः केनापि विशेषणं हेत्वन्तरं नाम निग्रहस्थानं भवति। तदुक्तम् अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषणमिच्छतो हेत्वन्तरं नाम निग्रहस्थानमिति। अत्र हेतुपदेन साधकभागमुपलक्षयति। इच्छया च तत्कार्यं विशेषणवचनम्। न हि स्वस्योऽकस्मादुक्तं विशिनष्टीति प्रतिषेधपरिजिहीर्षा अस्य मूलमिति दर्शयितुमुक्तं प्रतिषिद्ध इति। एतच्च हेत्वा-

प्रतिज्ञाशब्दौ लक्ष्यलक्षणगतौ त्यागवत्। स एव पूर्वोक्तदोष एव। शेषमशेषमिति। पक्षहेतुदृष्टान्तदूषणानां दुष्टत्वे साध्यसाधनाद्यपलापरूपेणायमपि चतुर्दशविधो भवति तृतीयकक्षादावयं सम्भावितः उत्तरकक्षादौ तुल्योऽन्यथा निग्रहाय भवतीत्यादिकं प्रतिज्ञाहानिवदस्यापि द्रष्टव्यमित्यर्थः ॥ ५ ॥

केनापि विशेषणेन सहेति विशेषः। जात्युत्तरत्वेन

Digitized by Google

359. Inasmuch as ritual and the knowledge of unity of Self are respectively dependent on multiplicity and unity, how can there be coordination, since there cannot be between them the relation of one being an aid to the other?

360. The knowledge of the true nature of the gods and the materials (for sacrifice) has become a part of ritual;[1] for, only in so much is it ritual proper, and not if performed in ignorance of either the materials or the gods.

361. Thus qualified, the ritual becomes more effectual and the fruit thereof more plentiful in consequence. But it cannot be coordinate with ritual, for, a part cannot be coordinate with the whole.

362. What is called the knowledge of the unity of Self is entirely destructive of nescience. How then can there be ritual simultaneous with such knowledge, or any desire, while the object aimed at (*Brahman*) is in sight?

363. A knowledge of the *Brāhmaṇa* caste or other caste prescribed, which is necessary for the achievement of the object sought for, in the case of *agnihōtra* and other rites, is nothing but consistent with the rites themselves.

364. But a knowledge of the real nature of the unity of the Self puts an end to the distinctions of caste etc., and hence not only do rites become unnecessary, but they even cease to be performed.

365. False knowledge, like that of the serpent, is the cause of the running away etc., but the individual

[1] And not coordinate with ritual, as the opponent would have it to help him by way of analogy.

repents his past conduct when the idea of the serpent is dispelled by a knowledge of the rope.

366. Ritual cannot extend to liberation, since the acts of acquisition etc. are absent therefrom; nor are the *Veda*, *Smṛiti*, etc. applicable thereto. Hence there can be no coordination.

367. Knowledge, moreover, is subjective, being entirely restricted to the internal Self (*pratyag*); but ritual is objective, being dependent on external objects.[1]

368. What is objective cannot exist simultaneously with knowledge which is subjective. Ritual may be purificatory, but the cessation of nescience can result from knowledge alone.

369. The knowledge of the Self is real knowledge; rites are solely dependent on nescience. When real knowledge is attained, how can ritual remain, since the very root of ritual is destroyed?

370. Knowledge is eternally existent, owing to the eternal proximity of the Self. But ritual is transient, being multifarious. And the transient must give way to the eternal.

371. The worlds attainable by ritual are evanescent, but by a knowledge of *Brahman*, one becomes the lord of himself. Who will long for beggary, when the kingdom of the three worlds is in his hands?

372. Knowledge, being dealt with in a separate context, need not be supplemental to rites; nor can knowledge, which is self-dependent, be auxiliary to anything else, for that will be inconsistent.

[1] The rule is that what is subjective is superior to what is objective.

373. Since knowledge is based on reality and is not dependent upon the knower, it is therefore said to be self-dependent (*svatantra*), for the purpose of uprooting nescience.

374. Nowhere at all do we read in Scripture that freedom from birth and death (*anāvṛitti*) can result from rites, but we see it recited in many places in Scripture that such freedom can result from knowledge alone.

375. Knowledge is definite (*ēkarūpa*), since its object is the Self which is a unit; but, rites are multifarious, being dependent on several agents and causes (*kāraka*).

376. For liberation which is definite, what is indefinite (*bhinnarūpa*) cannot be the means. For liberation which is definite, the means too must be definite.

377. Therefore do the *Ṣāstras* point out that, as the result of various actions, the doer enjoys various fruits by being born among gods or men or the lower animals.

378. Some others contend in all seriousness that some passage in the *Vēda* hints at the cessation of some distinction.[1]

379. (They say:) "Thus, for example, in the passage about the person desirous of reaching heaven, the distinction between the body and the soul is said to cease, and the person authorised, who is also the enjoyer of heaven, is entirely different from the body.

[1] *Surēṣvara* is a little humorous in this verse. He is stating the views of his opponent who contends that there are passages in the कर्मकाण्ड which speak of all differences terminating, and hence that *kāṇḍa* may be assumed to enjoin knowledge.

380. "Even in the passage 'by milking the cow etc.,' a difference in the person authorised is ignored, since a person once authorised can also be authorised again, and none need specially be authorised therefor.[1]

381. "This negation of difference is also easily seen in the prohibition[2] of such activities as are the result of passions etc. Such activities are also prohibited by the injunctions themselves, by virtue of their enjoining other activities.

382. "Even in the secular world, the pursuit of an undesirable route is prevented either by actual prohibition or by the pointing out of a different route. Let the same be taken to be the case in the *Vēdās* too.

383. "Thus all injunctions without exception have for their object the authorisation of the knowledge of Self, by virtue of the cessation of all activities which have passions etc. for their source."

384. It is not so; for, all the ritualistic injunctions of Scripture do not intend any fruit other than what is specified as *the* object in their respective passages.

385. Since Scripture aims at performance, it cannot anywhere import the cessation of any difference. In the face of passages which enjoin fruit, how can we infer cessation of difference, which means the absence of fruit?

386. Further, the realisation of the Self (*vastu*) can never result from the cessation of differences, because

[1] The person who performs *darṣa* etc. for attaining heaven, may also perform *gōdōhana* if he is desirous of acquiring cows.

[2] The opponent extends his argument to the prohibitory portion of the *Vēda* also.

Digitized by Google

liberation is possible even in the absence of such cessation and because such cessation exists even in deep sleep.

387. If duality is real, it is impossible to dispel it; and, if it is only an effect, then, when the cause ceases, the effect too will cease, but not of its own accord.

388. It is impossible for anyone[1] to bring about the complete cessation of all distinctions. The closing of the senses etc. in sleep is spontaneous and not the result of Scriptural injunction (*śāstrataḥ*).

389. Moreover, since they again spring into existence on waking, it is to be suspected that they have not been destroyed altogether. If it be said that they arise newly, then too there is no cessation by your own showing.

390. It cannot be said that the cause of duality is destroyed by the cessation of duality, for, nowhere is the cause destroyed by the cessation of the effect.

391. Since nescience which is the cause is destroyed by a knowledge of the reality, it follows therefore that the cessation of differences is fruitless for the purpose of destroying nescience.

392. Because, by a knowledge of the rope, the idea of the serpent and other like illusions vanish, it does not follow that the rope is visible in darkness, even in the absence of any illusion about the serpent.

393. If Scripture be an authority for such cessation, the Self cannot be realised, since the aim of such cessation is different. If Scripture be an authority for the spontaneous realisation of the Self, it cannot be an authority either for cessation or for both.

[1] Without the help of knowledge.

२५१

Digitized by Google

394. You cannot terminate what is yet to happen; what is past has ceased by itself; and things that exist at present, being of the nature of effects, will perish of their own accord.

395. If the Scripture aims at cessation, the fruit of action would be uncertain; and if it aims at fruit, it cannot import cessation; nor can it import both, owing to the difference of context.

396. If, by the mere cessation of duality, every misery might be banished and liberation secured, then knowledge would become fruitless.

397. Thus, while liberation is attainable through the destruction of nescience by a knowledge of the true nature of the unity of Self, it serves no purpose to create the hypothesis of cessation.

398. Since injunctions are restricted to their respective rites, and do not consequently stand in need of each other, tell me how there could be unity of authorisation in respect of such injunctions.

399. If every injunction and every prohibition be supposed, even in the absence of any authority therefor, to import the cessation of nominal and other distinctions, then liberation would be but an accident and Scripture would become objectless.

400. You may say: "As one climbs to the terrace of a mansion by means of a flight of steps, in the same way does ritual help the attainment of the knowledge of Self by the gradation of heaven and other effects.

401. "To take another instance, the direction to go to a village which is on the way to town is auxiliary to the direction to take that route to the town."

402. Not so. The going to the village may rightly be said to be ancillary, since it is not the primary object of desire. But heaven etc. cannot be ancillary, since they too are objects primarily sought after.[1]

403. "Or, heaven etc. may serve as inducements to liberation, just as extolling the merits of the wayside village is an inducement to reach the town."

404. It is not so. It may hold good in the case of human speech where other proofs are available; but the hidden intention etc. cannot be gathered from Scripture, owing to the absence of a speaker.

405. If it be said that the place where one is led by such inducement be the primary object of such inducement, then, since there is no direct guidance for reaching the town, why will a man strive for it at all?

406. If it be said that, by the natural course of things (*vastuvṛittēna*), a visit to the village is necessary before reaching the town, even then the reaching of the town is a matter of course (*arthāt*) rather than one of inference[2] (*mānataḥ*).

407. It cannot thus be said that ritual too may incidentally be an aid to knowledge, like the injunction for earning wealth;[3] for, the only way of gathering the intention of Scripture is by the right construction of the spoken word.

[1] The visit to a village on the way is not the primary object of the traveller to town, and hence requires no separate injunction for itself. Not so in the case of *svarga* etc.

[2] The traveller reaches the town not by virtue of any inducement by way of extolling the merits of the wayside village.

[3] The earning of wealth is enjoined with a view to personal comfort, but is also incidentally useful for the performance of sacrifices.

Digitized by Google

408. If Scripture intends heaven etc., it cannot intend the realisation of the unity of Self; and, if it intends liberation, it cannot intend heaven; nor can it intend both at one time owing to the difference of context.

409. Further, heaven etc. being themselves of the nature of fruits, cannot, like sacrifice etc., be taken to import other fruits.

410. It may be said: "There is no flaw in my argument, for, in the manner aforesaid,[1] these[2] are helps to the acquisition of the knowledge of Self."

411. This may be true in the case of prohibitions, which are helps to renunciation by prohibiting activities in such common directions are are induced by passions etc.

412. But how can it be said that injunctions too restrain the passions etc. (*rāgādi*), since they imply neither exclusion (*parisamkhyā*) nor selection (*niyama*)?

413. For, injunctions generally teach us such aims as have not been attained as yet. But an injunction which assumes that an aim has been achieved, may be said to imply the exclusion of other aims.[3]

414. There can be no exclusion merely because the fruits are identical, as in the case of service and the *Sāngrahaṇī* sacrifice;[4] for, the rites enjoined by Scripture have no fixed time for bearing fruit.

[1] See verses 399 and 400 *supra*.

[2] i. e. injunctions and prohibitions.

[3] Compare विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥

[4] One may become lord of villages, either by serving the king or by performing the *Sāngrahaṇī* sacrifice. The enjoining of the latter, the opponent therefore says, must necessarily mean the exclusion of the former.

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् ।	मूल्यम्
श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं॰ श्रीराममिश्र-शास्त्रिप्रणीतकाचित्कविषमपदटिप्पणीसमेतः	०।)
श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा ..	६)
श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा ..	३=)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः	२।)
वेदपूर्त्तेः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं॰स्वामिश्रीराममिश्रशास्त्रि-प्रणीतो निर्विशेषाद्वैतनिराकरणपरः	१॥=)
वेदपूर्तिसहितो वेदार्थसंग्रहः	३॥।)
शास्त्रदीपिका	६।)
सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-न्द्रिकोपेतम्, पं॰स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् ।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजप॰दामोदर-शास्त्रिणा संशोधिता पूर्वार्द्धरूपा	५॥।)
तथा उत्तरार्द्धम्	८॥।)
माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता	७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता	६॥)
श्रीतिरुन्तार्णवतरणिः ।	६)
विधिमीमांसा, श्रीसुधाकरद्विवेदिविरचिता	॥=)
जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता ..	५॥)
लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, श्रीशशाङ्कधराचार्यविरचितया न्याय-मुक्तावल्याख्यया टीकया सहिता ।	॥।)
सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम् ।	॥।)
तत्त्वमुक्ताकलापः–सर्वार्थसिद्धियुतः, बोधायनीयार्थसिद्धान्तानुसारी विशिष्टाद्वै-तब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्किक-केसरिणा सर्वतन्त्रस्वतन्त्राधिवरेण श्रीवेङ्कटनाथदेशिकेन प्रणीतः	५॥=)
वेदान्तसिद्धान्तमुक्तावली, आर्थर्वेनिसृष्टाहबकृताङ्गलभाषानुवादयुता ..	१॥।)
काव्यप्रकाशस्य हङ्गलण्डीयभाषानुवादः	३॥)
अथर्ववेदसंहितायाः हङ्गलण्डीयभाषानुवादः	१२)
आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्य-काराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम्	॥।)
तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदी-पाख्यटीकया सहिता ।	१॥।)

Digitized by Google

CONTENTS

Page.

NYĀYASŪTRAVIVARAṆAM, Ed. Surendralāla Gosvāmin, Professor, Sanskrit College, Benares 193

BRĀHMASPHUṬASIDDHĀNTA, Edited with his own commentary by Mahāmahopādhyāya Sudhākara Dvivedin, Professor, Queen's College, Benares 209

THE TĀRKIKARAKṢĀ AND SĀRASAMGRAHA OF VARADARĀJA, with the glosses Niṣkaṇṭakā of Mallinātha Kolācala and Laghudīpikā of Jñānapūrṇa, Ed. Vindhyeçvarīprasāda Dvivedin, Librarian, Sanskrit College, Benares 241

THE SAMBANDHAVĀRTIKA OF SUREṢVARĀCHĀRYA, Translated by S. Venkataramana Aiyar, B. A., B. L., High Court Vakil, Triplicane, Madras 249

Digitized by Google

31

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 5.] May, 1902. [Vol. XXIV.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1902.

Copyright on each article reserved.

Price Rs. 9-0 per annum.]

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अक्षररश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

मूल्यम्

चित्रमीमांसा, अप्पयदीक्षितकृता तै॰ श्री रामशास्त्रिणा संशोधिता .. .. १)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः .. .. ।=)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता .. .. १॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम् .. .. १॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम् .. .. १)
लघुकौमुदी .. .. १)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टेनाचार्य्येणेङ्गलण्डीयभाषायामनुवादिता .. ४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः ८)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणेङ्गलण्डीयभाषायामनूदितम् .. .. ४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद .. .. .. ४)
शाश्वतधर्मदीपिका, ... १)
अमरकोशः सटीकः .. .. ४)
योगवार्त्तिकम् .. .. १।=)
गीतपदार्थनिर्वचनम् .. .. ३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामेश्वरशास्त्रि-
संशोधिता .. .. ४)
काव्यप्रदीपः, पं॰ रामशास्त्रिभागवताचार्य्येण परिशोधितः .. .. .. २॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्य्येण प्रणीतः .. .. .. १)
[illegible] सटीकम् श्रीमन्मोहनलाल[illegible] ४॥)

सिद्धान्तयति।

न युगपदर्थानुपलब्धेः[१] ॥ ५४ ॥

नैकमिन्द्रियं युगपदेकदार्थानां रूपरसादीनामग्रहात्। एकेन्द्रियस्य सर्वग्राहकत्वे युगपदेव तेषां ग्रहः स्यादिति भावः ॥ ५४ ॥

[२] ज्ञानभेदस्य भेदकत्वमुक्त्वा विषयभेदेन तदाह।

इन्द्रियार्थपञ्चत्वात्[३] ॥ ५५ ॥

इन्द्रियार्थानां इन्द्रियग्राह्याणां रूपादीनाम्। पञ्चत्वात् पञ्चविधत्वात्। रूपं पश्यामि न तु जिघ्रामि गन्धं जिघ्रामि न तु रूपमित्याद्यनुव्यवसायेन रूपादिप्रत्यक्षाणां वैलक्षण्यमावश्यकम्। वैलक्षण्यं चेन्द्रियभेदमन्तरेण न सम्भवति प्रमावैजात्यस्य विलक्षणकरणनियम्यत्वात्। न च विषयवैलक्षण्यमेव प्रमावैजात्यनियामकमिति वाच्यम्। अन्धादीनां रूपाद्युपलब्धिप्रसङ्गात्। तथा च रूपाद्येकैकं चक्षुराद्येकैकेन्द्रियग्राह्यमितीन्द्रियभेद आवश्यक इति भावः ॥ ५५ ॥

प्रतिबन्ध्या[४] शङ्कते।

न तदर्थबहुत्वात्[५] ॥ ५६ ॥

---

(१) एतद्भाष्यव्याख्यानावसरे एतस्मिन् पक्षे न युगपदुपलब्धिप्रसङ्गादिति सूत्रमिति वार्त्तिकम्। न यु-ब्धेः नैतदस्त्येकमिन्द्रियमिति कस्माद् युगपदर्थानुपलब्धेरिति। तदेतत् सूत्रं भाष्यकृता व्याचष्ट इति तात्पर्यटीका। न युगपदर्थानुपलब्धेरिति सूत्रमिति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः।

(२) अनेकं सूत्रमधिकं न्यायसूचीनिबन्धे विप्रतिषेधाच्च न त्वगेकेत्याकारकं दृश्यते। विप्रतिषेधाच्च न त्वक्। शेषं भाष्य इति वार्त्तिकम्। इदं तु न्यायतत्त्वालोके विश्वनाथकृतवृत्तौ च न धृतम्।

(३) इन्द्रियार्थपञ्चत्वादिति सूत्रम्। अर्थः प्रयोजनमित्येवमादि भाष्ये। इदं च सूत्रं न कथञ्चन न्यायेन सम्बध्यत इति वार्त्तिकम्।

(४) आदर्शपुस्तके ऽयमेव पाठः। एवमग्रे ऽपि।

(५) पूर्वपक्षिणः सूत्रम्। न त-त् इति तात्पर्यटीका।

नेन्द्रियाणामर्थपञ्चविधत्वेन भेदः तथा सति गन्धादीनां सौरभादिभेदेन बहुविधत्वादिन्द्रियबाहुल्यप्रसङ्ग इत्यर्थः ॥ ५६ ॥

शङ्कां निरस्यति ।

गन्धत्वाद्यव्यतिरेकाद् गन्धादीनामप्रतिषेधः[1] ॥ ५७ ॥

गन्धादीनां सौरभादीनाम् । गन्धत्वाद्यव्यतिरेकाद् गन्धत्वादिरूपविषयविभाजकधर्मवत्त्वादेव नोक्तप्रतिबन्ध्या इन्द्रियभेदवारणम् ॥ ५७ ॥

यदि गन्धत्वादिना सौरभादीनामनुगमेन तेषां नेन्द्रियभेदकत्वं तदा विषयत्वेनानुगतानां गन्धादीनामपि नेन्द्रियभेदकत्वमित्याशङ्कते ।

विषयत्वाव्यतिरेकादेकत्वम्[2] ॥ ५८ ॥

गन्धरूपादिषु सर्वेष्वेव विषयत्वरूपैकधर्मवत्त्वात् एकत्वमिति । तेषां नेन्द्रियभेदकत्वमिति शेषः ॥ ५८ ॥

शङ्कां निरस्यति ।

न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः[3] ॥ ५९ ॥

न विषयत्वेन विषयानुगमादेवेन्द्रियैक्यम् । कथमित्यत आह । बुद्धीत्यादि । बुद्धेर्बुद्धिविशेषस्य लक्षणं चाक्षु-

(१) अस्योद्धारकं सूत्रम् । गन्धत्वाद्यव्यतिरेकाद् गन्धादीनामप्रतिषेध इति वार्त्तिकम् ।

(२) इदं न्यायसूचीनिबन्धे वर्तते ।

(३) अस्य चार्थस्य ज्ञापनार्थं न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्य इतिसूत्रमिति वार्त्तिकम् ।

चत्वादि तत्पञ्चत्वात् तत्तदवच्छिन्नकरणानां पञ्चविध-त्वम् । तथाऽधिष्ठानं गोलकादि तेषां पञ्चविधत्वात् तदधि-ष्ठितानां पञ्चविधत्वम् । तथा गतिर्विषयप्राप्तिः । तथा च चक्षुर्हि गत्वा गृह्णाति त्वग् देहावच्छेदेन श्रोत्रं कर्णाव-च्छेदेन रसना तदधिष्ठानावच्छेदेन घ्राणमपि तथेति विषय-प्राप्तिप्रकाराणां पञ्चविधत्वात् । आकृतिर्ज्ञानाकृतिः सा च विषय एव । तथा च विषयाणां पञ्चविधत्वात् । जातिः पृथिवीत्वादि तासामिन्द्रियवृत्तीनां पञ्चत्वात् साङ्कर्य-भिया तदाश्रयेन्द्रियाणां पञ्चविधत्वम् । जातिपदं धर्मपरं तेन श्रोत्रत्वस्य जातित्वविरहेऽपि न क्षतिः ॥ ५६ ॥

घ्राणादेः पृथिवीत्वादिजातिमत्त्वे मानमाह ।

भूतगुणविशेषोपलब्धेस्तादात्म्यम्[१] ॥ ६० ॥

भूतानां पृथिव्यादीनां गुणविशेषा गन्धादयस्तेषामु-पलब्धेर्ग्राहकत्वात् । तादात्म्यं तत्तद्भूतविशेषतादात्म्यम् । तथा च घ्राणेन्द्रियं पार्थिवं रूपाद्यव्यञ्जकत्वे सति गन्धव्य-ञ्जकत्वात् कुङ्कुमगन्धाभिव्यञ्जकगोघृतादिवत् । अथ गोघृ-तादौ स्वकीयरूपव्यञ्जकत्वाद् दृष्टान्तासिद्धिः । न च पर-कीयेति रूपादिविशेषणं वाच्यमिति वाच्यम् । नवशरा-वगन्धव्यञ्जकजले ऽनैकान्तिकत्वादिति चेत् । न । जलस्य शक्तुरसाभिव्यञ्जकत्वेनानैकान्तिकत्वविरहात् । अथवा परकीयेति न देयं वाय्वानीतसुरभिभागस्य दृष्टान्ततास-म्भवादिति । घ्राणेन्द्रियसन्निकर्षे व्यभिचारवारणाय द्र-व्यत्वं विशेषणं देयम् । रसनेन्द्रियं जलीयं गन्धाद्यव्यञ्ज-कत्वे सति रसाभिव्यञ्जकद्रव्यत्वाच्छक्तुरसाभिव्यञ्जको-

(१) वृत्तं न्यायसूचीनिबन्धे वर्तते ।

दकवदिति। चक्षुरिन्द्रिये तेजस्त्वानुमानं च प्राग् दर्शितम्। त्वगिन्द्रियं वायुः गन्धाद्यव्यञ्जकत्वे सति स्पर्शव्यञ्जकद्रव्यत्वादङ्गसंसर्गिसलिलशैत्यग्राहकव्यजनवायुवत्। एवं श्रोत्रमाकाशं गन्धाद्यव्यञ्जकत्वे सति शब्दव्यञ्जकद्रव्यत्वादिति। अत्र व्यतिरेकेण दृष्टान्त इति दिक्॥ ६० ॥

समाप्तमिन्द्रियनानात्वपरीक्षाप्रकरणम्॥

क्रमप्राप्तमर्थं परीक्षयति।

गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः॥ ६१ ॥

अप्तेजोवायूनां पूर्वपूर्वमपोह्याकाशस्योत्तरः(१) ॥ ६२ ॥

पूर्वपूर्वमपोह्य गन्धरसरूपस्पर्शेषु मध्ये पूर्वपूर्वं त्यक्त्वा। अप्तेजोवायूनां गुणा ज्ञातव्याः। उत्तरः शब्दः। तथा च गन्धरसरूपस्पर्शाः पृथिव्या गुणा रसरूपस्पर्शा जलस्य रूपस्पर्शौ तेजसः स्पर्शो वायोः शब्द आकाशस्येति॥ ६१ ॥ ६२ ॥

पूर्वपक्षयति।

न सर्वगुणानुपलब्धेः(२) ॥ ६३ ॥

तत्तद्भूतगुणोपलम्भकत्वेन तत्तदिन्द्रियस्य तत्तद्भूतमयत्वमुक्तं तन्न सङ्गतं भवदुक्तानां पृथिवीगुणानां रसा-

---

(१) गन्धेत्याद्यारभ्य उत्तर इत्येतत्पर्यन्तं सूत्रद्वयम्। अतो विशेषणार्थे गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः। अप्तेजोवायूनां पूर्वपूर्वमपोह्याकाशस्योत्तरः। नियमार्थं सूत्रे इतिवार्त्तिकदर्शनात्। अत एव द्वयोरेकसूत्रत्वेन केषाञ्चिल्लेखोऽनादेयः। तात्पर्यटीकायामपि गन्ध-व्याः। अप्ते-रः। सूत्रयोस्तात्पर्यमुक्तं तदेव स्फुटयतीत्युक्तम्।

(२) इदं न्यायसूचीनिबन्धे वर्तते। तात्पर्यटीकायां न स-ब्धेः इति सूत्रप्रतीकधारणारीतिर्दृश्यते।

दीनां घ्राणेनाग्रहात् रसनादिना ग्रहाच्च । तथा च बहिरिन्द्रियाणां स्वप्रकृतिवृत्तियोग्याशेषगुणग्राहकत्वनियमभावे कथं घ्राणादेः पृथिवीत्वादिकमिति भावः । यद्वा रसादीनां घ्राणादिनाऽग्रहात् कथं रसादीनां पृथिव्यादिगुणत्वमुक्तमिति पूर्वपक्षः ॥ ६३ ॥

पूर्वपक्षी स्वयं समाधत्ते ।

एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः[१] ॥ ६४ ॥

उत्तरोत्तराणां जलादीनाम् । एकैकश्येन एकैकक्रमेण । उत्तरोत्तरगुणसद्भावाद् रसादिसद्भावात् । तदनुपलब्धिः तेषां रसादीनां घ्राणादिनानुपलब्धिरित्यर्थः । इदमुपलक्षणम् । पृथिव्यामपि केवलगन्धवत्त्वमिति ॥ ६४ ॥

[२]ननु तर्हि कथं पृथिव्यादौ रसादिग्रहणं तत्राह ।

विष्टं ह्यपरं परेण[३] ॥ ६५ ॥

अपरं पृथिव्यादि । अपरेण जलादिना । विष्टं सम्बद्धम् । तथा च पृथिव्यवच्छिन्नजलादिना रसनासंयोगाद्रसादिग्रहः न तु पृथिव्यामपि रसादिरिति भावः ॥ ६५ ॥

सिद्धान्ती समाधत्ते ।

न पार्थिवाप्ययोः प्रत्यक्षत्वात्[४] ॥ ६६ ॥

न पृथिव्यादेर्निरुक्तैकैकगुणवत्त्वं पार्थिवस्याप्यस्य च द्रव्यस्य प्रत्यक्षत्वात् । प्रत्यक्षे हि रूपस्पर्शौ हेतू पार्थिवज-

(१) एतद्व्याख्यानावसरे एकैकश्येनेति छान्दसो निर्देश इति वार्त्तिकम् ।

(२) अत्र न्यायसूत्रोद्धारे संसर्गाच्चानेकगुणग्रहणमित्येकं सूत्रमधिकं तच्च न्यायसूचीनिबन्धे नास्ति ।

(३) विष्टं-ह्य इति तात्पर्यटीका । न्यायसूचीनिबन्धेऽपीदं वर्तते ।

(४) एतद्व्याख्याने न पार्थिवमाप्यं वा अरूपत्वात् । अस्य सूत्रस्य विकल्पतोऽनेकः सूत्रार्थः कल्प्यत इति भाष्ये वर्णितमिति वार्त्तिकम् ।

तयोश्चक्षुषा तथा च ग्रहणात् प्रत्यक्षेण कार्यलिङ्गेन रूपस्पर्शयोः सिद्धेः। न च पार्थिवाप्ययोस्तेजोवायुसम्बन्धात् परम्परया रूपस्पर्शवत्त्वेन प्रत्यक्षत्वमिति वाच्यम्। क्वचित् साक्षात्सम्बन्धेन क्वचिच्च परम्परासम्बन्धेन तयोर्हेतुत्वे गौरवादिति भावः। एवं तेजसि स्पर्शवत्त्वं बोध्यम्। न च तावता पृथिव्यां रसो नायातीति वाच्यम्। पृथिव्यामिव जल इत्यस्यापि वक्तुं शक्यत्वात् जले पृथिवीसम्बन्धादेव जलावच्छिन्नपृथिव्यां रसग्रहोपगमसम्भवात्। यद्वा पार्थिवाप्ययोरिति। गुणयोरिति शेषः। प्रत्यक्षत्वात् प्रत्यक्षसिद्धत्वात्। न हि प्रत्यक्षसिद्धमपह्नोतुं शक्यत इति भावः। इदमुपलक्षणम्। तेजसोऽपि स्पर्शगुणः प्रत्यक्षसिद्ध इति ॥ ६६ ॥

ननु रसादेः पृथिव्यादिगुणत्वे घ्राणादिना कथं न तद्ग्रह इत्यत आह।

पूर्वंपूर्वं गुणोत्कर्षात् तत्तत्प्रधानम्[१] ॥ ६७ ॥

पूर्वंपूर्वं कारणं घ्राणादीति यावत्। गुणोत्कर्षात् गन्धादिप्रत्यक्षरूपकार्यवैलक्षण्यात्। तत्तत्प्रधानं तत्तद्विलक्षणकार्यानुमितम्। तथा च घ्राणादीनां गन्धादिग्राहकत्वेनैव सिद्ध्या दुरुपपादमितरग्राहकत्वं न प्रामाणिकं प्रत्युत गन्धं जिघ्रामि न तु रसादीत्यादिप्रतीत्या रसाद्यग्राहकत्वं घ्राणादीनां सिद्धमन्यथा संयोगादीनामपि घ्राणादिग्राह्यता स्यादिति भावः ॥ ६७ ॥

(१) इदं न्यायसूचीनिबन्धे दृश्यते। तात्पर्यटीकायामपि पूर्व-मम् इति सूत्रप्रतीकधारणरीतिर्दृश्यते। अत्र पूर्वंपूर्वेति पाठोऽन्यत्र दृश्यते। परं तु पूर्वंपूर्वमिति पाठः समीचीनः। पूर्वंपूर्वमित्यादिसूत्रस्यायमर्थः। पूर्वंपूर्वं घ्राणादि गुणानां गन्धादीनामित्यादिन्यायनिबन्धप्रकाशीयवर्धमानोपाध्यायलेखदर्शनात्।

ननु तावता पृथिवीत्वादिना कुतो घ्राणादीनां सिद्धिरित्यत आह ।

तद्व्यवस्थानं तु भूयस्त्वात्(१) ॥ ६८ ॥

तेषां पृथिवीत्वादिना व्यवस्थानं भूयःसु पृथिव्यादिष्वेव गन्धादिव्यञ्जकत्वस्य दृष्टत्वादिति । तच्च प्रदर्शितं तत्तदनुमानप्रकार एवेति ॥ ६८ ॥

ननु निर्गुणानां तेषां कथं पृथिव्यादित्वमत आह ।

सगुणानामिन्द्रियभावात्(२) ॥ ६९ ॥

गन्धादिविशिष्टानां घ्राणादीनामिन्द्रियभावाद् गन्धादिसाक्षात्कारकरणत्वात् । कुङ्कुमगन्धाभिव्यञ्जकगोघृतादौ तथादर्शनादिति भावः । केचित्तु पूर्वं घ्राणादि तत्तत् प्रधानम् । प्राधान्ये बीजमाह । गुणोत्कर्षात् । तद्व्यवस्थापकत्वात् । तथा च गन्धादिषु मध्ये स्वव्यवस्थापकगुणस्यैव ग्राहकत्वमिन्द्रियाणामिति । ननु पृथिव्यन्तरस्यापि गन्धप्राधान्यात् किमिन्द्रियं किमनिन्द्रियं तत्राह । तद्व्यवस्थानं तु भूयस्त्वादिति । भूयस्त्वात् जलाद्यविशिष्टपृथिव्याद्यारब्धत्वात् । तद्व्यवस्थानं घ्राणादीनामिन्द्रियत्वव्यवस्थितिः । घ्राणादीनां गन्धादिगुणवत्त्वे मानमाह । सगुणानामिन्द्रियभावादिति । अर्थस्तु समान इत्याहुः ॥ ६९ ॥

ननु सगुणत्वे कुतो नाध्यक्षमित्यत आह ।

तेनैव तस्याग्रहणात्(३) ॥ ७० ॥

---

(१) व्यवस्थानियमज्ञापनार्थं तद्व्यवस्थानं तु भूयस्त्वादिति सूत्रमिति वार्त्तिकम् ।

(२) इदं न्यायसूचीनिबन्धे वर्तते ।

(३) तेनैव तस्याग्रहणाच्चेति पाठोऽन्यत्र । इदमपि न्यायसूचीनिबन्धे वर्तते ।

Digitized by Google

तेनैव इन्द्रियेणैव । तस्य गुणस्याग्रहणात् । एवकारेणेन्द्रियाणां गुणाभावव्यवच्छेदः । तथा च तद्गुणानामनुद्भूतत्वकल्पनेनैवाप्रत्यक्षत्वमुपपाद्यमिति भावः ॥ ७० ॥

शङ्कते ।

न शब्दगुणोपलब्धेः[१] ॥ ७१ ॥

इन्द्रियगुणानामप्रत्यक्षत्वनियमो न शब्दात्मकेन्द्रियगुणस्य प्रत्यक्षत्वादित्यर्थः ॥ ७१ ॥

समाधत्ते ।

तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात्[२] ॥ ७२ ॥

भिन्नभिन्नद्रव्यगुणानां वैधर्म्यात् मिथो वैलक्षण्यात् । श्रोत्रयस्य शब्दस्योपलब्धिर्न तु चक्षूरूपादेरितिस्वभाववैलक्षण्यादित्यर्थः । शब्दाश्रयस्य लाघवादैक्यसिद्धेरिति भावः ॥ ७२ ॥

समाप्तमर्थपरीक्षाप्रकरणम् ॥

अर्थानां घ्राणादिग्राह्यत्वेन पृथिव्यादिगुणत्वेन च परीक्षाप्रकरणमित्यर्थः ॥

इति न्यायसूत्रे तृतीयाध्यायस्याद्यमाह्निकम् ॥

इत्यात्मादिप्रमेयचतुष्कपरीक्षणात्मकतृतीयाध्यायाद्याह्निकविवरणम् ॥

---

(१) इदमपि पूर्ववत् ।

(२) अस्यार्थस्य ज्ञापनार्थं तदुपलब्धिरितरेतरवैधर्म्यादिति सूत्रमिति वार्त्तिकम् ।

अथ पञ्चभिः प्रकरणैर्विनाशित्वादिना बुद्धिः परीक्षणीया तत्रादौ बुद्धिविनाशित्वप्रकरणम् । तत्रादौ संशयं प्रदर्शयति ।

कर्माकाशसाधर्म्यात् संशयः(१) ॥ १ ॥

कर्मण आकाशस्य च साधर्म्यं निःस्पर्शत्वादि तेन विनाशित्वाविनाशित्वसहचरितेन बुद्धौ विनाशित्वसंशय इत्यर्थः । अत्र बुद्धिपदार्थत्वेन धर्मिता तेन सांख्यमते पुरुषोपाधिभूताया बुद्धेर्ज्ञानाद्यतिरिक्तत्वेन तेन सह न विवादाप्रसक्तिरिति । यत्तु बुद्धिपदं नित्यशक्तं न वेतिसंशयाकारप्रदर्शनम् । तन्न सङ्गतम् । नैयायिकनयेऽपि नित्ये परमेश्वरज्ञाने बुद्धिपदस्य शक्तत्वादिति ॥ १ ॥

अत्र सांख्याः बुद्ध्यविनाशित्वं वदन्ति तन्मतमाह ।

विषयप्रत्यभिज्ञानात्(२) ॥ २ ॥

यया बुद्ध्या घटो दृष्टः सैव बुद्धिरिदानीं वर्तत इतिबुद्धेः कालान्तरे च तस्या अविनाशकल्पनेनाविनाशित्वमिति । दर्शनं च ज्ञानं बुद्धेर्व्यापारविशेषः तस्य च विनाशितया दृष्ट इत्यतीतनिर्देशः ॥ २ ॥

मतमिदं दूषयति ।

साध्यसमत्वादहेतुः(३) ॥ ३ ॥

तादृशप्रत्ययस्य साध्यसमत्वात् साध्यत्वादसिद्धत्वादिति यावत् । तादृशप्रत्ययोऽहेतुः स्थिराया बुद्धेरसाधकः ॥ ३ ॥

(१) एतद्व्याख्यानावसरे शेषं भाष्य इति वार्त्तिकम् । तत्र संशयदर्शनाय सूत्रमिति वृत्तिकृतः ।

(२) इदं न्यायसूचीनिबन्धे वर्तते । विषयप्रत्यभिज्ञानस्य सोपाधेहेतोरात्मविषयकत्वव्याख्यां निरस्येत्यादि न्यायनिबन्धप्रकाशे वर्धमानोपाध्यायाः ।

(३) इदमपि न्यायसूचीनिबन्धे वर्तते ।

ननु योऽहं घटमद्राक्षं सोऽहं घटं स्पृशामीति प्रत्यभिज्ञानमहंप्रत्ययगोचरामेकां स्थिरां बुद्धिं विषयीकरोति न तु कूटस्थमात्मानं तस्याश्च ज्ञानात्मिका वृत्तयो जायन्ते वृत्तयश्च बुद्ध्यभिन्ना वह्नेरिव स्फुलिङ्गा इत्यत आह ।

न युगपदग्रहणात्[१] ॥ ४ ॥

वृत्तिवृत्तिमतोरभेदे वृत्तिमतोऽविनाशित्वे वृत्तीनामपि स्थिरतापत्त्या सर्वपदार्थग्रहणं युगपत् स्यात् सार्वदिकं च स्यात् ॥ ४ ॥

अथ यथा सुवर्णाभिन्नकुण्डलादिभङ्गे ऽपि न सुवर्णविनाशस्तथा बुद्ध्या अभिन्नानां बुद्धिवृत्तीनां नीलाद्याकाराणां विनाशे ऽपि न बुद्धिनाश इति बुद्ध्यविनाशे ऽपि न वृत्तिस्थिरतेत्येवं वृत्तीनां भेदे ऽप्याह ।

अप्रत्यभिज्ञाने च विनाशप्रसङ्गः[२] ॥ ५ ॥

तथा चोक्तप्रत्यभिज्ञानमहङ्कारास्पदं कूटस्थमात्मानं विषयीकरोति बुद्धेरचेतनत्वात् तथा च बुद्धेः प्रत्यभिज्ञानाविषयत्वेन भवदुक्तवृत्त्यतिरिक्ततया प्रमाणसिद्धत्वात् विषयोपरक्ततयानुभूयमानायाश्च विनाशित्वं घटो बुद्ध इत्यादिप्रत्ययेनातीतत्वबोधनाच्चेति भावः ॥ ५ ॥

नन्वात्मा ज्ञानसमवायी तस्य चाविशेषात् सर्वदैव सर्वविषयग्रहणं स्यादित्यत आह ।

क्रमवृत्तित्वादयुगपद्ग्रहणम्[३] ॥ ६ ॥

---

(१) न युगपदग्रहणात् । वृत्तिमतोऽवस्थानाद् वृत्त्यवस्थानमिति सूत्रार्थं इति वार्त्तिकम् ।

(२) अप्रत्यभिज्ञाने च विनाशप्रसङ्गः । वृत्तीनामपगमे वृत्तिमतोऽप्यपगम इति सूत्रार्थ इति वार्त्तिकम् ।

(३) क्रमवृत्तित्वादयुगपद्ग्रहणम् । वृत्तिवृत्तिमतोर्नानात्वादिति सूत्रार्थ इति वार्त्तिकम् ।

Digitized by Google

इन्द्रियाणां क्रमवृत्तितया सामग्र्याः क्रमवृत्तित्वाद् युगपदभावान्न युगपद्ग्रहणम् । ननु नानाविषयैरेकदैव नानेन्द्रियसम्बन्धात् सामग्र्यपि युगपदस्तीत्यत आह भाष्यकारः । पर्यायेण सर्वेन्द्रियैः । पर्यायेण मनः सर्वेन्द्रियैः सम्बध्यत इत्यर्थः । तथा च मनसोऽणुत्वादेकदा नानेन्द्रियसम्बन्धाभावेन यस्मिन्निन्द्रिये यदा मनसः सम्बन्धस्तदा तेनेन्द्रियेण ज्ञानं जन्यत इति भावः ॥ ६ ॥

ननु घटादीनामेकस्यैवाधिकरणचाक्षुषादिधारा स्यादित्यत आह ।

अप्रत्यभिज्ञानं च विषयान्तरव्यासङ्गात्(१) **॥ ७ ॥**

अप्रत्यभिज्ञानं अविरलधारया तत्तदिन्द्रियजन्यज्ञानविरहः । विषयान्तरव्यासङ्गाद् विषयान्तरसञ्चारात्मकप्रतिबन्धकवशादित्यर्थः । विषयान्तरसञ्चारविरहे त्विष्टैव ज्ञानधारेति भावः ॥ ७ ॥

ननु किमर्थं मनः स्वीकार्यं बुद्धिरेव युगपद्ग्रहणवारणाय स्वीकार्येत्यत आह ।

न गत्यभावात्(२) **॥ ८ ॥**

बुद्धेरणुत्वे तदाश्रितज्ञानाप्रत्यक्षापत्तिः मनःपदपर्यायतापत्तिरपि स्याद् विभुत्वे च युगपद्ग्रहणावारणमिति भावः ॥ ८ ॥

---

(१) इदं न्यायसूचीनिबन्धे वर्त्तते ।

(२) न गत्यभावात् । प्राप्तान्यन्तःकरणेनेन्द्रियाणीति सूत्रार्थ इति वार्त्तिकम् ।

Digitized by Google

शङ्कते ।

स्फटिकान्यत्वाभिमानवत् तदन्यत्वाभिमानः(१) ॥ ९ ॥

यथा स्फटिके जवादिसन्निधाने जवादिलौहित्यारोपेण स्फटिकान्यत्वारोपस्तथा एकस्या एव बुद्धेर्विषयेन्द्रियसन्निकर्षादिवशेन नानाविधविषयसम्बन्धान्नानात्वारोपस्तेन च घटज्ञानं नष्टं पटज्ञानं जातमित्याद्यारोपो न तु ज्ञानभेद इति ॥ ९ ॥

शङ्कां निरस्यति ।

न हेत्वभावात्(२) ॥ १० ॥

एकस्यां बुद्धौ न नानात्वारोपः हेत्वभावात् बुद्धेरेकत्वसाधकाभावात् नानात्वस्य प्रत्यक्षसिद्धस्यान्यथात्वकल्पकाभावाच्चान्यथा घटादेरपि नित्यत्वं स्यादिति भावः । इदं भाष्यं न मुनिकृतमिति केचित् ॥ १० ॥

समाप्तं बुद्धिविनाशित्वप्रकरणम् ॥

स्फटिके नानात्वभ्रम इत्यसहमानः सौगतः शङ्कते । यथा बुद्धेः क्षणिकत्वं मनस्यभिप्रेत्य स्फटिकस्य क्षणिकत्वं सौगतः साधयति ।

---

(१) अस्य चार्थस्य ज्ञापनार्थं स्फटिकान्यत्वाभिमानवत् तदन्यत्वाभिमान इति सूत्रमिति वार्त्तिकम् । स्फटिकान्यत्वाभिमानवत् तदभिमान इति सोऽत्र पूर्वपक्ष इति न्यायनिबन्धप्रकाशे वर्धमानोपाध्यायाः । तत्र चायमेव पाठः ।

(२) न हेत्वभावादिति भाष्यं व्याचष्टे यथाश्रुति सूत्र इतीति तात्पर्यटीका । इदं न्यायसूचीनिबन्धे नास्त्यत इदं भाष्यमेवेति केचित् । तन्न । अत्र स्फटिकान्यत्वाभिमानवत् तदभिमान इतिसौत्रपूर्वपक्षे सौत्र एव सिद्धान्तो युक्त इति हेत्वभावादिति सिद्धान्तसूत्रम् । न हेत्वभावादिति भाष्यमिति टीका च सूत्रव्याख्यानपरभाष्याभिप्रायेणापि सङ्गच्छत इत्याहुरिति न्यायनिबन्धप्रकाशीयवर्धमानोपाध्यायलेखदर्शनात् ।

Digitized by Google

स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद् व्यक्तीनाम्(१) ॥ ११ ॥

अपिकराद् बुद्ध्यादिपरिग्रहः । अपरापरोत्पत्तेः प्रतिक्षणं पूर्वस्फटिकनाशेनापरस्फटिकोत्पत्तेः । क्षणिकत्वमिति शेषः । प्रतिक्षणविनाशे हेतुमाह । व्यक्तीनां भावानाम् । क्षणिकत्वात् स्वोत्पत्तिद्वितीयक्षणवृत्तिध्वंसप्रतियोगित्वात् । यत् सत् तत् क्षणिकमितिव्याप्तेः । अत्र दृष्टान्तः क्षणिकान्त्यशब्दः । क्षणिकान्त्यशब्दास्वीकारे दृष्टान्तार्थमाह भाष्यं यथा । उपचयापचयप्रबन्धदर्शनाच्छरीरेषु । प्रतिक्षणं शरीरेषु उपचयापचयधारादर्शनान्नानात्वं न ह्येकस्मिन्नवयविनि परिमाणद्वयसमावेश इति भावः । इदमपि सूत्र मिति केचित् ॥ ११ ॥

मतं दूषयति ।

लयहेत्वभावाद् यथादर्शनमभ्यनुज्ञा(२) ॥ १२ ॥

पदार्थानां लयो विनाशस्तस्य हेत्वभावात् सामग्र्यनियमात् पदार्थानां यथादर्शनं दर्शनमनतिक्रम्याभ्यनुज्ञा । तथा च स्फटिकादीनां स एवायमितिप्रत्यभिज्ञानात् स्थैर्यसिद्धिरिति भावः । केचित्तु ननु तदा न कोऽपि क्षणिकः पदार्थ इत्यत आह । यथादर्शनमिति । तथा च यदि कस्यचिदुत्पत्तिपरसमय एव विनाशसम्भवस्तदा तस्य क्षणिकत्वमभ्युपेयत एव यथान्त्यः शब्द इत्याहुः ॥ १२ ॥

---

(१) इदं न्यायसूचीनिबन्धे वर्तते । स्फटि-तुः इति तात्पर्यटीका । व्यक्तीनामहेतुरिति पाठो न्यायसूचीनिबन्धादन्यत्र सर्वत्र ।

(२) नियमहेत्वभावादिति पाठोऽन्यत्र सर्वत्र । सिद्धान्तसूत्रम् । निय-ज्ञा इति तात्पर्यटीका ।

Digitized by Google

दोषान्तरमाह ।

नोत्पत्तिविनाशकारणोपपत्तेः[१] ॥ १३ ॥

न स्फटिकादेः क्षणिकत्वं यतः पदार्थानामुत्पत्तिविनाशयोरुत्पत्तिविनाशकारणाभ्यामेवोपपत्तेः । तथा च स्फटिकादावुत्पत्तिविनाशकारणानुपलब्ध्या न पूर्वविनाशोऽपरोत्पत्तिश्च स्यादिति भावः ॥ १३ ॥

पूर्वपक्षयति ।

क्षीरविनाशकारणानुपलब्धिवद् दध्युत्पत्तिवच्च तदुत्पत्तिः[२] ॥ १४ ॥

क्षीरविनाशकारणानुपलब्धावपि क्षीरविनाशवद् दध्युत्पत्तिकारणानुपलब्धावपि दध्युत्पत्तिवच्च तदुत्पत्तिः । पूर्वस्फटिकनाशकारणापरस्फटिकोत्पत्तिकारणानुपलब्धावपि पूर्वविनाशोऽपरोत्पत्तिश्चेत्यर्थः ॥ १४ ॥

सिद्धान्तयति ।

लिङ्गतो ग्रहणान्नानुपलब्धिः[३] ॥ १५ ॥

क्षीरविनाशस्य दध्नश्च प्रत्यक्षसिद्धत्वात् तेन लिङ्गेन तत्कारणं कल्प्यते स्फटिकादौ विनाशजन्माप्रत्यक्षेण न तत्कारणकल्पनमिति भावः ॥ १५ ॥

---

(१) कारणोपलब्धेरित्यन्यत्र पाठः । यथावश्यं साधनं वक्तव्यम् । इदं ब्रूमः नोत्पत्तिविनाशकारणोपलब्धेरिति वार्त्तिकग्रन्थपङ्क्तिव्याख्यानावसरे उत्तरसूत्रमवतारयति यथावश्यं साधनं वक्तव्यमितीति तात्पर्यटीका । एतद्व्याख्यानावसरे च न ह्यपूर्वं जायमानं वर्धत इत्युच्यते नापि विनश्यदपचितमित्युच्यते उपचयापचययोरुत्पत्तिविनाशकारणोपलब्धेरिति सूत्रार्थं इति वार्त्तिकम् ।

(२) क्षीरविनाशे कारणानुपलब्धिवद् दध्युत्पत्तिवच्च तदुपपत्तिरित्यन्यत्र पाठः । इदं न्यायसूचीनिबन्धे वर्तते ।

(३) इदमपि पूर्ववत् । सिद्धान्तसूत्रमिति वृत्तिकृतः ।

Digitized by Google

सांख्यमतं दूषयितुमाह ।

न पयसः परिणामगुणान्तरप्रादुर्भावात्[१] ॥ १६ ॥

न क्षीरनाशो दध्युत्पत्तिश्च किं तु दुग्धस्य परिणामेन पूर्वगुणनाशेन गुणान्तरप्रादुर्भावात् । गुणश्चात्र रसादिः । एवं चैतद्दृष्टान्तेन न स्फटिकादेर्नाशोत्पत्तिकल्पनमिति भावः ॥ १६ ॥

मतमिदं दूषयति ।

व्यूहान्तराद् द्रव्यान्तरोत्पत्तिः पूर्वद्रव्यनिवृत्तेरनुमानम्[२] ॥ १७ ॥

व्यूहान्तरादवयवसंस्थानवैलक्षण्यात् । अनुमानं ज्ञापकम् । द्रव्यान्तरोत्पत्तौ द्रव्यान्तरस्य प्रतिबन्धकतया तन्नाशं विना द्रव्यान्तरोत्पत्तिर्न भवतीत्यानुभविकी द्रव्यान्तरोत्पत्तिः पूर्वद्रव्यनाशज्ञापिकेति भावः ॥ १७ ॥

सौगतमते पुनर्दूषणमाह सिद्धान्ती ।

क्वचिद्विनाशकारणानुपलब्धेः क्वचिच्चोपलब्धेरनेकान्तः[३] ॥ १८ ॥

क्षीरदधिदृष्टान्तेन विनाशोत्पादावकारणकावेवेति न युक्तं घटादौ सकारणकत्वोपलब्धेर्व्यभिचारादिति । यद्वा

(१) इदमपि न्यायसूचीनिबन्धे वर्तते ।

(२) उभयथोत्तरं व्यूहान्तराद् द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम् । शेषं भाष्य इति वार्त्तिकम् । अयमेव पाठो न्यायसूचीनिबन्धेऽपि दृश्यते । एतन्निराकरोति सूत्रकार इत्येतदवतरणिकायां वृत्तिकृतः ।

(३) इदं न्यायसूचीनिबन्धे वर्तते । एतदुत्थानबीजं दोषान्तराभिधानाय सिद्धान्तिनः सूत्रमिति वृत्तिकारैर्दत्तम् ।

क्वचित् क्षीरादिनाशस्थले । विनाशकारणेत्युत्पत्तिकारणोपलक्षकम् । क्वचिच्च दण्डादिना घटादिनाशस्थले । उपलब्धेः विनाशकारणोपलब्धेः । अनेकान्तः स्फटिकादौ प्रतिक्षणं विनाशानिर्णयः । क्षीरादिदृष्टान्तेन नाश इव घटादिदृष्टान्तेन नाशाभावोऽपि कल्पयितुं शक्य इति भावः । न च तावता क्षणिकत्वसंशयेन स्थिरत्वानिर्णय इति वाच्यम् । क्षीरविनाशे ऽम्लद्रव्यसंयोगस्य हेतुत्वादम्लरसवत्परमाणुभिश्च दध्न आरम्भाच्चाकारणकौ क्षीरदध्युत्पादविनाशावित्यभिप्रायः । सूत्रं तु तन्मतमभ्युपेत्योक्तम् । वस्तुतस्तु सूत्रमेवं व्याख्येयम् । क्वचिद् ग्रीष्मादौ क्षीरविनाशेन दध्युत्पादे विनाशकारणानिर्णयात् क्वचिच्चाम्लद्रव्यसंयोगेन क्षीरादिविनाशेन दध्युत्पादे ऽनेकान्तः सकारणकत्वस्य व्यभिचारसंशयः । न च स सकारणकत्वनिश्चयविरोधी व्यभिचारनिर्णयस्य विरोधित्वादिति भावः ॥ १८ ॥

समाप्तं क्षणभङ्गभञ्जनप्रकरणम् ॥

अथ बुद्धेरात्मगुणत्वं यद्यप्यात्मग्राहकमानेनैव सिद्धं प्रागुक्तं तथाप्यत्र शिष्यबुद्धिवैशद्याय विशिष्य विस्तरेण तदुपपादयति ।

नेन्द्रियार्थयोस्तद्विनाशे ऽपि ज्ञानावस्थानात्(१) ॥ १९ ॥

बुद्धिर्नेन्द्रियस्य गुणः तत्तदिन्द्रियनाशे ऽपि तत्तदिन्द्रियजन्यज्ञानाहितसंस्कारात् ज्ञानावस्थानात् स्मरणोत्प-

(१) तत्र चेन्द्रियार्थसन्निकर्षाधीनत्वादिन्द्रियादिनिष्ठत्वमेवास्तु भेर्याकाशसंयोगाधीनशब्दस्याकाशनिष्ठत्ववदिति पूर्वपक्षे सिद्धान्तसूत्रमित्येतदुत्थानबीजं वृत्तिकारैर्दत्तम् । वर्तते चेदं न्यायसूचीनिबन्धे ।

Digitized by Google

स्वच्छेदसहितो भागहारस्तेनात्र जातं परिवर्त्य भागहारच्छेदांशौ इत्यादि । द्वयोः प्रथमपरयोरित्येतत् सूत्रखण्डकमुत्तरसूत्रसम्बद्धं भविष्यति ।'

उद्देशकः ।

दिनार्धपादपञ्चांशैः कुल्या याः पूरयेत् पृथक् ।
वाप्याः कुर्वन्ति ता मुक्ता युगपत् पूरणं कदा ॥

न्यासः । १/१ | १/१/२ | १/१/४ | १/१/५ | ऊर्ध्वांशाश्छेदगुणा इति कृते वर्तनम् । १/१ | २/१ | ४/१ | ५/१ | रूपसञ्चयोऽयम् १२ । एतावन्ति दिवसप्रमाणानि भवन्ति सर्वकुल्याभिरेतस्यैराशिकम् । यदि द्वादशभिः पूरणैर्दिनं भवति तदैकपूरणेन कियत्कालः । फलम् १/१२ । 'एवं भजेच्छिदोऽंशैः'-इति भास्करोक्तमेतदनुरूपम् ।

अन्योद्देशकः ।

दिनत्रिभागेन ददाति रूपं दलेन चान्यः प्रयतो द्विजेभ्यः ।
त्रिरूपदाता दिनपञ्चकेऽन्यः समं प्रवृत्ताः कतद्याः कदा स्युः ॥

न्यासः । १/१/३ | १/१/२ | ३/५/१ | उक्तवद्दिनानि १७ ६/७ ।

प्रथमद्वितीयतृतीयजातिभ्यो ये अन्ये परे जाती द्वे चतुर्थीपञ्चम्यौ तयोर्द्वयोः परयोः सवर्णनार्थमधःस्थच्छेदैरुपरिष्ठाश्छेदा गुणिताः । स्वांशयुतानैस्तैरेव छेदैरुपरिगांशा गुणिताः । अंशानुबन्धे स्वांशयुतैर्भागापवाहे स्वांशहीनैश्छेदैरित्यर्थः । 'तलस्थहारेण हरं निहन्यात्'-इति भास्करोक्तमेतदनुरूपमेव ।

अथ चतुर्वेदोद्देशकः ।

वणिजः किश्चिदस्यस्य पादमादाय रूपकात् ।
दिनानि सप्त लाभार्थं पणयं चक्रे फलार्थिभिः ॥
स्वार्धत्रिपादभागैश्च पञ्चषट्सप्तमैर्युतम् ।
दिनं प्रतिदिनं तेन कृतं मूल्यं कियद्धनम् ॥
मध्वन्योऽपि रूपेण रूपैः षड्भिस्तथा परः ।

तयोरपि धनं ब्रूहि यदि भागानुबन्धवित् ॥

न्यासः ।

१/४	१/६	६/२
१/२	१/२	१/२
१/३	१/३	१/३
१/७	१/७	१/७
१/५	१/५	१/५
१/८	१/८	१/८
१/६	१/६	१/६

उक्तवत् क्रमेण धनानि प्रथमस्य १ । द्वितीयस्य ४ । तृतीयस्य २४ ।

भागापवाहे चापि चतुर्वेदोद्देशकः ।

अष्टौ पलानि वणिजा सितचन्दनस्य
नीतानि चोत्तरगिरिं किल कान्यकुब्जात् ।
द्रावं च दत्तमपि पञ्चसु तेन मान-
स्यार्धत्रिपञ्चनवमाष्टसमं तदा किम् ॥

न्यासः । ६/२, ·/४, ·/५, ·/१/३, ·/१/५, ·/१/८

उक्तवत् करणेन जातम् १ ८९/११२ । अत्र कोलब्रूकसाहिबेन भ्रमात् १११/११२ इत्युत्तरं वास्तवं लिखितम् । (See his translation p. 283.) अत्र चतुर्वेदाचार्यः स्वटीकायाम् । 'एवमिहाचार्येण पञ्चजातय एवोक्ताः । यतः षष्ठीति तदात्मिकैवासौ गतार्थेति कृत्वा नोक्ता । स्कन्दसेनादिभिस्तस्या नाम कृतं भागमातेति' ।

भागमातर्थे द्रष्टव्या (मच्छोधिता त्रिशतिका पृ० १२)

इदानीं त्रैराशिकादिषु करणसूत्राणि ।

त्रैराशिके प्रमाणं फलमिच्छाद्यन्तयोः सदृशराशी ।
इच्छा फलेन गुणिता प्रमाणभक्ता फलं भवति ॥१०॥
व्यस्तत्रैराशिकफलमिच्छाभक्तः प्रमाणफलघातः ।
त्रैराशिकादिषु फलं विषमेष्वेकादशान्तेषु ॥ ११ ॥
फलसङ्क्रमणमुभयतो बहुराशिवधोऽल्पवधहृतो ज्ञेयम् ।
सकलेष्वेवं भिन्नेषूभयतश्छेदसङ्क्रमणम् ॥ १२ ॥

अत्र चतुर्वेदाचार्यः । 'अतद्गुणसंविज्ञानोऽयं बहुव्रीहिस्त्रैराशिकोक्तत्वात् । तेनायमर्थः । त्रैराशिकमादौ येषां तानि त्रैराशिकादीनि । पञ्चराशिक-सप्तराशिक-नवराशिकैकादशराशिकानीत्यर्थः । तेषु विषमेष्वेकादशान्तेषु न तु समेषु चतुर्षोडिष्वित्यर्थः ।'

फलसङ्क्रमणमुभयतोऽन्योऽन्यपक्षनयनं फलयोरेवं भिन्नेषु राशिषु उभयतश्छेदसङ्क्रमणमर्थादन्योऽन्यपक्षनयनं छेदानामपि कार्यम् । शेषं स्पष्टार्थम् । भास्करस्य त्रैराशिकादिसूत्राण्येतदनुरूपाण्येव ।

अत्र चतुर्वेदोक्त उद्देशकः ।

शतमष्टोत्तरं धेनोर्या ददाति दिनैस्त्रिभिः ।
मासयुक्तेन सोऽब्देन कियतीर्गाः प्रयच्छति ॥

न्यासः । दि ३ । गावः १०८ । दि ३९० । उक्तवत् लब्धा गावः १००८० ।

अन्योद्देशकः ।

यः पिपीलो दिने याति स्वपञ्चोनं यवाष्टकम् ।
अह्नेन विनिवर्त्तेत विंशत्यंशं तथाऽङ्गुलम् ॥
आभ्यां गतिनिवृत्तिभ्यां यस्य यातं प्रकल्पितम् ।
योजनानां शतं पूर्णं केन कालेन स व्रजेत् ॥

अत्र चतुर्वेदोक्ता परिभाषा 'अष्टभिर्यवोदरैरङ्गुलं चतुर्विंशत्यङ्गुलैर्हस्तः । चतुर्हस्तं धनुः । अष्टौ धनुःसहस्राणि योजनम् ।' अत्रैकदिनगतिर्यवात्मिका = $\frac{३२}{५}$ । एकदिननिवृत्तिरङ्गुलात्मिका = $\frac{१}{६०}$ । दिनगतिरङ्गुलात्मिका = $\frac{४}{५}$ अनयोरन्तरेण $\frac{४७}{६०}$ योजनाङ्गुलानि = १×८०००×४×२४ भक्तानि लब्धानि दिनानि = $\frac{८०००×४×२४×६०}{४७}$ = ९८०४२५ $\frac{२५}{४७}$ ।

व्यस्तत्रैराशिक उद्देशकः ।

षड्सोडर्षिकया भारस्तुलया सम्मितः पुरा ।
पञ्चसौवर्णिकायास्तु तया किं स्यात्तुद स्फुटम् ॥

Digitized by Google

न्यासः । सु॰ ६ । भा॰ १ । सु॰ ५ । उक्तवत् फलम् = (भा॰ १ पलानि ४०० ।) अत्र चतुर्वेदोक्तेयं परिभाषा । 'षोडशभिर्यवैर्माषकस्तैः षोडशभिः सुवर्णो तैश्चतुर्भिः पलं पलसहस्रद्वयेन भार इति' ।

अन्योद्देशकः ।

सार्धत्रिकेण याः स्वार्यः प्रस्थानां दश सम्मिताः ।
सार्धपञ्चकमानेन कियत्यस्ता वदाशु मे ॥

न्यासः । $\frac{७}{२}$ । १० । $\frac{११}{२}$ । उक्तवत् फलम् = (द्रो॰ १ आ॰ ३ । खा॰ ६ । मा॰ १ । प्र॰ १ । कु॰ $\frac{४}{११}$ ।) अत्र चतुर्वेदोक्तेयं परिभाषा ।

चतुर्भिः कुडवैः प्रस्थस्तैश्चतुर्भिरथाढकम् ।
आढकानां चतुष्केण द्रोणः स्यातः पुरातनैः ॥
माणिका तैश्चतुर्भिः स्यान्माणिकानां चतुष्टयम् ।
खार्याः प्रमाणमेतत् स्यान्मागधानां प्रसिद्धतः ॥

पञ्चराशिकादौ चतुर्वेदोक्तोदाहरणानि ।
शतस्य दशका वृद्धिस्त्रिभिर्मासैर्निरूपिता ।
पञ्चमासप्रयुक्तायाः षष्टेर्लाभो निगद्यताम् ॥ उक्तवल्लब्धम् १० ।
मासेन सत्रिभागेन सार्धायास्त्रिंशतेः फलम् ।
अध्यर्धं यदि वर्षेण सार्धषष्टेरिहोच्यताम् ॥ उक्तवल्लब्धम् २६$\frac{११}{१२}$ ।
शतस्य दशभिर्मासैश्चत्वारिंशत् फलं यदि ।
मासाष्टके शतं लब्धं कस्येयं वृद्धिरुच्यताम् ॥ उक्तवल्लब्धम् ६२५ मू॰ ध॰ ।
द्विपञ्चकानि वासांसि चीर्णि षड्भिः पणैर्यदि ।
त्रिषट्कानि गृहीतानि दश मूल्यं वद स्फुटम् ॥ उक्तवन्मूल्यम् ३६१ ।
द्विपञ्चकानि वासांसि चीर्णि षड्भिः पणैर्यदि ।
षट्कृत्या कति वासांसि त्रिषट्कानि वदाशु मे ॥
आयामोत्सेधविस्तारैः षोडशाष्टौ तथा दश ।
यासां मूल्यं शतं तासां दीनाराः षट् प्रकीर्तिताः ॥
इष्टकानां तथाऽन्यासामायामाद्यैः पदोनकैः ।
लब्धं गृहीतमस्माभिर्यद्द्रव्यं तद्वद स्फुटम् ॥ आगतद्दीनाराः २५३१३ ।

हस्तिनो दश दैर्घ्येण विस्तारेण तथा नव ।
परिणाहेन षट्त्रिंशद्द्वयोरोच्येन सप्तकम् ॥
तौ चेद्द्रोणाशिनौ स्यातां तदन्ये दश हस्तिनः ।
दीर्घाद्यैः पादसंयुक्तैस्तेषां भोगो निगद्यताम् ॥ उक्तवत् फलं द्रो १२। प्र३। कु१।

इदानीं भाण्डप्रतिभाण्डके करणसूत्रम् ।

प्राग्मूल्यव्यत्यासो भाण्डप्रतिभाण्डकेऽन्यदुक्तसमम् ।
परिकर्माण्यष्टानां व्यवहाराणामभिहितानि ॥ १३ ॥

'प्राक् प्रथमस्थाने यौ मूल्यराशी तयोर्व्यत्यासः कार्यं' इति चतुर्वेदाचार्यः । 'तथैव भाण्डप्रतिभाण्डके विधि'रित्यादि भास्करोक्तमेतदनुरूपमेव ।

अत्र चतुर्वेदाचार्योक्तोदाहरणम् ।

पणैर्दशभिराम्राणां दाडिमानां तथाऽष्टभिः ।
यदा शतं तदाऽऽम्रैस्तु विंशत्या कति दाडिमाः ॥
लब्धा उक्तवद्दाडिमाः २५ ।

अत्र चतुर्वेदाचार्यः ।

'एवमालंबेन मार्गेण सङ्कलनादीन्युक्तानि यानि तु करणीगतानि अव्यक्तगतानि धनर्णशून्यगतानि च तान्याचार्य एव कुट्टकाध्याये वक्ष्यति वयमपि तत्रैव तेष्वेव सूत्रेषु व्याख्यास्यामः ।'

इति परिकर्मविंशतिः ।

अथ मिश्रकव्यवहारे करणसूत्रम् ।

कालगुणितं प्रमाणं फलभक्तं व्येकगुणाहृतं कालः ।
स्वफलयुतरूपभक्तं मूलफलैक्यं भवति मूलम् ॥ १४ ॥

प्रमाणं प्रमाणधनं कालगुणितं प्रमाणकालेन गुणितं ततः फलभक्तं प्रमाणफलेन भक्तं यल्लब्धं तद्व्येकगुणाहृतं यद्गुणं सकलान्तरं धनमपेक्षितं तेन व्येकेन हृतं कालो भवति । तावत्कालपर्यन्तं दत्तं धनं सकलान्तरं तद्गुणं भवति ।

अत्र चतुर्वेदोक्तोद्देशकः ।

शतद्वयस्य मासेन षड्रूम्मा यदि वृद्धितः ।
त्रिगुणं केन कालेन प्रयुक्तं तद्धनं भवेत् ॥

अत्र $\frac{\text{प्रका} \times \text{प्रध}}{\text{प्रफ}} = \frac{१ \times २००}{६} = \frac{१००}{३} =$ ल । ततः

कालः $= \frac{१०० \times \text{इगु}}{३} = \frac{२००}{३} = ६६\frac{२}{३}$ मासाः ।

अन्योद्देशकः ।

मासद्वये पणाः पञ्च विंशतेर्यदि वृद्धितः ।
तदध्यर्धगुणं ब्रूहि केन कालेन मे धनम् ॥

अत्र $\frac{\text{प्रका} \cdot \text{प्रध}}{\text{प्रफ}} = \frac{२ \times २०}{५} = ८$ । ततो मासाः $= ८ \times \text{इगु}$
$= ८ \times \frac{१}{२} = ४$ ।

अत्रोपपत्तिः । कल्प्यन्तेऽभीष्टमासाः = मा । ततोऽनुपातेनैतावद्भि-
र्मासैर्वृद्धिः $= \frac{\text{प्रफ} \times \text{मा}}{\text{प्रमा}}$ । इयं प्रमाणधनयुता जातमभीष्टगुणं

मूलधनम् =

$\text{गु} \cdot \text{प्रध} = \frac{\text{प्रफ} \cdot \text{मा}}{\text{प्रमा}} + \text{प्रध} \therefore \text{मा} = \frac{\text{प्रमा प्रध} \cdot (\text{गु} - १)}{\text{प्रफ}}$ अत उपपन्नम् ।

मूलफलैक्यं सकलान्तरं धनं स्वफलयुतरूपभक्तं रूपस्य तत्कालसंबन्धि यत् कलान्तरं तत् स्वफलं तेन स्वफलेन युतं यद्रूपं तेन भक्तं लब्धं मूलं धनं भवति । 'यद्वेष्टकर्माख्यविधेस्तु मूलम्–'इत्यादि भास्करोक्तमेतदनुरूपमेव ।

अथ चतुर्वेदोक्तोद्देशकः ।

शतेन पञ्चकेनेह मासवृद्ध्या धने स्थिते ।
षट्त्रिंशतिर्दशभिर्मासैः प्रदत्ता मूलमत्र किम् ॥

उक्तवल्लब्धं मूलम् २४ ।

अन्योद्देशकः ।

अर्पितं हेमकारस्य सुवर्णानां शताष्टकम् ।
द्विजार्थे कुरु पात्राणि पञ्चसौवर्णिकं शतम् ॥

घटनाय त्वया सार्धं कृतं तेन तथैव तत्।

घटितस्य सुवर्णस्य तच्च सङ्ख्यां वदस्व मे॥

उक्तवद्घटितसुवर्णमानम् = $७६१\frac{१५}{२१}$ मिश्रात् ८०० विशोध्य घटनप्रमाणम् $३८\frac{६}{२१}$।

मिश्रान्तरे करणसूत्रम्।

कालप्रमाणघातः परकालहृतो द्विधाऽऽद्यमिश्रवधात्।

अन्यार्धकृतियुतात् पदमन्यार्धोनं प्रमाणफलम्॥ १५॥

कालप्रमाणघातः प्रमाणकालप्रमाणधनघातः परकालेन हृतः फलं द्विधा स्थाप्यम्। आद्यस्थाने स्थापितस्य मिश्रधनस्य च वधः कार्यस्तस्माद्वधादन्यस्थापितार्धवर्गयुतात् पदं ग्राह्यं तदन्यार्धेन हीनं प्रमाणफलं भवति।

अत्र चतुर्वेदोक्तोद्देशकः।

यत्कालवृद्धिकर्णस्त्वं द्रम्माणां शतपञ्चकम्।

वृद्धिर्मासचतुष्कस्य तदीयाऽन्यत्र योजिता॥

कालान्तरेण तेनैव जाताऽष्टासप्ततिस्ततः।

मासैर्दशभिरत्र त्वं प्रमाणस्य फलं वद॥

न्यासः। प्रका = ४। प्रमाध = ५००। परका = १०। मिश्रध = ७८।

$\frac{\text{प्रका}\cdot\text{प्रध}}{\text{परका}} = \frac{४ \times ५००}{१०} = २०० = \text{आ}।\ \text{आ}\cdot\text{मि} = २०० \times ७८ = १५६००$

$\sqrt{\frac{\text{अ}^2}{४} + \text{आ}\cdot\text{मि}} = \sqrt{१०००० + १५६००} = \sqrt{२५६००} = १६० = \text{प}।$

$\text{प} - \frac{\text{अ}}{२} = १६० - १०० = ६० = $ प्रमाणफलम्।

अत्रोपपत्तिः। प्रमाणफलम् = या। ततो दशभिर्मासैरस्य कलान्तरम् = $\frac{\text{या}^2 \times \text{परका}}{\text{प्रध} \times \text{प्रका}}$। इदं मूलधनेन यावत्तावन्मितेन युतं जातम्।

$\text{मि} = \frac{\text{परका}\cdot\text{या}^2 + \text{प्रध}\cdot\text{प्रका}\cdot\text{या}}{\text{प्रध}\cdot\text{प्रका}}$ समशोधनादिना

$\frac{\text{मि}\cdot\text{प्रध}\cdot\text{प्रका}}{\text{परका}} = \text{या}^2 + \frac{\text{प्रध}\cdot\text{प्रका}}{\text{परका}}\text{या} = \text{मि}\cdot\text{आ} = \text{या}^2 + \text{अ}\cdot\text{या}$

ततो या $= \sqrt{\text{मि}\cdot\text{ला} + \frac{\text{प्र}^2}{4}} - \frac{\text{प्र}}{2}$

अत उपपद्यते ।

पुनर्मिश्रान्तरे करणसूत्रम् ।

प्रक्षेपयोगहृतया लब्ध्या प्रक्षेपका गुणा लाभाः ।
ऊनाधिकोत्तरास्तद्युतोनया स्वफलमूनयुतम् ॥ १६ ॥

लब्ध्या लाभेन । यदि प्रक्षेपका ऊनाधिकोत्तरास्तदा तद्युतोनया लब्ध्या कर्म कर्त्तव्यम् । अर्थाद्यदूनोत्तरास्तदोनोत्तरयुतया यदाऽधिकोत्तराः प्रक्षेपास्तदोत्तरोनया फलं साध्यम् । स्वफलानि न्यूनोत्तरहीनानि अधिकोत्तराधिकानि च क्रमेण कार्याणि ।

अत्र चतुर्वेदोक्तोद्देशकः ।

एकाद्यैर्नवपर्यन्तैर्वणिजैर्मूलराशिभिः ।
क्रीतौ हयोऽसौ विक्रीतः पञ्चोनैः पञ्चभिः शतैः ॥
किमेकैकस्य तत्रासीद्ब्रूहि त्वं मिश्रकान् मम ।

न्यासः । प्रक्षेपकाः १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । मिश्रलाभाः ४९५ । उक्तवत् प्रत्येकस्य लाभाः ११ । २२ । ३३ । ४४ । ५५ । ६६ । ७७ । ८८ । ९९

अन्योद्देशकः ।

मठस्थानानि चत्वारि छात्राणां समसङ्ख्यया ।
भोक्तुं संमन्त्रितान्यासन् दीक्षायां किल यज्वना ॥
पञ्चार्धत्रिचतुर्थांशास्तेभ्यो भोक्तुं समागताः ।
एकद्वित्रिचतुर्युक्ता दृष्टाशीतिः ससप्तका ॥
स्वोत्तरैरथवा हीना सप्तषष्टिश्चतेऽंशकाः ।
मठेभ्यश्छात्रसङ्ख्यां मे ब्रूहि ये चागता यतः ॥

अत्र प्रथमोदाहरणेऽधिकोत्तराणां १ । २ । ३ । ४ योगेन १० लब्धिः सप्ताशीतिर्हीना ७७ लब्धिर्ज्ञेया । ततः प्रक्षेपाणां $\frac{1}{5}$ । $\frac{1}{2}$ । $\frac{1}{3}$ । $\frac{1}{4}$ योगेन हृतया लब्ध्येत्यादिना फलानि १२ । ३० । २० । १५ स्वोत्तरयुतानि १३ । ३२ । २३ । १९ । मठच्छात्रसङ्ख्या ६० । एवं द्वितीयोदाहरणे ऊनो-

शरयुतया लब्ध्या-६७ + १०ऽनया पूर्ववत् कृते आगता छात्रसङ्ख्या ११ । २८ । १७ । ११ ।

अन्योद्देशकः ।

घृतोदकमधूनां ये चयः कलसका: पलैः ।
रद्रषष्टिजिनैः पूर्णा एकीभूतास्ततः पुनः ॥
मिश्रेण पूरिता यावत् तावत् सङ्ख्यां न वेद्म्यहम् ।
घृतोदकमधूनां तामेकैकत्र गतां वद ॥

अत्र चतुर्वेदाचार्यः । 'इह गणिताध्याये सुवर्णगणितं नास्ति । तदर्थं श्लोकोऽयम् ।

सुवर्णहेमसंवर्गानेकीकृत्य विभाजयेत् ।
इष्टवर्णेन तत्सङ्ख्या हेमयोगेन वर्णकः ॥'

इति मिश्रकव्यवहारः ॥

Digitized by Google

अथ श्रेढीव्यवहारः।

पदमेकहीनमुत्तरगुणितं संयुक्तमादिनाऽन्त्यधनम् ।
आदियुतान्त्यधनार्धं मध्यधनं पदगुणं गणितम् ॥ १७ ॥

स्पष्टार्थम् । 'व्येकपदघ्नचयो मुखयुक् स्यादन्त्यधनम्'–इत्यादि भास्करोक्तमेतदनुरूपमेव ।

अथ चतुर्वेदोक्तोदाहरणानि ।

मुखे द्वे इष्टके यत्र त्रिसस्त्रिंशोऽधिकाश्चये ।
पञ्च हार्चितिर्दृष्टा वद तत्रेष्टकाफलम् ॥

अध्यर्धमादौ किल पादवृद्ध्या दत्तं द्विजेभ्यः सततं नृपेण ।
हेम त्रिरात्रं नवभागयुक्तं मध्यान्त्यसर्वाख्यधनानि कानि ॥

केनापि गृहजामातुः षोडशाऽऽद्ये दिने पणाः ।
प्रदत्ताः पुण्यपुण्यार्थे द्विहान्या च ततः क्रमात् ॥
दिवसे नवमे जाते कियन्तस्तस्य ते पणाः ।
सम्प्रोज्झैतत् समाचक्ष्व यदि श्रेढ्यां श्रमः कृतः ॥

अत्र चतुर्वेदाचार्यः । 'इदानीं द्विगुणत्रिगुणादिकोत्तरेण फलानयनप्रदर्शनार्थं श्लोकत्रयमस्मदीयमेतावत्क्रमशः' ।

इष्टगच्छे दलेऽरूपे वर्गं कल्प्यं न्यसेदतः ।
गच्छेऽथ निःशेषतां यावत् ततश्चोत्क्रमवर्णतः ॥
गुणकारसमाकल्पे वर्गो वर्गप्रसिद्धितः ।
व्येकरूपं ततो राशिं रूपहीनगुणोद्धृतम् ॥
आद्यसंख्याहतं कृत्वा द्विगुणादौ फलं वदेत् ।
छन्दश्चित्युत्तरादेव प्रकार इह दर्शितः ॥

एतच्छ्लोकत्रयस्य व्याख्या च चतुर्वेदाचार्यकृता तथैव वर्तते यथा भास्करस्य 'विषमे गच्छे व्येके गुणकः स्थाप्य' इत्यादि सूत्रम् ।

अत्र चतुर्वेदाचार्योक्तोद्देशकः ।

त्रिगुणोत्तरया वृद्ध्या रूपषट्कं दिने दिने ।
यो ददाति दशाहानि दत्तं तेन कियद्भवेत् ॥

अन्योद्देशकः ।

पञ्चार्धगुणया वृद्ध्या यो ददाति दिनत्रयम् ।
सार्धरूपत्रयं तेन कियद्दत्तं धनं वद ॥

अत्रोपपत्त्यर्थे चतुर्वेदाचार्यः । 'गोपगणनया प्रत्यय' इति ।

गोपानां यादृशी लोष्टकादिना गणना भवति तया प्रतीतिरत्रास्तीत्यर्थः । अत्र भास्करश्रेढीव्यवहारेऽपि सर्वोदाहरणानामुत्तराणि स्फुटान्यतो न लिखितानि मयेति ।

इदानीं गच्छज्ञानाय करणसूत्रम् ।

उत्तरहीनद्विगुणादिशेषवर्गं धनोत्तराष्टवधे ।
प्रक्षिप्य पदं शेषोनं द्विगुणोत्तरहृतं गच्छः ॥ १८ ॥

द्विगुणश्चासावादिश्च द्विगुणादिः । उत्तरहीनाद्द्विगुणादेर्यः शेषः स उत्तरहीनद्विगुणादिशेषस्तस्य वर्गं धनोत्तराष्टवधे सर्वधनचयाष्टानां वधे प्रक्षिप्य पदं ग्राह्यं तत्पूर्वसाधितशेषोनं द्विगुणचयहृतं गच्छः स्यात् ।

अत्रोपपत्त्यर्थं मच्छोधितभास्करलीलावती द्रष्टव्या ।

अत्र चतुर्वेदोक्तोद्देशकः ।

मुखे दशेष्टका यत्र पञ्च पञ्चाधिकाश्चये ।
इष्टकानां शतं लग्नं चितौ तत्र पदं वद ॥

न्यासः । आ १० । च ५ । सर्वधनम् १०० ।

करणम् । $\text{शे} = \text{२आ} - \text{च} = २ \times १० - ५ = १५$ ।

$\text{सध} \times \text{च} \times ८ = १०० \times ५ \times ८ = ४०००$

$\text{शे}^{२} + \text{सध} \times \text{च} \times ८ = २२५ + ४००० = ४२२५$ अस्य मूलम् ६५ ।

$\frac{\text{मू} - \text{शे}}{\text{२ च}} = \frac{६५ - १५}{२ \times ५} = \frac{५०}{१०} = ५ = \text{गच्छः}$ ।

अत्र चतुर्वेदाचार्येण निजटीकायां ये सुखादिज्ञानाय प्रकारा लिखितास्त एव भास्करेण लीलावत्यां सूत्रत्वेन निबद्धाः।

अत्रैव चतुर्वेदाचार्यः।

'एवमादि बालव्युत्पत्त्यर्थं बहुधोदाहरणीयम्। अस्माभिर्ग्रन्थगौरवभयान्नोदाहृतं यतः सकलसिद्धान्तोऽस्माभिर्व्याख्यातुमारब्ध इति'।

इदानीं सङ्कलितैक्यानयनाय करणसूत्रम्।

एकोत्तरमेकाद्यं यदीष्टगच्छस्य भवति सङ्कलितम्।
तद् द्वियुतगच्छगुणितं त्रिहृतं सङ्कलितसङ्कलितम्॥१९॥

स्पष्टार्थम्। 'सा द्वियुतेन पदेन विनिघ्नी स्यात् त्रिहृता खलु सङ्कलितैक्यम्' इति भास्करोक्तमेतदनुरूपमेव।

अत्रोपपत्त्यर्थं द्रष्टव्या मच्छोधिता भास्करलीलावती॥

इदानीं कन्यादियोगे करणसूत्रम्।

द्विगुणपदसैकगुणितं तत् त्रिहृतं भवति वर्गसङ्कलितम्।
घनसङ्कलितं तत्कृतिरेषां समगोलकैश्चितयः॥ २०॥

इति श्रेढीव्यवहारः।

तत् सङ्कलितं द्विगुणपदसैकगुणितं द्विगुणं पदं कुयुतं यत् तेन गुणितं त्रिहृतं तदा वर्गसङ्कलितं वर्गयोगो भवेत्। तस्य सङ्कलितस्य कृतिस्तत्कृतिर्घनसङ्कलितमेकादिघनयोगो भवेत्। एषां पूर्वप्रतिपादितप्रकाराणां समगोलकैर्लोष्टकादिभिश्चितयः प्रदर्श्याः। 'गोपालाङ्गनादिप्रत्ययार्थम्'—इति चतुर्वेदाचार्यः। तद्यथा। आ १। उ १। ग॰ ३ अत्र त्रिपदेयं चितिः १ १२ १२३| एवं त्रिके गच्छे १ ४९ / १४ वर्गचितिः। १ ८ / ३६ घनचितिः। समकन्दुकनिवेशेन समचिबाहूनि कार्याणि। तदुपरि एकोनबाहूनि कन्दुकपरिमाणानि निवेश्यानि। एवमुपरि एककन्दुकनिवेशो भवेदेवं सर्वकन्दुकानां योगः सङ्कलितसङ्कलितं भवेदेवमन्याश्चितयश्च विचिन्त्याः॥ २०॥

इति श्रेढीव्यवहारः॥

Digitized by Google

अथ क्षेत्रव्यवहारः ।

तत्रादौ त्रिचतुर्भुजफलानयने करणसूत्रम् ।

स्थूलफलं त्रिचतुर्भुजबाहुप्रतिबाहुयोगदलघातः ।
भुजयोगार्धचतुष्टयभुजोनघातात् पदं सूक्ष्मम् ॥ २१ ॥

त्रिभुजस्य वा चतुर्भुजस्य बाहोः प्रतिबाहोस्तत्संमुखभुजस्य योगदलं कार्यम् । एवमुभयथा । ततो दलयोर्घातस्त्रिभुजचतुर्भुजयोः स्थूलं फलम् । सूक्ष्मफलार्थं तु भुजयोगार्धेत्यादि 'सर्वदोर्युतिदलं चतुःस्थितम्'-इत्यादि भास्करोक्तमेव । अत्र त्रिभुजस्य फलं सूक्ष्मं परन्तु वृत्तान्तर्गत-चतुर्भुजस्यैव फलमनेन विधिना सूक्ष्मं नान्यस्य । त्रिभुजे भुजप्रतिभुजौ द्वौ बाहू एवमेकदिशि । अन्यत्राऽऽधार एको बाहुस्तत्प्रतिबाहुश्च शून्यम-मोज्ञेयः । अत्रोपपत्त्यर्थं मच्छोधिता भास्करलीलावती द्रष्टव्या ॥ २१ ॥

आबाधाविज्ञानाय करणसूत्रम् ।

भुजकृत्यन्त्यन्तरभूहृतहीनयुता भूर्द्विभाजिताऽऽबाधे ।
स्वाबाधावर्गोनात् भुजवर्गान्मूलमवलम्बः ॥ २२ ॥

भुजयोः कृत्यन्तरं भुजकृत्यन्तरं भुजयोगान्तरघातसममतो भास्करस्य 'त्रिभुजे भुजयोर्योगस्तदन्तरगुणः' इत्यादि सूत्रं विचिन्त्यमेतदर्थम् ।

अत्र चतुर्वेदोक्तोदाहरणकः । द्विसमत्रिभुजस्य दशभूमिकस्य त्रयोदश-बाहुकस्याबाधादि । उक्तवदाबाधे ५ । ५ । अवलम्बः १२ । अन्योदाहरणक-श्चतुर्वेदोक्त एव भास्करेण 'क्षेत्रे महीमनुमिता त्रिभुजे' इत्यादिनोप-निबद्धः ॥ २२ ॥

इदानीं चतुर्भुजे कर्णालम्बज्ञानाय करणसूत्रम् ।

अविषमचतुरस्रभुजप्रतिभुजवधयोर्युतेः पदं कर्णः ।
कर्णकृतिर्भूमुखयुतिदलवर्गोना पदं लम्बः ॥ २३ ॥

अविषमचतुरस्रं वर्गक्षेत्रमायतं समानान्तरचतुर्भुजं यत्र भुजद्वयं समानं तच्चतुर्भुजं चेति चतुर्वेदाचार्योक्तिः । आचार्योक्तविधिना वर्गाय-

तयोरेव कर्णलम्बासिद्धिरन्यथ स्थूलौ कर्णलम्बौ भवत इति रेखागणितेन स्फुटम् । व्याख्या चातिसुगमेति ॥ २३ ॥

इदानीं जात्यक्षेत्रे भुजकोटिकर्णानयनाय करणसूत्रम् ।

कर्णकृतेः कोटिकृतिं विशोध्य मूलं भुजो भुजस्य कृतिम् ।
प्रोह्य पदं कोटिः कोटिबाहुकृतियुतिपदं कर्णः ॥ २४ ॥

स्पष्टार्थम् । 'तत्कृत्योर्योगपदं कर्णः' इत्यादि भास्करोक्तमेतदनुरूपमेव ।

अत्रोपपत्तिः । रेखागणितप्रथमाध्यायसप्तचत्वारिंशत्मितक्षेत्रा स्फुटा ॥ २४ ॥

इदानीं लम्बकर्णयोरूर्ध्वाधरखण्डानयनाय करणसूत्रम् ।

कर्णयुतावूर्ध्वाधरखण्डे कर्णावलम्बयोगे वा ।
स्वाबाधे स्वयुतिहृते द्विधा पृथक् कर्णलम्बगुणे ॥ २५ ॥



बाकागाघा-चतुर्भुजे बाजा, काता लम्बौ, बागा, काघा कर्णौ । कर्णयुतिः दा बिन्दौ । काधा, धाघा, काधा कर्णस्य, बाधा, धागा, बागाकर्णस्योर्ध्वाधरखण्डे । तत्र घामा, माता तथा मागा, माजा चाबाधे । धामा, दाबिन्दोराधारोपरि लम्बः । एवं लम्बकर्णयुतौ दाबिन्दौ धाबिन्दौ च, घाजा, जाता तथा तागा, जाता क्रमेण चाबाधे । तेनायमर्थः । स्वाबाधे कर्णगुणे स्वयुतिहृते स्वाबाधायुतिहृते कर्णयुतावूर्ध्वाधरखण्डे भवतः । एवं स्वाबाधे लम्बगुणे स्वाबाधायुतिहृते कर्णावलम्बकयोगे ऊर्ध्वाधरखण्डे भवतः ।

अत्रोपपत्तिः । उपरि लिखितक्षेत्रतः साजात्यानुपातेन स्फुटा ॥ २५ ॥

इदानीं चतुरस्रोपरिवृत्तस्य व्यासज्ञानाय करणसूत्रम् ।

अविषमपार्श्वभुजगुणः कर्णो द्विगुणावलम्बकविभक्तः ।
हृदयं विषमस्य भुजप्रतिभुजकृतियोगमूलार्धम् ॥ २६ ॥

वर्गक्षेत्रे तथाऽऽयते कर्ण एव व्यास इति स्फुटम् । अथाविषमेन तत् समलम्बचतुर्भुजम् (यत्र कर्णौ भुजौ द्वौ च तुल्यौ) उच्यते । तेनायमर्थः । कर्णः पार्श्वभुजेन गुणो द्विगुणावलम्बकविभक्तः फलं हृदयं चतुर्भुजोपरिगवृत्तस्य व्यासार्धं भवेत् । विषमचतुर्भुजे यत्रोपरिगवृत्तं भवितुमर्हति तत्र भुजप्रतिभुजयोर्वर्गयोगमूलार्धं हृदयं व्यासार्धं भवेत् ।

अत्रोपपत्तिः । तुल्यभुजसमलम्बचतुर्भुजे कर्णवशेन त्रिभुजद्वयमेकवृत्तान्तर्गतम् । अत एकत्रिभुजोपरिगवृत्तव्यास एवान्यत्रिभुजोपरिगवृत्तस्य वा चतुरस्रोपरिगवृत्तस्य व्यासो भवति । एकस्मिन् त्रिभुजे कर्णः पार्श्वभुजा भुजौ च लम्ब एव लम्बः । अतो रेखागणितषष्ठाध्यायेन 'त्रिबाहुकबाहुवधोऽलम्बहृत्तव्यासदलं किलेत्यादिना व्यासद $= \frac{\text{क} \times \text{पाभु}}{\text{२ लं}}$ । वृत्तान्तर्गते विषमचतुर्भुजे यत्र भुजप्रतिभुजयोरर्धात् संमुखभुजयोरुपरि चापयोर्योगः परिध्यर्धसमस्तत्रैवाऽऽचार्यमते व्यासदलज्ञानं भवति यतस्तत्रैव भुजाधात् प्रतिभुजसमपूर्णज्यादानेन तदुपरिमचापयोगस्य परिध्यर्धसमत्वात् तदुत्पन्नकोणः समकोणस्तदग्रगतारेखा कर्णश्च व्यासो भवति नान्यथेति सुधीभिर्भृशं विचिन्त्यम् ॥ २६ ॥

इदानीं सर्वत्रिभुजोपरिगवृत्तस्य व्यासदलज्ञानाय हृदरज्जुपरिभाषार्थं च सूत्रम् ।

त्रिभुजस्य वधो भुजयोर्द्विगुणितलम्बोद्धृतो हृदयरज्जुः ।
सा द्विगुणा त्रिचतुर्भुजकोणस्पृग्वृत्तविष्कम्भः ॥ २७ ॥

स्पष्टार्थमुपपत्तिश्चोपरिगप्रकारेण स्फुटा ॥ २७ ॥

इदानीं विषमचतुरस्रस्य कर्णयोरानयनार्थं करणसूत्रम् ।

कर्णाश्रितभुजघातैक्यमुभयथाऽन्योऽन्यभाजितं गुणयेत् ।
योगेन भुजप्रतिभुजवधयोः कर्णौ पदे विषमे ॥ २८ ॥

स्पष्टार्थं भास्करलीलावतीतः । अनेन प्रकारेण वृत्तान्तर्गतचतुर्भुजस्यैव कर्णौ भवत इत्येतदर्थं मत्संशोधिता भास्करलीलावती द्रष्टव्या ॥ २८ ॥

इदानीं विषमचतुरस्रे लम्बानयनाय करणसूत्रम् ।

विषमचतुरस्रमध्ये विषमत्रिभुजद्वयं प्रकल्प्य पृथक् ।
कर्णद्वयेन पूर्ववदाबाधे लम्बकौ च पृथक् ॥ २६ ॥

कर्णभुजौ भुजौ भूरेव भूरिति त्रिभुजद्वयं भवति । शेषं स्पष्टार्थम् । 'चतुर्भुजान्तस्त्रिभुजेऽवलम्बः प्राग्वद्भुजो'-इत्यादि भास्करोक्तमेतदनुरूपमेव । अत्र विषमचतुर्भुजे चतुर्वेदाचार्येण गद्यमयं यदुदाहरणं प्रदर्शितं तदेव भास्करेण 'द्विपञ्चाशन्मितव्येकचत्वारिंशन्मितौ भुजौ'-इत्यादि पद्येनोपनिबद्धमिति ॥ २९ ॥

इदानीं विषमचतुरस्रे कर्णयुतितः कर्णोर्ध्वाधरखण्डज्ञानाय करणसूत्रम् ।

विषमभुजान्तस्त्रिभुजे प्रकल्प्य कर्णौ भुजौ तदाबाधे ।
पृथगूर्ध्वाधरखण्डे कर्णयुतौ कर्णयोरधरे ॥ ३० ॥

विषमभुजान्तर्विषमचतुर्भुजान्तः कर्णौ भूस्तल्लग्नभुजो भुजौ । एवं द्वे त्रिभुजे परिकल्प्य कर्णयुतौ पृथक् कर्णयोरूर्ध्वाधरखण्डे पूर्वोक्तक्षेत्रयुक्त्या साध्ये । कर्णयोरधरे इत्यस्यार्थे सम्बन्धः । विषमचतुर्भुजे यदा कर्णौ परस्परं लम्बरूपौ तदैवाचार्योक्तप्रकारेणैव कर्णयोरूर्ध्वाधरखण्डे सिद्धे भवतो नान्यथेति क्षेत्रयुक्त्या सर्वं स्फुटम् ॥ २९ ॥

इदानीं विषमचतुरस्रे मध्यावलम्बोर्ध्वाधरखण्डज्ञानाय करणसूत्रम् ।

त्रिभुजे भुजौ तु भूमिस्तल्लम्बो लम्बकाधरं खण्डम् ।
ऊर्ध्वमवलम्बखण्डं लम्बकयोगार्धमधरोनम् ॥ ३१ ॥

कर्णयोर्ये अधरे खण्डे ते एव कस्मिन्नपि त्रिभुजे भुजौ कल्प्यौ । भूमिस्तु चतुर्भुजे या सैव । ततस्तल्लम्बो यस्तदेव लम्बकाधरं मध्यलम्बकाधरं खण्डं भवेत् । चतुर्भुजलम्बयोर्योगार्धं पूर्वानीताधरखण्डोनमूर्ध्वमवलम्बखण्डं भवेत् । एवं चतुर्भुजलम्बयोरन्तरे यद्भूमिखण्डं तन्मध्ये एव कर्णयुतितो मध्यलम्बः पतेत् तदैवाचार्यप्रकारेणैवं मध्यलम्बोर्ध्वखण्डसिद्धिर्नान्यथेति ॥ ३१ ॥

इदानीं सूचीक्षेत्रे करणसूत्रम् ।

कर्णावलम्बकयुतौ खण्डे कर्णावलम्बयोरधरे ।
अनुपातेन तदूने ऊर्ध्वे सूच्यां सपाटायाम् ॥ ३२ ॥

सपाटायां सपीठायां सूच्यामनुपातेन कर्णावलम्बकयुतौ कर्णावलम्बयोरधरे खण्डे साध्ये कर्णावलम्बमाने तदूने तयोरूर्ध्वे खण्डे भवतः ।

अत्र चतुर्वेदाचार्येण त्रैराशिकेन यत् सर्वं साधितं तदेव भास्करेण सूत्रत्वेनोपनिबद्धम् । भास्करेण स्वसूत्रे नामान्तरमात्रमेव कृतम् । यथा चतुर्वेदाचार्येण यस्य पाटसंज्ञा कृता तस्यैव भास्करेण पीठसंज्ञा । एवं सूचीक्षेत्रानुपातो भास्करलीलावतीतः स्फुटः किं ग्रन्थगौरवेणेति । चतुर्वेदाचार्येण सूचीक्षेत्रे तदेवोदाहरणं लिखितं यद्भास्करेण 'द्विपञ्चाशन्मितव्येकचत्वारिंशन्मितौ भुजौ'-इत्यादि विषमचतुर्भुजे लिखितम् । अत्र लम्बादयो भिन्ना भवन्ति तेनात्र भुजादीन् पञ्चगुणान् कृत्वा भास्करेण सूचीक्षेत्रोदाहरणमुपनिबद्धमिति भास्करस्य कल्पना वस्तुतश्चतुर्वेदोक्तैव ॥ ३२ ॥

इदानीमिष्टाभ्यां भुजकोटिकर्णानयने करणसूत्रम् ।

कृतियुतिरसदृशराश्योर्बाहुर्घातो द्विसङ्गुणो लम्बः ।
कृत्यन्तरमसदृशयोर्द्विगुणं द्विसमत्रिभुजभूमिः ॥ ३३ ॥

द्विसमत्रिभुजं समद्विबाहुकं त्रिभुजम् । समद्विबाहुनि शिरःकोणादाधारोपरिलम्बवशेन जात्यत्र्यस्रद्वयं समानं भवेत् तत्र भुजो द्विगुणः समद्विबाहुभूमिर्भवेदत एतदनुरूपमेव भास्करोक्तम्-'इष्टयोराहतिर्द्विघ्नी कोटिर्वर्गान्तरं भुजः' इत्यादि ।

अत्रोपपत्तिः । द्वयो राश्योर्युतिवर्गस्यान्तरवर्गस्य चान्तरं चतुर्गुणघातसमं भवतीति कल्पितौ वर्गात्मकौ राशी इ_1^2, इ_2^2। अनयोर्योगः कर्णः $= \text{इ}_1^2 + \text{इ}_2^2$ । भुजः $= \text{इ}_1^2 - \text{इ}_2^2$ । अनयोर्वर्गान्तरस्य $४\,\text{इ}_1^2 \times \text{इ}_2^2$ अस्य मूलं कोटिः $= २\,\text{इ}_1 \times \text{इ}_2$ ॥ ३३ ॥

इदानीमभीष्टजात्यद्वयेन विषमत्रिभुजानयनाय करणसूत्रम् ।

इष्टद्वयेन भक्तो द्विघेष्टवर्गः फलेष्टयोगार्धे ।

विषमत्रिभुजस्य भुजाविष्टोनफलार्धयोगो भूः ॥ ३४ ॥

इष्टवर्गो द्विधा स्थाप्यः । एकत्रैकेनेष्टेनापरत्रान्येनेष्टेन भक्तः । फलेष्टयोगार्धे विषमत्रिभुजस्य भुजौ भवतः । इष्टोनफलार्धे आबाधे भवतोऽनयोर्योगो विषमत्रिबाहोर्भूर्भवतीति ।

अत्रोपपत्तिः । इष्टो लम्बः प्रकल्पितः स च लम्बादुभयतो ये जात्ये तयोः कोटिस्तद्वर्गो भुजकर्णवर्गान्तरसमोऽतो द्वाविष्टौ जात्यद्वये भुजकर्णान्तरसमौ प्रकल्पितौ । ततो 'वर्गान्तरं राशिवियोगभक्तम्'—इत्यादिना भुजकर्णयुतिः सिध्यति । ततः संक्रमणेन भुजकर्णौ । अत्र भुजावेव लम्बादुभयत आबाधे अतस्तयोर्योगो विषमत्रिबाहुाधारो भवतीति ॥ ३४ ॥

इदानीं जात्यद्वयेनायतानयनाय करणसूत्रम् ।

इष्टस्य भुजस्य कृतिर्भक्तोनेष्टेन तद्दलं कोटिः ।
आयतचतुरस्रस्य क्षेत्रस्येष्टाधिका कर्णः ॥ ३५ ॥

इष्टस्य भुजस्य कृतिरिष्टेन भक्तेष्टोना च या संख्या भवति तद्दलमायतचतुरस्रस्य क्षेत्रस्य कोटिर्भवति । सा कोटिरिष्टाधिकाऽऽयतचतुरस्रस्य कर्णः स्यात् ।

अत्रोपपत्तिः । आयतचतुरस्रे कर्णवशेन जात्यद्वयं भवति । तत्रायतभुजो भुजः । आयतकोटिः कोटिः । आयतकर्णः कर्णः । अत आयतेष्टभुजं भुजं प्रकल्प्य कोटिकर्णान्तरमिष्टं प्रकल्प्य कोटिकर्णानयनं सुगमम् ॥ ३५ ॥

इदानीं समानलम्बचतुर्भुजानयनाय करणसूत्रम् ।

आयतकर्णौ बाहू भुजकृतिरिष्टेन भाजितेष्टोना ।
द्विहृता कोट्यधिका भूर्मुखमूना द्विसमचतुरस्रे ॥ ३६ ॥

द्विसमचतुरस्रं समानलम्बचतुर्भुजं यत्र भुजौ समौ तस्मिन् कस्याप्यायतस्य कर्णौ बाहू कल्प्यौ । आयतभुजस्य कृतिरिष्टेन भक्तेष्टोना च कार्या ततो द्विहृता कार्या । साऽऽयतकोट्यधिका समानलम्बचतुर्भुजस्य भूर्भवति सैवायतकोट्यूना समानलम्बचतुर्भुजस्य मुखं भवति ।

Digitized by Google



अत्रोपपत्तिः । यत्रायते घाता = जागा कोटिः ।

आता = काजा भुजः । आघा = कागा कर्णः । तद्रूपेण समानलम्बे गा कर्णमितौ भुजौ जातौ । अत्र आगा − गाता = इ ।

आगातागात्ये आता = आयतस्य भुज एव भुजः । ततो 'भुजाद्वर्गितात् कोटिकर्णान्तराप्तम्'–इत्यादिना गाता–प्रमाणं भवति ततः गाता + घाता = गाघा । गाता − जागा − ताजा − आका । अत उपपन्नम् ॥ ३६ ॥

इदानीमायतेन त्रिसमभुजचतुर्भुजानयनाय करणसूत्रम् ।

कर्णकृतिस्त्रिसमभुजास्त्रयश्चतुर्थो विशोध्य कोटिकृतिम् ।
बाहुकृतेस्त्रिगुणाया यद्यधिको भूर्मुखं हीनः ॥ ३७ ॥

यत्र समानलम्बचतुर्भुजे द्वौ भुजौ भूमिर्वा मुखमिति त्रयं मिथः समं तत् त्रिसमभुजचतुर्भुजमुच्यते । तत्राभीष्टायतकर्णकृतिरेव त्रिसमभुजा भवन्ति । त्रिगुणाया आयतभुजकृतेरायतकोटिकृतिं विशोध्य शेषसमश्चतुर्थो बाहुर्ज्ञेयः । स च त्रिसमभुजाधिकस्तदा भूर्हीनस्तदा मुखं भवतीति स्फुटम् ।



अत्रोपपत्तिः । आचार्यैर्यदायतस्य भुजकोटी इष्टे प्रकल्प्य ३३ सूत्रेण साधितमन्यज्जात्यम् । तद्वशेनेह समलम्बचतुर्भुजं विरच्यते ।

तत्र आघा = आका = कागा = भु^{२} + को^{२} = क^{२} ।

घाता = जागा = भु^{२} − को^{२} ।

अतः घागा = घाता + ताजा + जागा = ताजा + २ घाता = आका + २ घाता = भु^{२} + को^{२} + २ (भु^{२} − को^{२}) = भु^{२} + को^{२} + २ भु^{२}

− २ को² − ३ भु² − को² । अत्र यदि ३ भु² − को² > क² तदा ३ भु² − को² भूरन्यथा मुखं कल्प्यम् ।

अथ यदा ३ भु² − को² > क²

> भु² + को²

वा २ भु² > २ को²

वा भु² > को²

अतो यदा भु > को तदा घागा भूमानमन्यथा मुखं ज्ञेयमिति ॥ ३७ ॥

इदानीं जात्यद्वयतो विषमचतुरस्रानयनाय करणसूत्रम् ।

जात्यद्वयकोटिभुजाः परकर्णगुणा भुजाश्चतुर्विषमे ।
अधिको भूर्मुखहीनो बाहुद्वितयं भुजावन्यौ ॥ ३८ ॥

स्पष्टार्थम् । 'अभीष्टजात्यद्वयबाहुकोटयः परस्परं कर्णहता भुजा इति'—इत्यादि सर्वं भास्करोक्तमेतदनुरूपमेव । अत्र विषमचतुर्भुजे कर्णौ परस्परं लम्बरूपौ तस्यैव जात्यद्वयतो भुजा भवन्तीति क्षेत्रयुक्त्या स्फुटम् ॥ ३८ ॥

इदानीं कोट्येकदेशेन युते कर्णे भुजे च दृष्टे कोटिकर्णज्ञानाय करणसूत्रम् ।

इष्टगुणकारगुणितो गिर्युच्छ्रायः पुरान्तरमनष्टम् ।
द्वियुतगुणकारभाजितमुत्पातोऽन्यस्य समगत्योः ॥ ३९ ॥

अत्र चतुर्वेदाचार्यः । 'इहोदाहरणम् । कस्यापि पर्वतस्याग्रे तपस्विनौ द्वौ प्रतिवसतस्तत्रैकः सिद्धः खगामी । स किल पर्वताग्रादुत्प्लुत्य कियत्यपि दूरे गतः कर्णगत्या नगरमासादयति । द्वितीयः पर्वताग्रादवतीर्य पद्भ्यां नगरमासादयति तुल्याश्च गतयस्तयोः । तदिच्छामि ज्ञातुं पर्वतनगरान्तरं कियद्दूरे सिद्धस्योत्पतनं चेत्येवंस्थिते सूत्रं व्याख्यायते । इष्ट एव कश्चिद्गिरेरुच्छ्रायः कल्प्यते स एवाभीष्टगुणकारगुणितोऽध्वा गिरिनगरान्तरे भवति (तदेव पुरान्तरम्) । ततस्तमनष्टं द्वियुतगुणकारेण विभजेद्यत् फलं तत् सिद्धस्योत्पातयोजनानि भवन्ति । ततो गिर्युच्छ्रायोत्पातयोगः कोटिः । गिरिनगरान्तरं भुजा । तद्वर्गयोगमूलं कर्णः पुरोत्पातायोरन्तरं तिर्यगिति । तद्यथा । द्वादशको गिर्युच्छ्रायः १२ । एष इष्टगुण-

कारेण चतुष्केणानेन ४ गुणितो जातः ४८। एतत् पर्वतनगरान्तरम्। एतदेव द्वियुतगुणकारेणानेन ६ भाजितम् ८। एतावानुत्पातः। अत्र कोटिर्जाता २०। अस्या वर्गः ४००। भुजा ४८। अस्या वर्गः २३०४। अनयोर्योगः २७०४। अतो मूलं कर्णः ५२। सिद्धमायतार्धम्। अत्रैकभिक्षुस्य कोट्यधस्तनखण्डभुजयोगेऽध्वा ६०। द्वितीयभिक्षुस्योपरितनखण्डकर्णयोगेऽध्वा ६०। एवमनया दिशा क्षेत्रोत्पादनमूह्यम्।'



एवं 'वृक्षाद्धस्तशतोच्छ्रयात्'-इत्यादिभास्करोक्तोदाहरणमेतदनुरूपमेव। अतो गिउ = ताउ। इ·गिउ = पुभं = सभं। ततो 'द्विनिघ्नतालोच्छ्रितिसंयुतं यत् सरोऽन्तरम्'-इत्यादिना

$$\text{उत्पातः} = \text{उड्डीनम्} = \frac{\text{ताउ}\cdot \times \text{सभं}}{२\text{ताउ} + \text{सभं}} = \frac{\text{गिउ} \times \text{पुभं}}{२\,\text{गिउ} + \text{इ}\cdot\text{गिउ}} = \frac{\text{पुभं}}{२ + \text{इ}}$$

अत उपपद्यते। भास्करप्रकारोपपत्त्यर्थम् सग = ताउ + सभं। अत्र तालोच्छ्रितियोजनेन कोटिकर्णयोगः = २ ताउ + सभं। ततः कोटिकर्णान्तरम्

$$= \frac{\text{सभं}^{२}}{२\,\text{ताउ} + \text{सभं}} \text{।}\quad \text{कोटिः} = \frac{(२\,\text{ताउ} + \text{सभं})^{२} - \text{सभं}^{२}}{२(२\,\text{ताउ} + \text{सभं})}$$

उड्डीनम् = कोटि−

ताउ

$$= \frac{४\,\text{ताउ}^{२} + ४\,\text{ताउ}\cdot\text{सभं}}{२(२\,\text{ताउ} + \text{सभं})} - \text{ताउ} = \frac{\text{ताउ}\cdot\text{सभं}}{२\,\text{ताउ} + \text{सभं}} \text{।}$$

अत उपपद्यते भास्करोक्तम् ॥ ३९ ॥

अथ वृत्तक्षेत्रगणितम् ॥

तत्र वृत्तपरिधिफलानयनाय सूत्रम् ।

व्यासव्यासार्धकृती परिधिफले व्यावहारिके त्रिगुणे ।
तद्वर्गाभ्यां दशभिः सङ्गुणिताभ्यां पदे सूक्ष्मे ॥ ४० ॥

व्यासो व्यासार्धकृतिश्चैते त्रिगुणे तदा व्यावहारिके व्यवहारयोग्ये क्रमेण परिधिफले भवतः । तद्वर्गाभ्यां व्यासव्यासार्धवर्गवर्गाभ्यां दशभिः सङ्गुणिताभ्यां पदे याज्ञे ते सूक्ष्मे परिधिफले भवतः ।

अत्रोपपत्तिः । प्रथमप्रकारे व्यासत्रिगुणः परिधिः स्थूलः कल्पितः । द्वितीयप्रकारे व्यासवर्गो दशगुणः परिधिवर्गः कल्पितस्ततः परिधिव्यासघातचतुर्थांशफलमिति सुगमा वासना । वस्तुतः प्रकारद्वयं स्थूलमेव । सूक्ष्मार्थं 'व्यासे भनन्दाग्निहते विभक्ते'—इति भास्करप्रकारस्य लीलावत्यां मदीयोपपत्तिर्विचिन्त्येति ॥ ४० ॥

इदानीं जीवाव्यासयोरानयनाय करणसूत्रम् ।

वृत्ते शरोनगुणिताद्व्यासाच्चतुराहतात् पदं जीवा ।
ज्यावर्गश्चतुराहतशरभक्तः शरयुतो व्यासः ॥ ४१ ॥

स्पष्टार्थम् । 'ज्याव्यासयोगान्तरघातमूलम्'—इत्यादि भास्करोक्तमेतदनुरूपमेव ॥ ४१ ॥

इदानीं ज्याव्यासाभ्यां शरानयनाय करणसूत्रम् ।

ज्याव्यासकृतिविशेषान्मूलव्यासान्तरार्धमिषुरल्पः ।
व्यासौ ग्रासोनगुणौ ग्रासोनैक्योद्धृतौ बाणौ ॥ ४२ ॥

पूर्वार्धं 'ज्याव्यासयोगान्तरघातमूलं व्यासस्तदूनो दलितः शरः स्यात्'—इत्यादिभास्करोक्तानुरूपमेव । उत्तरार्धव्याख्यायां चतुर्वेदाचार्यः । 'उद्दिष्टवृत्तयोर्यावान् परस्परमनुप्रवेशः स इह ग्रासशब्देनोच्यते । तेनायमर्थः । व्यासौ पृथक् संस्थाप्य ग्रासप्रमाणेनोनौ कार्यौ ततस्तावन्योन्यं हत्वा

पृथग्याभ्यां तेनैव गुणनीयौ ततो यासोनव्यासयोर्योगेन विभजेदुभयतोऽपि-लब्धे फले शरौ लघू भवतः । तयोश्च योऽल्पः स महति वृत्ते यश्च महान् स लघुनि वृत्त इति' ।



अत्रोपपत्तिः । लघुवृत्तकेन्द्रम् के_1 । व्यासार्धम् = $\text{के}_1\text{घ}$ । ग्रासप्रमाणम् = गघ । घन = शरमानम् । तत्प्रमाणम् = या । इतो गन = या − या = बृहद्वृत्तस्य शरः । ततः पूर्वविधिना शरद्वयतोऽर्धज्यावर्गः = नत^2 = (२ के_1घ − या) या

= (२ के_2 ग − या + या) (या − या)

या, व्या_1 या − या^2 = व्या_2 या − व्या_2 या − या^2 + या या + या या − या^2

= व्या_2 या − व्या_2 या + २ या या − या^2 − या^2

यदि २ के_1 घ = व्या_1 । २ के_2 ग = व्या_2 ।

ततः समशोधनादिना

या (व्या_1 + व्या_2 − २ या) = या (व्या_2 − या)

या = $\dfrac{\text{या} (\text{व्या}_2 - \text{या})}{\text{व्या}_1 - \text{या} + \text{व्या}_2 - \text{या}}$ एतदूनं ग्रासमानं जातो

गनसमोऽन्यशरः = $\dfrac{\text{या} (\text{व्या}_1 - \text{या})}{\text{व्या}_1 - \text{या} + \text{व्या}_2 - \text{या}}$ । अत उपपन्नम् । केन्द्रगामि-$\text{के}_1\text{के}_2$रेखातो दत्तपूर्णज्या रेखागणितयुक्तितो द्विभक्ता भवतीति स्फुटम् ॥४२॥

इदानीं वृत्तयोः सम्पर्के जीवाशराभ्यां व्यासयोरानयनाय करणसूत्रम् ।

इष्टशरक्षयभक्ते ज्यार्धकृती शरयुते फले व्यासौ ।
शरयोः फलयोरैक्यं ग्रासो ग्रासोनमैक्यं तत् ॥ ४३ ॥

वृत्तसम्पर्के जीवा पूर्वसूत्रस्थक्षेत्रे दत्तमिता । ततो 'जीवार्धवर्गे शरभक्तयुक्ते' इत्यादिभास्करविधिना स्वस्वशरतो व्यासानयनं सुगमम् । पूर्वोक्तक्षेत्रतः शरयोरैक्यं ग्रासः स्फुट एव । फलयोरैक्यं च ग्रासोनमैक्यं व्यासयोगमानं तद्भवति ।

अत्रोपपत्तिः पूर्वप्रदर्शितक्षेत्रतः स्पष्टा ॥ ४३ ॥

इति क्षेत्रव्यवहारः ।

Digitized by Google

अथ खातव्यवहारः ।

तत्रादौ खातफलानयनाय करणसूत्रम् ।

क्षेत्रफलं वेधगुणं समखातफलं हृतं त्रिभिः सूच्याः ।
मुखतलतुल्यभुजैक्यान्येकाप्तहृतानि समरज्जुः ॥ ४४ ॥

क्षेत्रफलं वेधेन गाम्भीर्येण हतं समखातस्य घनफलं भवेत् । तद्घनफलं त्रिभिर्हृतं सूच्या घनफलं भवेत् ।

अत्रोपपत्त्यर्थं मच्छोधिता भास्करलीलावती द्रष्टव्या ।

उत्तरार्धं चतुर्वेदाचार्यः । 'एकस्यैव खातस्य मुखतलतुल्यभुजस्य मध्ये यदा कतिचिद्धस्ता भिन्नवेधा भवन्ति तदा पृथुत्वभुजस्तावदेक एव सर्वेषां लघुखातकानां दैर्घ्यस्वभुजखण्डस्य स्ववेधस्य च यो घातस्तस्य मुखतलतुल्यभुजैक्यमिति संज्ञा । एवं बहूनां लघुखातानां बाहूनामैक्यानि भवन्ति तानि पृथगेकाप्तहृतानि समरज्जुर्भवति । दीर्घभुजा या कथिता सा सकलैकाप्तशब्देनोच्यते' । एवमस्य सूत्रस्य तथैवार्थो यथा च भास्करेण 'गणयित्वा विस्तारं बहुषु स्थानेषु'-इत्यादौ वर्णितः ।

अत्र चतुर्वेदाचार्योक्तोद्देशकः ।

त्रिंशद्धस्ता तु या वापी दैर्घ्येणाष्टौ पृथुत्वतः ।
तदन्तः पञ्च खातानि वेदाद्यैर्भुजखण्डकैः ॥
वेधश्च नवसप्तागत्रिद्विसङ्ख्यो यथाक्रमम् ।
खातकानां समा रज्जुर्याऽत्र स्यात्क्षिप्रमुच्यताम् ॥

न्यासः । (दैर्घ्यम् ३०, पृथुत्वम् ८)

वे. ९	वं. ७	वे. ७	वं. ३	वे. २
४	५	६	७	८

अत्र मुखतलभुजैक्यानि क्रमशः ३६ । ३५ । ४२ । २१ । १६ । एतान्येकाप्तेनानेन ३० भाजितानि एकचीकृतानि $\frac{१५०}{३०}$ = ५ इयं समा रज्जुः । अनया क्षेत्रफलं २४० गुणितं जातं सकलस्यैव खातस्य घनफलम् = १२०० ।

अत्र पुनश्चतुर्वेदाचार्यः ।

'सूक्ष्मतराणां प्रायेणोद्गतैर्वाप्यो यतः फलेन संवाद इति' ॥ ४४ ॥

इदानीं खातान्तरे करणसूत्रे ।

मुखतलयुतिदलगणितं वेधगुणं व्यावहारिकं गणितम् ।
मुखतलगणितैक्यार्धं वेधगुणं स्याद्गणितमौत्रम् ॥ ४५ ॥
औत्रगणिताद्विशोध्य व्यवहारफलं भजेत् त्रिभिः शेषम् ।
लब्धं व्यवहारफले प्रक्षिप्य भवति फलं सूक्ष्मम् ॥ ४६ ॥

यस्मिन् खाते मुखबाहवोऽन्यादृशास्तलबाहवश्चान्यादृशास्तत्र मुखतलबाह्वोर्युतिदलं याम्यमेवमन्यस्यां दिशि ततस्तयोर्दलयोर्घातो गणितं तेत्रफलं वेधहतं व्यावहारिकं खातफलं भवति । अथ मुखभुजतः फलं तलभुजतोऽपि यत् फलं तयोरैक्यार्धं वेधगुणमौत्रसंज्ञं खातफलं भवति ।

व्यवहारफलमौत्रगणितादौत्रफलाद्विशोध्य शेषं त्रिभिर्भजेल्लब्धं व्यवहारफले प्रक्षिप्य संयोज्य सूक्ष्मं खातफलं भवति ।

अत्र चतुर्वेदोक्तोद्देशकः ।

चतुरस्रा समा वापी दशहस्ता मुखे तु या ।
तले षड्ढस्तिका सैव त्रिंशद्वेधा विनिर्मिता ॥
व्यवहारौत्रसूक्ष्माणि तत्र ब्रूहि फलानि मे ।

अत्र मुखबाहुः १० । तलबाहुः ६ । अनयोर्युतिदलम् ८ । अन्यस्यां दिश्यप्येवम् ८ । आभ्यां गणितम् ६४ । वेधहतं व्यवहारफलम् = १९२० ।

अथ मुखफलम् = १०० । तलफलम् = ३६ । अनयोर्योगार्धम् ६८ । वेधहतमौत्रफलम् = २०४० । औफ − व्यफ = १२० । त्रिभिर्हृतं लब्धम् ४० । एवं व्यवहारफले प्रक्षिप्य जातं सूक्ष्मं वापीघनफलम् = १९६० ।



अत्र वाप्यां यदि अ।घा = अ, धादा = क, गाघा = ग, दाता = घ । वे = वेधः । तदाऽऽचार्यप्रकारेण व्यवहारफलम् = $\frac{अ + क}{२} \cdot \frac{ग + घ}{२} \cdot वे$

औत्रफलम् = $\frac{अ \cdot ग + क \cdot घ}{२} \cdot वे$

$$\text{सूक्ष्मफलम्} = \text{व्यफ} + \frac{\text{मीफ} - \text{व्यफ}}{३}$$

$$= \frac{\text{वे}}{२}\left\{\frac{(\text{अ}+\text{क})(\text{ग}+\text{घ})}{२} + \frac{२(\text{अ}\cdot\text{ग}+\text{क}\cdot\text{घ}) - (\text{अ}+\text{क})(\text{ग}+\text{घ})}{२\times३}\right\}$$

$$= \frac{\text{वे}}{६}\left\{(\text{अ}+\text{क})(\text{ग}+\text{घ}) + \text{अ}\cdot\text{ग} + \text{क}\cdot\text{घ}\right\}$$

एवं 'मुखजतलजतद्युतिजक्षेत्रफलैक्यं हृतं षड्भिः'–इत्यादि भास्करोक्तमेवाचार्यप्रकारेण घनफलं सूक्ष्ममेव भवति । भास्करप्रकारोपपत्त्यर्थं मच्छोधिता तल्लीलावती द्रष्टव्या ॥ ४५–४६ ॥

इति खातव्यवहारः ॥

अथ चितिव्यवहारः ।

तत्रादौ चितौ करणसूत्रम् ।

आकृतिफलमौच्च्याहतमग्रतलैक्यार्धमौच्च्यदैर्घ्यगुणम् ।
घनगणितमिष्टकाघनफलेन हृतमिष्टकागणितम् ॥ ४७ ॥

अग्रे तले च यत् पृथुत्वं तदैक्यार्धमौच्च्याहतमाकृतिफलं भवेत् पुनस्तदौच्च्यदैर्घ्याहतमौच्च्यसम्बन्धि यद्दैर्घ्यं तेन गुणं चितिघनफलं घनगणिताख्यं भवेत् । तदिष्टकाघनफलेन हृतमिष्टकागणितमिष्टकाप्रमाणं भवति । 'उच्छ्रयेण गुणितं चितेः किल'—इत्यादि भास्करोक्तमेतदनुरूपमेव ।

अत्रोपपत्तिः । अग्रतलपृथुत्वैक्यार्धं मध्यममानेन चितेः पृथुत्वं प्रकल्प्य चितेर्घनफलं साधितं तदिष्टकाघनफलहृतमिष्टकापरिमितिर्भवतीति सुगमा वासना ॥ ४७ ॥

अत्र चतुर्वेदोक्तोद्देशकः ।

शतहस्ता तु दैर्घ्येण मूले पञ्च त्रयो मुखे ।
पृथुत्वेनोच्छ्रितिः सप्त चितेरस्याः फलं वद ॥

उक्तवच्चितेर्घनफलम् = २८०० ।

इति चितिव्यवहारः ॥

अथ क्राकचिकव्यवहारे करणसूत्रे

विस्तारायामाङ्गुलघातो मार्गाहतो द्विवेदहृतः ।
किष्कङ्गुलानि लब्धं तत् षण्णवतिर्भवति कर्म ॥ ४८ ॥
शाकादिषु शाल्मल्यां शतद्वयं बीजके शतं विंशम् ।
शालसरलादिषु शतमथाविदारुषु चतुःषष्टिः ॥ ४९ ॥

विस्तारः काष्ठस्य घनत्वमर्थात् पिण्ड उच्यते । आयामो दैर्घ्यं तेनायमर्थः । काष्ठविस्तारायामयोर्बध एकपट्टस्याङ्गुलात्मकं फलं तन्मार्गाहतं दारुदारणपथैराहतं सकलपट्टफलं तद्विवेद ४२ हृतं फलं किष्कङ्गुलानि भवन्ति । 'किष्कुर्हस्ते वितस्तौ च'– इति अ० को० नानार्थवर्गः)। अग्रमूलयोः पिण्डसाम्यं कल्प्यते तदा 'पिण्डयोगदलमग्रमूलयोः'– इत्यादि भास्करोक्तमेतदनुरूपमेव । भास्करेण वर्गाङ्गुलफले हस्तवर्गाङ्गुलैः षट्स्वरेषु-५७६ भिर्भक्ते करात्मकं फलं प्रकल्पितमिहाचार्येण काष्ठमृदुत्वकठिनत्ववशेन भिन्नं भिन्नं करात्मकं फलं साध्यते । तत्र शाकादिषु हस्तवर्गाङ्गुलानि = ४२ X ९६ । शाल्मल्याम् = ४२ X २०० । बीजके = ४२ X १२० । शालसरलादिषु = ४२ X १०० । अविदारुषु खदिरादिषु च = ४२ X ६४ कल्पितानि । तत्राङ्गुलात्मकं फलं सर्वत्र द्विवेदैर्विभज्य फलं किष्कङ्गुलानि जातानि तानि काष्ठविशेषे स्वस्वहारेण विभज्य कर्मार्थात् कर्मकाराणां सम्बन्धि हस्तकर्म भवति तत्र एकस्य हस्तकर्मणो यन्मूल्यं तेन गुण्यं सर्वहस्तकर्म भवतीति सर्वं त्रैराशिकेन स्फुटम् ।

अत्र चतुर्वेदोक्तोद्देशकः ।

'दशहस्तास्तु दैर्घ्येण विस्तारेण षडङ्गुलम् ।
मार्गश्च सप्तभिर्ज्ञेयो बीजवृक्षस्य काष्ठकम् ॥
पञ्चयन्त्राष्टभिः कर्म तत्र मूल्यं निगद्यताम् ।

न्यासः । पतिताङ्गुविस्ताराङ्गुलानि ६ । आयामाङ्गुलानि २४० ।

अनयोर्घातः १४४० मार्गाहतः १००८० द्विवेदैरेते – ४२ हृतः २४० । एतानि किष्कुफलानि बीजवृत्त्या द्विंशत्यधिकशतेन भागे हृते लब्धं कर्मसङ्ख्येयम् २ । कर्ममूल्येनानेन ८ गुणिता पणसङ्ख्या जाता १६ । एतावन्तः पणाः शिल्पिने देया' इति ॥ ४८–४९ ॥

Digitized by Google

अथ राशिव्यवहारः ।

तत्र शूकादिधान्यराशिप्रमाणानयने करणसूत्रम् ।

नवमः शूकिषु दशमः स्थूलेष्वेकादशो भवत्यणुषु ।
परिधेर्वेधः परिधेः षडंशवर्गाहतो गणितम् ॥ ५० ॥

स्पष्टार्थम् । 'अनणुषु दशमांशोऽणुष्वथैकादशांशः'— इत्यादि भास्करोक्तमेतदनुरूपमेव ।

अत्रोपपत्तिः । धान्यस्थितिवशेन वृत्ताधारा सूची भवति । तत्राधारपरिधिनवमभागादिको धान्यविशेषे वेध उपलब्ध्या स्थिरीकृतः । सूचीघनफलं चाधारफलं वेधत्र्यंशगुणम् । तत्र स्थूलत्वात् परिधित्र्यंशो व्यासः कल्पितः । ततो वृत्तफलम् $= \frac{\text{प} \times \text{प}}{३ \times ४}$ । वेधत्र्यंशहतं घनफलम् $= \frac{\text{प}^{२} \cdot \text{वे}}{३६} = \left(\frac{\text{प}}{६}\right)^{२} \cdot \text{वे}$

अत उपपन्नम् ॥ ५० ॥

इदानीं भित्त्यन्तर्बाह्यकोणसंलग्नराशिप्रमाणानयने करणसूत्रम् ।

द्विचतुःसत्र्यंशगुणो भित्त्यन्तर्बाह्यकोणगः परिधिः ।
प्राग्वत् कृत्वा गणितं तद्गणितं स्वगुणकारहृतम् ॥ ५१ ॥

सत्र्यंशः सैकत्रिभागः । गणितं घनफलम् । शेषं स्पष्टार्थम् । 'द्विवेदसत्रिभागैकनिघ्नात् तु परिधेः फलम्'—इत्यादि भास्करोक्तमेतदनुरूपमेव ॥ ५१ ॥

इति राशिव्यवहारः ।

Digitized by Google

अथ छायाव्यवहारः ।

तत्र छायात इष्टकालार्थमिष्टकालाच्छायानयनार्थं च करणसूत्रम् ।

छायानरसैकहृतं द्युदलं प्रागपरयोर्द्युगतशेषम् ।
दिनगतशेषांशहृतं द्युदलं छाया नरघ्न्येकम् ॥ ५२ ॥

छाया । नरः शङ्कुरभीष्टः । छायाया यो नरः शङ्कुभागः स सैको यस्तेन द्युदलं हृतं लब्धं प्राक्कपाले द्युगतं पश्चिमकपाले द्युशेषं भवति । एवमेतद्विपरीतेन द्युदलं दिनगतावयवेन वा दिनशेषांशेन हृतं लब्धं व्येकं नरं नरगुणं च पूर्वापरकपालयोः क्रमेण छाया भवति । एवमस्य श्लोकस्य व्याख्या पञ्चसिद्धान्तिकासंमता यदि तत्र मध्यच्छाया शून्यमिता कल्प्यते । (द्रष्टव्या पञ्चसिद्धान्तिकाप्रकाशिका पृ· २६ वा मत्संशोधितमुद्रिता त्रिशतिका पृ· ४६)

$$\text{अत्र दिनगतशेषा नाड्यः} = \frac{१२ \frac{\text{दि}}{२}}{१२ + \text{छाया}} = \frac{\frac{\text{दि}}{२}}{१ + \frac{\text{छाया}}{१२}}$$

अत्र द्वादशाङ्गुलशङ्कुतच्छाययोर्या निष्पत्तिः सैवेष्टशङ्कुतच्छाययोर्निष्पत्तिर्भवतीति छायाक्षेत्रेण स्फुटम् ।

अत्र चतुर्वेदाचार्यः । 'इयमार्या निष्प्रयोजना तेन नोदाहृता । निरक्षदेशेऽपि छायानयनं कालानयनं वा न सिध्यति । अनुस्मरणेनाचार्येणोपनिबद्धेति' । वराहमिहिरादीनां रीतिमबुद्ध्वाऽऽचार्यगूढार्थमविज्ञायैवं चतुर्वेदस्य यत् प्रकथनं तद्बुद्धिमद्भिर्नादरणीयमिति ।

अत्रोपपत्त्यर्थं पञ्चसिद्धान्तिकायां पञ्चसिद्धान्तिकाप्रकाशिका विलोक्या किमत्र ग्रन्थगौरवेण ॥ ५२ ॥

इदानीं छायानयनाय करणसूत्रम् ।

दीपतलशङ्कुतलयोरन्तरमिष्टप्रमाणशङ्कुगुणम् ।
दीपशिखौच्च्याच्छङ्कुं विशोध्य शेषोद्धृतं छाया ॥ ५३ ॥

Digitized by Google

दीपशिखोच्च्याच्छङ्कुं विशोध्य यच्छेषं तेन शेषेणोद्धृतं छाया भवति । शेषं स्पष्टार्थम् । 'शङ्कुः प्रदीपतलशङ्कुतलान्तरघ्नः'—इत्यादि भास्करोक्तमेतदनुरूपमेव ।

अत्रोपपत्तिस्त्रैराशिकेन सुगमा ॥ ५३ ॥

इदानीं छायाप्रदीपान्तरदीपौच्च्यानयनाय करणसूत्रम् ।

छायाग्रान्तरगुणिता छाया छायान्तरेण भक्ता भूः ।
भूः शङ्कुगुणा छायाविभाजिता दीपशिखयौच्च्यम् ॥ ५४ ॥

दीपशिखया उच्चमर्थाद्दीपशिखौच्च्यम् । शेषं स्पष्टार्थम् । 'छायाग्रयोरन्तरसङ्गुणा भा छायाप्रमाणान्तरहृद्भवेद्भूः'—इत्यादि भास्करोक्तमेतदनुरूपमेव ।

अत्रोपपत्तिः । साजात्यक्षेत्रतोऽनुपातेन स्फुटा ।

सा यथा ।



तदी = दीपशिखोच्च्यम् । शं₁ मू₁ = शं₂ मू₂ = शङ्कुः । मू₁ छा₁ = प्रथमच्छाया । मू₂ छा₂ = द्वितीयच्छाया । तछा₁ = प्रथमभूः । तछा₂ = द्वितीयभूः ।

छा₁ छा₂ = छायाग्रयोरन्तरम् । दीच = १ । चजटरेखा तमू₁ छा₁ मू₂ छा₂ रेखासमानान्तरा । ततः सजातीयक्षेत्रानुपातेन

$\text{वज} = \frac{\text{प्रछा}}{\text{शं}}$ । $\text{वट} = \frac{\text{द्विछा}}{\text{शं}}$ । $\text{जट} = \text{वट} - \text{वज} = \frac{\text{द्विछा} - \text{प्रछा}}{\text{शं}}$ । दीत $= \frac{१ \times \text{प}_१ \text{प}_२}{\text{जट}} = \frac{\text{प}_१ \text{प}_२ \cdot \text{शं}}{\text{द्विछा} - \text{प्रछा}}$ ।

ततः प्रथमभूः $= \text{तप}_१ = \frac{\text{दीत} \cdot \text{भू}_१ \text{प}_१}{\text{प्र}_१ \text{मृ}_१} = \frac{\text{दीत} \cdot \text{प्रछा}}{\text{शं}} = \frac{\text{प}_१ \text{प}_२ \cdot \text{प्रछा}}{\text{द्विछा} - \text{प्रछा}}$ ।

एवं द्वितीय भूः $= \text{तप}_२ = \frac{\text{प}_१ \text{प}_२ \cdot \text{द्विछा}}{\text{द्विछा} - \text{प्रछा}}$ । अत उपपद्यते सर्वमिह भास्करोक्तं चेति ॥ ५४ ॥

इदानीं प्रत्युत्पन्नादौ विशेषः प्रदर्श्यते ।

गुणकारखण्डतुल्यो गुण्यो गोमूत्रिकाकृतो गुणितः ।
सहितः प्रत्युत्पन्नो गुणकारकभेदतुल्यो वा ॥ ५५ ॥

गुणकारस्यैकदशादिस्थानीयखण्डतुल्यो गुण्यः स्थाप्यस्ततस्तैः खण्डैर्गोमूत्रिकाकृतो गुणितः सहितः प्रत्युत्पन्नो गुणनफलं भवति । अर्थात् तैः खण्डैः पृथग्गुण्या गुणिता यथास्थानकं सहिता गुणनफलं भवति । वा गुणकारभेदतुल्यो गुणकारखण्डतुल्यो गुण्योऽधोऽधः स्थाप्यस्तैः खण्डकैर्गुणितः सहितः प्रत्युत्पन्नो भवति । अत्र गुणकारस्य यथेच्छरूपविभागात्मकः खण्डो ज्ञेय इति । 'गुण्यस्त्वधोऽधो गुणखण्डतुल्यः'— इत्यादिभास्करोक्तमेतदनुरूपमेव ॥ ५५ ॥

इदानीं प्रकारान्तरेणाह ।

गुण्यो राशिर्गुणकारराशिनेष्टाधिकोनकेन गुणः ।
गुण्येष्टवधोनयुतो गुणकेऽभ्यधिकोनके कार्यः ॥ ५६ ॥

स्पष्टार्थम् । 'इष्टोनयुक्तेन गुणेन निघ्नः'—इत्यादि भास्करोक्तमेतदनुरूपमेव ॥ ५६ ॥

इदानीं भागहारे विशेषमाह ।

छेदेनेष्टयुतोनेनाप्तं भाज्यादनष्टमिष्टगुणम् ।
प्रकृतिस्थच्छेदहृतं लब्ध्या युतहीनकमनष्टम् ॥ ५७ ॥

Digitized by Google

भाज्यादिष्टयुतोनेन छेदेन हरेण यदाप्तं तदनष्टं स्यादयमेकदे-
शगुणं प्रकारान्तरस्यच्छेदहृतमुदाहरणे यः स्वाभीष्टश्छेदस्तेन हृतम् । अत्र
या लब्धिस्तयाऽनष्टं क्रमेण युतं हीनं च वास्तवा लब्धिः स्यात् । इष्टा-
धिके छेदे युतमिष्टोने छेदे हीनमनष्टं कार्यमित्यर्थः ।

अत्रोपपत्तिः । कल्प्यते । भाज्यः = भा । छेदः = हा । इष्टम् = इ ।

तदा वास्तवा लब्धिः $=\frac{\text{भा}}{\text{हा}}$ । इष्टयुतोनेन हारेण

लब्धिः $=\frac{\text{भा}}{\text{हा}\pm\text{इ}}$ । द्वयोरन्तरम् $=\frac{\text{भा}}{\text{हा}\pm\text{इ}}-\frac{\text{भा}}{\text{हा}}$

$$=\text{भा}\left(\frac{1}{\text{हा}\pm\text{इ}}-\frac{1}{\text{हा}}\right)=\frac{\pm\text{भा इ}}{\text{हा}(\text{हा}\pm\text{इ})}=\pm\frac{\text{ला}\cdot\text{इ}}{\text{हा}}$$

अत्र $\frac{\text{भा}}{\text{हा}\pm\text{इ}}$ अस्यानष्टसंज्ञा कृता । अत इष्टाधिके छेदे

$$\frac{\text{भा}}{\text{हा}+\text{इ}}-\frac{\text{भा}}{\text{हा}}=\text{ला}-\frac{\text{भा}}{\text{हा}}=-\frac{\text{ला}\cdot\text{इ}}{\text{हा}}$$ ।

$\therefore \frac{\text{भा}}{\text{हा}}=\text{ला}+\frac{\text{ला}\cdot\text{इ}}{\text{हा}}$ । इष्टोने छेदे

$$\text{ला}-\frac{\text{भा}}{\text{हा}}=+\frac{\text{ला}\cdot\text{इ}}{\text{हा}}\;\therefore\;\frac{\text{भा}}{\text{हा}}=\text{ला}-\frac{\text{ला}\cdot\text{इ}}{\text{हा}}$$

अत उपपद्यते ॥ ७५ ॥

इदानीं गुणने पुनर्विशेषमाह ।

गुण्यश्छेदफलवधो गुणकहृतो गुण्यभाजितो गुणकः ।
छेदोद्धृतः फलं गुण्यगुणवधः फलहृतश्छेदः ॥ ५८ ॥

गुणनफलं केन चिदभीष्टेन छेदेन हृतं लब्धं फलसंज्ञं ज्ञेयम् । अतश्छेदफलवधो गुणनफलं भवत्येवातः स वधो गुणकहृतो गुण्यो गुण्यभाजितो गुणकश्च भवति । एवं गुण्यगुणवधो गुणनफलं च छेदोद्धृतः फलं फलहृतश्छेदो भवतीति सर्वं स्फुटम् ॥ ५८ ॥

इदानीं पुनर्विशेषमाह ।

गुण्यगुणकारयोश्छेदलब्धयोर्यदि द्वयोर्द्वयोर्नाशः ।

तेषां हरयौ व्यस्तौ कृत्वा तत्स्थानयोश्चेष्टौ ॥ ५९ ॥

यदि गुण्यगुणकारयोर्वा छेदलब्धयोर्द्वयोर्द्वयोर्नाशो भवति तदा तेषां मध्ये यो दृश्यौ तौ व्यस्तौ कृत्वा तत्स्थानयोश्चेष्टौ प्रकल्प्यौ । एतदुक्तं भवति । यौ दृश्यौ तावदृश्यौ कल्प्यौ दृष्टस्थानयोश्चेष्टावन्यौ राशी कल्प्यौ । अयं च यथा । छेदफलयोर्नाशे गुण्यगुणकौ छेदफले कल्प्ये । तत्र छेदफलवध इष्टेन गुण्यकल्पितेन गुणककल्पितेन वा विभजनीयं फलं द्वितीयो भवत्येवमवशेषयोरपि । इयं व्याख्या चतुर्वेदोक्ता ॥ ५९ ॥

इदानीं पुनर्विशेषमाह ।

गुण्यं गुणकारं वा गुणयेच्छेदेन भागहारस्य ।
गुण्यगुणकारराश्योश्छेदगुणो भागहारश्च ॥ ६० ॥

यदा कोऽपि गुण्यो वा गुणको भवेत् तदा तं भागहारस्य छेदेन गुणयेत् फलं गुण्यो वा गुणकः कल्प्यः । एवं गुण्यगुणकारराश्योश्छेदस्तेन भागहारस्य गुणो भागहारो भवति । एतदुक्तं भवति । यदि कस्यापि भिन्नो गुण्यो वा गुणकस्तस्य भागहारस्य भिन्नस्तदा गुण्यस्य गुणकस्य वा लवो गुण्यो वा गुणकसंज्ञः । एवं भागहारस्य लवो भागहारसंज्ञः कल्प्यस्तदाऽयं विधिर्भिन्नभागहारविधिर्नोत्पद्यते । अत एवाह चतुर्वेदाचार्यः । 'परिवर्त्यं भागहारच्छेदांशावित्यनेनार्याद्धेन गतार्थेयमार्याऽतो न व्याख्यातमिति' ॥ ६० ॥

इदानीं पुनर्विशेषमाह ।

अच्छेदस्य च्छेदं रूपं कृत्वाऽन्यदुक्तवत् सर्वम् ।
अपवर्त्त्यौ छेदगुणौ तुल्येनेष्टेन गुण्यौ वा ॥ ६१ ॥

अच्छेदस्याभिन्नस्य रूपं छेदं कृत्वाऽन्यत् सर्वमुक्तवत् कार्यम् । एवं छेदगुणौ केनापि तुल्येनेष्टेन संभवे सत्यपवर्त्त्यौ वा गुण्यौ ततस्ताभ्यां कर्मणि न कश्चिद्विकार इति सर्वं स्फुटम् ॥ ६१ ॥

इदानीं सकलबिकलावर्गानयनाय करणसूत्रम् ।

स्वविकलषष्ट्यंशगुणः सकलस्त्रिंशोद्धृतो विकलवर्गः ।

प्रक्षेप्यः सकलकृतौ वर्गघनौ द्वित्रितुल्यवधौ ॥ ६२ ॥

अत्र राशौ कला विकला चेति द्वयं वर्तते तस्य वर्गार्थं कलाराशिः सकलसंज्ञो विकलाराशिश्च स्वविकलस्तत्कलाषष्ट्यंशश्च कथ्यते । अथ सकलो राशिः स्वविकल एव षष्ट्यंशः स्वविकलषष्ट्यंशस्तेन गुणस्त्रिंशोद्धृतः फलं त्रिकलवर्गसंज्ञो भवति । स सकलस्य कृतौ वर्गे प्रक्षेप्यो योज्यस्तदा राशेर्वर्गो भवेत् । अथ वर्गघनलक्षणमाह । द्वित्रितुल्यवधौ क्रमेण वर्गघनौ भवत इति प्रसिद्धौ ।

अत्रोपपत्तिः । कल्प्यते कस्मिन्नपि राशौ कलाः $= \text{क}$ । विकलाः $= \text{वि}$ । तदा कलात्मकः स राशिः $= \text{क} + \frac{\text{वि}}{\text{६०}}$ ।

अस्य बीजगणितरीत्या वर्गः $= \text{क}^2 + \frac{\text{२ क वि}}{\text{६०}} + \frac{\text{वि}^2}{\text{६०}^2}$

$= \text{क}^2 + \frac{\text{क} \cdot \text{वि}}{\text{३०}} + \frac{\text{वि}^2}{\text{६०}^2}$

अत्राचार्येणान्तिमं खण्डं स्वल्पत्वात् त्यक्तम् । ततो जातो वर्गः $= \text{क}^2 + \frac{\text{क} \cdot \text{वि}}{\text{३०}}$ । अत उपपन्नं सूत्रोक्तम् ॥ ६२ ॥

इदानीं वर्गार्थं करणसूत्रम् ।

राशेरूनं द्विगुणं बहुतरगुणमूनकृतियुतं वर्गः ।
राशेरिष्टयुतोनाद्वधः कृतिर्वेष्टकृतियुक्तः ॥ ६३ ॥

राशेरूनमूनस्थानीयाङ्कमर्थादेकस्थानीयमङ्कं द्विगुणं बहुतरगुणं बहुतरस्थानीयैरङ्कैर्गुणमूनकृतियुतं च यथास्थानक्रमेण वर्गो भवेत् । एतदुक्तं भवति । आदिवर्गः स्थाप्यः परेऽङ्का द्विगुणादिनिघ्नाश्च स्थाप्यास्तत आदिं त्यक्त्वा पुनस्तथैव क्रिया कार्या । एवं वर्गो भवेत् । 'स्थाप्योऽन्त्यवर्गो द्विगुणान्त्यनिघ्नाः'—इत्यादिभास्करोक्तमेतदनुरूपमेव । भास्करेणान्त्यतः क्रिया कृतेहाचार्येणादित एवेत्येव विशेषः । राशेरिष्टयुतोनाद्वध इत्यादि स्पष्टार्थम् । 'इष्टोनयुग्राशिवधः कृतिः स्यात्'—इत्यादि भास्करोक्तमेतदनुरूपमेव ॥ ६३ ॥

इदानीं द्वयो राश्योर्वर्गयोगस्य वर्गान्तरस्य च पदानयनार्थं करणसूत्रं वृत्तद्वयम् ।

इष्टाल्पराशिवर्गौ युक्तोनावितरविकलवर्गाभ्याम् ।
द्विगुणेतरराशिभ्यां भक्तौ तेनाधिकोनाभ्याम् ॥ १४ ॥
स्थानान्तरेषु लब्धं येन समं फलयुतोनकच्छेदः ।
दलितः कृतियोगान्तरपदमितरो वा फलयुतोनः ॥ १५ ॥

यद्येक इष्टराशिरल्पोऽन्यश्चेतरः सविकलस्तच यदि तयोर्वर्गयोगपदमपेक्षितं तदाऽल्पराशिवर्ग इतरविकलवर्गेण ६२ सूत्रागतेन युक्तः कार्यः । एवं योगो भवति । द्विगुणेतरराशिना भक्तोऽल्पराशिवर्गो यल्लब्धं तेन युतेन द्विगुणेतरराशिना स योगः स्थानान्तरेषु स्थापितो भक्तः कार्यः । लब्धं येन पूर्वफलेन समं भवति तदा छेदो लब्धयुतद्विगुणेतरराशिरयं फलेन युतो दलितो वर्गयोगपदं भवेत् । एवं वर्गान्तरपदेऽपेक्षिते पूर्वोक्तविधौ योगस्थाने ऊनं ग्राह्यम् ।

यथा १४ ॥ १५ । ४० राशी । अत्राल्पराशिवर्गः १९६ । ६२ सूत्रागतेनेतरविकलवर्गेण $= \frac{१५ \times २ \times ४०}{६०} =$ २० अनेन सहितो जातो योगः १९६ + २० = २१६ । अल्पराशिवर्गो द्विगुणेतरराशिना भक्तो लब्धं निरवयम् = ६ अनेन युतो द्विगुणेतरराशिः ३६ । अनेन पूर्वयोगोऽयं २१६ भक्तो लब्धं पूर्वागतनिरवयलब्धसममेव । तेन युतश्छेदः ३६ जातः ४२ । अयं दलितो जातं वर्गयोगपदम् २१ वा लब्ध–६ मितराशि–१५ युतं जातं तदेव वर्गयोगपदम् २१ । एवमन्तरवर्गपदानयनं च कार्यम् ।

अत्रोपपत्तिः । कल्प्यते लघुराशिः = अ । सविकलेतरराशिः कलात्मकः $= इ + \frac{वि}{६०}$ । तदेतयोर्वर्गयोगो वा वर्गान्तरम्

$$= इ^{२} + \frac{२ इ \cdot वि}{६०} \pm अ^{२} \text{ स्वल्पान्तरात् ।}$$

$$\text{वा} = इ^{२} \pm अ^{२} + वि^{२} = इ^{२} \pm (अ^{२} \pm वि^{२}) \text{ अस्य मूलम् ।}$$

$र \pm \frac{\text{व}'}{२ र} = र \pm ल$ । इदं तदैव स्याद्यदि २ र ± ल इदं ल गुणं (२ र ± ल) ल, व' ± वि' भजेन समं स्यात् तदा $ल = \frac{\text{व}' \pm \text{वि}'}{२ र \pm ल}$ । अत-स्तदा २ र ± २ ल एतदर्धं वा र ± ल इष्टमासन्नपदं भवेदिति ॥ ६४–६५ ॥

इदानीमध्यायोपसंहारमाह ।

दिङ्मात्रमेतदन्यज्ज्योत्पत्तौ कुट्टके च कथयिष्ये ।
सङ्कलितादिष्वार्या षट्षष्टिर्द्वादशोऽध्यायः ॥ ६६ ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते द्वादशोऽध्यायः ॥ १२ ॥

स्पष्टार्थम् ॥ ६६ ॥

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्तेः ।
हृदि तं विनिधाय नूतनोऽयं रचितो व्यक्तविधौ सुधाकरेण ॥

इति श्रीकृपालुदत्तसुतसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्तनूतनतिलके गणिताध्यायो नाम द्वादशोऽध्यायः ॥ १२ ॥

Digitized by Google

अथ प्रश्नाध्यायाः ।

तत्र तावन्मध्यगत्युत्तराध्यायः ।

अथाध्यायारम्भप्रयोजनमाह ।

प्रश्नाध्यायान् वक्ष्यामि सोत्तरान् गणकबुद्धिवृद्धिकरान् ।
यैर्ज्ञातैस्तन्त्रविदामाचार्यो भवति बुद्धिमताम् ॥ १ ॥

यैः प्रश्नैर्ज्ञातैर्बुद्धिमतां तन्त्रविदां मध्ये गणक आचार्यो भवति । शेषं स्पष्टार्थम् ॥ १ ॥

इदानीं प्रश्नानाह ।

अधिमासकैः सविकलैर्दृष्टैर्युगयातमवमरात्रैर्वा ।
द्युगणेन वा युगगतं यो वेत्ति स कालतन्त्रज्ञः ॥ २ ॥

सविकलैः साधिशेषकैरधिमासकैर्दृष्टैर्यो युगगतं वेत्ति । वा सविकलैः सावमशेषैरवमरात्रैरूनाहैर्दृष्टैर्यो युगगतं वेत्ति । वा द्युगणेनाहर्गणेन दृष्टेन यो युगगतं वेत्ति स कालतन्त्रज्ञः सिद्धान्तविदिति । एवमत्र प्रश्नत्रयम् ॥ २ ॥

इदानीमन्यान् प्रश्नानाह ।

अवमानि यः सविकलैरधिमासैरधिकमासकानवमैः ।
ग्रहमिष्टं वा ताभ्यां यो वेत्ति स कालतन्त्रज्ञः ॥ ३ ॥

यः सविकलैः साधिशेषैरधिमासैरवमानि गतावमानि वेत्ति । वा यः सावमशेषैरवमैर्गताधिमासकान् वेत्ति । वा ताभ्यामधिशेषावमशेषाभ्यामिष्टं मध्यग्रहं वेत्ति स एव कालतन्त्रज्ञः । एवमत्र प्रश्नत्रयम् ॥ ३ ॥

इदानीमन्यान् प्रश्नानाह ।

द्युगणं विनाऽधिमासावमैर्विना दिनगणेन चन्द्रार्कौ ।
ताभ्यां विना स्फुटतिथिं यो वेत्ति स कालतन्त्रज्ञः ॥ ४ ॥

Digitized by Google

योऽधिमासावमैर्विनाऽहर्गणं वेत्ति । वा दिनगणेन विना चन्द्रार्कौ वेत्ति । वा ताभ्यां चन्द्रार्काभ्यां विना स्फुटतिथिं वेत्ति स कालतन्त्रज्ञः । एवमत्र प्रश्नत्रयम् ॥ ४ ॥

इदानीमन्यान् प्रश्नानाह ।

त्रिगुणः शनिरिन्दूनोऽन्यभगणलब्धैर्ग्रहादिभिः सहितः ।
भौमो हीनोऽर्को गुरुरिन्दूनं वाऽन्यभगणाः के ॥ ५ ॥

राश्यादिकः शनिस्त्रिगुण इन्दुराश्याद्यूनोऽन्यभगणलब्धैर्ग्रहादिभिः सहितो भौमो भवति । तैरन्यभगणग्रहादिभिर्हीनोऽर्को वा गुर्विन्दूनं भवति तदाऽन्यभगणाः के सन्तीति प्रश्नः ॥

अत्र चतुर्वेदाचार्यः । 'अत्र सप्तभिर्ग्रहैः पञ्चभिः शीघ्रैः षड्भिः पातैः सप्तभिर्मन्दैश्च विकल्प्यमाने बहुसमधिकं प्रश्नानां सम्भवत इति' ॥ ५ ॥

इदानीमन्यौ प्रश्नावाह ।

द्वित्रिगुणयो रवीन्द्वोर्युतिः कुजोनाऽन्यभगणलब्धेन ।
राश्यादिनाऽधिका गुरुरूना शनिरन्यभगणाः के ॥ ६ ॥

द्विगुणो रविस्त्रिगुणश्चन्द्रोऽनयोर्युतिः कुजोनाऽन्यभगणलब्धेन राश्यादिनाऽधिका तदा गुरुर्भवति । अथ तेनैव राश्यादिनोना तदा शनिर्भवति । एवमन्यभगणाः के सन्तीति प्रश्नद्वयम् ॥ ६ ॥

इदानीमन्यान् प्रश्नानाह ।

इष्टौदयिकानश्विन्यौदयिकान् वा करोति यो मध्यान् ।
मध्यार्कं गुणकैर्गुणमिष्टं मध्यं स तन्त्रज्ञः ॥ ७ ॥

य इष्टौदयिकान् इष्टग्रहोदयकालिकान् मध्यान् ग्रहान् करोति । वाऽश्विन्यौदयिकान् अश्विन्युदयकालिकान् मध्यान् ग्रहान् करोति । वा मध्यार्कं कैरपि गुणकैर्गुणमिष्टं मध्यं ग्रहं करोति स तन्त्रज्ञः । एवमत्र प्रश्नत्रयम् ॥ ७ ॥

द्विविशेषणभेदात् तच्चतुर्विधम् । तत्र हेतौ यथा अनित्यः शब्दः अस्मदादिबाह्येन्द्रियग्राह्यत्वादित्युक्ते सामान्येन व्यभिचारात् सामान्यवत्त्वं हि विशेषणम् । उदाहरणे प्रयोजकांशे यथा यदस्मदादिबाह्येन्द्रियग्राह्यं तदनित्यं यथा घट इत्युक्ते प्रयोजकांशन्यूनतया प्रत्युक्ते सामान्यवत्त्वे सतीति । उपनये यथा तथा चायमस्मदादिबाह्येन्द्रियग्राह्य इत्युक्ते तथैव प्रत्युक्ते तथैव विशेषणम् । दूषणे यथा हेतौ प्रयुक्ते साधकोऽयं न भवति सपक्षे सत्त्वात् अनित्ये प्रमेयत्ववदित्युक्ते जात्युत्तरत्वेन दूषिते विपक्षवृत्तित्वे सति सपक्षे सत्त्वादिति एवं विपक्षव्यावृत्तत्वात् गन्धवत्त्ववदित्युक्ते सपक्षव्यावृत्तत्वे सतीति विशेषणनिक्षेपेण परोक्तदोषप्रतीकारेऽपि हेत्वन्तरमेव अप्रतीकारे तु साधने हेत्वाभासो दूषणे निरनुयोज्यानुयोगः स्यात् । तथापि हेत्वन्तरमेवोद्भाव्यं सिद्धत्वात् साध्यत्वाच्च तयोः पूर्वमप्यदुष्टस्य दोषाभासोद्भावने विशेषतः पर्यनुयो-

---

सपक्षे सतोऽसाधकत्वे दूषणवाक्यस्यापि तथात्वेन स्वव्याघातप्रदर्शनेन । गन्धवत्त्ववत् नित्या भूः गन्धवत्त्वादितिवत् । अप्रतिकारे त्विति । विशेषणप्रतिक्षेपेऽप्यनैकान्तिकस्याप्यपरिहारे साधनस्य तत्तद्धेत्वाभासो व्यवस्थित एव दूषणस्य निरनुयोज्यानुयोगो व्यवस्थित इत्यर्थः । सिद्धत्वाद्विशेषणप्रक्षेपस्य प्रथमतः कृतत्वात् । साध्य-

न्योपेक्षयासमीचीनमिदं सद्धानिबद्धव्यं परिकर-शुद्धिः प्रतिज्ञान्तरवद्द्रष्टव्येति ॥

प्रकृतानुपयुक्तोक्तिरर्थान्तरमिति स्थितिः ॥ ६ ॥

प्रक्रान्तस्य साधनस्य दूषणस्य वानुपयुक्तमनङ्गं यत् तस्य वचनमर्थान्तरं नाम निग्रहस्थानं भवति । तदुक्तम् प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरमिति । अन्यदित्यध्याहाराल्लक्ष्यपदस्यार्थान्तरमित्यस्यावृत्तेर्वा प्रकृतमर्थमपेक्ष्येति ल्यब्लोपाद्वा पञ्चम्युपपत्तिः । अन्यथा तृतीया स्यात् । अप्रतिसम्बद्धार्थमननुरूपसम्बद्धार्थवचनमर्थान्तरं नाम निग्रहस्थानमित्यर्थः । तच्च स्वपरोभयानुभयमतभेदेन चतुर्विधम् । स्वमतेन ता-

---

त्वाच तयोर्हेत्वाभासनिरनुयोज्यानुयोगयोः विशेषणप्रक्षेपेऽप्युपेक्षेयत्वेन पश्चात् सिद्धत्वादित्यर्थः । परिकरशुद्धिः इदं न हेतुज्ञानवतः पूर्वमुक्तस्यापरित्यागात् त्यक्तस्य विशेषणाभावस्य पूर्वमनुक्तत्वादिदं तृतीयकक्ष्यातिपाति तदुत्तरकक्ष्योल्लाख्यमित्याह ।

प्रक्रान्तस्य आरब्धस्य अन्यदित्यध्याहारात् प्रस्तुतादर्थादन्यदर्थेनाननुरूपसम्बन्धं वस्तु तस्य तस्य वचनमर्थान्तरमित्यर्थः । लक्ष्यपदस्येति । प्रक्रान्तादर्थान्तरं यत् तेनाननुरूपसम्बन्धं तस्य वचनमर्थान्तरमिति वेत्यर्थः । प्रकृतमर्थमिति । प्रस्तुतमर्थं प्रकृत्य यदनभिमतसम्बन्धं वस्तु तस्य वचनमर्थान्तरमिति वेत्यर्थः । अत्र स्वपरशब्देन

वत् अनित्यः शब्द ऐन्द्रियकत्वात् गुणश्च सः आकाशस्य च । तदुपहितं श्रोत्रं तेन चायं गृह्यते समवायात् स च नित्यः सम्बन्ध इत्यादि । परमतेन तु तथैवोपक्रम्य द्रव्यं शब्दः संयोगेन गृह्यते ताल्वादिव्यापाराभिव्यक्तं चेत्यादि । उभयमतेन तु तथैवोपक्रम्य नित्यत्वं चास्यानुमानगम्यं तच्च प्रमाणम् । तच्चतुर्विधं षड्विधं चेत्यादि । उभयमतबहिर्भावेन यथा तथैवोपक्रम्य हेतुरयं हेतुश्च हिनोतेर्धातोस्तुन्प्रत्यये कृदन्तं पदमित्यादि झटिति दोषस्फुरणे समाधानमपश्यतस्तत्तिरोधानार्थमस्योक्तिः संभवति । अत्र न्यूनादिसंभवे ऽपि तस्योक्तग्राह्यत्वादस्य चोच्यमानग्राह्यत्वादिदमेवोद्भाव्यम् । अन्यथा प्राप्तावसरस्यानुद्भावनेन निग्रहापत्तेः । अत्र च प्रकृतोपयुक्तमेव ब्रूयादिति रहस्यम् ॥ ६ ॥

अवाचकप्रयोगे स्यान्निरर्थकसमुद्भवः ।

अवाचकपदं प्रयुञ्जानस्य वादिनो निरर्थकं नाम निग्रहस्थानं भवति । तदुक्तम् वर्णक्रमनिर्देशवन्निरर्थकमिति । वर्णानां क्रमनिर्देशो मातृकापाठकः । तेन तुल्यं वर्तते यद्वचनमवाचकप्रयोगादिरिति यावत् ।

वादिप्रतिवादिनौ नैयायिकमीमांसकौ गृह्येते । तथैवोक्तस्य अनित्यः शब्द ऐन्द्रियकत्वादित्यारभ्य द्वितीयकक्ष्योत्क्राव्यमिति द्रष्टव्यम् ॥ ६ ॥

तन्निरर्थकं नाम निग्रहस्थानमित्यर्थः । अवाचकप्रयोगश्च बहुप्रकारः । कचटतपेत्यादिवर्णमात्रोच्चारणम् लिङ्गवचनविभक्तिविपर्यासः कृत्तद्धितसमासाख्यातविपर्यासः संस्कृतमुपक्रम्य म्लेच्छभाषावचनमित्यादि । एवमपि कथञ्चिदर्थप्रत्ययसिद्धेः कथमयं निग्रहहेतुरिति चेत् नामीमांसकानामपि वाचकावाचकविभागस्य सिद्धत्वात् । यस्याप्ययमसिद्धः तस्यापि समानसमयैरेव पदैर्वक्तव्यम् । अन्यथा स्वाज्ञानसंवरणार्थं स्वभाषया प्रत्यवतिष्ठमाने दाक्षिणात्ये तूष्णींभाव एव शरणमार्यस्येत्यज्ञानमेवावशिष्यत इति गतं कथाव्यसनेन । न च दुर्ज्ञानं समानसमयत्वं परबुद्धेरप्रत्यक्षत्वादिति वाच्यम् । प्रथमत एवोभयप्रसिद्धव्याकरणादिव्यवहाराङ्गीकारेण लिङ्गविपर्यासादीनां समानसमयत्वाभावनिश्चयोपपत्तेः । अत्र च समानसमयैरेव पदैर्व्यवहरेदित्युपदेशः ॥

लिङ्गवचनेति । नियतलिङ्गानां पदानां लिङ्गान्तरोच्चारणं लिङ्गविपर्यासः वृक्षं तिष्ठतीत्यादिकः । विभक्तिविपर्यासः । कपिः कलं कूजन्ति पिकोलं काममदहदित्यादिकः । वर्णविपर्यासवचनं प्राकृतपैशाचिकद्राविडादिभाषावचनम् । आदिशब्देन तेणोनकृत्तद्धितसमासविपर्यासमाह । एवमपि लिङ्गादिविपर्यासे सत्यपि । न वाच्यमिति सम्बन्धः । दुर्ज्ञानं ज्ञातुमशक्यम् । समानसमयत्वं बुद्धिविशेषसाम्यम् । प्रथमत एव कथारम्भात् प्रागेव ॥

त्रिभङ्ग्यन्तरमुक्ते ऽपि प्राश्निकैः प्रतिवादिना ॥ ७ ॥

वाक्यमज्ञायमानार्थमविज्ञातार्थमुच्यते ।

वादिना त्रिभङ्ग्यन्तराभिधाने ऽपि प्राश्निकैः प्रतिवादिना चाविज्ञायमानार्थमविज्ञातार्थं नाम निग्रहस्थानं भवति । तदुक्तम् । परिषत्प्रतिवादिभ्यां त्रिरभिहितमपि अविज्ञातमविज्ञातार्थमिति। वादिना त्रिरभिहितमपि परिषत्प्रतिवादिभ्यामर्थवत्तयाऽविज्ञातमविज्ञातार्थमित्यर्थः । तच्च त्रिविधम् । स्वतन्त्रमात्रप्रसिद्धम् रूढिमनपेक्ष्य योगापेक्षया प्रवृत्तम् निर्णयोपायप्रकरणाद्यभावेन संशयाक्रान्तं चेति । तत्राद्यं स्फ्यकपालपुरोडाशदशापवित्रादिमीमांसकानां पञ्चस्कन्धद्वादशायतनचतुरार्यस्येत्यादि बौद्धानाम्।

त्रिभङ्ग्यन्तरमेकस्य वाक्यस्य त्रिप्रकारमेकार्थवाक्यत्रितयं वा । प्राश्निकैः सभ्यत्वेन वृत्तैः । प्रकरणाद्यभावेन प्रकरणौचित्यादिप्रस्तावाभावेन । यज्ञपात्रविशेषाः स्फ्यकपालादयः । पुरोडाशं होमद्रव्यम् । दशापवित्रं गृहसम्मार्जनं वस्त्रम् । आदिशब्देन चमस(?) उपलादि गृह्यते । पञ्चस्कन्धेति । रूपवेदनाविज्ञानसंज्ञानसंस्काराः पञ्चस्कन्धाः । षडिन्द्रियाणि षड्विषयाश्च द्वादशायतनानि । आचार्यस्य शुद्धोदनेः चत्वारि सत्त्वानि दुःखसमवायनिरोधमार्गाः श्रवणमननिदिध्यासनतत्त्वज्ञानानि आ-

द्वितीयं तु पयःपयोधिसंभूताकान्तपदवैशेषिकधर्मः पूर्वैकावधिपदार्थोपलक्षितवस्तुसत्तावान् नियतपूर्वकालवर्तिपदार्थसमवेतत्वात् पाकव्यापारनिष्पन्नसंयोगासमवायिकारणद्रव्यवदिति । तृतीयं तु श्वेतो धावतीति तत्राद्यं परसिद्धान्तपरिज्ञानशौण्डीर्याभिमानेनोभयानुमत्या कदाचिदुपादीयेतापि उत्तरं तु द्वयं सर्वथा अनुपादेयमेव । अन्यथा प्रतिवाद्यपि वैयात्यात्तादृशमुपाददानो न निगृह्येतेति कथाभासप्रबन्धः स्यात् । तर्हि किं त्रिरभिधानापेक्षया प्रथमत एवाविज्ञाते तयोद्भाव्यतामिति चेत् न अनवधा-

---

दिक्षणसंवृत्त्यादिकं गृह्यते । द्वितीयं केवलयौगिकवचनं पयःपयोधीति पयःपयोधिसम्भूता क्षीराब्धिजाता लक्ष्मीः तस्याः कान्तो विष्णुः तस्य पदं वियत् तस्य वैशेषिकधर्मः शब्दः पूर्वैकावधिपदार्थः प्रध्वंसाभावः तदुपलक्षितवस्त्वनित्यं तत्सद्भावः अनित्यत्वं तद्वान् अनित्यत्वधर्मयुक्तो भवितुमर्हतीत्यर्थः । नियतपूर्वकालवर्ती पदार्थ उपादानकारणं तत्र समवेतत्वात् कार्यत्वादित्यर्थः । पाकव्यापारेति उदाहरणार्थं कुलालादिव्यापारसंजातावयवसंयोगासमवायिकारणघटादिवदित्यर्थः । श्वेतो धावतीत्यत्र संशयाक्रान्तत्वं धवलः कश्चिद्धावति धावतीति श्वा इतो देशान्तरं प्रति धावतीत्यनयोरर्थयोरन्यतरनिर्णायकाभावाद् अस्पष्टम् । आद्यं स्वीयमतसिद्धार्थवचनम् । शौण्डीर्यं कौशलम् । वैयात्यात् सामर्थ्यात् । परि-

नादिग्रङ्कानिराकरणाय प्राश्निकैरपेक्षणात् । तर्हि कुतोयमिति नियमः । ततः परमज्ञानस्योक्तिदोषहेतुकत्वविनिश्चयेन परिषदानपेक्षणात् । न हि परिषदपेक्षया वादी पुनरभिधत्ते नावधत्ते चेति संभवति । न च विदुषी परिषद्भूयोभूयः सम्यगुक्तमपि नावगच्छति । न च वीतरागद्वेषेयमवगते ऽप्यनवगतिमाविष्करोति । अतस्त्रिरिति नियम इत्याचार्याणामाशयः । परिषदनुज्ञोपलक्षणं त्रिरभिधानमिति भूषणकारः । चतुरभिधाने ऽपि न कश्चिद्दोष इति वदतस्त्रिलोचनस्यापि स एवाभिप्रायः । त्रिरभिधानं च पूर्वोक्तस्यैव वाक्यस्येति केचित् । अन्ये तु तस्मिन्नेवार्थे वचनभङ्गिभेदेनेति । तदभिप्रायेणात्रोक्तं त्रिभङ्गतरमिति । अन्यथा त्रिरित्येवावक्ष्यदिति पराज्ञानापादनव्यामोहादिनास्योक्तिसम्भवः । अत्र च लोकरूढं गमितयोगं

हरति । ततः परमज्ञानस्येति । निरुक्ते ऽप्यनवधानशङ्का भवत्वित्यत्राह । न हि परिषदपेक्षयेति । न हि सम्भवतीति सम्बन्धः । असम्भवमेवाह । न च विदुषीति । स एवाभिप्रायः चतुरभिधाने ऽपीत्यपिशब्दयोगात् त्रिरेति नियम एवाभिप्राय इत्यर्थः । त्रिरित्येव त्रिरुक्ते ऽपीत्येव । पराज्ञानेति । परमज्ञं करिष्यामीति भ्रान्त्या लोकरूढं लोकप्रसिद्धार्थं गमितयोगम् अवयवशक्त्यनुसारेणावगमितयोगम् ।

प्रकरणादिसध्रीचीनं निरस्तदोषमेव वाक्यं ब्रूयादिति रहस्यम् ॥ ७ ॥ ऽऽ ॥

पदजातं वाक्यजातमनन्वितमपार्थकम् ॥ ८ ॥

गुणप्रधानभावेनानन्वितार्थं पदजातं वाक्यजातं वापार्थकं नाम निग्रहस्थानमिति । तदुक्तम् पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकमिति । पौर्वापर्यं विशेषणविशेष्यभावः तस्यायोगो नैराकाङ्क्ष्यम् । तस्मादनन्वितार्थमपार्थकमित्यर्थः । न चेदं निरर्थकं वाचकत्वात् । न चार्थान्तरम् अन्वयाभावात् । सर्वथाप्यसम्भवदन्वयम् यथा कुण्डमजाजिनं फलं पिण्ड इति । दश दाडिमानि षडपूपा इति च । व्यवधानादनन्वयं यथा ओदनं सरसि भुक्त्वा स्नातो यातीति ।

प्रकरणादिसध्रीचीनम् अर्थनिर्णायकप्रकरणलिङ्गादिसहितम् ॥ ७ ॥ ऽऽ ॥

गुणप्रधानभावेन विशेषणविशेष्यभावेन । अनपेक्षणमनभिमतार्थत्वादिदं वाक्यं निरर्थकान्तर्भूतमित्याशङ्क्याह । न चेदमिति । प्रस्तुतानुपयुक्तवचनत्वादिदमप्यर्थान्तरान्तर्भूतमित्यत्राह । न चार्थान्तरमिति । पललं मांसं पलालं वा । वाक्ययोरनन्वयमुदाहरति दश दाडिमानि षडपूपा इत्यादि । व्यवधानादनन्वयमाकाङ्क्षणीयस्य पदस्य दूरस्थत्वेन झटित्यस्पर्शान्वयम् । सरसि स्नात्वोदनं भुक्त्वा यातीत्यन्वयः । विकल्पशेषादनन्वयं भवतीति सम्बन्धः ।

संस्कृतपुस्तकानां सूचीपत्रम् ।	मूल्यम्
श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं॰ श्रीराममिश्र-शास्त्रिप्रणीतप्रकाशिकाविवरणपदटिप्पणीसमेतः	७।)
श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा ..	६)
श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा ..	३=)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः	२।)
वेदपूर्त्तिः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं॰ स्वामिश्रीराममिश्रशास्त्रि-प्रणीतो निर्विशेषाद्वैतनिराकरणपरः	१॥=)
वेदपूर्त्तिसहितो वेदार्थसंग्रहः	३॥।)
शास्त्रदीपिका	६।)
सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-न्द्रिकोपेतम्, पं॰स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् ।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजप॰दामोदर-शास्त्रिणा संशोधिता पूर्वार्द्धरूपा	५॥।)
तथा उत्तरार्द्धम्	८॥।)
माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता	७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता	६॥)
नीतिरत्नार्णवतरणिः ।	६)
दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता	॥=)
जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता ..	१॥)
लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्याय-मुक्तावल्याख्यया टीकया सहिता ।	॥।)
सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम् ।	॥।)
तत्त्वमुक्ताकलापः-सर्वार्थसिद्धियुतः, बोधायनीयार्थसिद्धान्तानुसारी विशिष्टाद्वै-तब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्कि-ककेसरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीवेङ्कटनाथदेशिकेन प्रणीतः	५॥=)
वेदान्तसिद्धान्तमुक्तावली, आर्थर्वीनिसहाबककृताङ्गलभाषानुवादयुता ..	१॥।)
काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः	३॥)
अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः	१२)
आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्य-काराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम्	॥।)
तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्गोवर्धनविरचितया न्यायप्रदी-पाख्यटीकया सहिता ।	१॥।)

Digitized by Google

CONTENTS.

	Page.
NYĀYASŪTRAVIVARAṆAM, Ed. Surendralāla Gosvāmin, Professor, Sanskrit College, Benares	257
BRĀHMASPHUṬASIDDHĀNTA, Edited with his own commentary by Mahāmahopādhyāya Sudhākara Dvivedin, Professor, Queen's College, Benares	273
THE TĀRKIKARAKṢĀ AND SĀRASAMGRAHA OF VARADARĀJA, with the glosses Niṣkaṇṭakā of Mallinātha Kolācala and Laghudīpikā of Jñānapūrṇa, Ed. Vindhyeçvarīprasāda Dvivedin, Librarian, Sanskrit College, Benares	313

Digitized by Google

38

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 6.] June, 1902. [Vol. XXIV.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1902.

Copyright on each article reserved.

Price Rs. 9-0 per annum.]

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
विधिमीमांसा, अप्पयदीक्षितकृता पं० श्री रामशास्त्रिणा संशोधिता	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।=)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालन्टैनाख्यैरिङ्ग्लण्डीयभाषायामनुवादिता ..	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाख्यैरिङ्ग्लण्डीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
श्लोकवार्त्तिकम्	७॥=)
शीतपदार्थनिर्वचनम्	३)
भावार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्री[illegible]शास्त्रि-संशोधिता	४)
काव्यप्रदीपः, पं० रामशास्त्रिभागवताचार्येण परिशोधितः	२॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
…सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	५॥)

Digitized by Google

इदानीमन्यान् प्रश्नानाह ।

पाताननुलोमगतीन् प्रतिलोमगतीन् ग्रहान् दिवसवारम् ।
विपरीतैः शन्याद्यैर्यो वेत्ति स कालतत्त्वज्ञः ॥ ८ ॥

योऽननुलोमगतीन् पातान् वेत्ति । वा रव्यादिग्रहान् प्रतिलोमगतीन् वेत्ति । अर्थाद्विपरीतगतयः पातादयस्तथा साध्या यथाऽनुलोमगतयः स्युरनुलोमगतयो रव्यादयश्च तथा साध्या यथा विलोमगतयः स्युरिति । एवं यः शन्याद्यैर्विपरीतैर्दिवसवारं वेत्ति अर्थाद्विपरीतगणनया यो दिवसवारं वेत्ति स कालतत्त्वज्ञः । एवमत्र प्रश्नत्रयम् ॥ ८ ॥

इदानीमन्यान् प्रश्नानाह ।

व्यतिपातवैधृतबृहस्पतिवर्षस्योच्चनीचपरिवर्त्तान् ।
द्विग्रहयोगांश्च युगे यो वेत्ति स कालतत्त्वज्ञः ॥ ९ ॥

यो व्यतिपातं वेत्ति । वैधृतं वेत्ति । बृहस्पतिवर्षं वेत्ति । स्वोच्चनीचपरिवर्त्तान् स्वोच्चनीचभगणान् वेत्ति । युगे द्विग्रहयोगान् द्वयोर्द्वयोर्ग्रहयोर्युगे कियती युतिर्भवतीति वेत्ति स कालतत्त्वज्ञः । एवमत्र पञ्च प्रश्नाः सन्ति ॥ ९ ॥

इदानीमन्यान् प्रश्नानाह ।

सावनमासाब्दाधिपहोरेशानिष्टमध्यसंयोगान् ।
इष्टैर्गुणैर्युतोनानिष्टान् यो वेत्ति गणकः सः ॥ १० ॥

सावनमानेन मासपतिमब्दपतिं च यो वेत्ति । इष्टकाले होरेशं यो वेत्ति । इष्टानामभीष्टानां मध्यानां ग्रहाणां संयोगात् किं विशिष्टान् इष्टान् मध्यग्रहान् इष्टैर्गुणैर्युतोनात् दृष्ट्वा तान् यो वेत्ति स एव गणक इति । एवमत्र प्रश्नचतुष्टयम् ॥ १० ॥

यथोक्तानां प्रश्नानामुत्तराणि विवक्षुस्तत्रादौ साधिशेषैर्गताधिमासैर्दृष्टैर्युगयातं वेत्तीत्यस्योत्तरमाह ।

युगरविदिवसैर्गुणिता गताधिमासाः स्वशेषसंयुक्ताः ।
भक्ता युगाधिमासैः फलं युगादेर्गता दिवसाः ॥ ११ ॥

गताधिमासा युगरविदिवसैर्गुणाः स्वशेषसंयुक्ता अधिशेषयुताः । युगाधिमासैर्भक्ताः फलं युगादेर्गता दिवसाः स्युरिति ।

अत्रोपपत्तिः । त्रैराशिकेन युगमा तत्रयाऽहर्गणानयने गतसौर-दिनेभ्यो गताधिमासाः साधिशेषाः

$$= \text{गअमा} + \frac{\text{अधिशे}}{\text{युसौदि}} = \frac{\text{गसौदि} \cdot \text{युअधिमा}}{\text{युसौदि}} ।$$

छेदगमादिना

$$\text{गसौदि} = \frac{\text{युसौदि} \cdot \text{गअमा} + \text{अधिशे}}{\text{युअधिमा}}$$

अत उपपद्यते मूलोक्तम् । अत्र सर्वत्र युगशब्देन कल्पो ग्राह्य इति ॥ ११ ॥

इदानीं द्वितीयप्रश्नस्योत्तरमाह ।

गुणितानि चान्द्रदिवसैर्गतावमानि स्वशेषसहितानि ।
विभजेद्युगावमैः फलमनष्टमधिमासकैर्गुणितम् ॥ १२ ॥
हृतमिन्दुदिनैर्लब्धाधिमासदिवसैर्विहीनकमनष्टम् ।
युगयातदिनाद्यधिमासदिनगणेष्टग्रहाद्यमतः ॥ १३ ॥

गतावमानि युगचान्द्रदिनैर्गुणानि स्वशेषसहितानि युगावमैर्विभजेत् फलं गतचान्द्राहा इति स्फुटम् । तत् फलमनष्टं स्थाप्यमेकत्र युगाधिमासकैर्गुणं युगेन्दुदिनैर्हृतं फलं गताधिमासास्तैर्दिनीकृतैरनष्टं स्थापितं गतचन्द्रदिनमानं विहीनं युगयातसौरदिनादि भवेत् । अतः सौरदिनेभ्यो गताधिमास–दिनगणेष्टग्रहाद्यं मध्यमाधिकारोक्तवत् साध्यम् ।

अत्रोपपत्तिः । गतावमतस्तच्छेषाच्चानुपातेन गतचान्द्राहानयनस्य स्फुटा । सौरदिनेभ्यश्चान्द्रदिनेभ्यश्च गताधिमासाः समा एव लभ्यन्ते तच्छेषं च समं किन्त्वेकत्र युगसौरदिनहरोऽन्यत्र युगचान्द्रदिनहर इति सर्वं 'सौरेभ्यः साधितास्ते चेदधिमासास्तदैन्दवाः'- इत्यादिभास्करोक्तेन स्फुटम् । ततश्चान्द्राहत आगतैर्गताधिमासैर्दिनीकृतैश्चान्द्राहा विहीना गतसौराहा भवन्ति येभ्यः पुनर्गताधिमासाहर्गणेष्टग्रहाद्यं सुखेन ज्ञायते । गतसौरेभ्यो गताधिमासशेषतः समीकरणम्

गसौदि· युअधिमा = युसौदि· गअधिमा + अधिशे

पक्षयोः ३० युअधिमा· गअधिमा योजनेन

युअधिमा (गसौदि + गअधिमादि) = गचादि· युअधिमा

= गअधिमा (युसौदि + युअधिमादि) + अधिशे

= युचादि· गअधिमा + अधिशे

अतः सौरचान्द्रेभ्यः समा गताधिमासा लभ्यन्तेऽधिशेषं च समम् । अनेन भास्करोक्तमुपपद्यते ॥ १२-१३ ॥

इदानीं द्युगणेन वा युगगतं वेत्तीत्यस्योत्तरमाह ।

द्युगणेन्दुदिवसघातात् कुदिना*प्तमधो युगाधिमासगुणम् ।
शशिदिनभक्तं फलमासदिनोनं युगगतदिनानि ॥ १४ ॥

अहर्गणस्य युगचान्द्रदिनानां घातात् युगकुदिनैर्यदवाप्तं तद्गतचान्द्राहमानमधः पृथक् स्थाप्यं युगाधिमासगुणं युगचान्द्रदिनभक्तं फलं गताधिमासास्तद्दिनैः पृथक्स्थं च गतचान्द्रदिनमानमूनं युगगतसौरदिनानि भवन्ति ।

अत्रोपपत्तिः । अहर्गणानयनविलोमेन कल्पगतानयनं त्रैराशिकेनेति सुगमा ।

एवं द्वितीयश्लोकस्यप्रश्नत्रयोत्तराणि सम्पन्नानि ।

तृतीयश्लोकस्यादिप्रश्नद्वयस्योत्तरं त्रैराशिकेनातिस्पष्टत्वादाचार्येण न कृतम् । त्रैराशिकं च यदि युगाधिमासैर्युगावमानि तदा सावगताधिमासैः किम् । लब्धमवमानि । एवं सावावमेभ्यो गताधिमासानयनं च त्रैराशिकेन स्फुटम् ॥ १४ ॥

इदानीं यदहमिष्टं वा ताभ्यां यो वेत्तीत्यस्योत्तरमाह ।

गुणमधिमासकशेषं युगकुदिनैरवमशेषमधिमासैः ।
तद्युतिरिन्दुदिनहृताधिमासशेषं स्फुटं भवति ॥ १५ ॥

* कुदिनहृत इति पाठान्तरम् ।

भूदिनगताधिमासकघातः स्पष्टाधिमासशेषयुतः ।
भक्तो युगाधिमासैरहर्गणः पूर्ववन्मध्याः ॥ १६ ॥

अधिमासशेषं युगकुदिनैरवमशेषं च युगाधिमासैर्गुणयम् । तयोर्युतिर्युगचन्द्रदिनैर्हृता लब्धं स्फुटाधिशेषसंज्ञं भवति । युगकुदिनानां गताधिमासानां च घातः पूर्वानीतस्फुटाधिमासशेषयुतो युगाधिमासैर्भक्तः फलमहर्गणो भवेत् । ततः पूर्ववन्मध्याधिकारोक्तवन्मध्या ग्रहाः साध्याः ।

अत्रोपपत्तिः । अहर्गणप्रमाणं या । ततोऽनुपातेन गतावमानि $= \frac{\text{या}\cdot\text{युअव} - \text{अशे}}{\text{युकुदि}}$ । एतान्यहर्गणे संयोज्य जातानि गतचान्द्रदिनानि $= \frac{\text{या}\,(\text{युकुदि} + \text{युअव}) - \text{अशे}}{\text{युकुदि}} = \frac{\text{युचादि}\cdot\text{या} - \text{अशे}}{\text{युकुदि}}$ । एभ्यो गताधिमासाः साध्याः $= \text{गधिमा} + \frac{\text{अधिशे}}{\text{युचादि}} = \frac{\text{युधिमा}\cdot\text{युचादि}\cdot\text{या} - \text{युधिमा}\ \text{अशे}}{\text{युचादि}\cdot\text{युकुदि}}$ पक्षौ युगकुदिनैः संगुण्य समशोधनेन

$$\text{युकुदि}\cdot\text{गधिमा} + \frac{\text{युकुदि}\cdot\text{अधिशे} + \text{युधिमा}\cdot\text{अशे}}{\text{युचादि}} = \text{युधिमा}\cdot\text{या}$$

$$= \text{युकुदि}\cdot\text{गधिमा} + \text{स्वधिशे}\ \therefore\ \text{या} = \frac{\text{युकुदि}\cdot\text{गधिमा} + \text{स्वधिशे}}{\text{युधिमा}}$$

अत उपपन्नं यथोक्तम् ॥ १५–१६ ॥

इदानीं गतावमैरवमशेषेण चाहर्गणानयनमाह ।

भूदिनगतावमवधः स्वशेषयुक्तो युगावमविभक्तः ।
लब्धं भवति द्युगणो द्युगयातो मध्यमाः प्राग्वत् ॥ १७ ॥

युगकुदिनानां गतावमानां च वधः स्वशेषेणावमावशेषेण युक्तो युगावमैर्विभक्तो लब्धमहर्गणो भवति ततः प्राग्वद्युगयातो मध्यमा ग्रहाः साध्याः ।

अत्रोपपत्तिः । त्रैराशिकेन यदि युगावमैर्युगकुदिनतुल्योऽहर्गणस्तदा सावगतावमैः किम् । लब्धोऽहर्गणः $= \frac{\text{युकुदि}\cdot + \frac{\text{युकुदि}\cdot\text{अशे}}{\text{युकुदि}}}{\text{युअ}}$

= $\frac{\text{युकुदि}\cdot \text{गश + शशे}}{\text{युश}}$ । अत उपपन्नम् ॥ १७ ॥

इदानीं विनाऽधिमासावमैर्योऽहर्गणं वेत्तीत्यस्योत्तरमाह ।

युगगतशशिमासवधाद्रविमासाप्तं दिनीकृतं सदिनम् ।
भूदिनगुणितं शशिदिनहृतमाप्तमहर्गणः सैकः ॥ १८ ॥

युगशशिमासानां गतशशिमासानां च वधाद्युगसौरमासैर्यदाप्तं निरग्रं तद्दिनीकृतममान्तादवधे यस्मिन् दिनेऽहर्गणोऽभीष्टस्तद्दिनसंख्या- युतं ततो युगकुदिनैर्गुणितं युगशशिदिनैर्हृतमाप्तमहर्गणो भवेत् । स च वाराद्यं सैको वा निरेकः कार्य इत्यर्थादवगम्यते ।

अत्रोपपत्तिः । यदि युगसौरमासैर्युगशशिमासा लभ्यन्ते तदा गत- चान्द्रसमैः सौरमासैः किं लब्धा निरग्रा अमान्ता गतचान्द्रमासास्ते त्रिंश- द्गुणिता अमान्तावधे यावन्ति चान्द्रदिनानि तैर्युता अभीष्टे दिने गतचा- न्द्राहा जाताः । ततो यदि युगचान्द्रमासैर्युगकुदिनतुल्योऽहर्गणस्तदा गतचान्द्राहैः किम् । लब्धं तिथ्यन्ते सावनाहर्गणः सावयवो भवति । शेष- स्यागतोदये निरग्रोऽहर्गणोऽभीष्टवाराद्यं सैको वा निरेकः स्फुटतिथिदि- नाद्यं कार्यं इति ज्योतिर्विदां सम्प्रदायो युक्तियुक्त एवेति ॥ १८ ॥

इदानीं प्रकारान्तरेणाहर्गणानयनमाह ।

गतदिवसाः पृथगधिमासकगुणिता रविदिनाप्तमासदिनैः ।
सहिताः पृथगवमगुणाः शशिदिवसाप्तोनका द्युगणः ॥ १९ ॥

गत दिवसा गतचान्द्रदिनसमसौराहाः । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिश्च भास्कराहर्गणानयनोक्तिवत् स्पष्टा ॥ १९ ॥

इदानीमधिमासावमशेषाभ्यां चन्द्रार्कानयनमाह । अर्थाद्दिनगणेन विना चन्द्रार्कौ यो वेत्तीत्यस्योत्तरमाह ।

गुणिताद्युगाधिमासैर्युगभूदिवसैर्हृतादवमशेषात् ।
फलयुक्तमधिकमासकशेषं मध्यावतोऽर्केन्दू ॥ २० ॥
अधिमासावमशेषे युगशशिभूदिनहृते पृथग्लब्धेः ।
मासदिनाद्ये स्थाप्ये गतमासदिनानि चैत्रादेः ॥ २१ ॥

अवमावशेषलब्ध्या सहितानि पृथक् त्रयोदशगुणानि ।
अधिमासशेषलब्ध्या हीनानि पृथग्रविशशाङ्कौ ॥ २२ ॥

अवमशेषाद्युगाधिमासैर्गुणिताद्युगकुदिनैर्हृताद्यत् फलं तेन फलेनाधिमासशेषं युक्तमधिशेषं कल्प्यम् । अतोऽस्मादधिशेषादवमावशेषाच्च विधिनाऽर्केन्दू ज्ञेयौ । अधिमासशेषं युगशशिदिनैर्हृतमवमशेषं च युगभूमिदिनैर्हृतम् । एवं पृथक् पृथक् ये लब्धे ते क्रमेण मासदिनाद्ये स्थाप्ये । अथोऽधिमासशेषतो लब्धिर्मासादिकाऽवमशेषतश्च दिनादिका ग्राह्या । चैत्रादेर्गतमासदिनानि यानि तानि पूर्वागतावमशेषलब्ध्या सहितानि कार्याणि तानि च पृथक् स्थाप्यानि । एकत्र त्रयोदशगुणानि । उभयत्राधिमासशेषलब्ध्या हीनानि क्रमेण मध्यौ रविशशाङ्कौ भवतः ।

अत्रोपपत्तिः । चैत्रादेर्यावन्तश्चान्द्रमासा गतास्तावन्तः सौरमासा रविराशयो यावन्ति च चान्द्रदिनानि तावन्तो रविभागाः कल्पितास्तत्रावमशेषसाधनावयवाच्चान्द्राहावयवस्तत्समो रविभागस्यावयवार्थं योजितः । चान्द्राहावयवार्थमनुपातो यदि युगकुदिनैर्युगचान्द्रदिनानि तदा अवशेषावयवेन $\frac{\text{अशे}}{\text{युकादि}}$ अनेन किं लब्धश्चान्द्राहावयवः = $\frac{\text{अशे}}{\text{युकुदि}}$ । अयं दिनादिश्चैत्रादिगतमासदिनादौ योजितः स रविः कल्पितः ।

अयं रविश्च तत्स्थचान्द्रसौरान्तरेणाधिमासशेषोत्थरविराश्यादिचालनेनाधिको जातोऽतस्तच्छोधनेन वास्तवो मध्यमरविः स्यात् ।

अथ गणितागतं चान्द्रमधिशेषमवमशेषोत्थचान्द्रदिनसम्बन्धिसौरदिनावयवोत्थेनाधिशेषेण युतं तदा वास्तवाधिशेषं भवति । तच्च पूर्वागतावमशेषसम्बन्धी चान्द्राहावयवः = $\frac{\text{अशे}}{\text{युकुदि}}$ । अयं युगाधिमासैर्गुणो युगसौरदिनैर्विभक्तो लब्धं तज्जमधिशेषम् = $\frac{\text{युअधिमा} \cdot \text{अशे}}{\text{युसौदि} \cdot \text{युकुदि}} = \frac{\frac{\text{युधिमा} \cdot \text{अशे}}{\text{युकुदि}}}{\text{युसौदि}}$ = $\frac{\text{फ}}{\text{युसौदि}}$ । पूर्वगणितागतमधिशेषं च = $\frac{\text{अधिशे}}{\text{युसौदि}}$ । द्वयोर्योगे

चान्द्राधिशेषम् = $\frac{\text{अधिशे} + \text{फ}}{\text{युअंदि}}$ । एतत्सम्बन्धि सौरं राश्यादि (यदि युगचान्द्रमासैर्युगसौरराशयस्तदेष्टाधिशेषसमचान्द्रमासैः किं लब्धाः सौरराशाः = $\frac{\text{अधिशे} + \text{फ}}{\text{युचामा}}$ । एते त्रिंशद्गुणा जातं राश्यादि = $\frac{\text{अधिशे} + \text{फ}}{\text{३० युचामा}} = \frac{\text{अधिशे} + \text{फ}}{\text{युचादि}}$)
= $\frac{\text{अधिशे} + \text{फ}}{\text{युचादि}}$ = अधिशेफ । अनेन पूर्वकल्पितो रविर्हीन औदयिको रविर्भवति । स च तत्स्थचान्द्रावयवेन कल्पितरविसमेन द्वादशगुणेन सहितश्चन्द्रो भवति चान्द्राहे चान्द्राहे रविचन्द्रयोर्द्वादशभागान्तरत्वादित्युपपद्यत आचार्योक्तम् । अयमेव प्रकारः सिद्धान्तशेखरे श्रीपतिनाऽपि निबद्धस्तद्वाक्यं च ।

कल्पाधिमासगुणितावमावशेषात्
क्ष्माहोद्धृतात् फलयुतं त्वधिमासशेषम् ।
मासादिकं फलमतः शशिवासरैः स्यात्
क्ष्माहैर्हृताच्च दिवसाद्यवमावशेषात् ॥
चैत्रादितो विगतमासदिनैर्युतं तत्
कृत्वा दिनाद्यमथ पृथग्गुणितं च विश्वैः ।
मासादिना विरहिते विहिते क्रमेण
यद्वा दिवाकरसुधाकरौ भवेताम् ॥

'एतदनुकल्पमेव कोट्याहतैर्यद्रवभैरवाप्तम्'-इत्यादि भास्करोक्तमस्तीति ज्योतिर्विदामतिरोहितमेवेति ॥ २०-२२ ॥

इदानीं रविचन्द्राभ्यां विना यः स्फुटतिथिं वेत्तीत्यस्योत्तरमाह ।

गतमासदिनावमशेषलब्धियोगात् त्रयोदशगुणाच्च ।
अधिमासशेषलब्ध्या रविचन्द्रौ च युते शोध्ये ॥ २३ ॥
केन्द्रे पृथक् फले द्वादशाहृते व्यस्तमृणधनं सौरम् ।
अनुलोममैन्दवं मासदिनावमशेषलब्धियुतौ ॥ २४ ॥
तिथिविकलाषष्टिघातात्प्रविहृतभुक्त्यन्तराप्तघटिकासु ।

देशान्तरमनुलोमं भुजान्तरं चार्कफलमसवः ॥ २५ ॥

गतमासदिनावमशेषलब्धियोगः पूर्वसाधितः कल्पितो रविस्तस्मात् पूर्वागतमासाद्यधिशेषलब्धियुतरविमन्दोच्चं शोध्यम् । त्रयोदशगुणात् तस्मात् कल्पितरवेस्तदधिशेषलब्धियुतचन्द्रमन्दोच्चं शोध्यम् । एवं क्रमेण रविचन्द्रयोः केन्द्रे भवतस्ताभ्यां पृथक् स्पष्टाधिकारविधिना तयोरंशात्मके फले साध्ये । ते च द्वादशोद्धृते फले दिनादिके स्याते । मासदिनावमशेषलब्धियुतो कल्पितरवौ सौरं दिनादिफलं व्यस्तं धनमृणं कार्यम् । फलं धनं तदा ऋणं चेदृणं तदा धनं कार्यमित्यर्थः । ऐन्दवं चान्द्रं दिनादिफलं चानुलोमं यथागतं तथैव देयम् । एवं मासाश्चैवावमशेषचान्द्रा दिनानि च तिथयो गताः । घटिकादि वर्तमानतिथेर्विकलं भुक्तघटीप्रमाणं तच्च षष्टिगुणं कार्यम् । तस्माद्द्वादशहृतरविचन्द्रगत्यन्तरेणाप्ता या घटिकास्तासु देशान्तरं घट्यात्मकमनुलोमं यथागतं देयम् । चार्कफलमर्कमन्दफलसम्बन्धि कालात्मकं भुजान्तरं च यथागतं देयं तथाऽसवश्चरासवश्च गोलवशाद्धनमृणं च देयाः । एवं वर्तमानतिथेः स्फुटाः सावना भुक्तघटिका भवन्तीति ।

अथोपपत्तिः । पूर्वोक्तरविचन्द्रानयनप्रकारेण सूर्योदयेऽभीष्टदिने चैत्रादितः सावयवं चान्द्रमासादि = मा + दि + अशेल । रविः = मा + दि + अशेल − अधिमास । चन्द्रः = १३ (मा + दि + अशेल·) − अधिमास । स्वस्वमन्दोच्चं विशोध्य केन्द्रानयनमुपपद्यते । ततो रविं स्वफलसंस्कृतं स्वफलसंस्कृताच्चन्द्राद्विशोध्य स्पष्टरविचन्द्रान्तरं साधितं तद्द्वादशहृतं स्पष्टं चान्द्रं मासादि स्यात् । एवं द्वादशहृतं रविमन्दफलं व्यस्तं द्वादशहृतचन्द्रफलं च दिनादि यथागतं मध्यमचान्द्रमासादिकेऽस्मिन् मा + दि + अशेल संस्कृतं भवति । एवं तिथेर्भुक्तं घट्यात्मकं लङ्कायां चान्द्रात्मकं जातम् । सावनघट्यर्थमेकस्मिन् सावनदिने रविचन्द्रगत्यन्तरं द्वादशहृतं फलं चान्द्रं प्रसाध्यानुपातो यद्येतच्चान्द्रावयवेन सावनाः षष्टिघटिका लभ्यन्ते तदा तिथिविकलेन किं लब्धा लङ्कायां स्फुटाः सावना-

स्तिथिभुक्तघटिकास्तच्च देशान्तरभुजान्तरचरसंस्कारेण स्वदेशे स्फुटार्को-दये स्फुटास्तिथिभुक्ता घटिका भवन्तीति सर्वं स्फुटम् ॥ २३–२५ ॥

इदानीं विशेषमाह ।

अवमविकलं नु सावनमेभिः परिकल्पितं यतश्चान्द्रम् ।
नार्यभटाद्यैः प्रश्नो मध्यान्यत्वात् ततो ज्ञातः ॥ २६ ॥

नु इति वितर्के निश्चये वा । अवमविकलमवमशेषं गणितयुक्त्या सावनमस्ति परन्तु एभिरार्यभटाद्यैर्यतस्तदवमशेषं चान्द्रं परिकल्पितं तत-स्तस्मात् कारणादार्यभटाद्यैरयं प्रश्नो न ज्ञातो मध्यान्यत्वादवमशेषज्ञा-त्यन्यत्वात् तद्वशाद्रविचन्द्रयोर्मध्ययोरन्यत्वात् स्थूलत्वादिति ॥ २६ ॥

इदानीमिष्टादेकस्मान्मध्याद्ग्रहादन्यान् मध्यान् यो वेत्तीत्यस्योत्त-रमाह ।

ज्ञातभगणादिभुक्तं सविकलमिष्टयुगभगणसङ्गुणितम् ।
ज्ञातयुगभगणभक्तं मध्यो भगणादिफलमिष्टः ॥ २७ ॥

ज्ञातस्य ग्रहस्य भगणादि यद्भुक्तं सविकलं सशेषं तदिष्टयुगभगण-सङ्गुणितं ज्ञातयुगभगणभक्तं भगणादिफलमिष्टो मध्यो ग्रहो भवेत् । 'साध्य-स्य चक्रैर्गुणितः प्रसिद्धः'–इत्यादि भास्करोक्तमेतदनुरूपमेव ।

अत्रोपपत्तिः । त्रैराशिकेन स्फुटा ॥ २७ ॥

इदानीमनन्तरोक्तप्रश्ने विशेषमाह ।

इष्टाहतभक्तानां द्व्यादीनां संयुतेर्द्वयोरथवा ।
इष्टगुणकारगुणयोर्विभक्तयोर्वाऽन्तरादथवा ॥ २८ ॥

द्व्यादीनां ग्रहाणामिष्टाहतानां भक्तानां वा संयुतेरथवा द्वयोर्ग्र-हयोरिष्टगुणकारगुणयोर्वा भक्तयोः संयुतेरथवा तेषामिष्टाहतभक्तानां वा तयोरिष्टाहतभक्तयोरन्तराद्वा पूर्वं प्रदिष्टो मध्यग्रहः साध्यः । यथेष्टाह-तभक्तानां युतिरन्तरं वा दृष्टं भवेत् तथा तद्गणानामिष्टाहतभक्तानां यो-गान्तरं कृत्वा ततस्तेन योगान्तरेण दृष्टमिष्टाहतग्रहयोगान्तरं लभ्यते तदेष्टग्रहभगणैः किं लब्धं भगणादिर्मध्य इष्टो भवेत् ॥ २८ ॥

इदानीमनन्तरोक्तप्रश्नस्य प्रकारान्तरेणोत्तरमाह ।

ज्ञातैकभगणभुक्तिस्तद्भगणाप्ता तदिष्टभगणेभ्यः ।
भगणादि सविकलं सविकलेष्टभगणादिगुणमिष्टः ॥ २६ ॥

ज्ञातग्रहो यावता कालेनैकं भगणं भुङ्क्ते तावता कालेन तदिष्टभगणेभ्यो ज्ञेयग्रहभगणेभ्यो ज्ञेयग्रहो यद्भगणादि सविकलं भुङ्क्ते तज्ज्ञातैकभगणभुक्तिर्भवति । सा च भुक्तिस्तदिष्टभगणेभ्यस्तद्भगणाप्ता भवति । यथाऽत्र यदि ज्ञातभगणैरिष्टग्रहभगणास्तदैकज्ञातभगणेन किमित्यनुपातेन ज्ञेयस्यैकभगणभुक्तिर्भगणादि सविकलं भवति । इदं भगणादि सविकलं भुक्तिमानं सविकलेष्टभगणादिगुणं ज्ञातग्रहस्याभीष्टदिने यद्भगणादि सविकलं मानं तेन गुणं तदेष्टो ज्ञेयो मध्यग्रहो भवेदित्यर्थः ।

अत्रोपपत्तिः । ज्ञातग्रहस्यैकेन भगणेन यद्येकभगणभुक्तिसमो ज्ञेयग्रहो भवति तदेष्टज्ञातग्रहभगणादिभिः किमिति जातो भगणादिर्ज्ञेयग्रह इति ॥ २९ ॥

इदानीमिष्टान्मध्यग्रहाच्चो मध्यतिथिं वेत्तीत्यस्योत्तरमाह ।

शशिदिनगुणं सविकलं
यद्भक्तं मण्डलादि तद्भगणैः ।
विभजेत् फलं सविकला-
स्तिथयः प्राग्वत् स्फुटीकरणम् ॥ ३० ॥

इष्टग्रहस्य मण्डलादि भगणादि सविकलं सशेषं यद्भुक्तं ज्ञातमस्ति । तद्युगशशिदिनगुणं तद्भगणैर्ज्ञातग्रहभगणैर्विभजेत् फलं मध्यमाः सविकलास्तिथयो भवन्ति ततः प्राग्वत् २३-२५ सूत्रयुक्त्या स्फुटीकरणं कार्यम् ।

अत्रोपपत्तिः । चेद्राशिकेन यदीष्टग्रहयुगभगणैर्युगचान्द्रदिनानि तदा तद्भुक्तभगणादिना किं लब्धा अभीष्टचान्द्राहाः सावयवा मध्यमास्तिथयस्ततः स्फुटीकरणं प्राग्वदित्यादि स्फुटमिति ॥ ३० ॥

इदानीमिष्टान्मध्याद्रवीन्दुपातैर्विना यः शशिग्रहणं वेत्तीत्यस्यो-त्तरमाह ।

पातेन्दुयोगलब्धौ कृत्वा देशान्तराद्यमनुलोमम् ।
विक्षेपोऽस्मात् सूर्यादिभिर्विनेन्दुग्रहणमेवम् ॥ ३१ ॥

पातेन्दुयोगलब्धौ देशान्तराद्यमनुलोमं यथागतं कृत्वाऽस्माद्वि-क्षेपः साध्यः । अत्रैतदुक्तं भवति । युगे पातभगणानां चन्द्रभगणानां च योगं कृत्वा तेन भगणादि सविकलमिष्टग्रहं सङ्गुण्येष्टग्रहयुगभगणैर्वि-भजेत् फलं भगणादिः सपातश्चन्द्रो भवेत् । भगणानपास्य राश्यादौ मध्यमसपाते चन्द्रे देशान्तर-मन्दफलादीन् यथागतान् संस्कृत्य स्पष्टः सपातचन्द्रो ज्ञेयस्ततो विक्षेपः साध्यः । एवं शरतो बिम्बादिज्ञानेन सूर्या-दिभिः सूर्यचन्द्रपातैर्विना चन्द्रग्रहणं भवति ।

अत्रोपपत्तिः । त्रैराशिकेन सपातचन्द्रानयनस्यातिसुगमेति ॥ ३१ ॥

इदानीं मध्यमसूर्यादवमशेषाच्च मध्यचन्द्रानयनमाह ।

कुदिनहृतमवमशेषं द्वादशभिर्गुणितमाप्तमंशाद्यम् ।
द्वादशगुणतिथ्यंशैर्युतं घनं भास्करे चन्द्रः ॥ ३२ ॥

अवमशेषं द्वादशभिर्गुणितं युगकुदिनहृतमाप्तमंशाद्यं ग्राह्यम् । तद्द्वादशगुणतिथ्यंशैर्युतं यद्भवेत् तद्भास्करे मध्यमरवौ धनं कार्यमेवं मध्य-श्चन्द्रो भवति ।

अत्रोपपत्तिः । २० सूत्रोपपत्त्याऽभीष्टदिने सूर्योदये सावयवा-श्चान्द्राहाः = इति + $\frac{\text{चशे}}{\text{युकुदि}}$ । एते द्वादशगुणा रविचन्द्रान्तरांशा भवन्ति ते रवौ क्षिप्यन्ते चन्द्रो भवतीत्युपपन्नम् ॥ ३२ ॥

इदानीं प्रकारान्तरेण चन्द्रमाह ।

द्युगणं युगाधिमासैर्गुणितं युगभूदिनैर्भजेल्लब्धम् ।
भगणादि मध्यमार्कत्रयोदशगुणाधिकं चन्द्रः ॥ ३३ ॥

अहर्गणं युगाधिमासैर्गुणितं युगकुदिनैर्भजेत् । लब्धं भगणादि

ग्राह्यम् । तन्मध्यमार्कत्रयोदशगुणाधिकमर्थात् त्रयोदशगुणमध्यार्कसहितं चन्द्रो भवेत् ।

अत्रोपपत्तिः । युगरविमासाः = १२ युरभ ।

युगाधिमासाः = युचामा − युरमा

= युचभ − युरभ − १२ युरभ

= युचभ − १३ युरभ ।

∴ युचभ = युगाधिमा + १३ युरभ ।

एते चन्द्रभगणा अहर्गणगुणा युगकुदिनहृता भगणादिश्चन्द्रो भवेत् । तत्र प्रथमखण्डे युगाधिमाससमयुगभगणोद्भवं भगणादि फलं द्वितीयखण्डे त्रयोदशगुणार्कस्तयोर्योगे चन्द्रो भवतीत्युपपद्यते ॥ ३३ ॥

इदानीं त्रिगुणः शनिरिन्दून इत्यादिप्रश्नानामुत्तरमाह ।

इष्टगुणकारगुणितग्रहभगणैर्यथान्तरं यथाऽभिहितम् ।
कृत्वा कुदिनैर्विभजेत् शेषोनयुतानि कुदिनानि ॥ ३४ ॥
यद्यन्यभगणलब्धं धनर्णमिष्टग्रहस्य युगभगणैः ।
अन्यफलमृणधनं चेदूनयुतान्यन्ययुगभगणाः ॥ ३५ ॥

उद्दिष्टकालापे यथेष्टगुणगुणानां ग्रहाणां योगान्तरमभिहितं भवेत् तथेष्टगुणगुणानां तेषां युगभगणानामैक्यान्तरं कार्यम् । एवं स राशिर्यदि युगकुदिनाधिकस्तदा तं युगकुदिनैर्विभजेदत्र फलं प्रयोजनाभावात् त्याज्यं शेषमेव ग्राह्यम् । अन्यभगणलब्धं राश्यादिफलं यदि धनं तदा युगकुदिनानि शेषोनानि यदि ऋणं तदा शेषयुतानि कार्याणि । एवं यानि तानि यद्यन्यभगणफलमृणं तदेष्टग्रहस्य दृष्टग्रहस्य युगभगणोनानि यद्यन्यभगणफलं धनं तदा युतानि कार्याणि । एवमन्यभगणा भवन्ति । 'उद्दिष्टकालापवदेव कार्यं योगान्तराद्यं ग्रहपर्ययाणाम्'—इत्यादि भास्करोक्तमेतदनुरूपमेव ।

अत्रोपपत्तिः । यदि युगग्रहभगणा इष्टगुणकुदिनैर्युता वा हीनास्तदा तेभ्योऽपि राश्यादिको ग्रहः स एव भवति । यतस्तेऽहर्गणगुणाः कुदि-

नैहृता इष्टसमभगणाधिकोनाः पूर्वभगणा भवन्ति भगणशेषं तु पूर्वसम-मेव । अतोऽत्रेष्टगुणगुणानां ग्रहभगणानामैक्यान्तरं कुदिनाधिकं तदा कुदिनैस्तत्त्वं शेषमेव ग्रहभगणाः कल्प्या येभ्यो राश्यादिर्ग्रहोऽभीष्टगुणगुणय-इयोगान्तरसम एवोत्पद्यते । अथान्यभगणग्रहो यदा स्वं तदाऽन्यभगणयुतः शेषो दृष्टग्रहभगणसमोऽतस्तदा शे + अभ = इभ ∴ अभ = इभ − शे

= इभ + युकुदि − शे । एवं यदाऽन्यभगणभवः खेटश्चर्णो तदा

शे − अभ = इभ ∴ अभ = शे − इभ = शे + युकुदि − इभ ।

अत उपपद्यत आचार्योक्तम् ॥ ३४–३५ ॥

इदानीमिष्टौदयिकानश्विन्यौदयिकान् मध्यान् यः करोतीत्यस्यो-त्तरमाह ।

भदिनानि ग्रहभगणैरूनानि भवन्ति सावनदिनानि ।
इष्टाश्विन्यौदयिकाः स्वसावनैः पूर्ववन्मध्याः ॥ ३६ ॥

ग्रहभगणैरूनानि भदिनानि सावनदिनानि ग्रहसावनदिनानि भवन्ति । ततः स्वसावनैः पूर्ववदिष्टाश्विन्यौदयिका मध्या ग्रहा भवन्ति । अर्थाद्यदीष्टग्रहौदयिका ग्रहाः साध्यास्तदेष्टग्रहसावनाहर्गणतो यद्याश्वि-न्यौदयिकास्तदेष्टभदिनतो मध्या ग्रहाः पूर्ववत् साध्या इति । 'भभ्रमास्तु भगणैर्विवर्जिता यस्य तस्य कुदिनानि तानि वा'—इत्यादि भास्करोक्तमे-तदनुरूपमेवेति ।

इदानीं गुणाद्गुणं मध्यार्कमिष्टं मध्यं यो वेत्तीत्यस्योत्तरमाह ।

रविभगणाप्तं लिप्तादि सविकलं ज्ञेयमण्डलेभ्यो यत् ।
मध्यार्कसविकलकलासंगुणितं ज्ञेयमध्यकलाः ॥ ३७ ॥

ज्ञेयमण्डलेभ्यो ज्ञेयग्रहयुगभगणेभ्यो रवियुगभगणाप्तं यल्लिप्तादि फलं तेन मध्यार्कसविकलकलासङ्गुणितं मध्यार्कस्य सविकलेन शेषेण याः कला अर्थाद्विकलात्मकमानेन गुणं तदा ज्ञेयग्रहस्य मध्यस्य कलाः स्युरिति ।

अत्रोपपत्तिः । त्रैराशिकेन यदि रवियुगभगणैर्मध्यमा रविकला

लभ्यन्ते तदा ज्ञेयग्रहयुगभगणैः किं लब्धा ज्ञेयमध्यकलाः $= \frac{\text{मरक} \times \text{ज्ञेयुभ}}{\text{युरभ}}$

$= \text{मरक} \times \frac{\text{ज्ञेयुभ}}{\text{युरभ}}$ ।

अत उपपद्यते ॥ ३७ ॥

इदानीं पातानतुलोमगतीनित्यादिप्रश्नोत्तरमाह ।

इष्टभगणोनभूदिनशेषैर्भगणैः कृतो मध्यः ।
अनुलोमगो विलोमो विलोमगो वाऽनुलोमगतिः॥ ३८ ॥

इष्टग्रहयुगभगणोनेभ्यो युगकुदिनेभ्यो ये शेषास्तत्समैर्युगभगणैरहर्गणानुपातेन यो मध्यः कृतः स्यात् स यद्यनुलोमगस्तदा विलोमो भवेद्विलोमगो वाऽनुलोमगतिर्भवति ।

अत्रोपपत्तिः । युकुदि−इयुभ एतेऽहर्गणगुणाः कुदिनभक्ता लब्धभगणादिके भगणानपास्य राश्यादिको ग्रहः क्रियते तदेष्टग्रहस्वरूपशुद्धो भवत्यतोऽनुलोमगो विलोमो भवतीति ॥ ३८ ॥

इदानीं प्रकारान्तरेणानन्तरप्रश्नोत्तरमाह ।

युगणोनकुदिनशेषैर्भगणैरनुलोमगो विलोमगतिः ।
भवति विलोमो मध्योऽनुलोमगो वा कृतः प्राग्वत् ॥ ३९ ॥

अहर्गणोनानां युगकुदिनानां यानि शेषाणि तैः शेषैर्गम्याहर्गणैर्ग्रहयुगभगणैस्त्वानुपातेन प्राग्वत् कृतोऽनुलोमगो ग्रहो विलोमगतिर्भवति मध्यो विलोमश्चानुलोमगो वा भवति ।

अत्रोपपत्तिः । यदि गम्याहर्गणेनानेन युकुदि−गह । भगणात्मको ग्रहः साध्यते तदा ग्रहः $= \frac{\text{ग्रयुभ}\ (\text{युकुदि} - \text{गह})}{\text{युकुदि}} = \text{ग्रयुभ} - \frac{\text{ग्रयुभ} \times \text{गह}}{\text{युकुदि}}$ ।

अत्रापि भगणानां त्यागाद्राश्यादिको ग्रहस्वरूपशुद्ध उत्पद्यतेऽतोऽनुलोमगो विलोमगो विलोमश्चानुलोमगो भवतीति स्फुटम् ॥ ३९ ॥

इदानीं शन्यादिभिर्विपरीतैर्यो दिवसवारं वेत्तीत्यस्योत्तरमाह ।

कल्पदिनसप्तकवधात् कल्पगताहर्गणोनकाच्छेषात् ।
सप्तहृताद्दिनवारः शेषः शन्यादिको भवति ॥ ४० ॥

कल्पदिनसप्तकवधात् कल्पकुदिनसप्तघातात् किंविशिष्टात् कल्पगताहर्गणेनोनकात्मः शेषस्तस्मात् सप्तहृतात् शेषः शन्यादिको दिनवारो भवति । अर्थाद्रवेरनन्तरं शनिः शनेरनन्तरं शुक्र इति विपरीतगणनया दिनवारो भवति ।

अत्रोपपत्तिः । सप्ततष्टोऽहर्गणो यदि शे$_1$ तथा सप्ततष्टा-७ कुदि-अह । अयं शे कल्प्यते तदा

शे = ७ - शे$_1$ । अतो-शे$_1$ ऽस्माद्रा रव्यादिनः क्रमगणना सैव ७ - अशे$_1$ अस्मात् शन्यादेर्विपरीतगणना । यथा

यदि शे$_1$ = १ तदा क्रमगणनया वर्त्तमानः सोमवारस्तथा

शे = ६ । अस्मात् । रविः । शनिः । शुक्रः । गुरुः । बुधः । कुजः । इति विपरीतगणनया वर्त्तमानः सोम एव जातः ॥ ४० ॥

इदानीं व्यतिपातवैधृतादिप्रश्नोत्तरमाह ।

व्यतिपातवैधृतान्यर्कचन्द्रभगणा युता द्विसङ्गुणिताः ।
गुरुवर्षाणि गृहयुता द्वादशगुणिता गुरोर्भगणाः ॥ ४१ ॥

अर्कचन्द्रभगणा युता द्विसङ्गुणिताश्च व्यतिपातवैधृतानि भवन्ति । अर्थाद्रविचन्द्रभगणयोगे यावन्तो भगणास्त द्विसङ्गुणितास्तावन्तो व्यतिपातवैधृताख्याः स्युः । गुरोर्भगणा द्वादशगुणिता वर्त्तमानगुरुगृहयुता गुरुवर्षाणि स्युः ।

अत्रोपपत्तिः । रविशशियोगे भार्धे व्यतिपातश्चक्रे च वैधृताख्यः । एवं रविशशियोगैकभगणे वारद्वयं तेन योगभगणा द्विसङ्गुणास्तावन्तो व्यतिपातवैधृताख्या गताः स्युः । बृहस्पतेर्मध्यमराशिभोगात् सांहितिका गुरुवर्षं वदन्ति । अतो गुरुभगणा द्वादशगुणा वर्त्तमानराशिसहिता गुरुवर्षाणि भवन्तीति । संप्रति प्रसिद्धसूर्यसिद्धान्तेऽप्ययमेव गुर्वब्दानयनप्रकारो वर्त्तते ॥ ४१ ॥

इदानीं स्वोच्चनीचपरिवर्त्तान् द्वियहयोगांश्च यो वेत्ति तस्योत्तरमाह ।

आद्यग्रहपरिवर्त्ता विशेषिताः स्वोच्चनीचपरिवर्त्ताः ।
भगणान्तरं द्वियोगाः कार्याश्चैराशिकेन गताः ॥ ४२ ॥

ग्राह्यग्रहपरिवर्ताः पाठपठिता ग्रहभगणास्ते स्वोच्चभगणैर्विशेषिता अन्तरितास्ते स्वोच्चनीचपरिवर्ताः स्वकेन्द्रभगणाः स्युः । 'खेचरोच्चभगणान्तरोन्मिताः सन्ति मन्दचलकेन्द्रपर्ययाः'—इति भास्करोक्तमेतदनुरूपमेव । एवं द्वयोर्ग्रहयोर्युगभगणानामन्तरं युगे द्वियोगा द्वयोर्ग्रहयोर्योगाः स्युः । ततस्त्रैराशिकेनेष्टकाले युगकुदिनैर्भगणान्तरतुल्या योगास्तदाऽहर्गणेन किमिति लब्धा गता योगाः कार्याः ।

अत्रोपपत्तिः । केन्द्रानयनस्यातिसुगमा । कल्पे भगणान्तरसमा एव ग्रहयोर्योगा भवन्ति । उभयोः प्राग्गमनात् इति ॥ ४२ ॥

इदानीं सावनमासाब्दाधिपौ यो वेत्तीत्यत्रोत्तरमाह ।

युगणात् त्रिंशद्भक्ताद्यल्लब्धं द्विगुणितं सरूपं तत् ।
सप्तविभक्तं शेषः सावनमासाधिपोऽर्कादिः ॥ ४३ ॥
षष्टिशतत्रयभक्तात् कल्पगताहर्गणात् फलं त्रिगुणम् ।
सैकं सप्तविभक्तं सावनवर्षाधिपोऽर्कादिः ॥ ४४ ॥

त्रिंशद्भक्तादहर्गणाद्यल्लब्धं तद् द्विगुणितं सैकं च कार्यम् । ततः सप्तविभक्तं शेषोऽर्कादिः सावनमासाधिपो भवति । एवं कल्पगताहर्गणात् षष्ट्यधिकशतत्रयभक्ताद्यत् फलं तत् त्रिगुणं सैकं च कार्यम् । ततः सप्तविभक्तं शेषोऽर्कादिः सावनवर्षाधिपो भवति ।

अत्रोपपत्तिः । दिनत्रिंशतैकः सावनमासो भवति । अतोऽहर्गणस्त्रिंशता हृतो लब्धा गताः सावनमासास्ते द्विसङ्गुणाः कृता यतस्त्रिंशद्दिनात्मके सावनमासे सप्तनष्टे द्वयमवशिष्यते । वर्तमानमासपत्यर्थं सैकाः कृतास्ततः सप्तनष्टे मासाधिपतिरर्कादिर्भवति यतः कल्पादौ मासपतिरर्क आसीत् । एवं षष्ट्यधिकशतत्रयदिनैरेकः सावनोऽब्दः परिकल्पितः प्राचीनैस्ततस्तैर्दिनैर्हृतोऽहर्गणो लब्धा गताब्दास्त्रिसङ्गुणा यतः षष्ट्यधिकशतत्रयदिनात्मक एकस्मिन् सावनाब्दे सप्तनष्टे त्रयमवशिष्यते । वर्तमानाब्दपार्थं त्रिसङ्गुणाः सैकाः कृताः । शेषोपपत्तिरतिसुगमा । प्रसिद्धसूर्यसिद्धान्तेऽप्ययमेव प्रकारः ॥ ४३–४४ ॥

इदानीं होरेशं यो वेत्तीत्यस्योत्तरमाह ।

अर्कानलग्नहोराः पञ्चगुणाः सविकला यदि सरूपाः ।
सप्तविभक्ताः शेषो दिनपाद्यः कालहोरेशः ॥ ४५ ॥

अर्कानलग्नेन होराः साध्याः । अर्कस्य भोग्यकालो लग्नभुक्तकालो मध्योदयाश्चैषां योगो घट्यात्मक इष्टकालः स च सार्धद्विभक्तो लब्धा होरा भवन्ति यतो घटीद्वयं सार्धं होरेति जातकज्ञानां सिद्धान्तः । लब्धा होराः पञ्चगुणा यदि होराः सविकलाः सावयवास्तदा पञ्च-गुणा ये कृतास्ते सरूपाः कार्याः । अन्यथा पञ्चगुणा एव ग्राह्याः । ततस्ते सप्तविभक्ताः शेषे दिनपाद्यः कालहोरेशो भवति । अर्थाद्-दिनवारादिक्रमगणनया कालहोरेशो भवतीति ।

अत्रोपपत्तिः । प्रथमा होरा दिनपतेर्द्वितीया दिनपतेः षष्ठस्यैवं षष्ठः षष्ठः कालहोरेशो भवति । अतो द्वयोर्होरेशयोरन्तरं पञ्च । अतो होराः पञ्चगुणाः सर्वे वारा भवन्ति । यदि होराः सावयवास्तदा वर्त-मानहोरेशानयनार्थं ते पञ्चगुणाः सैकाः कार्याः । ततः सप्ततष्टे दिन-पाद्धोरेशो भवतीति ।

अत्र चतुर्वेदाचार्येणार्कानलग्नभागाः पञ्चदशहृता होरा भव-न्तीति कालखान् सार्धद्विघटीभवान् पञ्चदशलवान् प्रकल्प्य तेत्रांशा-न्तरैरर्कलग्नान्तरभागैरनुपातः कृतः स च गणितयुक्तितो न युक्त इति बुद्धिमद्भिश्चिन्त्यम् ॥ ४५ ॥

इदानीं मासपत्यादौ विशेषमाह ।

त्रिचतुरनन्तरषष्ठाः सावनमासाब्ददिवसहोरेशाः ।
दिनगतघटिका द्विगुणाः पञ्चहृता वाऽन्यमतमेतत् ॥ ४६ ॥

सावनमासपतिस्त्रिको भवति । अर्थाद्यदि मासपतिरर्कस्तदा तदन्यमासपतिः कुजः । एवं चिकस्त्रिको मासपतिर्भवति । एवं साव-नाब्दपतिश्चतुर्थश्चतुर्थो भवति । वारपतिरनन्तरो रवेरनन्तरं सोमस्ततो भौम इति । होरेशश्च षष्ठः षष्ठ इति । होरेशानयने मतान्तरमाह

द्दिनगतघटिका इति । दिनगतघटिका द्विगुणाः पञ्चहृता लब्धा होरे-
शा भवन्ति दिनपाद्या । एतदन्यमतं न सर्वसम्मतमिति । यत एतन्मते
यावत्यो होरास्तावन्त एव वारक्रमेण होरेशा न कक्षक्रमेणेति ।

अत्रोपपत्तिः । माससङ्ख्या ३० सप्ततष्टा शेषम् २ । अतस्त्रिकस्त्रिको
मासपतिः । एवं वर्षसङ्ख्या ३६० सप्ततष्टा शेषम् ३ । अतश्चतुर्थश्चतुर्थो
वर्षपतिः । शेषं परिभाषातः स्फुटम् ॥ ४६ ॥

इदानीमिष्टमध्यसंयोगान्निष्टैर्गुणैर्युतोनानिष्टान् वेत्तीत्यस्योत्तर-
माह ।

गच्छधनमिष्टगुणितैर्धनैर्युतोनं पृथक् पृथक् सहितम् ।
गुणकयुतोनपदहृतं सर्वधनमतोऽवशेषाणि ॥ ४७ ॥

सर्वेषामिष्टानां ग्रहाणामेकजातीनां योगो गच्छधनमिति संज्ञा
सर्वधनमित्यर्थः । तस्मात् सर्वधनादिष्टगुणगुणः प्रथमो ग्रहो विशोध्यते
वा तत्र योज्यते यो भवति स ज्ञायते । एवं तस्मादेव तेनैव गुणेन गुणो
द्वितीयो ग्रहो विशोध्यते वा तत्र योज्यते यो भवति सोऽपि ज्ञायते ।
एवं तेनैव गुणेन गुणितान् सर्वानभीष्टान् ग्रहांस्तस्मात् सर्वधनादपास्य वा
तत्र संयोज्य या याः सङ्ख्या भवन्ति तास्ताः पृथक् पृथग्ज्ञायन्ते । धना-
नि च पृथक् पृथग्ग्रहमानानि । यावन्तोऽभीष्टा ग्रहास्तत् पदं वा गच्छ-
मानम् । तेनायमर्थः । गच्छधनमिष्टगुणितैर्धनैर्ग्रहैर्युतोनं कृतं सङ्ख्याक-
मस्ति पृथक् पृथक् तत् सहितं कार्यम् । गुणकयुतोनपदहृतमर्थाद्येन गुण-
केन गुणं ग्रहमानं सर्वधने युतोनं कृतं तेन गुणकेन युतोनं पदं कार्यं
तेन हृतं लब्धं सर्वधनं गच्छधनं भवति । अतोऽस्मादवशेषाणि पृथक्
पृथग्ग्रहमानानि ज्ञायन्ते ।

अत्रोपपत्तिः । कल्प्यन्ते ग्रहमानानि $य_1, य_2, य_3, य_4, \cdots$ इष्टगुण-
कारः इ । सर्वधनम् = स । युतोने कृते सङ्ख्या $द्द_1, द्द_2 \cdots$

$$\text{तदा}\quad द्द_1 = स \pm इ \cdot य_1$$

$$द्द_2 = स \pm इ \cdot य_2$$

$$दृ_3 = स \pm द \cdot य_3$$

$$\vdots \qquad \vdots$$

सर्वयोगे $दृ_1 + दृ_2 + दृ_3 + \cdots = प \cdot स \pm द (य_1 + य_2 + \cdots)$

$$= प \cdot स \pm द \cdot स = स (प \pm द)$$

$\therefore स = \dfrac{दृ_1 + दृ_2 + दृ_3 \cdots}{प \pm द}$ अत उपपन्नम् ।

अथ $दृ_1 = स \pm द \cdot य_1 \therefore य_1 = \dfrac{स \backsim दृ_1}{द}$ ।

एवं सर्वेषां ग्रहाणां मानानि स्युः ॥ ४७ ॥

इदानीमध्यायोपसंहारमाह ।

मध्योत्तरमेकोनार्यापञ्चाशत् त्रयोदशोऽध्यायः ।
ज्ञात्वैवं तन्त्रविदामाचार्यो भवति मध्यगतौ ॥ ४८ ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते मध्यगतिप्रश्नो-
त्तराध्यायस्त्रयोदशः ॥ १३ ॥

स्पष्टार्थम् ॥ ४८ ॥

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितो मध्यगतौ सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्त-
नूतनतिलके मध्यगत्युत्तराध्यायस्त्रयोदशः ॥ १३ ॥

अथ स्फुटगत्युत्तराध्यायः ।

तत्रादौ प्रश्नानाह ।

भुजभागैः कोटिज्यां कोट्यंशैर्यः करोति बाहुज्याम् ।
कोटिं भुजेन बाहुं कोट्या वा स्फुटगतिज्ञः सः ॥ १ ॥

यो भुजभागैः कोटिज्यां करोति । कोट्यंशैश्च बाहुज्यां करोति । भुजेन भुजज्यया कोटिं कोटिज्यां करोति । कोट्या कोटिज्यया वा बाहुं भुजज्यां करोति स स्फुटगतिज्ञः स स्फुटगतिं जानातीत्यर्थः । एवमत्र प्रश्नचतुष्टयम् ॥ १ ॥

इदानीमन्यान् प्रश्नानाह ।

परमफलकेन्द्रविद्यः करोति कोटिज्यया स्फुटं कर्णम् ।
कर्णात् कोटिं कोट्या बाहुं वा स्फुटगतिज्ञः सः ॥ २ ॥

यः परमफलकेन्द्रविज्ञायकः कोटिज्यया केन्द्रकोटिज्यया स्फुटं कर्णं शीघ्रकर्णं करोति भुजफलं विनैव । कर्णात् कोटिं केन्द्रकोटिज्यां यः करोति । कोट्या केन्द्रकोटिज्यया वा बाहुं केन्द्रभुजज्यां करोति स स्फुटगतिज्ञः । एवमत्र प्रश्नचतुष्टयम् ॥ २ ॥

इदानीमन्यान् प्रश्नानाह ।

केन्द्रभुजकोटिजीवापरमफलज्ञः करोति यः कर्णम् ।
स्वोच्चं सफलं स्पष्टं करोति यः स्फुटगतिज्ञः सः ॥ ३ ॥

यः केन्द्रभुजज्या-केन्द्रकोटिजीवा-परमफलज्ञः कर्णं शीघ्रं वा मन्दं करोति । स्वोच्चं सफलं स्पष्टं च यः करोति कर्णान्मन्दस्पष्टं स्फुटं ग्रहं च यः करोति स स्फुटगतिज्ञः । एवं मन्दशीघ्रभेदेनात्र प्रश्नचतुष्टयम् ॥ ३ ॥

इदानीमन्यान् प्रश्नानाह ।

द्युगणात् स्फुटं ग्रहं यो भुजकोटिज्ये फले विना ज्याभिः ।
ज्याभिर्विना फलधनुः करोति वा स्फुटगतिज्ञः सः ॥ ४ ॥

ग्रहगणादेव यः स्फुटं मन्दशीघ्रफलादिसंस्कृतं ग्रहं करोति । ज्याभिः पठितैर्ज्याखण्डैर्विना यो भुजकोटिज्ये फले भुजकोटिफले च करोति । एवं ज्याभिर्विना यः फलचापं ज्यायाश्चापं वा करोति स एव स्फुटगतिज्ञः । एवमत्र प्रश्नचतुष्टयम् ॥ ४ ॥

इदानीमन्यान् प्रश्नानाह ।

इष्टाश्विन्यौदयिकान् करोति मध्यान् ग्रहान् स्पष्टान् ।
स्वोच्चस्फुटैर्ग्रहं यः करोति वा स्फुटगतिज्ञः सः ॥ ५ ॥

इष्टग्रहौदयिकान् मध्यान् ग्रहान् यः स्पष्टान् करोति । अश्विन्यौदयिकान् मध्यान् वा यः स्पष्टान् करोति । वा यः स्वोच्चस्फुटैर्मन्दोच्चशीघ्रोच्चस्फुटग्रहैर्यो ग्रहं मध्य ग्रहं करोति स स्फुटगतिज्ञः । एवमत्र प्रश्नत्रयम् ॥ ५ ॥

इदानीमन्यान् प्रश्नानाह ।

सङ्क्रान्तेराद्यन्तौ ग्रहस्य यो राशिभतिथिकरणान्तान् ।
व्यतिपाताद्यन्तौ वा यो वेत्ति स्फुटगतिज्ञः सः ॥ ६ ॥

यो ग्रहस्य सङ्क्रान्तेराद्यन्तौ वेत्ति । ग्रहस्य राशिभस्य नक्षत्रस्याद्यन्तौ वेत्ति । तिथेराद्यन्तौ वेत्ति । करणस्याद्यन्तौ वेत्ति । वा व्यतिपातस्याद्यन्तौ वेत्ति । अर्थात् सर्वेषां सन्धिमानं यो वेत्ति स स्फुटगतिज्ञः । एवमत्र प्रश्नपञ्चकम् ॥ ६ ॥

अथैषामुत्तराण्याह ।

तत्रादौ भुजभागैः कोटिज्येत्यादिप्रश्नचतुष्टयोत्तरमाह ।

व्यासदलमितरजीवा भुजकोट्यंशोत्क्रमज्यया हीनम् ।
कोटिभुजज्याव्यासार्धकृतिविशेषात् पदं चान्या ॥ ७ ॥

व्यासदलं भुजोत्क्रमज्यया हीनं शेषमितरजीवा कोटिजीवा स्यात् । कोट्युत्क्रमज्यया हीनं व्यासदलं शेषमितरजीवा भुजज्या भवेत् । एवं कोटिज्या व्यासार्धवर्गान्तरात् पदमन्या भुजज्या स्याद्भुजज्या व्यासार्धवर्गान्तराच्च पदमन्या कोटिज्या स्यादिति ।

Digitized by Google

अत्रोपपत्तिर्ज्यौत्पत्त्या स्फुटा ॥ ७ ॥

इदानीं परमफलकेन्द्रविद्धः कोटिज्यया स्फुटं कर्णं करोतीत्यस्योत्तरमाह ।

कोटिज्यया द्विगुणयाऽन्त्यफलज्यागुणितया युतोनायाः ।
मृगकर्क्यादौ त्रिज्यान्त्यफलज्याकृतियुतेः पदं कर्णः ॥ ८ ॥

त्रिज्यान्त्यफलज्याकृतियुतेर्मृगादौ केन्द्रे द्विगुणयाऽन्त्यफलज्यागुणितया कोटिज्यया युतायाः कर्क्यादौ केन्द्रे तु तयोनाया यत् पदं स कर्णो भवेत् ।

अत्रोपपत्त्यर्थं भास्करकर्णानयनस्य प्रकारचतुष्टयं 'स्वकोटिजीवान्त्यफलज्ययोर्यो योगो मृगादौ'-इत्यादि द्रष्टव्यम् ॥ ८ ॥

इदानीं कर्णात् कोटिमित्याद्युत्तरमाह ।

त्रिज्यान्त्यफलकृतियुतेः कर्णकृतेश्चान्तरेऽवशेषं यत् ।
द्विगुणान्त्यफलहृतं तत् कोटिज्या बाहुजीवाऽतः ॥ ९ ॥

त्रिज्यान्त्यफलज्यावर्गयोगस्य कर्णवर्गस्य चान्तरे यदवशेषं तद्द्विगुणान्त्यफलज्यया हृतं लब्धं तत्कोटिजीवा केन्द्रकोटिज्या स्यादतः उक्तप्रकारेण कोटिज्यावर्गोनात् त्रिज्यावर्गात् पदमित्यनेन बाहुजीवा केन्द्रज्या स्यादित्यर्थः ।

अत्रोपपत्तिः । कर्णानयनवैपरीत्येन सुगमेति ॥ ९ ॥

इदानीं प्रतिवृत्तभङ्गीमाह ।

कक्षामण्डलतुल्यप्रतिमण्डलमध्यमवनिमध्यात् खे ।
तत्स्वोच्चनीचवृत्तव्यासार्धेऽभिमुखमुच्चस्य ॥ १० ॥
प्रतिमण्डलस्य परिधौ मध्यमभुक्त्या स्फुटग्रहो भ्रमति ।
मन्दोच्चादनुलोमं शीघ्रात् प्रतिलोममवनिस्थः ॥ ११ ॥
स्पष्टं पश्यति यस्मात् मध्यादूनाधिकं स्वकक्षायाम् ।
तस्मात् तदन्तरफलमृणं धनं वा ग्रहे मध्ये ॥ १२ ॥

खे आकाशे स्वोच्चस्याभिमुखमवनिमध्यात् तत्स्वोच्चनीचवृत्तव्या-
सार्धेऽन्त्यफलज्यायै कक्षामण्डलतुल्यस्य प्रतिमण्डलस्य मध्यं केन्द्रं भव-
तीति । अवनिस्थो भूगर्भस्थो द्रष्टा । स्वकक्षायां कक्षामण्डले भवतये ।
शेषं स्पष्टार्थम् । 'त्रिभज्यकासंमितकर्कटेकेन'—इत्यादि भास्करोक्तमेतद-
नुरूपमेवेति ॥ १०–१२ ॥

इदानीं स्पष्टां कोटिमाह ।

अन्त्यफलज्याग्रात् स्यात् पदयोराद्यन्तयोरुपरि कोटिः ।
द्वितृतीययोरधस्तात् तदन्तरैक्यं ततः कोटिः ॥ १३ ॥

कोटिः प्रतिमण्डलीया केन्द्रकोटिज्या । ततस्तस्मात् तदन्तरैक्यं केन्द्र-
कोटिज्यान्त्यफलज्ययोराद्यन्तयोः पदयोरैक्यं कर्क्यादौ त्वन्तरं कोटिः
स्पष्टा कोटिः प्रतिमण्डलीयवृत्तकेन्द्रात् कक्षावृत्तकेन्द्रगतिर्यग्रेखावधिलं-
बरूपा कोटिः स्यादित्यर्थः । 'मध्यस्फुटे किल वृत्तयोर्य'—इत्यादि
स्करोक्तमेतदनुरूपमेव ।

अत्रोपपत्त्यर्थं भास्करगोलाध्यायस्य छेद्यकाधिकारो द्रष्टव्यः ॥ १३ ॥

इदानीं पूर्वोक्तस्पष्टकोट्यानयनं ततः कर्णानयनं चाह । अथो-
क्तः केन्द्रभुजकोटिजीवापरमफलज्ञः कर्णं करोतीत्यस्योत्तरमाह ।

कोट्यन्त्यफलज्यैक्यं मकरादावन्तरं कुलीरादौ ।
तद्बाहुज्याकृत्योः संयोगपदं भवति कर्णः ॥ १४ ॥

स्पष्टार्थम् ।

अत्रोपपत्तिश्च भास्करच्छेद्यकाधिकारेण स्फुटा ।

अत्र चतुर्वेदाचार्येण स्वटीकायां यथा क्षेत्रसंस्था विस्तरतः प्रति-
पादिता स्वगोलाध्यायस्य छेद्यकाधिकारे भास्करेण सैव सूक्ष्मत्वेनोपनि-
बद्धा ॥ १४ ॥

इदानीं प्रतिमण्डलपदान्याह ।

प्रतिमण्डलपदमाद्यं गृहत्रयं सान्त्यफलधनुरतोऽन्यच्च ।
चक्रार्धमनेनोनं द्वितृतीयं चतुर्थमाद्यसमम् ॥ १५ ॥

एतत्त्रयं सान्त्यफलधनुरन्त्यफलज्याचापसंहितमाद्यं पदं स्यात् । अनेनाद्यपदेन चक्रार्धमूनमतोऽन्यद्द्वितृतीयं द्वितीयं पदं तदेव तृतीयं पदं च स्यात् । चतुर्थं पदं चाद्यसममाद्यपदममेव वेद्यम् ।

अत्रोपपत्तिः । 'चापेन शीघ्रान्त्यफलज्यकायास्त्रिभं युतोनोनयुतम्'–इत्यादिभास्करविधिना स्फुटा ॥ १५ ॥

इदानीं पुनस्तान्येव पदान्याह ।

त्रिभमन्त्यफलधनुर्युतमाद्यं नवमं तृतीयपदमूनम् ।
द्विचतुर्थे षड्द्वादशभानि प्रतिमण्डलपदानि ॥ १६ ॥

त्रिभं राशित्रयमन्त्यफलधनुर्युतमाद्यं पदमुच्चादेवं नवममन्त्यफलधनुषोनमुच्चात् तृतीयपदमानं भवति । द्विचतुर्थे तु षड्द्वादशभानि अर्थादुच्चाद्द्वितीयपदमानं षड्राशयश्चतुर्थपदमानं द्वादशराशयः । एवं प्रथमं यथास्थितं तद्राशिषट्काच्छोध्यं द्वितीयम् । अन्त्यफलधनुरूना-ष्टभाद्राशिषट्कं शोध्यं शेषं तृतीयम् । अन्त्यफलधनुरूनत्रिभं चक्राद्विशोध्यं शेषं चतुर्थम् । एवं प्रतिमण्डलपदानि भवन्ति ।

अत्र चतुर्वेदाचार्यः । 'यदि नामेयमार्या ब्रह्मकृता न भवति प्रागार्यैव शोभनेति' ॥ १६ ॥

इदानीं केन्द्रभुजकोटिजीवापरमफलज्ञो यः स्वोच्चं स्फुटं ग्रहं करोतीति प्रश्नोत्तरमाह ।

कर्णहृतं व्यासार्धं भुजज्यया गुणितमाप्तधनुराद्ये ।
प्रोह्य भदलाद्द्वितीये षड्राशियुतं तृतीयपदे ॥ १७ ॥
चक्रात् प्रोह्य चतुर्थे स्फुटोच्चयोरन्तरं स्वमन्दोच्चे ।
क्षेप्यं शीघ्रे शोध्यं तत् स्पष्टः पूर्ववत् शेषम् ॥ १८ ॥

स्पष्टमार्याद्वयम् । 'त्रिज्याहता कर्णहृता भुजज्येत्यादिभास्करोक्तमेतदनुरूपमेव ।

अत्रोपपत्तिः । इहाचार्येण प्रथमं स्पष्टकेन्द्रभुजज्या साधिता ततः प्रतिमण्डलपदवशेन स्पष्टकेन्द्रमानमानीतम् । तत् स्वमन्दोच्चे देयं मन्द-

स्फुटो भवति मन्दस्फुटान्मन्दोच्चोनाद्यतः स्पष्टमन्दकेन्द्रम् । एवं यदि तत् स्पष्टशीघ्रकेन्द्रं तदा शीघ्रे शीघ्रोच्च शोध्यं स्पष्टो ग्रहः स्यात् स्फुटोनशीघ्रोच्चस्य स्पष्टशीघ्रकेन्द्रत्वादिति । एवमाचार्येण स्फुटीकरणे मन्दकर्णः शीघ्रकर्ण इति कर्णद्वयं साधितम् । ततः शेषं मन्दफलशीघ्रफलादिकं प्राग्वत् गणितक्रियया सम्पद्यते । मध्यस्फुटकेन्द्रयोरन्तरं फलमिति । वा ज्ञातान्मन्दस्फुटात् प्राग्वच्छीघ्रकर्णादिना शीघ्र फलं कार्यमिति सर्वं स्फुटम् ॥ १७–१८ ॥

इदानीं भुजान्तरमाह ।

मध्यस्फुटान्तरकला बाहुफलं तीक्ष्णकिरणस्य ।
स्फुटभुक्त्याऽर्कादीनां भुजान्तरं क्षयधनं रविवत् ॥ १९ ॥

मध्यरवेः स्फुटरवेश्चान्तरकलास्तीक्ष्णकिरणस्य बाहुफलं मन्दफलकला भवन्ति । ततोऽर्कादीनां स्फुटभुक्त्या त्रैराशिकेन रविवद्भुजान्तरं क्षयधनं भवति ।

अत्रोपपत्तिः । मध्यस्फुटान्तरकला मन्दफलकलाः प्रसिद्धाः । आचार्येण क्षेत्रकलाः कालकला: स्थूलत्वात् समाः कल्पिताः । ततो मन्दफलकला एव भास्वत्फलोत्था असवो जातास्ततोऽहोरात्रासुभिर्गतिकलास्तदा भास्वत्फलोत्थासुभिः किमित्यनुपातेन भुजान्तरं भवति । ततो 'मध्यमार्कोदयात् प्राक् स्फुटार्कोदयः-' इत्यादिभास्करविधिना क्षयधनोपपत्तिः स्फुटा ॥ १९ ॥

इदानीमहर्गणात् स्फुटं ग्रहं यः करोतीत्यस्योत्तरमाह ।

मण्डलशेषात् स्वोच्चं विशोध्य सदृशं चतुर्गुणाल्लब्धम् ।
केन्द्रपदानि जिनगुणात् जीवा गतयेयगतयेयैः ॥ २० ॥
छेदचतुर्थैर्बाहोर्येयगतागतगतैस्तथा कोटिः ।
प्राग्वदिनेन्दुभुजफलं मन्दफलं भूसुतादीनाम् ॥ २१ ॥
फलचापकलागुणिते छेदे मण्डलकलाहृते लब्धम् ।
मण्डलशेषे पूर्ववदृणधनमस्माद्ग्रहः स्पष्टः ॥ २२ ॥

कल्पग्रहभगणा ग्रहगंणगुणाः कल्पकुदिनहृताः फलं गतभगणास्ते प्रयोजनाभावात् त्याज्याः शेषं मण्डलशेषं भगणशेषमुच्यते तस्मात् सदृशं सजातीयमुच्चमुच्चभगणशेषं विशोध्य शेषं केन्द्रभगणशेषं भवति । तस्माच्चतुर्गुणात् कल्पकुदिनैर्यल्लब्धं तानि गतानि पदानि भवन्ति । शेषाज्जिनगुणात् कल्पकुदिनैर्यानि लब्धानि तत्सङ्ख्यका जीवा गता शेषं ज्यान्तरहतं कल्पकुदिनैरेव भक्तं फलं गतज्यायां योज्यमभीष्टा केन्द्रज्या भवति । एवं पदक्रमेण गतैष्यगतैष्यैः केन्द्रज्या साध्या । प्रथमे पदे गताद्द्वितीये एष्यादेष्यात् तृतीये गताच्चतुर्थे च एष्याज्ज्या साध्येत्यर्थः । अथैकपदप्रमाणमाह छेदचतुर्थैः । छेदस्य कल्पकुदिनतुल्यस्य यश्चतुर्थांशस्तत्प्रमाणं पदं भवति । बाहोश्छेदचतुर्थैर्भुजस्य चतुर्भिः पदैः क्रमेण एष्यगतागतगतैस्तथा कोटिः कोटिज्या साध्या । प्रथमे पदे एष्यादेष्यात् द्वितीये गतात् तृतीयेऽगतादेष्याच्चतुर्थे गतात् कोटिज्या साध्येत्यर्थः । केन्द्रज्यया प्राग्वदर्कचन्द्रयोर्भुजफलं मन्दफलं भूसुतादीनां च मन्दफलं साध्यम् । छेदे कल्पकुदिनाह्वये फलचापकलागुणिते मण्डलकलाभिश्चक्रकलाभिर्हृते लब्धं मान्दं वा शैघ्र्यं फलं भगणशेषजातीयं तत् पूर्ववत् केन्द्रगोलवशान्मण्डलशेषे ग्रहभगणशेषे ऋणधनं कार्यमेवं स्फुटभगणशेषं भवति । यस्माद्ग्राह्यात्मकः स्फुटो ग्रहः साध्य इति ।

अत्रोपपत्तिः । भगणशेषादेवाचार्येण केन्द्रादिकं साधितम् । तत्र एकस्मिन् भगणे चत्वारि पदानि तदा भगणशेषे किमिति पदानि $\frac{४ \times भशे}{ककुदि}$ । एवमेकस्मिन् पदे ५४०० कलास्तदा गते वा गम्ये पदे किं लब्धा गतगम्यकलास्तास्त्र्यश्विहृता ज्यासङ्ख्या $= \frac{गत-, वा\ गम्य- \times ५४००}{ककुदि \times २२५} = \frac{गत-, वा\ गम्य- \times २४}{ककुदि}$ ।

ततो ज्यादीनामानयनं सुगमम् ।

अथ फलकलाश्चक्रकलाहृता जाता भगणात्मिकाः फलकलाः

$$= \frac{फक}{चक} = \frac{फक \cdot ककुदि}{चक \cdot ककुदि} = \frac{\frac{फक \cdot ककुदि}{चक}}{ककुदि} = \frac{लब्ध}{ककुदि}$$

। एवं ग्रहभगणशेषे संस्का-

रयोरयं समच्छेदं भगणात्मकं फलं जातमिति । शेषोपपत्तिः सुगमा ॥ २०–२२ ॥

इदानीं विना ज्याभिर्भुजकोटिज्ये तत्फले यः करोतीत्यस्योत्तरमाह ।

भुजकोट्यंशोनगुणा भार्धांशास्तच्चतुर्थभागोनैः ।
पञ्चघ्नेन्दुखचन्द्रैर्विभाजिता व्यासदलगुणिता ॥ २३ ॥
तज्ज्ये परमफलज्यासङ्गुणिता तत्फले विना ज्याभिः ।
इष्टोच्चनीचवृत्तव्यासार्धे परमफलजीवा ॥ २४ ॥

भार्धांशाः खनागेन्दवो भुजांशैर्वा कोट्यंशैर्वा जीवाऽपेक्षिता तैरूना गुणाश्च कार्याः । ततस्त एव पञ्चघ्नेन्दुखचन्द्रे = १०१२५ तच्चतुर्थांशोनैर्भुजकोट्यूनगुणखनागेन्दुचतुर्थांशोनैर्भक्ताः । लब्धिर्व्यासदलगुणा यस्मिन् व्यासार्धे जीवाऽपेक्षिता तेन गुणा तदा तज्ज्ये भुजकोटिज्ये भवतः । तथा सैव लब्धिः परमफलज्यागुणा तदा तत्फले भुजकोटिफले ज्याभिर्ज्याखण्डैर्विना भवत इति । परमफलज्या च केत्याहेष्टोच्चनीचवृत्तव्यासार्धे परमफलजीवा भवतीति ॥

अत्रोपपत्तिः । यदि व्यासार्धे भुजज्या तदा द्विगुणव्यासार्धे का लब्धा द्विगुणव्यासार्धे भुजज्या $= \frac{\text{ज्याभु}\cdot \text{२ व्यार्ध}}{\text{व्यार्ध}} = \text{२ ज्याभु}$ । अतः कस्मिन्नपि व्यासार्धे द्विगुणभुजांशानां या पूर्णज्या सैव द्विगुणतद्व्यासार्धे भुजज्या भवतीति । चक्रव्यासार्धे द्विगुणभुजांशानां पूर्णज्यासाधनार्थं स्वल्पान्तरात्त्रिगुणः परिधिः = ३६० । चक्रांशैश्चक्रसमचापीयमानं लभ्यते तदा द्विगुणभुजांशैः किं लब्धं तच्चापमानम् = २ भु । ततश्चापोननिघ्नपरिधिः प्रथमाह्वयः इत्यादिभास्करविधिना चक्रव्यासे द्विगुणभुजांशपूर्णज्या जाता चक्रमितार्धज्यायां भुजज्या $= \frac{(\text{३६०} - \text{२ भु})\,\text{२ भु} \times \text{४} \times \text{१२०}}{\text{३६०}^{\text{२}} \times \frac{\text{५}}{\text{४}} - (\text{३६०} - \text{२ भु})\,\text{२ भु}}$

$$= \frac{(\text{१८०} - \text{भु})\ \text{भु} \times \text{१६} \times \text{१२०}}{\frac{\text{३६०} \times \text{३६०} \times \text{५}}{\text{४}} - (\text{१८०} - \text{भु})\,\text{भु} \times \text{४}} = \frac{(\text{१८०} - \text{भु})\ \text{भु} \cdot \text{१२०}}{\frac{\text{९०} \times \text{३६०} \times \text{५}}{\text{१६}} - \frac{(\text{१८०} - \text{भु})\,\text{भु}}{\text{४}}}$$

$$=\frac{(\text{१८०}-\text{भु})\,\text{भु}\times\text{१२०}}{\text{४५}\times\text{४५}\times\text{५}-\frac{(\text{१८०}-\text{भु})\,\text{भु}}{\text{४}}}=\frac{(\text{१८०}-\text{भु})\,\text{भु}\times\text{१२०}}{\text{१०१२५}-\frac{(\text{१८०}-\text{भु})\,\text{भु}}{\text{४}}}\text{।}$$

यदि स्वार्कत्रिज्यायामियं भुजज्या तदेष्टत्रिज्यायां का जातेष्टत्रिज्यायां भुजज्या

$$=\frac{(\text{१८०}-\text{भु})\,\text{भु}\cdot\text{त्रि}}{\text{१०१२५}-\frac{(\text{१८०}-\text{भु})\,\text{भु}}{\text{४}}}$$

। त्रिज्ययेयं भुजज्या तदा परमफलज्यया किं जातं भुजफलम् $=\frac{(\text{१८०}-\text{भु})\,\text{भु}\cdot\text{ज्याप॰फ}}{\text{१०१२५}-\frac{(\text{१८०}-\text{भु})\,\text{भु}}{\text{४}}}$ । एवं भुजस्थाने कोटिं विन्यस्य कोटिज्याकोटिफले ज्ञेये । शेषोपपत्तिः स्फुटा । भास्करप्रकारोपपत्त्यर्थं कल्प्यते ।

$$\text{ज्याचा}=\frac{\text{या}\cdot\text{व्या}\cdot\text{चा}\,(\text{प}-\text{चा})}{\text{का}\cdot\text{प}^{2}-\text{चा}\,(\text{प}-\text{चा})}$$

। अत्र व्यासः = व्या, परिधिः = प, चापम् = चा, तत्पूर्णज्या = ज्याचा इति बोध्यम् ।

अथ चापस्य परिधिदलमितत्वे तत्पूर्णज्या व्याससमा

$$\text{तेन व्या}=\frac{\text{या}\cdot\text{व्या}\cdot\frac{\text{प}}{\text{२}}\left(\text{प}-\frac{\text{प}}{\text{२}}\right)}{\text{का}\cdot\text{प}^{2}-\frac{\text{प}}{\text{२}}\left(\text{प}-\frac{\text{प}}{\text{२}}\right)}=\frac{\text{या}\cdot\text{व्या}\cdot\frac{\text{प}^{2}}{\text{४}}}{\text{का}\cdot\text{प}^{2}-\frac{\text{प}^{2}}{\text{४}}}=\frac{\text{या}\cdot\text{व्या}}{\text{४ का}-\text{१}}$$

$$\text{वा १}=\frac{\text{या}}{\text{४ का}-\text{१}}$$

परिधिषष्ठांशसमचापस्य पूर्णज्या तु व्यासदलसमा त्रिज्यार्धं राशिज्येत्युक्तेः ।

$$\text{अतः }\frac{\text{व्या}}{\text{२}}=\frac{\text{या}\cdot\text{व्या}\,\frac{\text{प}}{\text{६}}\left(\text{प}-\frac{\text{प}}{\text{६}}\right)}{\text{का}\cdot\text{प}^{2}-\frac{\text{प}}{\text{६}}\left(\text{प}-\frac{\text{प}}{\text{६}}\right)}=\frac{\frac{\text{५प}^{2}}{\text{३६}}\,\text{या}\cdot\text{व्या}}{\text{का}\cdot\text{प}^{2}-\frac{\text{५प}^{2}}{\text{३६}}}=\frac{\text{५ या}\cdot\text{व्या}}{\text{३६ का}-\text{५}}$$

$$\text{वा }\frac{\text{१}}{\text{२}}=\frac{\text{५ या}}{\text{३६ का}-\text{५}}$$

। पूर्वसिद्धम् $\text{१}=\frac{\text{या}}{\text{४ का}-\text{१}}$ आभ्यां समीकरणेन

$$\text{या}=\text{४},\ \text{का}=\frac{\text{५}}{\text{४}}\ \text{उत्थापनेन ज्याचा}=\frac{\text{४ व्या}\cdot\text{चा}\,(\text{प}-\text{चा})}{\frac{\text{५}}{\text{४}}\text{प}^{2}-\text{चा}\,(\text{प}-\text{चा})}$$

यतोऽनेन विधिना परिधिदलपरिधिषष्ठांशयोः पूर्णज्ये सूक्ष्मे आगमिष्यतः । शून्यचापस्य ज्याऽपि शून्यसमैवागच्छतीत्युत्थापनेन स्फुटं तस्मादन्यचापानां ज्या अप्यनेन विधिना स्वल्पान्तरा आगच्छन्ति । एतेन

'चापोननिघ्नपरिधिः प्रथमाह्वयः स्यात्
पञ्चाहतः परिधिवर्गचतुर्थभागः ।
आद्योनितेन खलु तेन भजेच्चतुर्घ्न-
व्यासाहतं प्रथममाप्तमिह ज्यका स्यात्' ॥

इत्युपपन्नम् ॥ २३–२४ ॥

इदानीमिष्टज्यातश्चापानयनमाह ।

इष्टज्यासङ्गुणिताः पञ्चकयमलैकशून्यचन्द्रमसः ।
इष्टज्यापादयुतव्यासार्धविभाजिता लब्धम् ॥ २५ ॥
नवतिकृतेः प्रोह्य पदं नवतेः संशोध्य शेषभागकलाः ।
एवं धनुरिष्टाया भवति ज्याया विना ज्याभिः ॥ २६ ॥

इष्टज्याया यः पादश्चतुर्थांशस्तेन युतं व्यासार्धं यद्भवति तेन विभाजिताः । शेषं स्पष्टम् ।

अत्रोपपत्तिः । पूर्वप्रकारेण

$$\text{ज्या} = \frac{(१८० - \text{चा})\,\text{चा}\cdot\text{त्रि}}{१०१२५ - \frac{(१८० - \text{चा})\,\text{चा}}{४}} = \frac{\text{या}\cdot\text{त्रि}}{१०१२५ - \frac{\text{या}}{४}}$$ । यदि

$\text{या} = (१८० - \text{चा})\,\text{चा}$ ।

समच्छेदगमेन $\text{ज्या} \times ४०५०० - \text{ज्या}\cdot\text{या} = ४\,\text{त्रि}\cdot\text{या}$

$$\text{ततो या} = \frac{\text{ज्या} \times ४०५००}{\text{ज्या} + ४\,\text{त्रि}} = \frac{१०१२५\,\text{ज्या}}{\text{त्रि} + \frac{\text{ज्या}}{४}} = \text{न}$$

$= (१८० - \text{चा})\,\text{चा} = १८०\,\text{चा} - \text{चा}^{२}$

समशोधनेन $\text{चा}^{२} - १८०\,\text{चा} + \text{न} = 0$

$\therefore \text{चा} = ९० \pm \sqrt{९०^{२} - \text{न}}$

Digitized by Google

चाप:येंग्रास्यं चापं गृहीतं तेन चा = ९० - $\sqrt{९०^२ - ल}$

अत उपपन्नं सर्वम् ॥ २५-२६ ॥

इदानीमिष्टग्रहोदयिकात् मध्यात् स्पष्टात् यः करोतीत्यस्योत्तरमाह ।

इष्टौदयिकभुजान्तरमिनवत् स्फुटमध्यमान्तरकलाभिः ।
नाश्विन्यौदयिकेषु स्वचरप्राणैः स्वफलमिनवत् ॥ २७ ॥

यथा मध्यरव्युदयकालिका ग्रहा भुजान्तरेण स्फुटार्कोदयकालिका निरक्षे क्रियन्ते पुनरर्कचरप्राणैः स्वदेशे स्फुटार्कोदयकालिका क्रियन्ते । एवमिष्टमध्यस्फुटग्रहान्तरकलाभिस्तद्धुत्यासव इनवदिष्टौदयिकभुजान्तरं साध्यं तथेनवत् स्वचरप्राणैरिष्टग्रहचरासुभिः स्वचालनफलं साध्यं ततस्तत्संस्कारेण स्वदेशे स्पष्टेष्टग्रहोदयकाले ग्रहा भवन्तीति गोलयुक्त्या स्फुटम् । यद्याश्विन्यौदयिका भोदयकालिकाः स्पष्टग्रहा अपेक्षितास्तदा भस्य फलाभावाद्भुजान्तरं न भवतीति वेदितव्यम् ।

अत्र चतुर्वेदाचार्यस्य 'यद्याश्विन्यौदयिकास्तच्चरदलकर्म न कर्तव्यमत्राश्विनीग्रहणं मेषादिकविषुवदुपलक्षणार्थमन्यथा सर्वासामेव नक्षत्रयोगताराणां स्वचरदलघटिका भिन्नाः क्रान्तिवशात् स्वदेशे तदुदया अपि भिन्नाः स्युस्तस्मादाचार्येण यत् कल्पादौ नाक्षत्रं सावनं प्रवृत्तं तस्य चरदलकर्मनिषेधः कृतोऽन्यथाश्विनीयोगताराया युगादावुदयाभाव एव स्यादेवमन्यासां योज्यमिति' । इयं व्याख्या भुजान्तरं चरकर्मेति कर्मद्वयनिषेधकारिणी सा मम न सम्मता न ग्रहस्य भुजान्तरेऽन्वयो गोलयुक्तियुतो बुद्धिमता ज्ञेय इति ॥ २७ ॥

इदानीं स्वोच्चस्फुटैर्यो ग्रहं करोतीत्यस्योत्तरमाह ।

स्वोच्चादृ विशोध्य कृत्वा प्राग्वत् फलमृणधनं विपर्यस्तम् ।
कार्यमनष्टस्पष्टे पुनः पुनर्निश्चलो मध्यः ॥ २८ ॥

स्फुटग्रहं स्वोच्चाद्विशोध्य केन्द्रं कृत्वा प्राग्वत् फलं मान्दं शैघ्र्यं च साध्यम् । तदनष्टस्पष्टे पृथक्स्थापितस्पष्टग्रहे विपर्ययस्तमृणधनं कार्यं

यदि धनं तदा चरममृणं स धनं कार्यमित्यर्थः । एवं पुनः पुनरसकृत्तदा निश्चलः स्थिरीभूतस्तदा स एव मध्यो ज्ञेय इति ।

अत्रोपपत्तिः । स्पष्टीकरणविपरीतक्रियया सुगमा 'स्फुटग्रहं मध्यखगं प्रकल्प्य कृत्वा फले मन्दचले यथोक्ते' इत्यादि भास्करोक्तमेतदनुरूपमेव । अत्र केन्द्रक्रमयुत्या स्फुटग्रहोनं शीघ्रोच्चं स्फुटकेन्द्रं तत्तत्स्वज्यया स्फुटकेन्द्रज्या तदाऽन्यफलज्यया किं लब्धा सकृदेव स्फुटा शीघ्रफलज्या । तच्चापं शीघ्रफलं स्फुटं वास्तवमेव । अथाचार्योक्तस्पष्टीक्रियाक्रमतो यदा मन्दोच्चोनस्फुटग्रहकेन्द्रतः पुनः पुनस्तदेव मन्दफलमागच्छेत् तदैव क्रियावसानः । अथोपान्तिमस्पष्टग्रहाद्यन्मन्दफलं तदेवोपान्तिमसमान्त्यस्पष्टग्रहाद्यातो मन्दोच्चोनस्फुटग्रहकेन्द्रतः सकृदेव वास्तवं मन्दफलं भवति भास्करादिना व्यर्थमेवासकृद्विधिर्विहित इति सुधीभिर्भृशं विचिन्त्यम् ॥ २८ ॥

इदानीं ग्रहस्य सङ्क्रान्तेराद्यन्तौ यो वेत्ति तस्योत्तरमाह ।

मानार्धात् षष्टिगुणाद्भुक्तिहृताल्लब्धनाडिकादिलब्धेन ।
राश्यन्तात् प्रागादिः पश्चादन्तोऽर्कसङ्क्रान्तेः ॥ २९ ॥

लब्धेन नाडिकादिना राश्यन्तात् प्रागर्कसङ्क्रान्तेरादिः पश्चादन्तः समाप्तिः । शेषं स्पष्टम् ।

अत्रोपपत्ति । 'षष्टिघ्नबिम्बं ग्रहभुक्तिभक्तम्-'इत्यादिभास्करविधिना स्फुटा ॥ २९ ॥

इदानीं सङ्क्रान्तिकालमाह ।

सङ्क्रान्तिपुण्यकालो ग्रहलब्धं नाडिकादि तद्द्विगुणम् ।
स्नानजपहोमदानादिकोऽत्र धर्मो विशिष्टफलः ॥ ३० ॥

स्पष्टार्थम् ॥ ३० ॥

इदानीं भतिथि करणसन्धिमाह । अथादेवं भतिथिकरणाद्यन्तौ यो वेत्ति तस्योत्तरमाह ।

एवं नक्षत्रान्तात् तिथिकरणान्ताच्छशिप्रमाणार्धात् ।

षष्टिगुणाद्रविशशिनोर्भुक्त्यन्तरलब्धघटिकाभिः ॥ ३१ ॥

एवं शशिप्रमाणार्धात् शशिबिम्बार्धात् षष्टिगुणात् शशिभुक्तिहृता-ल्लब्धनाड्याऽऽदिना नक्षत्रान्तात् प्राक् तन्नक्षत्रप्रवेशः पश्चाच्च निर्गमः । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । 'शशितनुत्रिकलाभ्य रचन्द्रभुक्तये—' इत्यादिभास्करविधिना स्फुटा ॥ ३१ ॥

इदानीं विशेषमाह ।

सङ्क्रान्तिस्थो यावत् करोति मिश्रं फलं ग्रहस्तावत् ।
यस्मात् तस्माद्विष्टेराद्यन्तौ परिहरति लोकः ॥ ३२ ॥

यस्माद्यावद्ग्रहः सङ्क्रान्तिस्थस्तावदुभयो राश्योर्बिम्बैकदेशगतत्वान्मिश्रफलं करोति तस्माल्लोको जनो विष्टेर्भद्राया आद्यन्तौ शुभकर्मणि परिहरति यतस्तावत् तत्प्रवृत्तिरनिष्टाय भवति । आचार्यसमये विष्कम्भादिसप्तविंशतियोगानां प्रचारो नास्तीति प्रतिभाति । स्पष्टाधिकारे योगानयनाभावादिहापि तत्सन्ध्योरप्रतिपादनाच्च । आचार्यसमये व्यतिपातवैधृतयोरेव रविचन्द्रक्रान्तिसाम्येन महानिष्टोत्पादकत्वाच्चर्चाऽऽसीदत एवाग्रिमार्याभिस्तत्साधनं वक्ष्यतीति ॥ ३२ ॥

इदानीं यो व्यतिपाताक्रान्तौ वेत्तीत्यस्योत्तरं विवक्षुरादौ व्यतिपातलक्षणमाह ।

चक्रार्धेऽर्कशशियुतौ भिन्नायनयोरपक्रमसमत्वे ।
रविशशिनोः सममधुघृतयोगाद्विषदो व्यतीपातः ॥ ३३ ॥

अर्कशशियुतौ चक्रार्धे राशिषट्केऽर्थात् राशिषट्कासन्ने भिन्नायनयो रविशशिनोरपक्रमसमत्वे सममधुघृतयोगाद्विषदो व्यतीपातो भवति । यथा सममधुघृतयोगेन विषदः पदार्थविशेष उत्पद्यते तथा रविशशिनोः क्रान्तिसाम्येन जगति विषदोऽनिष्टफलदो व्यतीपातो विशेषेणात्यन्तं शुभफलं पातयति विनाशयतीति योगविशेष उत्पद्यते ॥ ३३ ॥

Digitized by Google

इदानीं वैधृतलक्षणमाह ।

चक्रे वैधृतमेकायनस्थयोः क्रान्तिजीवयोः साम्ये ।
इन्धनरविमणियोगादग्निवदूनाधिककलाभ्यः ॥ ३४ ॥

एवं रविशशियुतौ चक्रे राशिद्वादशकेऽर्थाद्राशिद्वादशकसमे च एकायनस्थयो रविशशिनोः क्रान्तिजीवयोः साम्ये चेन्धनरविमणियोगादग्निवद्वैधृतं भवति । यथा रविमणियोगतो दूरस्थेऽपीन्धनेऽग्निरुत्पद्यते तथा रवितो दूरेऽपि शशिनि क्रान्त्योः साम्यादग्निवद्वैधृतमुत्पद्यत इति । ऊनाधिककलाभ्य इत्यस्याग्रे सम्बन्ध इति ॥ ३४ ॥

इदानीं निमित्तकालज्ञानमाह ।

भुक्त्यैक्यलब्धदिवसै रवीन्दुपाता युतोनकाः स्वफलैः ।
अर्कक्रान्तिज्याधनुरिन्दोर्विक्षेपयुक्तोनम् ॥ ३५ ॥

यदा रविशशियोगो भार्धाच्चक्राच्च न्यूनो वाऽधिको भवति तदा न्यूनाधिककलाभ्यो भुक्त्यैक्येन रविशशिगतियोगेन ये लब्धा दिवसास्तैः स्वफलैः स्वचलनफलैर्न्यूने रवीन्दुपाता युता अधिके चोनाश्च भार्धकालिका वा चक्रकालिका रवीन्दुपाता भवन्ति । ततस्तात्कालिकार्कक्रान्तिज्याधनुरर्कक्रान्तिर्भवति । इन्दोः क्रान्तिज्याधनुस्तद्विक्षेपयुक्तोनं दिगैक्ये युतं दिग्भेदे हीनमेवं तत्क्रान्तिर्भवति ॥ ३५ ॥

इदानीं पातस्य भावाभावमाह ।

त्रिनवगृहेन्दुक्रान्तिर्मेषतुलादौ दिवाकरक्रान्तेः ।
ऊना यावदभावस्तावद्भावोऽन्यथाऽर्केन्द्वोः ॥ ३६ ॥

त्रिनवगृहेन्दुक्रान्तिर्द्वितुर्थपदोद्भवा क्रान्तिः सा मेषतुलादौ दिवाकरक्रान्तेः प्रथमतृतीयपदोद्भवक्रान्तेर्यावदूना तावत् क्रान्तिसाम्याभावोऽन्यथाऽर्केन्द्वोः क्रान्तिसाम्यभावो वेदितव्य इति ।

अत्रोपपत्तिः । अत्र 'स्वायनसन्धाविन्दोः क्रान्तिस्तत्कालभास्करक्रान्तेर्यावदूना तावत् क्रान्तिसाम्याभावो नोक्तयुक्त्या सिध्यत्यत आचार्योक्तं न समीचीनम्—इति भास्करः स्वपाताधिकारे व्यलिखत् । अथ यदि त्रिन-

Digitized by Google

वधहेन्दुक्रान्तिरित्यनेन चन्द्रस्य परमा क्रान्तिर्गृह्यते तदाऽऽचार्योक्तं भास्करसमं शोभनमेव । अत्र चतुर्वेदाचार्यैः स्ववासनायां 'मिथुनान्तगस्येन्दोरवश्यमेव तत्क्रान्तिः परमा भवति' । क्रान्तिः परमा भवतीत्यनेन मिथुनान्तेन्दु चन्द्रायनसन्धिरिति स्फुटम् । यद्यपि ते चन्द्रगोलायनसन्धी न साधितौ तथाऽपि तदुपपत्तिस्तदुक्तेनैव विलिखितास्तीति सिद्धान्तविदां स्फुटमेव ॥ ३६ ॥

इदानीं विशेषमाह ।

व्यतिपातोऽपक्रमयोर्दिक्साम्यो वैधृतो दिगन्यत्वे ।
अधिको न्यूनः कल्प्यो दिग्भेदेऽपक्रमः शशिनः ॥ ३७ ॥

पूर्वार्धं स्पष्टं भास्करलक्षणमेतदनुरूपमेव 'व्यतिपातोऽयनभेदे गोलैक्यत्वे' इत्यादि । अथ यदि शशिनश्चन्द्रस्यापक्रमो दिग्भेदे तुल्यत्वार्थोऽथवा चन्द्रस्यानीया क्रान्तिरेव दिग्भेदे शरादेव तुल्यति तदा यदि चन्द्रस्यापक्रमो रवेरपमान्न्यूनस्तदा तु न्यून एव परन्तु तदा यदि सोऽपमो रवेरपमादधिकस्तदापि न्यून एव कल्प्यस्तस्य चयत्वादिति ।

अत्रोपपत्तिः । व्यतिपातवैधृतपरिभाषयैव स्फुटा ॥ ३० ॥

इदानीं पातस्य गतागतमाह ।

मेषतुलादाविन्दोरपक्रमे रव्यपक्रमादूने ।
एष्यत्यधिकोऽतीतो विपरीतः कर्कमकरादौ ॥ ३८ ॥

रव्यपक्रमादिन्दोर्मेषतुलाद्योजपदस्थेऽपक्रमे न्यूने पात एष्यति भविष्यति । अधिके चातीतोऽतीत इति वेदितव्यम् । कर्कमकरादौ समपदस्थे विध्वपक्रमे च विपरीतो ज्ञेयः । ऊनेऽतीतोऽधिके भविष्यति ।

अत्रोपपत्तिः । अत्र चन्द्रस्य गोलायनसन्ध्यन्तं यदि पदं गृह्यते तदा गतागतसम्भवो गोलयुक्त्या समीचीनो यतस्तदैवौजपदस्थे विध्वपक्रमे न्यूनेऽग्रे चालनेन रविक्रान्तिसमश्चन्द्रापमो भविष्यति समपदस्थे च पृष्ठतश्चालनेन रविक्रान्तिसमो भवति । ओजपदेऽग्रे क्रान्तिरुपचीयते समपदे च पृष्ठत उपचीयत इति गोलयुक्त्या स्फुटम् । अत एव

भास्करः 'सौम्यपदेन्दुक्रान्तिर्महती सूर्यापमाल्लघुः समजा । यदि भवति तदा ज्ञेयो यातः पातस्तदन्यथा गम्यः-'इति ॥ ३८ ॥

अथ यस्मिन् काले रविशशियोगस्तस्कार्धं वा चक्रं तस्मात् कालाद्गतगम्यस्य क्रान्तिसाम्यकालस्य परिज्ञानमाह ।

क्रान्त्योर्युतिरन्यदिशोरेकदिशोरन्तरं व्यतीपाते ।
एकदिशोर्युतिरन्तरमन्यदिशोर्वैधृते प्रथमः ॥ ३९ ॥
एवं द्वितीयराशियुतहीनैरिष्टनाडिकास्वफलैः ।
एष्यदतीतं वा यदि राशिद्वयमपि तदन्तरकम् ॥ ४० ॥
छेदोऽन्यथा तदैक्यं घातस्त्वेष्टघटिकाप्रथमराश्योः ।
फलघटिकाभिर्मध्यं द्वयोरपि प्रथमराशिवशात् ॥ ४१ ॥

द्वयोर्व्यतिपातवैधृतयोः । शेषं स्पष्टम् । 'तत्क्रान्त्योरेकदिशोरन्तरमैक्यं विभिन्नदिशोः-'इत्यादि भास्करोक्तमेतदनुरूपमेव ।

अत्रोपपत्तिः । पाताधिकारे भास्करोक्तैव ज्ञेया ॥ ३९-४१ ॥

इदानीं पातायन्तकालमाह ।

तात्कालिकैर्ग्रहैरसकृदिष्टघटिकाफलोनयुक्तैस्तैः ।
प्राग्वत् प्रथमश्छेदः प्रमाणयोगार्धलिप्तानाम् ॥ ४२ ॥
इष्टघटिकागुणानामसकृत् फलनाडिकाभिराद्यन्तौ ।
व्यतिपातवैधृतानयनमन्यतन्त्रेषु न प्राग्वत् ॥ ४३ ॥

प्रथमः साध्यः प्राग्वच्छेद इष्टघटिकागुणानां प्रमाणयोगार्धलिप्तानां मानैक्यार्धकलानाम् । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । यदा स्पष्टक्रान्त्यरं मानैक्यार्धसमं तदा पातादिः पातान्तश्च बिम्बैकदेशक्रान्त्योः साम्यात् । अतोऽनुपातो यदि छेदसमक्रान्त्यन्तरेणेष्टघटिकास्तदा मानैक्यार्धेन किं लब्धा असकृद्विधिना नाड्यः स्फुटा भवन्तीति ॥ ४२-४३ ॥

इदानीं कियत्कालपर्यन्तं पातफलमित्याह ।

रविबिम्बमेकमार्गाच्छशिबिम्बापक्रमे भवति यावत् ।

तावत् फलं तदुक्तं तदभावे तत्फलाभावः ॥ ४४ ॥

एकमार्गादेकाहोरात्रावधावच्छुययपक्रमे रविविम्बं भवति । यथा- यावत् क्रान्त्योर्विवरं मानैक्यार्धादल्पं भवति तावद्विम्बैकदेशजक्रान्त्योः साम्यात् तत् फलमुक्तं महर्षिभिरतस्तदभावे तत्फलाभावो वेदितव्य इति । अतो यावत् क्रान्तिसाम्यं तावदेव तस्य फलं वाच्यं तेन यस्मिन् दिने पातस्तत् समग्रं दिनं न दुष्टमिति फलितम् ॥ ४४ ॥

इदानीं कक्षायां विशेषमाह ।

ग्रहकक्ष्ययैव तुल्या कक्षा तन्मन्दपातानाम् ।
यस्मात् तस्मान्न पृथक् कक्षा कल्प्या चलोच्चाद्या ॥ ४५ ॥

स्पष्टार्थम् । 'ग्रहस्य कक्षैव हि तुङ्गपातयोः–'इत्यादि भास्करोक्त- मेतदनुरूपमेव ॥ ४५ ॥

इदानीमध्यर्धार्धैकभोगनक्षत्राणामानयनं विवक्षुरादौ तदारम्भे कारणमाह ।

पौलिशरोमकवासिष्ठसौरपैतामहेषु यत् प्रोक्तम् ।
तन्नक्षत्रानयनं नार्यभटोक्तं तदुक्तिरतः ॥ ४६ ॥

पौलिशरोमकवासिष्ठसौरपैतामहेषु पञ्चसिद्धान्तेषु यन्नक्षत्रा- नयनं सूक्ष्मं प्रोक्तं तदार्यभटोक्तं नास्ति । अतस्तदुक्तिरत्रावश्यकाऽस्ति । तच्च नक्षत्रानयनमारभ्याहमित्यर्थः ।

अत्र चतुर्वेदाचार्यः । 'पञ्चसिद्धान्तानुसारेण मयेतदुच्यमानं नक्ष- त्रानयनमुपनिबद्ध्यते स्वमनीषिकयेत्यर्थः' ।

इदानीमध्यर्धादीनां संज्ञामाह ।

अध्यर्धानि भवन्ति षड्नक्षत्राण्युडूनि षडर्धानि ।
पञ्चदश समक्षेत्राण्यभिजिद्भोगो भवत्येकः ॥ ४७ ॥

षट् नक्षत्राण्यध्यर्धभोगानि सार्धैकभोगानि । षडुडूनि नक्षत्राण्य- र्धान्यर्धभोगानि । पञ्चदश नक्षत्राणि समक्षेत्राण्येकभोगानि । एवं सप्त- विंशतिनक्षत्रेभ्योऽपरश्चैकोऽभिजिद्भोगो भवति वक्ष्यते इति ॥ ४७ ॥

इदानीमध्यर्धार्धादिभोगानि नक्षत्राण्याह ।

केशादित्यविशाखाप्रोष्ठपदार्यम्णवैश्वदेवानि ।
षट् षड्ज्येष्ठाभरणीस्वात्यार्द्रावारुणाश्लेषाः ॥ ४८ ॥
पञ्चदशात्रानुक्तान्येकोऽभिजिदुक्त ऋक्षभोगोऽन्यः ।
यस्मात् तन्नक्षत्रं दुरधिगमं मन्दबुद्धीनाम् ॥ ४९ ॥

यस्माद्भिन्नभोगानि नक्षत्राणि सन्ति तस्मात् नक्षत्रं नक्षत्रमानं मन्दबुद्धीनां गणकानामार्यभटादितन्त्रेष्वनुक्तत्वाद्दुरधिगमं दुर्गममिति । शेषं स्पष्टम् । 'स्थूलं कृतं भानयनं यदेतज्ज्योतिर्विदां संव्यवहारहेतोः-'इत्यादि भास्करोक्तमेतदनुरूपमेव ॥ ४८-४९ ॥

इदानीमध्यर्धार्धादीनां मानान्याह ।

अध्यर्धार्धसमक्षेत्राणां मध्यगतिलिप्तिकाः शशिनः ।
अध्यर्धार्धैकगुणा भभोगलिप्तास्तदैक्योनाः ॥ ५० ॥
मण्डललिप्ताः शेषोऽभिजितो भोगः शशाङ्कभगणा वा ।
त्रिघनगुणाः संशोध्याः कल्पदिनेभ्यो यदवशेषम् ॥ ५१ ॥
तद्भगणैर्दिनभोगोऽभिजितो भोगो भभोगलिप्तोनाः ।
भानि ग्रहभुक्तकला गतगम्या गतिहृता दिवसाः ॥ ५२ ॥

शशिनश्चन्द्रस्य मध्यगतिकला अध्यर्धार्धैकगुणास्तदा क्रमेणाध्यर्धार्धसमक्षेत्राणां भभोगलिप्ता भवन्ति । सार्धैकगतिकला अध्यर्धभोगकलाः । अर्धगतिकला अर्धभोगकलाः । गतिकलाश्चैकभोगकलाः । सर्वभोगकलायोगोना मण्डललिप्ताश्चक्रकलाः शेषोऽभिजितो भोगः स्यात् । अथ प्रकारान्तरेणाभिजिद्भोगमाह शशाङ्कभगणा वेति । कल्पचन्द्रभगणाः सप्तविंशत्या गुणाः कल्पदिनेभ्यः कल्पकुदिनेभ्यः संशोध्याः । शेषमभिजितः कल्पभगणाः कल्प्याः । तद्भगणैर्या दिनभोगः कलात्मिका दिनगतिः स्य तु सोऽभिजितो भोगो भवेत् । अथ नक्षत्रानयनमाह । ग्रहभुक्तकला अश्विन्यादिभभोगलिप्तोना भानि भवन्ति । ग्रहभुक्तकलाभ्यो यावतां भानां भोगकलाः शुद्धास्तावन्ति गतभानि । शेषाः कलाश्च वर्त्तमानन-

Digitized by Google

ग्रहस्य गतकलास्तास्तद्भोगकलाभ्यः शुद्धा गम्यकला भवन्ति । ततो यद्यत्र गत्यैको दिवसस्तदा गतगम्यकलाभिः किमित्यनुपातेन गतगम्या दिवसा भवन्ति ।

अत्रोपपत्तिः । अहश्चर्धभोगकलानामैक्यम् = $\frac{३ च ग}{२}$ × ६ = ९ चग

ब्रह्मधंभोगकलानामैक्यम् = $\frac{चग}{२}$ × ६ = ३ चग

पञ्चदशैकभोगकलानामैक्यम् = १५ चग = १५ चग

सर्वभोगकलाः = २७ चग

चक्रकलाभ्यः शुद्धाः सर्वयोगकला जाता अभिजिद्भोगकलास्तद्दिनगतिः = चक – २७ चग । इयं कल्पकुदिनगुणा चक्रकलाभक्ता जाताः कल्पेऽभिजितो भगणाः = कक – २७ कचभ । शेषोपपत्तिर्भास्करसूक्ष्मनक्षत्रानयनविधिना स्फुटा ॥ ५०–५२ ॥

इदानीं यैरभिजिद्भोगो नोक्तस्तान् निन्दति ।

भफलं प्रोक्तमभिजितो मङ्गलयात्रासु संहिताकारैः ।
यैस्तद्भोगो नोक्तस्ते गणकाः संहिताबाह्याः ॥ ५३ ॥

स्पष्टार्थम् ॥ ५३ ॥

इदानीमार्यभटं दूषयति ।

अध्यर्धादिक्षेत्राणि संहितास्वभिहितानि गर्गाद्यैः ।
यस्माद्दूनि तस्मादार्यभटोक्तं तदानयनम् ॥ ५४ ॥

यस्माद्गर्गाद्यैः स्वसंहितास्वध्यर्धार्धसमक्षेत्राण्युडून्यभिहितानि तस्मादिदं सूक्ष्मनक्षत्रानयनमेव समीचीनमतः आर्यभटोक्तं तदानयनं स्थूलनक्षत्रानयनं न समीचीनमित्यभ्याहार्यम् ॥ ५४ ॥

इदानीमध्यायोपसंहारमाह ।

आर्याणां पञ्चाशच्चतुर्भिरधिका चतुर्दशोऽध्यायः ।
स्फुटगत्युत्तरमन्यान् दिशाऽनयाऽभ्युपगमेत् प्रश्नान् ॥ ५५ ॥

इति स्फुटगत्युत्तराध्यायश्चतुर्दशः ॥ १४ ॥

अनया दिशाऽनेन पूर्वप्रतिपादितमार्गेणान्यान् प्रश्नान् गणकोऽभ्युपगमेज्जानीयादिति । शेषं स्पष्टार्थम् ॥ ५५ ॥

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितः स्पष्टगतौ सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्तनूतनतिलके स्फुटगत्युत्तरो नाम चतुर्दशोऽध्यायः ॥ १४ ॥

अथ त्रिप्रश्नोत्तराध्यायः ।

तत्रादौ दिक्प्रश्नमाह ।

योऽङ्कः पूर्वापरयोस्तुल्यच्छायाङ्गुलाग्रयोर्बिन्दू ।
वीक्ष्य क्रान्त्यक्षांशैर्विना दिशो वेत्ति गणकः सः ॥ १ ॥

यो दिवसस्य पूर्वापरकपालयोस्तुल्यच्छायाङ्गुलाग्रयोः । जलसमीकृतक्षितिगते वृत्ते पश्चिमकपाले केन्द्रस्थशङ्कोश्छायाग्रं यत्र विशति पूर्वकपाले च यतो निःसरति तौ बिन्दू वीक्ष्य क्रान्त्यक्षांशैर्विना दिशः पूर्वापरादीन् वेत्ति स एव गणक इत्यहं मन्य इति ॥ १ ॥

इदानीमन्यान् प्रश्नानाह ।

त्रिच्छायाग्रज्ञो यः क्रान्त्यक्षार्कैर्विना दिशो भ्रमणम् ।
छायाग्रस्य दिनार्धच्छायां वा वेत्ति गणकः सः ॥ २ ॥

यस्त्रिच्छायाग्रज्ञः क्रान्त्यक्षार्कैर्विना दिशो वेत्ति । छायाग्रस्य भ्रमणं भाभ्रमरेखां वेत्ति । वा दिनार्धच्छायां मध्याह्नच्छायां वेत्ति स एव गणकः । एवमत्र प्रश्नत्रयम् ॥ २ ॥

इदानीमन्यान् प्रश्नानाह ।

यश्छायाग्रं दृष्ट्वा क्रान्त्यक्षज्ञो दिशो विजानाति ।
शङ्कुच्छायाभ्रमणे दिग्ज्ञो वा वेत्ति गणकः सः ॥ ३ ॥

यः क्रान्त्यक्षज्ञश्छायाग्रमेकमेव दृष्ट्वा दिशो विजानाति । वा यो दिग्ज्ञः शङ्कुभ्रमणं वा छायाभ्रमणं वेत्ति स एव गणकः । एवमत्र प्रश्नत्रयम् ॥ ३ ॥

इदानीमन्यान् प्रश्नानाह ।

दृष्ट्वा विषुवच्छायां लम्बाक्षज्ये करोति यो बहुधा ।
मध्यच्छायार्कज्ञोऽक्षांशान् यो वेत्ति गणकः सः ॥ ४ ॥

स्तेः । ननु त्वगेवैकमिन्द्रियं तत्रैव ज्ञानं जायते गोलकाद्यवच्छेदकभेदेन चाक्षुषादिभेदः स्मरणादिकं प्रति गोलकादीनां नियामकता नास्तीति । न च चक्षुर्गोलकाद्यवच्छेदेनापि त्वाचोदयात् तत्र चाक्षुषत्वादिसाङ्कर्यमिति वाच्यम् । शरीरावच्छेदेन त्वग्विषययोः संयोग एव त्वाचजनना-चक्षुर्गोलकादिवर्त्मना निर्गम्य विषयसम्बन्धे चाक्षुषादिकं जन्यत इति चेत् । न । कुष्ठाद्युपहतत्वचश्चाक्षुषाद्युत्पादानुपपत्तेः । न च कुष्ठिनां शरीरावच्छेदेन त्वग्विषयसम्बन्धानां ज्ञानानुपधायकत्वं शरीरस्यैव दुष्टत्वादिति कल्प्यत इति वाच्यम् । गोलकाद्यवच्छेदकमन्तर्भाव्य कार्यकारणभावे गौरवादिति । एवं बुद्धिर्नार्थस्य गुणः तद्विनाशे ऽपि स्मरणानुमानादेरुत्पत्तेः । अपिकाराद् भाविवर्तमानयोः परिग्रहः ॥ १९ ॥

नापि मनस इत्याह ।

युगपज्ज्ञानानुपलब्धेश्च मनसः[१] ॥ २० ॥

पूर्वसूत्रस्थेन नकारेण मनस इत्यस्य सम्बन्धः । चकारोऽप्यर्थः । तेन नापि मनस इत्यर्थः । न मनस इत्यपि क्वचित् पाठः । हेतुमाह । युगपज्ज्ञानानुपलब्धेः । कायव्यूहस्थले युगपन्नानाशरीरावच्छेदेन ज्ञानानुत्पादप्रसङ्गान्मनसोऽणुत्वेन नानाशरीरसम्बन्धस्यैकदा असम्भवात् ॥ २० ॥

(१) युगपज्ज्ञेयानुपलब्धेश्च न मनस इति पूर्वसूत्रस्थस्य चकारस्यार्थे भाष्यकारेण युगपज्ज्ञेयोपलब्धेश्च योगिन इति वा चार्थ इति विचारयिष्यमाणत्वादिति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः । युगपज्ज्ञेयानुपलब्धेश्च न मनस इति पाठोऽन्यत्रापि ।

शङ्कते ।

तदात्मगुणत्वे ऽपि तुल्यम्[१] ॥ २१ ॥

तस्या बुद्धेरात्मगुणत्वे ऽपि तुल्यम् । कायव्यूहस्थले युगपज्ज्ञानानुपपत्तिस्तुल्येत्यर्थः ॥ २१ ॥

समाधत्ते ।

सन्निकर्षाभावात् तदनुत्पत्तिः[२] ॥ २२ ॥

सन्निकर्षस्यात्मशरीरसम्बन्धस्याभावादेव तदनुत्पत्तिः तत्तच्छरीरावच्छेदेन ज्ञानानुत्पत्तिः । अत्र तु कायव्यूहस्थले आत्मनो विभुतया नानाशरीरेष्वेकदा सम्बन्धादेव नानुपपत्तिरिति भावः । केचित्तु युगपज्ज्ञानानुपलब्धेर्युगपच्चाक्षुषादिनानाज्ञानानुत्पादात् । तथा च मनसो ज्ञानाश्रयत्वे ज्ञानादेः प्रत्यक्षतासम्पादनाय मनसो विभुत्वं कल्प्यमिति युगपन्नानाज्ञानोत्पादप्रसङ्ग इति भावः । शङ्कते । तदात्मगुणत्वे ऽपि तुल्यम् । अस्यार्थस्तु सुगमः । उत्तरमाह । सन्निकर्षाभावात् तदनुत्पत्तिः । सन्निकर्षाभावाद् युगपन्नानेन्द्रियैर्मनःसन्निकर्षाभावादित्याहुः । यत्तु युगपज्ज्ञानानुपलब्धेर्हेतोः सिद्धस्य मनसो न कर्तृत्वं धर्मिग्राहकमानेन करणत्वेनैव सिद्धेरिति । तन्न । तदात्मगुणत्वे ऽपि तुल्यमित्याशङ्कासूत्रानुत्थितेरिति ॥ २२ ॥

---

(१) तदात्मगुणत्वे ऽपि तुल्यमिति सूत्रमेव विनाशकारणानुपलब्धेश्चेत्यादिसूत्रे तदात्मगुणत्वे ऽपि तुल्यमित्येतदनेन समुच्चीयत इति भाष्यस्य भविष्यत्वादिति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः । विनाशकारणानुपलब्धेरित्यादिसूत्रव्याख्यावसरे तात्पर्यटीकाकृता च पूर्वपक्षसूत्रे चकारः पूर्वपूर्वपक्षसूत्रापेक्षयेत्याह । तदात्मगुणत्व इतीत्युक्तम् । तत्रत्यवार्त्तिके च तदात्मगुणत्वे ऽपि तुल्यमित्येतदनेन समुच्चीयत इति ।

(२) इन्द्रियैर्मनसः सन्निकर्षाभावात् तदनुत्पत्तिरित्यन्यत्र पाठः । इदं न्यायसूचीनिबन्धे वर्तते ।

आक्षिपति ।

नोत्पत्तिकारणानुपदेशात्[१] ॥ २३ ॥

न बुद्धिरात्मगुण उत्पत्तिकारणानुपदेशाद् बुद्ध्युत्पत्तौ कारणस्याकथनात् । आत्ममनःसंयोगस्य कारणत्वे ज्ञानस्य सार्वदिकत्वप्रसङ्ग इति भावः ॥ २३ ॥

बाधकमप्याह ।

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः[२] ॥ २४ ॥

बुद्धेरात्मगुणत्वे तद्विनाशकारणानुपलब्धेस्तस्या बुद्धेर्नित्यत्वप्रसङ्ग इत्यर्थः । आत्मनो नित्यत्वव्यवस्थापनेन प्रसिद्धस्य गुणनाशहेतोराश्रयनाशस्यात्रासम्भवादिति भावः ॥ २४ ॥

उत्तरयति ।

अनित्यत्वग्रहणाद् बुद्धेर्बुद्ध्यन्तराद्विनाशः शब्दवत्[३] ॥ २५ ॥

बुद्धेरनित्यत्वग्रहणादुत्पादविनाशयोरानुभविकत्वात् । तत्रोत्पत्तिहेतूनां विषयेन्द्रियसम्बन्धात्ममनोयोगेन्द्रियमनोयोगादीनां प्रागुक्तत्वात् प्रसिद्धत्वाच्च तदनुक्त्वा विनाशकारणं दर्शयति । बुद्धेति । बुद्ध्यन्तराद्विनाशः स्वोत्तरोत्पन्नबुद्ध्या विनाशः कल्प्यते । ननु चरमबुद्धेः

(१) नोत्पत्तिकारणानपदेशात् कस्मादेवोत्पन्नतामिति न कारणमपदिश्यत इति सूत्रार्थ इति वार्त्तिकम् । अनपदेशादिति पाठोऽप्यत्रापि ।

(२) विना-सूः । अत्र पूर्वपक्षसूत्रे चकारः पूर्वपूर्वपक्षसूत्रापेक्षयेति तात्पर्यटीका ।

(३) इदं न्यायसूचीनिबन्धे वर्तते । अनित्यत्वग्रहणादिति पाठः क्वचित् ।

केन नाश इत्यत आह । शब्दवदिति । शब्दस्य स्वोत्तरोत्पन्नशब्दनाश्यत्वं चरमशब्दस्य स्वस्मादेव नाशस्तेन तस्य क्षणिकत्वमप्युच्यते । यदि च क्षणिकपदार्थस्वीकारोऽपसिद्धान्तस्तदा निमित्तनाशात् कालविशेषाददृष्टविशेषाद्वा चरमशब्दनाशस्तथा चरमबुद्धिनाशोऽपि । वस्तुतो बुद्धिनाशं प्रति स्वोत्तरोत्पन्नविशेषगुणत्वेनैव हेतुत्वाच्चरमबुद्धेः संस्कारादिनैव नाश इति भावः ॥ २५ ॥

ननु बुद्धेरात्मगुणत्वे संस्कारमनोयोगयोः सत्त्वात् स्मृतीनां पूर्वानुभूतयावद्वस्तुविषयकत्वं स्यादित्यत्र कस्यचित् समाधानं दूषयितुमाह ।

ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्न युगपदुत्पत्तिः(१) ॥ २६ ॥

ज्ञायतेऽनेनेतिव्युत्पत्त्या ज्ञानपदं संस्कारपरम् । तत्समवेतो विषयतया तत्सम्बद्धः तद्विषय इति यावत् । तदात्मको य आत्मप्रदेश आत्मसम्बन्धी तदवच्छेदेन सन्निकर्षादित्यर्थः । तथा च यद्विषयावच्छेदेनात्ममनोयोगो वर्तते तद्विषयस्यैव स्मरणं न तु सर्वस्येति भावः ॥ २६ ॥

मतमिदं दूषयति ।

नान्तःशरीरवृत्तित्वान्मनसः(२) ॥ २७ ॥

उक्तसमाधानं न शरीरवृत्तित्वाच्छरीरावच्छिन्नात्मसम्बन्धान्मनसः । स्मृतिजनकत्वादिति शेषः । तथा च मनसोऽणुतया शरीरावच्छेदेन विषयावच्छेदेन च युगप-

(१) इदं न्यायसूचीनिबन्धे वर्तते ।

(२) इदमपि पूर्ववत् ।

दात्ममनोयोगासम्भवात् विषयावच्छिन्नात्ममनोयोगो न हेतुर्येन तज्ज्ञाननियमः स्यादिति भावः । इदमुपलक्षणम् । विषयावच्छेदेन मनोयोगस्य हेतुत्वकल्पनेऽपि नोक्तदोषवारणं विषयविशेषावच्छेद एव नियामकाभावात् । एवं युगपज्ज्ञानाविषयावच्छेदेन मनोयोगासम्भवात् समूहालम्बनस्मरणं कदापि न स्यादिति ॥ २७ ॥

शङ्कते ।

साध्यत्वादहेतुः[1] ॥ २८ ॥

शरीरावच्छिन्नात्ममनोयोगो न हेतुः साध्यत्वादसिद्धत्वान्मानाभावादिति यावत् ॥ २८ ॥

शङ्कां निरस्यति ।

स्मरतः शरीरधारणोपपत्तेरप्रतिषेधः[2] ॥ २९ ॥

उक्तप्रतिषेधो न युक्तः स्मरतः शरीरान्तर्वर्तिमनस एव । शरीरधारणस्योपपत्तेरन्यथा मनसो बहिर्भावे शरीरावच्छिन्नमनोयोगाभावे प्रयत्नाभावे शरीरधारणं न स्यादिति भावः ॥ २९ ॥

पुनः शङ्कते ।

न तदाशुगतित्वान्मनसः[3] ॥ ३० ॥

न तच्छरीराधारणं मनस आशुगतित्वात् । शरीरे शीघ्रमेव परावृत्तेरिति भावः ॥ ३० ॥

---

(१) इदमपि पूर्वपूर्ववत् । साध्य-तुः इति तात्पर्यटीका ।

(२) परिहारः । स्मर-धः इति तात्पर्यटीका । सिद्धान्तसूत्रमिति वृत्तिकृतः । न्यायसूचीनिबन्धेऽपीदं वर्तते ।

(३) पुनश्चोद्यम् । न त-सः इति तात्पर्यटीका । न्यायसूचीनिबन्धेऽपीदं वर्तते ।

दूषयति ।

न स्मरणकालानियमात्[१] ॥ ३१ ॥

न मनस आशुगतित्वेन शरीरधारणसम्पादनं स्मरणकालानियमात् । तथा च कदाचित् स्मरणधारासम्भवेन तदानीं शरीरे मनःपरावृत्त्यभावेन शरीरधारणं न स्यादिति भावः ॥ ३१ ॥

कस्यचिद् दूषणमाह ।

आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेषः[२] ॥ ३२ ॥

आत्मप्रेरणेन यदृच्छया ज्ञतया च न संयोगविशेषः न बहिःप्रदेशे विषयेण मनःसंयोगविशेषः । सम्भवतीति शेषः । तत्रात्मप्रेरणं स्मरणीयज्ञानं तच्च स्मरणात् पूर्वं नास्तीति मनसो बहिःप्रदेशगमनं तेन न सम्भवतीति । एवं यदृच्छा आकस्मिकत्वम् । मनोगमनस्याकस्मिकत्वे जगत एवाकस्मिकत्वापत्तिः । ज्ञता ज्ञातृता सा च मनसो दूषितैव ॥ ३२ ॥

एतद्दूषणमुद्धरति ।

व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम्[३] ॥ ३३ ॥

व्यासक्तमनसो नृत्यादिकं कुर्वतः । पादव्यथनेन यः संयोगविशेषः पादावच्छेदेन मनःसंयोगस्तेन विषयमनः-

(१) परिहारः । न स्मर-त् इति तात्पर्यटीका । न्यायसूचीनिबन्धे ऽप्येवं वर्तते ।

(२) एकदेशिमतमुपन्यस्यति । आत्म-षः इति तात्पर्यटीका । न्यायसूची निबन्धे ऽप्येवं वर्तते ।

(३) दूषयति । व्यास-नम् इति तात्पर्यटीका । एवं न्यायसूचीनिबन्धे वर्तते ।

Digitized by Google

संयोगः समान इत्यर्थः । अन्यथा पादावच्छेदेन मनोयोगेऽप्येतद्दोषः स्यात् तत्रादृष्टविशेषाधीनत्वकल्पनेन दोषोद्धारे ऽत्रापि तथाकल्पनेन दोषवारणादिति भावः ॥ ३३ ॥

स्मरणायौगपद्यं स्वयमुपपादयति ।

प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावाद् युगपदस्मरणम्[१] ॥ ३४ ॥

प्रणिधानं चित्तैकाग्र्यं स्मरणेच्छेति यावत् । लिङ्गादिज्ञानानामित्यत्रादिपदं ज्ञानपदोत्तरं योजनीयम् । तेन लिङ्गज्ञानादीनामित्यर्थः । लिङ्गज्ञानमुद्बोधकज्ञानपरम् । आदिपदेनोद्बोधकेच्छासंस्कारादिपरिग्रहः । अयुगपद्भावात् क्रमेणोत्पादात् । युगपदस्मरणं क्रमेण स्मरणम् । यदा च नानाविषयोद्बोधकमेकदा तदा तावद्विषयकमेकं स्मरणं जायत एव यथा पदज्ञानादाविति । उद्बोधकानि फलबलकल्प्यानि । गत्यन्तरविरहेण तेषामननुगतकारणतापि स्वीकार्येति । केचित्तु लिङ्गमुद्बोधकं तच्च क्वचिज्ज्ञानं क्वचिदिच्छादि । आदिज्ञानं कारणीभूतज्ञानं संस्कारकारणीभूतज्ञानं तज्जन्यसंस्कारो वेत्यर्थ इत्याहुः । वस्तुतो लिङ्गं व्याप्यं तदादिज्ञानानामित्यर्थः । आदिपदग्राह्यं वक्ष्यते । स्वरूपसदुद्बोधकानां ज्ञानभिन्नानां बहुवचनस्वरसाद्भाभः । बहुवचनान्ता गणस्य संसूचका इतिन्यायात् ॥ ३४ ॥

(२)प्रसङ्गादिच्छादीनामात्मगुणत्वं व्यवस्थापयति । ज्ञस्येच्छेत्यादि । यद्वा इच्छाद्वेषयोरनात्मगुणत्वे बुद्धेरा-

(१) स्मरणायौगपद्यं स्वयमुपपादयतीत्येतदवतरणिका वृत्तिकारैर्दत्ता । इदं न्यायसूचीनिबन्धे वर्तते ।

(२) अत्र न्यायसूत्रोद्धारे प्रातिभवत्तु प्रणिधानाद्यनपेक्षे स्मार्ते यौगपद्यप्रसङ्ग इत्येकमधिकं सूत्रं दृश्यते । तच्च तात्पर्यटीकायां प्रातिभवदित्येतिप्रतीकधारणाद्यभावाद् वृत्तिकारैरव्याख्यातत्वात् न्यायसूचीनिबन्धे विरहाच्च भाष्यमिति सम्भाव्यते ।

त्मगुणत्वं न सम्भवति ज्ञानस्य सामानाधिकरण्येन तत्कारणत्वादित्यत इच्छादीनामपि तत् साधयति ।

ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः[1] ॥ ३५ ॥

ज्ञस्य ज्ञानाश्रयस्यात्मनः । आरम्भनिवृत्त्योः प्रवृत्तिनिवृत्त्योः । इच्छाद्वेषनिमित्तत्वादिच्छाद्वेषकारणकत्वात् । तथा च प्रवृत्तिं प्रतीच्छाया निवृत्तिं प्रति द्वेषस्य सामानाधिकरण्यप्रत्यासत्त्या हेतुत्वेन प्रवृत्तिनिवृत्त्योरनुभवसिद्धत्वेन च ज्ञस्येच्छाद्याश्रयत्वम् । इत्थं च ज्ञानेच्छाकृतिद्वेषनिवृत्तीनामात्मगुणत्वं लब्धमिति भावः । एवं संस्कारोऽनुभवेन कालान्तरे स्मृतौ जननीयायां द्वारत्वेन कल्प्यते सोऽप्यात्मनिष्ठः सामानाधिकरण्येन ज्ञानजन्यत्वादिति ॥ ३५ ॥

चार्वाकः शङ्कते ।

तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः[2] ॥ ३६ ॥

तयोरारम्भनिवृत्त्योर्लिङ्गं कार्यतया ज्ञापकं चेष्टात्मकं यत्र शरीरे तत्त्वात् । पार्थिवाद्येषु शरीरेषु इच्छाद्वेषयोरप्रतिषेधः । तत्समानाधिकरणतया ज्ञानस्यापि शरीरधर्मत्वमिति भावः ॥ ३६ ॥

समाधानार्थं प्रतिबन्दिमाह ।

परश्वादिष्वारम्भनिवृत्तिदर्शनात्[3] ॥ ३७ ॥

---

(१) ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः । ज्ञातुरेवेच्छादय इति सूत्रार्थ इति वार्त्तिकम् । आरम्भनिवृत्ती प्रवृत्तपे ज्ञानसमानाधिकरणे एवेति इत्यंत्वादिसूत्रस्यार्थ इति न्यायनिबन्धप्रकाशे वर्धमानोपाध्यायाः ।

(२) तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः । प्रवृत्तिनिवृत्तिभ्यां सामानाधिकरण्यात् शरीरादिष्वप्रसङ्ग इति सूत्रार्थ इति वार्त्तिकम् । तल्लिङ्गत्वादिच्छाद्वेषयोरिति सूत्रे भूतचैतन्निकेत्याह न्यायनिबन्धप्रकाशे वर्धमानोपाध्यायाः ।

(३) इदं न्यायसूचीनिबन्धे दृश्यते । वार्त्तिके तु अनेकान्तो भाष्यार्थ इति व्याख्यानम् । तात्पर्यटीकायां तु परश्वादिष्वित्यस्य तात्पर्यमाह वार्त्तिककार इत्युक्तम् ·

आरम्भनिवृत्तिदर्शनादारम्भनिवृत्त्यनुमापकक्रियाविशेषदर्शनात् । यद्वा दृश्यतेऽनेनेति दर्शनमनुमापकं क्रियाविशेषरूपं तस्मादिति । एवं परश्वादौ प्रवृत्त्यादिविरहेण व्यभिचारात् क्रियायां प्रवृत्त्यादीनां न समवायसम्बन्धेन हेतुता किं त्वन्यसम्बन्धेनेति शरीरे चेष्टावत्त्वेन न प्रवृत्त्यादिप्रसङ्ग इति भावः ॥ ३७ ॥

(१)ननु शरीरे परश्वादौ च कथं चेष्टानियम इत्यत आह ।

नियमानियमौ तु तद्विशेषकौ(२)॥ ३८ ॥

नियमः प्रवृत्त्यादेर्जन्यता अनियमः तज्जन्यतातिरिक्तपदार्थः तौ । तद्विशेषकौ चेष्टानियामकौ । तथा च शरीरचेष्टायामवच्छेदकतासम्बन्धेन प्रवृत्तेर्हेतुतया नियामकत्वम् । परश्वादिक्रियायां शरीरचेष्टादिरेव नियामक इति भावः । यद्वा नियमो जन्यता समवायसम्बन्धावच्छिन्नकारणतानिरूपितसमवायसम्बन्धावच्छिन्नकार्यतेति यावत् । अनियमस्तादृशकार्यताविरहस्तौ । तद्विशेषकौ चेतनाचेतनव्यावर्तकौ । इच्छादीनां चेतनधर्मत्वस्य चेष्टाया अचेतनधर्मत्वस्य च व्यवस्थापकाविति यावत् ॥ ३८ ॥

---

(१) अत्र न्यायसूत्रोद्धारे कुम्भादिष्वनुपलब्धेरहेतुरित्येकमधिकं सूत्रं दृश्यते तद् वार्त्तिके न धृतं नापि न्यायसूचीनिबन्धे वर्त्तते ।

(२) अस्य सूत्रत्वे प्रमाणं नोपलभ्यत इति केचिदाधुनिकाः । नियमानियमौ तु तद्विशेषकाविति सूत्रस्यायमर्थः । तयोरिच्छाद्वेषयोर्विशेषकौ भूतवृत्तित्वव्यावृत्त्या तदन्यगुणत्वव्यवस्थापकाविति न्यायनिबन्धप्रकाशे वर्धमानोपाध्यायाः ।

इच्छादीनां मनोगुणत्वं निराकरोति ।

यथोक्तहेतुत्वात् पारतन्त्र्यात् स्वकृताभ्यागमाच्च न मनसः[१] ॥ ३९ ॥

इच्छादय इति शेषः । यथोक्तहेतुत्वात् समवायघटितसामानाधिकरण्यप्रत्यासत्त्या ज्ञानेच्छादीनां हेतुहेतुमद्भावात् । ननु ज्ञानमपि मनोधर्म इति सामानाधिकरण्याविरोध इत्यतो हेत्वन्तरमाह । पारतन्त्र्यात् । चेतनसहकारित्वेन मनसः सिद्धेः । तथा च मनसो यथा न ज्ञानाश्रयत्वं तथोक्तमधस्तादिति भावः । केचित्तु इच्छादीनां पारतन्त्र्यात् पराधीनविषयताशालित्वात् । इच्छादीनां स्वजनकज्ञानविषयतैव विषयता वैयधिकरण्ये च सा न स्यादिति भावः । हेत्वन्तरमाह । स्वकृताभ्यागमात् । स्वकृतात् कर्मणोऽभ्यागमो भोगः । मनसः कृत्यादिमत्त्वे कर्मणः स्वकृतत्वाभावेनात्मनः सुखदुःखभोगो न स्यादिति भावः । न च भोगोऽपि मनस एव सुखादेरप्रत्यक्षत्वापत्तेर्मनसोऽणुत्वेन सिद्धेर्ज्ञानसुखयोः सामानाधिकरण्यानुभवाच्च । न च ज्ञानादिकं प्रक्रम्य एतत् सर्वं मन एवेतिश्रुतिविरोधः तत्र मनोऽधिकरणत्वेन मनस्त्वेन कथनादिति वाच्यम् । मनसो निमित्तकारणतया मनःपदेन मनोजन्यबोधनात् । अन्नं वै प्राणा इत्यादौ तथादर्शनात् ॥ ३९ ॥

उपसंहरति ।

परिशेषाद् यथोक्तहेतूपपत्तेश्च[२] ॥ ४० ॥

---

(१) पारतन्त्र्यादकृताभ्यागमाच्चेति पाठोऽन्यत्र । स्वकृताभ्यागमादिति पाठो वृत्तिकारसम्मतः । यथो-त्तः इति तात्पर्यटीका । इदं न्यायसूचीनिबन्धे वर्तते ।

(२) इदं न्यायसूचीनिबन्धे वर्तते ।

बुद्ध्यादिकमात्मगुण इत्यादि । हेतुमाह । परिशेषात् शरीरादिगुणत्वाभावात् । यथोक्तहेतूनां दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्याद्युक्तानाम् । उपपत्तेः सत्त्वादिति ॥ ४० ॥

शिष्यबुद्धिवैशद्याय स्मृतेरात्मगुणत्वं विशिष्याह ।

स्मरणं त्वात्मनो ज्ञस्वाभाव्यात्(१) ॥ ४१ ॥

स्मरणं तु स्मरणमपीत्यर्थः । ज्ञा स्वभावो ज्ञानं तस्य भावो ज्ञस्वाभाव्यं ज्ञानत्वमिति यावत् तस्मात् । तथा च ज्ञानस्यात्मगुणत्वे तद्विशेषस्य स्मरणस्य सुतरां तत्त्वमिति भावः । यद्वा ज्ञस्वाभाव्यात् ज्ञानाश्रयवृत्तित्वात् । तथा च स्मरणं प्रति सामानाधिकरण्येन हेतुभूतज्ञानस्यात्मवृत्तित्वे स्मरणस्यात्मवृत्तित्वमायातमिति भावः । केचित्तु ज्ञानस्याशुविनाशित्वात् कथं ततः स्मृतिरित्यत आह । स्मरणं त्वित्यादि । ज्ञानवतः स्वभावः संस्कारस्तस्मादित्यर्थ इत्याहुः ॥ ४१ ॥

स्मृतियौगपद्यवारणाय प्रणिधानेत्यादिसूत्रमुक्तं तन्त्रातिग्राह्यं विशेषतो दर्शयति ।

प्रणिधाननिबन्धनाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसम्बन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः(२) ॥ ४२ ॥

---

(१) इदमपि पूर्ववत् ।

(२) स्मृतिकारणानामयौगपद्यप्रतिपादनार्थं प्रणिधानादिसूत्रमिति वार्त्तिकम् । प्रणिधानादिसूत्रेणैषां क्रमापूर्वकमावेदयतीति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः । अन्यत्र निबन्धाभ्यासेति पाठः ।

स्मरणमित्यनुवर्तते । द्वन्द्वात् परश्रुतस्य निमित्तपदस्य प्रणिधानादिना प्रत्येकमन्वयः । प्रणिधानं प्राग् व्याख्यातम् । निबन्धनमेकत्र कथनम् । यथा प्रमाणज्ञानेन प्रमेयस्मरणम् । अभ्यासः पुनःपुनर्ग्रहः । एतस्य यद्यपि नोद्बोधकत्वं तथापि अभ्यासेन दृढतरदृढतमसंस्काराणां जनकतया तादृशसंस्काराणां च झटित्युद्बोधकसमवधानं जायते । उद्बोधकत्वं च यथाकथञ्चित्सम्बन्धशालिनामपीति द्योतनायोक्तमिति । लिङ्गं व्याप्यम् । यथा धूमादिर्ज्ञायमानो वह्न्यादिस्मारकः । एवं व्यापकमपि व्याप्यस्मारकम् । एवमुत्तरत्रापि यथायथं मिथःस्मारकत्वम् । लक्षणं चिह्नम् । यथा ज्ञातं कपिध्वजादिकमर्जुनादेः स्मारकम् । सादृश्यं सादृश्यतया ज्ञातम् । परिग्रहः स्वीकारः स्वीकृतवस्त्विति यावत् । तच्च ज्ञातं तत्पूर्वस्वामिस्मारकम् । आश्रयाश्रितः सम्बन्धः संयोगादिः । यथा वह्न्यादिदर्शनेन पर्वतादेः स्मरणम् । आनन्तर्यं कार्यत्वादि । वियोगः प्रेमास्पदवस्तूनाम् । एककार्यमेककार्यकारि । विरोधः सहानवस्थानम् । अतिशय आधिक्यम् । प्राप्तिर्वियोगानन्तरप्राप्तिः । व्यवधानं व्यवधायकम् । यथा खड्गादेः कोषादिः । सुखदुःखे तत्प्रयोजकादिस्मारके । इच्छाद्वेषौ विषयस्मारकौ । अनयोर्ज्ञानं नापेक्षितम् । भयमपि स्वरूपसदेव मरणस्मारकम् । अर्थित्वं दातुः स्मारकम् । क्रिया शास्त्रादेः । सा च तत्कारकवाय्वादिस्मारिका । रागः पुत्रादेः स्वरूपसन्नेव स्मारकः । धर्माधर्मौ जन्मान्तरानुभूतवस्तुविशेषस्मारकौ । ज्ञानमत्रापि नापेक्षितम् । यथा जातमात्रस्य स्तनपानादौ सुखसाधनतादिस्मरणम् । इदं च दिक्प्रदर्शनम् । तेन शक्त्यादिसम्बन्धपरिग्रहः ॥ ४२ ॥

समाप्तं बुद्ध्यात्मगुणत्वप्रकरणम् ॥

ननु बुद्धेर्बुद्ध्यन्तराद्विनाशः स्वतृतीयक्षणवृत्तिध्वंसप्रतियोगित्व एव सम्भवति तच्च न सम्भवति एकस्या एव बुद्धेर्विषयान्तरसञ्चारविरहादिसत्त्वे बहुतरक्षणस्थायित्वादित्यत आह ।

कर्मानवस्थायिग्रहणात्[(१)] ॥ ४३ ॥

कर्मवदनवस्थायिनां प्रत्यक्षाणां ग्रहणादनुभवात् । एकस्य शाखादेरनवरतक्रियास्थले यथा क्रियाणां नानात्वं तथा धारावाहिकप्रत्यक्षस्थले नैकं प्रत्यक्षं तथैवानुभवकल्पनाद् योग्यविभुविशेषगुणानां स्वोत्तरोत्पन्नगुणत्वेन नाशकत्वस्य लाघवेन कल्पनात् । न चापेक्षाबुद्धेः क्षणत्रयावस्थायित्वं न स्यादिति वाच्यम् । अपेक्षाबुद्धेरव्यवहितोत्तरक्षणे तदधिकरणे विशेषगुणान्तरोत्पादस्यैवाकल्पनात् । अपेक्षाबुद्ध्यन्यत्वं वा नाश्यविशेषणं देयम् । अपेक्षाबुद्धौ तु तृतीयक्षणोत्पन्नानां नाशकत्वं कल्प्यते फलबलात् । न चोत्तरत्वस्य स्वत्वघटितत्वेनाननुगमाद् विशेषत एव नाश्यनाशकभाव उपगन्तव्यस्तथा च धारावहनस्थले एकमेव ज्ञानं जायते लाघवादिति वाच्यम् । स्वप्रागभाववज्ज्ञाननिष्ठसामानाधिकरण्यसम्बन्धेन ज्ञानत्वेन गुणत्वेन वा हेतुत्वं ज्ञाननिष्ठप्रतियोगितासम्बन्धेन नाश्यत्वेन कार्यत्वमित्यत्र तात्पर्यात् धारावहनस्थले ऽनेकज्ञानकल्पनस्य फलमुखत्वेनादोषत्वादिति । यद्वा कर्मानवस्थायिग्रहणादित्यस्य कर्मणा यथोत्तरसंयोगोत्पत्त्यनन्तरमनवस्थायित्वानुभवेनोत्तरसंयोगनाश्यत्वं तथा ज्ञानानामपि

(१) अस्यार्थस्य ज्ञापनार्थं कर्मानवस्थायिग्रहणादिति सूत्रमिति वार्त्तिकम् । सिद्धान्तसूत्रमिति वृत्तिकृतः ।

द्वितीयक्षणोत्पन्नेन ज्ञानादिना नाश्यत्वं तृतीयक्षणानवस्थायित्वग्रहादित्यर्थः । केचित्तु शरीरादिकर्मधारायां अनवस्थायिन्याः प्रत्यक्षधारापि वाच्या । न चाद्यबुद्धेरुत्तरग्राहकत्वं शब्दबुद्धिकर्मणां विरम्य व्यापाराभावात् पूर्वपूर्वस्य च परतःपरतोऽननुभवाद् विनाशसिद्धावाश्रयनाशादेरभावाद् विरोधिगुणस्यैव नाशकत्वमिति ॥ ४३ ॥

शङ्कते ।

अव्यक्तग्रहणमनवस्थायित्वाद् विद्युत्सम्पाते रूपाव्यक्तग्रहणवत्[1] ॥ ४४ ॥

अव्यक्तग्रहणं योग्याशेषविशेषधर्ममपुरस्कृत्य यत्किञ्चित्सामान्यधर्मपुरस्कारेण बुद्धौ भानं स्यादचिरस्थायित्वाद् विद्युत्सम्पातजन्यग्रहवदित्यर्थः ॥ ४४ ॥

उत्तरयति ।

हेतूपादानात् प्रतिषेद्धव्याभ्यनुज्ञा[2] ॥ ४५ ॥

विद्युत्सम्पातरूपस्य दृष्टान्तस्य हेतोरुपादानात् प्रदर्शनात् प्रतिषेद्धव्यस्य बुद्धेराशुविनाशित्वस्याभ्यनुज्ञा त्वयैव कृतेत्यर्थः । एवं च कदाचिद्विद्युत्सम्पातेन यथा विशेषतो ग्रहणं तथान्यत्रापि यावदुपस्थितविशेषरूपेणापि ग्रहणमिति भावः ॥ ४५ ॥

[3]समाधानान्तरमाह ।

न प्रदीपार्चिःसन्तत्यभिव्यक्तग्रहणवत्

---

(१) इदं न्यायसूचीनिबन्धे वर्तते ।

(२) इदमपि पूर्ववत् ।

(३) अत्र न्यायसूत्रोद्धारे मध्ये हेतुविकल्पाद् ग्रहणविकल्पो न बुद्धिविकल्पादिविवेकमर्थिकं सूत्रं दृश्यते । तन्न्यायसूचीनिबन्धे नास्ति । नापि वृत्तिकारैर्व्याख्यातम् ।

Digitized by Google

तदग्रहणम्[1] ॥ ४६ ॥

नाव्यक्तग्रहणं यथा प्रदीपार्चिषां सन्तन्यमानानामनवस्थायित्वे ऽपि अभिव्यक्तग्रहणं तथान्यत्रापि स्यात् । विद्युत्सम्पातस्थले या बुद्धिरुत्पन्ना सा स्वविषये व्यक्तैवेति भावः ॥ ४६ ॥

समाप्तं बुद्धेरुत्पन्नापवर्गित्वप्रकरणम् ॥

उत्पन्नापवर्गित्वं स्वोत्तरोत्पन्ननाश्यत्वम् ॥

बुद्धेः शरीरगुणत्वाभावस्य प्राङ्निर्धारितत्वे ऽपि विशेषार्थमाह ।

द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः[2] ॥ ४७ ॥

द्रव्ये पृथिव्यात्मकचन्दनादौ स्वगुणस्य रूपादेः परगुणस्य परस्य जलस्य सम्पर्केण तद्गुणस्य शीतस्पर्शादेश्चोपलब्धेः । एवं पृथिव्यात्मकशरीररूपादेस्तेजःसम्पर्केणोष्णस्पर्शादेश्चोपलब्धेश्च शरीरे बुद्धिमत्त्वसंशयः गौरोऽहं जानामीत्यादिप्रतीत्यात्मत्वेन भासमाने गौरे शरीरे परगुणस्य बुद्धेर्भानं किं वा स्वगुणस्य तस्येतिसंशयेन शरीरं बुद्धिमन्न वेति संशय इति भावः ॥ ४७ ॥

सिद्धान्तमाह ।

यावच्छरीरभावित्वाद् रूपादीनाम्[3] ॥ ४८ ॥

---

(१) इदमपि न्यायसूचीनिबन्धे वर्तते । तत्र न प्रदीपार्चिवदिति पाठः । न्यायसूत्रोद्धारे तु नकाररहितः पाठः ।

(२) द्रव्ये स्वगुणपरगुणोपलब्धेः संशय इति । उक्ताथें सूत्रमिति वार्त्तिकम् । ननु तद्गुणत्वं तयोपलब्ध्या सिध्यतीति वार्त्तिके द्रव्ये स्वगुणपरगुणोपलब्धेः संशय इतिसूत्रावतरणमिति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः ।

(३) न शरीरगुणश्चेतना यावद्द्रव्यभावित्वाद्रूपादीनाम् । दृष्टान्तसूत्रमिति वार्त्तिकम् । तत्र चायमेव पाठः । न्यायसूचीनिबन्धे ऽपि यावद्द्रव्येति पाठः । तत्र सिद्धान्तसूत्रमिति वृत्तिकृतः ।

रूपादिविशेषगुणानां स्पर्शवद्विशेषगुणानामिति यावत्। यावच्छरीरभावित्वात् यावत्स्वाश्रयवृत्तित्वनियमादित्यर्थः। स्वाश्रयकालीनध्वंसाप्रतियोगित्वादिति यावत्। एवं च बुद्धिर्न स्पर्शवतां शरीराणां विशेषगुणः स्वाश्रयत्वाभिमतकालीनध्वंसप्रतियोगित्वाच्छब्दवत्। व्यतिरेकेण रूपादिवदित्यनुमाने तात्पर्यम्। बुद्ध्यादिकं यदि शरीरविशेषगुणः स्याद् यावच्छरीरवृत्ति स्यादित्यादिर्विषयपरिशोधकस्तर्कोऽपीति ज्ञेयम्॥ ४८॥

पिठरपाकवादिमतेन शङ्कते।

न पाकजगुणान्तरोत्पत्तेः(१)॥ ४९॥

घटादौ पाकाधीनरूपनाशमादाय व्यभिचारान्नोक्तनियम इति भावः॥ ४९॥

सिद्धान्तमाह।

प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः(२)॥ ५०॥

अप्रतिषेधो नोक्तनियमप्रतिषेधः। पाकजानां रूपादीनां प्रतिद्वन्द्विसिद्धेः प्रतिद्वन्द्विनोऽग्निसंयोगादितः सिद्धेः। तथा चाग्निसंयोगाद्यजन्यत्वं निरुक्तहेतुघटकीभूतनाशविशेषणमिति भावः। पीलुपाकवादिमतेनोत्तरयति। प्रतिद्वन्द्वीति। प्रतिद्वन्द्विनोऽवयव्यन्तरस्य सिद्धेरित्यर्थ इत्यपि कश्चित्। केचित्तु अयावच्छरीरभावित्वमेव शरीरविशेषगुणत्वाभावसाधकम्। तत्रैवाशङ्कितं द्वितीयसूत्रेण। समाधत्ते। प्रतिद्वन्द्वीत्यादिसूत्रेण। तदर्थस्तु पाकजानां प्रतिद्वन्द्विनि पूर्वशरीरनाशेन जाते शरीरे सिद्धेः। घटा-

(१) परे तु सिद्धान्तसूत्रमेवेदमिति वृत्तिकृतः। न्यायसूचीनिबन्धेऽपीदं वर्तते।

(२) इदं न्यायसूचीनिबन्धे वर्तते। सिद्धान्तसूत्रमिति वृत्तिकृतः।

Digitized by Google

415. The fruits of Scriptural rites are not directly perceived, but the activities promoted by the passions etc. produce fruits that are directly perceived.[1] Further, as an instrument to acquire villages, service is not inconsistent with *Sāngrahaṇī*.

416. Scripture is an authority for the proposition that ritual bears fruit, and no more. Therefore, there is nothing inconsistent of any kind in a person desirous of abundant fruit performing both service and *Sāngrahaṇī* either successively or simultaneously.

417. If injunction means the exclusion of all activities without exception which spring from the passions etc., then it would follow that even prescribed activities are excluded, owing to want of the necessary materials.[2]

418. There is no difference whatever between activities which aim at known fruit and those which aim at unseen fruit; for, even rites with special objects, being in the nature of means, are brought about by desire, passion, etc.

419. Thus while the two kinds of activities are alike in their tendency to strengthen our worldly attachment, by what preference can one of them be said to tend towards liberation?

420. If you do not even accept that rites are but instruments to secure desires, then your reasoning would fail, and the reward would be a matter of accident.

---

[1] Therefore there is no similarity of fruit. In the next sentence Sureśvara shows that the analogy itself falls to the ground.

[2] Since even the earning of wealth and materials would be excluded according to that view.

421. It is but light talk to argue that, since all desires cease by the complete enjoyment of desires, injunctions are, by this means,[1] accessory to liberation.

422. How can activity put an end to the very thing which has prompted it? Further a person, once active, will not desist from the action which is the means to realise his desire.

423. He will, at any rate, cherish a disgust for knowledge that will destroy all human pleasures. So runs the proverbial song of the man of desire, "Better in the vacant *Bṛindāvana* etc."[2]

424. As regards the argument that this part of the *Vēda* somewhere hints at the cessation of something,[3] it is unfounded, since the Scripture does not imply the same, nor does the cessation of the body, etc. follow therefrom.

425. Though Scripture intends heaven alone, its meaning cannot be strained to import cessation, for, the cessation of the body etc. is established by words which clearly refer to it.

426. When the very elephant is seen, one need not infer it from its footsteps. The passage 'not huge etc.' directly negatives the existence of the body etc.

427. As for those who said that, by the opposite method,[4] there is unity of authorisation between know-

[1] Injunctions prompt us to action, action brings enjoyment of fruit, and such enjoyment quenches the desire for the same.

[2] अपिवृन्दावनेशून्ये शृगालत्वं स इच्छति । नतुनिर्विषयंमोक्षंकदाचिदपि-गौतम ॥

[3] See verse 378, *supra*.

[4] i. e. knowledge is auxiliary to ritual. See verse 357 *supra*.

Digitized by Google

ledge and ritual above spoken of, let them point out any proof for so connecting knowledge.

428. It cannot be said that here, as in the case of the sprinkling of rice, the context (*prakriyā*) implies it, for such implication (*sthiti*) is no more than the indirect inference of a connection between what is spoken of (*prakṛita*) and the seeds of pure happiness or misery (*apūrva*).[1]

429. It may rightly be said of the word 'rice' that since it cannot convey any meaning about the nature of the rice, it must necessarily imply the connection between the thing spoken of and the germs of future weal or woe.

430 and 431. Nor can such connection be said to be syntactical (*vākyēna*), as in the instance of the ladle being made of *parṇa* wood, for, in that case, owing to the invariability of the relation between the ladle etc. and the rite, it will clearly imply ritual, even without any unity of context.

432. It has been pointed out that the ladle etc. is directly connected with ritual by syntactic unity. But the same cannot be said of the knowledge of Self, for, it is not recited in the same context.

433. Nor do we see any invariability of connection between the Self and ritual. Hence its connection with ritual is not amenable to any proof whatever.

434. Thus, since it is not known how knowledge is

[1] The reference is to the sprinkling of rice which is enjoined as part of the new-moon ritual etc.

accessory to something else, the passage enjoining fruit[1] is not a mere explanatory remark. Therefore also, the authorisation is different in the case of knowledge and in that of ritual.

435. Such a connection may be necessary to explain away inconsistency (*arthākshēpa*)[2] in the case of the individual soul which is fit for ritual and which is the doer and enjoyer. But the same cannot hold good in the case of the Upanishadic Self which has shaken off all difference.

436. Since, as may be gathered from the authority of direct Scriptural utterance or otherwise, it is established that asceticism is possible even in the earliest stage, it is no authority to quote the *Smṛiti*, 'debts etc.'[3]

437. It cannot be shown by any argument that liberation can follow from rites and rites alone. This will be elaborated later on. It is clear therefore that liberation cannot result from ritual.

438. Nor can it be said that the knowledge of the unity of Self, to bring about liberation, must be augmented by continued meditation (*abhyāsa*), or that such

---

[1] i. e. that the fruit of knowledge is liberation. It would be *arthavāda* to say that the acquisition of knowledge is secondary to a different main purpose, but it is not *arthavāda* to say that knowledge bears such and such fruit.

[2] The inconsistency is that, without a knowledge of the soul, one would not plunge into the performance of rites which can only produce happiness in lives to come. See verses 104, 105 *supra*.

[3] जायमानो वैब्राह्मणस्त्रिभिर्ऋणवाञ्जायते and ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्. The discharge of the debts need not be in the same birth as that in which the pursuit of knowledge is authorised. Thus this view also does not support the theory of the subordination of ritual to knowledge.

knowledge is only a help to such meditation (*bhāvanā*).[1] This too will be explained later on.

439 It will also be pointed out that, since the reality known as the unity of Self is attained by unaided self-experience alone, knowledge cannot therefore be an accessory (*sāmpādika*).

440. Others say: "The Self, being an established entity, is knowable by other proofs, and that, like any other thing such as corn, it needs not Scripture to establish it.

441. "Since it is within the scope of ordinary proofs to distinguish and identify one's own self by the methods of agreement and difference through the states of waking, dream and sleep, it does not require in addition the Scripture to establish it.

442 and 443. "Man is thus enjoined by Scripture[2] to control his desires during the said three states (*tad-vāsanā-nirōdhē*), or to control his mind, but not to understand the Self. Therefore, since it is established by other proofs, Scripture has no application to it.

444. "Even if there be no need for other proofs, still, the Self, being of a self-resplendent nature, manifests itself of its own accord,[3] after the desires of the mind are brought under restraint.

445. "Thus the *Vēdāntas*, like the passages about *jyōtishṭōma* and other rites, are authority only by way

[1] The opponent's argument is that knowledge is neither the only nor the direct cause of liberation, inasmuch as it needs to be supplemented by *abhyāsa*.

[2] By passages like यच्छेद्वाङ्मनसीप्राज्ञः etc.

[3] And not by virtue of Vedantic knowledge.

Digitized by Google

of enjoining action,[1] but are no authority with regard to the Self (*vastu*) that can perceive itself (*akshavat*).

446. "Since the connection of the Self with bondage is the result solely of desire, liberation can therefore result only from restraint, irrespective of the existence or non-existence of any other cause.[2]

447. "Words uttered have no independent authority (*anupēkshatva*) in any case if they do not contain an injunction; and injunction has no application to an established entity.

448. "For the position that the *Vēdānta* is also proof of the Self, the instance of an injunction which is also a recital of merit, cannot be quoted, since such recital of merit is confined to the rite in question.[3]

449. "Moreover, we discern throughout the Vedas that only objects of experience constitute the aim of man, but not experience itself.[4]

450. "Since it is thus established that objects of knowledge alone can be the aim of man, it follows that the words of the Veda[5] merely convey an idea but afford no proof.

451. "If the Vedas import an established Self, such Self is not found in the sphere of ritual to encompass any human aim which means something yet to be realised.

---

[1] i. e. by enjoining the restraint of desires (निरोधनियोगतया).

[2] e. g. ज्ञान.

[3] e. g. दध्नेन्द्रियकामस्य जुहुयात्. Compare फलश्रुतेस्तु कर्मस्यात्फलस्य कर्मयोगित्वात् (Mim. Sut.)

[4] The soul, being *svaprakāṣa*, cannot be a *purushārtha*.

[5] Like विज्ञान, आनन्द etc.

452. "If, on the other hand, the Vedas do not import the Self which is a known thing, it cannot properly be subservient to ritual.

453. "If you say it is comprised in injunction on the strength of the passage 'Worship thy own Self,' then you adopt the very argument I advance.[1]

454. "It is therefore clear that Scripture is authority only by way of enjoining rites." So say some whose sole wish is to impute an injunctory signification to Scripture.

455. Your loud acclamations have no propriety, for, even without an injunction, a desired object may be achieved, even in secular affairs.

456. We learn that the contact of the Self with bondage is not real, since such bondage (*anartha*) is dependent solely on desire (*vāsanā*) for the reason that the former exists only when the latter exists.[2]

457. Since by mere reasoning the cause of contact with bondage is thus discerned, it follows that the bondage ceases when the cause is destroyed.

458. Since liberation is established by you, as by the Buddhists and others, even without the aid of Scripture, Scripture will therefore become entirely useless.

459. As the results of actions done in innumerable bygone lives are endless, it is inconceivable that men could combat such results in a single life.[3]

---

[1] That the *Vēdānta* is an authority only by way of injunction but not for the existence of the Self.

[2] *Vāsanā* is the impression of pleasure or pain in the mind, which alone gives rise to a feeling of bondage (*samsāra*).

[3] In verses 455 to 459, Suresvara extends his opponent's argument to prove its absurdity.

३८३

Digitized by Google

460. If the inner darkness cannot be destroyed by the direct realisation of the Self, how can it be destroyed by mere intellectual culture (*jṇāna-abhyāsa*) which is itself obliterated by the experience of misery etc.

461. It will also be shown in its proper place[1] by clear logical reasoning that liberation cannot result from the method of restraint alone.

462. This Self, in fact, is signified neither by words nor by sentences, but its true nature is conveyed only by such passages of Scripture as negative that idea.[2]

463. In deep sleep and other such states, liberation does not result, though desires (*vāsanā*) are absent; nor then does the liberated self manifest itself, though there is total want of intellectual activity.

464. Nescience is the only cause of the contact of the Self with all kinds of bondage (*anartha*). The same is the cause even for the attachment to it of desire.

465. We shall also point out, by clear logical reasoning, that Scripture can have an independent authority even in the absence of injunction.

466. Even according to you, you interpret Scripture as injunctory, solely because the Self perceives itself; for, otherwise, perception (*anubhūti*) of Self cannot be the result of injunction.

467. How can the Self which is the very essence of experience, be dependent on anything,[3]—the Self, which nescience cannot make non-manifest nor can knowledge make manifest.

[1] See verse 761 *et seq.*

[2] e. g. नायमात्मा प्रवचनेनलभ्यः etc., and such other passages.

[3] Such as injunction etc. The idea is that *ātman* is self-manifest, and nescience and knowledge are only remote causes.

संस्कृतपुस्तकानां सूचीपत्रम् ।	मूल्यम्
श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं· श्रीराममिश्र-शास्त्रिप्रणीतकाचित्कविषमपदटिप्पणीसमेतः	७।)
श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा ..	६)
श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा ..	३=)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः	२।)
सेतुपूर्त्तिः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं· स्वामिश्रीराममिश्रशास्त्रि-प्रणीतो निर्विशेषाद्वैतनिराकरणपरः	१॥=)
सेतुपूर्त्तिसहितो वेदार्थसंग्रहः	३॥)
शास्त्रदीपिका	६।)
सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-न्द्रिकोपेतम्, पं·स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् ।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजप·दामोदर-शास्त्रिणा संशोधिता पूर्वार्द्धरूपा	५॥)
तथा उत्तरार्द्धम्	७॥)
माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता	७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता	६॥)
श्रीतिथ्यन्तार्णवतरणिः ।	६)
दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता	॥=)
जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीपुतरामेश्वरसूरिविरचिता ..	५॥)
लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, श्रीमाद्धुधराचार्यविरचितया न्याय-मुक्तावल्याख्यया टीकया सहिता ।	॥।)
सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम् ।	॥।)
तत्त्वमुक्ताकलापः–सर्वार्थसिद्धियुतः, बोधायनीयार्यसिद्धान्तानुसारी विशिष्टाद्वै-तब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्कि-ककेसरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीवेङ्कटनाथदेशिकेन प्रणीतः	५॥=)
वेदान्तसिद्धान्तमुक्तावली, आर्चवीनिश्रमाहबकृताङ्गलभाषानुवादयुता ..	१॥=)
काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः	=॥)
अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः	१=)
आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्य-काराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम्	॥।)
तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्गोवर्द्धनविरचितया न्यायप्रबो-धाख्यटीकया सहिता ।	१≡)

CONTENTS.

Page.

BRÂHMASPHUṬASIDDHÂNTA, Edited with his own commentary by Mahâmahopâdhyâya Sudhâkara Dvivedin, Professor, Queen's College, Benares 321

NYÂYASÛTRAVIVARAṆAM, Ed. Surendralâla Gosvâmin, Professor, Sanskrit College, Benares 361

THE SAMBANDHAVÂRTIKA OF SUREṢVARÂCHÂRYA, Translated by S. Venkataramana Aiyar, B. A., B. L., High Court Vakil, Triplicane, Madras 377

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 7.] July, 1902. [Vol. XXIV.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1902.

Copyright on each article reserved.

Price Rs. 9-0 per annum.]

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
विधिमीमांसा, अप्पयदीक्षितकृता पं॰ श्री रामशास्त्रिणा संशोधिता	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।=)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनाचार्य्येणाङ्गलदेशीयभाषायामनुवादिता ..	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	=)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणाङ्गलदेशीयभाषायामनूदितम्	४)
मानवधर्म्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	३॥=)
शैवपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकाशीनाथशास्त्रि- संशोधिता	४)
काव्यप्रदीपः, पं॰ रामशास्त्रिभागवताचार्य्येण परिशोधितः	२॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	५॥)

यो विषुवच्छायां पलभां दृष्ट्वा बहुधा बहुभिः प्रकारैर्लम्बाक्षज्ये करोति । लम्बज्यामक्षज्यां च करोति । एवं यो मध्यच्छायार्कतोऽक्षांशान् वेत्ति स एव गणकः । एवमत्र प्रश्नत्रयम् ॥ ४ ॥

इदानीमन्यान् प्रश्नानाह ।

यश्चरखण्डकलङ्कोदयान् विजानाति लग्नमुदयैः स्वैः ।
लग्नाद् घटिकाश्छायां गतशेषनतांश्च गणकः सः ॥ ५ ॥

यश्चरखण्डानि जानाति । लङ्कोदयान् जानाति । स्वोदयैः स्वदेशोदयैर्लग्नं विजानाति । लग्नाद्घटिका इष्टघटिका जानाति । गताद्दिनगताच्छायां जानाति । शेषाद्दिनशेषाच्छायां जानाति । वा नतात्कालाच्छायां विजानाति स एव गणकः । एवमत्र सप्त प्रश्नाः ॥ ५ ॥

इदानीमन्यान् प्रश्नानाह ।

गतशेषनता घटिकाश्छायातोऽभीष्टदिनदलच्छायाम् ।
बहुधा क्रान्त्यर्कांशान् दृष्ट्वा यो वेत्ति गणकः सः ॥ ६ ॥

यः क्रान्त्यंशार्कान् दृष्ट्वा बहुधा गतघटिकाः शेषघटिका नतघटिकाश्च वेत्ति । वा छायात इष्टकालच्छायातो बहुधाऽभीष्टदिनदलच्छायां वेत्ति स एव गणकः । एवमत्र चत्वारः प्रश्नाः ॥ ६ ॥

इदानीमन्यान् प्रश्नानाह ।

क्रान्तिज्ञः सममण्डलशङ्कुं कर्णं च योऽवलम्बज्ञः ।
जानाति कोणशङ्कुच्छायाघटिकाः स तत्त्वज्ञः ॥ ७ ॥

यः क्रान्तिज्ञः सममण्डलशङ्कुं जानाति । योऽवलम्बज्ञः सममण्डलकर्णं च जानाति । कोणशङ्कुं कोणशङ्कुच्छायां कोणवृत्तप्रवेशे घटिकाश्च जानाति स एव तत्त्वज्ञः सिद्धान्तज्ञ इति । एवमत्र पञ्च प्रश्नाः ॥ ७ ॥

इदानीमन्यान् प्रश्नानाह ।

शङ्कुतलप्राच्यपरान्तरद्वयं वीक्ष्य यो विजानाति ।
विषुवच्छायामेकं दृष्ट्वाऽऽदित्यं च गणकः सः ॥ ८ ॥

शङ्कुतलप्राग्यपरान्तरं भुजः। यो भुजद्वयं वीक्ष्य विषुवच्छायां पलभां विजानाति। एकमेव भुजं दृष्ट्वा विषुवच्छायामादित्यमग्रं च विजानाति स एव गणकः। एवमत्र प्रश्नत्रयम् ॥ ८ ॥

इदानीमन्यान् प्रश्नानाह।

पातालगशङ्कुमुदयेऽस्ते वा दृग्ज्यां रवेर्विजानाति।
दृक्पातालगशङ्कोः पृथक् तले वा स तन्त्रज्ञः ॥ ९ ॥

यो रवेः पातालगशङ्कुमधः शङ्कुं विजानाति। उदयेऽस्ते वा यो रवेर्दृग्ज्यामग्रां विजानाति। दृक्शङ्कुर्दिवोर्ध्वशङ्कुः। पातालगशङ्कुर्निशि रवेरधः शङ्कुः। तयोः पृथक् पृथक् तले शङ्कुतले च वा यो विजानाति स एव तन्त्रज्ञ इति। एवमत्र प्रश्नचतुष्टयम् ॥ ९ ॥

इदानीमन्यान् प्रश्नानाह।

दिनगतशेषप्राणैरिष्टार्को दिनदलान्तैरथवा।
भवति सममण्डले यैर्यस्तान् कथयति स तन्त्रज्ञः ॥१०॥

यैर्दिनगतप्राणैर्दिनशेषप्राणैरथवा दिनदलान्तैः प्राणैरिष्टार्कः सममण्डले भवति प्रविशति तान् प्राणान् यः कथयति स एव तन्त्रज्ञः। एवमत्र प्रश्नत्रयम् ॥ १० ॥

इदानीमन्यान् प्रश्नानाह।

सममण्डलगः प्राणैर्दिनगतशेषैर्नतैर्दिनार्धाद्वा।
यैर्भवति ज्ञात्वा तान् योऽर्कं कथयति स तन्त्रज्ञः ॥ ११ ॥

यैर्दिनगतप्राणैः शेषप्राणैर्दिनार्धाद्वा नतैः प्राणैरर्कः सममण्डलगो भवति तान् ज्ञात्वा योऽर्कं कथयति स एव तन्त्रज्ञ इति। एवमत्र प्रश्नत्रयम् ॥ ११ ॥

इदानीमन्यान् प्रश्नानाह।

यः सममण्डलशङ्कुं कर्णं वा वीक्ष्य सूर्यमानयति।
रविसममण्डलशङ्कोऽर्कं कथयति स तन्त्रज्ञः ॥ १२ ॥

यः समभच्छलमङ्कुं वीक्ष्य सूर्यमानयति । समभच्छलकर्णं वीक्ष्य सूर्यमानयति । अथ वा यो रविं समभच्छलमङ्कुं च ज्ञात्वाऽग्रं कथयति स एव तन्त्रज्ञः । एवमत्र प्रश्नत्रयम् ॥ १२ ॥

इदानीमन्यान् प्रश्नानाह ।

रविलग्नान्तरघटिका विनोदयैर्लग्नमिष्टघटिकाभिः ।
वेत्ति चरार्धादक्षं योऽर्कज्ञो वा स तन्त्रज्ञः ॥ १३ ॥

स्वदेशोदयैर्विना यो रविलग्नान्तरघटिका वेत्ति । वा स्वदेशोदयैर्विनेष्टघटिकाभिर्लग्नं वेत्ति । वा योऽर्कज्ञश्चरार्धादक्षं वेत्ति स एव तन्त्रज्ञः । एवमत्र प्रश्नत्रयम् ॥ १३ ॥

इदानीमन्यान् प्रश्नानाह ।

अक्षचरार्धज्ञोऽर्कं छायातो यश्चरार्धमिष्टायाः ।
इष्टचरार्धादथवा छायां कथयति स तन्त्रज्ञः ॥ १४ ॥

योऽक्षचरार्धज्ञोऽर्कं कथयति । यश्छायातः पलभात इष्टायाः पलभायाश्चरार्धं कथयति । अथवा इष्टचरार्धात् छायां विषुवच्छायां कथयति स एव तन्त्रज्ञः । एवमत्र प्रश्नत्रयम् ॥ १४ ॥

इदानीमन्यान् प्रश्नानाह ।

मध्यच्छायातोऽक्षविदानयति रविं दिवाकरज्ञोऽक्षम् ।
योऽग्रार्कज्ञो लम्बाक्षांशान् कथयति स तन्त्रज्ञः ॥ १५ ॥

योऽक्षविदक्षांशज्ञो मध्यच्छायातो रविमानयति । दिवाकरज्ञश्च मध्यच्छायातोऽक्षमानयति । वा योऽग्रार्कज्ञो लम्बाक्षांशान् कथयति स एव तन्त्रज्ञः । एवमत्र प्रश्नत्रयम् ॥ १५ ॥

इदानीमन्यान् प्रश्नानाह ।

उदयेऽस्तमये वाऽग्रां वेत्ति दिनार्धे नतोन्नतज्ये यः ।
ताभिर्विषुवच्छायाक्षज्यालम्बाम् स तन्त्रज्ञः ॥ १६ ॥

य उदये वाऽस्तमयेऽर्के दृष्टाऽग्रां वेत्ति । वा दिनार्धे नतोन्नतज्ये

नतज्यामुन्नतज्यां च वेत्ति । ताभिर्यानतोन्नतज्याभिर्विषुवच्छायातज्ज्यातम्बान् यो वेत्ति स एव तन्त्रज्ञः । एवं प्रश्नत्रयमेवाह ॥ १६ ॥

इदानीमन्यान् प्रश्नानाह ।

यश्चरदलं विना स्वे दिनरात्र्यर्धे करोति वा ताभ्याम् ।
अक्षावलम्बकौ वाऽनस्तमयार्कान् स तन्त्रज्ञः ॥ १७ ॥

यश्चरदलं विना स्वे दिनरात्र्यर्धे करोति । वा ताभ्यां दिनरात्र्यर्धाभ्यां योऽक्षावलम्बकौ करोति । वाऽनस्तमयार्कान् सदोदितार्कान् यः करोति स एव तन्त्रज्ञः । एवमत्र प्रश्नत्रयम् ॥ १७ ॥

अथ केषामत्रोत्तराणीत्याह ।

आर्यानवकोक्तानां प्रश्नानामुत्तरं चतुःषष्ट्या ।
आर्याणां प्रश्नोक्त्या शेषप्रश्नोत्तरोक्तिरतः ॥ १८ ॥

आर्यानवकोक्तानां प्रश्नानां 'योऽक्षः पूर्वापरयोः—'इत्यादीनां 'पृथक् तले वा स तन्त्रज्ञः—'इत्यन्तानामुत्तराणि प्रश्नोक्त्या त्रिप्रश्नाधिकारोक्त्याऽऽर्याणां चतुःषष्ट्या प्रतिपादितानि । अतोऽत्र शेषप्रश्नोत्तरविवेति । त्रिप्रश्नाध्याये षट्षष्टिरार्याः सन्ति । अतोऽत्र 'षट्षष्ट्या' इति पाठः साधुः ॥ १८ ॥

अथैषामुत्तराणि ।

तत्रादौ दिनगतशेषप्राणैरित्यादिप्रश्नत्रयस्योत्तरमाह ।

विषुवच्छायागुणितस्वाहोरात्रार्धभाजिता त्रिज्या ।
क्रान्तिद्वादशगुणिता फलचापकलासुभिः सहितैः ॥ १९ ॥
स्वचरप्राणैर्दिनगतशेषैः सममण्डले रविर्भवति ।
फलचापन्यूनाभिस्तिथिघटिकाभिर्नताभिर्वा ॥ २० ॥

त्रिज्या क्रान्तिद्वादशगुणिता क्रान्तिज्यया द्वादशभिश्च गुणिता । विषुवच्छायागुणितस्वाहोरात्रार्धभाजिता पलभागुणितद्युज्यया हृता ।

फलचापकलासुभिः संस्कृतैः स्वचरप्राणैस्तत्समैर्दिनगतशेषैर्वा फलचापन्यूनाभिस्त्रिघटिकाभिस्तत्समाभिर्नताभिर्नतघटिकाभो रविः सममण्डले भवति प्रविशतीत्यर्थः ।

अत्रोपपत्तिः । विषुवच्छायया द्वादशकोटिस्तदा क्रान्तिज्यया किं जाता कुज्योना तद्धृतिः = $\frac{१२ \times ज्याक्रा}{वि}$ । कुज्ययेयं तदा त्रिज्यया किं जातं सूत्रम् = $\frac{१२ \times ज्याक्रा \times त्रि}{वि \times द्यु}$ । अस्य चापं चरयुतं सममण्डलप्रवेशे यातो वा शेष उन्नतकालः स्यात् । सूत्रचापोनाः पञ्चदशघटिकाश्च तदैव नतघटिकाः स्युरित्युपपद्यते सर्वमिति ॥ १९–२० ॥

इदानीं सममण्डलगः प्राणैर्दिनगतशेषैरिति प्रश्नद्वयस्योत्तरमाह ।

उदयसममण्डलान्तरघटिकाज्यां लम्बकाहतां गुणयेत् ।
अक्षज्यया हृताऽन्त्यकान्त्या व्यासार्धसङ्गुणया ॥ २१ ॥
लब्धधनुरिनोऽजादौ कर्क्यादौ यदि विशोध्य चक्रार्धात् ।
तज्ज्या तदुदयसममण्डलान्तरासुज्यया भक्ता ॥ २२ ॥
प्रश्नसममण्डलासुक्रमज्यया सङ्गुणाऽसकृत् सूर्यः ।
प्रश्नघटिकाभिरेवं गतशेषाभिर्भवत्यङ्कः ॥ २३ ॥

उदयसममण्डलान्तरघटिका उन्नतकालस्तज्ज्यां लम्बकहतां लम्बज्याहतामक्षज्यया गुणयेत् । गुणनेन या सङ्ख्या भवेत् साऽन्त्यक्रान्त्या जिनज्यया किंविशिष्टया व्यासार्धसङ्गुणया हृता । लब्धस्य धनुरजादावाद्ये पदे इनः सूर्यो भवति । यदि कर्क्यादौ द्वितीये पदे प्रश्नस्तदा तद्धनुश्चक्रार्धाद्विशोध्य शेषं रविः स्थूलः स्यात् । तुलादिराशिषट्के सममण्डलप्रवेशो न सम्भवत्यतस्तत्र प्रश्न एव खिलः । अथ तज्ज्या स्थूलरविभुजज्योन्नतकालज्यया भक्ता प्रश्नसममण्डलासुक्रमज्यया सङ्गुणा । स्थूलरवितश्चरज्यादिकं ज्ञात्वा येष्टहृतिः सा प्रश्नसममण्डलासुक्रमज्या कथ्यते । एवं लब्धचापतः पदवशात् सूक्ष्मः सूर्यो भवति । पुन'स्तज्ज्या तदुदयसममण्डलान्तरासुज्यया भक्ते'त्यादिना सूर्यः साध्य एवमसकृत् अङ्को दिवसस्य गतशेषाभिः प्रश्नघटिकाभिः स्थिरीभूतः सूर्यो भवति ।

अत्रोपपत्तिः । आचार्येण प्रथममुन्नतकालज्या स्थूलेष्टहृतिः कल्पिता । ततोऽक्षक्षेत्रानुपातेन सममण्डलप्रवेशे समशङ्कुः $= \dfrac{\text{ज्यालं} \times \text{इहृ}}{\text{त्रि}}$ ।

$\text{क्रान्तिज्या} = \dfrac{\text{ज्याभ} \times \text{ज्यालं} \times \text{इहृ}}{\text{त्रि} \times \text{त्रि}}$ । $\text{रविभुजज्या} = \dfrac{\text{ज्याभ} \times \text{ज्यालं} \times \text{इहृ}}{\text{ज्याजि} \times \text{त्रि}}$

इष्टहृतिस्थाने यद्युन्नतकालज्या = ज्याउ गृह्यते तदा

$$\text{स्थूलभुजज्या} = \frac{\text{ज्याभ} \times \text{ज्यालं} \times \text{ज्याउ}}{\text{ज्याजि} \times \text{त्रि}}$$

$$\text{सूक्ष्मभुजज्या} = \frac{\text{ज्याभ} \times \text{ज्यालं} \times \text{इहृ}}{\text{ज्याजि} \times \text{त्रि}}$$

$\therefore \dfrac{\text{स्थूलभुजज्या}}{\text{सूक्ष्मभुजज्या}} = \dfrac{\text{ज्याउ}}{\text{इहृ}}$ । $\therefore \text{सूक्ष्मभुजज्या} = \dfrac{\text{इहृ} \times \text{स्थूलभुजज्या}}{\text{ज्याउ}}$ ।

अतः पुनः पुनरिष्टहृतिवशेनासकृत् सूक्ष्मभुजज्या भवतीत्युपपन्नम् । अथ यदि सूचम् = ज्याभ । तदाऽक्षक्षेत्रयुक्त्या

$\text{चरज्या} = \text{ज्याच} = \dfrac{\text{वि} \times \text{ज्याका} \times \text{त्रि}}{१२ \times \text{द्यु}}$ । $\text{ज्याभ} = \dfrac{१२ \times \text{ज्याका} \times \text{त्रि}}{\text{वि} \times \text{द्यु}}$

$\therefore \dfrac{\text{ज्याच}}{\text{ज्याभ}} = \dfrac{\text{वि}^2}{१२^2}$ । ततः $\dfrac{\text{ज्याभ} + \text{ज्याच}}{\text{ज्याभ} - \text{ज्याच}} = \dfrac{\text{स्प}\frac{1}{2}(\text{भ} + \text{च})}{\text{स्प}\frac{1}{2}(\text{भ} - \text{च})} = \dfrac{\text{पक}^2}{१२^2 - \text{वि}^2}$

अतः $\text{स्प}\frac{1}{2}(\text{भ} - \text{च}) = \dfrac{\text{स्प}\frac{1}{2}\,\text{उभा}\,(१२^2 - \text{वि}^2)}{\text{पक}^2}$ । अनेन स्पर्शरेखासम्बन्धतः सूचांशचरांशान्तरार्धं सकृदेव व्यक्तं भवति तद्योगार्धमुन्नतकालदलं व्यक्तमेव । ततश्चरज्यादिकं सर्वं व्यक्तं भवति सकृद्विधिनैवातो 'या स्याद्रवेरुन्नतकालजीवा–'इत्यादिभास्करोक्तप्रकार आचार्योक्तप्रकारसम एव ॥ २१–२३ ॥

इदानीं नतप्राणान् वीक्ष्य योऽर्कं वेत्तीत्यस्योत्तरमाह ।

त्रिज्यादिनार्धसममण्डलान्तरासुज्ययोः कृतिविशेषः ।
स्वविषयविषुवच्छायावर्गेण गुणो द्विधा प्रथमः ॥ २४ ॥
व्यासार्धवर्गभक्तो लब्धं द्वादशजवर्गसंयुक्तम् ।
छेदो द्वितीयराशेर्लब्धपदं क्रान्तिरर्कोऽतः ॥ २५ ॥

द्विनार्धसममण्डलान्तरासुज्या नतासुज्या नतज्या वा नतकालज्योच्यते । चिज्यानतज्ययोः कृतिविशेषः स्वदेशीयविषुवच्छायावर्गेण गुणयो द्विधा स्थाप्यः । प्रथमो राशिर्व्यासार्धवर्गभक्तो यल्लब्धं तद्द्वादशवर्गसंयुक्तं द्वितीयस्थाने स्थापितस्य द्वितीयराशेश्छेदो हरः स्यात् तस्माच्छेदाद्यल्लब्धं तस्य पदं क्रान्तिः क्रान्तिज्या स्यात्ततो विलोमविधिनाऽर्कः स्यादिति ।

अत्रोपपत्तिः । सममण्डलप्रवेशेऽर्के द्युज्याचापांशाः कर्णः । सममण्डलनतांशा भुजो लम्बांशाः कोटिः । भुजसम्मुखकोणो नतकालः । ततस्त्रिभुजावयवसिद्धान्तेन

$$\text{चि} \times \text{कोज्यान} = \frac{\text{त्रि} \times \text{ज्याक्रा}}{\text{द्यु}} \times \frac{\text{त्रि} \times \text{ज्यालं}}{\text{ज्याअ}} = \frac{\text{स्पक्रां} \times \text{चि} \times \text{१२}}{\text{वि}}$$

$$\therefore \quad \text{स्पक्रां} = \frac{\text{वि} \times \text{कोज्यान}}{\text{१२}}$$

$$\text{चि}^{2} + \text{स्प}^{2}\text{क्रा} = \text{छे}^{2}\text{क्रा} = \frac{\text{१२}^{2} \times \text{त्रि}^{2} + \text{वि}^{2} \times \text{कोज्या}^{2}\,\text{न}}{\text{१२}^{2}}$$

$$\text{ततः}\quad \text{ज्या}^{2}\text{क्रा} = \frac{\text{त्रि}^{2} \times \text{स्प}^{2}\,\text{क्रा}}{\text{छे}^{2}\,\text{क्रा}} = \frac{\text{वि}^{2} \times \text{कोज्या}^{2}\text{न} \times \text{त्रि}^{2}}{\text{१२}^{2} \times \text{त्रि}^{2} + \text{वि}^{2} \times \text{कोज्या}^{2}\,\text{न}}$$

$$= \frac{\text{वि}^{2} \times \text{कोज्या}^{2}\,\text{न}}{\text{१२}^{2} + \frac{\text{वि}^{2} \times \text{कोज्या}^{2}\,\text{न}}{\text{त्रि}^{2}}}$$

अत उपपन्नमाचार्योक्तम् । 'तदा नतज्यात्रिभजीवयोर्यद्वर्गान्तरं तत् पलभाकृतिघ्नम्'–इत्यादि भास्करोक्तमेतदनुरूपमेवेति ॥ २४–२५ ॥

इदानीं यः सममण्डलशङ्कुं वीक्ष्य सूर्यमानयतीत्यस्योत्तरमाह ।

सममण्डलशङ्कुगुणाऽक्षज्या जिनभागजीवया भक्ता ।
फलधनुरर्कोऽजादौ कर्क्यादौ प्रोह्य चक्रार्धात् ॥ २६ ॥

अक्षज्या सममण्डलशङ्कुगुणा जिनजीवया भक्ता फलधनुरजादौ राशिषट्के प्रथमपदेऽर्को भवति कर्क्यादौ द्वितीयपदे तद्धनुश्चक्रार्धात् प्रोह्यार्को ज्ञेय इति ।

Digitized by Google

अत्रोपपत्तिः । त्रिज्याकर्णेऽग्रज्या भुजस्तदा सममण्डलशङ्कुकर्णे का जाता क्रान्तिज्या $= \frac{\text{सशं} \times \text{ज्याग्र}}{\text{त्रि}}$ । ततो जिनज्यया त्रिज्याऽर्कभुजज्या तदेष्ट-क्रान्तिज्यया किं जाताऽर्कभुजज्या $= \frac{\text{सशं} \times \text{ज्याग्र}}{\text{ज्याजि}}$ । शेषवासना सुगमेति॥२६॥

इदानीं यः सममण्डलकर्णं वीक्ष्य सूर्यमानयतीत्यस्योत्तरमाह ।

द्वादशगुणिताऽग्रज्या विषुवच्छायागुणाऽवलम्बज्या ।
सममण्डलकर्णहृते क्रान्तिज्ये भास्करः प्राग्वत् ॥ २७ ॥

अग्रज्या द्वादशगुणिता वाऽवलम्बज्या लम्बज्या विषुवच्छाया-गुणा । उभे सममण्डलकर्णहृते तदा क्रान्तिज्ये भवतः । ततः प्राग्वद्भुज-ज्यया भास्करो भवतीति ।

अत्रोपपत्तिः । 'त्रिज्यार्कघातः श्रुतिहृद्भवः स्यात्'—इति भास्कर-विधिना सममण्डलशङ्कुः $= \frac{१२ \times \text{त्रि}}{\text{सक}}$ । ततस्त्रिज्ययाऽग्रज्या तदा समशङ्कु-कर्णेन का जाता क्रान्तिज्या $= \frac{१२ \times \text{त्रि} \times \text{ज्याग्र}}{\text{त्रि} \times \text{सक}} = \frac{१२ \times \text{ज्याग्र}}{\text{सक}}$ $= \frac{१२ \times \text{ज्याग्र} \times \text{ज्यालं}}{\text{ज्याल} \times \text{सक}} = \frac{\text{वि} \times \text{ज्यालं}}{\text{सक}}$ अत उपपन्नम् ॥ २७ ॥

इदानीं यो रविसममण्डलशङ्कुज्ञोऽसं कथयतीत्यस्योत्तरमाह ।

परमापक्रमजीवा तात्कालिकसूर्यबाहुसङ्गुणिता ।
सममण्डलशङ्कुहृताऽग्रज्या तच्चापमग्रांशाः ॥ २८ ॥

परमापक्रमजीवा जिनज्या तात्कालिकसूर्यबाहुसङ्गुणिता तात्का-लिकसूर्यभुजज्यया गुणा समशङ्कुभक्ताऽग्रज्या भवति । तच्चापमग्रांशाः स्युरिति ।

अत्रोपपत्तिः । त्रिज्यया जिनज्या तदाऽर्कबाहुज्यया किं जाता क्रान्तिज्या $= \frac{\text{ज्याजि} \times \text{ज्याभु}}{\text{त्रि}}$ । समशङ्कुकर्णेन क्रान्तिज्या भुजस्तदा त्रिज्याक-र्णेन किं जाताऽग्रज्या $= \frac{\text{ज्याजि} \times \text{ज्याभु}}{\text{सशं}}$ । शेषवासना सुगमा ॥ २८ ॥

इदानीमुदयैर्विना यो रविलग्नान्तरघटिका वेत्तीत्यस्योत्तरमाह ।

लङ्कोदयचरदलवद्रविलग्नाभ्यां पृथक् पृथक् प्राणान् ।
कृत्वा तदन्तरैक्यं मृगकर्क्यादौ पृथग्लिप्ताः ॥ २९ ॥
मेषादिषु कर्क्यादिषु शोध्या भार्धात् तुलादिषु सभार्धाः ।
मकरादिषु संशोध्याश्चक्राद्रविभुक्तलिप्तोनाः ॥ ३० ॥
लग्नकला यद्यूनाः सचक्रलिप्ता विना स्वराश्युदयैः ।
एवं स्फुटा भवन्त्यर्कलग्नयोरन्तरे प्राणाः ॥ ३१ ॥

भुजज्या परमाल्पद्युज्यया गुण्या स्वद्युज्यया भाज्या फलचापकलाः सम्पातास्तल्लङ्कोदयासवः स्युरिति । भुजज्या जिनज्यागुणा त्रिज्याभक्ता क्रान्तिज्या भवति । सा पलभागुणा द्वादशहृता कुज्या । कुज्या त्रिज्यागुणा द्युज्याहृता चरज्या । तच्चापकलाश्चरासवः स्युरिति । एवं रविभुजज्यया लग्नभुजज्यया च लङ्कोदयचरदलवत् पृथक् पृथक् प्राणान् लङ्कोदयासून् चरासूंश्च कृत्वा मृगादौ तदन्तरं कर्क्यादौ तु तदैक्यं कृत्वोभयो रविलग्नयोर्लिप्ताः स्वदेश्युदयासवो मेषादिषु प्रथमे पदे भवन्ति । कर्क्यादिषु द्वितीये पदे तेऽसवो भार्धाच्छोध्यास्तुलादिषु तृतीये पदे सभार्धा मकरादिषु चतुर्थे पदे चक्रात् संशोध्यास्तदा स्वदेश्युदयासवो भवन्ति । ततो लग्नकला लग्नोदयासवो रविभुक्तलिप्तोना रव्युदयासुभिर्हीना यदि न शुध्यन्ति तदा सचक्रलिप्ता लग्नोदयासवो रव्युदयासुभिर्हीनाः शेषं स्वराश्युदयैर्विनैवमर्कलग्नयोरन्तरे स्फुटाः प्राणा असवो भवन्ति ।

अत्रोपपत्तिः । स्वदेशोदयसाधनविधिना स्फुटा । इह रविरेकः क्रान्तिवृत्तीयप्रदेशो लग्नं चापरस्तयोः स्वदेशोदयासून् मेषादितो गोलचापीयक्षेत्रयुक्त्या प्रसाध्य तदन्तरमिष्टासव आनीताः । मृगकर्क्यादौ तदन्तरैक्यमित्यादिवासना गोलयुक्त्या स्फुटेति ॥ २९-३१ ॥

स्वोदयैर्विनेष्टघटिकाभिर्यो लग्नं वेत्तीत्यस्योत्तरमाह ।

अष्टयमाः शून्यगुणा दिगिषुकलोना रदाः सतिथिलिप्ताः ।
स्वचरार्धांशैरूना विपरीताः संयुता व्यस्तैः ॥ ३२ ॥

Digitized by Google

व्यस्ताश्चाजादीनां कालांशैर्लग्नमिष्टघटिकांशैः ।
अप्राग्घटिकाः कालांशकैर्विनैवं स्वराश्युदयैः ॥ १३ ॥

अष्टयमा विकृतोमा मेषस्य ध्रुवांशाः २७° । ५०' । शून्यगुणा इषुकलोना वृषस्य २९° । ५३' । रदाः सतिथिलिप्ता मिथुनस्य ३२° । १५' ध्रुवांशाः । एते स्वचरार्धांशैरूनास्तथा त एव विपरीता व्यस्तैर्मेषा-दिचरांशैः संयुतास्तत एव व्यस्ताः स्थाप्याः । एवमजादीनां द्वाद-शराशीनां स्वदेशे कालांशाः स्युः । ततः कालांशैरिष्टघटिकांशैश्च लग्ना-नयनविधिना लग्नं लग्नाच्च कालांशकैरिष्टघटिका भवन्ति । एवं स्वरा-श्युदयैर्विनैव लग्नमिष्टघटिकाश्च भवन्तीति ।

अत्रोपपत्तिः । ये लङ्कोदयासवस्ते षष्टिहृता अंशात्मकमुदयमानं लङ्कायां प्रसाध्य ध्रुवांशाः पठितास्तेभ्यश्चरांशैः स्वदेशोदया अंशा-त्मकाः साधितास्ततः सजातीयेष्टघटिकांशैर्लग्नाद्यानयनं सुगममिति । मेषादीनां लङ्कोदयासवः मे· १६७० । वृ· १७९३ । मि· १९३७ । एते षष्टिभक्ता ध्रुवांशाः २७ । ५० ॥ २९° । ५३' ॥ ३२ । १७ प्राचीनानां मते जीवाखण्डानां स्थूलत्वाद्द्वितीयतृतीयोदयौ १७९५ । १९३५ । अतो ध्रुवांशा आचार्योक्ता एवायान्ति ॥ ३२–३३ ॥

इदानीं योऽर्कस्य चरार्धादकं वेत्तीत्यस्योत्तरमाह ।

इष्टार्कचरार्धज्या क्षयवृद्धिज्या द्युरात्रदलगुणिता ।
व्यासार्धेन विभक्ता क्षितिजा द्वादशगुणा भक्ता ॥ १४ ॥
क्रान्त्या विषुवच्छाया क्षितिजेष्टक्रान्तिवर्गयोगपदम् ।
अग्रा क्षितिजापक्रमजीवे त्रिज्यागुणे भक्ते ॥ १५ ॥
अर्काग्रयाऽवलम्बकजीवे दिनकृच्चरासुविज्ञाने ।

इष्टार्कस्य चरार्धज्या सैव क्षयवृद्धिज्या च कथ्यते । सा चरज्या द्युज्यया गुणा व्यासार्धेन विभक्ता क्षितिजा कुज्या भवति । सा द्वादश-गुणा क्रान्त्या क्रान्तिज्यया भक्ता विषुवच्छाया पलभा भवति । क्षितिजायाः कुज्याया इष्टक्रान्तेरिष्टक्रान्तिज्यायाश्च वर्गयोगपदमग्रा भवति । कुज्या-

क्रान्तिजीवे त्रिज्यागुणे ऽर्काग्रया पूर्वानीतया भक्ते फले क्रमेण विनष्ट-चरासुविज्ञानेऽक्षज्यालम्बज्ये भवतः ।

अत्रोपपत्तिः । अक्षक्षेत्रानुपातेन स्फुटा ॥ ३४-३५ ॥

इदानीं योऽक्षचरार्धज्ञोऽर्कं कथयतीत्यस्योत्तरमाह ।

अर्काज्ञाने ज्ञाने विषुवच्छायाचरासूनाम् ॥ १६ ॥
इष्टचरार्धस्य ज्या क्षयवृद्धिज्या तदर्कवधकृत्या ।
त्रिज्याविषुवच्छायावधवर्गौ युतहृतश्छेदः ॥ १७ ॥
व्यासार्धकृतेर्मूलं क्रान्तिज्या व्यासदलगुणा भक्ता ।
जिनभागजीवया लब्धचापमर्कः पदैः प्राग्वत् ॥ १८ ॥

पलभाचरासूनां ज्ञानेऽर्काज्ञाने वक्ष्यमाणः प्रकारो ज्ञेयः । इष्टचरार्धस्य ज्या क्षयवृद्धिज्या भवतीति पूर्वमेव प्रतिपादितम् । तस्याश्चरज्याया अर्काणां द्वादशानां च या वधकृतिस्तया त्रिज्यापलभयोर्वधवर्गौ युतौ हृतश्च व्यासार्धकृतेस्त्रिज्यावर्गस्य छेदो हरो भवति । तेन त्रिज्याकृतिर्हृता या लब्धिस्तस्या मूलं क्रान्तिज्या स्यात् । सा व्यासदलगुणा जिनभागजीवया भक्ता फलचापं पदैः प्राग्वदर्को भवति ।

अत्रोपपत्तिः । क्षितिजेऽग्राग्रांशाः कर्णः । यद्ध्रुवप्रोते क्रान्तिः कोटिः । नाडीवलये चरांशा भुजः । कोटिसम्मुखकोणो लम्बांशाः । ततस्त्रिभसत्तावयवसिद्धान्तेन ।

$$\text{त्रि} \times \text{ज्याच} = \frac{\text{त्रि} \times \text{ज्याक्रा}}{\text{द्यु}} \times \frac{\text{त्रि} \times \text{ज्याच}}{\text{ज्याल}} = \text{स्पक्रा} \times \text{त्रि} \times \text{वि} \div १२$$

$$\text{अतः} \quad \text{स्पक्रा} = \frac{१२ \times \text{ज्याच}}{\text{वि}} \text{ ।}$$

$$\text{त्रि}^2 + \text{स्प}^2\text{क्रा} = \text{छे}^2\text{क्रा} = \frac{\text{त्रि}^2 \times \text{वि}^2 + १२^2 \times \text{ज्या}^2\text{च}}{\text{वि}^2}$$

$$\text{ततः} \quad \text{ज्या}^2\text{क्रा} = \frac{\text{त्रि}^2 \times \text{स्प}^2\text{क्रा}}{\text{छे}^2\text{क्रा}} = \frac{१२^2 \text{ज्या}^2\text{च} \times \text{त्रि}^2}{\text{त्रि}^2 \times \text{वि}^2 + १२^2 \times \text{ज्या}^2\text{च}} \cdots (१)$$

$$= \frac{\text{त्रि}^2}{\dfrac{\text{त्रि}^2 \times \text{वि}^2 + १२^2 \times \text{ज्या}^2\text{च}}{१२^2 \times \text{ज्या}^2\text{च}}} \text{ । अत उपपद्यते मूलोक्तम् ।}$$

अथ (१) अस्मिन् भाज्यहारौ त्रिज्यावर्गेणापवर्त्य

$$\text{ज्या}^2\text{क्रा} = \frac{१२^2 \times \text{ज्या}^2\text{च}}{\text{वि}^2 + \frac{१२^2 \times \text{ज्या}^2\text{च}}{\text{त्रि}^2}} \text{ । } \therefore \text{ज्याक्रा} = \frac{१२ \times \text{ज्याच}}{\sqrt{\text{वि}^2 + \frac{१२^2 \times \text{ज्या}^2\text{च}}{\text{त्रि}^2}}} \text{ ।}$$

अनेन 'चरज्यकार्काभिहतास्त्रिमौर्व्या भक्ता'–इत्यादिभास्करो-क्तमाचार्योक्तानुरूपमुपपद्यते ॥ ३५ $\frac{1}{2}$ – ३८ ।

इदानीं छायातो यश्चरार्धमिष्टायाः कथयतीत्यस्योत्तरमाह ।

विषुवच्छायाभक्ता स्वचरार्धज्येष्टयाऽन्यया गुणिता ।
लब्धस्य चापमिष्टच्छायायाश्चरदलप्राणाः ॥ ३९ ॥

स्वदेशीयचरज्यान्ययेष्टदेशीयपलभया गुणिता विषुवच्छायाभक्ता स्वदेशीयपलभया भक्ता लब्धस्य चापमिष्टच्छायाया इष्टपलभायाश्चरदल-प्राणाश्चरासवो भवन्तीति ।

अत्रोपपत्तिः । यदि द्वयोर्देशयोः पलभे वि_1, वि_2 कल्प्येते तयो-रेकक्रान्तौ द्वयोर्देशयोश्चरे च_1, च_2 । तदा गोलयुक्त्या

$$\text{ज्याच}_1 = \frac{\text{वि}_1 \times \text{ज्याक्रा}}{१२} \times \frac{\text{त्रि}}{\text{द्यु}} \text{ ।}$$

$$\text{ज्याच}_2 = \frac{\text{वि}_2 \times \text{ज्याक्रा}}{१२} \times \frac{\text{त्रि}}{\text{द्यु}}$$

$$\text{अतः } \frac{\text{ज्याच}_1}{\text{ज्याच}_2} = \frac{\text{वि}_1}{\text{वि}_2} \text{ । ततः } \text{ज्याच}_2 = \frac{\text{वि}_2 \times \text{ज्याच}_1}{\text{वि}_1} \text{ ।}$$

अत उपपद्यते यथोक्तम् ॥ ३९ ॥

इदानीं य इष्टचरार्धादथवा छायां कथयतीत्यस्योत्तरमाह ।

स्वचरार्धज्याभक्ता विषुवच्छायेष्टचरदलासूनाम् ।
गुणिता ज्ययेष्टचरदलविषुवच्छायाफलं भवति ॥ ४० ॥

विषुवच्छाया स्वचरार्धज्याभक्ता इष्टचरदलासूनां ज्यया गुणिता फलमिष्टचरदलसम्बन्धिनी विषुवच्छाया भवति ।

अत्रोपपत्तिः । पूर्वप्रकारवैपरीत्येन स्फुटा ॥ ४० ॥

Digitized by Google

इदानीं यो मध्यच्छायातोऽक्षविदृविमानयति दिवाकरज्ञोऽक्षमानयतीति प्रश्नद्वयोत्तरमाह ।

मध्यच्छायाग्रमुदक् शङ्कुतलाद्दक्षिणा नता भागाः ।
दक्षिणतो यदि सौम्याः स्वाक्षांशाः सर्वदा याम्याः ॥४१॥
द्युदलनताक्षांशानामेकदिशामन्तरं युतिर्भेदे ।
क्रान्त्यंशाः प्राग्वदतः क्रान्त्यंशैरेवमक्षांशाः ॥ ४२ ॥

मध्यच्छायायां शङ्कुतलाच्छङ्कुमूलादुदक् सदा दिनार्धीया नता भागा दक्षिणा वेद्याः । यदि छायायं दक्षिणतस्तदा नतभागाः सौम्या उत्तरा ज्ञेयाः । स्वाक्षांशाश्च सर्वदा याम्या एव ज्ञेयाः । अथ मध्यच्छायातो मध्यच्छायाकर्णं प्रसाध्य । तत्कर्णेन मध्यच्छाया भुजस्तदा त्रिज्यया किमित्यनुपातेन रविदृग्ज्यामानीय तच्चापांशा नतभागा ज्ञेयाः । द्युदले नतभागानामक्षांशानां चैकदिशामन्तरं भेदे दिग्भेदे युतिः क्रान्त्यंशा भवन्ति । अतः प्राग्वदर्कः साध्यः । एवं क्रान्त्यंशैर्मध्यनतांशैश्च संस्कारैरक्षांशा भवन्ति ।

अत्रोपपत्तिः । 'दिनार्धशङ्कुतेस्त्रिज्यकाद्‌ध्या हृतायाः स्वकर्णेन'-इत्यादिभास्करविधिना स्फुटा ॥ ४१–४२ ॥

इदानीं योऽप्यर्कज्ञो लम्बाक्षांशान् कथयतीत्यस्योत्तरमाह ।

उदयज्येष्टापक्रमजीवाकृत्यन्तरात् पदं क्षितिजा ।
व्यासार्धगुणा क्षितिजा भक्तोदयजीवयाऽक्षज्या ॥४३॥
उदयज्यया विभक्ता क्रान्तिज्या व्यासदलगुणा लम्बः ।
द्वादशगुणिता क्षितिजा विषुवच्छायाहृता क्रान्तिः ॥४४॥

उदयज्याया अग्राया इष्टक्रान्तिजीवायाश्च वर्गान्तरात् पदं मूलं क्षितिजा कुज्या भवति । सा क्षितिजा व्यासार्धगुणाऽग्रया भक्ताऽक्षज्या स्यात् । क्रान्तिज्या च व्यासदलगुणा अग्रया विभक्ता लम्बो लम्बज्या भवेत् । एवं कुज्या द्वादशगुणा विषुवच्छायाहृता फलं क्रान्तिः क्रान्तिज्या भवतीति ।

अत्रोपपत्तिः । अतश्चैवानुपातेन स्फुटा ॥ ४३–४४ ॥

इदानीं य उदयेऽस्ते वाऽग्रां वेत्तीत्यस्योत्तरमाह ।

यष्टिव्यासार्धेऽग्रा प्राच्यपरा भास्करान्तरांशज्या ।
द्विगुणमुदयास्तसूत्रं तत्त्रिज्याकृतिविशेषपदम् ॥ ४५ ॥

अभीष्टयष्टिव्यासार्धेन जलवत्समीकृतायां भूमौ क्षितिजवृत्तमुत्पाद्योदये रविबिम्बं विद्धयेत् । तस्मिन् यष्टिव्यासार्धे वृत्ते यत्रोदये रविबिम्बपातस्थो या च प्राच्यपरा रेखा तयोरन्तरांशज्या यष्टिव्यासार्धेऽग्रा भवति । तत्त्रिज्यावर्गान्तरपदं द्विगुणमुदयास्तसूत्रं भवतीति ।

अत्रोपपत्तिः । गोलयुक्त्याऽग्रासंस्थानेन स्फुटा ॥ ४५ ॥

इदानीं यो दिनार्धे नतोन्नतज्ये ताभ्यां विषुवच्छायाक्षज्यालम्बान् वेत्तीत्यादीनामुत्तरमाह ।

द्युदले शङ्कुनतज्ये प्राच्यपराया यदि स्थितः शङ्कुः ।
उदगूना दक्षिणतस्तदन्तरेणाधिकाऽर्काग्रा ॥ ४६ ॥
उत्तरगोलेऽग्रोनं तदन्तरं याम्यगोलगे सूर्ये ।
शङ्कुतलं शङ्कुहृतं विषुवच्छायाद्विषट्कगुणम् ॥ ४७ ॥
शङ्कुतलशङ्कुगुणिते त्रिज्ये तद्वर्गयुतिपदविभक्ते ।
अक्षावलम्बकज्ये द्युदलस्थेऽर्केऽन्यदा द्युदलात् ॥ ४८ ॥

द्युदले मध्याह्ने वेधेन शङ्कुनतज्ये उन्नतनतज्ये साध्ये । मध्याह्नच्छायामवगम्य पूर्वविधिना मध्या नतोन्नता भागा ज्ञेयाः । उन्नतज्या शङ्कुर्नतज्या च याम्योत्तररेखायां शङ्कुमूलाद्गोलगर्भावधिरेव शङ्कोर्भुजः स्यादिति गोलयुक्त्या सर्वं स्फुटम् । उत्तरगोले यदि स माध्याह्निकः शङ्कुः प्राच्यपराया रेखाया उदक्स्थितस्तदा तदन्तरेण प्राक् प्रदर्शितभुजेनाऽग्रोना । यदि दक्षिणतः स्थितः शङ्कुस्तदा तदन्तरेणाग्राऽधिका कार्या । सूर्ये याम्यगोलगे तदन्तरं भुजाग्रयोर्योगमेवं शङ्कुतलं शङ्कुमूलोदयास्तसूत्रयोरन्तरं भवेत् । तच्छङ्कुतलं द्विषट्कगुणं द्वादशगुणं मध्याह्नशङ्कुना हृतं

विषुवच्छाया भवति । त्रिज्या स्थानद्वये स्थाप्या । एकत्र शङ्कुतलगुणाऽन्यत्र शङ्कुना गुणिता । उभयत्र तयोः शङ्कुतलशङ्क्वोर्वर्गयुतिपदेन हृत्वा विभक्ता फले क्रमेणार्के कुवलस्थेऽक्षज्यालम्बज्ये भवतः । कुवलादन्यदाऽन्यस्मिन् काले इत्यस्यार्थे सम्बन्धः ।

अत्रोपपत्तिः । गोलयुक्त्या शङ्कुतल-भुजाद्यासंस्थानेन शङ्कुतलं भुजः शङ्कुः कोटिर्धृतिः कर्ण इत्यक्षक्षेत्रतोऽनुपातेन च स्फुटा ॥ ४६–४८ ॥

इदानीं कुवलादन्यदा पलभासाधनार्थमाह ।

छायावृत्तेऽर्काग्रा कर्णगुणा व्यासदलहृताऽर्काग्रा ।
प्राच्यपरा शङ्क्वन्तरमुत्तरयाम्यं तदूनयुता ॥ ४९ ॥
उत्तरगोले याम्ये विषुवच्छायाऽग्रयाऽन्तरं हीनम् ।
एवं विषुवच्छाया युक्तविहीनाऽन्तरेणाग्रा ॥ ५० ॥

प्रथमार्यायाः पूर्वार्धं त्रिप्रश्नाध्यायस्य चतुर्थार्यापूर्वार्धसमं व्याख्यातमेव । अन्यत् सर्वं च त्रिप्रश्नाध्यायस्य ५८–६० आर्याभिः स्फुटम् ॥ ४९–५० ॥

इदानीं क्रान्तिज्यादीनां संस्थानमाह ।

बाहुः क्रान्तिः कोटिः क्षितिजा तद्वर्गयुतिपदं कर्णः ।
अग्रोदयास्तसूत्राद्दक्षिणतो दृश्यशङ्कुतलम् ॥ ५१ ॥

क्रान्तिः क्रान्तिज्या भुजः । कुज्या कोटिः । तद्वर्गयुतिपदमग्रा कर्ण इत्यवसेयम् । भास्करेण क्रान्तिज्या कोटिः कुज्या भुज इति कथितं तत्र न कश्चिद्विशेषो भुजकोट्योः संस्थानभेदाभावात् । दृश्यशङ्कुतलं दिवाशङ्कुतलमुदयास्तसूत्राद्दक्षिणतो भवति ।

अत्रोपपत्तिः । अक्षक्षेत्रसंस्थानेन 'सूत्राद्दिवा शङ्कुतलं यमाशम्'-इत्यादिभास्करविधिना स्फुटा ॥ ५१ ॥

इदानीं यश्चरदलं विना दिनरात्र्यर्धं करोतीत्यस्योत्तरमाह ।

त्रिज्याद्युवृत्तिज्यैक्यान्तरमुद्गणितयोर्दिनार्धान्त्या ।
व्यासार्धचरार्धज्यान्तरसंयोगेऽर्धरात्र्यन्त्या ॥ ५२ ॥

उत्क्रमजीवाचापं क्रमजीवाचापसहितमधिकं चेत् ।
दिनरात्र्यर्धप्राणाः पृथग्विना चरदलप्राणैः ॥ ५३ ॥

उदयितरयोरुत्तरदक्षिणगोलयोस्त्रिज्यायाः क्षयवृद्धिज्यायाश्चरज्यायाश्चैक्यमन्तरं च दिनार्धेऽन्त्या स्यात् । एवमुदग्दक्षिणगोलयोस्त्रिज्यायाश्चरज्यायाश्चान्तरसंयोगे रात्र्यर्धेऽन्त्या स्यात् । द्वयोरन्त्ययोरुत्क्रमचापं पृथक् पृथक् चरदलप्राणैर्विना दिनरात्र्यर्धप्राणा भवन्ति । चेत् त्रिज्यातोऽधिकमुत्क्रमज्यामानं भवेत् तदा यदधिकं तत्क्रमचापेन त्रिज्याचापं (खखवेदबाणासवः ५४००) सहितं कार्यमेवमुत्क्रमचापमानं तदा ज्ञेयमिति ।

अत्रोपपत्तिः । अन्त्यासंस्थानेन स्फुटा त्रिज्याधिकोत्क्रमज्याचापं ज्योत्पत्त्या स्फुटमिति । एवं चरज्याज्ञानतो दिनरात्रिप्रमाणानयनमिह मन्दानन्दकरम् । वस्तुतश्चरज्याज्ञाने तत्क्रमचापतश्चरासवो लाघवेन विदिता भवन्ति तेभ्यो दिनरात्र्यर्धमाने च सुखेन भवत इति सुधीभिश्चिन्त्यम् ॥ ५२–५३ ॥

इदानीं ताभ्यामवावलम्बको यः करोतीत्यस्योत्तरमाह ।

दिवसार्धोत्क्रमजीवाधिकक्रमज्याऽधिका दिनार्धान्त्या ।
व्यासार्धदिनार्धान्त्यान्तरं चरज्याऽक्षजीवाऽतः ॥ ५४ ॥

दिवसार्धोत्क्रमजीवा दिनार्धान्त्या भवति । यदा दिवसार्धं चखाभ्रबाणासुतोऽधिकं तदा यदधिकं तत्क्रमज्यया त्रिज्याऽधिका कार्या । एवं दिनार्धान्त्या स्यात् । व्यासार्धस्य त्रिज्याया दिनार्धान्त्यायाश्चान्तरं चरज्या भवति । अतश्चरज्यायाः पूर्वोक्तेन विधिनाऽक्षज्या साध्या । अतश्चरज्याज्ञानेन चरज्यातोऽक्षज्याज्ञानं भवतीति ज्ञेयम् ।

अत्रोपपत्तिः । अन्त्यासंस्थानेनैव स्फुटा ॥ ५४ ॥

इदानीं योऽनस्तमयार्कोन् करोतीत्यस्योत्तरमाह ।

स्वाहोरात्रार्धसमा यत्राक्षज्यावलम्बकः क्रान्त्या ।
मेषादिगस्य तावद्यावत् कर्क्यादिगस्य रवेः ॥ ५५ ॥

नास्तमयस्तत्र तुलामकरादिस्थस्य नोदयोऽर्कस्य ।
तन्मध्यान्तरलिप्ता मध्यमभुक्त्या हृता दिवसाः ॥५६॥

मेषादिगस्य मेषादिराशित्रयस्थस्य रवेर्येन यस्मिन् प्रदेशेऽक्षज्या स्वाहोरार्धसमा स्वद्युज्यासमा । अवलम्बको लम्बज्या च क्रान्त्या क्रान्तिज्यया समः । पुनः कर्क्यादिगस्य रवेर्द्युज्यासमाऽक्षज्या क्रान्तिज्यासमा लम्बज्या च यावत् तावत् तत्र देशेऽर्कस्य नास्तमयः । एवं तुलामकरादिस्थस्य रवेर्द्युज्यासमाऽक्षज्या क्रान्तिज्यासमा लम्बज्या यावत् तावत् तत्र देशेऽर्कस्य नोदयः । यदा मेषादिगस्य रवेः क्रान्तिज्यासमा लम्बज्या जाता तदा यो मध्यमरविस्तथा कर्क्यादिगस्य रवेः क्रान्तिज्यासमा यदा लम्बज्या तदा यो मध्यमरविस्तन्मध्ययोरन्तरे या लिप्तास्ता रविमध्यमगत्या हृता दिवसा भवन्ति । तावत् कालपर्यन्तमुत्तरक्रान्तेर्लम्बाधिकत्वात् तत्रार्कस्यानस्तमयः । दक्षिणक्रान्तेर्लम्बाधिकत्वात् तावत् तत्र रवेरनुदय इति ।

अत्रोपपत्तिः । 'लम्बाधिका क्रान्तिरुदक् च यावत् तावद्दिनं सन्ततमेव तत्र'-इत्यादिभास्करविधिना स्फुटा ॥ ५५-५६ ॥

इदानीं कोणच्छायातोऽर्कानयनमाह ।

कोणच्छायाकृतिदलपदविषुवच्छाययोरुदग्नतलम् ।
प्राच्यपराया यद्यैक्यमन्तरं याम्यदिक्स्थं चेत् ॥ ५७॥
कोणच्छायाकर्णेन भक्तमवलम्बकेन सङ्गुणितम् ।
इष्टापक्रमजीवा त्रिप्रश्नोक्त्या स्फुटोऽर्कोऽतः ॥ ५८ ॥

कोणवृत्तस्थे रवौ या द्वादशाङ्गुलशङ्कुच्छाया सा कोणच्छाया । तद्वर्गार्धस्य यत् पदं तच्छङ्कुमूलप्राच्यपररेखान्तरं भुजो भवति कोणवृत्तस्थे रवौ भुजकोट्योस्तुल्यत्वात् । यदि प्राच्यपराया रेखाया उदक् नतलं शङ्कुमूलं भवेत् तदा भुजविषुवच्छाययोरैक्यं चेद्याम्यदिक्स्थं शङ्कुमूलं तदा तयोरन्तरं कर्णवृत्ताग्रा भवति । तदैक्यमन्तरं वा लम्बकेन लम्बज्यया सङ्गुणितं कोणच्छायाकर्णेन भक्तमिष्टापक्रमजीवा भवति । अतस्त्रिप्रश्नोक्त्या स्फुटोऽर्कः साध्यः ।

अत्रोपपत्तिः । कर्णवृत्ताग्राज्ञानं व्याख्यातः स्फुटम् । कर्णवृत्ताग्रा त्रिज्यागुणा छायाकर्णेन भक्ताऽग्रा स्यात् । सा लम्बज्यागुणा त्रिज्याभक्ता क्रान्तिज्या स्यादेवमत्र त्रिज्यातुल्ययेोर्गुणहरयोस्तुल्यत्वानाशे कृते चाचार्योक्तमुपपद्यते ॥ ५७-५८ ॥

इदानीमात्मप्रशंसामाह ।

मध्यगतिस्पष्टगतित्रिप्रश्नान् सोत्तरान् विजानाति ।
स भवत्याचार्यो वै ब्रह्मोक्तान् योऽन्यतन्त्रज्ञः ॥ ५९ ॥

योऽन्यतन्त्रज्ञ आर्यभटादितन्त्रज्ञो गणको ब्रह्मोक्तान् सोत्तरान् मध्यगति-स्पष्टगति-त्रिप्रश्नान् विजानाति विशेषेण जानाति । स वै निश्चयेन गणितस्कन्धे आचार्यो भवतीति ॥ ५९ ॥

इदानीमध्यायोपसंहारमाह ।

अध्यायः पञ्चदशस्त्रिप्रश्नस्योत्तरं यदिह नोक्तम् ।
तदार्याषष्ट्याऽयं गोलादुत्प्रेक्ष्य बुद्धिमता ॥ ६० ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते त्रिप्रश्नोत्तराध्यायः पञ्चदशः ॥ १५ ॥

त्रिप्रश्नस्योत्तरं नामायं पञ्चदशोऽध्याय आर्याषष्ट्या मया कृत इति । इहास्मिन्नध्याये यत् किञ्चिन्मया नोक्तं बुद्धिमता गोलात् तदुत्प्रेक्ष्य ज्ञेयम् । गोलयुक्त्योत्थितां कल्पनां कृत्वा तत् सर्वं बोध्यं यतो गोलबोध एवमेव फलं यदनुक्तमपि बुद्धिमता ज्ञायत इति ।

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितः प्रश्नविधौ सुधाकरेण ॥

इति श्रीकृपालुदत्तसुतसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्तनूतनतिलके त्रिप्रश्नोत्तराध्यायः पञ्चदशः ॥ १५ ॥

अथ प्रश्नोत्तराध्यायः ।

तत्रादौ तदारम्भप्रयोजनमाह ।

ग्रहणग्रहसंयोगग्रहच्चारतन्त्रेषु सर्वविदाम् ।
आचार्यश्छेद्यकविदू यतस्ततश्छेद्यकं वक्ष्ये ॥ १ ॥

यतो ग्रहण–ग्रहसंयोग–ग्रहचारतन्त्रेषु सर्वविदां मध्ये छेद्यकविदाचार्यो भवति ततस्तस्माच्छेद्यकं वक्ष्ये । संशयं छेदयतीति छेद्यकः । येन क्षेत्ररचनया ग्रहणादिकं प्रदर्श्यते स छेद्यक इति ॥ १ ॥

इदानीं छेद्यकदानार्थमपात्राण्याह ।

दुर्जनकृतघ्नशत्रुप्रतिकञ्चुककारिपतितमूर्खेभ्यः ।
छेद्यकमदेयमेभ्यो ददतः सुकृतायुषोर्नाशः ॥ २ ॥

प्रतिकञ्चुककारी पिशुनः । शेषं स्पष्टम् ॥ २ ॥

इदानीं छेद्यकदानार्थं पात्राण्याह ।

उषिताय दीर्घकालं शिष्याय गुणाधिकाय भक्ताय ।
पात्रे वा सुहृदे वा सुताय वा छेद्यकं देयम् ॥ ३ ॥

स्पष्टार्थम् ॥ ३ ॥

इदानीं प्रश्नानाह ।

विषुवदपमण्डलदिशो वलनज्याभिस्त्रिगृहवृत्ते ।
सम्पर्के ग्रासं वा यो वेत्ति च्छेद्यकज्ञः सः ॥ ४ ॥

यो वलनज्याभिस्त्रिगृहवृत्ते ग्रहचिन्ज्यावृत्ते विषुववृत्तस्य क्रान्तिवृत्तस्य च दिशो वेत्ति । वा सम्पर्के छाद्यच्छादकयुतौ ग्रासं वेत्ति स एव छेद्यकज्ञ इति । एवमत्र प्रश्नद्वयम् ॥ ४ ॥

इदानीमन्यान् प्रश्नानाह ।

सम्पर्कमण्डले यः प्रग्रहमोक्षौ पृथक् स्वविक्षेपात् ।
मध्यान्मध्यग्रासं परिलिखति च्छेद्यकज्ञः सः ॥ ५ ॥

यः सम्पर्कमण्डले मानैक्यार्धमण्डले स्वस्वविक्षेपात् पृथक् पृथक् प्रग्रहमोक्षौ स्पर्शमोक्षौ परिलिखति । मध्यात् मध्यकालिकाद्विक्षेपाच्च मध्यग्रासं परिलिखति स एव छेद्यकज्ञः । एवमत्र प्रश्नत्रयम् ॥ ५ ॥

इदानीमन्यान् प्रश्नानाह ।

परिलिखतीष्टग्रासं तात्कालिकबाहुकोटिकर्णैर्यः ।
अथ वा निमिलनोन्मीलनद्वयं छेद्यकज्ञः सः ॥ ६ ॥

यस्तात्कालिकबाहुकोटिकर्णैर्यद्वाञ्छाकालोद्भवैरिष्टग्रासं परिलिखति । अथ वा निमीलनमुन्मीलनं चेति द्वयं यः परिलिखति स एव छेद्यकज्ञः । एवमत्र प्रश्नत्रयम् ॥ ६ ॥

इदानीमन्यान् प्रश्नानाह ।

ग्राह्यं परिलिख्यैक्यं परिलिखति ग्रहगृहादिकं तत्र ।
भूमौ यः फलके वा परिवर्त्य च्छेद्यकज्ञः सः ॥ ७ ॥

यो ग्राह्यं छाद्यबिम्बमैक्यं मानैक्यार्धवृत्तं च परिलिख्य तत्र भूमौ वा परिवर्त्य विपरीतं कृत्वा फलके पीठे ग्रहगृहादिकं परिलिखति स एव छेद्यकज्ञः । एवमत्र प्रश्नद्वयम् ॥ ७ ॥

इदानीमन्यान् प्रश्नानाह ।

देशान्तरं यथागतदृक्प्रग्रहणान्तराद्विजानाति ।
यो रेखातोऽध्वानं पर्वेष्टदिनात् स तन्त्रज्ञः ॥ ८ ॥

यो यथागतदृक्प्रग्रहणान्तराद्गणितागतदृष्टिजन्यस्पर्शकालयोरन्तराद्देशान्तरं विजानाति । यो रेखातो रेखादेशादध्वानं देशान्तरयोजनानि विजानाति । इष्टदिनात् पर्व विजानाति । इष्टदिनादग्रे कतिभिर्दिनैः पर्व ग्रहणं भविष्यतीति वा इष्टदिनस्य पश्चात् कतिभिर्दिनैः पर्व गतमिति । एवमत्र प्रश्नत्रयम् ॥ ८ ॥

इदानीमन्यान् प्रश्नानाह ।

यो वेत्ति राहुमार्गं तेनेष्टग्रासमिष्टकालाद्वा ।
ग्रासं ग्रासात् कालं जानाति च्छेद्यकज्ञः सः ॥ ९ ॥

यो ग्रहणे राहुमार्गे भूभामार्गे वेत्ति । तेन मार्गयोर्व्यासं वेत्ति । इष्टकालाद्ग्रासं वेत्ति ग्रासाच्च कालमिष्टकालं जानाति स एव छेद्यकज्ञः । एवमत्र प्रश्नचतुष्टयम् ॥ ९ ॥

इदानीं पूर्वोक्तानां प्रश्नानामुत्तरार्थं विशेषमाह ।

ग्रसप्रमाणयोगग्राह्यग्राहकदलानि वलनज्या ।
विक्षेपश्चापरतो भवति रवेः पूर्वतः शशिनः ॥ १० ॥

ग्रासप्रमाणयोगो मानैक्यम् । ग्राह्यदलं छाद्यबिम्बार्धम् । ग्राहकदलं ग्राहकबिम्बार्धम् । इति वस्तुत्रयं ग्रहणपरिलेखे चावश्यकम् । अथ वलनज्या । विक्षेपः स्पर्शकालिकः शरश्च । रवेर्ग्रहणेऽपरतः पश्चिमतः शशिनश्चन्द्रस्य ग्रहणे पूर्वतो भवति ॥ १० ॥

इदानीमङ्गुललिप्ता आह ।

दिनदलविभक्तजिनगुणदिनगतशेषाल्पजीवयेषुगुणम् ।
त्रिज्यार्धमधिकमङ्गुललिप्ताखिगृहज्यया भक्तम् ॥ ११ ॥

दिनगतशेषयोर्मध्ये या अल्पा घटयस्ता जिनगुणा दिनदलभक्ता या लब्धिस्तत्सङ्ख्या ज्या ग्राह्या तयेषुगुणितं पञ्चगुणं त्रिज्यार्धमधिकं त्रिगृहज्यया त्रिज्यया भक्तमङ्गुललिप्ता अङ्गुले लिप्ता भवन्ति । ताभिर्लिप्ताभिरेकमङ्गुलं भवतीत्यर्थः ।

अत्रोपपत्तिः । 'त्रिज्योद्धृतस्तत्समयोत्थशङ्कुः'—इत्यादिभास्करविधिना । तत्राचार्येण दिनदले नवत्यंशास्तदेष्टोन्नतकालेन किमित्यनुपातेनोन्नतांशाः स्थूलाः कल्पिताः । एवमुन्नतांशाः $=\frac{९० \times उका}{दिद}$ । एते षष्टिगुणाः कलाः । कलास्तत्त्वाश्विहृता लब्धा जीवा $=\frac{६० \times ९० \times उक}{२२५ \times दिद}$ $=\frac{२४ \times उका}{दिद}$ । अत्र या निरग्रा लब्धिस्तत्सङ्ख्यका जीवैव स्वल्पान्तरात् शङ्कुस्ततोऽङ्गुललिप्ता भास्करविधिना $=\frac{५}{२}+\frac{शं}{त्रि}=\frac{\frac{५ त्रि}{२}+शं}{त्रि}$ । अत उपपन्नम् ॥ ११ ॥

इदानीं प्रकारान्तरेणाङ्गुललिप्ता आह ।

ज्यानाचेज्याद्वितीयदङ्गुललिप्तास्त्रिसङ्गुणात् त्रिहतात् ।
ज्याद्वितययुक्तिभक्तात् वितुषकयवोदरैः षड्भिः ॥१२॥

(ज्या ना चेज्ज्याद्वितयादङ्गुललिप्तास्त्रिसङ्गुणत्रियुतात् ।
ज्याद्वितययुक्तभक्ताद्वा सतुषयवोदरैः षड्भिः ॥ १२ ॥)

अयं साधुपाठो विभाति ।

चेन्ना शङ्कुरेव ज्या तदा ज्याद्वितयाद् द्विघ्नशङ्कोः किंविशिष्टात् त्रिसङ्गुणत्रियुतात् त्रिघ्नत्रिज्यायुतात् पुनः किंविशिष्टात् ज्याद्वितयभक्तयुक्तात् द्विगुणत्रिज्यायुतात् ततो द्विगुणत्रिज्यया भक्ताच्च वाऽङ्गुललिप्ता भवन्ति। अङ्गुलं तु षड्भिः सतुषयवोदरैस्तुषसहितयवमध्यवर्त्तिप्रदेशैः प्रसिद्धमिति ।

अत्रोपपत्तिः । पूर्वप्रकारेणाङ्गुललिप्ताः $= \dfrac{\dfrac{\text{५ त्रि}}{\text{२}} + \text{शं}}{\text{त्रि}}$

$= \dfrac{\text{५ त्रि} + \text{२ शं}}{\text{२ त्रि}} = \dfrac{\text{२ त्रि} + (\text{३ त्रि} + \text{२ शं})}{\text{२ त्रि}}$ । अत उपपन्नम् ॥ १२ ॥

इदानीं परिलेखार्थे लघूकरणमाह ।

व्यासवलनापवर्त्तनमेकेनेष्टेन कार्यमितरेषाम् ।
अङ्गुलकलाभिरेवं शशिसितपरिलेखसूत्राणाम् ॥ १३ ॥

एकेन केन चिदिष्टेन व्यासवलनापवर्त्तनं ग्राह्यग्राहकबिम्बमानानां वलनादीनामपवर्त्तनं कार्यं लाघवेन स्वल्पस्थान एव परिलेखप्रदर्शनाय । इतरेषां शशिसितपरिलेखसूत्राणां शशिनो बिम्बार्धस्य सितकलानां परिलेखसूत्रस्य स्वभासूत्रस्य चाङ्गुलकलाभिः प्रागानीताभिर्लघूकरणायापवर्त्तनं कार्यमिति ।

'विषुवदपमण्डलदिशो वलनज्याभिः'–इत्यादिप्रश्नद्वयस्योत्तरं ग्रहणाधिकारे प्रदर्शितमेव । अन्योत्तरार्धमग्रे वक्ष्यति ॥ १३ ॥

इदानीं सम्पर्कमण्डले च इत्यादिप्रश्नोत्तरमाह ।

प्रथमे वलनज्याभिर्दिशो द्वितीये यथादिशं भानोः ।
आद्यन्तौ विक्षेपौ मध्यान्मध्योऽन्यथा शशिनः ॥ १४ ॥

शशिविक्षेपाग्रेभ्यः परिलिख्य ग्राहकप्रमाणेन ।
प्रग्रहमोक्षग्रासा भूपरिलेखे भवन्त्येवम् ॥ १५ ॥

प्रथमे ग्राह्यवृत्ते वलनज्याभिस्तात्कालिकक्रान्तिवृत्तचापस्य स्वस्थान्तरात् सरलाकारस्य वलनसूत्रस्य वलनज्याभिर्दिशो ज्ञेयाः । द्वितीये मानैक्यार्धवृत्ते वलनसूत्रोपरि लम्बरूपौ भानोर्यथादिशमाक्रान्तौ स्पर्शमोक्षकालिकौ विक्षेपौ देयौ । मध्यवलनसूत्रे च मध्याद्ग्राह्यकेन्द्रात् मध्यो विक्षेपो देयः । शशिनश्चन्द्रस्यान्यथा विपरीताशा विक्षेपा देयाः । ततः शशिविक्षेपाग्रेभ्यो ग्राहकप्रमाणेन व्यासेन वृत्तं परिलिख्य प्रग्रहमोक्षग्रासा ज्ञेयाः । एवं भूपरिलेखे भूमौ लिखिते परिलेखे स्पर्शमोक्षग्रासा भवन्तीति ।

अत्रोपपत्तिः । 'ग्राह्यार्धसूत्रेण विधाय वृत्तम्'—इत्यादिभास्करविधिना ज्ञेया । यथाऽऽचार्येण ग्रहणकाले क्रान्तिवृत्तचापादीनि सरलानि कल्पितानि तथा भास्करेणापि स्वीकृतानि अन्यथा समभूमौ चापाकाररेखाभिः परिलेखरचनाऽसम्भव एवेति सुधीभिश्चिन्त्यम् ॥ १४–१५ ॥

इदानीं यः परिलिखतीष्टग्रासमित्यादिप्रश्नस्योत्तरमाह ।

पश्चात् प्रग्रहणे प्राग्मोक्षे रविबिम्बमध्यतो बाहुः ।
स्ववलनसिद्धज्यादिशि विपरीतः शीतकरमध्यात् ॥ १६ ॥
भानुमतो बाह्वग्राद्यथादिशं कोटिरन्यथा शशिनः ।
रविशशिमध्यात् कर्णस्तिर्यक् कर्णाग्रकोटियुतेः ॥ १७ ॥
परिलेखं ग्राह्यस्य ग्राहकमानेन पूर्ववत् कृत्वा ।
तात्कालिकसंस्थानं निमीलनोन्मीलने चैवम् ॥ १८ ॥

इष्टकाले ग्रहणाधिकारविधिना बाहुः कोटिः कर्णश्चानेयः । तत्र वलनज्या च साध्या तद्वशेन ग्राह्यकेन्द्राद्वलनसूत्रं च ज्ञेयम् । ततः स्ववलनसिद्धज्यादिशि वलनसूत्रे प्रग्रहणे स्पार्शिकेष्टकाले रविबिम्बमध्यतो रविकेन्द्रात् पश्चात् पश्चिमायां दिशि मोक्षे मौक्षिकेष्टकाले प्राक् प्राच्यां दिशि बाहुर्भुजो देयः । शीतकरमध्यात् चन्द्रग्रहणे चन्द्रकेन्द्राद्वि-

परीतो बाहुर्देयः । स्पार्शिकः प्राच्यां मौचिकः प्रतीच्यां दिशि—इत्यर्थः । भानुमतः सूर्यस्य बाहुर्यथाद्यथा दिशं शशिनश्चन्द्रस्यान्यथा विपरीतदिक्का कोटिर्देया । ततो रविशशिमध्याद्रवेर्वा चन्द्रस्य केन्द्रात् कोट्यग्रपर्यन्तं तिर्यक् कर्णो देयः । कर्णाग्रकोटियुतेः केन्द्रात् ग्राहकमानेन व्यासेन वृत्तं विलिख्य पूर्ववत् परिलेखं कृत्वा ग्राह्यस्य खण्डितच्छादकबिम्बस्य तात्कालिकसंस्थानं ज्ञेयम् । एवं निमीलनोन्मीलनकालिकभुजकोटिक-र्णादिभिर्निमीलनोन्मीलने च ज्ञेये इति ।

अत्रोपपत्तिः । इष्टकालिकभुजकोटिकर्णसंस्थानेन भास्करोक्तग्रास-परिलेखेन च स्फुटा ॥ १६–१८ ॥

इदानीं प्रकारान्तरेण परिलेखमाह ।

विक्षेपगुणा त्रिज्या मानैक्यार्धोद्धृताप्तचापांशाः ।
आद्यन्तयोर्यथादिशमर्कस्येन्दोर्विपर्यस्ताः ॥ १९ ॥
तत्स्ववलनांशयोगान्तरजीवाग्राह्यमानदलघातात् ।
त्रिज्यालब्धज्याग्रे ग्रहमोक्षौ प्राग्वदर्केन्द्वोः ॥ २० ॥
हृतया व्यासार्धेनार्कचन्द्रमानार्धलिप्तिकागुणया ।
मध्यमवलनज्या दक्षिणोत्तरा दिग्गमनया मध्या ॥२१॥
प्राग्वत् प्रसार्य विक्षेपलिप्तिका ग्राहकप्रमाणेन ।
विक्षेपाग्रात् ग्राह्यं परिलिख्य ग्राससंस्थानम् ॥ २२ ॥

त्रिज्या विक्षेपगुणा मानैक्यार्धेनोद्धृता । आप्तचापांशा आद्यन्त-योः स्पर्शमोक्षयोरर्कस्य यथादिशमिन्दोश्चन्द्रस्य विपर्यस्ताः शराशातो विपरीता ज्ञेयाः । तेषामाप्तचापांशानां वलनांशानां समदिक्त्वे योगो भिन्नदिश्यन्तरं कार्यम् । ततस्तज्ज्याया ग्राह्यबिम्बार्धस्य च घातात् त्रिज्यया या लब्धिस्तत्समा जीवा पूर्वापररेखोपरि यथादिक्का सम्यक्पा कार्या यथा ज्याग्रं ग्राह्यबिम्बपरिधौ भवेत् । एवं ज्याग्रस्थाने स्पर्शो वा मोक्षो भवेदर्केन्द्वोरिति । मध्यमवलनज्या मध्यकालिकवलनज्यैव दक्षिणो-त्तरा दिग्गमनयेति । मध्यमवलनज्या दक्षिणोत्तरा दिग्गमना । सा सूर्यग्रहणे

रविमानार्धेन चन्द्रग्रहणे चन्द्रमानार्धेन हता त्रिज्याभक्ता तया लब्ध्या दक्षिणोत्तररेखातो मध्या मध्यग्रहसंस्था भवति । एतदुक्तं भवति ग्राह्यबिम्बार्धपरिणता मध्यवलनज्या दक्षिणोत्तररेखातो ज्यारूपा यथाविह्ना देया यथा ज्यायं ग्राह्यबिम्बपरिधौ भवेत् । ग्राह्यकेन्द्रान्मध्यज्यायं प्राग्वद्रेखां प्रसार्य तत्र ग्राह्यकेन्द्रात् विक्षेपलिप्तिकाश्च प्रसार्य विक्षेपाग्राद्ग्राहक-प्रमाणेन व्यासेन वृत्तं विलिख्य ग्राह्यं ग्राह्यबिम्बसम्बन्धि ग्राससंस्थानं ज्ञेयम् ।

अत्रोपपत्तिः । मानैक्यवृत्ते पूर्वापरवलनसूत्रयोर्मध्ये वलनांशाः । वलनसूत्रं मानैक्यार्धवृत्तपरिधौ यत्र लग्नं यत्र च स्पार्शिकस्य वा मौक्षिकस्य शरस्य चाग्रं तदन्तरांशानयनार्थमनुपातः । यदि मानैक्यार्धेन शरस्तदा त्रिज्यया किं लब्धचापांशास्तदन्तरांशाः । चन्द्रग्रहे शरो विपरीत-दिक्को भवति तेन तदा ते विपरीताः । एवं तच्चापवलानांशसंस्कारतः केन्द्राच्छराग्रगतरेखापूर्वापररेखयोरन्तरांशास्तज्ज्या ग्राह्यबिम्बार्धपरिणता कृता । अतस्तज्ज्याग्रे ग्राह्यबिम्बपरिधौ स्पर्शो वा मोक्षो भवेत् । दक्षिणोत्तररेखामध्यवलनसूत्रयोरन्तरे मध्यवलनांशाः । ग्राह्यबिम्बपरिधौ मध्यसंस्थानज्ञानार्थं तज्ज्या ग्राह्यबिम्बार्धपरिणता कृता । ततो केन्द्रान्मध्यवलनसूत्रे मध्यशरं प्रसार्य तदग्रकेन्द्राद्ग्राहकवृत्तं विलिख्य ग्राससंस्थानं प्रदर्शितमिति ॥ १९–२२ ॥

इदानीं प्रकारान्तरेणेष्टग्रासार्थं परिलेखमाह ।

त्रिज्या विक्षेपगुणा भक्तेष्टग्रासकर्णलिप्ताभिः ।
प्राग्वत् फलचापस्ववलनांशयोगान्तरं तत्*था जीवा ॥ २३ ॥
मानार्धगुणा व्यासार्धभाजिता पूर्ववत् प्रसार्या स्यात् ।
कर्णं प्रसार्य मध्यादग्रं कर्णेन मध्याग्रात् ॥ २४ ॥
तात्कालिकसंस्थानं परिलिख्य ग्राहकप्रमाणेन ।
एवं निमीलनोन्मीलने च परिलेख्ये एवं वा ॥ २५ ॥

* 'तथा जीवा' इत्यस्य स्थाने 'तज्ज्या' इति पाठः साधुः ।

त्रिज्येष्टकालिकशरेण गुणा इष्टग्राससम्बन्धिन्या याः कर्णलिप्ता-स्ताभिर्भक्ता फलं प्राग्वत् सूर्यग्रहणे शरदिक् चन्द्रग्रहणे व्यस्तशरदिक् ज्ञेयम्। ततः फलचापस्य तात्कालिकस्ववलनांशस्यैकदिशि योगो भिन्नदि-श्यन्तरं कार्यम् । योगान्तरे कृते यज्जातं तज्ज्या मानार्धेन ग्राह्यबिम्बा-र्धेन गुणा व्यासार्धेन भक्ता लब्धिः पूर्ववत् पूर्वापररेखोपरि ज्यावल्लम्बरू-पा प्रसार्या स्यादन्यथा ज्यायं ग्राह्यबिम्बपरिधौ भवेत् । ततो ग्राह्यबिम्बम-ध्यादयं तज्ज्याग्रं प्रति कर्णं कर्णसूत्रं प्रसार्य मध्याग्रात् ग्राह्यबिम्बकेन्द्रा-ग्रात् तस्मिन् कर्णसूत्रे कर्णेन समां रेखां दत्वा तदग्राद्ग्राहकप्रमाणेन ग्राहकबिम्बमानेन वृत्तं परिलिख्य तात्कालिकसंस्थानं ज्ञेयम्। एवं तात्का-लिकशरात् मानान्तरार्धकर्णात् निमीलनोन्मीलनसंस्थाने भवतः । एवं वा प्रकारान्तरेण परिलेखो भवति ।

अत्रोपपत्तिः । इष्टकाले पूर्वापरवलनसूत्रयोरन्तरे वलनांशसमः कोणो ग्राह्यबिम्बकेन्द्रे । वलनसूत्रे केन्द्राद्बाहुः । बाह्वग्रात् शरः कोटिः । केन्द्रात् कोट्यग्रपर्यन्तं कर्णः । कर्णकोटियुतौ च ग्राहककेन्द्रम् । तत्र कर्णाग्रे शरस्तदा त्रिज्याग्रे किम् । लब्धस्य चापं वलनकर्णसूत्रयोरन्तरे केन्द्रलग्नकोणः । तद्वलनांशयोः संस्कारेण कर्णसूत्रपूर्वापररेखयोरन्तरे कोणो जातः । तज्ज्या ग्राह्यबिम्बार्धपरिणता कृता । पूर्वापररेखोपरि लम्बरूपतद्विशेषेण ज्याग्रं यत्र ग्राह्यबिम्बपरिधौ लग्नं केन्द्रात् तदुपरिगा कर्णरेखैवेहाचार्येण साधिता तत्र कर्णप्रमाणं केन्द्रात् प्रसार्य कर्णाग्रेण ग्राहककेन्द्रेण तात्कालिकग्राससंस्थानमानीतमिति सर्वं प्राक् परिलेखत एव स्फुटमिति ॥ २३–२५ ॥

इदानीं फलकोपरि कथं परिलेखः कर्त्तव्य इत्यस्योत्तरमाह ।

प्राच्यपरे विपरीते विपरीतं मध्यवलनमर्कन्द्वोः ।
पूर्ववदन्यत् सर्वं फलके स्वे ग्रहणपरिलेखाः ॥ २६ ॥

फलके प्राच्यपरे विपरीते कार्ये । भूमौ यः प्राग्बिन्दुः पश्चिमबि-न्दुश्च फलके स पश्चिमबिन्दुः प्राग्बिन्दुः कार्य इति । अर्केन्द्वोर्मध्यवलनं

यथादिशमागतं विपरीतं कार्यम्। अन्यत् सर्वं पूर्ववदेव कर्म कर्त्तव्यम्। एवं स्वेऽभीष्टे फलके ग्रहणपरिलेखाः प्रग्रहमोक्षयासा भवन्तीति।

अत्रोपपत्तिः। फलके प्राच्यपरे विपरीते ये कृते मध्यवलनं च यद्विपरीतं कृतं तत्सर्वं पूर्वापरमार्गेण परिवर्त्याकाशे फलकनिवेशने यथादिशं परिलेखार्हमुत्पद्यत इति स्फुटम्॥ २६॥

इदानीं देशान्तरं यथागतमित्यादिप्रश्नद्वयोत्तरमाह।

दृग्गणितप्रग्रहयोरन्तरघटिकाफलं ग्रहे मध्ये।
देशान्तरं धनं तत् प्राक् प्रग्रहणे क्षयं पश्चात्॥ २७॥
प्रग्रहणान्तरघटिका भूपरिधिहता विभाजयेत् षष्ट्या।
फलयोजनेष्ववन्त्याः प्राग्वत् प्रागपरयोर्देशः॥ २८॥

दृष्ट्या वेधेन यः प्रग्रहणः स्पर्शकालो यश्च गणितेन तयोरन्तरं घट्यात्मकं देशान्तरं तद्वशेन फलं चालनफलं देशान्तरं मध्ये ग्रहे प्राक् प्रग्रहणे दृश्ये धनं पश्चात् क्षयं कार्यम्। गणितोत्थकालादादौ प्रग्रहणे दृश्ये धनं पश्चात् क्षयमित्यर्थः। अथ देशान्तरयोजनान्याह। प्रग्रहणयोर्दृग्गणितस्पर्शकालयोरन्तरघटिका भूपरिधिहताः स्पष्टभूपरिधिहता घातं षष्ट्या विभाजयेत् फलयोजनेषु प्राग्वत् गणितोत्थकालादनन्तरमादौ च वेधोपलब्धस्पर्शे अवन्त्याः प्रागपरयोर्देशो भवतीति।

अत्रोपपत्तिः। 'प्राग्भूविभागे गणितोत्थकालादनन्तरं प्रग्रहणं विधोः स्यात्'–इत्यादिभास्करविधिना स्फुटा॥ २७–२८॥

इदानीमिष्टदिनाद्यः पर्व विजानातीत्यस्योत्तरमाह।

पातार्कयुतिर्भार्धात् चक्राद्वोनाधिका कला भक्ता।
तद्गतियुत्याप्तदिनैरासन्नोऽर्कस्य मासान्ते॥ २९॥
पर्वेन्दोः पक्षान्ते प्रागधिकोना भवति पश्चात्।
तन्मध्येन ग्रहणं यदि भानोः पञ्चजिनभरसाः
५। २४। २७। ६॥ ३०॥

Digitized by Google

इन्दोर्विषया छियमा दिवाकराश्चिविषयास्तदुच्चस्य
५ । १२ । १२ । ५३ ।
व्योमातिधृतिर्द्वियुगानि रसशराश्चन्द्रपातस्य
० । १९ । ४२ । ५६ ॥ ३१ ॥
खं नन्दा छियमाः खा-
ब्धयो० । ९ । २२ । ४० गृहाद्यास्तथेष्टपर्वगुणाः ।
क्षेप्याः पर्वण्येष्ये शोध्या मध्ये त्वतिक्रान्ते ॥ ३२ ॥
ग्रहणे यथा रवीन्द्वोः स्पष्टीकरणाद्यमुक्तवज्ज्ञात्वा ।
एवं पर्वज्ञानं ग्रहणज्ञानं स्फुटं गणितात् ॥ ३३ ॥

पातस्यार्कस्य रवेश्च युतिर्भार्धाच्चक्राद्वा यावदूना वाऽधिका सोऽनाधिककला । अत्र जात्येकवचनम् । सा तयोः पातार्कयोर्गतियुत्या भक्ता । आप्तदिनैर्मासान्ते दर्शान्ते आसन्नेऽर्कस्य पर्व पक्षान्ते वासन्ने हीन्दोः पर्वेष्टदिनात् प्रागभवति यदि अधिका कला । यदूना तदाऽऽप्तदिनैः पश्चात् पर्व भवति । यदि तन्मध्ये दर्शान्ते वा पूर्णान्ते आसन्ने ग्रहणं न स्यात् तदा तदग्रे वा पश्चात् षण्मासे ग्रहणसम्भवोऽतो रव्यादिषु षाण्मासिकं चालनमाह । पञ्चजिनभेत्यादि सुगमम् । षण्मासोत्तरवृद्ध्या पर्वसम्भवोऽतो गृहाद्या इष्टपर्वसङ्ख्यागुणा एष्यपर्वणि मध्ये निर्णीतमध्यग्रहणकालिकरव्यादौ क्षेप्याः । अतिक्रान्ते व्यतीते ग्रहणे च शोध्यास्तदा तत्पर्वणि मध्यमौ रविचन्द्रौ पातश्च भवति । ततो यथा रवीन्द्वोः स्पष्टीकरणाद्यमुक्तमस्ति तथा सर्वमुक्तवज्ज्ञात्वा तिथ्यन्तमानादिकं साध्यम् । एवं तदा गणितात् पर्वज्ञानं ग्रहणज्ञानं च स्फुटं भवतीति ।

अत्रोपपत्तिः । यदा सपातार्कश्चक्रार्धेन वा चक्रेण समस्तदा शराभावादवश्यमेव ग्रहणं यदि स च सपातार्को मासान्ते वा पक्षान्ते । अन्यथा यदा न ग्रहणसम्भवस्तदा षाण्मासिकचालनेन पुनः पुनरग्रे पृष्ठे वा दर्शान्तपूर्णान्तकालयोः सपातार्कयुतिश्चक्रार्धेन चक्रेण वा समाऽन्वेषणीया । यदा ग्रहणसम्भवस्तदा स्पष्टीकरणाद्यं कर्म स्फुटार्थं कर्तव्यम् ।

Digitized by Google

अत्र विशेषविचारचातुरीप्रपञ्चार्थं 'षण्मासैरन्त पञ्चवर्जितयुतैः पञ्चे-ऽथवा लोकये'त्यादि ग्रहलाघवश्लोकस्य मत्कृता वासना विलोक्ये-ति ॥ २९–३३ ॥

इदानीं विशेषमाह ।

चत्वारोऽत्रापवर्त्तग्रहणान्यर्कस्य शीतरश्मेश्च ।
दृष्टोदयास्तसमया तथाऽर्करात्रिदलयोश्च केन्द्रस्य ॥३४॥

(चत्वार्यत्रापवर्त्तग्रहणान्यर्कस्य शीतरश्मेश्च ।
दृष्टोऽद्यास्तसमये त्वराचिदलयोश्च केन्द्रस्य ॥)

अयं साधुपाठो विभाति ।

उदयसमयेऽस्तसमये दिनार्धे रात्रिदले च अर्कस्य रवेः शीतर-श्मेश्चन्द्रस्य चात्र चत्वारि अपवर्त्तग्रहणानि लघुग्रहणानि दृष्ट्वा रवेश्च-न्द्रस्य च केन्द्रस्य गणकैः परीक्षा कार्येत्यध्याहार्यमिति ॥ ३४ ॥

इदानीमात्मप्रशंसामाह ।

सर्वपदानामन्ते तिथ्यन्ते ज्ञानमिन्दुभास्करयोः ।
ग्रहणे च कृते स्पष्टे जिष्णुसुतब्रह्मगुप्तेन ॥ ३५ ॥

सर्वपदानां सर्वपादकरणानामन्ते विनाशे जिष्णुसुतब्रह्मगुप्तेन तिथ्यन्ते इन्दुभास्करयोः स्पष्टं ज्ञानं कृतं तद्वशतो रवीन्द्वोर्ग्रहणे च स्पष्टे कृते । ग्रहणस्पष्टार्थं सर्वपादकारणानां दृग्गणितैक्याभावादन्तो विनाशो जातस्तस्माद्ब्रह्मगुप्तेन सर्वं स्फुटं कृतमित्यर्थः ॥ ३५ ॥

इदानीं श्रीषेणादितन्त्राणि दूषयति ।

दूरभ्रष्टे ग्रहणे श्रीषेणार्यभटविष्णुचन्द्रेषु ।
ग्रहगणितविसंवादात् संवादः काकतालीयः ॥ ३६ ॥

श्रीषेणार्यभटविष्णुचन्द्रेषु तदुक्ततन्त्रेषु ग्रहगणितविसंवादाद्ग्रह-गणितस्याशुद्धत्वाद्रविचन्द्रयोर्ग्रहणे दूरभ्रष्टे स्तः । यदि कदाचित् संवा-दोऽर्थाद्ग्रहणद्वयं घटते तर्हि स संवादः काकतालीयो ज्ञेय इति । यथा काकागमनसमये यदि तालपतनं भवेत् तर्हि दैवात् तत्पतनं ज्ञेयं न काका-गमनकारणेनेति ॥ ३६ ॥

इदानीं पुनरात्मप्रशंसामाह ।

स्फुटतिथ्यन्तज्ञानं यन्नार्यभटादिभिः कृतमतीतैः ।
ब्राह्मे स्फुटं कृतं तज्जिष्णुसुतब्रह्मगुप्तेन ॥ ३७ ॥

अतीतैः प्राचीनैरार्यभटादिभिर्यत् स्फुटतिथ्यन्तज्ञानं पर्वसाधनार्थं न कृतं तद्ब्राह्मे सिद्धान्ते जिष्णुसुतब्रह्मगुप्तेन स्फुटं कृतमिति ॥ ३७ ॥

इदानीं स्वसिद्धान्तप्रशंसामाह ।

ब्राह्मोक्तार्केन्दुतदुच्चपातदेशान्तरस्फुटीकरणैः ।
स्फुटमिन्द्वर्कग्रहणद्वितयं न स्फुटमतीतोक्तम् ॥ ३८ ॥

अतीतोक्तं प्राचीनोक्तमार्यभटादिभिरुक्तमिन्द्वर्कग्रहणद्वितयं न स्फुटम् । शेषं स्पष्टार्थम् ॥ ३८ ॥

इदानीं यो वेत्ति राहुमार्गमित्यस्योत्तरमाह ।

विक्षेपाग्रेषु त्रीन् विन्दून् प्रग्रहणमध्यमोक्षेषु ।
कृत्वा तन्मत्स्यद्वयमध्यगयोः सूत्रयोर्योगात् ॥ ३९ ॥
विन्दुपरिलेखरेखा ग्राहकमार्गः प्रसार्य सूत्रे द्वे ।
आद्यन्ताभ्यां मध्यगमुच्छ्राय्य स्थूलमेवं वा ॥ ४० ॥

पूर्वसाधितपरिलेखे स्पर्शमध्यमोक्षशराग्रेषु त्रीन् विन्दून् कृत्वा तैर्मत्स्यद्वयमुत्पादयेत् ततस्तन्मत्स्यद्वयमध्यगयोस्तन्मुखपुच्छगयोः सूत्रयोर्यो योगस्तस्मात् केन्द्राद्विन्दुत्रयशिरोऽवगाहि वृत्तं यद्भवति सा विन्दुपरिलेखरेखा ग्राहकमार्गो भूभामार्गो भवति । वाऽद्यन्ताभ्यां स्पर्शमोक्षविन्दुभ्यां मध्यगं मध्यशराग्रगं द्वे सूत्रे उच्छ्राय्य प्रसार्य चैवं स्थूलं यथा स्यात् तथा ग्राहकमार्गो ज्ञेयः ।

अत्रोपपत्तिः । स्पर्शमध्यमोक्षशराग्रेषु त्रीन् विन्दून् ग्राहकमार्गस्थान् विज्ञाय ग्राहकमार्गं च वृत्तचापखण्डं स्थूलं परिकल्प्य त्रिस्पृग्वृत्तस्य केन्द्रं मत्स्यद्वयसूत्रयुतिरेवानीतमिति प्रसिद्धम् । वा स्पर्शमध्यविन्द्वन्तरेणैकं मार्गखण्डं मध्यान्मोक्षविन्दुपर्यन्तमन्यत् मार्गखण्डं च स्थूलं प्रसाधितम् । 'ये

स्पर्शमुक्त्योर्विशिखाग्रचिह्ने'–इत्यादि भास्करोक्तमेतदनुरूपमेव । वृत्ताकारो ग्राहकमार्गः प्रसिद्धसूर्यसिद्धान्तेऽपि कल्पित इति ॥ ३९–४० ॥

इदानीमिष्टकालादिष्टग्रासं यो जानातीत्यस्योत्तरमाह ।

बिन्दुद्वयान्तरं स्थितिदलेन हृतमिष्टनाडिकागुणितम् ।
ग्राह्ये फलाङ्गुलस्थं ग्राहकमानेन परिलिख्य ॥ ४१ ॥

इष्टग्रासोऽर्केन्द्वोर्निमीलनोन्मीलने च भानुमतोः ।
उर्वरितः प्राग्मध्यात् पश्चाद्वेष्टाङ्गुलस्थेन ॥ ४२ ॥

मध्यस्याद्येनान्तेन वाऽन्तरं गुणितमिष्टघटिकाभिः ।
स्थित्यर्धनाडिकाहृतमृणधनमूनाधिके मध्ये ॥ ४३ ॥

आद्यन्ते च पृथक्के विक्षेपः कोटिरुक्तवद्ग्रासः ।
विक्षेपान्तरमेवं गुणमिष्टग्रासलिप्ताभिः ॥ ४४ ॥

स्पार्शिकेष्टकाले स्पर्शमध्यबिन्द्वोरन्तरं ग्राहकमार्गे ग्राह्यं मौक्षिकेष्टे च मध्यमोक्षबिन्दुद्वयान्तरं ग्राह्यं तत् स्वस्वस्थितिदलेन नाडिकात्मकेन हृतमिष्टनाडिकागुणितं कार्यम् । फलमङ्गुलात्मकं स्पार्शिकेष्टे स्पर्शचिह्नादग्रे मध्यचिह्नोन्मुखं ग्राहकमार्गे देयमेवं फलाङ्गुलस्थं चिह्नं ग्राह्यम् । मौक्षिकेष्टे मोक्षचिह्नान्मध्योन्मुखं देयम् । एवं तत्र ग्राहककेन्द्रं तस्माद्ग्राहकमानेन वृत्तं परिलिख्यार्केन्द्वोरिष्टग्रासः संमीलनोन्मीलने च भानुमतो रविचन्द्रयोर्ज्ञेये । अथ प्रकारान्तरेणेष्टकालादिष्टग्रासमानयति । अत्र स्पार्शिकेष्टे पूर्वानीताङ्गुलफलदानेन यो मध्यात् प्राग्मार्ग उर्वरितो मौक्षिकेष्टे च मध्यात् पश्चाद्यो मार्ग उर्वरितः स वेष्टस्थितिखण्डसम्बन्धी मार्गो भुज इति । अथोभयोरिष्टयोः क्रमेण मध्यस्य बाणस्याद्येन स्पार्शिकबाणेन सह मध्यबाणस्यान्तेन मौक्षिकबाणेन सह यदन्तरं तदिष्टघटिकाभिर्गुणं स्वस्थित्यर्धनाडिकाहृतं फलमाद्यन्ते स्पर्शशरे मोक्षशरे च मध्ये मध्यशरे ऊनाधिके क्षयं धनं कार्यमेवं तात्कालिको विक्षेपः कोटिर्भवेत् । भुजस्तु पूर्वं साधित एव । तत उक्तवद्ग्रहणाधिकारविधिना

Digitized by Google

भुजकोटिभ्यां कर्णमानीय कर्णोनं मानैक्यखण्डमिष्टग्रास मानेय इति। विक्षेपान्तरमित्यस्यापि सम्बन्ध इति।

अत्रोपपत्तिः। परिलेखसंस्थानेनानुपातेन च स्फुटा ॥ ४१-४४ ॥

इदानीं ग्रासात् कालानयनमाह।

मध्यग्रासकलाहृतमूर्ध्वं घनं चोक्तवत् स्वविक्षेपः।
तेन ग्रासात् कालः कालादसकृच्च विक्षेपः ॥ ४५ ॥

एवं स्पार्शिकेष्टे स्पर्शमध्यशरान्तरं मौक्षिकेष्टे मध्यमोक्षशरान्तरमिष्टग्रासनिघ्ताभिर्गुणं मध्यग्रासकलाहृतं फलं चोक्तवत् 'ऋणधनमूनाधिके मध्ये आद्यन्ते च पृथक्के'—इत्यादिविधिना ऋणं धनं कृत्वा तात्कालिकः स्वविक्षेपः साध्यः। तेन विक्षेपेण स्वेष्टग्रासाच्च ग्रहणाधिकारविधिना कालः साध्यः। ग्रासोनमानैक्यदलं कर्णः। विक्षेपः कोटिः। तद्वर्गान्तरपदं ग्राहकमार्गखण्डं भुजो बीष्टस्थितिखण्डभुजयन्तरांशघातसमस्ततो विलोमेन कालानयनं कार्यमित्यर्थः। कालादसकृच्च विक्षेपः। तस्मात्कालाद् ग्रहणाधिकारविधिना तात्कालिकौ चन्द्रपातौ कृत्वा पुनः शरः साध्यस्तस्मात् पुनः काल एवमसकृत् कालः स्फुटो भवति।

अत्रोपपत्तिः। मध्यग्रासेन विक्षेपान्तरं तदेष्टग्रासेन किमित्यनुपातेन समानवेगेन विक्षेपान्तरं प्रसाध्य तत्संस्कारतस्तात्कालिकविक्षेपः स्थूलः साधितस्तद्ग्रासात् कालश्च प्रथमं स्थूल आगतस्ततोऽसकृद्विधिना सूक्ष्मः कालो भवतीति ॥ ४५ ॥

इदानीमयमध्यायो यत्नेन गोपनीय इत्याह।

ग्रहणोत्तरं न देयं शपथैरपि दत्तसुकृतनाशाय।
ग्रहणं स्फुटमार्यभटश्रीषेणाद्यैर्यतस्तेन ॥ ४६ ॥

शपथैरपि ग्रहणोत्तरमिदं न देयं यतो दत्तसुकृतनाशाय भवति। दत्तस्य सुकृतनाशाय भवतीत्यर्थः। किमर्थमिदं गोपनीयमित्याह। यत आर्यभटश्रीषेणाद्यैस्तेन स्फुटं ग्रहणं न भवतीति ॥ ४६ ॥

विकल्पशेषानन्वयम् संभाव्यमानसर्वान्वयप्रकारनि-
रासे तदनभ्युपगमाद्भवति । तत्राम्यतमान्वयाभ्युपगमे
तु तदन्वयोक्तखण्डनमेव निग्रहः । अत्रोत्तरयोः परा-
ज्ञानापादनव्यामोहात् प्रमादाद्वोक्तिसंभवः । प्रथ-
मस्य वक्तुरकौशलेनापि संभवः यथा नित्या वेदाः
अनादिश्च संसारः अकर्तृकं च क्षित्यादि जगद्वैचित्र्यं
च न निर्हेतुकमिति । अत्रान्वितमेव वदेदित्युपदेशः ॥

विवक्षितक्रमं वादवादाङ्गावयवादिकम् ।
विपर्यस्तं वदति चेत् प्राप्नुवाप्राप्तकालता॥९॥

आदिशब्देनात्रावयवांश्च कथारम्भं च संगृ-
ह्णाति । अयमिह कथायां विवक्षितक्रमः । सभ्यानुविधे-
यसंवरणानन्तरं तत्सन्निधावुभयप्रसिद्धव्याकरणादि-
व्यवहारमभ्युपगम्य कथाविशेषादिनियमः करणीयः ।
ततः सभ्योपक्षिप्ते प्रतिवादिना वा पृष्टे प्रमाणमभि-

वादयुक्तस्य वाक्यस्य संभावितं नानाविधमन्वयं विकल्प्य
तस्य सर्वस्यान्वयस्य दोषाभिधाने सति अवशिष्टान्वया-
भावादपार्थकं भवतीत्यर्थः । तत्र विकल्पितेषु मध्ये ।
तदन्वयोक्तखण्डनमेव तत्तदन्वयप्रकाराणामुक्तदोष एव
निग्रहस्थानमपार्थकमित्यर्थः । उत्तरयोर्व्यवधानादनन्वय-
विकल्पशेषानन्वययोः ॥

व्याकरणादीत्यादिशब्देन प्राकृतपैशाचिकसंस्कृतप-
द्यबन्धादिव्यवहारो गृह्यते । कथाविशेषनियमः आवाभ्यां
कथात्रये ऽन्यतमकथायामेव वक्तव्यमिति नियमः कर्तव्य

धाय संक्षेपतो विस्तरतो वा हेत्वाभासा उद्धरणीयाः । प्रतिवादिनाप्यनुभाषणपुरःसरं वादिसाधनं दूषयित्वा स्वपक्षे साधनमभिधेयम् तत आभासोद्धारः कर्तव्यः वितण्डायां तु दूषणमात्र एव पर्यवसातव्यमिति । तत्र प्रथमं साधनमभिधाय पश्चाद्व्यवहारादिकं नियच्छतः कथारम्भविपर्यासः । आभासोद्धारानन्तरं साधनं प्रयुञ्जानस्य वादाङ्गविपर्यासः । प्रतिवादी तु यदि स्वपक्षसाधनानन्तरं परपक्षमुपालभते तदा वादविपर्यासः । अवयवविपर्यासस्तु कृतकत्वाच्छब्दोऽनित्य इति । अनित्यः शब्द इत्यवयवांशविपर्यासः । एवं वादजल्पयोः पञ्चविधो विपर्यासः । इतरत्र चतुर्विध

इत्यर्थः । सभ्योपक्षिप्ते त्वमेनं प्रत्यनुमर्थं साधयत्विति सभ्यैरुपस्थापिते ऽर्थे न तु स्वाभिमत इत्यर्थः । प्रतिवादिना वा सभ्यैरुपस्थापिते ऽप्यस्मिन् साध्ये किं प्रमाणमिति प्रतिवादिनापि पृष्टे ऽर्थे । यद्वा वादकथायां त्वदीये साध्ये किं प्रमाणमिति प्रतिवादिनापि पृष्टे ऽर्थे । अनुभाषणपुरःसरं वाद्युक्तं सकलं स्वदूष्यमात्रं वानुभाष्येत्यर्थः । अभिधेयं वक्तव्यम् । दूषणमात्र एवेति । वितण्डायां प्रतिवादिनः स्वपक्षासद्भावे ऽपि तस्य साधनाभावाद्वादिसाधनदूषणमेव कर्तव्यमित्यर्थः । व्यवहारादिकमिति । व्यवहारोऽत्र संस्कृताद्यन्यतममेवावाभ्यां व्यवहर्तव्यमिति निश्चयः । आदिशब्देन सभ्यानुविधेयवरणादिकं गृह्यते । अनित्यः शब्द इत्यवयवांशविपर्यासः स च

इति। केचित्तु प्रतिवाद्युद्भावित एवाभास उद्धरणीयः साधनाभिधानानन्तरं स्वयमेवाभासोद्धारे त्वनवस्थाप्रसङ्गात् । तथा च न वादाङ्गविपर्यास इत्याचक्षते। आचार्यास्तु व्याघातावधिराशङ्केत्यनवस्थापरिहारं पश्यन्तः प्राचीनमेव पक्षमुररीकुर्वन्ति । भूषणकारस्तु विपर्ययेणार्थप्रतीतिसम्भवादपशब्दवन्नियमकथायामेवैतन्निग्रहस्थानमिति मन्यतेस्म। तदयुक्तम्। अनुपक्षिप्ते साधने निराश्रयदोषोद्धारासम्भवादुपक्षिप्तं दूष्यमदूषयित्वा प्रतिवादिनोपि स्वपक्षसाधनस्यानर्हत्वादवयवतदंशयोः क्रमावश्यम्भावस्य प्रथमाध्याये

धर्मिणि धर्माश्चिन्त्यन्त इति न्यायात् सिद्धधर्मिणमुद्दिश्य तत्राप्रसिद्धसाध्यधर्मविधिरुचितः अत्र तथाकरणात् प्रतिज्ञांशविपर्यास इत्यर्थः। इतरत्रेति । वादविपर्यासाभावात् वितण्डायां चतुर्विधविपर्यास एवेत्यर्थः। अनवस्थाप्रसङ्गात् प्रतिवाद्यभिमतदूषणजातमाशङ्क्य समाधानेन कथाप्रबन्धानुच्छेदप्रसङ्गादित्यर्थः । व्याघातावधिराशङ्केति। यावत् न स्ववचनव्याहतिप्रसक्तिस्तावदेवाशङ्का प्रवर्तते तत आशङ्कानवस्थानं न प्रसज्यत इति पश्यन्त इत्यर्थः। विपर्ययेण कथारम्भविपर्यासादिकरणादिना। नियमकथायां विवक्षितक्रमेणैवावाभ्यां वक्तव्यमिति नियमपूर्विकायां कथायाम् । कथामात्रस्य क्रमापेक्षास्तीत्युपपादयति । अनुपक्षिप्त इति । प्रथमाध्याय इति। प्रमाणतद्विशेषतदवयवादिलक्षणं प्रथमेऽध्याये क्रमेण

साधितत्वाज्ज्ञार्थप्रतीतिसम्भावनामात्रेण प्रयोगाङ्गी-कारे कृतवासदिवादरभूतदिवेत्यादीनामपि प्रयोग-प्रसङ्गात्। यथाकथञ्चिदर्थप्रतीतिः साध्येत्यभिमानात् सभाक्षोभाद्वास्योक्तिसम्भवः। अवयवविपर्यासवच-नमप्राप्तकालमितिसूत्रे ऽवयवशब्दः कथाभागोपलक्ष-णार्थः। अत्र चाकाङ्क्षाक्रमेण ब्रूयादिति संक्षेपार्थः॥ ९॥

आत्मसिद्धान्तसिद्धेषु वादाङ्गावयवादिषु।
एकस्यावचने प्राहुरन्यूनं न्यूननिग्रहम्॥ १०॥

आदिशब्देनात्र कथारम्भमुपादत्ते। तेन यथा स्वसिद्धान्तेष्ववश्योपादेयत्वेन सिद्धा वादतदंशावय-वकथारम्भाणां मध्ये यस्य कस्यचिदवचने न्यूननाम निग्रहस्थानं भवति। व्यवहारनियमादिकथारम्भमकृ-त्वा साधनं प्रयुञ्जानस्य कथारम्भन्यूनम्। साधनं प्रयु-ज्याभासोद्धारमकुर्वाणस्य तत्करणेन वा साधनमप्रयु-ञ्जानस्य वादांशन्यूनम्। प्रतिवादिनोपि स्थापनामदूष-

---

वदता सूत्रकारेण समर्थितत्वादित्यर्थः। कृतवासेत्यादेर-र्थो मया यथावत्तत्त्वतो ज्ञायते। कथाभागोपलक्षणार्थः कथारम्भवादतदंशावयवतदंशाख्यकथाभागमुपलक्षयती-त्यर्थः॥ ९॥

अन्यूनं सलक्षणं (?) अवयवांशन्यूनस्य हेत्वाभासत्व-त्वादत्र गणनेत्यर्थः। तत्करणेन हेत्वाभासोच्चारणेन तद-

यित्वा स्वपक्षं साधयतस्तदसाधनेन वा तां दूषयतो वादन्यूनं प्रतिज्ञादीनामन्यतमस्यावचने त्ववयवन्यूनमिति चतुर्विधमेतत्। हीनमन्यतमेनाप्यवयवेन न्यूनमितिसूत्रमुपलक्षणपरं योजनीयम्। ननु यदि सौगतो द्व्यवयवं प्रयुङ्क्ते तदा न्यूनेन निगृह्येत तत्परिहारार्थं पञ्चावयवप्रयोगे स्वपसिद्धान्तेन ततोवयवपरिमाणचिन्तायामर्थान्तरत्वप्रसङ्गः। अशक्या च सा तन्निरूपकस्याप्यनुमानस्यानिर्णीतावयवपरिमाणत्वादिति। तदेतत्प्रबोधसिद्धिकार एव परिजहार यदाह। स्वसिद्धान्तनिर्णीतप्रयोगावयवपरिमाणापेक्षया न्यूनाद्यवतार इति। अन्यत्राप्युक्तम्। आत्मसिद्धान्तसिद्धेष्विति। हन्तैवमयमपसिद्धान्त एव स्यात्। न हि सिद्धान्तविरुद्धाचरणमपसिद्धान्तः। सर्वनिग्रहस्थानानामप्यपसिद्धान्तत्वप्रसङ्गात्। अपि तु सिद्धान्तविरुद्धाभ्युपगमः। अत्र च न्यूनस्य गमकत्वानभ्युपगमे ऽपि सभाक्षोभेण स्तम्भितस्य न्यूनप्रयोगोपपत्तिः। वचनलिङ्गा हि वक्तुरभिप्राया इति न्यूनवचनेनैव तस्य गमक-

---

साधनेन स्वपक्षस्यासाधनेन। तत् स्थापनावादिसाधनमित्यर्थः। सूत्रमुपलक्षणपरं सूत्रगतावयवशब्देन कथारम्भवादवादांशा अपि लक्ष्यन्त इत्यर्थः। द्व्यवयवमुदाहरणोपनयरूपम्। अशक्या च सा अवयवपरिमाणचिन्तेत्यर्थः। न्यूनादीत्यादिशब्देन अधिकस्वीकारः। एवं स्व-

त्वाभिप्रायस्योन्नयने ऽपि तस्य जघन्यत्वेनास्यैव निग्रहहेतुत्वम् । अथवा यथावस्तु यथासिद्धान्तं व्यवहर्तव्यमिति नियमात् पूर्वं न्यूनस्यावतारः तदुत्तरं त्वपसिद्धान्तस्य न चावयवेयत्ताचिन्तायामर्थान्तरत्वमन्यतरासिद्ध्युद्भावने हेतोः सिद्धिव्युत्पादनवत् प्रकृतोपयोगात् । अत्र परिपूर्णं ब्रूयादिति संक्षेपः ॥ १० ॥

अन्वितस्योपयुक्तस्य पुनरुक्तेतरस्य या ।
कृतकार्यकरस्योक्तिरधिकं तत् प्रचक्षते ॥ ११ ॥

अन्वितमुपयुक्तमपुनरुक्तं कृतकार्यकरमभिधीयमानमधिकं नाम निग्रहस्थानम् । अन्वितत्वादिविशेषणैरपार्थकार्थान्तरपुनरुक्तानां व्यवच्छेदः । हेतूदाहरणाधिकमधिकमितिसूत्रं दूषणानुवादाधिकयोरप्युपलक्षणम् । हेतूदाहरणग्रहणेनावयवान्तराधिक्यासम्भवं सूचयति । न हि प्रतिज्ञानिगमनयोरधिकं

सिद्धान्तसिद्धावयवन्यूनादिवचने । जघन्यत्वेन न्यूनप्रतीत्यनन्तरभावित्वेन । अन्यतरासिद्धीरिति । शब्दो नित्यः कृतकत्वादित्यत्र मीमांसकेनासिद्धो हेतुरित्युक्ते शब्दः कृतकोऽनभिव्यञ्जकप्रयत्नानन्तरभावित्वादित्यर्थः ॥ १० ॥

अन्वितत्वादिविशेषणैरिति ।प्रकृतार्थासङ्गतवचनमपार्थकं सङ्गतौ सत्यामपि प्रकृतानुपयोगिवचनमर्थान्तरम् प्रकृतान्वये उपयोगे सत्येककार्यविषयं पुनर्वचनं पुनरुक्तम् उक्तरूपत्रयसद्भावे ऽपि सप्रयोजनत्वात् अनुवादो न निग्रहः तत एतैश्चतुर्भिर्विशेषणैः एतच्चतुष्टयं व्यवच्छिद्यते-

सम्भवति । एकार्थत्वे पुनरुक्तिप्रसङ्गात् । अन्यथा प्रकृतासङ्गतार्थान्तरत्वप्रसङ्गात् । अपरथापार्थकत्वप्रसङ्गाच्च उपनयाधिकं तु हेत्वधिकान्न विशिष्यते । एतच्च विशेषतः स्वशब्देनोपादानात् सामान्यत आदिशब्दोपादानाच्च द्विधा वर्तते । यथा अग्निमान् पर्वतः धूमवत्त्वात् आलोकवत्त्वादिति स्वशब्देन धूमादिमत्त्वादित्यादिशब्देन यथा महानसः यथा आपाक (?) इति । यथा महानसादिरिति च । असिद्धो हेतुरनैकान्तिकश्चेत्यादि । अनुवादाधिकं तु प्रकृतानुपयोगादर्थान्तर एवान्तर्भावयन्ति केचित् । परिषत्प्रतिवादिजिज्ञासानुरोधस्य कथाङ्गत्वेनाप्रतिपत्तेः । अनङ्गत्वेन वा विप्रतिपत्तेस्तदनपेक्षितमधिकं ब्रुवाणस्याप्रतिपत्तिविप्रतिपत्ती स्त एवेत्यस्य निग्रहस्थानत्वं युक्तमेव । परिषज्जिज्ञासायां यावत्स्फूर्ति वक्तव्यम् । न च तत्रापि सामस्त्यनियमाभ्युपगमोऽसर्वज्ञेन शक्यः । दूषणाभि-

---

त्यर्थः । अन्यथा भिन्नार्थत्वे प्रकृतानुपयुक्तार्थत्व इति यावत् । अपरथा अनुपयुक्तत्वे प्रकृतानन्वये च सतीत्यर्थः । एतच्च अधिकारभूतनिग्रहस्थानम् । अनैकान्तिकश्चेत्यादीत्यादिशब्देन असिद्धत्वादिदोषवान् हेतुरित्यादिकं गृह्यते । वाग्मित्वातिशयज्ञापकस्याधिकस्य कथं निग्रहस्थानत्वमित्याशङ्क्याह । परिषत्प्रतिवाद्यविज्ञापितं न तत्रापि परिषदनुज्ञासद्भावे ऽप्येकस्य साध्यसाधनान्तरसद्भावात्

धाने तु शक्यत एव तेषां परिमितत्वादिति । अत्र चाकृतकरमेवं वदेदिति संग्रहः ॥ ११ ॥

शब्दादाक्षेपतो वापि प्रतीतस्यैव कीर्तनम् ।
प्रयोजनविनाभूतं पुनरुक्तमिति स्थितिः ॥ १२ ॥

प्रतीतस्यैवार्थस्य प्रयोजनमन्तरेण पुनरपि शब्देन प्रतिपादनं पुनरुक्तम् । सप्रयोजनं पुनर्वचनमनुवादः । यथा निगमने पक्षस्य । तद्व्यवच्छेदार्थमुक्तं प्रयोजनविनाभूतमिति न केवलं शब्दतः प्रतिपन्नस्यैवाक्षेपतः प्रतिपन्नस्यापि पुनर्वचनं पुनरुक्तमिति दर्शयितुमाक्षेपत इत्युक्तम् । ततश्च पुनःशब्देनोक्तेरावृत्तिमाह । किं तु प्रतीतिरित्युक्तं भवति । कीर्तनमितिशब्देनैव प्रतिपादनं विवक्षितम् । तेनार्थादापन्नस्य पुनरर्थादापत्तिर्न दोषायेति दर्शितं भवति । त्रिविधं चैतत् । शब्दपुनरुक्तमर्थपुनरुक्तमपक्षेपपुन-

---

त्सर्वमहं वदामीति प्रतिज्ञातुमनीश्वरेण न शक्यमित्यर्थः ॥ ११ ॥

प्रतीतस्यैव परिषदा प्रतिवादिना वा अवधानेन ज्ञातस्य । ततश्च शब्दतः तात्पर्यतश्च सिद्धस्य पुनरपि शब्देन प्रतिपादनं पुनरुक्तमिति स्थितत्वाचेत्यर्थः । एवं वाक्ये ऽर्थापत्त्याख्ये ऽनुमानभङ्गे एवं पुनरुक्तिरुदाहर्तव्येति शेषः । पुनरुक्तिलक्षणे सूत्रान्तरमाह । अर्थादापन्नस्येति । प्रतिपन्नार्थस्य पुनर्वचनं पुनरुक्तिरिति वक्तव्ये सति शब्दावयवयोः

468. Since the knowledge of the self-dependence of *ātman* is necessary for the understanding of things other than Self, the Self whose very essence is perception (*anubhava*) does not stand in need of anything objective.[1]

469. Who ever had the knowledge that objects of experience alone can be the aim of man (*purushārtha*)? For it is only the result of perception that can be such aim.[2]

470. How can experience (*pratīti*), which is the effect of perception itself (*māna*), be entirely dependent on an object of perception? To be the result of the act of perception, it depends on the Self which is both the seer and enjoyer.

471 The object of any kind of knowledge cannot be other than the realisation (*anubhava*) of Self, and much more so in the Vēdāntas.

472. Even all movements, secular or spiritual, in this world, are for the sake of an enjoyer. Hence none but the enjoyer (*ātman*) is supreme (*pradhāna*).

473. From passages like "not for the sake of the husband etc."[3] and "This Self is dearer etc." it is clear that, in all the world, nothing but the Self is supreme.

474. It being thus, neither a knower, nor knowledge, nor action, nor object (*mēya*), nor fruit (*phala*), can be hypothesised to explain its supremacy, since it alone is supreme as enjoyer.

---

[1] Injunctions etc., being objective, require a subject, the Self. How then can the subject solely depend on the object?

[2] This is in answer to verse 449 *supra*.

[3] *Bṛihadāraṇyakōpanishad*, IV. 4. 5.

475. It is clear that even the conditioning of the Self as doer is only for the sake of the enjoyer; for, even all things other than the Self are spoken of as serving the enjoyer alone.

476. Moreover, no entity other than the Self can come within the sphere of knowledge; but how such an entity is conceived of will be explained later on.

477. Ignoring what has been stated above, and solely bent on interpreting Scripture to be injunctory, some people contend that the only aim of the Vedāntas is ritual.

478. "Since the authority known as Scripture aims solely at ritual, how can it aim at the unity of Self as you said before?

479. "It cannot be said to be an independent authority by reason of its teaching us the established entity (*siddha-vastu*), for, I say that that established entity is realised by other proofs.

480. "We learn, from secular practice, the invariable signification of words; and, in secular practice, an established fact, known by other proofs, is spoken about, only with a view to action.[1]

481. "No meaning can be gathered from a sentence which prescribes neither activity nor renunciation. Hence it is no authority for the unity of Self (*vastu*).

482. "Nor can any connection be inferred from a sentence which is a bare assertion of fact. The authority

[1] The meaning is that the words of Scripture import ritual, according to वृद्धव्यवहार. It cannot be said to import ऐकात्म्य, for, if it is meant at all, it must be as subsiduary to some ritual or conduct.

of a sentence is inferred, when the injunction contained therein is followed.

483. "From such an understanding of the sentence, the signification of the words is learnt. From this it follows that the sole aim of the Scriptural sentence is ritual.

484. "As for those who maintain that the Scriptural passage signifies a connection between the action and the agent (*kriyākāraka*), the methods of agreement and difference render their contention baseless.

485. "It cannot be contended that ritual too is capable of other proof; for, ritual and its purpose is understood only from Scripture (*ṣabda*) and not from secular data.

486 "The passage is spoken of as prompting action, merely because it speaks of action (*pravartanā*), and thus implies authority (*pramāṇa*). If the passage directly prompt action, it would then be the motive to action (*kāraka*).[1]

487. "But in interpreting the word,[2] it need not be doubted that passions etc. constitute the motive. Passions etc. directly incite us to action, but the word only implies an incentive.

488. "Since we see exertion in the carrying out of a master's orders, and since passions etc. have no place herein, it follows that the activity of the doer (of rituals etc.) is not the result of passions.[3]

[1] The Scriptural passage is not in itself a motive, as desires, passions, etc.

[2] Such as the use of the potential mood (लिङ्).

[3] The opponent means that neither शब्द nor रागादिः, but कार्यं, is the प्रवर्तक.

489. "The activity of the hearer does not spring from a knowledge of the master's inner feelings such as anger, pleasure, etc., for, anger etc. cannot be understood from the mere word

490. "The potential mood and such other forms are not declared to signify anger etc. The latter become motives for men, when they are understood by other means.[1]

491. "Passions etc are inferred from indications like the words "Fie," "Sirrah," and so on, and then become incentives for the discharge of the duty.

492. "Therefore, and for the reason that, being told to go, he goes without any purpose of his own, the signification of the imperative mood etc. can be separated, though mixed up with desires etc.

493. "It may be said that, when bare words like 'go' etc. are uttered, long sentences promising reward and so on are inferred and hence only desires etc. prompt activity.

494. "It is not so; for, even if a long sentence be used, we see, when we analyse the significance of the words, that the activity of the man results only from the use of the imperative etc. and not from anything else.

495. "Since, even where desires are absent, a child obeys orders on the mere hearing of the imperative word, it is apparent in such cases that that alone constitutes the incentive.

496. "But it is said: 'It is curious that this meaning is not gathered from any other proof, but from the word, whose connection is entirely unknown.

[1] i. e. by means other than the spoken word.

४३८

Digitized by Google

497. "'If even a word whose connection is unknown c₃n convey a meaning of duty, why then do you hate us and abuse us?[1]

498 "'Thus, since no other cause is found for activity except the word, the meaning of duty is clearly singled out (as the cause).'

499. "The arguments *pro* and *con* arise only after an understanding of the meaning of the sentence. But the meaning of the sentence itself does not depend upon them and is thereby distinguished from the rest.[2]

500. "It is an intention coupled with a duty (*kartavyatā-vivakshā*) that we learn even from sentences uttered by men Intention is not duty. Intention is only what is intended by the meaning of the word.[3]

501. "The meaning of the word is not dependent upon the intenti ›n, for, the former is understood earlier. Hence, duty is clearly discerned as the incentive, though combined with command etc.

502. "Such things like command, which affect the minds of human beings,[4] are not the meanings of words, but only the distinguishing features (*upādhayah*) of such meaning. Further, multiplicity of meanings is not recognised.

---

[1] If a verb in the potential or imperative mood could, apart from any context, signify नियोग or injunction, why should not the words ब्रह्मन् and others also convey their proper meanings irrespective of other proofs?

[2] i.e. from the meaning of words etc. नियोग by itself does not depend on other proofs, but only when coupled with *upādhis* like आज्ञा.

[3] i. e. from words in the p‥tential mood and so on. This verse refutes the argument that विवक्षा and not नियोग is signified by the potential mood etc.

[4] But the *Vēdas* are अपौरुषेय.

503. "In the absence of some one who intends, there is no place for things which depend upon intention. Hence it follows that in the *Vēda* duty alone is meant.

504. "Such commands like 'Sacrifice, O thou lighter of fire' which are found in the *Vēda*, being ancillary to the rules of ritual, are dependent on such rules and not on intention.

505. "Since duty is thus distinguished from command etc. as being the meaning of the word, let it in the same way be distinguished from ritual etc.[1]

506. "Action (*bhāva*) is not the same thing as duty, though both are to come into existence only in the future; for, duty is not understood by hearing the present tense as by hearing the potential mood etc.

507. "'But in this case it is the use of the (present) tense that excludes the meaning of duty. You have not perceived this doubt at all, because you are ignorant.

508. "'In truth, it is the use of the tense here that excludes the idea of duty. Is duty then different from action, because the present tense does not imply it?'[2]

509. "In instances like 'a mat must be woven,' even in the absence of any action, a duty is understood as different from action and befo e the reward is thought of.

510. "But, is it not the action which signifies duty, by virtue of the aphorism 'of them alone?'[3] Not so,

[1] This is an answer to the contention that ritu l or its fruit may be the meaning of the potential mood etc.

[2] Verses 507 and 508 are the arguments for the identity of क्रिया and कर्तव्यता.

[3] तयोरेव (भाव कर्मणोरेव) कृत्यक्तखलर्थाः. Pan. III. 4. 70.

for, action is only the distinguishing mark (*upādhi*) of duty, as in the case of command etc.,[1] and hence the aphorism is faultless.

511. "Further, the grammarian has declared that duty may also be meant by command etc.[2] Again, it is not possible to argue that duty can signify action.

512. "As the sentence 'he weaves a mat' signifies mere action, so too the sentence 'a mat must be woven' may imply action; but the same is not apparent.

513. "Since the meaning of object (*karman*) is derived from the idea of duty in the shape of the thing desired to be done, the accusative case does not come in, though the object is not specified.[3]

514. "The thing desired and duty are not the same. The difference is seen in instances like 'shall desire,' 'must be desired,' and so on, although the same suffix occurs there too.[4]

515. "Thus, by their mere connection with duty, action, reward or incentive, share the nature of duty, but not by their own force.

516. "'As in the secular world, so in the *Vēda* too, it is not mere duty that is meant, but the *Vēda* speaks of duty coupled with the means, effort, and result.

517. "'Hence, since other proofs come in, as in the case of a sentence prescribing diet for the patient who longs for health, it follows that the *Vēda* is not independent (*sāpēksha*).

---

[1] See verse 502 *supra*.

[2] प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च Pan. III. 3. 163.

[3] Compare निष्. कर्तरि कर्मव्यतिहारे ... [illegible]

[4] The suffix cannot mean [illegible], for, then, in [illegible], [illegible], etc., desire itself will be the object of desire, and so on *ad infinitum*.

518. "'Hence the injunction (*niyōga*), like command etc., is coupled with action and reward. And by the intrusion of such other proofs, the authority of Scripture is destroyed in instances like the *chitrā* sacrifice?'[1]

519. "Not so. It is proper that, in the secular world, by the coming in of other proofs, duty should be characterised by command etc. and that action should be for some benefit.

520. "Injunction in the secular world, is, by nature of its aim, dependent on the mutual connection of means and end. Hence too one is enjoined in the capacity of doer.

521. "Since he acts of his own will, it is as doer alone that he could be enjoined; and words like 'he who longs for health' become mere attributes of the doer.

522. "But in the *Vēda* the knowledge of the connection between means and end, is derived from the injunction itself and not from any other source, because it is not amenable to any proof such as perception etc.

523. "Thus the aspirant, referred to by the words 'he who aspires for heaven,' is not the agent (*akāraka*), but, being united to action by virtue of the injunction, becomes a doer.

524. "Since desire of fruit is paramount, such desire becomes an attribute to the individual, without prejudice to its own importance. Hence he is enjoyer and aspirant, but not an agent (*kāraka*).

525. "The idea of agent is out of place, when one who is inactive is prompted to action.[3] To one already active, the causal form must be addressed, just as he who is already cooking must be made to cook.

---

[1] चित्रयायजेत पशुकामः.

[2] e.g. he who desires health must take medicine.

[3] In the *Vēda* there is no activity previous to the carrying out of the Vedic injunction, as there are no other proofs to arouse such activity.

दीनां पाकजरूपोत्पादसम्भवे ऽपि शरीरे न तत्सम्भवः । शरीरावयवानां चर्मादीनामग्निसंयोगविशेषेण नाशावश्यकत्वादिति भावः । अन्ये तु न पाकजगुणान्तरोत्पत्तेरिति सूत्रमपि सिद्धान्तरूपं पूर्वपक्षश्च मनस्यभिप्रेतस्तथा च पाकजगुणनाशमादाय न व्यभिचारः पाकजगुणान्तरोत्पत्तेः पाकेन पूर्वरूपनाशानन्तरमेव रूपान्तरोत्पत्तेः स्वसमानाधिकरणस्वसमानजातीयसमानकालीनत्वमयावद्द्रव्यभावित्वरूपहेतौ विशेषणं देयं तच्च पाकनाश्यरूपादौ नास्तीति न व्यभिचारः । नन्वेतद्विशेषणमेव शरीरविशेषगुणत्वाभावसाधकमस्तु किमधिकेनेत्यतस्तथैवाह । प्रतिद्वन्द्वीति । पाकजानां प्रतिद्वन्द्विसिद्धेः विरोधिसिद्धेः । एकस्मिन् रूपे विद्यमाने रूपान्तराभावात् प्रकृते त्वेकस्मिन् ज्ञाने सत्यपि द्वितीयक्षणे ज्ञानान्तरोत्पत्तेर्ज्ञानादिकं न शरीरविशेषगुण इत्यर्थ इत्याहुः ॥ ५० ॥

हेत्वन्तरमाह ।

शरीरव्यापित्वात्(१) ॥ ५१ ॥

रूपादीनामिति शेषः । शरीरव्यापित्वं च सर्वावयवावच्छेदेन वर्तमानत्वम् । तथा च शरीराव्यापकत्वेन ज्ञानसुखादेः शरीरविशेषगुणत्वाभावः साध्यते शरीराव्यापकत्वं च तेषां हृदयाद्यवयवविशेषावच्छेदेनैवानुभवादिति भावः ॥ ५१ ॥

शङ्कते ।

न केशनखादिष्वनुपलब्धेः(२) ॥ ५२ ॥

(१) शरीरव्यापित्वादित्यतस्य सूत्रस्य स्पष्टत्वाद् भाष्यकारादिभिर्वर्जितमिति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः । शरीरव्यापित्वादिति सूत्रमन्यथा व्याचष्ट इति न्यायनिबन्धप्रकाशे वर्धमानोपाध्यायाः ।

(२) न शरीरावयवाश्चेतनाः केशनखादिष्वनुपलब्धेरिति दृष्टान्तमुपवर्णित

रूपादीनामपि न शरीरव्यापकत्वं केशनखादिष्वनुपलब्धेरिति ॥ ५२ ॥

शङ्कां निरस्यति ।

त्वक्पर्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गः[१] ॥ ५३ ॥

केशनखादिषु शरीरत्वाभावेन शरीररूपस्पर्शादीनामप्रसङ्गेऽपि न शरीराव्यापकत्वमित्यर्थः । अन्ये तु चैतन्यादिकं न शरीरगुणः शरीरव्यापित्वात् शरीरे तदवयवे चैकेन सम्बन्धेन सत्त्वात् शरीरगुणस्तु न स्वावयववृत्तिः । शङ्कते । न केशेति । अप्रसङ्गः चैतन्यानुपलब्धेः । समाधत्ते । त्वगितीत्याहुः ॥ ५३ ॥

हेत्वन्तरमाह ।

शरीरगुणवैधर्म्यात्[२] ॥ ५४ ॥

बुद्धिर्न शरीरगुणः शरीरगुणवैधर्म्यं बहिरिन्द्रियावेद्यत्वे सति वेद्यत्वम् ॥ ५४ ॥

आशङ्कते ।

न रूपादीनामितरेतरवैधर्म्यात्[३] ॥ ५५ ॥

नोक्तं युक्तं परस्परवैधर्म्यात् विभिन्नेन्द्रियग्राह्यत्वात् । तथा च त्वद्रीत्या स्पर्शादीनां शरीरगुणत्वं न स्याद्चाक्षुषत्वात् । तथा चाप्रयोजकं त्वदुक्तमिति भावः ॥ ५५ ॥

वार्त्तिकम् । दृष्टान्तसूत्रमिति । न करचरणाद्यवच्छेदेन शरीरावयवत्वात् केशनखादिष्वपीति दृष्टान्तार्थं सूत्रमित्यर्थ इति तात्पर्यटीका ।

(१) अन्यथा त्वक्पर्यन्तत्वाच्छरीरस्येतिसूत्रव्याघातादिति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः ।

(२) इदं न्यायसूचीनिबन्धे वर्तते ।

(३) इदमपि पूर्ववत् ।

Digitized by Google

शङ्कां निरस्यति ।

ऐन्द्रियकत्वाद् रूपादीनामप्रतिषेधः[१] ॥५६॥

न रूपादीनां शरीरगुणत्वप्रतिषेध ऐन्द्रियकत्वात् । तत्तदिन्द्रियाग्राह्यत्वलक्षणतत्तद्गुणवैधर्म्यसत्त्वे ऽपि शरीरगुणत्वावच्छिन्नवैधर्म्यस्य बहिरिन्द्रियाग्राह्यत्वे सति ग्राह्यत्वस्याभावात् बुद्धौ च तत्सत्त्वादिति भावः । यद्वा ऐन्द्रियकत्वाच्छरीरे प्रत्यक्षसिद्धत्वात् । तथा च परस्परवैधर्म्यं प्रत्यक्षेण बाधितम् । शरीरगुणवैधर्म्येण साधने न किमपि बाधकम् । न च गौरो ऽहं जानामीत्यादिप्रत्यक्षमेव बाधकमिति वाच्यम् । तादृशप्रत्यक्षस्य सन्दिग्धप्रामाण्यकत्वात् पूर्वोक्तयुक्तेः ॥ ५६ ॥

समाप्तं बुद्धेः शरीरगुणभेदपरीक्षाप्रकरणम् ॥

पूर्वं प्रसक्ततो मनसः परीक्षणे ऽपि विशेषार्थं क्रमप्राप्तं मनः परीक्षयति ।

ज्ञानायौगपद्यादेकं मनः[२] ॥ ५७ ॥

ज्ञानानां चाक्षुषादिप्रत्यक्षाणामेकदानुत्पादान्मनः स्वीकार्यम् । तच्च लाघवात् ज्ञानायौगपद्यानुपपत्तेश्चैकं कल्प्यते । तथाहि विषये चक्षुर्घ्राणादिसन्निकर्षे चाक्षुषं घ्राणजादिकं वैकं ज्ञानं जायते न तु सर्वमित्यनुभवस्तत्सम्पत्तिश्च चक्षुःसन्निकर्षादिघटितचाक्षुषसामग्रीकालीनश्चाक्षुषाभावः किञ्चित्कारणाभावप्रयुक्तः कार्याभावत्वादित्यनुमानेन तादृशसामग्रीकालीनाभावप्रतियोगित्वेन चाक्षुषादौ चक्षुःसंयोगाद्यतिरिक्तकारणकत्वानुमानेन चा-

(१) ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः । द्वये शरीरगुणा भवन्तीत्युक्तः सूत्रार्थ इति वार्तिकम् ।

(२) इदं न्यायसूचीनिबन्धे वर्तते । सिद्धान्तसूत्रमिति वृत्तिकृतः ।

क्षुषादिकारणतया यत्किञ्चिद्वस्तुसिद्धिः । तच्च वस्तु चक्षुर्मनोयोगादि तेन मनसोऽपि सिद्धिः तत्र चाक्षुषकारणतावच्छेदकतया एकस्य घ्राणजादिकारणतावच्छेदकतयाऽन्येषां कल्पने गौरवं कदाचित् तेषामेकदैव चक्षुरादौ संयोगसम्भवेन ज्ञानायौगपद्यावारणं चेति प्रतिपुरुषमेकं मनः कल्प्यते तेनैव मनसात्मसंयोगस्य ज्ञानाद्यसमवायिकारणताप्युपपन्ना तत्संयोगस्य जन्यज्ञानसामान्येऽसमवायिकारणत्वे मनसोऽपि जन्यज्ञानसामान्ये कारणत्वं व्यापारेण व्यापारिणोऽन्यथासिद्ध्यभावात् तेन ज्ञानार्थकमनधातुनिष्पन्नं मन इति पदम् । एवं च चाक्षुषत्वाद्यवच्छिन्नं प्रति मनस्त्वेन न कारणता सुषुप्त्यनुरोधेन त्वङ्मनोयोगस्य जन्यज्ञानसामान्यहेतुत्वात् त्वाचं प्रति त्वङ्मनोयोगस्य न हेतुत्वान्तरं तत्स्वीकारेऽपि चाक्षुषादिसामग्र्याः त्वाचप्रत्यक्षप्रतिबन्धकतावश्यकत्वादन्यथा त्वचा विषयसम्बन्धे चाक्षुषादिकं कदापि न स्यादिति । मनसोऽद्रव्यत्वे चक्षुरादौ समवायादिरेव तत्सम्बन्धः कल्प्यस्तस्य च नियततया न तेन यौगपद्यवारणमिति परिशेषान्मनसो द्रव्यत्वं चक्षुरादिना तत्संयोगानां च हेतुत्वं सिद्धम् । विषयेण मनोयोगस्य हेतुताया: प्रागेव निरासात् । इत्थं चात्मा मनसा मन इन्द्रियेणेन्द्रियं विषयेण संयुज्यते ततो ज्ञानमिति सिद्धान्तः सर्वसम्मतः । श्रुतिरपि तथा प्रतिपादयति ॥ ५७ ॥

दीर्घशष्कुलीभोजनादौ ज्ञानयौगपद्यदर्शनात् कथं तदयौगपद्येन मनः कल्पनीयमित्याशङ्कते ।

न युगपदनेकक्रियोपलब्धेः(१) ॥ ५८ ॥

(१) न युगपदनेकक्रियोपलब्धेरिति । अयं भाष्य इति वार्त्तिकम् । इदं न्यायसूचीनिबन्धे वर्तते ।

न मनःकल्पनमनेकक्रियाणामनेकज्ञानानामुपलब्धे-रित्यर्थः ॥ ५८ ॥

समाधत्ते ।

अलातचक्रदर्शनवत् तदुपलब्धिराशुसञ्चारात्[(१)] ॥ ५९ ॥

अलातचक्रे वेगातिशयेन भ्राम्यमाणे क्रियासन्तानस्यैक्यग्रहणवत् तदुपलब्धिः क्रमिकेऽपि चाक्षुषघ्राणजादौ युगपदुत्पाददर्शनम् । आशुसञ्चारान्मनसोऽतिवेगवत्तया शीघ्रं चक्षुरादिना क्रमिकमनःसंयोगजननात् । एवं चात्र यौगपद्यभ्रमे शीघ्रतरमनःसंयोगस्य दोषतया हेतुत्वं बोध्यम् ॥ ५९ ॥

ननु मनसा चक्षुरादिनानेन्द्रियसंयोगानां युगपदुत्पाद एव कथं न भवतीत्यत आह ।

यथोक्तहेतुत्वाच्चाणु[(२)] ॥ ६० ॥

मन इति शेषः । यथोक्तहेतुत्वात् ज्ञानायौगपद्यरूपहेतुबलादित्यर्थः । तथा च मनसोऽणुतया न युगपज्ज्ञानेन्द्रियसंयोगसम्भव इति भावः ॥ ६० ॥

समाप्तं मनःपरीक्षाप्रकरणम् ॥

ननु कदाचिच्चक्षुर्मनोयोगेन चाक्षुषादिकं जायत इत्यत्र किं नियामकमित्याकाङ्क्षायामाह ।

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः[(३)] ॥ ६१ ॥

---

(१) अस्योत्तरद्वारकं सूत्रम् । अलातचक्रदर्शनवत् तदुपलब्धिराशुसञ्चारादिति वार्त्तिकम् ।

(२) यथोक्तहेतुत्वाच्चाण्विति सूत्रं यथोक्तस्य ज्ञानायौगपद्यस्यैवाणुत्वे हेतुत्वमस्त्विति न्यायवार्त्तिकतात्पर्यपरिशुद्ध्याद्युदयनाचार्याः ।

(३) इदं न्यायसूचीनिबन्धे वर्त्तते ।

पूर्वकृतस्य यागहिंसादेः फलं धर्माधर्मरूपं तदनुबन्धात् तद्विशेषात् तत्कृतनियमाद्धेत्यर्थः । तदुत्पत्तिः चक्षुर्मनोयोगादिनियमेन चाक्षुषाद्युत्पत्तिः ॥ ६१ ॥

शङ्कते ।

भूतेभ्यो मूर्त्युपादानवत् तदुपादानम्(१) ॥६२॥

भूतेभ्य इति सावधारणम् । तथा चादृष्टनिरपेक्षैर्भूतैः कदाचित् परस्परयुक्तैर्यथा शरीरादिकं जन्यते तथा चक्षुरादिमनसोः कदाचित् संयोगेन चाक्षुषाद्युत्पत्तिरिति समुदितार्थः ॥ ६२ ॥

समाधत्ते ।

न साध्यसमत्वात्(२) ॥ ६३ ॥

नोक्तं युक्तं दृष्टान्तस्य शरीरादेः साध्यसमत्वाददृष्टाधीनभूतसंयोगजन्यत्वेन पक्षसमत्वादित्यर्थः ॥ ६३ ॥

शरीरस्यादृष्टाधीनत्वं वक्तुं सूत्रद्वयमाह ।

नोत्पत्तिनिमित्तत्वान्मातापित्रोः(३) ॥ ६४ ॥

तथाहारस्य(४) ॥ ६५ ॥

---

(१) अत्र नास्तिक एवमाह भूतेभ्यो मूर्त्युपादानवत् तदुपादानम् । यथा कर्मनिरपेक्षेभ्यो भूतेभ्यो निर्वृत्ता मूर्तयः सिकताशर्करागैरिकाञ्जनप्रभृतयः पुरुषार्थक्रियाकारकत्वादुपादीयन्ते तथा शरीरमपीति पुरुषार्थक्रियासामर्थ्यादित्येतस्य हेतोरनैकान्तिकत्वोद्धारकं सूत्रमिति वार्त्तिकम् । न्यायसूचीनिबन्धेऽपीदं वर्तते ।

(२) सूत्रमपि न्यायसूचीनिबन्धे वर्तते ।

(३) ननु मातापित्रोश्चोत्पत्तिनिमित्तत्वादित्येतत्सूत्रविपरीतार्थमिदं प्राप्तो वानियमादिति सूत्रमित्यत आह तस्मादितीति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः ।

(४) तथाहारस्य । उत्पत्तिनिमित्तत्वादिति प्रकृतमिति वार्त्तिकम् । पूर्वसूत्रप्रतीकेन पूरयति । उत्पत्तिनिमित्तत्वादिति प्रकृतमिति तात्पर्यटीका । इदं न्यायसूचीनिबन्धे वर्तते ।

Digitized by Google

शरीरस्यादृष्टाधीनोत्पत्तिः । हेतुमाह । मातापित्रोः शरीरोत्पत्तिनिमित्तत्वात् । शरीरे निमित्तहेतुत्वात् । मातापित्रोर्हेतुत्वे द्वारमाह । तथाहारस्य । आहारजन्यशुक्रशोणितादेर्हेतुत्वादित्यर्थः । केचित्तु आहारस्य पितामहपिण्डभोजनादेरदृष्टद्वारा पुत्रजनकत्वादित्यर्थः ॥ ६४ ॥ ६५ ॥

ननु तावता कथमदृष्टसापेक्षतेत्यत आह ।

प्राप्तौ चानियमात्(१) ॥ ६६ ॥

प्राप्तौ च प्राप्तावपि दम्पत्योः सम्प्रयोगेऽपि गर्भस्य यतो न नियमस्ततोऽदृष्टस्य सहकारित्वमावश्यकमिति भावः ॥ ६६ ॥

उपसंहरति ।

शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमित्तं कर्म(२) ॥ ६७ ॥

कर्म कर्मजन्यादृष्टविशेषः । यथा शरीरोत्पत्तिनिमित्तं तथा चक्षुर्मनःसंयोगाद्युत्पत्तिनिमित्तमित्यर्थः । यद्वा नन्वात्मनो विभुतया सर्वस्मिन्नेव शरीरे सर्वात्मसंयोगसत्त्वेन सर्वशरीरावच्छेदेन सर्वस्य भोगः स्यात् । न च तत्तच्छरीरस्वभाव एव तत्तदात्मभोगावच्छेदकत्वनियामक इति वाच्यम् । तथा सति जगत एव स्वाभाविक-

---

(१) पूर्वपूर्वसूत्रस्य टिप्पणी द्रष्टव्या । पूर्वसूत्रेण मातापित्रोः कारणत्वमुक्तं प्राप्तौ चानियमादितिसूत्रेण व्यभिचाराद् दूष्यत इति न्यायनिबन्धप्रकाशे वर्धमानोपाध्यायाः ।

(२) अस्योत्तरद्वारकं सूत्रम् । शरीरोत्पत्तिनिमित्तवत् संयोगनिमित्तं कर्मेति वार्त्तिकम् । तत्र चायमेव पाठः ।

त्वापत्तेः। न च तददृष्टजन्यत्वमेव तत्पुरुषीयज्ञानाद्यव-च्छेदकत्वे नियामकमिति वाच्यम्। मृतशरीरेऽपि ज्ञाना-द्यवच्छेदकत्वापत्तेरिति चेदत्राह। शरीरोत्पत्तीति। शरी-रोत्पत्तौ यथा तत्तत्पुरुषादृष्टविशेषो निमित्तं तथा तत्त-च्छरीरतत्तदात्मसंयोगेऽपि स एवादृष्टविशेषो निमित्त-मित्यर्थः। तथा च तददृष्टविशेषजन्यतावच्छेदकः शरीरा-त्मसंयोगविशेषगतवैजात्यविशेषः तादृशवैजात्यावच्छिन्न-संयोगसम्बन्धेनैव शरीरस्य तत्पुरुषीयज्ञानाद्यवच्छेदकतया मृतशरीरे परशरीरे तादृशविजातीयसंयोगाभावान्नातिप्र-सङ्ग इति भावः। शरीरतदात्मसंयोगौ विना भोगाद्यनु-पपत्त्या संसारिणां शरीरनियम इति च भावान्तरमिति॥ ६७॥

सर्वत्रादृष्टस्य हेतुत्वे युक्त्यन्तरमाह।

एतेनानियमः प्रत्युक्तः[१] ॥ ६८ ॥

एतेनादृष्टविशेषहेतुकत्वव्यवस्थापनेनानियमः कदा-चिन्मनुष्यशरीरसम्बन्धः कदाचिदन्यादृशशरीरसम्बन्धः कदाचित् सकलावयवसम्पन्नं शरीरं कदाचिच्च विकलावय-वमित्यादिनियामकालाभः प्रत्युक्तः समाहित इत्यर्थः। अदृष्टविशेषेणैव तन्नियमोपपत्तेः। न चादृष्ट एव किं निया-मकमिति वाच्यम्। तत्राप्यदृष्टान्तरस्य नियामकत्वात्। अनादित्वेन चानवस्थानवकाशादिति जन्यमात्रं प्रत्ये-वादृष्टस्य हेतुत्वमुक्तं कथमन्यथा पदार्थानां क्रमिकत्वं वै-चित्र्यं च सङ्गतं स्यात् स्वभावस्य सर्वदैव समानत्वात् पर-

(१) नन्वनेनानियमः प्रत्युक्त इति सूत्रं विपरीताभिधायकं परदर्शने व्यवस्था प्रत्युक्तेति विश्वविनर्मित न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः।

मेश्वरस्य सांख्योक्तप्रकृतेश्च सर्वान् प्रत्यविशेषाच्चेति दिक् । ननु शरीरतत्सम्बन्धादेरदृष्टाधीनत्वे कथं तद्विनाश इत्यत आह भाष्यकारः । तद्वियोगश्च कर्मक्षयोपपत्तेः[१] ॥ कर्मणा अदृष्टेन क्षयोपपत्तेरित्यर्थः । यद्वा भोगजनकादृष्टक्षयेणोपपत्तेरित्यर्थः । वस्तुतस्तु शरीरसम्बन्धस्यादृष्टाधीनत्व एव मोक्षोपपत्तिरित्याह । तद्वियोगश्चेति । तदत्यन्तविमोक्षश्च कर्मक्षयोपपत्तेः । अशेषकर्मणां क्षयेणैवोपपत्तेः । कारणाभावात् कार्यानुत्पत्तेरिति भावः ॥ ६८ ॥

यदि च भूतैरेव स्वभावतो देहादिकं जन्यते तदैव मोक्षानुपपत्तिरित्याह ।

पुनस्तत्प्रसङ्गोऽपवर्गे[२] ॥ ६९ ॥

तत्प्रसङ्गः शरीरसम्बन्धप्रसङ्गः । अपवर्गे मोक्षदशायामपि । तदानीमपि भूतस्वभावादेर्दुरपह्नवत्वात् । न च भूतनिष्ठमेवादृष्टं कल्प्यतां किमात्मनिष्ठत्वेनेति वाच्यम् । भूतानामनेकत्वेन तत्कल्पने गौरवात् । वैयधिकरण्येनात्मनिष्ठभोगजनकत्वासम्भवात् सम्बन्धान्तरकल्पने गौरवात् भूतानां सर्वान् प्रत्यविशेषेणादृष्टाकृष्टैरपि तैर्भोग्यैरात्मविशेषभोगनियमानुपपत्तेश्च ॥ ६९ ॥

मनोनिष्ठमदृष्टं केचन मन्यन्ते तन्मतं दूषयति ।

मनःकर्मनिमित्तत्वाच्च संयोगाव्युच्छेदः[३] ॥७०॥

(१) भाष्ये तु उपपत्तेश्च तद्वियोगः कर्मक्षयोपपत्तेरिति पाठः ।

(२) न्यायसूचीनिबन्धादिषु तददृष्टकारितमिति चेत् पुनस्तत्प्रसङ्गोऽपवर्गं इति पाठः । अङ्कते । तददृष्टकारितमिति चेदितीति तात्पर्यटीका ।

(३) एवं न्यायसूचीनिबन्धे वर्तते । तत्र च संयोगाद्यनुच्छेद इति पाठः । क्वचित्तु संयोगानुच्छेद इति पाठः । मातृर्यपुस्तके तु संयोगाव्यवच्छेद इति पाठः परं तु व्याख्याने ज्ञानादिकारणस्याव्युच्छेद इति दृश्यते ।

संयोगस्य शरीरारम्भकादेर्ज्ञानादिकारणस्याव्युच्छेदोऽविरलधारा स्यात् कुतो मनःकर्मनिमित्तत्वात्। मनसो नित्यतया तत्स्वाभाविकस्य कर्मणोऽदृष्टस्यापि नित्यतया तन्निमित्तत्वेन तादृशसंयोगस्य नियतोत्पत्तिसम्भवादिति भावः ॥ ७० ॥

नन्वेकसंयोगस्यापरसंयोगविरोधित्वान्न तद्धाराप्रसङ्ग इत्यत आह ।

नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः[१] ॥ ७१॥

नित्यत्वप्रसङ्गः शरीरादेरविनाशित्वप्रसङ्गः । प्रायणस्य मरणस्यानुपपत्तेरित्यर्थः । भोगजनकादृष्टक्षये सत्येव मरणादिकं स्यात् तादृशादृष्टस्य च मनःस्वभावात्मकत्वेनाविनाशात् तन्न स्यादिति भावः । न च पुरुषकर्मणा भोगजनकमदृष्टं मनसि जायते तस्यानित्यत्वान्न मरणाद्यनुपपत्तिरिति वाच्यम् । वैयधिकरण्येन पुरुषकर्मणो मनस्यदृष्टजननासम्भवात् तददृष्टेन पुरुषभोगजननासम्भवाच्चेति ॥ ७१ ॥

शङ्कते ।

अणुश्यामतानित्यत्ववदेतत् स्यात्[२] ॥७२॥

यथा परमाणुश्यामताया नित्यत्वे ऽपि स्वाभाविकत्वे ऽपि निवृत्तिस्तथा मनसोऽदृष्टस्यापि फलबलात् कल्प्यत इति न मरणाद्यनुपपत्तिरिति ॥ ७२ ॥

---

(१) इदमपि न्यायसूचीनिबन्धे वर्त्तते ।

(२) इदमपि पूर्ववत् ।

समाधत्ते ।

नाकृताभ्यागमप्रसङ्गात्[१] ॥ ७३ ॥

मनोनिष्ठादृष्टस्याजन्यत्वे ऽविनाशोऽनादिभावस्य नित्यत्वस्यैव कल्पनादिति तज्जन्यं वाच्यं तत्र पुरुषकर्मजन्यत्वं प्रागेव निरस्तमित्यकृतस्याकस्मिकस्यादृष्टस्याभ्यागमप्रसङ्गात् स्वीकारप्रसङ्गान्नोक्ताशङ्कनमित्यर्थः । निरुक्तदृष्टान्ते ऽप्येवमिति दृष्टान्तासिद्धिरपि बोध्या ॥ ७३ ॥

समाप्तमदृष्टनिष्पाद्यताप्रकरणम् ॥

इति तृतीयाध्यायस्य द्वितीयमाह्निकम् ॥

इति न्यायसूत्रे तृतीयोऽध्यायः ॥

इति न्यायसूत्रविवरणे तृतीयाध्यायविवरणम् ॥

(१) सिद्धान्तसूत्रमिति वृत्तिकृतः । एतच्च न अकृताभ्यागमप्रसङ्गादिति । अनुपपन्नप्रमाणस्याभ्युपगमोऽकृताभ्यागम इति सूत्रार्थ इति यथाश्रुति ०। सूत्रार्थं इति च वार्तिकम् ।

न्यायसूत्रविवरणे

चतुर्थोऽध्यायः ।

यद्यपि पूर्वमुद्देशलक्षणेनैव परीक्षितौ प्रवृत्तिदोषौ तथापि प्रतिज्ञातायां प्रमेयपरीक्षायां क्रमप्राप्तयोस्तयोरपि परीक्षाकाङ्क्षोदयात् तदर्थं पूर्वोक्तमनुवदति सूत्रद्वयेन । तथा चार्थभेदेन प्रकरणभेदस्य समुचितत्वे ऽपि लाघवेन परस्परसाकाङ्क्षयथातथाशब्दाभ्यामेकप्रकरणतया प्रवृत्तिदोषौ परीक्षिताविति ।

प्रवृत्तिर्यथोक्ता(१) ॥ १ ॥

तथा दोषाः(२) ॥ २ ॥

प्रवृत्तिर्यथोक्ता प्रागेव परीक्षिता तथा दोषा अपि परीक्षिता इत्यर्थः । तत्र शरीरे चेष्टादिकार्यलिङ्गेन सिद्धा प्रवृत्तिः सा च द्वेधा नित्या अनित्या च । तत्राद्या परमेश्वरनिष्ठा अन्यनिष्ठा द्वितीया प्रवृत्तोऽस्मीत्यादिप्रत्यक्षसिद्धापीयम् । रागजन्यतावच्छेदकप्रवृत्तित्वस्येश्वरकृतिनिष्ठत्वाभावे कृतिरेवात्राभिहिता कृतित्वमपि करोमीत्यादिप्रत्यक्षसिद्धमिति । दोषा अपि प्रत्यक्षेण प्रवृ-

(१) प्रवृत्तिपरीक्षायामाकाङ्क्षितायां सूत्रमिति वृत्तिकृतः । प्रवृत्तिर्यथोक्ता तथा परीक्षितेत्यर्थः सूत्रस्येति वार्त्तिकम् । प्रवृत्तिः परीक्षितुं युक्ता सा कस्मान्न परीक्ष्यत इति शङ्कानिराकरणाय सूत्रमित्याह । मनसोऽनन्तरमितीति तात्पर्यटीका ।

(२) प्रथमसूत्रव्याख्यावसरे चरिमसूत्रस्य व्याख्यातत्वेनान्वयो युक्त इत्युक्तं वृत्तिकारैः । प्रवृत्तिदोषसूत्राभ्यामिति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः ।

स्यादिलिङ्गेन च सिद्धा वेदितव्या । दोषत्वं च संसारमूलत्वेनैषामिति ॥ १ ॥ २ ॥

समाप्तं प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम् ॥

प्रकरणान्तरेण दोषविशेषान् परीक्षयति ।

तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात्[1] ॥ ३ ॥

तेषां दोषाणां त्रयो राशयः पक्षा यस्य तत्त्वं दोषविभाजकोपाधित्रयं दोषवृत्तीति यावत् । रागद्वेषमोहानामर्थान्तरभेदात् परस्परभेदसत्त्वादित्यर्थः । रागत्वद्वेषत्वमोहत्वानां विभाजकत्वमिति भावः । कामादीनामत्रैवान्तर्भावान्न विभागव्याघातः । रागत्वमत्रेच्छात्वमेव । तेन काममत्सरतृष्णामायादम्भद्रोहाणां रागपदेन ग्रहणम् । कामो रिरंसा रमणं च संसर्गविशेषः । उत्कटरिरंसा रतिः । मत्सरः स्वप्रयोजनानुसन्धानं विना पराभिमतनिराकरणेच्छा । तृष्णा धनलाभेच्छा । अपरद्रव्येच्छा लोभः । यद्वा धनादिलाभेच्छा लोभः । उत्कटधनादिलाभेच्छा तृष्णा । परवञ्चनेच्छा माया । स्वोत्कर्षज्ञापनेच्छा दम्भः । द्रोहो जिघांसा[2] । क्रोधेर्ष्यासूयामर्षाभिमानादीनां द्वेषपदेन ग्रहणम् । तत्र क्रोधो नेत्रलौहित्यादिहेतुर्द्वेषविशेषः । ईर्ष्या साधारणवस्तुनि परस्वत्वात् तद्ग्रहीतरि द्वेषः । असूया परगुणादौ द्वेषः । अमर्षः कृतापराधे ऽसमर्थस्य द्वेषः । अभिमानोऽपकारिण्यकिञ्चित्करस्यात्मनि द्वेषः । विपर्ययसंशयतर्कमानप्रमादभयशोकादीनां मोहान्तर्गतत्वम् । तेन मोहत्वमत्र स्वविशेष्यावृत्तिप्रकारकत्वरूपभ्रमत्वम् । विपर्ययोऽयथार्थनिश्चयः । संशय उक्त एव । तर्क आपत्तिः । मानोऽविद्यमानगुणारोपेणात्मन्युत्कर्षबुद्धिः । प्रमादः पूर्वं

(१) तत्र सिद्धान्तसूत्रमिति वृत्तिकृतः ।

(२) वृत्तिकारैस्तु द्रोहो भावाय द्वेष इति द्वेषपक्षे निक्षिप्य व्याख्यातम् ।

कर्तव्यतया निश्चिते ऽकर्तव्यताधीः। एवमकर्तव्ये कर्तव्यताधीः। भयमनिष्टशङ्का। शोक इष्टवियोगे तल्लाभानर्हताज्ञानम्। मिथ्याज्ञानं देहादावात्मबुद्धिरिति ॥ ३ ॥

शङ्कते।

नैकप्रत्यनीकभावात्[१] ॥ ४ ॥

रागादीनां न भेद एकप्रत्यनीकभावादेकविरोधादेकेन तत्त्वज्ञानेन विनाऽनिवर्त्यत्वादिति यावत् ॥ ४ ॥

समाधत्ते।

व्यभिचारादहेतुः[२] ॥ ५ ॥

एकनिवर्त्यत्वमेकनाश्यत्वं नाभेदसाधकं व्यभिचारादेकघटनाशनाश्यत्वे ऽपि तदाश्रितरूपरसादीनां भेदात्। एकेन विपरीतदर्शनेन प्रत्यक्षानुमित्यादीनां निवर्त्यत्वे ऽपि भेदाच्च ॥ ५ ॥

समाधानान्तरमाह।

तेषां मोहः पापीयान् नामूढस्येतरोत्पत्तेः[३] ॥ ६ ॥

यद्यपि बहूनां निर्धारणे इष्ठस्य तमस्य वा विधानात् पापिष्ठः पापतम इत्यस्य वक्तुमुचितत्वात् पापीयानित्यसङ्गतिः। न च द्वौ द्वावधिकृत्य निर्धारणं द्वयोर्निर्धारणे ईयसुविधानात् तेन रागमोहयोर्मोहद्वेषयोर्मोहः पापीयाननर्थमूलं बलवद्द्वेष्य इति यावदिति वाच्यम्। तेषामित्यनेन द्वित्वेन बोधयितुमशक्यत्वात्। न च तौ च तौ

(१) इदं न्यायसूचीनिबन्धे नास्ति।
(२) सूत्रमपि पूर्ववत्।
(३) सूत्रमपि तथा।

चेत्येकशेषकरणात् तथालाभ इति वाच्यम् । भिन्नार्थकस्वरूपैकशेषानभ्युपगमात् । तथाप्येकरूपेणोपस्थितानां बहूनां निर्धारणे ऽपि कदाचिदीयसुप्रत्ययोपगमात् तेषां दोषाणामित्यर्थः । वस्तुतोऽत्र षष्ठ्यैव निर्धारणं बोध्यते ईयसुप्रत्ययेनातिशयमात्रं बोध्यत इति । हेतुमाह । अमूढस्य मोहरहितस्य नेतरोत्पत्तेः रागद्वेषोत्पत्त्यभावात् । व्युत्पत्तिवैचित्र्येण पञ्चमीप्रकृतेरुत्पत्तेः प्रतियोगितया नञर्थाभावे तस्य च पञ्चम्यर्थे ऽन्वयात् । तथा च तत्त्वज्ञाननिवर्त्यत्वं मोहस्यैव रागद्वेषयोस्तु मोहनिवृत्तावेव निवृत्तिरित्येकनिवर्त्यत्वमपि नास्तीति भावः । न च तत्त्वज्ञानिनो हिताहितविषयकप्रवृत्त्या रागाद्यस्त्येवेति कुतो मोहनिवृत्तिनिवर्त्यत्वं तत्त्वज्ञाननिवर्त्यत्वं वा रागादेरिति वाच्यम् । तादृशरागद्वेषयोर्धर्माधर्मानुपधायकत्वेनादोषत्वात् । दोषरूपयोरेव तयोर्मोहनिवृत्तिनिवर्त्यत्वात् । धर्माधर्महेतुत्वं च विजातीयरागत्वादिनेत्युक्तमेव तादृशवैजात्यं च मोहजन्यतावच्छेदकतया सिद्धं मिथ्याज्ञानस्य तज्जन्यवासनाया वा धर्माधर्महेतुत्वं तद्विरहादेव तत्त्वज्ञानिनां रागादिसत्त्वे ऽपि न धर्माद्युत्पत्तिरिति तु नव्याः । अत एव श्रीभागवते । मुक्तस्तावद्विभूयात् स्वदेहमारब्धमभिमानशून्यः । मुक्तस्तत्त्वज्ञानी अभिमानशून्यो देहात्मबुद्धिरूपमिथ्याज्ञानशून्य इति ॥ ६ ॥

शङ्कते ।

प्राप्तस्तर्हि निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः(१) ॥ ७ ॥

(१) प्राप्तस्तर्हीत्यंशस्तु न सूत्रं किं तु भाष्यकृतः पूरणमित्यपि वदन्तीति वृत्तिलेखदर्शनादवगम्यते ऽवशिष्टांशस्य सूत्रत्वे विवादाभाव इति । न्यायसूचीनिबन्धादौ प्राप्तस्तर्हीत्यंशो नास्ति ।

निमित्तं मोहः नैमित्तिकौ रागद्वेषाविति । दोषेभ्योऽर्थान्तरभावोऽर्थान्तरत्वं दोषभिन्नत्वमिति यावत् । मोहस्य प्राप्तः दोषहेतूनामपि दोषत्वे तद्धेतूनामपि तत् स्यादिति भावः । दोषेभ्य इति बहुवचनं रागद्वेषयोरवान्तरभेदापेक्षयेति । प्राप्तस्तर्हीति भाष्यकृतः पूरणमिति केचित् ॥ ७ ॥

शङ्कां निरस्यति ।

न दोषलक्षणावरोधान्मोहस्य(१) ॥ ८ ॥

नोक्तदोषः मोहस्य दोषलक्षणाक्रान्तत्वादवान्तरकार्यकारणभावस्तु न तत्र बाधकोऽन्यथा रागविशेषे ऽपि रागविशेषस्य हेतुतया तत्रापि दोषत्वं रागत्वं च न स्यादिति भावः ॥ ८ ॥

नन्वेकजातीयानां कथं कार्यकारणभाव इत्यत आह ।

निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः(२) ॥ ९ ॥

एकजातीययोरपि अवान्तरवैलक्षण्येन हेतुहेतुमद्भावसम्भवान्न तत्प्रतिषेध इत्यर्थः । तथा च द्रव्यत्वाविशेषे ऽपि कपालादीनां दण्डादीनां च घटादिहेतुत्वं गुणत्वाविशेषे ऽपि ज्ञानादिकं प्रति चक्षुर्मनोयोगादीनां हेतुत्वं तथा दोषत्वाविशेषे ऽपि रागादिकं प्रति मोहस्य हेतुत्वसम्भव इति भावः ॥ ९ ॥

समाप्तं दोषपरीक्षाप्रकरणम् ॥

दोषपरीक्षा दोषविशेषपरीक्षेत्यर्थः ॥

(१) इदं न्यायसूचीनिबन्धे वर्तते ।
(२) इदमपि पूर्ववत् ।

संस्कृतपुस्तकानां सूचीपत्रम् । मूल्यम्

श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं॰ श्रीराममिश्र-
शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः .. .. ७।)

श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा .. ६)

श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा .. ३=)

वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः .. .. २।)

शेषपूर्त्तिः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं॰स्वामिश्रीराममिश्रशास्त्रि-
प्रणीतो निर्विशेषाद्वैतनिराकरणपरः .. .. १॥=)

शेषपूर्त्तिसहितो वेदार्थसंग्रहः .. .. ३॥।)

शास्त्रदीपिका .. .. ६।)

सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-
न्द्रिकोपेतम्, पं॰स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् । १।)

काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजप॰दामोदर-
शास्त्रिणा संशोधिता पूर्वार्द्धरूपा .. .. ५॥।)

तथा उत्तरार्द्धम् .. .. ८॥।)

माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण
श्रीसायणाचार्येण विरचिता .. .. ७॥)

काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता ६॥)

श्रीतिरुन्नार्णवतरणिः । .. .. ६)

दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता .. .. ॥=)

जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता .. ५॥)

लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्याय-
मुक्तावल्याख्यया टीकया सहिता । .. .. ॥।)

सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना
विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम् । ॥।)

तत्त्वमुक्ताकलापः-सर्वार्थसिद्धियुतः, बोधायनीयार्षसिद्धान्तानुसारी विशिष्टाद्वै-
तब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्कि-
ककेसरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीवेङ्कटनाथदेशिकेन प्रणीतः ५॥=)

वेदान्तसिद्धान्तमुक्तावली, आर्थर्वीनिस्साहबकृताङ्गलभाषानुवादयुता .. १॥।)

काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः .. .. २॥)

अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः .. .. १२)

आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्य-
काराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम् .. .. ॥।)

तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदी-
पाख्यटीकया सहिता । .. .. १॥।)

Digitized by Google

CONTENTS.

Page.

BRĀHMASPHUṬASIDDHĀNTA, Edited with his own commentary by Mahāmahopādhyāya Sudhākara Dvivedin, Professor, Queen's College, Benares 385

THE TĀRKIKARAKṢĀ AND SĀRASAMGRAHA OF VARADARĀJA, with the glosses Niṣkaṇṭakā of Mallinātha Kolācala and Laghudīpikā of Jñānapūrṇa, Ed. Vindhyeçvarīprasāda Dvivedin, Librarian, Sanskrit College, Benares 417

THE SAMBANDHAVĀRTIKA OF SUREṢVARĀCHĀRYA, Translated by S. Venkataramana Aiyar, B. A., B. L., High Court Vakil, Triplicane, Madras 425

NYĀYASŪTRAVIVARAṆAM, Ed. Surendralāla Gosvāmin, Professor, Sanskrit College, Benares 433

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 8.] August, 1902. [Vol. XXIV.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1902.

Copyright on each article reserved.

Price Rs. 9-0 per annum.]

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
चित्रमीमांसा, अप्पयदीक्षितकृता तै० श्री रामशास्त्रिणा संशोधिता	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।=)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनाचार्य्येणेङ्गलण्डीयभाषायामनुवादिता ..	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	३)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणेङ्गलण्डीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	२॥=)
श्रौतपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकोल्लूशास्त्रि-संशोधिता	४)
काव्यप्रदीपः, पं० रामशास्त्रिभागवताचार्येण परिशोधितः	२॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	५॥)

Digitized by Google

क्रमप्राप्तं प्रेत्यभावं परीक्षयति ।

आत्मनित्यत्वे प्रेत्यभावसिद्धिः[१] ॥ १० ॥

मृतस्य पुनरुत्पादः प्रेत्यभावः स च शरीरादेर्न सम्भवति पुनरुत्पादाभावात् न चात्मनः स तस्य नित्यत्वेन मरणाभावादिति तदप्रसिद्धिरितिपूर्वपक्षे समाधानमिदम् । आत्मनित्यत्वे आत्मनो नित्यत्वे ऽपि तस्य प्रेत्यभावसिद्धिः प्रेत्यभावशब्दार्थसिद्धिः । अयमभिप्रायः । विजातीयात्मशरीरसंयोगो मरणमेकजातीयशरीराद्यसंयोग उत्पत्तिः तयोर्नित्ये ऽप्यात्मनि सम्भवः । अथवा शरीरस्योत्पत्तिविनाशावादाय शरीरविशिष्टस्य तथा व्यपदेश इति भावः । सूत्रे पुनःपदेन तयोरनादिधारा ज्ञापिता तज्ज्ञानं च वैराग्यद्वारा मोक्षोपयोगीति तत्परीक्षणम् ॥ १० ॥

नन्वात्मनो निरुक्तोत्पत्तिमरणे अपि शरीरोत्पत्तिं विना न सम्भवतः सा च नास्तीत्यत आह ।

व्यक्ताद् व्यक्तानां प्रत्यक्षप्रामाण्यात्[२] ॥ ११ ॥

अत्रोत्पत्तिः पञ्चम्या अर्थः । प्रयोज्यत्वं संसर्गः । तेन व्यक्तप्रयोज्योत्पत्तिमद्व्यक्तानां प्रत्यक्षप्रामाण्यात् प्रत्यक्षसिद्धत्वादित्यर्थः । न च व्यक्तानामेवावयवानामवयविहेतुत्वे व्यक्तानामपकृष्टमहत्त्वेन सावयवत्वाद् घटादीनामवयवधाराप्रसङ्गान्मेरुसर्षपाद्योरविशेषप्रसङ्ग इति वाच्यम् । घटादिकं परम्परया निरवयवद्रव्यारब्धमपकृष्ट-

---

(१) अत्र सिद्धान्तसूत्रमिति वृत्तिकृतः । न्यायसूचीनिबन्धे ऽपीदं वर्तते ।

(२) नायमेकान्तो रूपादिमद्भ्यो रूपादिमदुत्पत्तिरिति अरूपादपि संयोगाद् रूपादिमदुत्पद्यमानं घटादि गवादि दृष्टमिति । न । सूत्रार्थापरिज्ञानात् नायं सूत्रार्थो रूपादिमत एव रूपादिमदुत्पद्यत इति अपि तु रूपादिमत्सामग्रीपूर्वकं गवादि व्यक्तमिति सूत्रार्थं इत्येतद्व्याख्यानावसरे वार्त्तिकम् । तत्र न्यायसूचीनिबन्धे च व्यक्ताद्व्यक्तानामिति पाठः ।

परिमाणत्वादित्यादिव्यतिरेकिणानुमानेनाव्यक्तस्यापि हेतुत्वाद् व्यक्तानां हेतुत्वस्य प्रत्यक्षतः सुलभतयोक्तत्वात् । यद्वा त्र्यसरेणुः सावयवोऽपकृष्टमहत्त्वादित्यनुमानेन द्व्यणुकसिद्धः द्व्यणुकं सावयवं महदवयवत्वादित्यनुमानेन परमाणुसिद्धिः । परमाणुर्निरवयवो जन्यपरिमाणानधिकरणत्वादित्यनेन परमाणोर्निरवयवत्वसिद्धिः । तस्य नित्यत्वमपि निरवयवद्रव्यत्वेनैवेति जन्यद्रव्याणां परमाणौ विश्रामाभावे मेरुसर्षपयोरविशेषप्रसङ्ग इति । एवं च शरीरस्यापि व्यक्ततया उत्पत्तिसिद्धिरिति सूचितम् ॥ ११ ॥

तटस्थः शङ्कते ।

न घटाद् घटानिष्पत्तेः(१) ॥ १२ ॥

न व्यक्ताद् व्यक्तमुत्पद्यते तथा सति घटस्यापि व्यक्ततया ततोऽपि घटोत्पत्तिप्रसङ्ग इति भावः ॥ १२ ॥

उत्तरयति ।

व्यक्ताद् घटनिष्पत्तेरप्रतिषेधः(२) ॥ १३ ॥

व्यक्तात् कपालादेरेव घटोत्पत्तेः समान्यतो न व्यभिचारः । समवायेन जन्यसत्त्वावच्छिन्नं प्रति तादात्म्येन द्रव्यत्वेनैव सामान्यकार्यकारणभावात् । विशेषकार्यकारणभावस्तु विशेषतोऽन्वयव्यतिरेकतो ग्राह्यः । यथा घटकपालाद्योरिति ॥ १३ ॥

समाप्तं प्रेत्यभावपरीक्षाप्रकरणम् ॥

अथ व्यक्ताद् व्यक्तानामित्यसङ्गतं शून्यताया एव व्यक्तोपादानत्वादिति सहेतुकमाशङ्कते ।

---

(१) इदं न्यायसूचीनिबन्धे वर्तते ।

(२) इदमपि न्यायसूचीनिबन्धे वर्तते ।

Digitized by Google

अभावाद् भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात्[1] ॥ १४ ॥

नानुपमृद्य प्रादुर्भावात् । अनुपमृद्य बीजादिकमविनाश्य अङ्कुरादेः प्रादुर्भावाभावादुत्पत्त्यभावादित्यर्थः । तथा च बीजादिविनाशोऽङ्कुरोपादानमेवमन्यत्रापि कल्प्यते लाघवादिति ॥ १४ ॥

उत्तरयति ।

व्याघाताद्प्रयोगः[2] ॥ १५ ॥

उपमृद्य प्रादुर्भवतीति प्रयोगो न व्याघातात् । अङ्कुरादेर्बीजोपमर्दकत्वादङ्कुरादेर्बीजनाशहेतुत्वं बीजनाशस्य चाङ्कुरादिहेतुत्वमित्यन्योन्याश्रयादिति भावः ॥ १५ ॥

पूर्वपक्षी पुनराशङ्कते ।

नातीतानागतयोः कारकशब्दप्रयोगात्[3] ॥ १६ ॥

नोक्तप्रयोगानुपपत्तिः अतीते ऽनागते च कारकशब्दप्रयोगात् कर्त्रादिबोधकशब्दप्रयोगात् । तादृशप्रयोगश्च जनिष्यते पुत्रः भावी देवदत्तो घटं करिष्यति मृतो देवदत्तो घटं कृतवानित्यादिरूपः । तथा चोक्तान्योन्याश्रयो न दोषायेत्यभिमानः ॥ १६ ॥

समाधत्ते ।

न विनष्टेभ्योऽनिष्पत्तेः[4] ॥ १७ ॥

---

(१) तत्र पूर्वपक्षसूत्रमिति वृत्तिकृतः । एतदपि पूर्ववत् ।

(२) इदं न्यायसूचीनिबन्धे वर्तते ।

(३) एतदपि पूर्ववत् ।

(४) अस्य चार्थस्य ज्ञापनार्थं सूत्रम् । न विनष्टेभ्योऽनिष्पत्तेरिति । न हि बीजविनाशोऽङ्कुरस्य कारणमपि तु बीजावयवाः पूर्वव्यूहपरित्यागेनेत्यर्थः सूत्रस्येति वार्त्तिकम् । अत्रैवार्थे सूत्रं योजयति अस्य चार्थस्येतीति तात्पर्यटीका ।

बहुवचननिर्देशाद् भाविनो ग्रहः। तेन भूतभाविभ्योऽनिष्पत्तेः कार्यानुत्पत्तेः। पूर्वक्षणवृत्तिसामग्र्या एव कार्योत्पत्तिप्रयोजकत्वात्। नियतपूर्ववर्तित्वरूपकारणत्वस्य विनष्टादावसम्भवाच्च। न च बीजोपमर्दकत्वं न बीजनाशकारणत्वं येन भाविनस्तन्न स्यात् किं तु बीजनाशकर्तृत्वमिति वाच्यम्। नाशकर्तृत्वं नाशानुकूलव्यापारवत्त्वं भाविव्यापारश्च न प्रागुजातनाशानुकूल इत्युक्तत्वात्। जनिष्यत इत्यादौ भविष्यत्क्रियाकर्तृत्वं बोध्यते तस्याबाधान्न प्रयोगानुपपत्तिरिति ॥ १७ ॥

ननु बीजोपमर्दकत्वमङ्कुरादेर्नोच्यते किं तु भूसंयोगादेः। क्त्वाप्रत्ययस्यैककर्तृकत्वानियमेन निरुक्तसूत्रात् तल्लाभः। एवं च बीजस्य विनष्टतया उपादानत्वायोगस्य न विनष्टेभ्योऽनिष्पत्तेरितिसूत्रेण भवतैवोक्तत्वात् परिशेषेण तन्नाशस्यैवोपादानत्वं वक्तव्यमित्यत आह।

क्रमनिर्देशादप्रतिषेधः[1] ॥ १८ ॥

क्रमनिर्देशाद् बीजनाशानन्तरमेवाङ्कुरोत्पाददर्शनात् बीजनाशस्य न हेतुतासामान्यप्रतिषेधः प्रतिबन्धकाभावत्वेन तस्याङ्कुरहेतुतोपगमादिति भावः। यद्वा क्रमनिर्देशादेकस्मिन्नवयवे द्रव्योत्पत्तौ तन्नाशानन्तरमेव द्रव्यान्तरोत्पादात् द्रव्यं प्रति द्रव्यस्य प्रतिबन्धकत्वेन तदभावत्वेनैव तन्नाशस्य हेतुत्वात्। अप्रतिषेधो न तेन द्रव्यस्य द्रव्योपादानताप्रतिषेधः। बीजावयवानामेवाङ्कुरोपादानत्वाज्जलसंसिक्तभूसंयोगादीनां तत्र निमित्ततेति न तैर्विनो-

(१) क्रमनिर्देशादप्रतिषेधः। पूर्वं बीजविनाशः पश्चादङ्कुरोत्पत्तिरिति सूत्रार्थ इति वार्त्तिकम्।

त्पत्तिः । अभावमात्रस्य कारणत्वे चूर्णीकृते ऽपि बीजे ऽङ्कुरोत्पत्तिः स्यादिति भावः ॥ १८ ॥

समाप्तं शून्यतोपादानतानिराकरणप्रकरणम् ॥

शून्यता अभावः । उपादानता समवायिकारणता॥

नन्वस्त्वीश्वर एवोपादानकारणमित्याशङ्कते ।

ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्[१] ॥१९॥

पुरुषकर्मणोऽपि कदाचिद् वैफल्यदर्शनात् सहकार्यन्तरमवश्यं वाच्यं यत्सत्त्वासत्त्वाभ्यां कार्योत्पादानुत्पादयोरुपपत्तिः । स च सहकारी ईश्वरः । न च तस्य समत्वेनाव्यावर्तकत्वं तदिच्छाया एव व्यावर्तकत्वात् । तथा चेश्वरस्य कारणतयावश्यकत्वे तस्यैवोपादानतास्तु किं व्यक्तानामुपादानतास्वीकारेणेति भावः ॥ १९ ॥

ब्रह्मोपादानतावादी द्विविधः कश्चिद् ब्रह्मपरिणामो विश्वमिति वदति । कश्चिद् ब्रह्मविवर्तो विश्वमिति वदति । अत्र च परिणामवाद उपादानसमसत्ताककार्यवादः । तथाहि ब्रह्मैव नामरूपप्रपञ्चभेदेन परिणमते मृत्तिकेवोदञ्चनादिभावेन । अत एव प्रपञ्चेषु ब्रह्मधर्मस्य सत्त्वस्यापरित्याग उदञ्चनादाविव मृत्तिकात्वस्येति । अत्र च मते घटादिप्रपञ्चस्य चैतन्यापत्तिः परिणामिस्वभावस्य परिणामे ऽपि सत्त्वादनिर्विकारित्वबोधकश्रुतिविरोधश्चेति विवर्तवाद एव वेदान्तिभिरादृतः । तत्र मतमनाद्यनिर्वचनीयाविद्यया निमित्तभूतलोकादृष्टसहकृतया ब्रह्मण्यधिष्ठाने मिथ्याभूतोऽपि प्रपञ्च आरोप्यते रज्जौ सर्पवदि-

(१) पुरुषकर्माफल्यदर्शनादिति पाठो ऽन्यत्र । सूत्रयति ईश्वरं दर्शीति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः ।

ति प्रपञ्चस्याधिष्ठानसत्तयैव सत्त्वप्रतीतिर्ब्रह्मण एव प्रपञ्चतया स्फुरणात्। अथवा व्यावहारिकसत्त्वान्तरं प्रपञ्चेषु स्वीक्रियत इति। अविद्याया अपि तत्त्वविचारे ऽनिर्वृतेर्मिथ्यात्वमित्यद्वैतसिद्धिरित्यत्राह।

न पुरुषकर्माभावे फलानिष्पत्तेः(१) ॥ २० ॥

पुरुषकर्मेति दृष्टकारणोपलक्षणम्। तथा च पुरुषव्यापारदण्डचक्रसलिलसूत्रकपालादिविरहे घटाद्यनिष्पत्तेः तत्सत्त्वे च तदुत्पत्तेर्घटादौ तेषां हेतुत्वमावश्यकम्। तत्र च पुरुषकृत्यादेः कार्यान्तरे ऽपि दर्शनात् कार्यमात्रं प्रति तद्धेतुत्वमन्येषां च विशेषत एव। इत्थं चेश्वरस्य नोपादानता घटादौ कपालादेरेव तत्त्वेन कल्प्यत्वादीश्वरस्य तत्त्वे मानाभावात्। एवमीश्वरस्यैकत्वेन कार्यविशेषनियमानुपपत्तिः। न च तस्येच्छाविशेष एव कार्यविशेषनियामक इति वाच्यम्। तन्मते तदिच्छाया अतिरिक्ताया अनभ्युपगमात् अभ्युपगमे द्वैतापत्तिः। न च जीवादृष्टविशेषसहकारिणा कालविशेषेण मायायामेव सङ्कल्पादिरूपा वृत्तिभेदा जायन्ते ते चेश्वरे भासिताः तेन निर्गुणस्यापि ब्रह्मणः सगुणत्वप्रतीत्या परमेश्वरपदवाच्यता उक्तं च कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इतीति वाच्यम्। अर्थक्रियाकारितया सत्त्वेन प्रत्यक्षसिद्धतया च घटादेः सत्यत्वावगतेः परमाणुभ्यो द्व्यणुकादिक्रमेणैव कार्योत्पादस्य दृष्टत्वाच्च। ननु परमाणोः किमुपादानमिति चेन्न नित्यत्वात् किमपीति भावः। केचित्तु प्रसङ्गत ईश्वरः कारणमितिसूत्रेण केवलेश्वरस्य कारणताशङ्कनं न तूपादानताशङ्कनं द्वितीयसूत्रमतिरिक्तकारणताप्रदर्शनेन समाधानमित्याहुः॥ २०॥

(१) सिद्धान्तसूत्रमिति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः।

ननु पुरुषव्यापारादिसत्त्वे ऽपि क्वचित् फलानुत्पत्त्या व्यभिचार इत्यत आह ।

तत्कारितत्वादहेतुः(१) ॥ २१ ॥

क्वचित् फलाभावस्य तत्कारितत्वात् पुरुषकर्मकारितत्वात् पुरुषदुरितविशेषप्रतिरुद्धत्वात् पुरुषव्यापारोऽहेतुः फलानुपधायक इत्यर्थः । ननु तदा किमर्थमीश्वर इत्याशङ्कावारणाय भाष्यम् । गुणविशिष्टमात्मान्तरमीश्वरः । आत्मान्तरं जीवभिन्नं जगदनुकूलज्ञानेच्छादिविशिष्टं किमपि वस्तु ईश्वर इत्यर्थः । आत्मान्तरमिति जीवस्य क्षित्यादिकर्तृत्वासम्भवप्रदर्शनाय । गुणवत्त्वेन कथनं मतान्तरनिराकरणाय तद्रूपेणैव सप्रमाणकत्वसूचनाय च । तथा च क्षित्यादिकमुपादानगोचरसाक्षात्कारचिकीर्षाकृतिमज्जन्यं कार्यत्वादित्यनुमानेन लाघवज्ञानसहकारिणा नित्यैकज्ञानेच्छाकृतिविशिष्टनित्यैकवस्तुसिद्धिरिति धर्मिग्राहकमानेनैव तस्य गुणवत्त्वसिद्धेरिति भावः । एवं गुणवत्तया द्रव्यत्वलाभात् द्रव्यसामान्यगुणसंयोगादिमत्त्वलाभः । आत्मपदवाच्यता च तस्यात्मपदगर्भश्रुतिबलादेवेति । वस्तुतस्तु ईश्वरस्य प्रसङ्गतः कारणत्वेन सिद्ध्यर्थमाह । ईश्वरः कारणमिति । क्षित्यादेरिति शेषः । तत्रानुमानप्रकारश्चोक्त एव । ननु जीवविशेष एव क्षितिकर्तास्तु किमीश्वरेणेत्यत आह । पुरुषकर्मफलादर्शनादिति । पुरुषकर्मफलत्वादर्शनात् पुरुषकर्मफलत्वासम्भवादिति यावत् । पुरुषव्यापारो हि उपादानगोचरप्रत्यक्षादिसहकृतः कार्यं जनयति क्षितिद्व्यणुकाद्युपादानस्य परमाण्वादेर्जीवप्रत्यक्षागो-

(१) तच सूत्रं योजयति तत्कारितत्वादिति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्यः ।

चरतया जीवानां द्व्यणुकादिसम्भव ईश्वरस्य तु द्व्यणुकाद्युपादानगोचरप्रत्यक्षाश्रयतया सिद्धा अतीन्द्रियदर्शित्वम् । सर्वविषयकत्वं तज्ज्ञानस्य नित्यतया विनिगमनाविरहेणेति समुदितभावार्थः । केचित्तु पुरुषकर्मफलादर्शनादित्यनेन विफले कर्मणि प्रवर्तमानत्वादसर्वज्ञतया अतीन्द्रियादर्शित्वेन जीवस्य क्षितिकर्तृत्वासम्भव इति सूचितम् । ननु जीवादृष्टमेव क्षितिकारणमस्तु जीवोपभोगसाधनत्वादित्याशङ्कते । न पुरुषेति । पुरुषादृष्टाभावे फलस्य क्षित्यादेरनुत्पत्तेरदृष्टहेतुतावश्यकत्वेन नेश्वरस्य कर्तृत्वमिति भावः । समाधत्ते । तत्कारितत्वादहेतुः । तत्कारितत्वादीश्वराधिष्ठिततया कार्यजनकत्वाददृष्टमात्रं न हेतुः अचेतनस्य चेतनसहकारेणैव कार्यजनकत्वादिति भावः । इदमुपलक्षणम् । अदृष्टहेतुत्वसिद्धावपि उपादानगोचरप्रत्यक्षादिमत्त्वेनेश्वरस्य क्षित्यादिकर्तृत्वं दुरपह्नवं जीवे तद्बाधादिति ध्येयम् ॥ २१ ॥

समाप्तमीश्वरोपादानतानिराकरणप्रकरणम् ॥

नन्वकस्मादेव कार्यमुत्पद्यते किमुपादानगवेषणयेत्याशङ्कते ।

अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात्[1] ॥ २२ ॥

अनिमित्ततो निमित्तभिन्नात् स्वस्मादलीकाद्वा भावोत्पत्तिः । यद्वा अनिमित्ततोऽनिमित्ता प्रथमार्थे तसिल् स्वाभाविकीत्यर्थः । तथा च घटादिकमलीकहेतुकं

(१) अनिर्मित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् । यथा कण्टकतैक्ष्ण्यादि निर्निमित्तमुपादानवच्च तथा शरीरादिसर्गोऽपि तद्विदं दृष्टान्तसूत्रमिति वार्त्तिकम् । तत्र पूर्वपक्षसूत्रमिति वृत्तिकृतः ।

स्वहेतुकं वा भावत्वात् कण्टकतैक्ष्ण्यवत् । यद्वा घटाद्युत्पत्तिः स्वाभाविकी उत्पत्तित्वात् कण्टकतैक्ष्ण्योत्पत्तिवदित्यनुमाने तात्पर्यम् । तैक्ष्ण्यं संस्थानविशेषः । आदिना मयूरचित्राद्दिपरिग्रहः ॥ २२ ॥

तत्रालीकहेतुकत्वं दूषयति ।

अनिमित्तनिमित्ततो नानिमित्ततः[(१)] ॥ २३ ॥

अनिमित्तरूपमलीकात्मकं यन्निमित्तं ततः कार्योत्पादे कुतः कार्यस्य निमित्तभिन्नादुत्पत्तिः अलीकस्यैव निमित्तत्वात् । न चानिमित्तत्वेनालीकस्य निमित्तत्वं नोच्यते किं त्वलीकत्वेनेति न वदतो व्याघात इति वाच्यम् । अलीकस्य सर्वदा समत्वात् कार्यस्य क्रमो वैचित्र्यं च न स्यादिति । एतेन द्वितीयमपि दूषितम् ॥ २३ ॥

द्वितीयतृतीययोराह ।

निमित्तानिमित्तयोरर्थान्तरभावादप्रतिषेधः[(२)] ॥ २४ ॥

निमित्तस्य हेतोरनिमित्तस्य कार्यस्यार्थान्तरभावादर्थान्तरत्वात् । तथा च नियताव्यवहितपूर्ववर्तित्वरूपकारणत्वस्य कार्ये ऽभावादकस्मान्नोत्पत्तिः । यद्वा निमित्तं कारणाधीनं निमित्तपदस्य कार्ये उपचारादनि-

(१) अन्यत्र अनिमित्तनिमित्तत्वादिति पाठः । नव्यास्तु सूत्रद्वयीमेवं व्याचक्षते । समाधत्ते । अनिमित्तेति । दोषान्तरमाह । निमित्तेति । इत्येतत्सूत्रपरसूत्रयोर्व्याख्याने वृत्तिकृद्भिरक्षरशः उक्तम् । वर्तते चेदं न्यायसूचीनिबन्धे ।

(२) पूर्वसूत्रटिप्पणी द्रष्टव्या । इदं न्यायसूचीनिबन्धे वर्तते । अप्रतिषेध इत्यादर्शपुस्तके नास्ति ।

Digitized by Google

मित्तं निमित्तानधीनं तयोरर्थान्तरभावादर्थविशेषवत्त्वात्। कारणाधीने कादाचित्कत्वरूपार्थवत्त्वात् तदनधीने सार्वदिकत्वरूपार्थवत्त्वात्। तथा च कार्यस्य कादाचित्कत्वेन सहेतुकत्वं न तु स्वाभाविकत्वमिति भावः। कण्टकतैक्ष्ण्यादिकं चानिमित्तकं न तत्रादृष्टविशेषसहकृतपरमाणूनां हेतुत्वात्। केचित्तु अनिमित्तस्यानिमित्तसाधकस्य निमित्तत्वादनिमित्तत इति व्याहतम्। अनिमित्तसाधकानभ्युपगमे अनिमित्तत्वमेव न सिध्यतीति भावः। समाधानान्तरमाह। निमित्तेति। इदमत्र निमित्तमिदमनिमित्तमितिप्रतीत्या तयोर्भेदसिद्धेर्निमित्तप्रतिषेधो न युक्तोऽन्यथा सार्वलौकिकी प्रतीतिर्नोपपद्येतेति भाव इत्याहुः॥ २४॥

समाप्तमाकस्मिकत्वनिराकरणप्रकरणम्॥

आकस्मिकमकस्माज्जातम्। अकस्मादित्यत्र किंशब्दो निमित्तपरस्तदन्यस्मादलीकात् स्वस्माद्वा जातमिति पर्यवसितम्। यद्वा कस्मादपि न जातं स्वाभाविकमित्यर्थः॥

सर्वस्यैवानित्यत्वे परमाण्वादेरपि तत्त्वादवयवानां धारायाः अविच्छेदः स्यादित्यतः सर्वानित्यत्वं निराकरोति। तत्र सर्वमनित्यं न वेति संशयः। अनित्यत्वं सर्वत्वावच्छेदेन नित्यत्वं च सामानाधिकरण्येन कोटिरिति बोध्यम्। यद्वा प्रमेयत्वमनित्यत्वव्याप्यं न वेति संशयः। तत्र पूर्वपक्षः।

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात्[(१)]॥ २५॥

(१) तस्मात् सर्वमनित्यमितिसूत्रस्य दृष्टान्तार्थत्वान्नित्येतत्सूत्रव्याख्यावसरे वार्त्तिकम्। पूर्वपक्षसूत्रमिति वृत्तिकृतः।

गगनादेरुत्पत्त्यादिमत्त्वं तस्माद्वा एतस्मादाकाशः सम्भूत इत्यादिश्रुतिबलात् प्रमेयत्वहेतुकानुमानाच्च बोध्यम् । तेन न भागासिद्धिरिति । तत्र ध्वंसे व्यभिचारवारणाय विनाशधर्मकत्वं प्रागभावे तद्वारणायोत्पत्तिमत्त्वमुक्तम् । अनित्यत्वं ध्वंसप्रागभावप्रतियोगित्वम् । यद्वा उत्पत्तिविनाशसहचरितभावत्वादिमत्त्वमेव हेतुरिति पर्यवसितम् । अथवा उत्पत्तिविनाशधर्मकत्वादुत्पत्तिविनाशधर्मकाणां मानसिद्धत्वात् तदन्येषामसिद्धत्वमिति । उत्पत्तिमत्त्वाद् विनाशित्वादिति हेतुद्वये तात्पर्यम् । अनित्यत्वं च कादाचित्कत्वमिति च कश्चित् ॥ २५ ॥

दूषयति ।

नानित्यतानित्यत्वात्(१) ॥ २६ ॥

न पदार्थमात्रस्यानित्यत्वमनित्यताया अनित्यधर्मस्य अनुगतप्रतीतिसिद्धघटत्वादेर्नित्यत्वात् । तथा चांशतो बाध इति भावः ॥ २६ ॥

शङ्कते ।

तदनित्यत्वमग्नेर्दाह्यविनाशानुविनाशवत्(२) ॥ २७ ॥

तस्या घटादेरनित्यताया अनित्यत्वं विनाशित्वं यथाग्नेर्दाह्यस्याश्रयस्येन्धनादेर्विनाशादनु पश्चादग्नेर्विनाशस्तथाश्रयस्य निखिलघटादेर्विनाशे घटत्वादिविनाश इति । अन्ये तु सर्वमनित्यमिति सूत्रस्य सर्वमनित्यं विनाशि उत्पत्ति-

(१) सूत्रं न्यायसूचीनिबन्धे वर्तते ।

(२) दाह्यं विनाश्यानुविनाशवदिति पाठो न्यायसूचीनिबन्धादिषु । तदनित्यत्वमित्यादि सूत्रमिति न्यायवार्तिकतात्पर्यपरिशुद्ध्यादावप्याचार्याः ।

मतो विनाशधर्मत्वादित्यर्थः । नानित्यतेतिसूत्रस्य अनित्यताया ध्वंसस्य नित्यत्वादविनाशित्वात् । तथा चोत्पत्तिमत्त्वं ध्वंसे व्यभिचारीति भावार्थः । तदनित्यत्वमित्यस्य च तस्या अनित्यताया अपि अनित्यत्वं यथाग्नेर्दाह्यस्येन्धनादेर्विनाशानन्तरं स्वयमपि नश्यति न च दाह्योन्मज्जनं तथा घटादेर्नाशोऽपि नश्यति न च घटाद्युन्मज्जनं ध्वंसध्वंसस्यापि प्रतियोगिध्वंसत्वात् ध्वंसप्रागभावानाधारकालस्य प्रतियोग्याधारत्वनियमाभावाच्चेति समुदितार्थ इत्याहुः ॥ २७ ॥

समाधत्ते ।

नित्यस्याप्रत्याख्यानं यथोपलब्धिव्यवस्थानात्(१) ॥ २८ ॥

नित्यस्य नित्यत्वविशिष्टस्य नित्यत्वस्येति यावत् । यथोपलब्धि उपलब्धिमनतिक्रम्य । तथा च धर्मिग्राहकमानेन लाघवादितर्कसहकृतेनाकाशादेर्नित्यत्वव्यवस्थापनात् । आत्मन आकाशः सम्भूत इतिश्रुतौ सम्भूत इत्यस्य तस्याचेतनत्वे ऽपि परमेश्वरसहकारेण कार्यायोन्मुख इत्यर्थ इति ॥ २८ ॥

समाप्तं सर्वानित्यत्वनिराकरणप्रकरणम् ॥

सर्वनित्यत्वे प्रेत्यभावासिद्धिरित्यतस्तन्निराकरणमाह ।

सर्वं नित्यं पञ्चभूतनित्यत्वात्(२) ॥ २९ ॥

---

(१) इदं न्यायसूचीनिबन्धे वर्तते ।

(२) सर्वनित्यत्वे न प्रेत्यभावादिसिद्धिरतस्तन्निराकरणप्रकरणम् । तथाचेपसूत्रमिति वृत्तिकृतः । न्यायसूचीनिबन्धे चेदं वर्तते ।

सर्वं नित्यं मेयत्वात् । तत्र दृष्टान्तप्रदर्शनायाह । पञ्चभूतनित्यत्वात् । तेन परमाण्वाकाशादिर्दृष्टान्त इति । न च घटादीनां नित्यत्वे कथं परमाणुस्वीकार इति दृष्टान्तासिद्धिरिति वाच्यम् । तन्मते व्यक्तानां घटादीनां परमाणौ तन्मात्राख्ये प्रवेशस्वीकारादन्यथा सर्वदैव घटादेः प्रत्यक्षापत्तेः यथा कूर्माङ्गे तत्करचरणादिकं प्रविशति बहिर्निःसरति च तथा घटादिकमव्यक्ते प्रविशति ततो निःसरति चेति भावः ॥ २९ ॥

समाधत्ते ।

नोत्पत्तिविनाशकारणोपलब्धेः[१] ॥ ३० ॥

सर्वनित्यत्वं न युक्तमन्वयव्यतिरेकादिना घटादिकारणदण्डचक्रकपालादितद्विनाशकारणमुद्गरपातादीनां तत्त्वेनोपलब्धेरित्यर्थः ॥ ३० ॥

पुनः सांख्य आह ।

तल्लक्षणावरोधादप्रतिषेधः[२] ॥ ३१ ॥

घटादीनां नित्यत्वप्रतिषेधो न तस्य नित्यत्वस्य यल्लक्षणं ज्ञापकं भूतत्वादि घटादौ तदवरोधात् तत्सत्त्वात् तथा चोत्पादादिप्रत्ययो भ्रम इति भावः । वस्तुतस्तु तल्लक्षणेन घटादिव्यञ्जककपालादिसमाधानेन तिरोधायकेन मुद्गरपातादिना चावरोधात् घटाभिव्यक्तितत्तिरोधानसम्भवादित्यर्थः । उत्पत्तिविनाशतया ग्रहश्च भ्रमरूप एवेति भावः ॥ ३१ ॥

(१) इदं न्यायसूचीनिबन्धे वर्तते ।
(२) एतदपि पूर्ववत् ।

दूषयति ।

नोत्पत्तितत्कारणोपलब्धेः[१] ॥ ३२ ॥

न घटादीनां नित्यत्वमुत्पत्तितत्कारणोपलब्धेः भवताप्यभिव्यक्तितत्कारणस्वीकारात् । तथा च तदभिव्यक्तिकारणत्वमपेक्ष्य तत्कारणत्वस्य लाघवेन कल्पनौचित्यादिति भावः । एतेनोत्पत्तिविनाशेतिसूत्रेण न पौनरुक्त्यम् ॥ ३२॥

ननु घटादेरनित्यत्वे ऽनन्तघटतन्नाशादिस्वीकारे गौरवात् कार्यकारणभावे किञ्चिद् गौरवमकिञ्चित्करमित्यत आह ।

व्यवस्थानुपपत्तेः[२] ॥ ३३ ॥

घटादीनामसिद्ध्यापत्तेः । तथा च दण्डाद् घटो जातो मुद्गरपाताद् घटो विनष्ट इत्यादिप्रत्ययसिद्धोत्पत्तिविनाशापलापे घटादीनामप्यपलापेन सर्वशून्यतामतप्रवेशः स्यादिति । प्रत्यक्षादिसिद्धवस्तूनामपह्नोतुमशक्यत्वमिति भावः ॥ ३३ ॥

समाप्तं सर्वनित्यत्वनिराकरणप्रकरणम् ॥

प्रसङ्गात् सर्वपृथक्त्वमतनिराकरणायाह ।

सर्वं पृथग् भावलक्षणपृथक्त्वात्[३] ॥ ३४ ॥

सर्वमवयवि घटादिकं पृथक् । स्वस्मादपीत्यादि । भावलक्षणानां भावानां रूपरसादिधर्माणां लक्षणानां च तत्तदवयवादीनां पृथक्त्वात् । तथा च रूपरसादीनां

(१) इदमपि पूर्वपूर्ववत् ।

(२) न व्यवस्थानुपपत्तेरिति पाठो न्यायसूचीनिबन्धादिषु । न व्यवस्थानुपपत्तेरिति । प्रोक्तं भाष्य इति वार्त्तिकम् ।

(३) अथ प्रसङ्गात् सर्वपृथक्त्वप्रकरणम् । तत्र पूर्वपक्षसूत्रमिति वृत्तिकृतः । न्यायसूचीनिबन्धे ऽपीदं वर्तते ।

विभिन्नेन्द्रियग्राह्यतालक्षणविभिन्नस्वभावत्वेन विरुद्धतयाश्रयभेदकत्वादवयवानां च मिथो भिन्नत्वात् घटादीनां तत्तदवयवाभिन्नत्वाच्चेति भावः । केचित्तु सर्वं वस्तु पृथक् मानेत्यर्थः । लक्ष्यते ऽनेनेति लक्षणं समाख्या तस्याः पृथक्त्वं पृथगर्थकत्वं । तथा चायं प्रयोगः । घटादिः समूहरूपः वाच्यत्वात् सेनावद् वनवच्चेति । अतीन्द्रिये गगनादौ मानाभावादात्मनः शरीरानतिरेकात् गुणकर्मणोराश्रयाभेदात् विशेषसमवाययोर्मानाभावादभावस्य तुच्छत्वान्न व्यभिचार इति व्याचक्षुः । तच्चिन्त्यम् । परमाणौ व्यभिचारादिति ॥ ३४ ॥

समाधत्ते ।

नानेकलक्षणैरेकभावनिष्पत्तेः(१) ॥ ३५ ॥

अनेकलक्षणैरनेकैरवयवादिभिरेकस्य नानागुणविशिष्टस्य भावस्य निष्पत्तेरुत्पत्तेरित्यर्थः । तथा चावयवावयविनोरभेदो नाङ्गीक्रियते रूपरसादीनां च न मिथो विरुद्धत्वं न चाश्रयस्वरूपत्वं मानाभावादिति भावः ॥ ३५ ॥

ननु किमर्थमेकभावस्वीकार इत्यत आह ।

लक्षणव्यवस्थानादेवाप्रतिषेधः(२) ॥ ३६ ॥

लक्षणेन प्रमाणेन व्यवस्थानात् सिद्धत्वादेकस्यावयविनो न प्रतिषेध इत्यर्थः । तथा चायमेको घटो नीलोऽयं घटः शीतस्पर्शवानित्यादिप्रत्यक्षसिद्धस्य घटादेरैक्यं दुरपह्नवम् । एवं कपालाद् घटो जातो न तु कपालमित्यादिप्रतीत्या तयोर्भेद इति भावः । अथ घटत्वं माना

(१) सूत्रं न्यायसूचीनिबन्धे वर्तते ।
(२) सूत्रमपि पूर्ववत् ।

घटत्वत्वेनानुगतं तच्च प्रत्येकं तत्तदवयवसमुदायपर्याप्तं तदवच्छिन्ने चैकत्वादिव्यवहारो नानुपपन्न एका सेना एकं वनमित्यादिदर्शनादिति चेत्। न। घटादिवत् कपालादेरपि नानात्वात् परमाणुपुञ्ज एव घटादिरिति वक्तव्यम्। तच्च मतं प्रकरणान्तरेणाग्रे निरसनीयमिति॥ ३६॥

समाप्तं सर्वपृथक्त्वनिराकरणप्रकरणम्॥

अथ जगदेव शून्यं कुतोऽयमुपादानोपादेयविचार इत्याशङ्क्य सर्वशून्यतामतनिराकरणाय पूर्वपक्षयति।

सर्वमभावो भावेष्वितरेतराभावसिद्धेः(१) ॥ ३७॥

सर्वं ज्ञेयमभावस्तुच्छो ज्ञेयत्वावच्छेदेनाभावत्वस्यात्र साध्यता अभावत्वेनानुभवो हेतुरिति। तादृशहेतुं दर्शयति। भावेष्विति। भावत्वाभिमतघटादिषु इतरेतराभावसिद्धेः परस्परभेदसिद्धेः किञ्चिदभावसिद्धेरिति यावत्। अभावस्य चाधिकरणरूपतया अभावत्वेनैव सिद्धेरिति पर्यवसितम्। प्रतीतिश्च घटः पटो न घटे पटो नास्तीत्यादिरूपा॥ ३७॥

सिद्धान्तयति।

न स्वभावसिद्धेर्भावानाम्(२) ॥ ३८॥

भावानां पृथिव्यादीनां स्वभावस्य गन्धादेर्गुणस्य सत्त्वादेश्च सिद्धेः। तथा च चन्दनं सुरभि घटो रूपवान् घटः सन्नित्यादिप्रतीत्या अभावो न गन्धवान् न सत्तावांश्चेतिप्रतीत्या च भावः सिध्यतीति भावः॥ ३८॥

(१) ज्ञानविषयत्वमभावत्वव्याप्यं न वेति संशये पूर्वपक्षसूत्रमिति वृत्तिकृतः।

(२) सिद्धान्तसूत्रमिति वृत्तिकृतः। न स्वभावसिद्धेर्भावानामिति। स्वेन भावेन भावा भवन्तीति सूत्रार्थः। किं पुनरनेन सूत्रेण क्रियते पूर्वसूत्रविरोधश्चोद्यत इति वार्तिककृत्।

इदानीमध्यायोपसंहारमाह ।

परिलेखबलमजीवाविक्षेपाद्येषु षोडशोऽध्यायः ।
ग्रहणोत्तरमर्केन्द्वोः षट्चत्वारिंशदार्याणाम् ॥ ४७ ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते
ग्रहणोत्तराध्यायः षोडशः ॥ १६ ॥

स्पष्टार्थम् ॥ ४७ ॥

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितः पर्वविधौ सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्त-
नूतनतिलके ग्रहणोत्तराधिकारः षोडशः ॥ १६ ॥

Digitized by Google

अथ शृङ्गोन्नत्युत्तराध्यायः ।

तत्रादौ प्रश्नमाह ।

भुजकोटिकर्णशशिमानशुक्लसितसूत्रपरिलेखात् ।
प्रतिदिवसं प्रतिघटिकं यो वेत्ति स तन्त्रहृदयज्ञः ॥ १ ॥

शृङ्गोन्नतौ प्रतिदिवसं वा प्रतिघटिकं यो भुजं कोटिं कर्णं शशिमाने चन्द्रबिम्बे शुक्लं सितसूत्रं स्वभासूत्रं परिलेखं च वेत्ति स एव तन्त्रहृदयज्ञः सिद्धान्तग्रन्थमर्मज्ञ इति ॥ १ ॥

भुजादयः शृङ्गोन्नत्यधिकारे पूर्वं साधिता एव । इतोऽत्र परिलेखमेव वक्ष्यति ।

इदानीं परिलेखमाह ।

प्राच्यपरादिगभिमुखं शुक्लेतरपक्षयोर्लिखेत् भूमौ ।
अपवर्त्त्यैकेनेष्टेन राशिना कोटिभुजकर्णान् ॥ २ ॥
परिकल्प्यार्कं विन्दुं तस्माद्बाहुं यथादिशं दत्त्वा ।
बाह्वग्रात् प्राच्यपरां कोटिं तिर्यक्स्थितं कर्णम् ॥ ३ ॥
कर्णाग्रे चन्द्रमसं परिलिख्य सितं प्रवेश्य कर्णेन ।
शशिबिम्बे शुक्लाग्रात् परिलेखसमेन सूत्रेण ॥ ४ ॥
कर्णगतिस्थे नैशे शुक्ले परिलिख्य पश्चिमाभिमुखम् ।
राशिषु मेषतुलादिषु संशोध्य दिवाकरं चन्द्रात् ॥ ५ ॥
पूर्वाभिमुखं कर्कटमकरादिषु भवति शुक्लसंस्थानम् ।
एवं वा संस्थानं परिलिख्येन्दुं प्रसाध्य दिशः ॥ ६ ॥

एकेनेष्टेन राशिना प्रथमं कोटिभुजकर्णानपवर्त्त्य भूमौ शुक्लकृष्णपक्षयोः प्राच्यपरादिगभिमुखं लिखेत् । कथं लिखेदित्याह परिकल्प्यार्कं विन्दुमिति । इष्टं विन्दुमर्कं परिकल्प्य तस्माद्यथादिशं बाहुं बाह्वग्राद्यथादिशं प्राच्यपरां कोटिं तयोर्मध्ये तिर्यक् कर्णं च दत्त्वा कर्णाग्रे चन्द्र-

भसं चन्द्रबिम्बं परिलिख्य तत्र कर्णेन कर्णमार्गेण शशिबिम्बे सितं शुक्लं प्रवेश्य दत्त्वा ततः शुक्लाग्रात् परिलेखसमेन सूत्रेण स्वभासमेन मानेन कर्णोऽङ्कनं कृत्वा तत्केन्द्रात् स्वभया वृत्तं परिलिख्य कर्णागतिस्थे नैशे राशित्रसम्बन्धिनि शुक्ले शुक्लसंस्थानं भवति । शुक्लाग्रं कस्यां दिशि कर्णसूत्रे दत्त्वा परिलेखं कुर्यादित्याशङ्क्याह राशिषु मेषतुलादिष्विति । चन्द्राद्दिवाकरं विशोध्य शेषं कार्यम् । मेषादिराशित्रये तुलादिराशित्रये च शेषे पश्चिमाभिमुखं कर्कटादिराशित्रये मकरादिराशित्रये च शेषे पूर्वाभिमुखं शुक्लं देयमिति । एवं वा संस्थानमित्यस्यार्थे सम्बन्धः ।

अत्रोपपत्तिः । 'यद्याम्योदक्तपनशशिनोरन्तरं सोऽत्र बाहुः'—इत्यादिना 'सूत्रेण बिम्बमुडुपस्य षडङ्गुलेन'—इत्यादिना च भास्करविधानेन ज्ञेया । यदाऽन्तरं राशित्रयाल्पं तदा शुक्लमानं च चन्द्रबिम्बार्धादल्पमतः शुक्लाङ्गुलं पश्चिमाभिमुखं कर्णसूत्रे दत्त्वा तस्मात् स्वभासूत्रेण परिलेखवृत्ते कृते शुक्लेन्दुखण्डाकृतिरुत्पद्यते । यदा तदन्तरं तुलादित्रये तदा कृष्णं बिम्बार्धादल्पं तद्वशेनापि पश्चिमाभिमुखं युक्तम् । एवं कर्कटादित्रयेऽपि कृष्णेन्दुखण्डाकृतिर्मकरादिषु च मासस्य तुर्यचरणे शुक्लशृङ्गोन्नतिरुत्पद्यते तत्र पूर्वाभिमुखं शुक्लसंस्थानं भवति । अत्र का का स्थूलता वास्तवपरिलेखसाधनं च कथमित्येतदर्थं मत्कृता वास्तवचन्द्रशृङ्गोन्नतिर्द्रष्टव्या ॥ २-६ ॥

इदानीं प्रकारान्तरेण परिलेखमाह ।

बाहुज्येन्दुदलगुणा कर्णविभक्ता भुजान्यदिक् चन्द्रे ।
कर्णो भुजाग्रतश्चन्द्रमध्यतः पूर्ववच्छेषम् ॥ ७ ॥

वा एवं वक्ष्यमाणं संस्थानं शुक्लसंस्थानं ज्ञेयम् । अभीष्टस्थाने केन्द्रं प्रकल्प्य चन्द्रबिम्बं परिलिख्य दिशश्च प्रसाध्य ततः पूर्वशृङ्गोन्नत्यध्यायविधिना बाहुज्या भुजा साध्या सा चन्द्रदलेन चन्द्रबिम्बार्धेन गुणा कर्णेन विभक्ता सा चन्द्रे चन्द्रबिम्बेऽन्यदिक् भुजा भवति । ततश्चन्द्रमध्यतश्चन्द्रकेन्द्राद्भुजाग्रतश्च कर्णसंस्थानं ज्ञेयम् । ज्ञाते कर्णसंस्थाने शेषं पूर्ववज्ज्ञेयम् ।

अत्रोपपत्तिः । अत्र रवेर्यद्दिक् चन्द्रः स प्रथमं भुजः साधितो भुजाग्राच्चन्द्रकेन्द्रगता रेखा कोटिः । कोटिसूत्रमेव चन्द्रबिम्बे पूर्वापररेखा । कर्णसूत्रं च चन्द्रबिम्बपरिधौ कोटिसूत्राद्भुजविपरीतदिशि लग्नं तत्स्थानज्ञानार्थं चन्द्रबिम्बार्धे भुजः परिणीतस्ततः कर्णसंस्थानज्ञानं सुगमम् ॥ ७ ॥

इदानीं फलके परिलेखमाह ।

प्राच्यपरे विपरीते फलकेऽन्यत् सर्वमुक्तवच्छेषम् ।
शृङ्गोन्नतिपरिलेखाश्चत्वारः शीतकिरणस्य ॥ ८ ॥

फलके ग्रहणपरिलेखवत् प्राच्यपरे दिशौ विपरीते कार्ये । अन्यत् सर्वं शेषमवशिष्टं कर्मोक्तवत् कार्यम् । एवं शीतकिरणस्य चन्द्रस्य शृङ्गोन्नतिपरिलेखाश्चत्वारो भवन्ति । भूमौ प्रकारद्वयं तद्वयतः फलके प्रकारद्वयमिति चत्वारः परिलेखप्रकारा भवन्तीति ।

अत्रोपपत्तिः । ग्रहणपरिलेखवत् फलकं परिवर्त्याकाशे संस्थाप्य सर्वा दिशो वास्तवा बोध्या इति ॥ ८ ॥

इदानीं विशेषमाह ।

ग्रहयोगेन्दुच्छायाग्रहोदयास्तमयभग्रहमुनीनाम् ।
तत्क्रान्तिज्याप्रश्नोत्तराणि भग्रहयुतौ न पृथक् ॥ ९ ॥

अत्र मध्यगति-स्पष्टगति-त्रिप्रश्न-ग्रहण-शृङ्गोन्नत्यध्यायेषु पञ्चस्वेवोत्तराधिकारा आचार्येणोक्ता अन्येषु किमु नेत्याशङ्क्याह ग्रहयोगेन्दुच्छायेति । ग्रहयोगो ग्रहयुतिः । इन्दुच्छाया चन्द्रच्छायासाधनम् । ग्रहोदयास्तमयाधिकारः । भानां ग्रहस्य लुब्धकस्य मुनेरगस्त्यस्य चोदयास्तादिसाधनम् । एतेषां तथा भग्रहयुत्यधिकारे च मया पृथक् पृथक् तत्क्रान्तिज्याप्रश्नोत्तराणि तेषां क्रान्तिज्यादिभिर्ये प्रश्नास्तथोत्तराणि च नोक्तानि तत्प्रश्नोत्तराणां पूर्वप्रतिपादितपञ्चाध्यायप्रश्नोत्तरान्तर्गतत्वादित्याचार्याशय इति ॥ ९ ॥

इदानीमध्यायोपसंहारमाह ।

इति परिलेखाध्यायः शशाङ्कशृङ्गोन्नतेर्भुजाद्येषु ।
शशिशृङ्गोन्नत्युत्तरमार्यादशकेन सप्तदशः ॥ १० ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते शृङ्गोन्नत्युत्तराध्यायः
सप्तदशः ॥ १७ ॥

इति भुजाद्येषु साधनेषु शशिशृङ्गोन्नत्युत्तरं नाम शशिशृङ्गोन्नतेः परिलेखाध्याय आर्यादशकेन सप्तदशो जात इति ॥ १० ॥

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितः शृङ्गविधौ सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्त-
नूतनतिलके शृङ्गोन्नत्युत्तराध्यायः सप्तदशः ॥ १७ ॥

Digitized by Google

अथ कुट्टकाध्यायः ।

तत्रादौ तदारम्भप्रयोजनमाह ।

प्रायेण यतः प्रश्नाः कुट्टाकाराहते न शक्यन्ते ।
ज्ञातुं वक्ष्यामि ततः कुट्टाकारं सह प्रश्नैः ॥ १ ॥

कुट्टाकाराहृते विना यतः प्रायेण बाहुल्येन गणकैः प्रश्ना ज्ञातुं न शक्यन्ते ततः प्रश्नैः सह कुट्टाकारं वक्ष्यामीति ॥ १ ॥

इदानीं कुट्टकादीनां प्रशंसामाह ।

कुट्टकखर्णधनाव्यक्तमध्यहरणैकवर्णभावितकैः ।
आचार्यस्तन्त्रविदां ज्ञातैर्वर्गप्रकृत्या च ॥ २ ॥

कुट्टकेन । खेन शून्यसङ्कलनादिना । ऋणधनयोः सङ्कलनादिना । अव्यक्तसङ्कलनादिना । मध्यहरणेन मध्यमाहरणेन वर्गसमीकरणेन । एक-वर्णसमीकरणेन । भावितेन । एतैर्ज्ञातैर्वर्गप्रकृत्या च ज्ञातया तन्त्रविदां मध्ये गणक आचार्यो भवत्यतस्तेषां ज्ञानमावश्यकमिति ॥ २ ॥

इदानीं कुट्टकमाह ।

अधिकाग्रभागहाराटूनाग्रच्छेदभाजिताच्छेषम् ।
यत् तत् परस्परहृतं लब्धमधोऽधः पृथक् स्थाप्यम् ॥ ३ ॥
शेषं तथेष्टगुणितं यथाऽग्रयोरन्तरेण संयुक्तम् ।
शुध्यति गुणकः स्थाप्यो लब्धं चान्त्यादुपान्त्यगुणः ॥ ४ ॥
स्वोर्ध्वोऽन्त्ययुतोऽग्रान्तो हीनाग्रच्छेदभाजितः शेषम् ।
अधिकाग्रच्छेदहतमधिकाग्रयुतं भवत्यग्रम् ॥ ५ ॥

यत्र कोऽपि राशिरेकेन हरेण हृतोऽयं शेषः स एव राशिरपरेण हरेण हृतोऽयं शेष इति छेदद्वयं शेषद्वयं चोद्दिश्य तं राशिं कोऽपि पृच्छति तत्राधिकाग्रभागहारादधिकशेषसम्बन्धिहारात् किंविशिष्टादूना-ग्रच्छेदभाजितादल्पशेषसम्बन्धिहारहृताच्छेषं यत् तत् परस्परहृतं लब्धं

च पृथगधोऽधः स्थाप्यम् । एतदुक्तं भवति । अधिकाग्रभागहारेऽल्पाग्रभागहारेण हृते यच्छेषं तेनाल्पाग्रभागहारो विभक्तो यदत्र शेषं तेन प्रथमशेषं भक्तं पुनरत्र यच्छेषं तेन द्वितीयशेषं भक्तमेवं यथेच्छं कर्म कर्त्तव्यम् । फलानि चाधोऽधः स्थाप्यानि । एवमभीष्टं शेषं तथा केनापीष्टेन गुणितं यथाऽग्रयोरन्तरेण संयुक्तं तद्भाजकेनोपान्तिमशेषेण हृतं शुध्यति । एवं सति स गुणकः पूर्वस्थापितफलानामधः स्थाप्यो लब्धं च गुणकस्याधः स्थाप्यम् । ततोऽन्त्यात् कर्म कर्त्तव्यम् । कथमित्याहोपान्त्यगुण इति । स्वोर्ध्वे उपान्त्यगुणोऽन्त्ययुतस्ततस्तदन्त्यं त्यजेदेवमग्रान्तोऽन्त्ये य ऊर्ध्वराशिः स हीनाग्रच्छेदभाजित ऊनशेषसम्बन्धिहरेण भक्तस्तत्र यच्छेषं तदधिकशेषहरेण गुणितमधिकशेषयुतं स राशिर्भवति । स एव छेदवधस्याग्रं भवति इति–अग्रिमसूत्रेण सम्बन्धः । अत्रैतदुक्तं भवति । यदि स राशिश्छेदयोर्वधसमेन हरेण भक्तस्तदा तद्धराल्पत्वात् स राशिरेव शेषं भवतीति ।

यथा मदुक्तमुदाहरणम् ।

चतुस्त्रिंशद्धृतो द्व्यग्रः पङ्क्त्यग्रो विश्वभाजितः ।
तं राशिं शीघ्रमाचक्ष्व यदि जानासि कुट्टकम् ॥

अत्र ३४ छेदस्य शेषम् २ । १३ छेदस्य शेषम् १० । अतोऽधिकाग्रभागहारः = १३ । ऊनाग्रभागहारः = ३४ । अनेनाधिकाग्रभागहारे हृते शेषम् = १३ । ततः परस्परहृते न्यासः ।

```
१३ ) ३४ ( २
     २६
     --
      ८ ) १३ ( १
           ८
           -
           ५ ) ८ ( १
               ५
               -
               ३ ) ५ ( १
                   ३
                   २
                   ३
```

फलवल्ली =

२	३६
१	१४`
१	८`
१	६`
२`	
४`	

अत्रैतावत् कर्म कृत्वा प्राप्तं शेषं २ यदीष्टद्वयेन गुण्यते तदा गुणनफलम् = ४ । इदमग्रान्तरेणा ८ नेन युक्तम् = १२ । इदं तद्धरेण.

३ नेन भक्तं लब्धं निरग्रम् = ४ अतः फलानामधो गुणकस्तदधो लब्धं च संस्थाप्योपान्तिमेन स्वोर्ध्वे हतेऽन्त्येन युते तदन्त्यं त्यजेदित्यादिनाऽग्रान्तः = ३६ । अयं हीनाग्रच्छेदेना ३४ नेन भाजितो जातं शेषम् = २ । इदमधिकाग्रभागहारहतमधिकाग्रयुतं जातो राशिः = ३६ । अयं यदि छेदयोर्वधसमेन हारेणा - ३४ × १३ = ४४२ नेन विभज्यते तदा शेषं राशिसममेव भवति । यदि वल्ली समा स्यात् तदैवं कर्म कर्त्तव्यं यदि विषमा तदा गुणकाधो यल्लब्धं स्थापितं तदृणं प्रकल्प्य बीजप्रक्रियया योगान्तरादि कर्म कर्त्तव्यम् । इदं वक्ष्यति चाचार्योऽग्रे १३ सूत्रेणेति । अभीष्टशेषं केन गुणमग्रान्तरयुतं तद्धरभक्तं शुध्यतीत्यत्र यदि शेषं रूपसमं भवेत् तदा तच्छेषमग्रान्तरसमेन गुणकेन गुणमग्रान्तरमेवातस्तत्राग्रान्तरशोधनेन तद्धरभक्तेन लब्धं निरग्रं शून्यं लाघवेन विदितं भवेदतो भास्कराचार्येण 'मिथो भजेत् तौ दृढभाज्यहारौ यावद्विभाज्ये भवतीह रूपम्'-इत्युक्तमिति सर्वं मत्कृतकुट्टकोपपत्त्या स्फुटम् । (द्रष्टव्ये मच्छोधिते भास्करलीलावतीबीजे) ।

अत्रोपपत्तिः । कल्प्यतेऽधिकाग्रम् = $शे_1$ तद्धरश्च = $ह_1$ । ऊनाग्रम् = $शे_2$ । तद्धरश्च = $ह_2$ । अथ ययाऽधिकाग्रतद्धराभ्यामालापो घटते तथा कल्पितं राशिमानम् = $हा_1 का + शे_1$ । इदमूनाग्रहारेण भक्तं लब्धं नीलकं तद्गुणितहरस्तच्छेषयुतो जातः पूर्वराशिसमः ।

$$ह_2 नी + शे_2 = ह_1 का + शे_1 ।$$

समशोधनादिना नीलकमानमभिन्नम् = $नी = \frac{ह_1 का + (शे_1 - शे_2)}{ह_2}$

अत्र $ह_1$, $ह_2$ भाज्यहाराभ्यां यदि कुट्टकक्रिया क्रियते तदा यद्राशियुग्मं स्यात् तत्राधरो राशिर्वाचार्यस्याग्रान्तः स $ह_2$ अनेनोनाग्रहरेण तष्टः शेषं कालकमानं 'ते भाज्यभाजकमाने भवतः' इति भास्करबीजेन कालकमानमूनाग्रहराल्पं जातं तदधिकाग्रहारेण हतं तच्छेषयुतं राशिमानं स्यादिति । अथ परमं कालकमानम् = $ह_2 - 1$ । इद - $ह_1$ मनेन गुणं $शे_1$ युतं जातम् = $ह_1 ह_2 - ह_1 + शे_1 = ह_1 ह_2 - (ह_1 - शे_1)$ ।

अत्र प्रश्नानुसारेण $ह_1 > शे_1$ । अत $ह_1 - शे_1$ इदं धनात्मकं तेन

Digitized by Google

पूर्वागतं राशिमानं सर्वदा—ह$_1$ ह$_2$ ऽस्माद्दल्पमतश्छेदवधहरेण भक्तं राशिमानं शेषं राशिमानसममेवेत्युपपन्नं छेदवधस्य भवत्यग्रमिति ॥ ३–५ ॥

इदानीं विशेषमाह ।

छेदवधस्य द्वियुगं छेदवधो युगगतं द्वयोरग्रम् ।
कुट्टाकारेणैवं ज्यादिग्रहयुगगतानयनम् ॥ ६ ॥

छेदवधस्य पूर्वश्लोकेन सम्बन्धः पूर्वं प्रतिपादितः । द्वियुगं द्वयोर्ग्रहयोर्योगश्छेदयोर्वधो भवति तथा युगगतमन्तिमयोगात्सद्गतं तद्द्वयोश्छेदयोरग्रं शेषं भवति । एवं कुट्टाकारेण ज्यादिग्रहयुगगतानयनं कार्यम् । अत्रैतदुक्तं भवति । यद्येको ग्रहो दिनचतुस्त्रिंशताऽन्यश्च त्रयोदशदिनैरेकं भगणं भुङ्क्ते । तयोरन्तिमयुतेर्दशदिनानि व्यतीतानि तदा कल्पात् कियन्ति दिनानि व्यतीतानीति प्रश्ने को राशिश्चतुस्त्रिंशद्धृतो दशशेषस्त्रयोदशहृतश्च दशशेष इति प्रश्नोत्तरेणैवोक्तसिद्धिः । अत्राग्रयोः समत्वादधिकाग्रहरश्चतुस्त्रिंशदेव कल्पितस्ततः पूर्वप्रकारेणाग्रयोरन्तरं शून्यं गृहीत्वा गुणकारं शून्यं प्रकल्प्याग्रान्तः शून्यसमो वा द्वितीयहारसमस्तदा राशिः = ह$_1$ ह$_2$ + शे$_1$ अयमग्रश्छेदवधश्च छेद इत्येकस्य प्रकल्प्यान्यस्यैकभगणकालस्तद्धारस्तदग्रश्च पूर्वशेषसमः = शे$_1$ इति प्रकल्प्य पुनः कुट्टाकारेणैव विधिना 'ग्रहत्रयान्तिमयुतेर्दशदिनानि व्यतीतानि तदा कल्पगतं किं'मिति प्रश्नोत्तरमानेयम् । एवं ज्यादिग्रहयुगगतानयनं कार्यम् ॥ ६ ॥

इदानीं भगणादिशेषतोऽहर्गणानयनमाह ।

भगणादिशेषमग्रं छेदहृतं खं च दिनजशेषहृतम् ।*
अनयोरग्रं भगणादिदिनजशेषोद्धृतं द्युगणः ॥ ७ ॥ (८)

भगणादिशेषं छेदहृतमग्रं भवति । खं शून्यं दिनजशेषहृतमेकदिनसंबन्धि यद्भगणादिशेषं तद्दिनजशेषं तेन हृतं द्वितीयमग्रं कल्प्यम् । भगणादिशेषमेकमग्रं तच्छेदो दृढकुदिनादि । शून्यमपरमग्रं तच्छेदो दिनजशेषमिति प्रकल्प्यानयोश्छेदयोर्वधसमे छेदे पूर्वोक्तकुट्टाकारेणाग्रं साध्यं तद्भगणादिदिनजशेषोद्धृतं द्युगणोऽहर्गणः स्यादिति ।

* श्लोकानां द्वितीया संख्या कोलब्रूकानुवादानुसारिणी ।

अत्रोपपत्तिः। अहर्गणप्रमाणं या। इदं कल्पभगणगुणं कुदिनहृतं लब्धं गतभगणाः का। शेषं कल्प्यते भशे। ततो जातं समीकरणम्, कभ· या = ककु· का + भशे

$$\therefore\quad या = \frac{ककु\cdot का + भशे}{कभ}$$

अत्र ककु, कभ भाज्यहाराभ्यां यो राशी तत्राधरः कभतष्टः शेषं कालकमानम्। परन्तु यदधिकाग्रम् = भशे, तच्छेदः = ककु। ऊनाग्रम् = 0 तच्छेदश्च दिनजभगणशेषम् = कभ। तदाऽऽचार्योक्तकुट्टाकारेण छेदवधच्छेदेऽग्रमानम् = का· ककु + भशे। अत इदमग्रं दिनजशेषहृतं लब्धं यावत्तावन्मानमहर्गणः स्यादिति। एवं राश्यादिशेषेऽपि तत्तच्छेदाभ्यां छेदवधच्छेदेऽग्रमानीय तदग्रं तद्दिनजशेषहृतं लब्धमहर्गणो भवतीत्युपपन्नमिति ॥ ७ ॥

अत्र कोलब्रूकानुवादानुसारेण प्रश्नरूपार्यायास्त्रुटिः सा च

(इष्टभगणशेषाद्वा राश्यंशकलाविलिप्तिकाशेषात्।

आनयति युगणं यः कुट्टाकारं स जानाति ॥ ९ ॥)

एवं भवितुमर्हति। इयमार्या च स्पष्टार्था ॥ ९ ॥

इदानीं विशेषमाह।

दिनजभगणादिशेषं येन गुणं मण्डलादि शेषकयोः।
सदृशच्छेदोद्धृतयोस्तद्घातमहर्गणाग्रमतः ॥ ८ ॥ (१०)

उद्दिष्टं मण्डलादि भगणादि शेषं यदि येन केनापीष्टेन गुणं भवेत् तदा द्वे शेषे सदृशच्छेदे च कृत्वा ततस्तयोः शेषकयोः सदृशच्छेदोद्धृतयोश्च कृत्वा 'भगणादिशेषमग्रं छेदहृत'मित्यादिविधिना तद्घातसम्बन्ध्यग्रं साध्यं तदा तदग्रं तज्जातीयं कल्पगतं भवेदतोऽहर्गणाद्यं भवति। यथा कस्मिन् घटिकात्मके कल्पगते चन्द्रस्य भगणशेषं ४१०५ भवेत्। यदि १३७ दिनैश्चन्द्रभगणाः पञ्च ५ भवन्ति। अत्र यदि दिनानि १३७ षष्टिगुणानि कृत्वा १३७ × ६० = ८२२० अयं हरः कल्प्यते तदा सच्छेदमुद्दिष्टभगणशेषम् = $\frac{४१०५}{८२२०}$। दिनजभगणशेषम्

पूर्ववत् ५। ततः 'खं च दिनजशेषहृत'मित्यादिनोनाग्रं सच्छेदम् $= \frac{०}{५}$ ।

अथ सच्छेदे शेषे $\frac{४१०५}{८२३०}$ । $\frac{०}{५}$ । अत्र शेषयोः सच्छेदयोः पञ्चभिरपवर्त्ये जाते नूतने सच्छेदे शेषे $\frac{८२१}{१६४४}$ । $\frac{०}{१}$ । अधिकाग्रभागहाराहूनाग्रच्छेदभाजिताच्छेषमित्यादिना प्रथमशेषम् = ० । तच्छेदः = १ । शून्येनेष्टेन गुणकारेण गुणितं प्रथमशेषं लब्धमग्रान्तरेण युतं ८२१ तच्छेदेन १ हृतं लब्धं निरग्रम् = ८२१ । अत्र पूर्वलब्ध्यभावाद्वल्ली $\frac{०}{८२१}$ } अग्रान्तः = ०। ऊनाग्रच्छेदभाजितः शेषम् = ० । अधिकाग्रच्छेदहतमिदमधिकाग्रयुतं जातो राशिः = ८२१ । इदं घट्यात्मकं कल्पगतं तत् षष्टिहृतं जातं कल्पगतं दिनादि १३ । ४१ ॥

अत्रोपपत्तिः । 'भगणादिशेष'मित्यादि पूर्वसूत्रान्तर्गतैव ॥ ८ ॥

इदानीं स्थिरकुट्टकमाह ।

हृतयोः परस्परं यच्छेषं गुणकारभागहारकयोः ।
तेन हृतौ निश्छेदौ तावेव परस्परं हृतयोः ॥ ९ ॥ (११)
लब्धमधोऽधः स्थाप्यं तथेष्टगुणकारसङ्गुणं शेषम् ।
शुध्यति यथैकहीनं गुणकः स्थाप्यः फलं चान्त्यात्
॥ १० ॥ (१२)
अग्रान्तमुपान्त्येन स्वोर्ध्वो गुणितोऽन्त्यसंयुतो भक्तम् ।
निःशेषभागहारेणैवं स्थिरकुट्टकः शेषम् ॥ ११ ॥ (१३)

यो राशिः केन चिदुद्दिष्टेन गुणकेन गुणित एकहीन उद्दिष्टभागहारेण भक्तः शुध्यति स क इति प्रश्नोत्तरार्थं प्रथमं गुणभागहारयोर्महत्तमापवर्तनमानयति । परस्परं हृतयोर्गुणकारभागहारकयोरन्ते यच्छेषं तेन हृतौ तौ गुणभागहारौ निश्छेदौ दृढौ भवत इति । ततस्तयोर्दृढयोर्गुणभागहारयोः परस्परं हृतयोर्लब्धमधोऽधः स्थाप्यं पूर्वप्रतिपादितकुट्टाकारविधिना । एवमिदं कर्म यथेष्टशेषपर्यन्तं कर्तव्यम् । ततस्तच्छेषं

तया केनापीष्टगुणकारेण गुणितं रूपेण हीनं तच्छेदसम्बन्धिच्छेदेन हृतं यथा शुध्यति। एवं सतीष्टगुणकारः पूर्वाधोऽधः स्थापितफलानामधः स्थाप्यस्तदन्त्याच्च फलं स्थाप्यम्। एवं सम्पन्नायां वल्ल्यामुपान्त्येन स्वोर्ध्वो गुणितोऽन्त्येन संयुत एवं कुट्टाकारविधिनैवायान्तं कर्म कर्त्तव्यम्। तत् निःशेषभागहारेण दृढभागहारेण भक्तं शेषमेवं स्थिरकुट्टको भवतीति। अत्र प्रथमं गुणकारेण भागहारो विभाज्यः।

अत्रोपपत्तिः। 'परस्परं भाजितयोर्ययोर्यः शेषस्तयोः स्यादपवर्त्तनं सः'–इत्यादिभास्करविधिना स्फुटा। इहाचार्येण रूपविशुद्धौ गुण एव साधितोऽतोऽत्राधरराशिरेवायान्तो दृढभागहारेण तष्ट इति सर्वं भास्करकुट्टकप्रकरणेन स्फुटम् ॥ ९–११ ॥

अत्र कोलब्रूकानुवादानुसारेण प्रश्नरूपार्यायास्त्रुटिः सा च
(भगणादिशेषतोऽर्कस्यान्येषां वा दिवागणाग्रं त्वम्।
स्थिरकुट्टकं प्रचत्व कुट्टार्णवपारगोऽसि यदि ॥ १४ ॥)
एवं भवितुमर्हति।

इदानीं स्थिरकुट्टकादहर्गणमाह।

इष्टभगणादिशेषात् स्वकुट्टकगुणात् स्वभागहारहृतात्।
शेषं द्युगणो गतनिरपवर्त्तगुणभागहारयुतः ॥ १२ ॥ (१५)

यदि भगणशेषमिष्टं तदा कल्पभगणा गुणकारः। यदा राशिशेषमिष्टं तदा द्वादशगुणाः कल्पभगणा गुणकारः। भागहारस्तु सर्वदैव कल्पकुदिनानि ज्ञेयानि। एवं गुणकारभागहाराभ्यां स्थिरं स्वकुट्टकं विधाय तत इष्टभगणादिशेषात् किंविशिष्टात् स्वकुट्टकगुणात् पुनः किंविशिष्टात् स्वभागहारहृतात्तच्छेषं स द्युगणोऽहर्गणो भवति स गतनिरपवर्त्तगुणभागहारयुतोऽनेकधा भवति। गतः प्राप्तो निरपवर्त्तेन निश्चयेनापवर्त्तन गुणसम्बन्धी यो भागहारस्तेनाथोद्दृढभागहारेण युतोऽनेकधा भवतीति।

अत्रोपपत्तिः। 'क्षेपं विशुद्धिं परिकल्प्य रूपं पृथक् तयोर्ये गुणकारलब्धी'–इति भास्करविधिना स्फुटा ॥ १२ ॥

इदानीं स्थिरकुट्टके विशेषमाह ।

एवं समेषु विषमेष्वृणं धनं धनमृणं यदुक्तं तत् ।
ऋणधनयोर्व्यस्तत्वं गुण्यप्रक्षेपयोः कार्यम् ॥ १३ ॥ (१६)

एवं पूर्वागतवल्लीस्थफलेषु समेषु रूपशुद्धौ स्थिरकुट्टको भवति । ३-५ सूत्रविधिना च समेष्वेव वल्लीस्थफलेषु कर्म भवति । विषमेषु फलेषु च यदिष्टगुणकारतो लब्धं भवेत् तत् तत्र यदृणं वा धनमुक्तं स्यात् तत् क्रमेण ऋणं धनं कार्यम् । एवमृणधनयोर्गुण्यप्रक्षेपयोश्च व्यस्तत्वं कार्यम् । अत्रैतदुक्तं भवति । यदि गुणो धनः क्षेपश्च व्यस्तस्तत्र धनगुणक्षेपाभ्यां कर्म कर्त्तव्यम् । यत्र च गुणोऽधनः क्षेपश्च धनस्तत्र धनेन गुणेन ऋणक्षेपे कुट्टकः कर्त्तव्य इति ।

अत्रोपपत्तिः 'एवं तदैवात्र यदा समास्ताः'—इत्यादिभास्करविधिना स्फुटा । इहाचार्येण प्रथमं गुणकारेण भागहारो विभाजितोऽतोऽत्र द्वितीयलब्धितो वल्ली सम्पन्ना तेन समायां वल्ल्यामृणक्षेपेऽन्यथा धनक्षेपे भवतीति । 'ऋणभाज्ये धनक्षेपे' इत्यादि विधिना शेषोपपत्तिः स्फुटेति ॥ १३ ॥

इदानीं विलोमगणितमाह ।

गुणकश्छेदश्छेदो गुणको धनमृणमृणं धनं कार्यम् ।
वर्गः पदं पदं कृतिरन्त्याद्विपरीतमाद्यं तत् ॥ १४ ॥ (१७)

अन्त्यादृश्याद्विपरीतं कार्यं तदाऽऽद्यमाद्यराशिमानं भवेत् । शेषं स्पष्टार्थम् । 'छेदं गुणं गुणं छेदं वर्गं मूलं पदं कृतिम्'—इत्यादि भास्करोक्तमेतदनुरूपमेव ॥ १४ ॥

इदानीं प्रश्नमाह ।

यो जानाति युगादि ग्रहयुगयातैः पृथक् पृथक् कथितैः ।
द्वित्रिचतुःप्रभृतीनां कुट्टाकारं स जानाति ॥ १५ ॥ (१७)

द्वित्रिचतुःप्रभृतीनां पृथक् पृथक् कथितैर्ग्रहयुगयातैर्यो युगादि जानाति स कुट्टाकारं जानातीत्यहं मन्ये ।

अस्योत्तरं 'छेदवधस्य द्विगुणमिति' षष्ठसूत्रेण स्फुटम् ।

कोलब्रुकसाहबेन यत्पुस्तकादस्याङ्गलभाषायामनुवादः कृतस्तस्मि-न्नयं सप्तमः श्लोकः ॥ १५ ॥

अत्रोदाहरणार्थं चतुर्वेदाचार्येण कल्पे रविभगणाः ३० । चन्द्रभ-गणाः ४०० । कुजभ॰ १६ । बुभ॰ १३० । गुभ ३ । शुभ ५० । शभ १ । च॰उ॰भ॰ ४ । च॰ पा॰ भ॰ २ । भदिनानि १०९९० । सौरमासाः ३६० । चान्द्रमासाः ३७० । अधिमासाः १० । सौरदिनानि १०८०० । चान्द्रदि-नानि ११९०० । क्षयाहाः १४० । सावनदिनानि १०९६० ।

एकस्मिन् दिने भगणात्मिका गतिश्च ।

र॰	च॰	भौ	बु॰उ॰	गु॰	शु॰उ॰	श	च॰उ॰	च॰पा॰
$\frac{३}{१०९६}$	$\frac{५}{१३७}$	$\frac{१}{६८५}$	$\frac{१३}{१०९६}$	$\frac{३}{१०९६०}$	$\frac{५}{१०९६}$	$\frac{१}{१०९६०}$	$\frac{१}{२७४०}$	$\frac{१}{५४८०}$

कल्पिता । इति सर्वं कोलब्रूकानुग्रहतो ज्ञायते ।

चतुर्वेदटीकाऽस्याध्यायस्य नोपलब्धाऽस्माभिः ॥ १५ ॥

इदानीमन्यं प्रश्नमाह ।

भगणाद्यमिष्टशेषं कदेन्दुदिवसे रवेर्गुरुदिने वा ।
ज्ञदिने राशीन् कथयति कुट्टाकारं स जानाति ॥ १६ ॥(१९)

रवेर्भगणाद्यमिष्टशेषं भगणादिशेषमिष्टं कदा चन्द्रदिने वा गुरु-दिने वा ज्ञदिने भवतीति विज्ञाय यश्च रवे राशीन् राश्यादिरविं कथ-यति स कुट्टाकारं जानातीत्यहं मन्ये । अर्थाद्भगणशेषादहर्गणमानयेति प्रश्नः ।

अस्योत्तरं १२ सूत्रेण स्फुटम् । अत्र कुट्टके तावद्गुर एकादिगुणः तेभ्यो यावदभीष्टो वारो भवेदिति ॥ १६ ॥

इदानीमन्यं प्रश्नमाह ।

ज्ञदिने यदंशशेषं विकलाशेषं कदा तदिन्दुदिने ।
भानोरथवा शशिनो यः कथयति कुट्टकज्ञः सः ॥ १७ ॥(२०)

भानोरथवा शशिनश्चन्द्रस्य यदंशशेषं वा विकलाशेषं बुधदिने दृष्टं तदेव कदा चन्द्रदिने भवतीत्यस्योत्तरं यः कथयति स एव कुट्टकज्ञ इत्यहं मन्ये ।

अस्योत्तरं १२ सूत्रेण स्फुटम् ॥ १७ ॥

इदानीमन्यं प्रश्नमाह ।

तिथिमानदिनेष्विष्टा येऽर्काद्यास्ते पुनः कदा तेषु ।
इष्टग्रहवारेषु यः कथयति कुट्टकज्ञः सः ॥ १८ ॥ (२१)

तिथिमानदिनेषु चान्द्रसौरसावनदिनेष्वर्थादुद्दिष्टाहर्गणे येऽभीष्टा अर्काद्यास्त एव पुनः कदेष्टग्रहवारेषु तेषु चान्द्रसौरसावनदिनेषु भवन्ति । इति यः कथयति स एव कुट्टकज्ञ इत्यहं मन्ये । यस्मिन्नहर्गणे येऽभीष्टा ग्रहा आगतास्तत्समा एव कदेष्टवारेऽन्यस्मिन्नहर्गणे ते भवन्तीति प्रश्नः ।

अस्योत्तरं च १२ सूत्रेण स्फुटम् ॥ १८ ॥

इदानीं बालावबोधार्थं पूर्वप्रश्नोत्तरं कथयति ।

इष्टभगणादिशेषाद् द्युगणस्तत् कुट्टकेन संयुक्तः ।
तच्छेददिनैस्तावद्दिनवारो यावदिष्टः स्यात् ॥ १९ ॥ (२२)

इष्टभगणादिशेषात् तत्कुट्टकेन १२ सूत्रविधिना प्रथमं द्युगणोऽहर्गणः साध्यः स तावत् तच्छेददिनैः संयुक्तो यावदिष्टो वारः स्यादिति स्पष्टम् ॥ १९ ॥

इदानीमन्यान् प्रश्नानाह ।

यो राश्यादीन् दृष्ट्वा मध्यस्येष्टस्य कथयति द्युगणम् ।
द्व्यादिग्रहसंयोगात् ग्रहान्तराद्वा स कुट्टज्ञः ॥ २० ॥ (२३)

य इष्टग्रहस्य मध्यस्य राश्यादीन् दृष्ट्वा द्युगणं कथयति । वा द्व्यादिग्रहसंयोगाद्द्युगणं कथयति । वा द्वयोर्ग्रहयोरन्तराद्द्युगणं कथयति स कुट्टज्ञः कुट्टकज्ञ इत्यहं मन्ये ॥ २० ॥

पूर्वप्रश्नस्योत्तरमाह ।

निरछेदभागहाराद्-
राश्यादिकलादिना हताद्भक्तात् ।
भगणकलाभिर्लब्धं
मण्डलशेषं दिनगणोऽस्मात् ॥ २१ ॥ (२४)

निरछेदभागहाराद्दृढकुदिनमानात् किंविशिष्टाद्राश्यादिककलादिना ग्रहकलात्मकप्रमाणेन हताच्चक्रकलाभिर्भक्ताद्यल्लब्धं तद्भगणशेषं स्यादस्मात् पूर्वोक्तविधिना दिनगणो भवतीति ।

अत्रोपपत्तिः । दृढभगणशेषं चक्रकलागुणं दृढकुदिनभक्तं कलात्मकग्रहो भवत्यतस्तद्विपरीतेन कलात्मकग्रहो दृढकुदिनगुणश्चक्रकलाभक्तो दृढभगणशेषं स्यात् । ततो दृढभगणा भाज्यं दृढभगणशेषं ऋणक्षेपं दृढकुदिनमानं हारं च प्रकल्प्य कुट्टाकारेण गुणमानमहर्गणः स्यात् । ग्रहयोगकलातो वाऽन्तरकलातो यद्दृढभगणशेषं स्यात् तत्र दृढभगणयोगं वा दृढभगणान्तरं भाज्यं प्रकल्प्य पूर्ववत् कुट्टकेनाहर्गणः साध्यः ॥ २१ ॥

इदानीं विशेषमाह ।

एवं राश्यंशकलाविकलाशेषादहर्गणः प्राग्वत् ।
नष्टस्येष्टिवधान् तान् कृत्वा भक्त्वोक्तवच्छेषम् ॥२२॥ (२५)

एवं राशिशेषात् अंशशेषात् कलाशेषात् विकलाशेषाच्च प्राग्वदहर्गणः स्यात् । किं कृत्वा नष्टस्येषु विकलाकलादिमानेषु भक्त्वा विभज्येष्टान् तान् विकलादीन् कृत्वा शेषं भगणशेषमहर्गणं चोक्तवत् कार्यम् । अत्रेदमुक्तं भवति । षष्टिर्भाज्यो विकलाशेषमृणक्षेपो दृढकुदिनानि हार इति प्रकल्प्य यः कुट्टकः स कलाशेषस्तेन षष्टिर्हता विकलाशेषोना दृढकुदिनहृता फलं विकला अभीष्टाः स्युस्ततः कलाशेषमृणक्षेपं षष्टिं भाज्यं दृढकुदिनानि हारं प्रकल्प्य यः कुट्टकः स चांशशेषस्तेन षष्टिर्गुणा कलाशेषोना दृढकुदिनभक्ता फलं कला अभीष्टाः स्युः । एवं राशिशेषानयने त्रिंशद्भाज्यो भगणशेषानयने च द्वादश भाज्यः कल्प्यः । भगणशेषतः पूर्वविधानेनाहर्गणो गतभगणाश्च साध्याः । 'कल्प्याथ शुद्धिर्विकलावशेषम्'—इत्यादि भास्करोक्तमेतदनुरूपमेव ॥ २२ ॥

Digitized by Google

इदानीमन्यं प्रश्नमाह ।

राश्यंशकलाविकलाशेषात् कथितादभीष्टतो नष्टान् ।
यः साधयत्युपरितनान् समध्यमान् कुट्टकज्ञः सः ॥२३॥(२६)

अभीष्टतः कथितान्निर्दिष्टात् राशिशेषात् वाऽंशशेषात् वा कलाशेषादथवा विकलाशेषाच्च यो नष्टान् विकलादीन् तथोपरितनानुपरिशेषान् विकलाशेषतः कलाशेषं कलाशेषादंशशेषमित्यादीन् समध्यमान् मध्यमग्रहसहितान् साधयति स एव कुट्टकज्ञः । निर्दिष्टादेकशेषात् मध्यमग्रहं य आनयति स एव कुट्टकज्ञ इत्यर्थः । अस्योत्तरं पूर्वसूत्रेण स्फुटमपि बालावबोधार्थमग्रे वक्ष्यति ॥ २३ ॥

इदानीमुत्तरमाह ।

येन गुणः शेषयुतश्छेदः शुध्यति हृतः स्वगुणकेन ।
तद्भुक्तं शेषं फलमेवं शेषात् ग्रहद्युगणौ ॥ २४ ॥ (२७)

छेदो दृढकुदिनमानं येन गुणः शेषयुतः स्वगुणकेन हृतः शुध्यति स गुणश्च तद्भुक्तं तस्य ग्रहस्य भुक्तं भवति स्वगुणकेन हृतं यत् फलं प्राप्तं तच्छेषमुपरिशेषं भवति । एवं शेषात् ग्रहाहर्गणौ द्वावेव भवतः । अत्रेतदुक्तं भवति । यथा कलाशेषस्य गुणकः षष्टिश्छेदो दृढकुदिनानि । तत्र येन गुणेन गुणितश्छेदो विकलाशेषयुतः स्वगुणकेन षष्टिमितेन हृतः शुध्यति स गुणो ग्रहविकला भवन्ति फलं च कलाशेषं ज्ञेयमेवं कलाशेषात् कला अंशशेषं च सिध्यति । एवमन्ते भगणशेषज्ञानं तस्मादहर्गणज्ञानं च भवति ।

अत्रोपपत्तिः । यथा कलाशेषं षष्टिगुणं दृढकुदिनहृतं लब्धं ग्रहविकलाः शेषं च विकलाशेषम् । अतो हरो लब्धिगुणः शेषयुतो भाज्यराशिसमः ।

$$६० \times कशे = ग्रवि \times दृकु + विशे$$

$$\therefore \quad कशे = \frac{ग्रवि \times दृकु + विशे}{६०}$$

अतो दृढकुदिनमानं येन गुणं विकलाशेषयुतं षष्टिभक्तं शुध्यति स

Digitized by Google

गुणो षड्विकलाः फलं च कलाशेषम् । एवं स्वस्वशेषगुणकच्छेदाभ्यां तत्तच्छेषमाने भवत इत्युपपद्यते ॥ २४ ॥

इदानीमन्यान् प्रश्नानाह ।

जानाति यो युगगतं कथितादधिमासशेषकादिष्टात् ।
अवमावशेषतो वा तद्योगाद्वा स कुट्टज्ञः ॥ २५ ॥ (२८)

इष्टादधिमासशेषाद्वा कथितादधिमासशेषाद्यो युगगतं जानाति । वा कथितादवमावशेषात् क्षयशेषाद्यो युगगतं जानाति । वा तयोरधिशेषक्षयशेषयोर्योगाद्यो युगगतं जानाति स एव कुट्टकज्ञ इत्यहं मन्ये ।

अत्र 'तथाऽधिमासावमाग्रकाभ्यां दिवसा रवीन्द्वोः—'इत्यादिभास्करविधिनाऽऽद्यप्रश्नद्वयोत्तरं स्फुटम् । तृतं ये चान्द्रेभ्यो येऽधिमासा यच्च तच्छेषं सौरेभ्योऽपि त एवाधिमासास्तच्च शेषम् । अतो गतेन्दुदिनप्रमाणं या १ गताधिमासप्रमाणं च का १ । तदाऽधिशेषप्रमाणं च

$$= \text{कअधिमा} \times \text{या} - \text{कचादि} \times \text{का} = \text{अधिशे}$$

। एवं यदि गतक्षयाहमानं नी १ तदा

$$\text{कक्ष} \times \text{या} - \text{कचादि} \times \text{नी} = \text{क्षशे} \text{ ।}$$

द्वयोर्योगेन

$$\text{या}\,(\text{कअधिमा} + \text{कक्ष}) - \text{कचादि}\,(\text{का} + \text{नी}) = \text{अधिशे} + \text{क्षशे} = \text{यो}$$

$$\therefore \quad \text{का} + \text{नी} = \frac{\text{या}\,(\text{कअधिमा} + \text{कक्ष}) - \text{यो}}{\text{कचादि}}$$

अतः कल्पाधिमासक्षयाहयोगं भाज्यमधिमासक्षयशेषयोगमृणक्षेपं कल्पचान्द्रदिनं हारं प्रकल्प्य यः कुट्टकः स एव गतेन्दुदिनानि तेभ्यः सौरसावनदिनानि च स्फुटानि भवन्ति । इत्यनेन तृतीयप्रश्नोत्तरं स्फुटम् ॥ २५ ॥

इदानीमन्यान् प्रश्नानाह ।

इष्टेषु मानदिवसेष्वधिमासन्यूनरात्रशेषे वा ।
भूयस्ते यः कथयति पृथक् पृथग्वा स कुट्टज्ञः ॥ २६ ॥

इष्टेषु मानदिवसेषु सौरचान्द्रसावनदिनेषु ये अधिमासन्यूनरात्रशेषे तास्ते एव भूयः कदा भविष्यत इति यः पृथक् पृथक् कथयति स

एव कुट्टकः कुट्टकश्च इत्यहं मन्ये । इष्टदिने यदधिशेषं तदेव पुनः कदा, वेष्टदिने यदवमशेषं तदेव पुनः कदा, वेष्टदिने योऽधिमासावमशेषयोगः स एव पुनः कदा भविष्यतीति प्रश्नत्रयम् । पूर्वमधिशेषात् अवशेषाद्वा तयोर्योगाद्वा कुट्टकविधिना गतेन्दुदिनराशिरानीतः स 'इष्टाहतस्वस्वहरेण युतो'ऽनेकधा भवति यत्रापि तदेवाधिमासशेषादिकं भवतीत्युत्तरं स्फुटम् ॥ २६ ॥

(इयमार्या कोलब्रूकानुवादे नास्ति)

इदानीमन्यं प्रश्नमाह ।

अंशकशेषात् च्यूनात् सप्तहृतात् मूलमूनमष्टाभिः ।
नवभिर्गुणं सरूपं कदा शतं बुधदिने सवितुः ॥ २७ ॥ (१८)

सवितुः सूर्यस्यांशकशेषात् च्यूनात् सप्तहृतात्मूलं तदष्टाभिर्न्यूनं नवभिर्गुणमेकेनाढ्यं बुधदिने कदा शतं भवति ।

न्यासः । अंशे ।

ऋ	भा	मू	ऋ	गु	ध	दृ
३	७	·	८	९	१	१००

विलोमगणितेन ।

ध	गु	व	ध	भा	ऋ	दृ
३	७	·	८	९	१	१००

लब्धमंशशेषम् — ५७० । अस्मादहर्गणो बुधदिने पूर्ववत् सिध्यति ।

इदानीमन्यं प्रश्नमाह ।

च्यूनाधिमासशेषान्मूलं द्व्यधिकं विभाजितं षड्भिः ।
द्व्यूनं वर्गितमधिकं नवभिर्नवतिः कदा भवति ॥ २८ ॥ (२९)

अधिमासशेषात् च्यूनान्मूलं तद्द्वाभ्यां युतं षड्भिर्विभाजितं फलं द्व्यूनं वर्गितं नवभिरधिकं कदा नवतिर्भवति ।

न्यासः । अधिशे ।

ऋ	मू	ध	भा	ऋ	व	ध	दृ
१	·	२	६	२	·	९	९०

विलोमगणितेन ।

ध	व	ऋ	गु	ध	मू	ऋ	दृ
३	·	२	६	२	·	९	९०

अधिमासशेषम् — ४०९६ कोलब्रूकानुवादे 'षड्भिः' स्थाने 'द्वाभ्याम्' इति पाठः । अधिशेषात् पूर्वप्रकारेणाहर्गणानयनं सुगममिति ॥ २८ ॥

इदानीमन्यं प्रश्नमाह ।

अवमावशेषवर्गो ह्येको विंशतिविभाजितो ह्यधिकः ।
अष्टगुणो दशभक्तो द्वियुतोऽष्टादश कदा भवति ॥ २६ ॥(३०)

स्पष्टार्थम् ।

न्यासः । वर्गे ।

व	ऋ	भा	ध	गु	भा	ध	हृ
०	१	२०	२	८	१०	३	१८

विलोमगणितेन ।

मू	ध	गु	ऋ	भा	गु	ऋ	हृ
०	१	२०	३	८	११	२	१९

अवमशेषम् = १९ । अस्मात् पूर्वप्रकारेणाहर्गणानयनं सुगमम् ॥ २९ ॥

इति कुट्टाकारः ।

Digitized by Google

अथ धनर्णशून्यानां सङ्कलनम्।

धनयोर्धनमृणमृणयो-
र्धनर्णयोरन्तरं समैक्यं खम्।
ऋणमैक्यं च धनमृणध-
नशून्ययोः शून्ययोः शून्यम्॥ ३० ॥ (३१)

धनयोरैक्यं धनमृणयोरैक्यमृणं भवति। धनर्णयोरन्तरमेवैक्यं भवति। समयोर्धनर्णयोरैक्यं खं शून्यं भवति। ऋणशून्ययोरैक्यमृणं धनशून्ययोरैक्यं धनं शून्ययोरैक्यं च शून्यं भवति।

अत्रोपपत्त्यर्थं मन्मुद्रिता भास्करबीजटिप्पणी द्रष्टव्या॥ ३० ॥

इदानीं व्यवकलनमाह।

ऊनमधिकाद्विशोध्यं धनं धनादृणमृणादधिकमूनात्।
व्यस्तं तदन्तरं स्यादृणं धनं धनमृणं भवति॥ ३१ ॥ (३२)
शून्यविहीनमृणमृणं धनं धनं भवति शून्यमाकाशम्।
शोध्यं यदा धनमृणादृणं धनाद्वा तदा क्षेप्यम्॥ ३२ ॥ (३३)

अधिकाद्धनादूनं धनं विशोध्यं शेषं धनं भवति। अधिकादृणादूनमृणं विशोध्यं शेषमृणं भवति। ऊनाद्धनादधिकं धनं वोनादृणादधिकमृणं विशोध्यं तदा तदन्तरं व्यस्तं विपरीतं स्यात्। अर्थादधिकं धनं विशोध्यं तदा शेषमृणं भवति। अधिकमृणं विशोध्यं तदा शेषं धनं भवति। कथं विपरीतं भवतीत्याह। ऋणं धनं भवति धनं ऋणं भवतीति। चेदृणं शून्यविहीनं शून्येन विहीनं तदा ऋणं धनं च शून्यविहीनं धनं शून्यं च शून्यविहीनमाकाशं शून्यं भवति। यदि ऋणाद्धनं शोध्यं वा धनादृणं शोध्यं तदा क्षेप्यमर्थात् तदा तयोर्योग एवान्तरं भवतीति।

अत्रोपपत्त्यर्थं मन्मुद्रिता भास्करबीजटिप्पणी विलोक्या॥ ३१–३२॥

इदानीं गुणने करणसूत्रम् ।

ऋणमृणधनयोर्घातो धनमृणयोर्धनवधो धनं भवति ।
शून्यर्णयोः खधनयोः खशून्ययोर्वा वधः शून्यम् ॥ ३३ ॥(३४)

ऋणधनयोर्घात ऋणं भवति । ऋणयोर्वधो धनवधो धनयोर्वधश्च धनं भवति । शून्यर्णयोः खधनयोः शून्यधनयोर्वा खशून्ययोश्च वधः शून्यं भवति ॥ ३३ ॥

इदानीं भागहारे करणसूत्रं वृत्तद्वयम् ।

धनभक्तं धनमृणहृतमृणं धनं भवति खं खभक्तं खम् ।
भक्तमृणेन धनमृणं धनेन हृतमृणमृणं भवति ॥ ३४ ॥ (३५)
खोद्धृतमृणं धनं वा तच्छेदं खमृणधनविभक्तं वा ।
ऋणधनयोर्वर्गः स्वं खं खस्य पदं कृतिर्यत् तत् ॥ ३५ ॥ (३६)

धनं धनभक्तं वा ऋणं ऋणभक्तं फलं धनं भवति । खभक्तं खं फलं खं भवति । ऋणेन धनं भक्तं फलमृणं स्यात् । धनेन ऋणं हृतं फलमृणं भवति । ऋणं वा धनं खेनोद्धृतं तच्छेदं तस्य शून्यस्य छेदो यस्मिन्नृणे वा धने तच्छेदं भवति । एवं खं शून्यमृणधनविभक्तं (शून्यं) वा तच्छेदं भवति । फलं शून्यं भवति वा शून्यं तद्धरं स्यादित्यर्थः । ऋणधनयोर्वर्गः स्वं भवति । खस्य वर्गः खं भवति । तत्रैव वर्गस्य पदं भवति यत्कृतिः स एव वर्गो भवेदिति । भास्करबीजेऽप्येतदेव सर्वम् । यच्च खभक्तं खमर्थात् $\frac{0}{0}$ इदं सर्वदा शून्यसमं नेत्येतदर्थे चलनकलनं विलोक्यम् ॥ ३४-३५ ॥

इदानीं सङ्क्रमणविषमकर्माह ।

योगोऽन्तरयुतहीनो द्विहृतः सङ्क्रमणमन्तरविभक्तं वा ।
वर्गान्तरमन्तरयुतहीनं द्विहृतं विषमकर्म ॥ ३६ ॥ (३७)

योगो राश्योर्योगोऽन्तरेण राश्यन्तरेण युतो हीनश्च द्विहृतो दलितो राशी स्तः । इदं सङ्क्रमणं नाम गणितम् । वा राश्योर्वर्गान्तरं राश्यन्तरेण विभक्तं फलमन्तरेण युतं हीनं द्विहृतं च राशी स्तः । इदं विष-

मक्रमं नाम गणितम् । 'योगोऽन्तरेणोनयुतः—इत्यादि तथा वर्गान्तरं राशिवियोगभक्तम्—'इत्यादि च भास्करोक्तं चैतदनुरूपमेव ॥ ३६ ॥

इदानीं समद्विबाहौ लम्बज्ञानात्करणीगतौ भुजावाह ।

करणी लम्बस्तत्कृतिरिष्टहृतेष्टोनसंयुताऽल्पा भूः ।
अधिको द्विहृतो बाहुः संक्षेप्यो यद्वधो वर्गः ॥ ३७ ॥ (३८)

यो लम्बस्तस्य करणी संज्ञा ज्ञेया । तस्याः करण्याः कृतिरिष्टेन हृता । इष्टोनसंयुता कार्या । अनयोर्याऽल्पा सा समद्विबाहोर्भूः कल्प्या । यश्चाधिकः स द्विहृतः समद्विबाहोर्बाहुर्ज्ञेयः । 'संक्षेप्यौ यद्वधो वर्गः' इत्यस्याग्रे सम्बन्धः ।

अत्रोपपत्तिः । समद्विबाहौ यः शिरःकोणादाधारोपरि लम्बस्तद्वशाज्जात्यद्वयं समानमुत्पद्यते । तत्र लम्बः कोटिः । आधारार्धं भुजः । समद्विबाहोर्बाहुः कर्णः । भुजकर्णान्तरमिष्टं प्रकल्प्य तद्वर्गान्तरात् कोटिवर्गाद्विषमकर्मणाऽनन्तरप्रतिपादितेन द्विगुणभुजो भूः । कर्णो बाहुश्चाकरणीगत आनीत इति ॥ ३७ ॥

इदानीं करणीयोगान्तरे करणीगुणनं चाह ।

इष्टोद्धृतकरणीपदयुतिकृतिरिष्टगुणिताऽन्तरकृतिर्वा ।
गुण्यस्तिर्यगधोऽधो गुणकसमस्तद्गुणः सहितः ॥ ३८ ॥ (३९)

यद्वधो ययोः करण्योर्वधो वर्गो भवति तयोरेव संक्षेप्यौ योगोऽन्तरं च भवतीति ज्ञेयम् । इष्टोद्धृतयोः करण्योः पदे याह्ये तद्युतिकृतिर्वा तदन्तरकृतिरिष्टगुणिता तदा तयोः करण्योर्योगान्तरे स्तः । गुणकसमो गुण्यस्तिर्यक्पङ्क्तावधोऽधः स्थाप्यस्ततस्तद्गुणास्तैः खण्डकैर्गुणाः सहितो गुणनफलं स्यात् ।

अत्रोपपत्तिः । मत्कृतभास्करबीजटिप्पणीतः स्फुटा ।

यदा $\text{इ}_1\sqrt{\text{क}}$, $\text{इ}_2\sqrt{\text{क}}$ एतादृश्यौ करण्यौ तदैव गणितयुक्त्या

योगः $= (\text{इ}_1 + \text{इ}_2)\sqrt{\text{क}} = \sqrt{(\text{इ}_1 + \text{इ}_2)^2\,\text{क}}$ ।

अन्तरम् $= (\text{इ}_1 - \text{इ}_2)\sqrt{\text{क}} = \sqrt{(\text{इ}_1 - \text{इ}_2)^2\,\text{क}}$ ।

अथ तदा द्वयोर्वधः $= \text{इ}_1\sqrt{\text{क}} \times \text{इ}_2\sqrt{\text{क}}$

$$= \sqrt{\text{इ}_1^2\text{क}} \times \sqrt{\text{इ}_2^2\text{क}} = \sqrt{\text{इ}_1^2\text{इ}_2^2\text{क}^2}$$

अस्य मूलचिन्हान्तर्गतस्य मूलं निरयम् $= \text{इ}_1\ \text{इ}_2\ \text{क}$ । अतो यदा द्वयोर्वधो वर्गो भवति तदैव तयोर्योगान्तरे उत्पद्येते ॥ ३८ ॥

इदानीं करणीभागहारे वर्गे च करणसूत्रम् ।

स्वेष्टर्णच्छेदगुणौ भाज्यच्छेदौ पृथक् युजावसकृत् ।
छेदैकगतहृतो वा भाज्यो वर्गः समद्विवधः ॥ ३९ ॥ (४०)

भाज्यच्छेदौ स्वेष्टर्णच्छेदगुणौ छेदे या का चिदिष्टा करणी तामृणं प्रकल्प्य तादृक्छेदेन भाज्यहरौ द्वावेव गुणौ पृथक् सम्भवे सति गुणित-भाज्ये गुणितच्छेदे च द्वयोर्द्वयोः करण्योर्युजौ योगौ साध्यौ । पुनः स्वेष्ट-र्णच्छेदगुणौ भाज्यच्छेदौ कार्यावेवमसकृद्यावच्छेदगतैकैव करणी स्यात् । ततो भाज्यो हरैकगतकरण्या हृतो वा फलं स्यात् । अत्र वा पदेन साधा-रणभागहारविधिश्च यद्गुणश्छेदो भाज्याच्छुध्यति स गुण एव लब्धिरि-त्यप्याचार्येण सूचितः । समद्विवधो वर्गो भवतीति स्फुटम् ।

अत्रोपपत्त्यर्थं मत्कृतभास्करबीजटिप्पण्यां 'धनर्णताव्यत्ययमीप्सि-तायाश्छेदे' इत्यादिसूत्रोपपत्तिर्विलोक्या ॥ ३९ ॥

इदानीं करणीमूलानयनार्थं करणसूत्रम् ।

इष्टकरण्यूनाया रूपकृतेः पदयुतोनरूपार्धे ।
प्रथमं रूपाण्यन्यस्ततो द्वितीयं करण्यसकृत् ॥ ४० ॥ (४१)

रूपकृतेः किंविशिष्टाया इष्टकरण्यूनायाः । इष्टा येका तया वेष्ट-योर्द्वयोर्या रूपवद्योगस्तेन वेष्टानामनेकासां यो रूपवद्योगस्तेनोनाया यत् पदं तेन रूपाणि पृथक् युतोनितानि तदर्धे च कार्ये । तत्र प्रथमम-र्धाद्योगार्धे रूपाणि कल्प्यानि । ततोऽन्यदन्तरार्धे द्वितीयं मूलस्यैका करणी भवति । एवमसकृन्मूलानयनं कार्यम् ।

अत्रोपपत्तिः । 'वर्गे करण्या यदि वा करण्योः—' इत्यादिभास्करसू-

चस्य या मद्दृष्ट्यामुपपत्तिस्तया स्फुटा । तत्रान्ये बहवो विशेषाश्च निरीक्षणीयाः ॥ ४० ॥

इदानीमव्यक्तसङ्कलितव्यवकलितार्थं करणसूत्रम् ।

अव्यक्तवर्गघनवर्गवर्गपञ्चगतषड्गतादीनाम् ।
तुल्यानां सङ्कलितव्यवकलिते पृथगतुल्यानाम्॥४१॥(४२)

अव्यक्तानां तद्वर्गाणां घनानां वर्गवर्गाणां पञ्चगतानां पञ्चघातानां षड्गतादीनां षड्घातादीनां तुल्यानां समानजातीनां सङ्कलितव्यवकलिते भवतोऽतुल्यानां भिन्नजातीनां च पृथक् स्थापनमेव तेषां सङ्कलितव्यवकलिते भवत इति । 'योगोऽन्तरं तेषु समानजात्योर्विभिन्नजात्योश्च पृथक् स्थितिश्च–'इति भास्करोक्तमेतदनुरूपमेवातोऽस्योपपत्तिश्च तद्वत् ॥ ४१ ॥

इदानीमव्यक्तगुणने करणसूत्रम् ।

सदृशद्विवधो वर्गस्त्र्यादिवधस्तद्गतोऽन्यजातिवधः ।
अन्योऽन्यवर्णघातो भावितकः पूर्ववच्छेषम् ॥ ४२ ॥ (४३)

सदृशयोर्द्वयोरव्यक्तयोर्वधो वर्गो भवति । त्र्यादीनां समजातीनां वधस्तद्गतस्त्र्यादिघातोऽर्थाद्घनवर्गवर्गादिको भवति । अन्यजात्योर्विभिन्नजात्योर्वधोऽन्योऽन्यवर्णघातो भवति स च भावितको भावित इत्युच्यते । शेषं गुणनभजनादिकं कर्म पूर्ववदिति । 'स्याद्रूपवर्णाभिहतौ तु वर्णो द्वित्र्यादिकानां समजातिकानाम्–'इत्यादिभास्करोक्तमेतदनुरूपमेव ॥ ४२ ॥

इति धनर्णादीनां सङ्कलितव्यवकलितादि ।

Digitized by Google

अथैकवर्णसमीकरणबीजम् ।

तत्रादावव्यक्तमानानयनार्थं करणसूत्रम् ।

अव्यक्तान्तरभक्तं व्यस्तं रूपान्तरं समेऽव्यक्तः ।
वर्गाव्यक्ताः शोध्या यस्माद्रूपाणि तदधस्तात् ॥ ४३॥ (४४)

समे एकवर्णसमीकरणे व्यस्तं रूपान्तरमव्यक्तान्तरभक्तमव्यक्तमानं व्यक्तं भवेत् । यत्पक्षादव्यक्तमानादन्यपक्षाव्यक्तमानं विशोध्याव्यक्तान्तरं साध्यते तत्पक्षस्थरूपाण्यन्यपक्षरूपेभ्यो विशोध्य यच्छेषं तद्व्यस्तं रूपान्तरमित्यर्थः । 'अव्यक्तः । वर्गाव्यक्ता' इत्यादेरग्रे सम्बन्धः । 'एकाव्यक्तं शोधयेदन्यपक्षात्–'इत्यादि भास्करोक्तमेतदनुरूपमेव ॥ ४३ ॥

इदानीं वर्गसमीकरणमाह ।

वर्गचतुर्गुणितानां रूपाणां मध्यवर्गसहितानाम् ।
मूलं मध्येनोनं वर्गद्विगुणोद्धृतं मध्यः ॥ ४४ ॥ (४८)

यस्मात् पक्षादव्यक्तो वर्गाव्यक्ता अव्यक्तवर्गश्च विशोध्यस्तदधस्तादितरपक्षाद्रूपाणि विशोध्यानि । एवमेकपक्षेऽव्यक्तवर्गोऽव्यक्तश्च । अपरपक्षे च व्यक्तानि रूपाणि । तत्राव्यक्तमानं कथं भवेदित्येतदर्थमाह वर्गचतुर्गुणितानामित्यादि । रूपाणां व्यक्ताङ्कानां किंविशिष्टानां वर्गचतुर्गुणितानां चतुर्गुणिताव्यक्तवर्गगुणकगुणितानाम् । पुनः किंविशिष्टानां मध्यवर्गसहितानाम् । मध्योऽव्यक्तस्तस्य गुणकश्चात्र मध्येन गृहीतस्तस्य गुणकस्य यो वर्गस्तेन सहितानां यन्मूलं तन्मध्येनाव्यक्तगुणकेनोनं वर्गद्विगुणोद्धृतं द्विगुणाव्यक्तवर्गगुणकेनोद्धृतं तदा मध्योऽव्यक्तोऽर्थादव्यक्तमानं स्यादिति ।

अत्रोपपत्त्यर्थं मत्कृतभास्करबीजटिप्पण्यां 'चतुराहतवर्गसमै रूपैः'–इत्यादिसूत्रोपपत्तिर्द्रष्टव्या ॥ ४४ ॥

इदानीं प्रकारान्तरेण वर्गसमीकरणेऽव्यक्तमानमानयति ।

वर्गाहतरूपाणामव्यक्तार्धकृतिसंयुतानां यत् ।

पदमव्यक्तार्धोनं तद्वर्गविभक्तमव्यक्तः ॥ ४५ ॥ (५०)

वर्गेणाव्यक्तवर्गगुणकेन हतानां रूपाणां किंविशिष्टानामव्यक्तार्धकृतिसंयुतानामव्यक्तगुणकार्धवर्गसहितानां यत् पदं तदव्यक्तगुणकार्धोनं तदव्यक्तवर्गगुणकविभक्तमव्यक्तोऽव्यक्तमानं स्यादिति ।

अत्रोपपत्तिः । चतुर्भिरपवर्त्य पूर्वसूत्रविधिना स्फुटा ॥ ४५ ॥

इदानीं प्रश्नमाह ।

सैकादंशकशेषाद्द्वादशभागश्चतुर्गुणोऽष्टयुतः ।
सैकांशशेषतुल्यो यदा तदऽहर्गणं कथय ॥ ४६ ॥ (४५)

अंशकशेषात् सैकाद्यो द्वादशभागः स चतुर्गुणोऽष्टयुतस्तदा सैकेनांशशेषेण यदा तुल्यो भवति तदाऽहर्गणं कथयेति ।

अत्रांशशेषप्रमाणं या १ । तदा प्रश्नालापेन

$$\frac{\text{४}(\text{या}+\text{१})}{\text{१२}}+\text{८}=\frac{\text{या}+\text{१}}{\text{३}}+\text{८}=\frac{\text{या}+\text{२५}}{\text{३}}=\text{या}+\text{१}$$

अतश्छेदगमादिना

$$\text{या}+\text{२५}=\text{३ या}+\text{३} \therefore \text{या}=\text{११}$$

अस्मादंशशेषात् रव्यादीनामुद्दिष्टात् पूर्ववदहर्गणः स्यादिति ॥ ४६ ॥

इदानीमन्यं प्रश्नमाह ।

ऊनमधिमासशेषं त्रिहृतं सप्ताधिकं द्विसङ्गुणितम् ।
अधिमासशेषतुल्यं यदा तदा युगगतं कथय ॥ ४७ ॥ (४६)

स्पष्टार्थम् । अत्र प्रश्नालापेन यदि अधिशेषमानं या १ ।

$$\text{२}\left\{\frac{\text{या}-\text{२}}{\text{३}}+\text{७}\right\}=\frac{\text{२ या}-\text{४}}{\text{३}}+\text{१४}=\frac{\text{२ या}+\text{३८}}{\text{३}}=\text{या}$$

$\therefore \text{या}=\text{३८}$ । अस्मादधिमासशेषात् कुट्टकेन युगगतानयनं सुगमम् ॥ ४७ ॥

इदानीमन्यं प्रश्नमाह ।

व्येकमवमावशेषं षड्गुणितं त्रियुतमवमशेषस्य ।
पञ्चविभक्तस्य समं यदा तदा युगगतं कथय ॥ ४८ ॥ (४७)

स्पष्टार्थम् । अत्र प्रश्नालापेन यद्यवमावशेषं या १ ।

$$\frac{\text{या} - १}{६} + ३ = \frac{\text{या} + १७}{६} = \frac{\text{या}}{५} \text{ ।}$$

छेदगमादिना या = ८५ । अस्मात् क्षयशेषात् पूर्वप्रकारेण युगगतानयनं सुगममिति ॥ ४८ ॥

इदानीं वर्गसमीकरणे प्रश्नमाह ।

मण्डलशेषाद् द्युगणान्मूलं व्येकं दशाहतं द्वियुतम् ।
मण्डलशेषं व्येकं भानोरिष्टदिने कदा भवति ॥ ४६ ॥ (४९)

भानोर्मण्डलशेषाद्द्युगणशेषात् । शेषं स्पष्टार्थम् ।

अत्र प्रश्नालापेन यदि भगणशेषप्रमाणं $\text{या}^२ + २$ ।

$१० (\text{या} - १) + २ = १० \text{या} - ८ = \text{या}^२ + २ - १ = \text{या}^२ + १$

पक्षान्तरानयनेन $\text{या}^२ - १० \text{या} = - ९$

वर्गसमीकरणविधिना $\text{या}^२ - १० \text{या} + २५ = २५ - ९ = १६$

अतः $\text{या} - ५ = \pm ४ \therefore \text{या} = ९$ वा १

एवमत्र बीजयुक्तितो द्विविधं मानमुत्पद्यते यावत्तावतस्तद्वर्गेणोत्थापनेन भगणशेषमानम् = ८३ वा, ३ । अत्र चतुर्वेदाचार्येण प्रथममानमेव गृहीतम् । अस्माद्द्युगणशेषात् पूर्वकुट्टकविधिनाऽनेकधाऽहर्गणो भवति स चाभीष्टवारे ग्राह्यः ॥ ४९ ॥

इदानीमन्यं प्रश्नमाह ।

अधिमासशेषपादात् त्र्यूनाद्वर्गोऽधिमासशेषसमः ।
अवमावशेषतो वावमशेषसमः कदा भवति ॥ ५० ॥ (५१)

स्पष्टार्थम् । यद्यधिमासशेषस्य क्षयशेषस्य च प्रमाणं या १ तदा प्रश्नालापेन ।

$$\left(\frac{\text{या}}{४} - ३\right)^२ = \left(\frac{\text{या} - १२}{४}\right)^२$$

$$= \frac{\text{या}^२ - २४ \text{या} + १४४}{१६} = \text{या}$$

तत उक्तवत् $\quad$ या^{2} − ४० या = − १४४

या^{2} − ४० या + ४०० = ४०० − १४४ = २५६

∴ $\quad$ या − २० = ± १६ ततः या = ३६ वा ४

अत्र यदि रूपत्रयतोऽधिशेषस्य क्षयशेषस्य वा पादः शोध्यते शेषस्थधनात्मकोऽपेक्षितस्तदा द्वितीयं मानमेव ग्राह्यम् । ततोऽधिशेषा-द्यवमावशेषाच्च कुट्टकविधिना कल्पगतानयनं सुगममिति ॥ ५० ॥

इदानीमनेकवर्णसमीकरणमाह ।

आद्याद्वर्णादन्यान् वर्णान् प्रोह्याद्यमानमाद्यहृतम् ।
सदृशच्छेदावसकृद्द्वौ व्यस्तौ कुट्टको बहुषु ॥ ५१ ॥ (५२)

आद्याद्वर्णाद्येऽन्ये वर्णास्तानितरस्मात् पक्षात् प्रोह्य शेषमाद्येना-ऽऽद्यवर्णगुणकेन हृतमाद्यमानमाद्योन्मितिः स्यात् । एकस्य वर्णस्योन्मि-तीनां बहुत्वे द्वौ द्वौ पक्षौ व्यस्तावन्योन्यहरगुणनेोद्भूतौ सदृशच्छेदौ कृत्वा-ऽसकृत् तदन्यवर्णोन्मितिः साध्या । एक पक्षस्य हरेणापरपक्षीयौ लवहरौ सङ्गुण्य छेदगमं च विधाया 'आद्यवर्णादन्यान्' इत्यादिना तदन्यवर्णमाने-यम् । एवमसकृत् कर्म कार्यम् । अन्ते बहुषु वर्णेष्वज्ञातेषु कुट्टको भवति । तच्च कुट्टकेनोन्मितिः साध्येत्यर्थः । भास्करानेकवर्णसमीकरणमेतदनुरूप-मेव ॥ ५१ ॥

इदानीं प्रश्नानाह ।

गतभगणयुताद्द्युगणात् तच्छेषयुतात् तदैक्यसंयुक्तात् ।
तद्योगाद्द्युगणं वा यः कथयति कुट्टकज्ञः सः ॥ ५२ ॥ (५३)

अहर्गणादिष्टग्रहस्य गतभगणयुताद्योऽहर्गणं कथयति । वाऽहर्ग-णात् तस्य गतभगणस्य शेषयुताद्योऽहर्गणं कथयति । वाऽहर्गणात् तयो-र्गतभगणभगणशेषयोर्यदैक्यं तेन संयुक्ताद्योऽहर्गणं कथयति । वा तयोर्ग-तभगणभगणशेषयोर्योगाद्योऽहर्गणं कथयति स एव कुट्टकज्ञः ।

प्रथमप्रश्नेऽहर्गणमानं या १ । भगणशेषमानं का १

ततोऽनुपातेन गतभगणाः = $\dfrac{\text{भग}\cdot\text{ या } - \text{ का}}{\text{कु}}$

Digitized by Google

$\therefore$ गभ + या = $\frac{\text{या (यभ + कक्कु) − का}}{\text{कक्कु}}$ = यो ।

ततः का = $\frac{\text{या (यभ + कक्कु) − कक्कु· यो}}{\text{१}}$

कुट्टकेन यावत्तावन्मानं सुगमम् ।

द्वितीयप्रश्नेऽहर्गणाः = या १ । गतभगणाः = का ।

भगणशेषम् = यभ· या − कक्कु· का

$\therefore$ भशे + या = या (यभ + १) − कक्कु· का = यो

$\therefore$ का = $\frac{\text{या (यभ + १) − यो}}{\text{कक्कु}}$ । अतः कुट्टकेन यावत्तावन्मानं सुगमम् ।

तृतीयप्रश्नेऽहर्गणाः = या १ । गतभगणाः = का । ततो

गतभगणशेषम् = यभ· या − कक्कु· का

अतः भशे + या + गभ = या (यभ + १) − का (कक्कु − १) = यो

$\therefore$ का = $\frac{\text{या (यभ + १) − यो}}{\text{कक्कु − १}}$ । कुट्टकेन यावत्तावन्मानं सुगमम् ।

चतुर्थप्रश्नेऽहर्गणाः = या । गतभगणाः = का ।

भगणशेषम् = यभ· या − कक्कु· का

$\therefore$ गभ + भशे = यभ· या − कक्कु· का + का

= यभ·या − का (कक्कु − १) = यो ।

अतः का = $\frac{\text{यभ· या − यो}}{\text{कक्कु − १}}$ । कुट्टकेन यावत्तावन्मानं सुगमम् ॥ ५२ ॥

इदानीमन्यान् प्रश्नानाह ।

गतभगणोनाद्युगणात् तच्छेषोनात् तदैक्यहीनाद्वा ।
तद्विवराद्द्युगणं वा यः कथयति कुट्टकज्ञः सः ॥ ५३ ॥ (५४)

अनन्तरप्रश्नेषु योगस्थाने वियोगः कृत इति स्पष्टार्थम् । उत्तरार्धे च पूर्वप्रश्नोत्तरं योगस्थाने वियोगं कृत्वा कर्म कर्तव्यमिति ॥ ५३ ॥

Digitized by Google

इदानीमन्यान् प्रश्नानाह ।

राश्याद्यैस्तच्छेषैश्चैवं भुक्ताधिमासदिनहीनैः ।
तच्छेषैश्च युगगतं यः कथयति कुट्टकज्ञः सः ॥५४॥ (५५)

एवं राश्याद्यैस्तच्छेषैश्च युताद्धीनाद्वाऽहर्गणात् । गतराश्यादितच्छेषयोगान्तराद्वा । भुक्ताधिमासक्षयाहैश्च युतोनितादहर्गणात् तच्छेषयुतोनितादहर्गणाच्च वा गताधिमासाधिशेषयोगान्तराद्वा गतक्षयाहतच्छेषयोगान्तराद्वा यो युगगतं कथयति स एव कुट्टकज्ञः ।

अत्र यदि गतराशिदिनगणयोग उद्दिष्टस्तदाऽहर्गणः = य । गतभगणाः = का । भगणशेषम् = यभ· या − कक्षु· का । इदं द्वादशगुणं राशिशेषमानं नीलकमपास्य कल्पकुदिनहृतं

$$\text{गतराशयः} = \frac{\text{१२ यभ· या − १२ कक्षु· का − नी}}{\text{कक्षु}}$$

$$\therefore \text{ गरा + अह} = \frac{\text{या (१२ यभ + कक्षु) − १२ कक्षु· का − नी}}{\text{कक्षु}} = \text{यो}$$

$$\text{ततः या} = \frac{\text{१२ कक्षु का + नी + यो· कक्षु}}{\text{१२ यभ + कक्षु}}$$

। 'अन्येऽपि भाज्ये यदि सन्ति वर्णास्तन्मानमिष्टं परिकल्प्य साध्ये' इत्यादिभास्करविधिना कुट्टकेन यावत्तावन्मानं सुगमम् । एवमालापानुसारेण समौ पक्षौ विधाय कुट्टकादिनाऽव्यक्तमानमन्येषु प्रश्नेष्वप्यानेयमिति ॥ ५४ ॥

इदानीमन्यौ प्रश्नावाह ।

अंशकशेषेण युतात् लिप्ताशेषात्तदन्तरादथवा ।
भानोर्ज्ञदिने द्युगणं यः कथयति कुट्टकज्ञः सः ॥५५॥ (५६)

भानोर्लिप्ताशेषादंशकशेषयुताद्वा तयोर्लिप्तांशशेषयोरन्तराद्वा यो बुधवारेऽहर्गणं कथयति स एव कुट्टकज्ञः ।

कल्प्यतेऽहर्गणः = या । रविभगणभागाः = रभा· रभ = अ । गतभागाः = का । ततोंशशेषम् = अ· या − कक्षु· का । इदं षष्टिगुणं कल्पकुदिनहृतं लब्धं नीलकमानं नी १ । तद्गुणितं हरं भाज्यादपास्य जातं कलाशेषम् = ६० अ· या − ६० कक्षु का − कक्षु· नी

अतः भाशे + कशे = ६० अ· या − ६० कक्षु· का − कक्षु· नी + अ· या − कक्षु का = या (६० अ + अ) − कक्षु (६१ का + नी) = यो

ततः $\text{६१ का} + \text{नी} = \frac{\text{या (६१ अ)} - \text{यो}}{\text{कक्षु}}$ । कुट्टकेन यावत्तावन्मानं सुगमम् ।

यदि योगमानम् = ५३६ । कल्पकुदिनानि = १०९६ । रविभगणाः = ३ । तदा अ = चक्रभा· रभ = ३६० × ३ = १०८० ।

६१अ = ६५८८० । ततः पूर्वसमीकरणरूपम् ।

$$\text{६१ का} + \text{नी} = \frac{\text{६५८८० या} - \text{५३६}}{\text{१०९६}} = \frac{\text{१६४७० या} - \text{१३४}}{\text{२७४}}$$

$$= \frac{\text{८२३५ या} - \text{६७}}{\text{१३७}} = \text{६० य} + \frac{\text{१५ या} - \text{६७}}{\text{१३७}} \text{ ।}$$

अतोऽय $\frac{\text{१५ या} - \text{६७}}{\text{१३७}}$ मभिन्नः । अत्र कुट्टकेन रूपविशुद्धौ वल्ली ०, ९, ०, १, ० रूपविशुद्धौ गुणः = ६४ । अभीष्ट ६७ विशुद्धौ गुणः = ४१ यावत्तावन्मानं सुखेन भवति । चतुर्वेदाचार्यमतं यच्च कोलब्रूकेनानुवादितं महागौरवमप्रयोजकं च । एवमन्तरतोऽपि कर्म कर्त्तव्यम् ॥ ५५ ॥

इदानीमन्यान् प्रश्नानाह ।

अंशकशेषं त्रियुतं लिप्ताशेषं कदा रवेर्ज्ञदिने ।
षट् सप्ताष्टौ नव वा कुर्वन्नावत्सराद्गणकः ॥ ५६ ॥ (५७)

रवेरंशकशेषं त्रियुतं कदा बुधदिने लिप्ताशेषं भवति । वांशकशेषं षड्भिः सप्तभिरष्टभिर्वा नवभिर्युतं कदा बुधदिने लिप्ताशेषं भवति । अस्योत्तरमावत्सरादेकवर्षाभ्यन्तरे कुर्वन्नपि गणक इत्युच्यतेऽस्माभिरिति ।

अनन्तरप्रश्नोत्तरयुक्त्या

अंशशेषम् = अ· या − कक्षु· का

कलाशेषम् = ६० अया − ६० कक्षु· का − कक्षु· नी

ततः प्रश्नालापेन

रुक्तं चेति । तत्राद्यं यथा अनित्यः शब्दोऽनित्यः शब्द इति । द्वितीयं तु पर्यायेणाभिधानं यथा अनित्यः शब्दः विनाशी ध्वनिरिति । तृतीयं तु अग्निनोष्णेन युक्तः पर्वतः उष्णेनाग्निना युक्त इति च । एवं वाक्येऽपि जीवन् देवदत्तो गृहे नास्तीत्युक्ता बहिरस्तीत्यादि । तदेतत् सर्वमुक्तम् । शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादादिति अर्थादापन्नस्य स्वशब्देन पुनर्वचनमिति च नियमकथायामेव पुनरुक्तं निग्रहस्थानं नान्यत्रेति विश्वरूपादयः । शब्दपुनरुक्तस्य भेदेन निर्देशोऽप्यर्थभेदेऽप्युक्तशब्दो न पुनर्वक्तव्य इति नियमकथायां शब्दमात्रपुनरुक्तिरपि निग्रहस्थानमिति सूचयितुमिति विश्वरूपजयन्ताविति ॥ १२ ॥

ज्ञातार्थं प्राश्निकैर्वाक्यं त्रिरुक्तं नानुभाषते ।
योनुद्भाव्य स्वमज्ञानं तस्यैवाननुभाषणम् ॥ १३ ॥

प्राश्निकैर्ज्ञातार्थमितिवचनात् प्रतिवादिज्ञानमविवक्षितमिति दर्शयति । त्रिरुक्तमित्युच्चारणयोग्यतामात्रप्रदर्शनपरम् न न्यूनाधिकसंख्याव्यवच्छेदपरमुक्तं वादिनेति शेषः । तदनुपादानं तु मन्दस्य

पुनर्वचनमिति सूत्रकारस्य तात्पर्यमाह । शब्दपुनरुक्तस्येति ॥ १२ ॥

उच्चारणयोग्यतामात्रं सभायामशक्तस्यासत्येवं दूषणादिव्यतिरिक्तत्वमात्रम्(?) । न न्यूनाधिकेति । प्रथमत एव परिषत्प्रतिपत्तिसिद्धेरविज्ञातार्थवन्न त्रिरिति नियम इत्यर्थः । तदनुपादानं मूलपद्यकारेण वादिनेत्यनुक्तिः । अन्यथा

Digitized by Google

कदाचित् परिषदाप्यनूद्य दीयत इति सूचनार्थम् । अज्ञानानुद्भावनवदविच्छेदोपि कथायां विवक्षितः । अन्यथा विक्षेपस्यैवापातात् । तेनायमर्थः । वादिनो-क्तस्य प्राश्निकैर्विज्ञातार्थस्य पुनर्वादिना परिषदा वा-नूद्य दत्तस्योच्चारणायोग्यस्याज्ञानमनाविष्कुर्वता क-थामप्यविच्छिन्दता यदप्रत्युच्चारणं तदननुभाषणं नाम निग्रहस्थानमिति । न चात्राज्ञानाप्रतिभयोरव-सरः ज्ञातार्थस्य स्फुरदुत्तरस्यापि सभाक्षोभेण वाक्कुण्ठ-त्वेन वाप्यननुभाषणोपपत्तेः । तयोस्तदानीमनिश्च-यादननुभाषणस्य च योग्यानुपलब्धस्यैव निर्णीतत्वात् । अत्र च नञः पर्युदासवृत्तित्वाभ्युपगमात्तदित्यादिसर्व-नाम्नानुवादो दूष्यैकदेशानुवादो यथानुवादः केवलदू-षणोक्तिः स्तम्भनं चेति पञ्चाप्यननुभाषणत्वेन सङ्गृह्य-न्ते । सर्वं चैतन्निग्रहस्थानमेव तूष्णीम्भावे दूषणाश्रयो-पादानस्याकृत्वाप्रतिपत्तेः दूषणमात्रवचने निराश्र-

---

कथाविच्छेदे सति । तेन एवं यद्यस्यावयवार्थनिर्णयेन । कथामप्यविच्छिन्दता यत्किञ्चिद्वचनेन कथाभासप्रबन्धं कुर्वता प्रतिवादिनेति शेषः । वाक्कुण्ठत्वेन सदपातिना यथा यथा व्यवहारवैधुर्येण (:) । तयोस्तदानीमिति । अज्ञानाधि-कारात् केवलं तूष्णीम्भावाभावाच्चाज्ञानाप्रतिभयोरननु-भाषणसमये निर्णयाभावादित्यर्थः । योग्यानुपलब्धस्य श्रोतुं योग्यस्यानुभाषणस्याश्रुतत्वेन सिद्धस्य । पर्युदासवृ-त्तित्वं अनुभाषणव्यतिरिक्तवाचकत्वम् । दूषणाश्रयोपा-

यद्दूषणस्यादूषकत्वेनासाधनोपादानात् अयथानुवादे च दूषणोपादानाद्विप्रतिपत्तेः । एकदेशानुवादे च तथा एकदेशदूषणे तु समुदायस्यादूषितत्वात् । न ह्यनित्यत्वे साध्ये ऐन्द्रियकत्वमात्रस्यानैकान्तिकत्वेन गुणत्वेन विशेषितस्याप्यनैकान्तिकता स्यात् । सर्वनाम्नानुवादे ऽपि प्रकृतस्य भूयस्त्वेन सन्देहानतिक्रमेण तूष्णीम्भावाविशेषात् । न च दूषणस्वरूपयोग्यतया दूष्यविशेषनिश्चयः । असिद्धत्वादिना सर्वस्यापि दूष्यत्वात् । योग्यमेवायं ब्रवीतीत्यनिश्चयाच्च । दूष्यमात्रमेवानुभाषणीयम् न तु सर्वं वादिवाक्यम्

दानस्य वादिवाक्ये दूष्यमात्रानुवादस्य । असाधनोपादानार्थं दूष्यप्रतिक्षेपासमर्थदूषणोपादानरूपविप्रतिपत्तेरित्यर्थः । व्यधिकरणत्वेन वादिसाधनदूषणबुद्ध्या तद्व्यतिरिक्तमनूद्य दूषणवचनादित्यर्थः । तथेत्यविशिष्टप्रतिपत्तिमुपपादयति । गुणत्वेनेति । गुणत्वे सत्यैन्द्रियकत्वादित्युक्तस्येत्यर्थः । सन्देहानतिक्रमेण प्रकृतेषु मध्ये अस्यायं दोषो नान्यस्येति निर्णायकाभावेन । न च दूषणस्वरूपेति । विप्रतिपन्नमुपलब्धिमत्कारणमित्यत्र विप्रतिपन्नस्यानेकत्वे ऽपि यथा साध्यविशेषोपादानेन तद्विशेषसिद्धिरेवं दूषणस्वरूपविशेषसामर्थ्याद् दूष्यविशेषसिद्धिरिति न वाच्यं दूषणस्य साध्यवदन्यताश्रयावृत्तित्वाभावादित्यर्थः । योग्यमेवेति । दूषणयोग्यं प्रत्ययं प्रतिवादी दूषणं ब्रूते नान्यं प्रतीति वादिनो निश्चयाभावाच्च न विशेषनिश्चय इति

अनुपयुक्ताभिधानेनार्थान्तरत्वप्रसङ्गात् । प्रौढिप्रक-टनाय सर्वानुभाषणनियमे तदकरणमेव निग्रहहे-तुर्भवति । न च तेनैव वादिवाक्येनानुभाषणीयमिति नियमः । वाक्यान्तरेणानुभाषणे ऽपि तत्प्रयोजन-सिद्धेः तत्प्रसिद्धपदैरेवानुवादेनानुभाषणमित्यननुभा-षणाभासं दर्शयद्भिराचार्यैरेव वादिप्रसिद्धपदैरप्यनु-भाषणस्याङ्गीकृतत्वाच्च विज्ञातस्य परिषदा त्रिर-भिहितस्याप्रत्युच्चारणमननुभाषणमिति सूत्रं सुगम-मेवेति ॥ १३ ॥

ज्ञाते ऽपि वादिवाक्यार्थे प्राश्निकैस्तत्र चेत् परः ।
स्वाज्ञानमुद्भावयति तदाज्ञानेन निग्रहः ॥ १४ ॥

वादिना त्रिरुक्ते प्राश्निकैर्ज्ञातार्थे सत्यपि वादिवा-क्ये प्रतिवादी स्वाज्ञानमाविष्करोति न ज्ञायते मयेति तदा तस्याज्ञानं नाम निग्रहस्थानं भवति । अज्ञानाना-विष्करणे त्वननुभाषणमेव निश्चितत्वादुद्भाव्यम् । अ-ज्ञातं चाज्ञानमिति सूत्रे चकारः परिषद्विज्ञानं वादि-त्रिरभिधानं च समुच्चिनोति। अविज्ञातं वादिवाक्यं येन तस्याज्ञानमिति । अथवा भावे क्तोत्पत्तिरङ्गीकार्या यस्य वादिवाक्यार्थे अज्ञानं तस्याज्ञानमित्यर्थः ॥ १४ ॥

पूर्वेण सम्बन्धः । तत्प्रसिद्धपदैः वादिवाक्यव्यतिरिक्तप-दैः । अननुभाषणाभासं निरनुयोज्यानुयोगविशेषम् ॥ १३ ॥

वादिवाक्यमर्थप्रतिपत्तये विशेषः । भावे क्तोत्पत्ति-र्विशेष्यवाचकस्य शब्दस्य विशेषण धर्मपरत्वम् ॥ १४ ॥

वाग्युक्तस्यानूदितस्य प्रतिवादी यदोत्तरम् ।
प्रतिपत्तुं न शक्नोति तदास्याप्रतिभा भवेत्(१) **॥१५॥**

वादिनोक्तस्य स्वेन चानुभाषितस्य वाक्यार्थस्य प्रतिषेधरूपमुत्तरं यदा प्रतिवादी न प्रतिपत्तुमीष्टे तदा तस्याप्रतिभा नाम निग्रहस्थानं भवति । तूष्णीम्भाववद्बीजवार्त्तावतरणश्लोकादिपाठकेशादिविरचनगगनसूचनभूतलविलेखनादि यत् किञ्चित् क्रियान्तरकरणे ऽपि निगृह्यत एव न त्वपस्मारभूतावेशादिनिमित्तेषु तेषामपकर्षासूचकत्वात् । भूषणकारादयस्तु श्लोकादिपाठे अर्थान्तरापार्थकादिप्रसङ्गात् तूष्णीम्भावमेवाप्रतिभानिग्रहहेतुमाहुः । असत्साधने पर्यनुयोज्योपेक्षणसहचारिणी । इतरेत्रेयमसङ्कीर्णा न चावश्योद्भाव्या उत्थितस्वेदादिना सुव्यङ्ग्यत्वात् । कथावसाने तिरोधानायोगाच्च उत्तरस्याप्रतिपत्तिरप्रतिभेति सूत्रमुक्तार्थमेवेति ॥ १५ ॥

गगनसूचकं गगनगतकाष्ण्यादिविशेषप्रदर्शनम् । निगृह्यत एव । अप्रतिभयेति शेषः । श्लोकपाठ इति । पठितस्य श्लोकादेः प्रकृतार्थान्वये सत्यनुपयुक्तत्वेनार्थान्तरत्वमनन्वये ऽपार्थकत्वं कस्यचिदर्थस्य वाचकत्वे निरर्थकत्वमित्यादिप्रसङ्गादित्यर्थः । असत्साधन इति । असङ्कीर्णा न निग्रहान्तरसहिता । उत्थितपराजयप्रकाशकविषादगर्वस्मितस्वेदादीत्यादिशब्देन देहकम्पगद्गदत्वादिकं गृह्यते ॥ १६ ॥

(१) भवेदप्रतिभा तदा—पा॰ A पु॰ ।

Digitized by Google

कथामभ्युपगम्यैव तद्विच्छेदाय कस्यचित् ।
व्याजस्य वचने प्राहुर्विक्षेपं निग्रहग्रहम्[1] ॥ १६ ॥

कथामुपक्रम्य परिषदि श्रोतुमेकतानमनसि प्रतियोगिनि च दत्तावधाने सम्प्रति मे महत्प्रयोजनमस्ति श्वः परश्वो वा कथयिष्यामीति कस्यचिद्व्याजस्य वचने विक्षेपलक्षणं निग्रहस्थानमाहुराचार्याः । अप्रतिभायां वृथाचेष्टाभिरिवात्रापि व्याजोक्तरेणाशक्तिरुन्नीयत एव । अत्र च ताम्बूलभक्षणोद्गिरणमूत्रोच्चारणाद्यावश्यकमनुष्यधर्मा व्याजा भवन्ति सर्वप्राणिधर्मत्वात् कथाविच्छेदाहेतुत्वाच्च । उपक्रमादारभ्य कथाया यावत् समाप्ति चास्यावसरः । अवश्योद्भाव्यं चैतत् अन्यथा अहङ्कारखण्डनाभावात् । कथाविच्छेदाहेतुत्वात् कार्यव्यासङ्गात् कथाविच्छेदो विक्षेप इति सूत्रं सुगममेव ॥ १६ ॥

अनिष्टभ्रमतोऽन्येषामिष्टमापादयेद्यदि ।
मतानुज्ञेति तस्य स्यान्निग्रहस्थानमुद्भटम् ॥ १७ ॥

निग्रहग्रहमपजयाख्यमपि वाच्यम् ।

कथामुपक्रम्य अन्येन वादं कर्तुं सभामध्यमारुह्य । मूत्रोच्चारणादीत्यादिशब्देन विवेकास्फुरणजकासष्ठीवनादिकं गृह्यते । इयं वादिप्रतिवादिनोर्द्वयोरपि सम्भवतीत्याह । उपक्रमादारभ्येति ॥ १६ ॥

---

(१) विक्षेपं नाम निग्रहम्—पा॰ B पु॰ ।

स्वसिद्धान्ते परेणापादितं दोषमनुद्धृत्य परस्यानिष्टबुद्ध्या इष्टप्रसञ्जनं मतानुज्ञेत्यर्थः । तथा च सूत्रम् । स्वपक्षदोषाभ्युपगमात् परपक्षदोषप्रसङ्गो मतानुज्ञेति । यथा केनचिदात्मनश्चोरत्वमभ्युपगम्य पुरुषत्वाच्चोरस्त्वमसीत्युक्ते तत एव हेतोस्त्वमपि चोर इति प्रसञ्जनम् । न ह्यनेनात्मनश्चोरत्वं परिहृतम् । न ह्येकमिन्धनमग्निसम्बद्धं दग्धमित्यन्यन्न दह्यते । न चायं प्रसङ्गः इष्टापादनत्वात् । तथा अनित्यः शब्दः कार्यत्वादित्युक्ते तत एव हेतोर्घटोऽप्यनित्यः स्यादित्यादीन्यप्युदाहरणानि । अत्रानिष्टमेव परस्य ब्रूयादिति रहस्यम् । भूषणकारः पुनरेवं व्याख्यातवान् । यस्तु स्वपक्षे दोषमनुद्धृत्य केवलं परपक्षे दोषं प्रसञ्जयति स तु परापादितदोषाभ्युपगमात् परमनुजानातीति मतानुज्ञया निगृह्यत इति । अत्र स्वदोषपरिहारेणैव परस्य दोषं प्रसञ्जयेदिति सङ्क्षेप इति ॥ १७ ॥

अनिष्टं प्रतिवादिनोभिमतं स्वपक्षे परोक्तदोषमनुद्धृत्येति शेषः । अनेन त्वमपि चोर इति वचनेन न हि दूष्यत इति सम्बन्धः । न चायं प्रसङ्गः त्वमपि चोर इति वचनं प्रस्तुतानुमानस्यानिष्टप्रसङ्गाख्यप्रतिकूलतर्को न भवतीति परस्य स्वचोरत्वस्येष्टत्वादित्यर्थः । आदिशब्दादीश्वरो न कर्ता आत्मत्वाज्जीववदित्युक्ते तर्हि तत एव जीवोप्यसर्वज्ञः स्यात् । क्षित्यादिकं नेश्वरकर्तृकं कार्यत्वाद् घटवदित्युक्ते तर्हि तत एव घटः सावयवी स्यादित्यादिकं

अवश्योद्भाव्यमापन्नकालं निग्रहमागतम् ।
अनुद्भावयतः पर्यनुयोज्योपेक्षणं भवेत् ॥ १८ ॥

पर्यनुयोज्योपेक्षणव्यतिरिक्तनिग्रहस्थानप्राप्तौ तदनुद्भावनमेव निग्रहहेतुः । न स्वोपेक्षणानुद्भावनमपि । तथा सति द्वयोरपि वादिनोर्निग्रहानन्त्यप्रसङ्गात् प्रयोजनाभावाच्च नोपेक्षणानुद्भावनमुद्भावनीयम् तथानेकदोषसन्निपाते यदेकोद्भावनेनेतरोपेक्षणं तदप्यनुद्भाव्यमेव । अन्यथाधिकत्वप्रसङ्गात् । तेनोक्तमवश्योद्भाव्यमिति पुरःस्फूर्त्तिकानधिकृतोद्भावितानां झटिति संवरणेन तिरोहितावसराणां च उत्तरकाले

गृह्यते । एवं व्याख्यातवान् सूत्रमेवं व्याकृतवान् ॥ १७ ॥

तथा सतीति । पर्यनुयोज्योपेक्षणानुद्भावनस्यापि पर्यनुयोज्योपेक्षणत्वेन प्रथमस्खलनप्रवृत्तयोर्वादिप्रतिवादिनोस्तद्रूपनिग्रहपरम्परा प्रसङ्गादित्यर्थः । प्रयोजनाभावाच्चेति । दुष्टत्वेन पर्यनुयोज्यमात्रमुपेक्षितवानिति हि तदुद्भावनं तदा स्वदोषस्यापि कीर्तनादुभयोर्निगृहीतत्वेन जयपराजयनिरूपणप्रयोजनासिद्धेश्च । उपेक्षणस्योद्भाव्यत्वमेव न स्वतस्तदुद्भावनं निग्रहकारणमित्यर्थः (?) । अन्यथेति । दोषान्तराणामप्युद्भावने अनियमकथायां दूषणाधिकत्वप्रसङ्गादित्यर्थः । प्रयोजनाभावात् अन्योद्भावितोद्भावने स्वस्य जयपराजयाभावात् । झटिति परिहृतानामुद्भावने परस्परं पराजयाभावाच्चेत्यर्थः । उक्तार्थे निग्रहस्थान-

526. "Will not the genitive case be used, in the absence of the relation of the deed and the doer? Not so, since this general use of the genitive is restricted to the relations between nouns only.[1]

527. "The other cases like the accusative are used to express the relations between the verb and the connected noun. And the tenses like the present etc. are used to express the relation between the meaning of the noun-stem and that of the root. There is thus no incongruity.

528. "The two words 'blue' and 'lotus,' though having the meaning of nouns, have lost all difference as between themselves and become one and the same. Hence the genitive case is not proper.

529. "The aspirant who is enjoined by the use of the potential mood is not the object of the verb, for the injunction is not the act. If it were so, the accusative would be used.

530. "Therefore the aspirant, who is not yet the agent, being enjoined to fulfil his own duty, perceives the object he is to achieve.[2]

531. "Injunctions, as in the case of kings etc., are known to have objects capable of achievement. The meaning of the verb denotes the aim. Hence the injunction is connected with the latter.[3]

532. "Though the gender and number are not expressly mentioned, they must be understood as recited

[1] Hence no genitive is used for स्वर्गकाम in स्वर्गकामोयजेत; though it expresses a relation between नियोग and स्वर्गकाम.

[2] The opponent's proposition is नियोज्यान्वय पूर्वकोऽधिकारान्वये कर्त्रन्वयः

[3] Hence नियोग and याग do not clash with each other.

in Scripture as also the doer etc. which are necessary for the fulfilment of the final object.[1]

533. "Therefore he who longs for heaven must perform his duty. How? By the performance of sacrifice. This is the meaning which Scripture conveys.

534. "Further, without quenching the aspirant's desire for heaven, sacrifice cannot, in any sense, be the instrument for achieving his purpose.

535. "For, if the desire is undestroyed, the individual, though he has achieved his aim, will still be liable to injunction, being in the same condition as formerly.

536. "Thus the duty (*adhikāra*), having made the object dependent on sacrifice for its fulfilment, is dependent, in its turn, when fulfilled, on the object.

537. "There is no inconsistency by reason of the absence of a consequent reward. Such a doubt will arise only if the fruit is to be accomplished by action; but the potential mood does not signify action.

538. "Since Scripture is contrary to such doubt, the absence of such reward cannot be doubted, being entirely unknown. Such a doubt may arise when there is no authority for the existence of such reward. But the consequent nature of such reward is not signified by Scripture.[2]

539. "Hence, if a person thinks that his efforts will be fruitless, though he is enjoined to perform ritual,

[1] Hence a male and a single individual are meant. The three *kārakas* are कर्ता, फलम् and इतिकर्तव्यता.

[2] Scripture only says that a particular sacrifice must bear a particular fruit. But the resultiug of such fruit depends on अपूर्व, and is consequently not directly implied by the फलश्रुति.

he is not fit to perform such Vedic ritual, being ignorant of the *Vēdas*.

540. "Hymns, explanatory passages, and names, being only incidental to ritual, are not authority by themselves. Hence the *Vēdas* are authority only for ritual.

541. "Therefore it must be said of the *Vēdāntas* that they are either auxiliary to ritual or devoid of authority." This is thus explained away.

542. The very existence of an intellect and its functions presupposes an intelligence known as the Self which is different from them, which is self-established, and which they subserve.

543. As the earthen pot, no sooner than it comes into existence, is filled with air in accordance with the inherent nature of the air and not by virtue of any activity in the pot itself, in the same manner are intellects pervaded by the Self (*dṛisā*).

544. Intellects identify themselves with pots, miseries, etc., by reason of the properties of substances and so on. But their identity with the intelligence which is the same as the causeless Self, is by virtue of their very nature.

545. Since the existence or non-existence of intellects and their functions depend on the Self which admits of no proof other than itself, it must therefore be understood that that Self is always self-established.

546. "If you say that the Self is self-established because it admits of no proof, then the Scripture will lose its authority because it teaches what is already known."

547. It is not so; for, the Self is not realised by direct experience prior to the understanding of Scripture, but is directly realised only after such knowledge.

Digitized by Google

548. Since, from self-experience, knowledge and ignorance of Self are seen to exist, on what strength do you argue inconsistency in a thing so clearly seen ?

549. Even the perception of sleep etc. in which the mental functions are absent, is dependent on the unrealised inner Self.[1]

550. It does not result from a perception of absence, for, the perception of absence supposes the existence of a perceiver, and the absence of a perceiver etc. cannot be dependent upon the very perceiver etc.

551. How is Scripture no authority for that, without proving which, the not-self cannot be proved, in the nature of things ?[2]

552. Since they loudly criticise us again and again as thoughtless, the following is in answer to them.

553. For refuting the said contention the teacher spoke the words "the whole Veda etc." plain in meaning and full of cogent reasoning.

554. The words "the whole Veda etc." is the consequence of treating the whole *Vēdas* as teaching us the unknown. The so-called difference between the two chapters is based on the difference in the nature of what is taught.[3]

555. It is knowledge which manifests the things of this world, and it is the same, whether it manifests a thing

---

[1] This is in answer to the contention that non-knowledge, being opposed to knowledge, cannot itself be proved by knowledge or experience.

[2] Perception, inference, etc., by which the material world is known, presuppose the Self.

[3] The *Vedānta* teaches the Self which is established. But the कर्मकाण्ड teaches heaven etc. which are things to be accomplished.

which depends on such knowledge, or which is self-dependent. It is the thing known that varies.

556. Therefore the whole *Vēda*, teaching as it does the unknown, must be understood as teaching us the reality which is either established or to be accomplished.

557. Or, the words "the whole *Vēda* etc." are justified by unity of context (*ēkavākyatva*), since the study of both chapters of the *Vēda* culminates in the attainment of liberation.

558. The object sought for is no less than liberation which means the attainment of perfect happiness and the destruction of all misery.

559. Or, the words "the whole *Vēda* etc." mean that the existence of the unreal world is the result of experience alone, and that all existence is dependent on the one intelligence which is known as the Self.[1]

560. Or, the words "the whole *Vēda* etc." are uttered, because no unknown entity except the Self can be conceived of.[2] This will also be explained later on.

561. The same argument which establishes the authority of the *Vēdāntas* also proves the authority of the chapter on ritual.

562. The argument which attacks the authority of the *Vēdāntas* also attacks the authority of the chapter on ritual.

563. Moreover, all kinds of proofs make clear the objects they treat of, and hence become authorities to that extent, and not otherwise.

---

[1] Anandagiri explains वेद as अनुभव, for the purposes of this verse.

[2] The Self alone baffles perception etc. and hence the *Vēdas* teach that alone.

Digitized by Google

564. Since hymns and explanatory remarks are merely connected with injunction, it is proper that they are no authority for their respective objects.

565. The meaning of permanent happiness as reward and of an aspirant for it, is derived from an explanatory remark,[1] only when it is taken in connection with the injunction, and not apart from it.

566. Since a Scriptural passage can have only one meaning, it is impossible to surmise two contradictory meanings, namely, that the explanatory remark is subsidiary to the injunction, and that it also conveys another meaning.[2]

567. Explanatory remarks (*arthavāda*) are of three kinds. In an impossible case it is a figure of speech. In a possible case, it is praise. If it is a case of neither sort, it is an assertion of fact.[3]

568. If an explanatory remark, though subsidiary to ritual, can be an authority in itself, what is there to show that the *Vēdāntas*, which are auxiliary to the realisation of unity, are not similarly an authority for their purpose.

569. By the passage 'direct perception etc.' it is meant that, for imparting a knowledge of the unity of Self, there is no other proof than the *Vēda*, which necessarily implies all other proofs.

570. If at first a thing is unknown, then knowledge has its scope. And knowledge assumes that a thing is unknown. Thus there is mutual dependence.

---

[1] e. g. रात्रिसत्रे प्रतितिष्ठन्ति ह वा एते य एता रात्रीरुपयन्ति.

[2] i. e. that it has inherent authority by itself.

[3] Examples of the three kinds of *arthavādas* are आदित्यो यूपो यजमानो यूपः, अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वाः, and सृष्टीरुपदधाति:

571. Hence, passages like 'That thou art' do not contradict any proof whatever, since knowledge extends to all things, and since such proof cannot apply to the Self.

572. The attainment of all desires and the destruction of all misery cannot be conceived of apart from the real nature of the Self. They are the result of knowledge.

573. The meaning of such and other passages of the commentary, which treat of the unity of the Self, will be explained logically and at length, by stating the *pros* and *cons*.

574. The authority of the *Vēdāntas* for what they treat of, is not shaken; for, they satisfy the definition of an authority, in the same way as the passage about the *jyōtishtōma* sacrifice etc.

575. You are aware of no rule by which, in secular practice, words are invariably used to signify action and action alone.

576. The sentence "You are happy, my friend, by God's grace; you have a son born who will be prosperous" neither incites activity nor teaches renunciation.

577. Sentences prescribing no duty are known to give rise to pleasure etc., to the same extent as passages like 'go to the village.'

578. The passage[1] does not prescribe activity by saying 'be happy;' nor is his happiness dependent upon its meaning, since it is independent of injunction.

579. It cannot be said that there are special activities[2] and that the passage aims at them, for, the passage has a purpose, namely, to give rise to pleasure etc.

---

[1] See verse 576 *supra*.

[2] Like जातकर्म and other ceremonies.

Digitized by Google

580. It is to avoid the interpretation that they are fruitless that passages like the one about the sprinkling of water are interpreted to aim at what is not directly recited in such passage. This is not needed for a passage which is itself an authority for what it treats of.

581. Moreover, an injunction either incites to activity an individual who has not understood the means, or points out how the end may be achieved by one who has understood the means.

582. Now, in this case, it neither applies to the means such as the birth of a son which is an accomplished fact, nor to the end, namely, pleasure, for a like reason.

583. No further act is necessary to give him pleasure than the birth of a son. The mere mention of the birth of a son achieves the desired object.

584. It is moreover seen that an individual, bitten by what he misconceives to be a serpent, imagines in his mind the effects of its poison, but is freed from the effects of the poison as soon as he is told that it is a garland and not a snake.

585. There is no injunction implied in such a case, even if the sentence 'be not afraid' is uttered. Fear is totally chased away only by pointing out that it is but a garland.

586. An injunction is properly implied where, knowing that an injunction ought to be carried out, an individual subsequently manifests activity in connection with the object of the injunction for the purpose of attaining it.

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् । मूल्यम्

श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं॰ श्रीराममिश्र-
शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः .. .. ०।)

श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा .. ६)

श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा .. ३=)

वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः .. .. २।)

सेतुपूर्त्तेः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं॰स्वामिश्रीराममिश्रशास्त्रि-
प्रणीतो निर्विशेषाद्वैतनिराकरणपरः .. .. १॥=)

सेतुपूर्त्तिसहितो वेदार्थसंग्रहः .. .. ३॥)

शास्त्रदीपिका .. .. ६।)

सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायोस्वरूपम्, भाट्टच-
न्द्रिकोपेतम्, पं॰स्वामिश्रीराममिश्रशास्त्रिसङ्कलिताटिप्पणीसमेतम् । १।)

काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजप॰दामोदर-
शास्त्रिणा संशोधिता पूर्वार्द्धरूपा .. .. ५॥)

तथा उत्तरार्द्धम् .. .. ८॥)

माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण
श्रीसायणाचार्येण विरचिता .. .. ७॥)

काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता ६॥)

श्रीतिरुन्तार्णवतरणिः । .. .. ६)

दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता .. .. ॥=)

जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता .. ५॥)

लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्याय-
मुक्तावल्याख्यया टीकया सहिता । .. .. ॥)

सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना
विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम् । ॥)

तत्त्वमुक्ताकलापः-सर्वार्थसिद्धियुतः, बोधायनीयार्थसिद्धान्तानुसारी विशिष्टाद्वै-
तब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्कि-
ककेसरिणा सर्वतन्त्रस्वतन्त्रधियोन श्रीवेङ्कटनाथदेशिकेन प्रणीतः ५॥=)

वेदान्तसिद्धान्तमुक्तावली, श्रार्थर्वीनिस्साहबकृताङ्गलभाषानुवादयुता .. १॥)

काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः .. .. २॥)

अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः .. .. १२)

आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्य-
काराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम् .. .. ॥)

तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदी-
पाख्यटीकया सहिता । .. .. १॥)

CONTENTS.

Page.

NYĀYASŪTRAVIVARAṆAM, Ed. Surendralāla Gosvāmin, Professor, Sanskrit College, Benares 449

BRĀHMASPHUṬASIDDHĀNTA, Edited with his own commentary by Mahāmahopādhyāya Sudhākara Dvivedin, Professor, Queen's College, Benares 465

THE TĀRKIKARAKṢĀ AND SĀRASAMGRAHA OF VARADARĀJA, with the glosses Niṣkaṇṭakā of Mallinātha Kolācala and Laghudīpikā of Jñānapūrṇa, Ed. Vindhyeçvarīprasāda Dvivedin, Librarian, Sanskrit College, Benares 497

THE SAMBANDHAVĀRTIKA OF SUREṢVARĀCHĀRYA, Translated by S. Venkataramana Aiyar, B. A., B. L., High Court Vakil, Triplicane, Madras 505

Digitized by Google

59

OCT 4 1902

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 9.] September, 1902. [Vol. XXIV.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1902.

Copyright on each article reserved.

Price Rs. 9-0 per annum.]

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
चित्रमीमांसा, अप्पयदीक्षितकृता तै॰ श्री रामशास्त्रिणा संशोधिता	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।≡)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनाचार्य्येणाङ्गलदेशीयभाषायामनुवादिता ..	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणाङ्गलदेशीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	२॥≡)
शीतपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकोल्लूरुशास्त्रि-संशोधिता	४)
काव्यप्रदीपः, पं॰ रामशास्त्रिभागवताचार्येण परिशोधितः	२॥।)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	५॥।)

Digitized by Google

C 4 L02

पुनराशङ्कते ।

न स्वभावसिद्धेरापेक्षिकत्वात्[१] ॥ ३९ ॥

आपेक्षिकत्वादारोपितत्वात् । तथा च न हि भ्रमाद्वस्तुसिद्धिरिति भावः ॥ ३९ ॥

समाधत्ते ।

व्याहतत्वादयुक्तम्[२] ॥ ४० ॥

घटादौ रूपादेरारोपितत्वे रूपादेरप्रसिद्ध्यारोपस्यैव व्याघातादयुक्तमिदम् । आरोपो हि अन्यत्र प्रसिद्धस्य प्रसिद्धे वस्तुनि सम्भवति । रूपादेः कुत्रचित् प्रसिद्धत्वे तत्रैव भावत्वसिद्धेर्न सर्वशून्यता । एवं सत्त्वप्रतीतेरारोपरूपत्वे व्यवहारस्यैव व्याघातो भवति न हि तुच्छेन जलाद्याहरणादिव्यवहारो भवति अन्यथा रज्जुसर्पादितोऽपि व्यवहारापत्तिरिति भावः । केचित्तु सूत्रद्वयमेवं व्याचक्षुः । न स्वभावेति । न हि सर्वेषां भावानामेकः स्वभावः सम्भवति आपेक्षिकत्वाद् भिन्नत्वात् । भिन्नस्य स्वस्वभावत्वे स्वस्मादपि भेदापत्तेः । तथा च स्वभावस्याननुगमान्न भावत्वनियामकत्वमिति । यद्वा इतरसापेक्षत्वादेतदपेक्षयाऽयं नीलतर एतदपेक्षयायं ह्रस्व इतिप्रतीतेः । यच्च सापेक्षं तदवस्तु यथा जवासापेक्षं स्फटिकलौहित्यमिति । समाधत्ते । व्याहतत्वादयुक्तम् । सापेक्षत्वस्य तुच्छत्वव्याप्तिव्याहतत्वादसिद्धत्वात् न वा घटादेः सापेक्षत्वं सम्भवति ह्रस्वपरिमाणादेरेव तत्त्वात् । किं च सापेक्षत्वं यदि सापेक्षं तदा तस्यापि तुच्छत्वान्न साधकत्वं यदि च

(१) इदं न्यायसूचीनिबन्धे वर्तते ।

(२) इदमपि पूर्ववत् ।

Digitized by Google

तस्य निरपेक्षत्वं तदा तस्यैव सत्यत्वेन कुतः सर्वशून्यतेति भावः ॥ ४० ॥

समाप्तं सर्वशून्यतानिराकरणप्रकरणम् ॥

अत्र भाष्यम् । अथेमे संख्यैकान्तवादाः । सर्वमेकं सदविशेषात् । सर्वं द्वेधा नित्यानित्यभेदात् । सर्वं त्रेधा ज्ञाता ज्ञेयं ज्ञानमिति । स्पष्टार्थम् । परे त्वेवं व्याचक्षते । एकमित्यद्वैतवादः । तथा च ब्रह्मैकं निर्विशेषं सत्यं सर्वमन्यन्मिथ्या । यद्वा सर्वं प्रपञ्चजातमेकं द्वैतशून्यं सदविशेषात् घटः सन् पटः सन्नितिप्रतीतेः घटाभिन्नसदभिन्नपटस्य घटाभेदसिद्धेः । श्रुतिरपि । एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चनेत्यादि । अन्ये ऽपीत्यनेन रूपसंज्ञासंस्कारवेदनानुभवाः पञ्चस्कन्धा इति सौत्रान्तिक इत्यादिसमुच्चयः । नित्यानित्यभेदादिति । यद्यपि स्वमते ऽपि पदार्थो द्विविधो नित्यानित्यभेदात् वक्ष्यमाणकारणानुपपत्त्या दूषणदानासङ्गतिश्च तथापि एकं नित्यं ब्रह्मैव अनित्यं च मायामयमेकं तस्यैव घटपटाद्या अवयवा न तदन्या अवयवावयविनोरभेदादित्याशङ्कितुरभिप्रायः । त्रेधेति । ज्ञाता आत्मा । ज्ञेयमिति । प्रमेयत्वमैकं प्रपञ्चजातमित्यर्थः । यद्वा ज्ञेयपदं प्रमाणातिरिक्तं दृश्यवस्तुपरमिति एतेषु पूर्वपक्षेषु सिद्धान्तमाह ।

संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम्[१] ॥ ४१ ॥

(१) अथेमे संख्यैकान्तवादाः सर्वमेकं सदविशेषादित्येवमादि भाष्ये । तेषां प्रतिषेधद्वारकं सूत्रम् । संख्यैकान्तासिद्धिरित्यादि वार्त्तिकम् । एतेष्वाक्षेपेषु सिद्धान्तसूत्रमिति वृत्तिकृतः ।

संख्यैकान्तासिद्धिः एतादृशपदार्थसंख्यानियमासिद्धिः । कारणस्य प्रमाणस्यानुपपत्तेः चक्षुरादेर्मिथ्यात्वेन प्रमाणत्वासम्भवादिति । उपपत्तौ वा न संख्यैकान्तः साधनस्यातिरिक्तस्यापेक्षितत्वात् ॥ ४१ ॥

आक्षिपति ।

न कारणावयवभावात्[1] ॥ ४२ ॥

न संख्यैकान्तासिद्धिः कारणस्य प्रमाणस्यावयवभावादुक्तस्यैकदेशत्वादवयवावयविनोश्च भेदाभावादिति भावः ॥ ४२ ॥

दूषयति ।

निरवयवत्वादहेतुः[2] ॥ ४३ ॥

उक्तो हेतुर्न युक्तः सर्वस्यैव पक्षत्वेन पक्षैकदेशस्य हेतुत्वासम्भवादिति भावः । वस्तुतः कारणानुपपत्त्युपपत्तिभ्यामित्यस्य प्रपञ्चस्य मिथ्यात्वे कारणानुपपत्तिः कपालघटाद्योः कार्यकारणभावानुपपत्तिः । असतः कारणत्वायोगात् कार्यकारणभावस्वीकारे च न प्रपञ्चमिथ्यात्वम् । यदि च कार्यकारणभावोऽपि मिथ्येति तथापि प्रपञ्चारोपे किं निमित्तमित्यनुपपत्तिः लोकादृष्टादिसहकृता मायेतिकारणोपपत्तावनादित्वेन मायापि नित्या पदार्थान्तरं चेति द्वैतसिद्धिः । द्वितीयतृतीयमतेऽनित्यपदार्थानामेकत्वे कारणानुपपत्तिः तदतिरिक्ताभावात् कारणोपपत्तौ कारणस्यैव पदार्थान्तरनेति । न कारणावयवभावात् । कारणस्यावयवभावादेकदेशत्वादेकदेशस्यैव कार-

(१) न कारणावयवभावात् । कारणस्य साध्यावयवत्वादित्यर्थं (एकान्तो ऽस्यर्थं) सूत्रार्थं इति वार्त्तिकम् ।

(२) इदं न्यायसूचीनिबन्धे वर्तते ।

णत्वादिति । अद्वैतमते कारणस्य मायाया अवयवभावात् प्रपञ्चभावान्मिथ्यात्वादिति यावत् । समाधत्ते । निरवयवत्वादहेतुः । घटादीनां दण्डाद्यवयवित्वाभावाद् घटादौ दण्डादिकं हेतुर्न स्यादिति भावः । एवमविद्यावादिमते मायाया निरवयवत्वात् स्थूलरूपेण परिणामासम्भवात् तस्या अपि मिथ्यात्वे सुतरां न कारणतासम्भव इति भावः ॥ ४३ ॥

समाप्तं संख्यैकान्तवादनिराकरणप्रकरणम् ॥

अथावसरतः फलपरीक्षणाय संशयमाह ।

सद्यः कालान्तरे च फलनिष्पत्तेः संशयः(१) **॥ ४४ ॥**

भोजनादिक्रियायाः सद्यःफलकत्वदर्शनात् कृष्यादेः कालान्तरीयफलकत्वदर्शनात् । यादृच्छिकजलताडनादेर्निष्फलत्वदर्शनाच्चेति शेषः । यागहिंसादिकं सफलं न वेति संशयः ॥ ४४ ॥

अत्र पूर्वपक्षी वदति ।

न सद्यः फलं कालान्तरोपभोग्यत्वात्(२) **॥ ४५ ॥**

कालान्तरोपभोग्यफलकत्वश्रवणात् । तथाहि यागादेः स्वर्गादि फलं हिंसादेश्च नरकादिकं फलं श्रुतमस्ति

(१) इदं न्यायसूचीनिबन्धे वर्तते । एतेन फलतः प्राङ्निष्पत्तेर्वृक्षफलवत् स्यादित्यत्र तत एव कालान्तरेणानिष्पत्तिर्हेतुविनाशादित्यत्र अत एव न सद्यः कालान्तरोपभोग्यत्वादित्यत्र तत एव सद्यः कालान्तरे च फलनिष्पत्तेः संशय इत्यत्र सूत्रत्वं दर्शितमिति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः ।

(२) तत्रैहिककीर्त्यकीर्त्यादीनामेव फलत्वसम्भवे नादृष्टादिकल्पनमिति पूर्वपक्षे सिद्धान्तसूत्रमिति वृत्तिकृतः । पूर्वसूत्रस्य टिप्पणी द्रष्टव्या । परं त्विदं न्यायसूचीनिबन्धे नास्ति । अन्यत्र फलमिति नास्ति ।

तत्र सद्यो न भवति स्वर्गस्य दुःखासम्भिन्नसुखरूपस्य दुःखानवच्छेदकीभूतशरीरनिष्पाद्यतया नरकस्य सुखानवच्छेदकशरीरनिष्पाद्यतया तादृशशरीरस्येहादर्शनादिति ॥ ४५ ॥

ननु तर्हि कालान्तरीयमेव फलमस्त्वित्याशङ्क्य पूर्वपक्षी पुनराह ।

न कालान्तरे निष्पत्तिर्हेतुनाशात्[१] ॥ ४६ ॥

न कालान्तरेऽपि फलोत्पत्तिः हेतुत्वाभिमतयागहिंसादिकर्मनाशादित्यर्थः ॥ ४६ ॥

तथा च यागहिंसादिकं निष्फलमेव तत्तद्वेदोऽप्यप्रमाण एवेति । न चैहिककीर्त्तिदुष्कीर्त्त्यादिकमेव फलमस्तु तत्फलस्याश्रुतत्वात् निभृतैरपि कर्माचरणाच्चेतिपूर्वपक्षं सिद्धान्तयति ।

प्राङ्निष्पत्तेर्वृक्षफलवत् तत् स्यात्[२] ॥४७॥

केचित्तु पाकादिक्रियायाः सद्यःफलकत्वस्य कृष्यादेः कालान्तरफलकत्वस्य दर्शनादग्निहोत्रहवनादेर्हिंसादेर्वा फलं कालान्तरीयं न वेति संशयः । तत्रैहिककीर्त्त्यकीर्त्त्यादिफलकत्वसम्भवेन नादृष्टादिकल्पनमितिपूर्वपक्षे सिद्धान्तसूत्रम् । न सद्यः फलमिति । अर्थस्तु पूर्ववत् । शङ्कते । न कालान्तरे निष्पत्तिर्हेतुनाशात् । अर्थस्तूक्त एव । समाधत्ते । प्राङ्निष्पत्तेरितीति प्राहुः । निष्पत्तेः स्वर्गादिफलोत्पत्तेः प्राक् तत् यागादि स्यात् द्वारसम्बन्धेन वर्तते ।

(१) कालान्तरेऽनिष्पत्तिर्हेतुविनाशादिति पाठो न्यायसूचीनिबन्धादिषु । पूर्वपूर्वसूत्रस्य टिप्पणी द्रष्टव्या ।

(२) इदं न्यायसूचीनिबन्धे वर्तते । ४४ सूत्रस्य टिप्पणी द्रष्टव्या ।

द्वारं चादृष्टम्। द्वारसम्बन्धेन सतः कारणत्वे दृष्टान्तमाह। वृक्षफलवदिति। वृक्षफलादिवेत्यर्थः। यथा वृक्षफलात् प्राक् मूलसेकादिविनाशेऽपि द्वारसम्बन्धेन सत्त्वेन तद्धेतुत्वं तथेहापीत्यर्थः। वृक्षफले च द्वारमवयवोपचया-दि॥ ४७॥

ननु फलस्योत्पादसम्भव एव कार्यकारणभावसम्भवः कुत्रापि फलोत्पादासम्भवात् कथमेतदित्याशङ्कते।

न सन्नासन्न सदसत् सदसतोर्वैधर्म्यात्[1] ॥ ४८ ॥

प्राङ्निष्पत्तेः फलमित्यादि। तथा चोत्पत्तेः पूर्वं फलं न सदुत्पत्त्यनुपपत्तेः नाप्यसदसत उत्पत्तौ खपुष्पादिकमप्युत्पद्येत तथा सिकतादावपि तैलं स्यात्। अत एव न सदसत् सदसतोः सत्त्वासत्त्वलक्षणवैधर्म्येणैकत्वायोगादित्यर्थः॥ ४८॥

समाधत्ते।

प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा उत्पादव्ययदर्शनात्[2] ॥ ४९ ॥

उत्पत्तिधर्मकं पटादिकमुत्पत्तेः पूर्वं न सदित्यद्धा तत्त्वम्। उत्पादव्ययदर्शनादुत्पन्नत्वेन नाशप्रतियोगित्वेन च

(१) प्रथमद्वितीययोर्टिकल्पयोस्तु सूत्रमेवं योजनीयं सदसतोर्वैधर्म्यादित्यादि नासन्न सन्न सदसत् सदसतोर्वैधर्म्यादित्यत्र च सूत्रत्वे सिद्ध इति च न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः। नासन्न सदित्यन्यत्रापि पाठः।

(२) नासन्न सन्न सदसत् सदसतोर्वैधर्म्यादित्यत्र च सूत्रत्वे सिद्धे प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा उत्पादव्ययदर्शनात् बुद्धिसिद्धं तु तदसदित्यनयोरपि सिद्धं भवतीति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः। न्यायसूचीनिबन्धे तु उत्पादव्ययदर्शनादित्येतन्मात्रं सूत्रपाठः।

प्रमितत्वात् । तथा चाद्यक्षणसम्बन्ध उत्पत्तिः । आद्यत्वं स्वाधिकरणसमयध्वंसानधिकरणत्वं कार्यस्य पूर्वं सत्त्वे तत्कालध्वंसाधिकरणत्वसत्त्वेनाद्यत्वासिद्धिः । सत्त्वस्य कालसम्बन्धरूपत्वात् तस्य चाव्याप्यवृत्तितया सत्त्वासत्त्वयोः कालभेदेन सम्भवात् । एवमनुत्पन्नभावस्य नाशायोगान्नाशप्रतियोगित्वे ऽपि उत्पत्तिसाधकतयोत्पादस्य पूर्वासत्त्वसाधकत्वमिति भावः ॥ ४९ ॥

ननु तदा कथं खपुष्पादिकं नोत्पद्यत इत्यत आह ।

बुद्धिसिद्धं तु तदसत् (१) ॥ ५० ॥

तत् कार्यमसत् पूर्वमसद् बुद्धिसिद्धम् । खपुष्पादिकं तु न बुद्धिसिद्धमिति तस्य नोत्पादः । तथा च यत्र तन्तुतुरीवेमादिसमवधानं तत्र पटो जायत इति ज्ञात्वा कुविन्दस्तत्समवधानेन पटोत्पादार्थं प्रवर्तते खपुष्पादेः कुत्राप्युत्पादादर्शनान्नैतद्धेतुकल्पनं न कोऽपि प्रवर्तते च तत्र । एवमन्वयव्यतिरेकाभ्यां तिलादेस्तैलादिसाधनत्वमवधार्य तैलार्थी तिलादौ प्रवर्तते न तु सिकतादौ तथान्वयव्यतिरेकादर्शनादिति कार्यकारणभावोऽनुभवसिद्ध इति भावः ॥ ५० ॥

ननु तथापि स्वर्गादिकाले यागाद्यवच्छेदकशरीरविरहात् कथं यागादेस्तद्धेतुता वैयधिकरण्यादित्याशङ्कते ।

आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवदित्यहेतुः (२) ॥ ५१ ॥

(१) पूर्वसूत्रटिप्पणी द्रष्टव्या ।

(२) इदं न्यायसूचीनिबन्धे वर्तते । आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवदित्यहेतुः प्रीतेरात्माश्रयत्वादप्रतिषेधः न पुत्रपशुस्त्रीपरिच्छदहिरण्यान्नादिफलनिर्देशात् तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचार इत्यत्र सूत्रं भाष्यविप्रतिपत्तिं निवारयिष्यतीति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः ।

वृक्षफलोत्पत्तिवदिति प्रतियोगिनि दृष्टान्तः। तथा च वृक्षफले यथा मूलसेकादिर्हेतुस्तथात्र न सम्भवति आश्रयव्यतिरेकादिति। न च मूलसेकादेरप्यवयवसम्बन्धेन वृक्षान्तरोत्पादनेनैव फलजननात् तत्रापि वैयधिकरण्यमस्तीति वाच्यम्। तत्र वृक्षान्तरस्य पूर्ववृक्षसजातीयस्यैव जननात् तादृशसाजात्यघटितपरम्परया प्रयोजकत्वसम्भवादित्यभिप्रायः॥ ५१॥

समाधत्ते।

प्रीतेरात्माश्रयत्वादप्रतिषेधः[(१)] ॥ ५२ ॥

प्रीतेः स्वर्गादिसुखस्यात्माश्रयत्वादात्मवृत्तित्वादप्रतिषेधो वैयधिकरण्येन यागादिजन्यत्वप्रतिषेधो नेत्यर्थः। एवं च समवायघटितसामानाधिकरण्यप्रत्यासत्त्या हेतुहेतुमद्भावो नावच्छेदकत्वघटितसामानाधिकरण्यप्रत्यासत्त्येति भावः॥ ५२॥

फलविशेषेषु वैयधिकरण्यमाशङ्कते।

न पुत्रपशुस्त्रीपरिच्छदहिरण्यान्नादिफलनिर्देशात्[(२)] ॥ ५३ ॥

एषु वैयधिकरण्येन यागादेर्न हेतुतासम्भव इति तत्प्रच्छेदस्याप्रामाण्यमिति भावः॥ ५३॥

---

(१) प्रीतेरात्माश्रयत्वादप्रतिषेध इति। आश्रयव्यतिरेकोऽसिद्ध इति सूत्रार्थः। यत्रैव कर्म तत्रैव कर्मफलमिति वार्त्तिकम्। पूर्वसूत्रस्य टिप्पणी द्रष्टव्या।

(२) वेश्वर्यति। न पुत्रपशुस्त्रीपरिच्छदहिरण्यान्नादिफलनिर्देशात्। परिहरति। तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः। इति सूत्रद्वयं धृत्वा व्याख्यावसरे तस्मात् पुत्रादिसम्बन्धात् तदुत्पन्नैः सुखोत्पत्तेः तेषु यथा फलशब्दप्रयोगः तथा तेषु पुत्रादिष्वित्यर्थः। सूत्रार्थकथनेनैव भाष्यवार्त्तिके व्याख्याते इति तात्पर्यटीकायामुक्तम्। न्यायसूचीनिबन्धे चेदं वर्तते। पूर्वपूर्वसूत्रटिप्पणी द्रष्टव्या। पुत्रपशुस्त्रीपरिच्छदेति क्वचित्पुस्तके पाठः।

समाधत्ते ।

तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः[१] ॥ ५४ ॥

तत्सम्बन्धात् पुत्रादिसम्बन्धात् । फलनिष्पत्तेः प्रीत्युत्पत्तेः । तेषु पुत्रादिषु । फलवदुपचारः फलत्वव्यपदेश आयुर्घृतमितिवत् । तथा चान्येच्छानधीनेच्छाविषयस्य स्वतः पुरुषार्थस्य सुखस्य सामानाधिकरण्यमस्तीति सुखेच्छाधीनेच्छाविषयस्य पुत्रादेर्मुख्यफलत्वाभावेन तत्र वैयधिकरण्ये ऽपि न क्षतिरिति भावः । वस्तुतो यः पुत्रकाम इत्यादिना पुत्रादेरेव दर्शपौर्णमासफलत्वश्रवणात् तादृशवेदप्रामाण्याय तेष्वपि सामानाधिकरण्यं दर्शयितुमाह । तत्सम्बन्धादिति । तेषां पितृत्वादिसम्बन्धस्यात्मनि सत्त्वेन तेन सम्बन्धेन पुत्रादिकं प्रति यागस्य हेतुत्वमुपपन्नमिति सूचितम् । पुत्रादेः पुरुषार्थतां सम्पादयितुं तत्सम्बन्धात् फलनिष्पत्तेरित्याद्युक्तमिति । अत्रैहिकसुखादेः प्रत्यक्षसिद्धतया तदीयसामग्रीणामपि तथाविधतया तत्र प्रमाणाकाङ्क्षाविरहेण यागादिफलमेव कालान्तरीयं परीक्षितमिति बोध्यम् ॥ ५४ ॥

समाप्तं फलपरीक्षाप्रकरणम् ॥

फलं सुखं मुख्यं तदन्यद् गौणमित्यर्थः ॥

क्रमप्राप्तं दुःखं परीक्षयति ।

विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः[२] ॥ ५५ ॥

---

(१) ५१ सूत्रस्य टिप्पणी द्रष्टव्या । इदमपि न्यायसूचीनिबन्धे वर्तते ।

(२) एतत्सूत्रावसरे विविधा च बाधना हीना मध्यमोत्कृष्टा चेति । इदं भाष्य इति वार्तिकम् । न्यायसूचीनिबन्धे चेदं वर्तते ।

यद्यपि फलपरीक्षणेनैव दुःखपरीक्षापि जाता तथापि बलवद्द्वेषविषयत्वेन तत् परीक्षणीयम् । तथाहि जन्मयेगाच्छरीरं जन्म उत्पत्तिस्तदात्मसम्बन्धः । स च विविधबाधनायेगाद् विविधदुःखसाधनत्वाद् दुःखमेव दुःखमिव बलवद्द्वेषविषय इत्यर्थः । तथा च दुःखस्य द्वेषविषयत्वं नैसर्गिकमिति भावः । शरीरसम्बन्धस्य द्वेष्यत्वकीर्तनं वैराग्यार्थं बोध्यमिति ॥ ५५ ॥

शङ्कते ।

न सुखस्याप्यन्तरालनिष्पत्तेः(१) ॥ ५६ ॥

न शरीरसम्बन्धो बलवद्द्वेष्यः सुखस्यापि दुःखमध्ये जननादित्यर्थः ॥ ५६ ॥

समाधत्ते ।

बाधनानिवृत्तेर्वेदयतः पर्येषणदोषादप्रतिषेधः(२) ॥ ५७ ॥

बाधनानिवृत्तेर्बाधनाया अनिवृत्तेः । वेदयतः दुःखातिशयसाधनताविदुषः । पर्येषणदोषादिष्टसाधने ऽप्यप्रवृत्तेः । अप्रतिषेधः शरीरसम्बन्धे बलवद्द्वेष्यत्वप्रतिषेधो नेत्यर्थः । बलवद्द्वेषविषयदुःखसाधनत्वज्ञानस्यैव प्रवृत्तिविरोधित्वादिति भावः ॥ ५७ ॥

ननु प्रतिषिद्धहिंसापरदारसम्भोगादौ कथं प्रवृत्तिरित्यत आह ।

दुःखविकल्पे सुखाभिमानाच्च(३) ॥ ५८ ॥

---

(१) इदं न्यायसूचीनिबन्धे वर्तते ।

(२) इदमपि पूर्ववत् ।

(३) इदमपि पूर्वपूर्ववत् ।

दुःखस्य विविधः कल्पो यत्र तादृशहिंसादौ । सुखाभिमानाद् बलवद्द्वेषविषयदुःखासाधनत्वविशिष्टेष्टसाधनत्वभ्रमात् प्रवृत्तिरिति । तथा च विशेषदर्शिनां बलवद्द्वेषविषयदुःखसाधनत्वग्रहान्न तत्र प्रवृत्तिरिति भावः ॥ ५८ ॥

समाप्तं दुःखपरीक्षाप्रकरणम् ॥

क्रमप्राप्तमपवर्गं परीक्षयितुं पूर्वपक्षयति ।

ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः[(१)] ॥५९॥

ऋणक्लेशानां प्रवृत्त्यनुबन्धात् प्रवृत्तिनैयत्यादपवर्गार्थप्रवृत्तिकालाभावादपवर्गाभावः । तथा च जायमानो ह वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इतिश्रुतिवाक्येन ऋषिभ्य ऋष्यृणेभ्यो ब्रह्मचर्येण मुच्यते देवेभ्यो देवर्णेभ्यो यज्ञेन मुच्यते पितृभ्यः पितृणेभ्यः प्रजया अपत्येन मुच्यत इत्यर्थकेन ऋणत्रयापाकरणार्थं नियतकर्मानुष्ठानेनैव जीवनापाये कुतोऽपवर्गवार्ता । श्रूयते च । सत्रं यदग्निहोत्रं दर्शपौर्णमासौ च जरया ह वा एतस्माद्विमुच्यते मृत्युना वेति । न च मोक्षार्थिनां ऋणापाकरणानावश्यकतेति वाच्यम् ।

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥

इतिस्मृत्या तदावश्यकत्वकीर्तनात् । एवं क्लेशेन रागादिना प्रवृत्त्यनुबन्धादपि अपवर्गाभावः रागादेस्तदधीनकर्मणश्चापरिहार्यत्वादिति भावः । यद्वा ऋणैः क्लेशैः प्रवृत्तिभिश्चानुबन्धात् प्रतिबन्धादपवर्गाभावः । अथवा

(१) ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभाव इत्यनेन सूत्रेण ऋणानुबन्धान्नास्त्यपवर्गः शेषं भाष्य इति वार्त्तिकम् ।

प्रतिबन्धकीभूतानामृणादीनामनुबन्धान्नियतसत्त्वादपवर्गाभावः। तत्र ऋणानि ब्रह्मचर्यादिविनाश्यनुरदृष्टविशेषाः। क्लेशाः क्लेशहेतुरागादयः। प्रवृत्तिर्धर्माधर्मतद्धेतुयत्नविशेषाः। तत्र ऋणानि व्याख्यातानीति॥ ५९॥

समाधत्ते।

प्रधानशब्दानुपपत्तेर्गुणशब्देनार्थवादो निन्दाप्रशंसोपपत्तेः[1] ॥ ६०॥

प्रधानशब्दानुपपत्तेर्मुख्यशब्दत्वानुपपत्तेर्मुख्यार्थपरत्वानुपपत्तेरिति यावत्। गुणवादेन लक्ष्यार्थपरत्वेनार्थवादः। जायमान इत्यादिशब्दः श्रुत्यामभिहित इति शेषः। तेनैव निन्दाप्रशंसोपपत्तेरित्यर्थः। तथा च जायमानस्य कर्मण्यधिकारो न सम्भवति। तथोक्तं भाष्ये। यदा तु मातृतो जातः कुमारो न तदा कर्मभिरधिक्रियते ऽर्थिनः शक्तस्य चाधिकारादिति। अर्थिनः कामिनः। ननु तदा जायमानशब्दः किंपर इत्यत आह भाष्ये। जायमान इति गुणशब्दो विपर्यये ऽनधिकारादिति। तथा च श्रुत्यन्तरप्रतिपादितो ब्रह्मचर्याधिकारी। उपनीतोऽग्निहोत्राद्यधिकारी गृहस्थश्च जायमानशब्देन लक्ष्यते। एवं च उपनयनानन्तरं प्रव्रज्यादौ न दोषः। एवं श्रुतिरपि। यदहरेव विरज्येत तदहरेव प्रव्रजेदित्यादिः। एवमृणशब्दोऽपि न मुख्यः न ह्यत्र प्रत्यादेयं कश्चन ददाति परं तु ऋणापाकरणवदावश्यकत्वख्यापनाय सः। तथोक्तं निन्दाप्रशंसोपपत्तेरिति। ऋणापाकरणानपाकरणाभ्यामिवाग्निहोत्रकरणाकरणाभ्यां निन्दाप्रशंसयोरुपपत्तेरिति तदर्थः। ननु गृहस्थस्य न कदापि मोक्षः स्यादिति चेदायुषश्चतुर्थभागे

(१) इदं न्यायसूचीनिबन्धे वर्तते। तत्र च गुणशब्देनानुवाद इति पाठः।

मोक्षाधिकारश्रवणात् । अत एव सत्रं यदग्निहोत्रमित्यादि-श्रुतौ जराशब्द आयुषश्चतुर्थभागपर इत्युक्तम् । न च तत्र जराशब्दोऽशक्तिपरः अन्तेवासी वा जुहुयात् स हि ब्रह्मणा परिक्रीत इतिश्रुत्या अशक्तस्यापि प्रतिनिधिविधानात् । मृत्युना वेति मोक्षविमुखकामिपरम् । अनपाकृत्य मोक्षं त्विति स्मृतिरपि विरक्तेतरपरं यदहरेव विरज्येतेत्यादिश्रुतेरिति नानुपपन्नं मोक्षानुकूलानुष्ठानम् । क्वचिद् गृहस्थस्यापि मोक्षाधिकारः श्रूयते । तथाहि । कर्मणैव हि संसिद्धिमास्थिता जनकादय इति भगवद्वाक्यम् ।

न्यायापन्नधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः ।
श्राद्धकृत् सत्यवादी च गृहस्थोऽपि हि मुच्यते ॥

इत्याचार्यधृता स्मृतिरपीति ॥ ६० ॥[१]

ननु यदि कर्ममात्रस्य त्यागस्तदा यावज्जीवमग्निहोत्रं जुहोतीतिश्रुतेरसङ्गतिरित्यत आह ।

समारोपादात्मन्यप्रतिषेधः[२] ॥ ६१ ॥

आत्मनि समारोपादग्नीनामात्मनि समारोपविधानान्न मोक्षप्रतिषेधः । श्रूयते हि । प्राजापत्यामिष्टिं निरूप्य तस्यां सर्ववेदसं दत्त्वा आत्मन्यग्नीन् समारोप्य ब्राह्मणः परिव्रजेदिति ॥ ६१ ॥

---

(१) अत्र वार्त्तिके अन्यत्र च अधिकाराच्च विधानं विद्यान्तरवदित्येकं सूत्रमधिकं दृश्यते । तच्च न्यायसूचीनिबन्धे न्यायसूत्रोद्धारे च नास्ति ।

(२) फलार्थिनश्चेदं ब्राह्मणं जरामर्यं वा एतत्सत्रं यदग्निहोत्रं दर्शपूर्णमासौ चेति । कथम् । समारोपणादात्मन्यप्रतिषेध इति भाष्यग्रन्थपङ्क्तिः । फलार्थिनश्चेति । पृष्ट्वा सूत्रं पठति । कथम् । समारोपणादात्मन्यप्रतिषेध इति तात्पर्यटीका । ननु समारोपणादात्मन्यप्रतिषेध इत्यनेन सूत्रेण प्रव्रज्याया विधानं वर्णयतानवसरदोषो निराकृत इति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः । न्यायसूचीनिबन्धेऽपि समारोपणादिति पाठः ।

Digitized by Google

नन्वग्निहोत्रादिपरित्यागे ऽपि पूर्वकृततत्फलस्वर्गादिरेव मोक्षप्रतिबन्धक इति चेत् तत्राह।

पात्रचयान्तानुपपत्तेश्च फलाभावः[१]॥६२॥

भिक्षोः स्वर्गादिफलस्याभावः। अग्निहोत्रं हि पात्रचयान्तं पात्राणि अग्निहोत्रपात्राणि तेषां चयः प्रमृतस्य यजमानस्याङ्गेषु विन्यासः मुखे घृतपूर्णां स्रुचमितिक्रमेण। भिक्षोस्तदनुपपत्तेः तेन तत्परित्यागादिति। नन्वग्निहोत्रस्यासाङ्गत्वेन समग्रफलाभावे ऽपि न्यूनफलं भवत्येव। एवं ज्योतिष्टोमगङ्गास्नानादिपुण्यकर्महिंसादिपापकर्मफलं च स्यादेव कुतो मोक्ष इति चेत्। न। चकारेण कर्मफलनाशस्तत्त्वज्ञानेनेतिसमुच्चयात्। तथा च श्रुतिः। विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति। एवं क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावर इति। ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते ऽर्जुन इति भगवद्वचनं च। एतच्च प्रारब्धेतरकर्मनाशपरं प्रारब्धस्य तु भोगादेव क्षयात्। मा भुक्तं क्षीयते कर्म कल्पकोटिशतैरपीतिवचनादिति॥ ६२॥

रागादिनिबन्धनप्रवृत्तिं वारयति। यद्वा रागादिकं वारयति।

सुषुप्तस्य स्वप्नादर्शने क्लेशाभाववदपवर्गः[२]॥ ६३॥

(१) तस्माद्विकृते ऽर्थत्वे प्रव्रजितानां पात्रचयान्तानि कर्माणि न क्रियन्ते यदि चेदं ब्राह्मणमविशेषेण प्रवर्तते न सर्वत्र पात्रचयान्तानि प्रसज्यन्त इति शेषं भाष्य इति वार्त्तिकम्। समारोपणादात्मन्यप्रतिषेध इत्यनेन सूत्रेण प्रव्रज्याया विधानं दर्शयतान्यत्र दोषो निरस्तः। पात्रचयान्तानुपपत्तेश्च फलाभाव इत्यनेनापि स एवेति चेत्तन्नमिति न्यायवार्त्तिकतात्पर्यपरिशुद्धावुदयनाचार्याः। न्यायसूचीनिबन्धे ऽप्येवं वर्तते।

(२) इदं न्यायसूचीनिबन्धे वर्तते।

५२६

यथा सुषुप्तस्य स्वप्नादर्शनकाले हेतुविरहेण क्लेशाद्यभावो दुःखाद्यभावस्तथा रागादिविरहेण प्रवृत्त्यनुपपत्त्या धर्माद्यभावेनापवर्ग इत्यर्थः । यद्वा क्लेशाद्यभाववत् रागाद्यभाववदपवर्गसाधनस्य क्लेशाद्यभावस्य सङ्गतिः तत्त्वज्ञानिनां क्लेशादिहेतुमिथ्याज्ञाननिरासादिति भावः ॥ ६३ ॥

रागादिरहितस्य तत्त्वज्ञानिनोऽपि विहिताविहितप्रवृत्तिदर्शनात् कुतोऽपवर्ग इत्यत आह ।

न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य[1] ॥६४॥

निवृत्तरागादेः प्रवृत्तिर्न प्रतिसन्धानायादृष्टायेत्यर्थः । प्रतिसन्धीयते शरीरमनेनेति प्रतिसन्धानपदस्यादृष्टपरत्वादिति ॥ ६४ ॥

शङ्कते ।

न क्लेशसन्ततेः स्वाभाविकत्वात्[2] ॥ ६५ ॥

न रागाद्युच्छेदस्तस्य स्वाभाविकत्वाच्छरीरनियतत्वादित्यर्थः । यद्वा स्वाभाविकत्वात् स्वसमानाधिकरणरागादिप्रागभावासमानकालीननाशाप्रतियोगित्वादित्यर्थः । तेन सुषुप्तौ रागाद्यसत्त्वेऽपि न क्षतिः । वस्तुतस्तु स्वाभाविकत्वादाश्रयोत्पत्तिद्वितीयक्षणे आवश्यकतया तत्र स्थितत्वात् । आश्रयत्वं चात्रावच्छेदकत्वाख्यसम्बन्धेन तेन शरीरलाभ इति ॥ ६५ ॥

केषाञ्चित् समाधानमाह ।

प्रागुत्पत्तेरभावानित्यत्ववत् स्वाभाविकेऽप्यनित्यत्वम्[3] ॥ ६६ ॥

(१) सूत्रमपि पूर्ववत् ।
(२) सूत्रमपि तथा ।
(३) सूत्रमपि तथा ।

Digitized by Google

अणुश्यामतानित्यत्ववद्वा[१] ॥ ६७ ॥

प्रागित्यस्य व्युत्पत्तिवैचित्र्येणाभावेत्यनेनान्वयः । तेनोत्पत्तेः कार्यस्य प्रागभावानित्यत्ववदित्यर्थः । प्रागभावस्य प्रतियोगिसमवायिदेशोत्पत्तिमारभ्य तत्र स्थितत्वेऽपि यथा तद्विरोधिप्रतियोगिसामग्र्या तन्नाशस्तथा रागादिहेतुभूतमिथ्याज्ञानविरोधितत्त्वज्ञानेन रागाद्युच्छेद इत्यर्थः । दृष्टान्तान्तरमाह । अणुश्यामतानित्यत्ववद्वेति । परमाणोः श्यामताया विनाशवदित्यर्थः ॥ ६६ ॥ ६७ ॥

अत्र न दृष्टान्ततुल्यता प्रागभावस्य प्रतियोगिनाश्यता श्यामतायाश्च पाकादिनाश्यतास्तु मिथ्याज्ञानाधीनरागसन्ततेस्तु न तत्त्वज्ञाननाश्यता स्वोत्तरोत्पन्नविशेषगुणेन रागादिनाशस्य सर्वैः स्वीकारात् । तेन तत्सन्ततेरुच्छेदो न सम्भवतीति । एवं स्वाभाविकभावस्य नित्यतानियमे प्रागभावव्यभिचारो न दोष इति । एवं द्वितीयदृष्टान्ते श्यामतायाः स्वाभाविकत्वमपि नास्तीति वैषम्यात् स्वयं सिद्धान्तमाह ।

न सङ्कल्पनिमित्तत्वाच्च रागादीनाम्[२] ॥ ६८ ॥

न रागादिसन्ततिनियमः । रागादीनामित्यस्यादृष्टहेतूनामित्यादि । तेन तत्त्वज्ञानिनामपि प्रवृत्त्यन्यथानुपपत्त्या रागविशेषादिस्वीकारेऽपि न क्षतिः । सङ्कल्पनिमित्तत्वात् रूपादावुपादेयत्वग्रहहेतुकत्वात् । यद्वा मिथ्याज्ञानहेतुकत्वात् मिथ्याज्ञाने तत्त्वज्ञानेन निरस्ते कारणविरहेण विलक्षणरागाद्यनुत्पादादुत्पन्नस्य च स्वोत्तरं ज्ञाना-

---

(१) इदमपि तथा ।
(२) इदमपि तथा ।

Digitized by Google

अ· या − ककु· का + ३ = ६० अ· या − ६० ककु· का − ककु· नी
समशोधनेन ५९ ककु का + ककु· नी = ५९ अ· या − ३

∴ ५९ का + नी = (५९ अ· या − ३) / ककु । अतः कुट्टकेन यावत्तावन्मानं सुगमम् । एवं रूपत्रयस्थाने षट्, सप्ताद्याः स्थाप्याः ।

अत्रापि चतुर्वेदगौरवं न बुद्धिमद्भिरादृतम् ॥ ५६ ॥

इदानीमन्यौ प्रश्नावाह ।

अंशसममंशशेषं कलासमं वा कलाशेषम् ।
दिवसकरस्येष्टदिने कुर्वन्नावत्सराद्गणकः ॥ ५७ ॥ (५८)

कस्मिंश्चिदिष्टदिने दिवसकरस्य रवेरंशमानसममंशशेषं वा कलासमं कलाशेषं भवति । अस्योत्तरमावत्सरात् कुर्वन्नपि गणकः ।

अहर्गणः = या १ । गतभगणाः = का १ । तदा

भगणशेषम् = यभ· या − ककु· का । इदं द्वादशगुणं कल्पकुदिनैर्विभज्य लब्धं राशिमानं नी १ । तद्गुणहरं भाज्यादपास्य जातं राशिशेषम् = १२ यभ· या − १२ ककु· का − ककु· नी । इदं त्रिंशद्गुणं कल्पकुदिनैर्विभज्य लब्धमंशमानम् पी १ । तद्गुणहरं भाज्यादपास्य जातमंशशेषम् = ३६० यभ· या − ३६० ककु· का − ३० ककु· नी − ककु· पी = पी

ततः या = (३६० ककु· का + ३० ककु नी + पी (ककु + १)) / ३६० यभ

अत्र भाज्ये वर्णत्रयमतो वर्णद्वयस्येष्टमाने प्रकल्प्य कुट्टकेन यावत्तावन्मानं ज्ञेयम् । एवमंशशेषं बुद्ध्या सङ्गुण्य कल्पकुदिनैर्विभज्य लब्धं कलामानं लोहितकं प्रकल्प्य तद्गुणहरं भाज्यादपास्य कलाशेषतः समीकरणं कृत्वा तत्र भाज्ये वर्णत्रयमानानीष्टानि प्रकल्प्य यावत्तावन्मानं ज्ञेयम् ॥ ५७ ॥

इदानीमन्यान् प्रश्नानाह ।

अवमावशेषमवमैरधिमासकशेषमधिमासैः ।
इष्टद्युतोनं तुल्यं कुर्वन्नावत्सराद्गणकः ॥ ५८ ॥ (५९)

Digitized by Google

इष्टाङ्केन युतमूनं वाऽवमावशेषमवमैस्तुल्यं तथेष्टाङ्केन युतमूनं वाऽधिमासशेषमधिमासैस्तुल्यमस्ती·त्यस्योत्तरमावत्सरात् कुर्वन्नपि गणकः ।

अत्राहर्गणमानम् = या १ । गतावमानि = का १· । तदाऽवमावशेषम् = चादि· या − ककु· का । ततः प्रश्नालापेन

$$\text{चादि}\cdot \text{या} - \text{ककु}\cdot \text{का} \pm \text{इ} = \text{का}$$

$$\therefore \text{या} = \frac{(\text{ककु} + १)\,\text{का} \mp \text{इ}}{\text{चादि}}$$ । अतः कुट्टकेन यावत्तावन्मानं सुगमम् ।

द्वितीयप्रश्ने गतसौरमानम् = या १ । गताधिमासाः = का । तदाऽधिमासशेषम् = अधिमा· या − कसौदि· का । ततः प्रश्नालापेन

$$\text{अधिमा}\cdot \text{या} - \text{कसौदि}\cdot \text{का} \pm \text{इ} = \text{का}$$

$$\therefore \text{या} = \frac{(\text{कसौदि} + १)\,\text{का} \mp \text{इ}}{\text{अधिमा}}$$ । अतो यावत्तावन्मानं सुगमम् । अस्योत्तरं गतेन्दुदिनमानं यावत्तावत् कल्प्यते तदाऽपि भवतीति ॥ ५८ ॥

इदानीमन्यं प्रश्नमाह ।

निश्छेदभागहारो भानोः सप्ततिगुणोंऽशशेषोनः ।
शुध्यत्ययुतविभक्तः कुर्वन्नावत्सराद्गणकः ॥ ५९ ॥ (६०)

निश्छेदभागहारो दृढकुदिनानि । शेषं स्पष्टार्थम् ।

५५ आर्याप्रश्नोत्तरे यदि अ = चक्रभा· इयभ, तदा तेनैव विधिनाऽंशशेषम् = अ· या − दृककु· का = नी । ततः प्रश्नालापेन

$$\frac{७० \,\text{दृककु} - \text{अ}\cdot \text{या} + \text{दृककु}\cdot \text{का}}{१००००}$$ अयं निरग्रः ।

$$= \frac{७० \,\text{दृककु} - \text{नी}}{१००००}$$ ।

ततः कुट्टकेन ऋणभाज्यविधिना नीलकमानं सुगमम् ॥ ५९ ॥

इत्यनेकवर्णसमीकरणबीजम् ।

अथ भावितबीजम् ।

तत्राव्यक्तमानार्थं करणसूत्रम् ।

भावितकरूपगुणना साव्यक्तवधेष्टभाजितेष्टाप्त्योः ।
अल्पेऽधिकोऽधिकेऽल्पः क्षेप्यो भावितहृतौ व्यस्तम् ॥६०॥
(६१)

भावितकस्य भावितगुणकस्य रूपाणां च गुणना वधः किंविशिष्टा साव्यक्तवधाऽव्यक्तगुणकयोर्वधेन सहिता तत इष्टेन भाजिता लब्धिर्ग्राह्या । अनयोरिष्टाप्त्योर्मध्ये योऽधिकः सोऽल्पेऽव्यक्तगुणकेऽल्पश्चाधिकेऽव्यक्तगुणके क्षेप्यः । एवं यौ द्वौ राशी भवतस्तौ भावितकहृतौ भावितगुणकेन हृतौ व्यस्तमव्यक्तमानं स्यात् । यावत्तावद्गुणके क्षेप्ये यन्मानं तत्कालकमानं कालकगुणके क्षेप्ये यन्मानं तद्यावत्तावन्मानं ज्ञेयमिति । एकस्मिन् पक्षे भावितमन्यस्मिन्नव्यक्तौ रूपाणि च कृत्वा तदुपरिलिखितं कर्म कर्त्तव्यमिति ।

अत्रोपपत्तिः । पक्षान्तरादिना कल्प्यते समौ पक्षौ

$$\text{अ}\cdot\text{या}\cdot\text{का} = \text{क}\cdot\text{या} + \text{ख}\cdot\text{का} + \text{ग}$$

$$\therefore \text{याका} = \frac{\text{क}}{\text{अ}}\text{या} + \frac{\text{ख}}{\text{अ}}\text{का} + \frac{\text{ग}}{\text{अ}}$$

ततो 'भावितं पक्षतोऽभीष्टात् त्यक्त्वा वर्णौ सरूपकौ' इत्यादि भास्करविधिना $\frac{\text{इ}}{\text{अ}}$ इतीष्टं प्रकल्प्य फलम् $= \frac{\text{क}\cdot\text{ख} + \text{अ}\cdot\text{ग}}{\text{अ}\cdot\text{इ}}$ । ततः केवलं संयोजनेन

$$\text{या} = \frac{\text{ख}}{\text{अ}} + \frac{\text{क}\cdot\text{ख} + \text{अ}\cdot\text{ग}}{\text{इ}} = \frac{1}{\text{अ}}\left(\text{ख} + \frac{\text{क}\cdot\text{ख} + \text{अ}\cdot\text{ग}}{\text{इ}}\right)$$

$$= \frac{\text{ख} + \text{आप्ति}}{\text{अ}}$$

$$\text{का} = \frac{\text{क}}{\text{अ}} + \frac{\text{इ}}{\text{अ}} = \frac{\text{क} + \text{इ}}{\text{अ}}$$ । अत उपपन्नम् ।

विशेषाश्च भास्करबीजतोऽवगम्याः । तत्र मत्कृतोपपत्तिश्च तट्टिप्पण्यां विलोक्या ॥ ६० ॥

इदानीं प्रश्नमाह ।

भानो राश्यंशवधात् त्रिचतुर्गुणितान् विशोध्य राश्यंशान् ।
नवतिं दृष्ट्वा सूर्ये कुर्वन्नावत्सराद् गणकः ॥ ६१ ॥ (६२)

भानोः सूर्यस्य यद्राशिमानं यच्चांशमानं तयोर्वधात् त्रिगुणान् राशीन् चतुर्गुणानंशांश्च विशोध्य शेषं नवतिं दृष्ट्वाऽऽवत्सरात् सूर्ये कुर्वन्नपि स गणक इति ।

अत्र राशिमानम् = या १ । अंशमानम् = का १ । ततः प्रश्नालापानुसारेण

या· का − ३ या − ४ का = ९०

∴ या· का = ३ या + ४ का + ९०

∴ वर्णाङ्काहतिरूपैक्यम् = ३ × ४ + ९० = १०२ । इष्टम् = ६ ।

फलम् = $\frac{१०२}{६}$ = १७ । ततो या = १० । का = २० ॥ ६१ ॥

इदानीं भाविते प्रकारान्तरमाह ।

भावितके यद्घातो विनष्टवर्णेन तत्प्रमाणानि ।
कृत्वेष्टानि तदाहतवर्णैक्यं भवति रूपाणि ॥ ६२ ॥ (६३)

वर्णप्रमाणभावित-
घातो भवतीष्टवर्णसङ्ख्यैवम् ।
सिध्यति विनाऽपि भावित-
समकरणात् किं कृतं तद्वतः ॥ ६३ ॥ (६४)

भावितके भावितसमीकरणे येषां वर्णानां घातो-(यद्घातः) ऽस्ति । तत्प्रमाणानि विनष्टवर्णेनेष्टानि कृत्वा तदाहतवर्णैक्यं रूपाणि भवति । एकवर्णमपहाय परेषां मानानीष्टानि प्रकल्प्य तदाहतानां वर्णगुणकानामैक्यं यद्भवति तानि रूपाणि व्यक्तानि भवन्ति । इष्टानां वर्णप्रमाणानां भावितस्य भावितगुणकस्य च घात इष्टविमुक्तवर्णसङ्ख्या भवति । एवं भावितसमकरणाद्भावितसमीकरणाद्विनाऽपि वर्णमानं सिध्यति । अतस्तत् पूर्वं कृतं भावितं किं किमर्थं कार्यमिति शेषः । 'मुक्त्वेष्टवर्णं

सुधिया परेषां कल्प्यानि मानानि तथेप्सितानि' इत्यादिभास्करोक्तमेत-दनुरूपमेव ।

अत्रोपपत्तिरवेष्टकल्पितमानानामुत्थापनेन स्फुटा ॥ ६२-६३ ॥

इति भावितबीजम् ।

अथ वर्गप्रकृतिः ।

तत्र वज्राभ्यासतोऽनेककनिष्ठज्येष्ठानयनम् ।

मूलं द्विधेष्टवर्गाद् गुणकगुणादिष्टयुतविहीनाच्च ।
आद्यवधो गुणकगुणः सहान्त्यघातेन कृतमन्त्यम् ॥ ६४ ॥ (६५)
वज्रवधैक्यं प्रथमं प्रक्षेपः क्षेपवधतुल्यः ।
प्रक्षेपशोधकहृते मूले प्रक्षेपके रूपे ॥ ६५ ॥ (६६)

इष्टवर्गाद्गुणकगुणादन्येनेष्टेन केन चिद्युताद्धीनाच्च यन्मूलं तदन्त्यसंज्ञमधोऽधो द्विधा स्थाप्यम् । यस्येष्टस्य वर्गः कृतः स चाद्यसंज्ञोऽप्यधोऽधो द्विधा स्थाप्यः । येन युतेनोनेन वा मूलं प्राप्तं स क्षेपसंज्ञः शोधकसंज्ञो वाऽधोऽधो द्विधा स्थाप्यः । एवं तिर्यक्पङ्क्तिद्वये द्विधा कनिष्ठज्येष्ठक्षेपाणां विन्यासो जातः । अत्रेष्टवर्गो येन गुणकेन गुणितस्तस्य संज्ञा प्रकृतिः । आद्यस्य कनिष्ठसंज्ञा । अन्त्यस्य च ज्येष्ठसंज्ञेति सर्वं भास्करबीजे प्रसिद्धम् । आद्ययोः कनिष्ठयोर्वधो गुणकेन प्रकृत्या गुणोऽन्त्ययोर्ज्येष्ठयोर्घातेन सह सहितः । एवमन्त्यमन्यज्ज्येष्ठं कृतमाचार्यैरिति शेषः । कनिष्ठज्येष्ठयोर्वज्रवधैक्यं चान्यत् प्रथमं कनिष्ठसंज्ञं भवति । तत्र क्षेपयोर्वधेन तुल्यः प्रक्षेपो भवतीति । एवं प्रक्षेपे वा शोधके ऋणक्षेपे तुल्यभावनया ये मूले कनिष्ठज्येष्ठे ते प्रक्षेपकेण वा शोधकेन हृते रूपे प्रक्षेपके रूपक्षेपे कनिष्ठज्येष्ठे भवत इति सर्वं भास्करवर्गप्रकृतितः स्फुटम् ।

अत्रोपपत्त्यर्थं मत्कृतभास्करबीजटिप्पण्यां वर्गप्रकृत्युपपत्तिर्विलोक्या ॥ ६४–६५ ॥

इदानीं विशेषमाह ।

रूपप्रक्षेपपदे पृथगिष्टक्षेप्यशोध्यमूलाभ्याम् ।
कृत्वाऽऽन्त्याद्यपदे ये प्रक्षेपे शोधने वेष्टे ॥ ६६ ॥ (६८)

रूपक्षेपे ये पदे आद्यान्त्यपदे ते पृथक् स्थाप्ये । तत इष्टक्षेपे वेष्टशोधके ये मूले ताभ्यां भावनयाऽन्ये अन्त्याद्यपदे ज्येष्ठकनिष्ठे कृत्वा ते इष्टे प्रक्षेपे वेष्टे शोधनेऽन्ये अन्त्याद्यपदे ज्ञेये इति ॥ ६६ ॥

इदानीं चतुःक्षेपकनिष्ठज्येष्ठाभ्यां रूपक्षेपे कनिष्ठज्येष्ठानयनमाह ।

चतुरधिकेऽन्त्यपदकृति-
र्व्यूनादलिताऽन्त्यपदगुणाऽन्त्यपदम् ।
अन्त्यपदकृतिर्व्येका
त्रिहृताऽऽद्यपदाहृताऽऽद्यपदम् ॥ ६७ ॥ (६९)

चतुरधिके चतुःक्षेपेऽन्त्यपदकृतिस्त्रिभिरूनाऽर्धिताऽन्त्यपदगुणा फलं रूपक्षेपीयमन्त्यपदं ज्येष्ठं भवेत् । अन्त्यपदकृतिरेकेन हीना द्विहृता-ऽऽद्यपदेन हता फलं रूपक्षेपीयमाद्यपदं कनिष्ठं भवेत् ।

अत्रोपपत्तिः । यदि चतुःक्षेपे कनिष्ठम् = क, ज्येष्ठम् = ज्ये । तदा 'इष्टवर्गहृतः क्षेपः क्षेपः स्यात्'—इत्यादिभास्करविधिना रूपक्षेपे कनिष्ठम् $= \frac{क}{२}$ । ज्येष्ठम् $= \frac{ज्ये}{२}$ । तथा विलोमेन प्रकृतिः $= \frac{ज्ये^२ - ४}{क^२}$ समासभावनया $\frac{क}{२}, \frac{ज्ये}{२}$, आभ्यामन्ये कनिष्ठज्येष्ठे रूपक्षेपे साध्येते तदा कनिष्ठम् $= \frac{क \times ज्ये}{२}$ ज्येष्ठम् $= \frac{ज्ये^२ - २}{२}$ आभ्यां $\frac{क}{२}, \frac{ज्ये}{२}$ एताभ्यां च पुना रूपक्षेपे यदि कनिष्ठ-ज्येष्ठे साध्येते तदा कनिष्ठम् $= \frac{क\,(ज्ये^२ - १)}{२}$ । ज्येष्ठम् $= \frac{ज्ये\,(ज्ये^२ - ३)}{२}$ अत उपपद्यते ॥ ६७ ॥

इदानीं चतुःशोधक-कनिष्ठज्येष्ठाभ्यां रूपक्षेपे कनिष्ठज्येष्ठानयन-माह ।

चतुरूनेऽन्त्यपदकृती त्र्येकयुते वधदलं पृथग्व्येकम् ।
त्र्येकाद्याहतमन्त्यं पदवधगुणमाद्यमान्त्यपदम् ॥६८॥ (७१)

चतुरूनेऽन्त्यपदस्य कृतिर्द्विधा स्थाप्या एकत्र त्रियुताऽन्यत्रैकयुता । अनयोर्वधदलं पृथक् स्थाप्यमेकत्र व्येकं कार्यं तत्त्र्येकाद्याहतम् । अन्त्यपदह-

Digitized by Google

तिस्त्रियुता प्रथमं या साधिता तद्भक्तेना ज्ये^{2} + २ नेन हतमित्यर्थः। फलं रूपक्षेपेऽन्त्यं ज्येष्ठपदं स्यात्। पृथक् स्थापितं पदयोः कनिष्ठज्येष्ठयोर्ऽ-घेन गुणं फलमान्त्यपदं पूर्वागतान्त्यपदसम्बन्धि आद्यं पदं भवेदिति।

अत्रोपपत्तिः। कल्प्यते चतुःक्षेपे कनिष्ठम् = क। ज्येष्ठम् = ज्ये।

तदा विलोमेन प्रकृतिः = $\frac{ज्ये^2 + ४}{क^2}$। रूपशोधके च कनिष्ठम् = $\frac{क}{२}$। ज्ये-ष्ठम् = $\frac{ज्ये}{२}$। आभ्यां समासभावनया रूपक्षेपे कनिष्ठम् = $\frac{क \times ज्ये}{२}$। ज्येष्ठम् = $\frac{ज्ये^2 + २}{२}$। आभ्यां पुनः समासभावनया रूपक्षेपे कनिष्ठम् = $\frac{क \cdot ज्ये (ज्ये^2 + ३)}{२}$।

ज्येष्ठम् = $\frac{ज्ये^4 + ४ ज्ये^2 + २}{२}$। आभ्यां पूर्वसाधिताभ्याम् $\frac{क \times ज्ये}{२}$, $\frac{ज्ये^2 + २}{२}$ ए-ताभ्यां च पुनः समासभावनया रूपक्षेपे कनिष्ठम् = $\frac{क \cdot ज्ये (ज्ये^4 + ४ ज्ये^2 + ३)}{२}$

$= क \cdot ज्ये \frac{(ज्ये^2 + १)(ज्ये^2 + ३)}{२}$। ज्येष्ठम् = $(ज्ये^2 + २)\left(\frac{ज्ये^4 + ४ ज्ये^2 + १}{२}\right)$

$= (ज्ये^2+२)\left(\frac{ज्ये^4 + ४ ज्ये^2 + ३}{२} - १\right) = \left\{ज्ये^2 + २\right\}\left\{\frac{(ज्ये^2+३)(ज्ये^2+१)}{२} - १\right\}$

अत उपपद्यते ॥ ६८ ॥

इदानीं वर्गात्मकप्रकृतौ कनिष्ठज्येष्ठानयनमाह।

वर्गे गुणके क्षेपः केनचिदुद्धृतयुतोनितो दलितः।
प्रथमोऽन्त्यमूलमन्यो गुणकारपदोद्धृतः प्रथमः ॥ ६९ ॥ (७३)

गुणके प्रकृतौ वर्गे वर्गात्मके सति क्षेपः केनचिदिष्टेनोद्धृतः फलं तेनैवेष्टेन युतमूनितं दलितं च कार्यम्। एवं राशिद्वयं भवेत् तत्र प्रथमो राशिरन्त्यमूलं ज्येष्ठं भवेत्। अन्यो गुणकारपदोद्धृतो गुणकारः प्रकृति-स्तत्पदेनोद्धृतः फलं प्रथम आद्योऽर्थात् कनिष्ठं पदं भवेदिति। 'इष्ट-भक्तो द्विधा क्षेप' इत्यादि भास्करोक्तमेतदनुरूपमेव।

अत्रोपपत्त्यर्थं मत्कृतभास्करबीजटिप्पण्याम्—इष्टभक्तो द्विधा क्षेपः-इत्यस्योपपत्तिर्द्रष्टव्या ॥ ६९ ॥

अतोऽपि चेत्कार्या भ्रष्टा सा कोलब्रूकानुवादानुसारेण ।

वर्गच्छिन्ने गुणके प्रथमं तन्मूलभाजितं भवति ।
वर्गच्छिन्ने क्षेपे तत्पदगुणिते तदा मूले ॥ ७० ॥ (७५)

एवं भवितुमर्हति ।

यदि गुणकः प्रकृतिः केनचिद्वर्गेण निःशेषो भवति तदा तं तद्वर्गेण संहृत्य लब्धसमे गुणके मूले साध्ये तत्र प्रथममाद्यमर्थात् कनिष्ठं तस्य वर्गस्य मूलेन भाजितं फलमभीष्टे गुणके कनिष्ठं भवेत् । ज्येष्ठं त्वत्रापि तदेव । क्षेपे वर्गच्छिन्ने सति वर्गेण क्षेपं विभज्य लब्धसमे क्षेपे ये मूले ते तद्वर्गपदेन गुणिते अभीष्टगुणके मूले भवत इति । 'वर्गच्छिन्ने गुणे ह्रस्वं तत्पदेन विभाजयेदि'ति भास्करप्रकारः प्रथमप्रकारानुरूपः । 'सुधियः क्षुण्णे तदा पदे' इति भास्करप्रकारश्च द्वितीयप्रकारानुरूपः ।

अत्रोपपत्त्यर्थं मत्कृतभास्करबीजटिप्पणी विलोक्या ॥ ७० ॥

इदानीं प्रश्नविशेषस्योत्तरमाह ।

गुणकयुतिरष्टगुणिता गुणकान्तरवर्गभाजिता राशिः ।
गुणकौ त्रिगुणौ व्यस्ताधिकौ हृतावन्तरेण पदे ॥ ७१ ॥ (७८)

(गुणकद्वयेन गुणितः पृथक् पृथग्राशिरेकयुक्तश्च ।
यदि तत्पदे निरये कुर्वन्नावत्सराद्गणकः ॥)

इति प्रश्नस्योत्तरार्थं गुणकयोर्युतिरष्टगुणिता गुणकयोरन्तरवर्गेण भाजिता राशिः स्यात् । गुणकौ द्वौ त्रिगुणौ कार्यौ तौ व्यस्ताधिकौ व्यस्तगुणकाधिकौ गुणकान्तरेण तौ हृतौ तदा ते एव निरये पदे भवतः ।

अत्रोपपत्तिः । कल्प्यते गुणकद्वयं क्रमेण $गु_1$, $गु_2$ । तथा राशिमानं $\frac{या^2 - 1}{गु_1}$ ।

अत्रैकालापः स्वयं घटतेऽतोऽमुं द्वितीयगुणकेन सङ्गुण्य रूपं प्रक्षिप्य कालकवर्गेण समं कृत्वा पक्षौ

$$\frac{गु_2 या^2 - गु_2 + गु_1}{गु_1} = का^2 \therefore गु_1 का^2 = गु_2 या^2 - गु_2 + गु_1 ।$$

$\text{गु}_१$ गुणितौ तदा प्रथमपक्षस्य मूलम् = $\text{गु}_१$ का । द्वितीय पक्षस्यास्य $\text{गु}_१\,\text{गु}_२\,\text{या}^२ - \text{गु}_१\,\text{गु}_२ + \text{गु}_१^२$ वर्गप्रकृत्या

क	ज्ये	क्षे
१	$\text{गु}_१$	$\text{गु}_१^२ - \text{गु}_१\,\text{गु}_२$
$\dfrac{२\,\text{ह्र}}{\text{गु}_१\,\text{गु}_२ \backsim \text{ह्र}^२}$	$\dfrac{\text{गु}_१\,\text{गु}_२ + \text{ह्र}^२}{\text{गु}_१\,\text{गु}_२ \backsim \text{ह्र}^२}$	१

समासभावनया क

$$\frac{२\,\text{गु}_१\,\text{ह्र} + \text{गु}_१\,\text{गु}_२ + \text{ह्र}^२}{\text{गु}_१\,\text{गु}_२ \backsim \text{ह्र}^२}$$

ज्ये

$$\frac{२\,\text{गु}_१\,\text{गु}_२\,\text{ह्र} + \text{गु}_१^२\,\text{गु}_२ + \text{गु}_१\,\text{ह्र}^२}{\text{गु}_१\,\text{गु}_२ \backsim \text{ह्र}^२}$$

अत्र ह्रस्वं यावत्तावन्मानं ज्येष्ठं प्रथमपक्षस्य $\text{गु}_१$ का अस्य समम् ।

अथ यदि $\text{ह्र} = \text{गु}_१$ तदुत्थापनेन राशिः

$$= \frac{\text{या}^२ - १}{\text{गु}_१} = \left[\left\{\frac{३\,\text{गु}_१^२ + \text{ग}_१\,\text{गु}_२}{\text{गु}_१\,(\text{गु}_२ \backsim \text{गु}_१)}\right\}^२ - १\right] \div \text{गु}_१$$

$$= \left\{\left(\frac{३\,\text{गु}_१ + \text{गु}_२}{\text{गु}_२ \backsim \text{गु}_१}\right)^२ - १\right\} \div \text{गु}_१ = \left(\frac{९\,\text{गु}_१^२ + ६\,\text{गु}_१\,\text{गु}_२ + \text{गु}_२^२}{\text{गु}_१^२ - २\,\text{गु}_१\,\text{गु}_२ + \text{गु}_२^२} - १\right) \div \text{गु}_१$$

$$= \frac{८\,\text{गु}_१^२ + ८\,\text{गु}_१\,\text{गु}_२}{(\text{गु}_२ \backsim \text{गु}_१)^२} \div \text{गु}_१ = \frac{८\,(\text{गु}_१ + \text{गु}_२)}{(\text{गु}_२ \backsim \text{गु}_१)^२}$$ । तत आलापेन

$$\text{प्रथमपदम्} = \sqrt{\frac{८\,\text{गु}_१^२ + ८\,\text{गु}_१\,\text{गु}_२}{\text{गु}_१^२ - २\,\text{गु}_१\,\text{गु}_२ + \text{गु}_२^२} + १} = \frac{३\,\text{गु}_१ + \text{गु}_२}{\text{गु}_१ \backsim \text{गु}_२}$$ ।

एवं द्वितीयपदम् = $\dfrac{३\,\text{गु}_२ - \text{गु}_१}{\text{गु}_१ \backsim \text{गु}_२}$ । अत उपपन्नं सर्वम् ॥ ७१ ॥

इदानीं प्रश्नान्तरविशेषस्योत्तरमाह ।

वर्गोऽन्यकृतियुतोनस्तत्संयोगान्तरार्धकृतिभक्तः ।
तद्गुणितौ युतिवियुतौ वर्गौ घाते च रूपयुते ॥ ७२ ॥ (८०)

ययो राश्योर्युतिवियुतौ वर्गौ भवतस्तथा घाते रूपयुते च वर्गः स्यात् तत्र राश्योरानयनाय कश्चिदिष्टो वर्गः कल्प्यः । स चान्येष्टवर्गेण युत ऊनश्च कार्यः । एवं राशिद्वयं यद्भवेत् तत्संयोगस्तदन्तरार्धवर्गेण भक्तो यत् फलमागच्छेत् तेन पूर्वसाधितौ द्वौ राशी गुणितावभीप्सितौ राशी भवतः ।

अत्रोपपत्तिः । कल्प्येते राशी

$\text{२ इ}^{२} (\text{या}^{२} + \text{का}^{२}) \text{।} \; \text{२ इ}^{२} (\text{या}^{२} - \text{का}^{२})$

अत्र राश्योर्योगवियोगौ वर्गौ भवतोऽत आलापद्वयं घटते । अथानयोर्घातः सैकः $= \text{४ इ}^{४} \text{या}^{४} - \text{४ इ}^{४} \text{का}^{४} + १$ अयं वर्गः । अत आद्यन्तयोः पदयोः $- \text{२ इ}^{२} \text{या}^{२}, - १$ अनयोर्द्विघ्नहतिं $- \text{४ इ}^{२} \text{या}^{२}$ मध्यपदसमां कृत्वा पक्षौ $- \text{४ इ}^{२} \text{या}^{२} = - \text{४ इ}^{४} \text{का}^{४}$

$$\therefore \text{२ इ}^{२} = \frac{\text{२ या}^{२}}{\text{का}^{४}} = \frac{(\text{या}^{२} + \text{का}^{२}) + (\text{या}^{२} - \text{का}^{२})}{\left\{ \frac{(\text{या}^{२} + \text{का}^{२}) - (\text{या}^{२} - \text{का}^{२})}{२} \right\}^{२}}$$

अत उपपद्यते यथोक्तम् ॥ ७२ ॥

इदानीं पुनः प्रश्नान्तरविशेषस्योत्तरमाह ।

यैरूनो यैश्च युतो रूपैर्वर्गस्तदैक्यमिष्टहृतम् ।
इष्टोनं तद्दलकृतिरूनाऽभ्यधिका भवति राशिः ॥ ७३ ॥ (८४)

को राशिरेतावद्भी रूपैर्युतस्तथैतावद्भी रूपैरूनश्च वर्गो भवतीति प्रश्नोत्तरार्थं ये रूपैरूनो यैर्युतश्च वर्गो भवति तेषामैक्यं केनचिदिष्टेन हृतं फलमिष्टोनं कार्यम् । तस्य शेषस्य दलस्यार्धीकृतस्य कृतिरूनाऽभ्यधिका । ये रूपैरूनो राशिर्वर्गो भवति तान्यूनरूपाणि तैरूनैरभ्यधिका राशिर्भवतीत्यर्थः ।

अत्रोपपत्तिः । कल्प्यते राशिमानम् $= \text{या } १$ । अत्र अ–रूपैर्युतः क–रूपैरूनश्च वर्गो भवतीति प्रश्नालापेन

$$\text{का}^{२} = \text{या} + \text{अ}$$

$$\text{नी}^{२} = \text{या} - \text{क}$$

$\therefore \text{का}^{२} - \text{नी}^{२} = \text{अ} + \text{क}$ । अथ कल्प्यते

$$\text{का} - \text{नी} = \text{इ}$$

$$\therefore \text{का} + \text{नी} = \frac{\text{अ} + \text{क}}{\text{इ}}$$

ततः सङ्क्रमणेन $\text{नी} = \frac{१}{२} \left\{ \left(\frac{\text{अ} + \text{क}}{\text{इ}} \right) - \text{इ} \right\}$

Digitized by Google

$$\text{अतः नी}^2 = \left[\frac{1}{2}\left\{\left(\frac{\text{अ}+\text{क}}{\text{इ}}\right)-\text{इ}\right\}\right]^2 = \text{या}-\text{क}$$

$$\text{ततः या} = \left[\frac{1}{2}\left\{\left(\frac{\text{अ}+\text{क}}{\text{इ}}\right)-\text{इ}\right\}\right]^2 + \text{क}$$

अत उपपद्यते यथोक्तम् ॥ ७३ ॥

इदानीं पुनः प्रश्नान्तरविशेषस्योत्तरमाह ।

याभ्यां कृतिरधिकोनस्तदन्तरं हृतयुतोनमिष्टेन ।
तद्दलकृतिरधिकोनाऽधिकयोरधिकोनयो राशिः॥७४॥(८२)

को राशिरुद्दिष्टराशिभ्यां युक्तः कृतिर्भवति । वा को राशिरुद्दिष्टराशिभ्यामूनः कृतिर्भवतीति प्रश्ने याभ्यामुद्दिष्टाभ्यामधिको वोनः कृतिर्भवति तदन्तरमिष्टेन हृतं योगप्रश्न इष्टेनैव युतमूनप्रश्न इष्टेनैवोनं कार्यम् । यच्चिष्पन्नं तद्दलस्य कृतिरधिकोद्दिष्टराशिनोना कार्या अधिकयोरुद्दिष्टराश्योः । उद्दिष्टराश्योरूनयोश्चाधिका कार्या । एवं राशिर्भवति ।

अत्रोपपत्तिः । कल्प्यते राशिमानम् = या । यश्च अ–क–राशिभ्यां युतो मूलदः । तथा अ > क तदा प्रश्नानुसारेण

$$\left.\begin{aligned} \text{का}^2 &= \text{या}+\text{अ} \\ \text{नी}^2 &= \text{या}+\text{क} \\ \text{का}^2-\text{नी}^2 &= \text{अ}-\text{क} \\ \text{का}-\text{नी} &= \text{इ} \\ \therefore\ \text{का}+\text{नी} &= \frac{\text{अ}-\text{क}}{\text{इ}} = \text{ल} \end{aligned}\right\} \quad \begin{aligned} &\text{सङ्क्रमणेन} \\ &\text{का} = \frac{\text{ल}+\text{इ}}{2} \\ &\text{ततः या} = \text{का}^2-\text{अ} \end{aligned}$$

$$\left.\begin{aligned} &\text{एवमूनप्रश्ने} \\ \text{का}^2 &= \text{या}-\text{अ} \\ \text{नी}^2 &= \text{या}-\text{क} \\ \text{नी}^2-\text{का}^2 &= \text{अ}-\text{क} \\ \text{नी}-\text{का} &= \text{इ} \\ \therefore\ \text{नी}+\text{का} &= \frac{\text{अ}-\text{क}}{\text{इ}} = \text{ल} \end{aligned}\right\} \quad \begin{aligned} &\text{सङ्क्रमणेन} \\ &\text{का} = \frac{\text{ल}-\text{इ}}{2} \\ &\text{ततः या} = \text{का}^2+\text{अ} \end{aligned}$$

अत उपपद्यते ॥ ७४ ॥

Digitized by Google

अथोदाहरणानि ।

तत्रादौ वर्गप्रकृत्युदाहरणम् ।

राशिकलाशेषकृतिं द्विनवतिगुणितां त्र्यशीतिगुणितां वा ।
सैकां बुधदिने वर्गं कुर्वन्नावत्सराद्गणकः ॥ ७५ ॥ (६७)

राशिशेषकृतिं द्विनवति–९२ गुणितां सैकां वा कलाशेषकृतिं त्र्यशीति–८३ गुणितां सैकां बुधदिने आवत्सराद्वर्गं कुर्वन्नपि स गणकोऽस्तीत्यहं मन्ये ।

प्रथमप्रश्ने प्र ९२ क्षे १

ततो वर्गप्रकृतिसूत्रतः

	क १	ज्ये १०	क्षे ८
	क १	ज्ये १०	क्षे ८
भावनया,	क २०	ज्ये १९२	क्षे ६४
	क $\frac{5}{2}$	ज्ये २४	क्षे १
	क $\frac{5}{2}$	ज्ये २४	क्षे १
भावनया,	क १२०	ज्ये ११५१	क्षे १

अतो राशिशेषम् = १२० । एवं भावनया बहुधा राशिशेषं स्यात्ततः कुट्टकविधिनाऽभीष्टाहेऽहर्गणः स्यात् ।

द्वितीयप्रश्ने गु ८३ क्षे १

ततः	क १	ज्ये ९	क्षे २
	क १	ज्ये ९	क्षे २
	क १८	ज्ये १६४	क्षे ४
	क ९	ज्ये ८२	क्षे १

भावनया कनिष्ठज्येष्ठयोरानन्त्यम् ।

ततः कलाशेषम् = ९ । कलाशेषात् कुट्टकविधिनाऽभीष्टदिनेऽहर्गणः स्यात् ॥ ७५ ॥

Digitized by Google

इदानीमन्यौ प्रश्नावाह ।

सूर्यविलिप्ताशेषं पञ्चभिरूनाहतं तथा दशभिः ।
वर्गो बृहस्पतिदिने कुर्वन्नावत्सराद्गणकः ॥७६॥ (८१)

सूर्यविलिप्ताशेषं पञ्चभिरूनं पञ्चाहतं च बृहस्पतिदिने वर्गो भवति । वा विलिप्ताशेषं तथैव दशभिरूनं दशभिराहतं च वर्गो भवतीति प्रश्नमावत्सरात् कुर्वन्नपि स गणकोऽस्तीति ।

प्रथमप्रश्ने विलिप्ताशेषम् = या । ततः प्रश्नानुसारेण

५ या − २५ अयं वर्ग इष्टवर्गेण समः कृतः ।

ततः ५ या − २५ = इ^{२} ∴ या = $\frac{इ^{२} + २५}{५}$

यदि इ = ५ तदा या = १० ।

एवं द्वितीयप्रश्ने १० या − १०० = इ^{२} ∴ या = $\frac{इ^{२} + १००}{१०}$

यदि इ = १० तदा या = २० । विलिप्ताशेषात् कुट्टकेनाहर्गणानयनं सुगमम् ॥ ७६ ॥

इदानीमन्यान् प्रश्नानाह ।

भगणादिशेषवर्गं त्रिभिर्गुणं संयुतं शतैर्नवभिः ।
कृतिमष्टशतोनं वा कुर्वन्नावत्सराद्गणकः ॥७७॥ (७०)

भगणादीनां भगण - राशि - भाग - कला - विकलानां शेषवर्गं त्रिभिर्गुणं नवभिः शतैः संयुतं वाऽष्टशतोनं वर्गमावत्सरात् कुर्वन्नपि स गणकोऽस्तीति ।

अत्र भगणादिशेषमानम् = या । ततः प्रश्नालापेन प्रथमप्रश्ने ३ या^{२} + ९०० अयं वर्गः । अतः ७० सूत्रेण

क १ ज्ये २ क्षे १

क ३० ज्ये ६० क्षे ९००

भावनया कनिष्ठज्येष्ठयोरानन्त्यम् ।

अतो भगणादिशेषमानम् = ३० । द्वितीयप्रश्नेऽप्येवम् ।

$३ या^{२} - ८००$ अयं वर्गः ।

अतः क १ ज्ये १ क्षे २

क २० ज्ये २० क्षे ८००

रूपक्षेपपदाभ्यां भावनयाऽत्रापि पदयोरानन्त्यम् ।

अतो भगणादिशेषम् = २० ॥ ७७ ॥

इदानीमन्यं प्रश्नमाह ।

भगणादिशेषवर्गं चतुर्गुणं पञ्चषष्टिसंयुक्तम् ।
षष्ट्यूनं वा वर्गं कुर्वन्नावत्सराद्गणकः ॥ ७८ ॥ (७४)

स्पष्टार्थम् ।

प्रथमप्रश्ने भगणादिशेषमानम् = या । ततः प्रश्नानुसारेण ।

$४ या^{२} + ६५$ अयं वर्गः ।

अत्र ६९ सूत्रतः । इष्टम् = ५ । $\frac{६५}{५} = १३$

$१३ - ५, ८ । \frac{८}{२} = ४ । \sqrt{\frac{४}{४}} = २$ । अतो भगणादिशेषम् = २

रूपक्षेपपदाभ्यां भावनयाऽऽनन्त्यम् ।

द्वितीयप्रश्नेऽप्येवं $४ या^{२} - ६०$ अयं वर्गः ।

अत्रेष्टम् = २ । $\frac{६०}{२} = ३०$ । $३० + २ = ३२$ । $\frac{३२}{२} = १६$ ।

$\sqrt{\frac{१६}{४}} = ८$ । अतोऽत्र भगणादिशेषम् = ८ । एवं बुद्धिमता

क्षयक्षेपे गुणके वर्गे चाधिकसङ्ख्यातः कनिष्ठानयनं कार्यमिति ॥ ७८ ॥

इदानीमन्यं प्रश्नमाह ।

इष्टभगणादिशेषं द्विनवत्यूनं त्र्यशीतिसंगुणितम् ।
रूपेण युतं वर्गं कुर्वन्नावत्सराद्गणकः ॥ ७९ ॥ (८७)

इष्टभगणादिशेषं द्विनवतिभि-९२ रूनं कार्यं शेषं त्र्यशीति-८३ संगुणितं रूपेण युतं च वर्गमावत्सरात् कुर्वन्नपि स गणकोऽस्तीति । इष्टभगणादिशेषमानम् = या । ततः प्रश्नालापेन

$$८३ (या - ९२) + १ = ८३ \text{ या} - ८३ \times ९२ + १$$

$$= ८३ \text{ या} - ७६३६ + १ = ८३ \text{ या} - ७६३५ = इ^{२} \therefore \text{ या} = \frac{इ^{२} + ७६३५}{८३}$$

अत्र यदि इ = १ तदा या = ९२ इदमेव भगणादिशेषमानम् ॥ ७९ ॥

इदानीमन्यो प्रश्नावाह ।

अधिमासशेषवर्गं त्रयोदशगुणं त्रिभिः शतैर्युक्तम् ।
त्रिघनोनं वा वर्गं कुर्वन्नावत्सराद्गणकः ॥ ८० ॥ (७२)

त्रिघनेन सप्तविंशत्योनम् । शेषं स्पष्टार्थम् ।

अत्राधिमासशेषमानम् = या । ततः प्रश्नालापेन

प्रथमे प्रश्ने १३ या^{२} + ३०० । अयं वर्गः ।

अत्र वर्गप्रकृत्या, क १ ज्ये ४ क्षे ३

क १० ज्ये ४० क्षे ३००

अत्र रूपक्षेपपदाभ्यां भावनयाऽऽनन्त्यं कार्यम् ।

अत्र कनिष्ठ-१० मधिमासशेषमानम् ।

अत्र यदि क १ ज्ये ३ क्षे ४ । ततः ६८ सूत्रेण ।

$$\text{रूपक्षेपे कनिष्ठम्} = \frac{\text{क} \cdot \text{ज्ये} (\text{ज्ये}^{२} + १)(\text{ज्ये}^{२} + ३)}{२} = \frac{१ \times ३ (३^{२} + १)(३^{२} + ३)}{२}$$

$$= \frac{३ \times १० \times १२}{२} = १८० ।$$

$$\text{ज्येष्ठम्} = \left\{ \text{ज्ये}^{२} + २ \right\} \left\{ \frac{(\text{ज्ये}^{२} + ३)(\text{ज्ये}^{२} + १)}{२} - १ \right\}$$

$$= \left\{ ३^{२} + २ \right\} \left\{ \frac{(३^{२} + ३)(३^{२} + १)}{२} - १ \right\}$$

$$= ११ \times ५९ = ६४९$$

एवं रूपक्षेपे पदे प्रसाध्य भावनयाऽऽनन्त्यं कार्यम् ।

द्वितीयप्रश्नेऽप्येवम् १३ या^{२} - २७ अयं वर्गः ।

अतः क १ ज्ये ४ क्षे ३

क १ ज्ये २ क्षे ९

भावनया, क ६ ज्ये २१ क्षे २७

अत्रापि रूपक्षेपपदाभ्यां भावनयाऽऽनन्त्यं कार्यम् ।

अत्राधिशेषमानं व्यक्तम् = ६ ॥ ८० ॥

इदानीमन्यौ प्रश्नावाह ।

इन्दुविलिप्ताशेषं सप्तदशगुणं त्रयोदशगुणं चापि ।
पृथगेकयुतं वर्गं कुर्वन्नावत्सराद्गणकः ॥ ८१ ॥ (७६)

स्पष्टार्थम् ।

अत्र ७१ सूत्रतः । $गु_1 = १७$ । $गु_2 = १३$,

ततो विलिप्ताशेषम् $= \frac{८(गु_1 + गु_2)}{(गु_1 \backsim गु_2)^2} = \frac{८(१७ + १३)}{(१७ - १३)^2} = \frac{८ \times ३०}{४^2}$

$= \frac{८ \times ३०}{४ \times ४} = १५$ ।

इदानीमन्यं प्रश्नमाह ।

अवमावशेषवर्गं द्वादशगुणितं शतेन संयुक्तम् ।
त्रिभिरूनं वा वर्गं कुर्वन्नावत्सराद्गणकः ॥ ८२ ॥ (७७)

स्पष्टार्थम् ।

प्रथमप्रश्ने क्षयशेषमानम् = या । ततः प्रश्नानुसारेण

$१२ या^2 + १००$ अयं वर्गः ।

वर्गप्रकृत्या, क १ ज्ये ४ क्षे ४

क ५ ज्ये २० क्षे १०० ।

अथ चतुःक्षेपपदाभ्यां ६७ सूत्रेण

रूपक्षेपे $क = \frac{क(ज्ये^2 - १)}{२} = \frac{१(४^2 - १)}{२} = \frac{१५}{२}$ ।

$ज्ये = \frac{ज्ये(ज्ये^2 - ३)}{२} = \frac{४(४^2 - ३)}{२} = २६$ ।

आभ्यां भावनयाऽऽनन्त्यं कार्यम् । अत्र क्षयशेषम् = ५ ।

द्वितीयप्रश्नेऽप्येवम् । $१२ या^2 - ३$ वर्गः ।

अतः क १ ज्ये ३ क्षे $\dot{३}$

रूपक्षेपपदाभ्यामत्राप्यानन्त्यं कार्यम् । अत्र क्षयशेषम् = १ ।

इदानीमन्यं प्रश्नमाह ।

ज्ञदिनेऽर्ककलाशेषं गुरुदिनविकलावशेषयुक्तोनम् ।
वर्गं वधं च सैकं कुर्वन्नावत्सराद्गणकः ॥ ८३ ॥ (८१)

बुधदिनेऽर्कस्य यत् कलाशेषं तद्गुरुदिनजेनार्कस्य विकलावशेषेण युक्तमूनं च वर्गं तथा तयोः कलाविकलाशेषयोर्वधं सैकं च वर्गमावत्सरात् कुर्वन्नपि स गणकोऽस्तीति ।

अत्र ७२ सूत्रेण कल्पित एको वर्गः १६ । अन्यश्च ४ ।

ततः $१६ + ४ = २०$ । $१६ - ४ = १२$ ।

$$\frac{२० + १२}{\left(\frac{२० - १२}{२}\right)^{२}} = \frac{३२}{१६} = २$$ । अनेन गुणितौ

२० । १२ जातौ राशी ४० । २४ । अत्र प्रथमं ४० कलाशेषं द्वितीयं लघुं २४ विकलाशेषम् । कलाशेषात् कुट्टकेन बुधदिनेऽहर्गणः साध्यः । विकलाशेषाच्च कुट्टकेन गुरुदिनेऽहर्गणः साध्य इति ।

इदानीमन्यं प्रश्नमाह ।

विकलाशेषं सहितं त्रिनवत्या सप्तषष्टिहीनं च ।
भानोर्ज्ञदिने वर्गं कुर्वन्नावत्सराद्गणकः ॥ ८४ ॥ (८५)

भानोर्बुधदिने यद्विकलाशेषं तत् त्रिनवत्या सहितं वर्गं तथा सप्तषष्टिहीनं च वर्गमावत्सरात् कुर्वन्नपि स गणकोऽस्तीति ।

अत्र ७३ सूत्रेण इष्टम् $= ४$

$$\frac{९३ + ६७}{४} = \frac{१६०}{४} = ४०$$ ।

$४० - ४ = ३६$ । $\frac{३६}{२} = १८$ । $१८^{२} = ३२४$ ।

$३२४ + ६७ = ३९१$ इदं विकलाशेषमतः कुट्टकेन बुधदिनेऽहर्गणानयनं सुगमम् ॥ ८४ ॥

Digitized by Google

इदानीमन्यौ प्रश्नावाह ।

ज्ञदिनेऽर्ककलाशेषं द्वादशभिः संयुतं त्रिषष्ट्या च ।
षष्ट्याऽष्टाभिश्चोनं कुर्वन्नावत्सराद्गणकः ॥ ८५ ॥ (८३)

बुधदिनेऽर्कस्य कलाशेषं यत् तद्द्वादशभिः संयुतं वर्गं तथा त्रिषष्ट्या संयुतं च वर्गमावत्सरात् कुर्वन्नपि स गणकोऽस्तीत्येकः प्रश्नः । वा तत् कलाशेषं षष्ट्या-६० नं वर्गं तथाऽष्टाभिश्चोनं वर्गमावत्सरात् कुर्वन्नपि स गणकोऽस्तीति द्वितीयः प्रश्नः ।

अत्र ७४ सूत्रेण ।

प्रथमप्रश्ने इष्टं ३ प्रकल्प्य

$$\frac{६३ - १२}{३} = \frac{५१}{३} = १७$$

$$\frac{१७ + ३}{२} = \frac{२०}{२} = १० \text{ । } १०^{२} = १००$$

१००-६३=३७ इदमेव कलाशेषम् ।

द्वितीयप्रश्ने इष्टं २ प्रकल्प्य

$$\frac{६० - ८}{२} = \frac{५२}{२} = २६ \text{ ।}$$

$$\frac{२६ - २}{२} = \frac{२४}{२} = १२ \text{ । } १२^{२} = १४४ \text{ ।}$$

१४४ + ६० = २०४ इदमेव कलाशेषम् ॥ ८५ ॥

इदानीमन्यान् प्रश्नानाह ।

इन्दुविलिप्ताशेषाद्रविलिप्ताशेषमंशशेषं वा ।
अथवा मध्यममिष्टं कुर्वन्नावत्सराद्गणकः ॥ ८६ ॥ (८८)

इन्दुर्विलिप्ताशेषात् रविलिप्ताशेषं वाऽंशशेषमथवाऽभीष्टं मध्यमं ग्रहमावत्सरात् कुर्वन्नपि स गणकोऽस्तीति प्रश्नत्रयम् ।

अत्र चन्द्रविकलाशेषात् कुट्टकविधिनाऽहर्गणज्ञानम् । तस्मादिष्ट-मध्यानयनं रवेः कलांशशेषानयनं च सुगमम् ॥ ८६ ॥

Digitized by Google

इदानीमन्यान् प्रश्नानाह ।

जीवविलिप्ताशेषात् कुजमिन्दुं भौमलिप्तिकाशेषात् ।
रविमिन्दुभागशेषात् कुर्वन्नावत्सराद्गणकः ॥ ८७ ॥ (८९)

गुरुविलिप्ताशेषात् कुजं भौमकलाशेषाच्चन्द्रं चन्द्रभागशेषाच्च रविमावत्सरात् कुर्वन्नपि स गणकोऽस्तीति ।

गुरोर्विकलाशेषाद्वा भौमकलाशेषादथवा चन्द्रभागशेषात् कुट्टकेनाहर्गणज्ञानं ततोऽहर्गणादभीष्टग्रहज्ञानं स्फुटमेवेति ॥ ८७ ॥

इदानीं बालावबोधार्थं पूर्वप्रश्नोत्तरमाह ।

इष्टग्रहेष्टशेषाद्युगणो गतनिरपवर्त्तसङ्गुणितैः ।
छेददिनैरधिकोऽस्मादन्यग्रहशेषमिष्टो वा ॥ ८८ ॥ (९०)

इष्टग्रहस्येष्टकलाविकलादिशेषात् कुट्टकविधिना द्युगणोऽहर्गणः साध्यः । स च गतनिरपवर्त्तसङ्गुणितैश्छेदैर्दिनैरिष्टाहतदृढकुदिनैरधिकोऽनेकधा स्यादस्मादहर्गणादन्यग्रहस्य कलाविकलादिशेषं वाऽभीष्टो मध्यमग्रह एव साध्य इति स्फुटमेव सिद्धान्तविदाम् ॥ ८८ ॥

इदानीमुद्दिष्टाहर्गणे ग्रहयोर्भगणादिशेषे ये ते एव पुनः कस्मिन्नहर्गणे इत्यस्योत्तरमाह ।

निश्छेदभागहारौ ग्रहयोर्विपरीतौ ग्रहयोर्द्युगणात् ।
यस्मात् तन्निश्छेदेनोद्धृतयोर्लब्धसंगुणितौ ॥ ८९ ॥

(निश्छेदभागहारौ ग्रहयोर्भगणादिशेषयोर्द्युगणात् ।
यस्मात् तन्निश्छेदेनोद्धृतयोर्लब्धसङ्गुणितौ ॥ ८९ ॥) (९१)

निश्छेदभागहारौ विपरीतौ तद्युतात् पुनस्तस्मात् ।
शेषे द्युगणादेवं त्र्यादीनां प्राग्वदिष्टदिने ॥ ९० ॥ (९२)

यस्माद्द्युगणादहर्गणाद्ग्रहयोर्ये भगणादिशेषे भवतस्तयोर्यौ निश्छेदभागहारौ स्वस्वदृढकुदिनसंज्ञौ तयोर्निश्छेदेन महत्तमापवर्त्तनेनोद्धृतयोस्तयोर्दृढकुदिनसंज्ञयोः सतोर्ये लब्धे ताभ्यां विपरीतौ निश्छेदभागहारौ गुणितौ । महत्तमापवर्त्तभक्तात् प्रथमदृढकुदिनसंज्ञाद्यल्लब्धं तेन

द्वितीयदृढकुदिनमानं गुण्यं द्वितीयलब्धेन च प्रथमदृढकुदिनमानं गुण्यमित्यर्थः । एवं समच्छेदौ भवतः । तद्युतात् तस्मात् पूर्वसाधिताद्द्युगणात् पुनर्ग्रहयोस्त एव भगणादिशेषे भवतः । उद्दिष्टाहर्गणः पूर्वसाधितसमच्छेदेन युतस्तदा योगसमेऽहर्गणे पुनस्ते एव ग्रहयोर्भगणादिशेषे भवत इत्यर्थः । एवं त्र्यादीनां ग्रहाणामिष्टदिने यानि भगणादिशेषाणि तानि पुनः कदेति प्रश्नोत्तरं प्राग्वत् कार्यम् । द्वयोर्निश्छेदभागहाराभ्यां पूर्ववत् समच्छेदं विधाय नूतनो निश्छेदभागहारः कल्प्यः । पुनरस्य तृतीयदृढकुदिनस्य च लघुतमापवर्त्योऽन्वेषणीयः । एवमग्रेऽपि कर्म कार्यम् । अन्ते सर्वदृढकुदिनानां यो लघुतमापवर्त्यस्तेन युतोऽहर्गणः कार्यः । योगसमेऽहर्गणे च पुनस्तान्येव शेषाणि भवन्ति ।

अत्रोपपत्तिः । यदि ग्रहाणां दृढभगणाः भ$_1$, भ$_2$, भ$_3$ दृढकुदिनानि च कु$_1$, कु$_2$, कु$_3$ कल्प्यन्ते तथा दृढकुदिनानां लघुतमापवर्त्यश्च अ तदा

अ + अह अस्मिन्नहर्गणे दृढभगणगुणे दृढकुदिनहृते प्रथमखण्डे निरवयवभगणा लभ्यन्ते ते प्रयोजनाभावाद्यदि त्यज्यन्ते तदोद्दिष्टाहर्गणाद्भगणशेषं तदेव अ + अह अस्मादपि । आचार्येणात्र द्वयोर्द्वयोर्निश्छेदभागहारयोर्महत्तमापवर्तनविभक्तयोः सतोर्ये लब्धे ताभ्यामन्योन्यहारौ सङ्गुण्य लघुतमापवर्त्य एवोत्पादित इति गणितविदां प्रसिद्धमेवेति ॥ ८९–९० ॥

इदानीमन्यान् प्रश्नानाह ।

द्युगणमवमावशेषाद्रविचन्द्रौ मध्यमौ स्फुटावथ वा ।
एवं तिथिं ग्रहं वा कुर्वन्नावत्सराद्गणकः ॥ ६१ ॥ (६२)

अवमावशेषात् क्षयशेषाद्द्युगणमहर्गणं वा मध्यमौ रविचन्द्रावथ वा स्फुटौ रविचन्द्रौ वैवं तिथिं वा ग्रहमिष्टग्रहं भौमाद्यन्यतममावत्सरात् कुर्वन्नपि स गणकोऽस्तीति पञ्च प्रश्ना अत्र ॥ ९१ ॥

इदानीमन्यान् प्रश्नानाह ।

एकदिनमवमशेषं यद्गुणमेकरविचन्द्रभगणोनम् ।

शुध्यति भूदिनभक्तं व्येकं चान्द्रैस्तदुक्तिरियम् ॥९२॥ (९३)

एकदिनसम्बन्ध्यवमशेषं यद्गुणं येन गुणमेकोनं भूदिनभक्तं शुध्यति वाऽवमशेषं यद्गुणं रविभगणोनं भूदिनभक्तं शुध्यति । वाऽवमशेषं यद्गुणं चन्द्रभगणोनं भूदिनभक्तं शुध्यति। वाऽवमशेषं यद्गुणं व्येकं चान्द्रैश्चान्द्रदिनैर्भक्तं शुध्यति। अथेयं वक्ष्यमाणा तेषां प्रश्नानामुक्तिरुत्तरोक्तिरिति ॥ ९२ ॥

अथादौ प्रथमप्रश्नोत्तरमाह ।

इषुशरकृताष्टदिग्भिः १०८४५५
सङ्गुणितादवमशेषकाद्भक्तात् ।
रूपाष्टवेदरसशू-
न्यशरगुणै-३५०६४८१ र्दिनगणः शेषम् ॥९३॥ (९४)

अवमशेषादिषुशरकृताष्टदिग्भिः १०८४५५ सङ्गुणितात् रूपाष्टवेदरसशून्यशरगुणै-३५०६४८१ र्भक्ताच्छेषं दिनगणोऽहर्गणो भवति ।

अत्रोपपत्तिः । कल्पदृढावमानि दिनगणगुणानि दृढावमशेषोनानि कल्पदृढकुदिनहृतानि फलं निरग्रं गतावमानि । अतो दृढकल्पावमानि भाज्यं दृढावमशेषमृणक्षेपं दृढकल्पकुदिनानि हारं प्रकल्प्य यो गुणः सोऽहर्गणः स्यात् । तत्र लाघवार्थमाचार्येण रूपशुद्धौ अरशरवेदाष्टपङ्क्तिमितः स्थिरकुट्टकः कृतः । रूपाष्टवेदादि – संख्या कल्पदृढकुदिनानि तदानयनं च ।

$$\frac{\text{कअ}}{\text{ककुदि}} = \frac{२५०८२५५००००}{१५७७९१६४५००००} = \frac{५०००० \times ५०१६५१}{५०००० \times ३१५५८३२९}$$

$$= \frac{५०००० \times ९ \times ५५७३९}{५०००० \times ९ \times ३५०६४८१} = \frac{५५७३९}{३५०६४८१} = \frac{\text{दृअवि}}{\text{दृकुदि}}$$

अथ प्रसङ्गाद्दृढरविभगणकुदिनानयनं प्रदर्श्यते ।

$$\frac{\text{करभ}}{\text{ककुदि}} = \frac{४३२००००००}{१५७७९१६४५००००} = \frac{५०००० \times ८६४००}{५०००० \times ३१५५८३२९}$$

$$= \frac{५०००० \times ९ \times ९६००}{५०००० \times ९ \times ३५०६४८१}$$

$$= \frac{\text{५०००० × ६ × ३ × ३२००}}{\text{५०००० × ६ × ३ × ११६८८२७}} = \frac{\text{३२००}}{\text{११६८८२७}} = \frac{\text{दृरभ}}{\text{दृकुदि}} \text{ ।}$$

एवम्

$$\frac{\text{चकभ}}{\text{ककुदि}} = \frac{\text{५७७५३३००००००}}{\text{१५०७९१६४५००००}} = \frac{\text{५०००० × ११५५०६६}}{\text{५०००० × ३१५५८३२९}}$$

$$= \frac{\text{५०००० × ३ × ३८५०२२}}{\text{५०००० × ३ × १०५१९४४३}} = \frac{\text{३८५०२२}}{\text{१०५१९४४३}} = \frac{\text{दृचभ}}{\text{दृकुदि}} \text{ ।}$$

इदानीमवमशेषाद्द्युगणानयनमाह ।

जिनरसगोऽब्धिरद–३२४९६२४ गुणात्
शशिवसुकृतरसखभूतराम ३५०६४८१ हृतात् ।
इष्टावमशेषाद्यत्
शेषं रविभगणशेषं तत् ॥ ६४ ॥ (६५)

स्पष्टार्थम् ।

अत्रोपपत्तिः ।

अत्र पूर्वप्रकारेणाहर्गणः = १०८४५५क्षशे − ३५०६४८१इ । अयं रवि-दृढभगणगुणस्तद्दृढकुदिनगुणो जातो रविभगणात्मकः

$$= \frac{\text{३२००} \times \text{१०८४५५क्षशे} - \text{३२००} \times \text{३५०६४८१इ}}{\text{११६८८२७}}$$

$$= \frac{\text{३४७०५६००० क्षशे}}{\text{११६८८२७}} - \text{३२००} \times \text{३इ}$$

$$= \frac{\text{१०८३२०८ क्षशे}}{\text{११६८८२७}} + \text{९६ क्षशे} - \text{९६०० इ}$$

अतो दृढभगणशेषम् = १०८३२०८क्षशे − ११६८८२७$इ_1$ । आचा-र्येण गुणहरौ त्रिभिः सङ्गुण्य दृढक्षयशेषसम्बन्धिदृढकुदिनहरे रवेर्भगणशे-षम् = ३२४९६२४क्षशे − ३५०६४८१ $इ_1$ । इदं साधितमत इदं सर्वदा त्रिभिरपवर्त्यं तदा वास्तवमर्कदृढभगणशेषं ज्ञेयम् । यद्याचार्यानीतं भग-णशेषं त्रिभिर्नापवर्त्यं तदा प्रश्नः खिलो ज्ञेय इति सुगणकैर्भृशं विचि-न्त्यम् ॥ ६४ ॥

इदानीमवमशेषात् तिथ्यानयनं करोति ।

गोऽगेन्दुखेश-११०१७९ गुणिताद्-

भक्ताम्नखपञ्चयमरसेषुगुणैः ३५६२२२० ।

शेषमवमावशेषात्

तिथयोऽवमशेषकाद्धिकलम् ॥ ९५ ॥ (९६)

अवमशेषकाद्विकलं वर्त्तमानतिथेर्भुक्तं मानं साध्यम् । शेषं स्पष्टम् ।

अत्रोपपत्तिः । चान्द्रेभ्यो यान्यवमानि यच्च तच्छेषं तान्यवमानि तदेव शेषं च सावनेभ्य इति 'सावनान्यवमानि स्युश्चान्द्रेभ्यः साधितानि चेत्'–इत्यादिमिताक्षरायां स्वगोलाध्याये भास्करेण स्फुटीकृतम् । अतो गतचन्द्रदिनैः कल्पावमानि गुणानि कल्पचन्द्रदिनैर्भक्तानि फलं गतवमानि शेषं क्षयशेषम् ।

$$\text{अतः}\quad \frac{\text{इचादि}\times\text{कक्षादि} - \text{क्षशे}}{\text{कचादि}}\quad \text{। अयमभिन्नः ।}$$

अतः क्षयदिनानि भाज्यं क्षयशेषमृणक्षेपं चान्द्रदिनानि हारं प्रकल्प्य यः कुट्टकः साध्यते तान्येव चान्द्रदिनानि गततिथयो भवन्ति । तत्राचार्येण लाघवार्थं रूपविशुद्धौ स्थिरकुट्टकः साधितः स एवावमशेषगुणकः पठितः । अथ दृढावमचन्द्रदिनज्ञानार्थं न्यासः ।

$$\frac{\text{कक्षदि}}{\text{कचादि}} = \frac{\text{२५०८२५५००००}}{\text{१६०२९९९००००००}} = \frac{\text{५०००० × ५०१६५१}}{\text{५०००० × ३२०५९९८०}}$$

$$= \frac{\text{५०००० × ९ × ५५७३९}}{\text{५०००० × ९ × ३५६२२२०}} = \frac{\text{५५७३९}}{\text{३५६२२०}} = \frac{\text{दृक्षदि}}{\text{दृचादि}}$$

अतो दृढचान्द्रदिनान्येव हर इति सर्वं स्फुटम् । गणितागतमवमशेषम् ५०००० × ९ अनेन विभज्य लब्धमत्र दृढावमशेषं सुधीभिर्ज्ञेयमिति ।

९१ आर्यायामन्ये येऽवशिष्टाः प्रश्नास्तेषामुत्तराणि क्षयशेषादहर्गणमानीय ततोऽहर्गणात् कार्याणि । ९२ आर्यायां च ये प्रश्नास्तेषामुत्तराणि कुट्टकविधिना स्फुटानि । आचार्येणापीह स्फुटत्वात् तेषामुत्तराणि नोक्तानीति ॥ ९५ ॥

Digitized by Google

इदानीं पुनः प्रश्नान्तरं तदुत्तरं चाह ।

भागकलाविकलैक्यं दृष्ट्वा विकलान्तरं च के शेषे ।
ऐक्यं द्विधाऽन्तराधिकहीनं च द्विभाजितं शेषे ॥ ९६ ॥ (९७)

भागविकलं भागशेषम् । कलाविकलं कलाशेषम् । अनयोरैक्यं तथाऽनयोर्विकलयोः शेषयोरन्तरं च दृष्ट्वा शेषे ते तु के स्त इति प्रश्नः । अथ तदुत्तरमाहैक्यमिति ।

ऐक्यं द्विधा स्थाप्यमन्तरेणैकत्राधिकमन्यत्र हीनं कार्यं ततो द्विभाजितं दलितं शेषे भवतः ।

अत्रोपपत्तिः । सङ्क्रमणगणितेन स्फुटा ॥ ९६ ॥

इदानीं पुनः प्रश्नान्तरं तदुत्तरं चाह ।

तद्वर्गान्तरमाद्ये तदन्तरं चान्तरोद्धृतयुतोनम् ।
वर्गान्तरं विभक्तं द्वाभ्यां शेषे ततो द्युगणः ॥ ९७ ॥ (९८)

आद्येऽनन्तरोक्ते प्रश्ने यदि तयोः शेषयोर्वर्गान्तरं तथा तयोरन्तरं चोद्दिष्टं भवेत् तदा वर्गान्तरमन्तरेणोद्धृतं लब्धं चान्तरेण युतमूनं च कार्यम् । ततो द्वाभ्यां विभक्तं शेषे भवतः । ततो भागकलाशेषाभ्यां प्रागवत् कुट्टकविधिनाऽहर्गणः साध्यः ।

अत्रोपपत्तिः । विषमकर्मणा स्फुटा ॥ ९७ ॥

अत्र कोलब्रूकानुवादानुसारेणार्यात्रुटिः सा च ।

(कृतिसंयोगाद्द्विगुणाद्युतिवर्गं प्रोह्य शेषमूलं यत् ।
तेन युतोनो योगो दलितः शेषे पृथगभीष्टे ॥ ९८ ॥) (९९)

एवं भवितुमर्हति ।

यदाऽनन्तरोक्ते प्रश्ने शेषयोर्वर्गयोगः शेषयोगश्चोद्दिष्टो भवेत् तदा द्विगुणात् कृतिसंयोगाच्छेषयोर्युतिवर्गं प्रोह्य शेषस्य यन्मूलं भवेत् तद्भागकलाशेषयोरन्तरं भवेत् तेन योगो युतोनो दलितः पृथगभीष्टे भागकलयोः शेषे भवतः ।

अत्रोपपत्तिः । अत्र प्रश्नानुसारेण ।

भाशे² + कशे² = वयु

$$\text{भाशे} + \text{कशे} = \text{यु}$$

$$\therefore\ २\ \text{भाशे}^{२} + २\ \text{कशे}^{२} = २\ \text{वयु}$$

$$\text{भाशे}^{२} + २\text{भाशे} \times \text{कशे} + \text{कशे}^{२} = \text{यु}^{२}$$

द्वयोरन्तरेण

$$\text{भाशे}^{२} - २\text{भाशे} \times \text{कशे} + \text{कशे}^{२}$$

$$= (\text{भाशे} - \text{कशे})^{२} = २\ \text{वयु} - \text{यु}^{२}$$

$$\therefore\ \text{भाशे} - \text{कशे} = \sqrt{२\ \text{वयु} - \text{यु}^{२}}$$

अवशिष्टोपपत्तिः सङ्क्रमणेन स्फुटा ॥ ९८ ॥

इदानीं पुनः प्रश्नान्तरस्योत्तरमाह ।

शेषवधाद्द्विकृतिगुणात् शेषान्तरवर्गसंयुतान्मूलम् ।
शेषान्तरोनयुक्तं दलितं शेषे पृथगभीष्टे ॥ ९९ ॥ (१००)

यदाऽनन्तरोक्ते प्रश्ने भागकलाशेषयोरन्तरं वधश्चेति द्वयमुद्दिष्टं भवेत् तदा द्विकृतिगुणात् । द्वयोर्या कृतिर्वर्गस्तेनार्थाद्द्वे-४ गुणाच्छेषवधाच्छेषान्तरवर्गसंयुतान्मूलं ग्राह्यम् । तच्छेषान्तरेणोनं युतं दलितं च पृथगभीष्टे भागकलाशेषे भवतः ।

अत्रोपपत्तिः । अत्र प्रश्नानुसारेण

$$\text{भाशे} - \text{कशे} = \text{अं}$$

$$\text{भाशे} \times \text{कशे} = \text{व}$$

$$\therefore\ (\text{भाशे} - \text{कशे})^{२} = \text{भाशे}^{२} - २\ \text{भाशे} \times \text{कशे} + \text{कशे}^{२} = \text{अं}^{२}$$

$$४\ \text{भाशे} \times \text{कशे} = ४\ \text{व}$$

द्वयोर्योगेन

$$\text{भाशे}^{२} + २\ \text{भाशे} \times \text{कशे} + \text{कशे}^{२} = (\text{भाशे} + \text{कशे})^{२} = \text{अं}^{२} + ४\ \text{व}$$

मूलग्रहणेन, $\text{भाशे} + \text{कशे} = \sqrt{\text{अं}^{२} + ४\ \text{व}}$

शेषवासना सङ्क्रमणेन स्फुटा ॥ ९९ ॥

इदानीं छात्रानुपदेशयति ।

***इदिघात्रममी प्रश्नाः प्रश्नानन्यान् सहस्रशः कुर्यात् ।**

* दृन्मात्रममी प्रश्नाः-इति पाठः साधुः ।

अन्यैर्दत्तान् प्रश्नानुक्त्यैवं साधयेत् करणैः ॥ १०० ॥ (१०१)

अमी पूर्वोक्ताः प्रश्नाश्छात्राणां हृन्मात्रं हृदये बोधार्थमात्रमेव मया लिखिताः । एतान् बुद्ध्वा बुद्धिमान् सहस्रशोऽन्यान् प्रश्नान् कुर्यात् । एवमुक्त्या पूर्वोक्तया करणैः साधनप्रकारैश्चान्यैर्दत्तान् प्रश्नानपि बुद्धिमान् साधयेत् प्रश्नोत्तराणीति शेषः ॥ १०० ॥

इदानीं प्रश्नप्रशंसामाह ।

जनसंसदि दैवविदां तेजो नाशयति भानुरिव भानाम् ।
कुट्टाकारप्रश्नैः पठितैरपि किं पुनः शत*शः ॥ १०१ ॥ (१०२)

गणकः कुट्टाकारप्रश्नैः पठितैरपि जनसंसदि गणकजनसभायां दैवविदां ज्योतिर्विदां तेजो नाशयति भानां भानुरिव । पुनः सूत्रैः किं वक्तव्यमस्ति । प्रश्नपाठैरेव गणको ज्योतिर्विदां मध्ये भानुरिव भवति तत्सूत्रज्ञानेन पुनः किं भवतीति वर्णनातीतमित्यर्थः ॥ १०१ ॥

इदानीमध्यायोपसंहारमाह ।

प्रतिसूत्रममी प्रश्नाः
पठिताः सोद्देशकेषु सूत्रेषु ।
आर्यात्र्यधिकशतेन च
कुट्टश्चाष्टादशोऽध्यायः ॥ १०२ ॥ (१०३)

इति श्रीब्राह्मस्फुटसिद्धान्ते कुट्टकाध्यायोऽष्टादशः ॥ १८ ॥

प्रतिसूत्रं मयाऽमी प्रश्नाः पठिताः । एवं सोदाहरणेषु सूत्रेषु आर्यात्र्यधिकशतेनायं कुट्टकनामाऽध्यायोऽष्टादशः ।

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितः कुट्टविधौ सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्त-
नूतनतिलके कुट्टकाध्यायोऽष्टादशः ॥ १८ ॥

---

* सूत्रैः–इति पाठः साधुः ।

Digitized by Google

अथ शङ्कुच्छायादिज्ञानाध्यायः ॥

तत्रादौ प्रश्नानाह ।

दृष्ट्वा दिनार्धघटिका योऽर्कज्ञोऽत्रांशकान् विजानाति ।
उदयान्तरघटिकाभिर्ज्ञाताज्ज्ञेयं स तन्त्रज्ञः ॥ १ ॥

योऽर्कज्ञो दिनार्धघटिका दृष्ट्वाऽत्रांशकान् विजानाति । एकग्रहस्योदयाद्यावतीभिर्घटिकाभिरन्यो ग्रह उदेति ता उदयान्तरघटिकास्ताभिर्द्वयोर्ग्रहयोर्मध्ये यो ज्ञातो ग्रहोऽस्ति तस्माज्ज्ञातादपरं ज्ञेयं ग्रहं वा यो विजानाति स एव तन्त्रज्ञः सिद्धान्तविद्याविदित्यहं मन्य इति शेषः ॥ १ ॥

इदानीमन्यान् प्रश्नानाह ।

अस्तान्तरघटिकाभिर्यो ज्ञाताज्ज्ञेयमानयति तस्मात् ।
मध्यगतिं युगभगणानानयति ततः स तन्त्रज्ञः ॥ २ ॥

एकग्रहस्यास्तानन्तरमन्यो ग्रहो यावतीभिर्घटिकाभिरस्तं याति ता अस्तान्तरघटिकास्ताभिर्ज्ञाताच्चैकस्माद्ग्रहादन्यं ज्ञेयं ग्रहं य आनयति । तस्मात् स्पष्टज्ञेयग्रहात् मध्यमगतिं मध्यम ज्ञेयं ग्रहं य आनयति । ततस्तस्मान्मध्यमज्ञेयाद्युगभगणान् तस्य य आनयति स एव तन्त्रज्ञ इति ॥ २ ॥

इदानीमन्यान् प्रश्नानाह ।

आनयति यस्तमोरविशशाङ्कमानानि दीपकशिखौच्च्यात् ।
शङ्कुतलान्तरभूमिज्ञाने छायां स तन्त्रज्ञः ॥ ३ ॥

यो राहुरविचन्द्रबिम्बमानान्यानयति । दीपकशिखौच्च्यात् प्रदीपोच्छ्रितेः शङ्कुतलान्तरभूमिज्ञाने प्रदीपतलाच्छङ्कुमूलान्तरं शङ्कुतलान्तरम् । तदेव भूमिरिति शङ्कुतलान्तरभूमिस्तस्या ज्ञाने यश्छायामानयति स एव तन्त्रज्ञः ॥ ३ ॥

इदानीमन्यं प्रश्नमाह ।

इष्टगृहौच्च्यज्ञो यस्तदन्तरज्ञो निरीक्ष्यते तु जले ।

गृहभित्त्यग्रं दर्शयति दर्पणे वा स तत्त्वज्ञः ॥ ४ ॥

य दृष्टगृहोच्च्यज्ञ आत्मस्थानात् तस्य गृहस्यान्तरज्ञश्च जले गृह-भित्त्यग्रं निरीक्ष्यते वा दर्पणे तदग्रं दर्शयति स एव तत्त्वज्ञः ॥ ४ ॥

इदानीमन्यं प्रश्नमाह ।

छायाद्वितीयभागान्तरविज्ञानेन वेत्ति दीपोच्चयम् ।
शङ्कुच्छायाज्ञो वा भूमेश्छायां स तत्त्वज्ञः ॥ ५ ॥

यः शङ्कुच्छायाज्ञः |(शङ्कोर्ये द्वे छाये ते जानातीति शङ्कुच्छाया-ज्ञः) छायाद्वितीयभागान्तरविज्ञानेन छायायाः प्रथमच्छायाया द्वितीय-भागस्य द्वितीयच्छायाया यदन्तरं तस्य विज्ञानेन दीपोच्च्यं वेत्ति वा भूमेर्भूमिमानाच्छायां वेत्ति स एव तत्त्वज्ञः ॥ ५ ॥

? दृष्ट्वा गृहतलान्तरजाम्भोदृष्ट्वाग्रं गृहस्य भूमिज्ञः ।
वेत्ति गृहोच्च्यं दृष्ट्वा तैलस्थं वा स तत्त्वज्ञः ॥ ६ ॥

(गृहपुरुषान्तरसलिले यो दृष्ट्वाऽग्रं गृहस्य भूमिज्ञः ।
वेत्ति *गृहोच्च्यं दृष्ट्वा तैलस्थं वा स तत्त्वज्ञः ॥ ६ ॥

पुरुषो द्रष्टा । गृहपुरुषयोरन्तरे मध्ये स्थापितं यत् सलिलं जलं तस्मिन् गृहस्याग्रं दृष्ट्वा यो भूमिज्ञो जले यत्र गृहाग्रस्य प्रतिबिम्बं तस्मा-द्गृहान्तरं नरान्तरं च यत् तद्भूमिपदेनोच्यते तज्ज्ञो गृहोच्च्यं वेत्ति वा तैलस्थं गृहाग्रं दृष्ट्वा यो भूमिज्ञो गृहोच्च्यं वेत्ति स एव तत्त्वज्ञ इत्यहं मन्ये ॥ ६ ॥

इदानीमन्यं प्रश्नमाह ।

वीक्ष्य गृहाग्रं सलिले प्रसार्य सलिलं पुनः स्वभूज्ञाने ।
आनयति जलाद्भूमिं गृहस्य वोच्च्यं स तत्त्वज्ञः ॥ ७ ॥

सलिले गृहाग्रं वीक्ष्य सलिलं च तस्मिन्नेव मार्गे स्थानान्तरे प्रसार्य पुनस्तस्मिन् सलिले गृहाग्रं वीक्ष्यात्मसलिलान्तरे ये वेधद्वये ते स्वभूसंज्ञे तयोर्ज्ञाने जलाद्गृहस्यान्तरं भूमिं य आनयति वा गृहस्योच्च्यं य आन-यति स एव तत्त्वज्ञ इत्यहं मन्ये ॥ ७ ॥

* अयं पाठः साधुः ।

Digitized by Google

इदानीमन्यं प्रश्नमाह ।

ज्ञातैश्छायापुरुषैर्विज्ञाते तोयकुड्ययोर्विवरे ।
कुड्येऽर्कतेजसो यो वेत्त्यारूढिं स तन्त्रज्ञः ॥ ८ ॥

तोयकुड्ययोर्जलभित्त्योर्विवरेऽन्तरे विज्ञाते छायापुरुषैर्ज्ञातैः पुरुषस्योच्छ्रित्या जले तच्छायामानेन च य आरूढिं भित्त्युच्छ्रितिं वेत्ति वाऽर्कतेजसोऽर्कप्रकाशतश्छायाविज्ञानं विज्ञायारूढिं वेत्ति स एव तन्त्रज्ञ इत्यहं मन्ये ॥ ८ ॥

अथोत्तराणि ।

तत्रादौ प्रथमप्रश्नोत्तरमाह ।

इष्टदिवसार्धघटिका घटिकापञ्चदशान्तरप्राणाः ।
तद्दिवसचरप्राणास्तैरर्कं साधयेत् प्राग्वत् ॥ ९ ॥

(इष्टदिवसार्धघटिकापञ्चदशान्तरघटीभवाः प्राणाः ।
तद्दिवसचरप्राणास्तैरर्कं *साधयेत् प्राग्वत् ॥ ९ ॥

पञ्चदशेष्टदिनार्धान्तरघटीनां ये प्राणास्ते गोलयुक्त्या चरप्राणा भवन्ति । तैश्चरासुभिरर्कात् क्रान्तिज्ञानेन च प्राग्वत् त्रिप्रश्नोत्तराध्यायविधिना गणकोऽर्कमक्षांशान् साधयेत् ॥ ९ ॥

इदानीमुदयान्तरघटिकाभिस्तथास्तान्तरघटिकाभिरित्यादिप्रश्नद्वयस्योत्तरमाह ।

ज्ञातज्ञेयग्रहयोरुदयान्तरनाडिकाभिरधिकोनः ।
उदयैर्ज्ञातो ज्ञाताज्ज्ञेयः प्रागपरयोर्ज्ञेयः ॥ १० ॥
ज्ञातः सभार्ध उदयैरस्तान्तरनाडिकाभिरधिकोनः ।
ज्ञातात् पूर्वापरयोर्ज्ञेयो भार्धोनके ज्ञेयः ॥ ११ ॥

ज्ञातज्ञेयग्रहयोर्या उदयान्तरघटिकास्ताभिरुदयैः स्वदेशोदयैर्ज्ञातात् प्रागपरयोः पूर्वपश्चिमयोर्ज्ञातोऽधिकोनः कार्यः । यदि ज्ञेयो ज्ञातात् पूर्वदिश्यर्थोदये तदा ज्ञातमर्कं प्रकल्प्य स्वदेशोदयैरुदयान्तर-

* अयं पाठः साधुः ।

घटीमितेष्टे क्रमलग्नं ज्ञातात् पश्चिमस्थे च ज्ञेये विपरीतलग्नं यत् स एव स्फुटो ज्ञेयो ग्रहो ज्ञेयः । अस्तान्तरघटीज्ञाने च ज्ञातः सभार्धोऽर्कः कल्प्यः । अस्तान्तरघटिका इष्टघटिकाः । अत्रापि ज्ञातात् पूर्वेऽपि ज्ञेये क्रमलग्नं पश्चिमस्थे च विपरीतलग्नं यत् तस्मिन् भार्धोनके सति ज्ञेयो ग्रहो भवतीति ।

अत्र वासना लग्नानयनवत् सुगमा ॥ १०–११ ॥

इदानीं तस्मान्मध्यगतिं ततो युगभगणानानयति य इत्यस्योत्तरमाह ।

ज्ञातं कृत्वा मध्यं भूयोऽन्यदिने तदन्तरं भुक्तिः ।
त्रैराशिकेन भुक्त्या कल्पग्रहमण्डलानयनम् ॥ १२ ॥

एवं स्फुटज्ञेयग्रहात् स्पष्टीकरणविलोमविधिना मध्यं ग्रहं ज्ञातं कृत्वा भूयः पुनरन्यदिने च मध्यं ग्रहं ज्ञातं कृत्वा तदन्तरं तयोरन्तरं कार्यमेवं ग्रहस्य मध्यमा भुक्तिर्भवेत् । ततो भुक्त्या त्रैराशिकेनैकस्मिन् दिने मध्यमा गतिस्तदा कल्पकुदिनैः किमिति त्रैराशिकेन कल्पग्रहभगणानयनं सुगममिति ॥ १२ ॥

इदानीमानयति यस्तमोरविशशाङ्कमानानीत्यस्योत्तरमाह ।

स्थित्यर्धाद्विपरीतं तमःप्रमाणं स्फुटं ग्रहणे ।
मानोदयाद्रवीन्द्वोर्घटिकावयवेन भोदयतः ॥ १३ ॥

स्थित्यर्धाद्विपरीतं विपरीतविधिना ग्रहणे स्फुटं तमःप्रमाणं भूभाबिम्बप्रमाणं भवति । अत्रैतदुक्तं भवति । स्थित्यर्धं रविचन्द्रगत्यन्तरकलागुणं षष्टिहृतं स्थित्यर्धकला भवन्ति । तद्वर्गाच्छरवर्गयुतान्मूलं मानैक्यार्धकलास्ताभ्यश्चन्द्रबिम्बार्धं प्रोह्य भूभाबिम्बार्धम् । एवं विपरीतक्रमेण ज्ञेयमिति । मानोदयाद्घटिकावयवेन भोदयतः स्वदेशराश्युदयतो रवीन्द्वोर्बिम्बमाने ज्ञेये । यदा प्राक् क्षितिजे बिम्बोर्ध्वपालिदर्शनं जातं ततोऽनन्तरं यावता घटिकावयवेनाधःपालिदर्शनं जातं स घटिकावयवो वेधेन ज्ञेयः । ततः स्वदेशराश्युदयघटीभिरष्टादशशतकलास्तदा वेधोपलब्धघटिकावयवेन किमेवं बिम्बकला रवेश्चन्द्रस्य च भवन्तीति ।

रविबिम्बस्योर्ध्वाधःप्रदेशौ यत्र क्रान्तिवृत्ते लग्नौ तयोर्दर्शनेनैवं बिम्बकला भवन्ति । चन्द्रश्च त्रिमण्डले भ्रमति तेनैव चन्द्रबिम्बकलाः स्वल्पान्तराद्भवन्ति ॥ १३ ॥

इदानीं दीपशिखौच्च्यात् शङ्कुतलान्तरभूमिज्ञाने छायां च आनयतीत्यस्योत्तरमाह ।

दीपतलशङ्कुतलयोरन्तरमिषुप्रमाणशङ्कुगुणम् ।
दीपशिखौच्च्याच्छङ्कुं विशोध्य शेषोद्धृतं छाया ॥१४॥

गणिताध्यायस्य ५३ आर्ययमतस्तत्रैव स्फुटा ॥ १४ ॥

इदानीं छायाद्वितीयभायान्तरविज्ञानेनेत्यादिप्रश्नोत्तरमाह ।

शङ्क्वन्तरेण गुणिता छाया छायान्तरेण भक्ता भूः ।
सच्छाया शङ्कुगुणा दीपौच्च्यं छायया भक्ता ॥ १५ ॥

छायेष्टस्य कस्यापि शङ्कोश्छाया शङ्क्वोरन्तरेण शङ्कुमूलान्तरेण गुणिता छाययोरन्तरेण भक्ता भूर्भवति । सा सच्छाया छायया सहिता शङ्कुगुणा छायया भक्ता च दीपौच्च्यं भवति ।

अत्रोपपत्तिः ।



तशि = दीपौच्च्यम् । $\text{अ}_1 \text{श}_1 = \text{अ}_2 \text{श}_2$ = शङ्कुप्रमाणम् ।

$\text{श}_1 \text{भा}_1$ = प्रथमशङ्कुच्छाया । $\text{श}_2 \text{भा}_2$ = द्वितीयशङ्कुच्छाया । } $\text{श}_2 \text{भा}_2 - \text{श}_1 \text{भा}_1$ = छाअं

$\text{श}_1 \text{श}_2$ = शङ्क्वन्तरम् = शअं

$\text{भा}_1 \text{भा}_2$ = छायायान्तरम् = भायाअं

$$= \text{श}_2\,\text{भा}_2 - (\text{श}_1\,\text{भा}_1 - \text{श}_1\,\text{श}_2)$$

$$= \text{श}_2\,\text{भा}_2 - \text{श}_1\,\text{भा}_1 + \text{श}_1\,\text{श}_2$$

$$= \text{छा अं} + \text{श अं}$$

ततो गणिताध्यायस्य ५४ सूत्रेण

$$\frac{(\text{छा अं} + \text{श अं})}{\text{छा अं}}\,\frac{\text{श}_1\,\text{भा}_1}{} = \text{तभा}_1$$

$$\therefore \quad \text{श}_1\,\text{त} = \text{तभा}_1 - \text{श}_1\,\text{भा}_1 = \frac{(\text{छा अं} + \text{श अं})\,\text{श}_1\,\text{भा}_1 - \text{छा अं}\cdot\text{श}_1\,\text{भा}_1}{\text{छा अं}} \text{ ।}$$

$$= \frac{\text{श अं}\cdot\text{श}_1\,\text{भा}_1}{\text{छा अं}} \text{ ।}$$

अत्राचार्येण तश$_1$ मानमेव भूसंज्ञं कल्पितमित्युपपन्नम् । द्वितीयच्छायाग्रहणेन द्वितीया भूर्भवति । इयं भूः सच्छाया तदा छायाव्यवहारस्य ५४ सूत्रीया भूर्भवति ततो दीपौच्च्यं प्राग्वदिति । अत उपपन्नम् ॥ ५५ ॥

इदानीं छायातो गृहादीनामौच्च्यमाह ।

ज्ञात्वा शङ्कुच्छायामनुपातात् साधयेत् समुच्छ्रायान् ।
गृहचैत्यतरुनगानामौच्च्यं विज्ञाय वा छायाम् ॥ १६ ॥

शङ्कुच्छायां ज्ञात्वाऽनुपाताद्गृहचैत्यतरुपर्वतानां समुच्छ्रायान् गणकः साधयेत् । वा तेषामौच्च्यं विज्ञाय तेषामिष्टकाले छायां साधयेत् । इष्टकाले गृहादीनां छायाप्रमाणं ज्ञात्वा तदैवेष्टशङ्कोश्च छायाप्रमाणं विज्ञाय शङ्कुच्छायया शङ्कुप्रमाणं तदा गृहादिच्छायया किम् । एवं गृहादीनामौच्च्यं भवति । औच्च्याच्चैवमनुपातेन गृहादीनां छायां साधयेत् ॥ १६ ॥

इदानीमिष्टगृहोच्च्यज्ञो य इत्यादिप्रश्नोत्तरमाह ।

युतदृष्टिगृहौच्च्यहृता अन्तरभूमिर्दृगौच्च्यसङ्गुणिता ।
फलभूर्न्यस्ते तोये प्रतिरूपाग्रं गृहस्य नरात् ॥ १७ ॥

गृहस्य नरस्य च मध्ये याऽन्तरभूमिः सा दृगौच्च्येन दृगुच्छ्रित्या सङ्गुणिता युतदृष्टिगृहोच्च्यहृता दृगुच्छ्रितिसंयुतगृहोच्छ्रित्या हृता ।

Digitized by Google

यत् फलं प्राप्तं तन्मिता भूर्नराद्गृहाभिमुखी या तत्र तोये जले न्यस्ते तस्मिन् गृहस्य प्रतिरूपाग्रमग्रस्य प्रतिबिम्बं दृश्यं भवेदिति ।

अत्रोपपत्तिः । गृ न=गृहनरान्तरभूमिः=अ क । गृ उ=गृहोच्च्यम् ।



प = जलम् । न दृ = दृगौच्च्यम् ।
तदा ज्योतिर्विद्यया गृहाग्रप्रतिबिम्बं चेद् दृ – दृष्ट्या दृश्यं तदा

∠ गृ प उ = ∠ न प दृ ।

अतः गृ उ = गृ अ = न क ।

दृ क = न दृ + गृ उ । दृ अ क, दृ प न त्रिभुजे च सजातीये ।

ततः प न = $\frac{\text{अक} \times \text{दृन}}{\text{दृक}}$ । अत उपपन्नम् ॥ १७ ॥

इदानीं गृहपुरुषान्तरसलिले यो दृष्ट्वाऽग्रमित्यादिप्रश्नोत्तरमाह ।

गृहपुरुषान्तरसलिले वीक्ष्य गृहाग्रं दृगौच्च्यसङ्गुणितम् ।
गृहतोयान्तरमौच्च्यं गृहस्य नृजलान्तरेण हृतम् ॥ १८ ॥

गृहपुरुषयोर्मध्ये यत् सलिलं स्थापितं तस्मिन् गृहाग्रं वीक्ष्य यदि गृहोच्च्यमपेक्षितं तदा गृहतोयान्तरं दृगौच्च्यसङ्गुणितं नृजलान्तरेण हृतं फलं गृहस्योच्च्यं भवेत् ।

अत्रोपपत्तिः । पूर्वश्लोकक्षेत्रे गृहतोयान्तरम् = गृप । नृजलान्तरम् = पन । पगृउ, दृनपत्रिभुजे च सजातीये ततः = गृउ = $\frac{\text{गृप} \times \text{नदृ}}{\text{पन}}$

अत उपपद्यते ॥ १८ ॥

इदानीं वीक्ष्य गृहाग्रं सलिले प्रसार्येत्यादिप्रश्नोत्तरमाह ।

प्रथमद्वितीयनृजलान्तरान्तरेणोद्धृता जलापसृतिः ।
दृष्ट्यौच्च्यगुणोच्छ्रायस्तोयान्नृजलान्तरगुणा भूः ॥ १९ ॥

यत्र प्रथमं जले गृहाग्रप्रतिबिम्बं नरेण दृष्टं तत्र यन्नृजलान्तरं तत् प्रथमं ज्ञेयम् । एवं द्वितीयं नृजलान्तरं जानीयात् । ततो जलापसृतिर्ज-

तयोरन्तरे भूमिः सा प्रथमद्वितीयनृजलान्तरयोरन्तरेणोद्धृता लब्धिर्द्विधा स्थाप्या । एकत्र दृगौच्च्यगुणा तदा गृहोच्छ्रायः स्यादन्यत्र नृजलान्तरेण गुणा तदा तोयाद्गृहतलपर्यन्तं भूर्भूमिः स्यात् ।

अत्रोपपत्तिः ।



अगृ = गृउ = गृहोच्च्यम् । ज_1, ज_2 प्रथमद्वितीयजलस्थाने । न_1, न_2 प्रथमद्वितीयनरस्थाने । यक = $\text{न}_1\text{दृ}_1 = \text{न}_2\text{दृ}_2$ = दृगौच्च्यम् । $\text{ज}_1\text{ज}_2$ = जलान्तरम् = जलापसृतिः । $\text{न}_1\text{न}_2 = \text{दृ}_1\text{दृ}_2$ = नरान्तरम् । द्वयोरन्तरम् = $\text{न}_1\text{न}_2 - \text{ज}_1\text{ज}_2 = \text{न}_1\text{न}_2 - (\text{ज}_1\text{न}_1 + \text{न}_1\text{ज}_2)$

$$= \text{न}_1\text{न}_2 - \text{न}_1\text{ज}_2 - \text{ज}_1\text{न}_1 = \text{ज}_2\text{न}_2 - \text{ज}_1\text{न}_1 \text{ ।}$$

$\text{अज}_1\text{ज}_2$, $\text{अदृ}_1\text{दृ}_2$ सजातीयत्रिभुजयोः क्रमेण अय, अक बहिर्लम्बः ।

$$\text{तेन } \frac{\text{अक}}{\text{अय}} = \frac{\text{दृ}_1\text{दृ}_2}{\text{ज}_1\text{ज}_2} \therefore \frac{\text{अक} - \text{अय}}{\text{अय}} = \frac{\text{कय}}{\text{अय}} = \frac{\text{दृ}_1\text{दृ}_2 - \text{ज}_1\text{ज}_2}{\text{ज}_1\text{ज}_2}$$

$$= \frac{\text{न}_1\text{न}_2 - \text{ज}_1\text{ज}_2}{\text{ज}_1\text{ज}_2} \text{ । ततः } \text{अय} = \frac{\text{दृगौ} \times \text{ज}_1\text{ज}_2}{\text{ज}_2\text{न}_2 - \text{ज}_1\text{न}_1} \text{ ।}$$

ततः $\text{यज}_1\text{उ}$, $\text{ज}_1\text{न}_1\text{दृ}_1$ सजातीयजात्ययोः

$$\text{यज}_1 = \frac{\text{ज}_1\text{न}_1 \cdot \text{ज}_1\text{ज}_2}{\text{ज}_2\text{न}_2 - \text{ज}_1\text{न}_1} \text{ । एवम् } \text{यज}_2 = \frac{\text{ज}_2\text{न}_2 \times \text{ज}_1\text{ज}_2}{\text{ज}_2\text{न}_2 - \text{ज}_1\text{न}_1}$$

अत उपपद्यते ॥ १९ ॥

इदानीमुपसंहृतिमाह ।

छायापुरुषच्छिन्नं जलकुड्यान्तरमवाप्तमारूढिः ।
अध्यायो विंशत्यार्याणामेकोनविंशोऽयम् ॥ २० ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते शङ्कुच्छायादिज्ञानं नामैकोनविंशोऽध्यायः ॥ १९ ॥

छायाया यः पुरुषः शङ्कुभागस्तेन जलभित्त्योरन्तरं भक्तमत्र यदवाप्तं सा भित्तेरार्कठिहच्छ्रुतिर्भवति । जलाद्यावताऽन्तरेण नरो भित्त्यग्रप्रतिबिम्बं जले पश्यति तदन्तरमेवात्र नरस्य छाया कल्प्या । अर्कतेजसो या भित्तेश्छाया साऽन्यप्रश्ने जलकुड्यान्तरं तदा नरस्य रवितेजसो या छाया सैव छाया ज्ञातव्या । (छायाव्यवहारस्य प्रथमश्लोकश्च छायापुरुषार्थं द्रष्टव्यः) शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । नरस्य छायया नरप्रमाणसमोच्छ्रितिस्तदा भित्तेश्छायया किमित्यनुपातेन भित्तेरुच्छ्रितिः स्फुटा ।

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।

हृदि तं विनिधाय नूतनोऽयं रचितो भादिविधौ सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्तनूतनतिलके शङ्कुच्छायादिज्ञानं नामैकोनविंशोऽध्यायः ॥ १९ ॥

Digitized by Google

अथ छन्दश्चित्युत्तराध्यायः ।

*कगवर्गाः पर्यायः समूहयोगावयुक्षु युग्मेषु ।
सो याः प्राग्वत् प्रासादाश्चतुष्कका शेषयुक्त्योन्त्यः ॥ १ ॥
एकादियुतविहीनावाद्यन्तौ तद्विपर्ययौ यावत् ।
वर्गादिषु विषमयुजां क्रमोत्क्रमाद्वर्धयेत् पादान् ॥ २ ॥
एकैकेन ह्रा ह्राः सोप्यप्यधिकेषु तत् प्रतिष्ठेषु ।
वर्गादिरमीषान्तः प्रस्तारो भवति यवमध्यः ॥ ३ ॥
न्यूनोन्त्यो द्विपदाग्रं त्रिपदाद्यानामधः पृथक् संख्या ।
तच्छेषोध्यो व्येकः पृथगन्ताद्रूपमूर्ध्वयुतम् ॥ ४ ॥
यावत् पादाव्येकागच्छाद्वर्णेष्वथैकवृद्धेषु ।
रूपाद्युतघाते वर्गाद्यानां परा संख्या ॥ ५ ॥
रूपाधिकपादार्धे विषमेषूर्ध्वः समेषु पादार्धे ।
अर्धाद्विगुणाव्येकांयुलान्यधस्तस्य सर्वेषाम् ॥ ६ ॥
माध्यैस्तथार्धहीनैः क्रमपादैर्व्यस्ततुल्यपादाद्यः ।
विषमेरव्येकं मध्ये प्रोह्याद्यान्यतः कुर्यात् ॥ ७ ॥
सैकक्रमतुल्याद्यैर्न्यासोऽभ्यधिको विशोधितश्चाधः ।
संख्यैक्यं तादृक् यादृक् प्रथमस्त्रिरहितो नष्टे ॥ ८ ॥
माध्यैः कृतैश्च दलितैः समसंख्यायां क्रमोत्क्रमात् त्र्येप्यम् ।
विषमायां व्येकायां दलं क्रमादुत्क्रमात्सैकम् ॥ ९ ॥
समसंख्यायां सोपानक्रमोत्क्रमाभ्यां तथैव विषमाभ्याम् ।
कल्प्या पचिते दृष्टे प्रथमः शेषाच्चराण्यन्ते ॥ १० ॥

* एतदध्यायस्थानां श्लोकानामभिप्राया बहुगुप्ततया प्राचीनसङ्केतस्यातिदुर्बोधतया च प्रकाशयितुमशक्या इति ये केचन संशोध्य तदभिप्रायान् प्रकाशयिष्यन्ति सुधीविभवं तत्परिश्रममुररीकरिष्यामीति ॥

समदलसमविषमाणां संख्यापादार्धसर्वकल्पवधः ।
स्वा द्यवधोऽन्यैः पादैः स्वपरस्य प्राग्वधः सैकैः ॥ ११ ॥
आद्यादनन्तरोऽधः कल्प्योऽन्यतुल्यमाद्यः प्राक् ।
न्यासो वर्गोऽन्योनः प्रस्तारोऽर्धसमविषमाणाम् ॥ १२ ॥
नष्टेन्स्यात् स्वाधस्थोनकल्पघातोऽर्धतुल्यविषमाणाम् ।
व्येकः पृथक् स्ववर्गीकृतः फलं तुल्यकल्यानाम् ॥ १३ ॥
उद्दिष्टे कल्पहृतेऽतोतैः प्रथमः फले सरूपेऽन्यः ।
असकृद्वर्गांशयुते सैके वार्धसमविषमाणाम् ॥ १४ ॥
कल्पेषु पृथक् गुरुलघुसंख्यैकादिभाजिता प्राग्वत् ।
विषमेष्वाद्यलघूना लघुभिर्मेरुः समादीनाम् ॥ १५ ॥
एकद्वितयोः परतो द्विसंगुणोऽनन्तराद्विरूपोऽधः ।
वर्गधराद्योनोदलसमविषमाणां ध्वजो लघुभिः ॥ १६ ॥
लघुसंख्या पददलिता परतोऽधोऽधश्च शुद्ध्यति हृता यैः ।
द्विगुणान्तैः शुद्धैर्वर्गपरैर्मन्दरो लघुभिः ॥ १७ ॥
कृत्वाधोऽधः कल्प्यान्येकाद्येकोत्तरानधस्तेषाम् ।
स्वात्परतोऽन्यैक्यमधः प्रस्ताराद्युक्तवदिहाद्यैः ॥ १८ ॥
गुरुलघुयेकानिघटीद्विगुणान्येकांगुलानि संख्या स्यात् ।
द्वाविंशतिरार्याणां छन्दश्चित्युत्तरोऽध्यायः ॥ १९ ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते छन्दश्चित्युत्तराध्यायो विंशतितमः ॥ २० ॥

अथ गोलाध्यायः ।

तत्रादौ गोलारम्भप्रयोजनमाह ।

ग्रहनक्षत्रभ्रमणं न समं सर्वत्र भवति भूस्थानाम् ।
तद्विज्ञानं गोलाद्यतस्ततो गोलमभिधास्ये ॥ १ ॥

भूस्थानां जनानां सर्वत्र ग्रहनक्षत्रभ्रमणं समं न भवति । तद्भ्रमणसंस्थानविज्ञानं च यतो गोलादेव भवति ततोऽहं गोलमभिधास्ये कथयामीति ॥ १ ॥

इदानीं भूगोलसंस्थानमाह ।

शशिबुधसितार्ककुजगुरुशनिकक्षावेष्टितो भकक्षान्तः ।
भूगोलः सत्त्वानां शुभाशुभैः कर्मभिरुपात्तः ॥ २ ॥

अयं भूगोलः सत्त्वानां प्राणिनां शुभाशुभैः कर्मभिरुपात्तः प्राप्तो भवति । 'भूमेः पिण्डः शशाङ्कज्ञकविरवि-इत्यादिभास्करोक्तमेतदनुरूपमेव । शेषं स्पष्टम् ॥ २ ॥

इदानीं देवासुरसंस्थानमाह ।

खे भूगोलस्तदुपरि मेरौ देवाः स्थितास्तले दैत्याः ।
खे भगणान्तःस्थावुपर्यधश्च ध्रुवौ तेषाम् ॥ ३ ॥

आकाशे भूगोलस्तदुपरि मेरुस्तत्र मेरावुपरि देवाः स्थिताः । तले मेरुतले कुमेरौ दैत्याः स्थिताः । तेषां देवदैत्यानां च आकाशे भगणान्तःस्थौ भगणान्तो ध्रुवयष्टिस्तदग्रस्थौ ध्रुवावुपर्यधश्च । देवानामुत्तरो ध्रुव उपरि दक्षिणोऽधो दैत्यानां दक्षिण उपरि उत्तरो ध्रुवश्चाध इति । 'सौम्यं ध्रुवं मेरुगताः खमध्ये'-इत्यादि भास्करोक्तमेतदनुरूपम् ॥ ३ ॥

इदानीं देवदैत्यानां भचक्रभ्रमणव्यवस्थामाह ।

ध्रुवयोर्बद्धं सव्यगममराणां क्षितिजसंस्थमुडुचक्रम् ।
अपसव्यगमसुराणां भ्रमति प्रवहानिलाक्षिप्तम् ॥ ४ ॥

स्पष्टम् । 'सव्यापसव्यं भ्रमदृक्षचक्रम्'—इत्यादि भास्करोक्तमेतदनुरूपमेव ॥ ४ ॥

इदानीं चक्रभ्रमणव्यवस्थामाह ।

अन्यत्र सर्वतो दिशमुन्नमति भपञ्जरो ध्रुवो नमति ।
लङ्कायामुडुचक्रं पूर्वापरगं ध्रुवौ क्षितिजे ॥ ५ ॥

अन्यच्च मेरुतोऽन्यत्र सर्वतो दिशं भूगोले भपञ्जरो भचक्रमुन्नमति ध्रुवश्च नमति । लङ्कायामुडुचक्रं भचक्रं पूर्वापरगं सममण्डलाकारं ध्रुवौ च क्षितिजे स्त इति । आचार्येण यथा यथा मेरुतो द्रष्टा सर्वतो दिशं याति तथा तथा ध्रुवो नमतीत्युक्तम् । भास्करेण लङ्कामेव मूलस्थानं प्रकल्प्य स्थितिः प्रतिपादिता । 'अतो निरक्षदेशे क्षितिमण्डलोपगौ ध्रुवौ नरः पश्यति दक्षिणोत्तरौ'इत्यादि भास्करोक्तमेतदनुरूपमेव ॥ ५ ॥

इदानीं देवादीनां रविभ्रमणस्थितिमाह ।

देवाः सव्यगमसुराः पश्यन्त्यपसव्यगं रविं क्षितिजे ।
विषुवति समपश्चिमगं निरक्षदेशस्थिताः पुरुषाः ॥ ६ ॥

विषुवति मेषतुलादौ देवाः क्षितिजे रविं सव्यगमसुरा अपसव्यगं निरक्षदेशस्थाः पुरुषाश्च समपश्चिमगं पश्यन्तीति प्रसिद्धम् ॥ ६ ॥

इदानीं देवदैत्यानां राशिसंस्थानमाह ।

सौम्यमपमण्डलार्धं मेषाद्यं सव्यगं सदा देवाः ।
पश्यन्ति तुलाद्यर्धं दक्षिणमपसव्यगं दैत्याः ॥ ७ ॥

देवाः सदा मेषाद्यं सौम्यमुत्तरं क्रान्तिमण्डलार्धं सव्यगं दैत्याश्च तुलादि क्रान्तिमण्डलार्धं दक्षिणमपसव्यगं पश्यन्ति ।

अत्रोपपत्तिः । गोलसंस्थानेन 'लम्बाधिका क्रान्तिरुदक् च यावत्'—इत्यादिभास्करविधिना स्फुटा ॥ ७ ॥

इदानीं देवादीनां रविदर्शनकालमाह ।

पश्यन्ति देवदैत्या रविवर्षार्धमुदितं सकृत् सूर्यम् ।
शशिगाः शशिमासार्धं पितरो भूस्था नराः स्वदिनम् ॥ ८ ॥

देवदैत्याः सकृदुदितं सूर्यं रविवर्षार्धं सौरवर्षदलपर्यन्तं शशिगाः शशिपृष्ठस्थाः पितरश्च शशिमासार्धं पर्यन्तं भूस्था नराश्च स्वदिनं स्वदिनमानपर्यन्तं पश्यन्ति ।

अत्रोपपत्तिः । भास्करगोलाध्यायतः स्फुटा ॥ ८ ॥

इदानीं भूगोले लङ्कावन्तीसंस्थानमाह ।

भूपरिधितुर्यभागे लङ्का भूमस्तकात् क्षितितलाच्च ।
लङ्कोत्तरतोऽवन्ती भूपरिधेः पञ्चदशभागे ॥ ९ ॥

भूमस्तको मेरुः क्षितितलश्च कुमेरुस्तस्माद्भूपरिधिचतुर्थभागेऽन्तरे दक्षिणदिशि लङ्का नाम नगरी । लङ्कोत्तरतश्च भूपरिधिपञ्चदशभागेऽवन्ती वर्त्तते । भास्करश्चाचार्यानुयायी 'निरक्षदेशात् क्षितिषोडशांशे भवेदवन्ती'-इति कथितवान् । तेनान्येषां मते 'षोडशे भागे' इत्यत्र पाठान्तरम् । चतुर्वेदाचार्यसम्मतः पाठश्च 'पञ्चदशभागे' अयमेव ॥ ९ ॥

इदानीं निरक्षस्वदेशान्तरयोजनान्याह ।

अक्षांशकुपरिधिवधान्मण्डलभागाप्तयोजनैर्विषुवत् ।
नतभागयोजनैरेवमुपरि सूर्योऽन्यदनुपातात् ॥ १० ॥

अक्षांशानां भूपरिधेश्च वधात् मण्डलभागैश्चक्रांशैर्भक्ताद्यान्यवाप्तानि तैर्नतभागयोजनैः स्वदेशाद्विषुवन्निरक्षदेशो भवति । एवं जिनाल्पाक्षे देशे स्वस्वस्तिकोपरि यदा सूर्यो भवति तदा कैर्नतभागयोजनैर्विषुवद्देशो भवति । इत्यन्यच्च मेरुस्वदेशान्तरयोजनादिज्ञानं तत्तदन्तरभागतोऽनुपातात् कार्यमिति स्फुटम् । अत्र टीकायां चतुर्वेदाचार्यः 'कान्यकुब्जेऽक्षभागाः २६ । ३५' ॥

इदानीं खकक्षां ग्रहकक्षां चाह ।

अम्बरयोजनपरिधिः
शशिभगणाः शून्यखखजिनाग्निगुणाः ३३२४०००।
ग्रहस्य भगणैर्विभक्ता-
स्तत्कक्षाऽर्को भषष्ट्यंशः ॥ ११ ॥

कल्पे ये चन्द्रभगणास्ते ३२४००० एतैर्गुणा खकक्षा भवति । सा च यस्य ग्रहस्य कल्पभगणैर्विभक्ता तत्कक्षा तस्य ग्रहस्य कक्षा भवति । अर्कश्च भषष्ठ्यंशः । अर्ककक्षा भकक्षायाः षष्टिभागः । अतोऽर्ककक्षा षष्टि-गुणा भकक्षा भवतीति ।

अत्रोपपत्तिः ।

कल्पे चन्द्रभगणाः = ५७७५३३'०००००)१८७१२०६'९२०००''००००० = खक (३२४०००

१७३२५९९

१३८६०७९

११५५०६६

२३१०१३२

२३१०१३२

अतो भास्कराचार्येणैव खकक्षा पठिता । शेषोपपत्तिर्भास्क-रोक्तविधिना स्फुटा ॥ ११ ॥

इदानीं ग्रहाः कियन्ति योजनानि परिभ्रमन्तीत्याह ।

भपरिधिसमानि षष्ट्या खपरिधितुल्यानि कल्परविवर्षैः ।
गच्छन्ति योजनानि ग्रहाः स्वकक्षासु तुल्यानि ॥ १२ ॥

षष्ट्या रविवर्षषष्ट्या ग्रहाः स्वकक्षासु भपरिधिसमानि नक्षत्रकक्षा-समानि योजनानि कल्परविवर्षैश्च खपरिधितुल्यानि खकक्षासमानि योजनानि गच्छन्ति । तथा सर्वे ग्रहाः कल्पे तुल्यान्येव योजनानि ख-कक्षामितानि गच्छन्ति ।

अत्रोपपत्तिः । भास्करोक्तेन विधिना स्फुटा ।

$$\text{नकक्षा} = \text{६०रकक्षा} = \frac{\text{खक}}{\text{कसौव}} \times \text{६०} \therefore \text{खक} = \frac{\text{नक} \times \text{कसौव}}{\text{६०}} \text{ ।}$$

कल्पसौरवर्षैः खकक्षामितयोजनानि तदा सौरवर्षषष्ट्या किम् । लब्धानि ग्रहभ्रमणयोजनानि = नक्षत्रकक्षा । अत उपपन्नं भपरिधिसमानि षष्ट्ये-ति । संप्रति वेधेन नवीनानां मते ग्रहाणां योजनात्मिका गतिर्न समा-नेति सुधीभिश्चिन्त्यम् ॥ १२ ॥

इदानीं ग्रहकक्षाक्रममाह ।

भगणस्याधः शनिगुरुभूमिजरविशुक्रसौम्यचन्द्राणाम् ।
कक्षाः क्रमेण शीघ्राः शनैश्चराद्याः कलाभुक्त्या ॥ १३ ॥

भगणस्याधो भकक्षाया अधः क्रमेण शनि–गुरु–कुज–रवि-शुक्र–बुध–चन्द्राणां कक्षाः सन्ति । कलाभुक्त्या शनैश्चराद्याः शीघ्राः शीघ्रगतयः सन्ति । शनेर्गुरुः शीघ्रगामी । गुरोर्भौमः । भौमाद्रविरित्यादि । एवं शीघ्रतमः शशी भवतीति । यदि शशिन ऊर्ध्वक्रमेण कक्षा पाठः क्रियते तदा 'भूमेः पिण्डः शशाङ्कज्ञकविरविकुजे'–इत्यादिभास्करोक्तमेतदनुरूपमेव ।

अत्रोपपत्तिः । 'कक्षाः सर्वा अपि दिविचराम्'–इत्यादिभास्करविधिना शनैश्चराद्याः शीघ्रा भवन्ति । कक्षाक्रमश्च वेधोपलब्ध्या । संप्रति वेधेन सर्वे ग्रहा दीर्घवर्तुले भ्रमन्ति । यद्केनाभौ रविरचल इति सर्वमुपलभ्यते । प्राचीनैर्भूमाद्ग्रहाणां कक्षा वृत्ताभा भूकेन्द्रकाश्च निश्चिता इति ॥ १३ ॥

इदानीं शनैश्चराद्याः कथं शीघ्रा इत्यस्य हेतुमाह ।

लघवोऽल्पे राश्यंशा महति महान्तोऽल्पवृत्तमल्पेन ।
पूरयतीन्दुर्महता कालेन महच्छनैश्चारी ॥ १४ ॥

अल्पे वृत्ते राश्यंशाश्चक्रांशविभागा लघवो महति वृत्ते च महान्तो भवन्ति । अत इन्दुश्चन्द्रोऽल्पवृत्तं स्वकक्षाया अल्पेन कालेन शनैश्चारी शनिश्च महद्वृत्तं स्वकक्षाया महता कालेन पूरयति ।

अत्रोपपत्तिश्चैककेन्द्रकवृत्तानां चक्रांशविभागेनैव स्फुटा ॥ १४ ॥

इदानीं परिधेर्व्यासानयनमाह ।

यन्मूलं तद्व्यासो मण्डललिप्ताकृतेर्दशहृतायाः ।
तस्यार्धं व्यासार्धं योजनकर्णप्रमाणार्थम् ॥ १५ ॥

'मण्डललिप्ताकृतेश्चक्रकलाकृतेर्दशहृताया यन्मूलं तच्चक्रकलापरिधेर्व्यासो भवति । तस्यार्धं व्यासार्धं भवति । तद्व्यासार्धं ग्रहकक्षायोजनैर्गुणं

चक्रकलाहृतं फलं यद्योजनकर्णप्रमाणं भवति । एवं योजनकर्णप्रमाणार्थमिदं व्यासार्धमुपयुक्तमस्ति । एवं व्यासार्धं स्थूलं स्थूलाद्वयोजनकर्णप्रमाणं च स्थूलं सुखार्थमङ्गीकृतम् । वस्तुतो वृत्तपरिधिवर्गस्य दशहृतस्य मूलं व्यासो न सूक्ष्मो भवतीति सूचितम् । ज्यादीनामानयने स्थूलत्वादयं व्यासो न युक्त इत्येतदर्थं वक्ष्यति चेति ॥ १५ ॥

इदानीं तदेव प्रतिपादयति ।

भगणकलाव्यासार्धं भवति कलाभिर्यतो न सविकलं हि ।
ज्यार्धानि न स्फुटानि च ततः कृतं व्यासदलमन्यत् ॥ १६ ॥

इति सामान्यगोलप्रकरणम् ।

यतो भगणकलाव्यासार्धं पूर्वप्रकारेण सकलाभिः सावयवाभिः कलाभिरपि स्फुटं न भवति ततस्तस्माद्व्यासार्धाज्ज्यार्धानि च न स्फुटानि भवन्ति तस्माज्ज्यासाधने स्फुटार्थं मया चक्रकलापरिधिव्यासार्धमन्यत् कृतमित्याचार्योक्तिर्गोलयुक्तियुताऽतिसमीचीनेति सिद्धान्तविदां स्फुटमिति । चतुर्वेदाचार्यसम्मतः पाठः 'सविकलम्'–इति । सविकलं सखेवमित्यर्थः ॥ १६ ॥

इति सामान्यगोलप्रकरणम् ।

अथ ज्याप्रकरणम् ।

तत्रादौ ज्याखण्डानयनमाह ।

राश्यष्टांशैर्वज्ञान् पदसन्धिभ्यः क्रमोत्क्रमात् कृत्वा ।
बध्नीयात् सूत्राणि द्वयोर्द्वयोर्ज्यास्तदर्धानि ॥ १७ ॥
ज्यार्धानि ज्यार्धानां ज्याखण्डान्यन्तराणि तान्येव ।
व्यस्तान्यन्त्यादथवेषुरुत्क्रमज्या धनुस्ताभ्याम् ॥ १८ ॥

इष्टत्रिज्यया वृत्तमुत्पाद्य लम्बरूपाभ्यां व्यासाभ्यां वृत्तचतुर्भागं कृत्वा चत्वारि पदानि कार्याणि । तत्र कस्माच्चिदपि पदसन्धितोऽष्टादशशतकलानामष्टांशसमं शरद्विदस्रकलात्मकं धनुः क्रमादुत्क्रमात् कृत्वाऽग्रादुभयतो दत्त्वा द्वयोरग्रयोः सूत्रं बध्नीयादेवं द्विगुणशरद्विदस्रकलाचापं पदसन्धित उभयतो दत्त्वा द्वयोरग्रयोः सूत्रं बध्नीयात् । एवं त्रिगुणचतुर्गुणादिप्रथमचापवशतः सूत्राणि बध्नीयात् । एवं द्वयोर्द्वयोरग्रयोर्बद्धानि सूत्राणि ज्याः पूर्णज्या भवन्ति । तासामर्धानि ज्यार्धानि चतुर्विंशतिर्भवन्ति । ज्यार्धानामन्तराणि ज्याखण्डानि भवन्ति । तान्येवान्त्याद्व्यस्तानि स्थाप्यानि तदोत्क्रमज्या उत्क्रमज्याखण्डान्यथवेषुः शरखण्डानि भवन्ति । ताभ्यां क्रमोत्क्रमज्याखण्डाभ्यां धनुः साधनीयम् ।

अत्रोपपत्तिः । 'इष्टाङ्कुलव्यासदलेन वृत्तम्'–इत्यादिविधिना तथा 'स्यादुत्क्रमज्याऽत्र विलोमखण्डैः'–इत्यादिविधिना भास्करोक्तेन स्फुटा ॥ १७—१८ ॥

इदानीं गणितेन ज्यार्धानयनमाह ।

एकद्वित्रिगुणाया व्यासार्धकृतेः पृथक् चतुर्थेभ्यः ।
मूलान्यष्टद्वादशषोडशखण्डान्यतोऽन्यानि ॥ १९ ॥

व्यासार्धकृतेस्त्रिज्याकृतेः किम्भूतायाः । एकगुणायास्तथा द्विगुणायास्तथा त्रिगुणायाः पृथक् चतुर्थेभ्यश्चतुर्भागेभ्यो मूलानि क्रमेण अष्ट

द्वादश षोडश ज्याखण्डानि ज्यार्धानि भवन्ति । अत एभ्यो ज्यार्धेभ्यो-ऽन्यानि वक्ष्यमाणविधिना साध्यानि । अत्रैतदुक्तं भवति । त्रिज्यावर्ग एकगुणश्चतुर्भक्तस्तन्मूलं राशिज्याऽष्टमी ज्या । त्रिज्यावर्गो द्विगुणश्चतुर्भक्तस्तन्मूलं शरवेदभागज्या द्वादशी ज्या । त्रिज्यावर्गस्त्रिगुणश्चतुर्भक्तस्तन्मूलं षष्टिभागज्या षोडशी ज्या ।

अत्रोपपत्तिः । भास्करज्योत्पत्त्या स्फुटा । भास्करेणापि तथैव पठितत्वादिति ॥ १९ ॥

इदानीमर्धभागज्यानयनमाह ।

तुल्यक्रमोत्क्रमज्याखण्डकवर्गयुतिचतुर्भागम् ।
प्रोह्यानष्टं व्यासार्धवर्गतस्तत्पदे प्रथमम् ॥ २० ॥
तद्दलखण्डानि तदूनजिनसमानि द्वितीयमुत्पत्तौ ।
कृतयमलैकदिगीशेषुसप्तरसगुणनवादीनाम् ॥ २१ ॥

तुल्यचापस्यैकस्यैव चापस्य समक्रमज्योत्क्रमज्ययोर्वर्गयुतेश्चतुर्थांशमनष्टं व्यासार्धकृतेः प्रोह्य हित्वा तत्पदे अनष्टस्य शेषस्य च पदे ग्राह्ये । तत्र प्रथमं पदं तद्दलखण्डानि तच्चापार्धज्या द्वितीयं च तदूनजिनसमानि तदर्धचापकोटिज्या स्यात् । एवमुत्पत्तौ ज्योत्पत्तौ पुनः पुनः समज्यार्धादष्टमाद् द्वादशाच्च कर्मणि कृते कृतयमलैकदिगीशेषुसप्तरसगुणनवादीनां ज्यार्धानामुत्पत्तिः स्यात् ।

यथाऽष्टमाज्ज्यार्धात् तदर्धभागज्यया तत्कोट्यर्धभागज्यया च

४	२०	१०	१४	५	१६	७	१७
२	२२	११	१३				
१	२३						

द्वादशाज्ज्यार्धाच्च

६	१८	६	१५
३	२१		

एतानि सिध्यन्ति ।

द्वादशं षोडशं चतुर्विंशतिसङ्ख्यं त्रिज्येति चयं च ज्ञातमेव । अत इष्टव्यासार्धे तदर्धज्यानयनेन चतुर्विंशतिर्ज्याः सिध्यन्ति ।

Digitized by Google

अत्रोपपत्तिः । 'क्रमोत्क्रमज्याकृतियोगमूलात्'—इत्यादिभास्करविधिना स्फुटा ॥ २०–२१ ॥

इदानीं विशेषमाह ।

एवं जीवाखण्डान्यल्पानि बहूनि वाऽऽद्यखण्डानि ।
ज्यार्धानि वृत्तपरिधेः षष्ठचतुर्थत्रिभागानाम् ॥ २२ ॥

एवं तदर्धज्यानयनेन गणकेनाल्पानि वा बहूनि यथेप्सितानि जीवाखण्डानि साध्यानि । आचार्येण च स्वग्रन्थे चतुर्विंशतिर्ज्यार्धानि साधितानि यदीप्सितानि ९६ ज्यार्धानि स्युस्तदा पुनस्तदर्धभागज्याविधिः कार्यः । अर्धभागज्याविधौ सर्वत्र त्रिज्यार्धं त्रिज्यावर्गार्धपदं त्रिगुणत्रिज्यावर्गचतुर्थांशपदं क्रमेण वृत्तपरिधेः षष्ठचतुर्थत्रिभागानां ज्यार्धानि चाद्यखण्डानि व्यक्तानि । परिधिषष्ठभागस्य षष्टिभागानां या ज्या पूर्णज्या तस्या अर्धं त्रिज्यार्धम् । चतुर्थभागस्य नवतेर्ज्यार्धं त्रिज्यावर्गार्धपदम् । त्रिभागस्य विंशत्यधिकशतभागानां ज्यार्धं त्रिगुणत्रिज्यावर्गचतुर्थांशपदम् । इति ज्यार्धान्याद्यानि विज्ञाय ततस्तदर्धभागज्यानयनविधानेन वृत्तपादे यथेप्सितानि ज्याखण्डानि साध्यानीति सर्वं स्फुटम् ॥ २२ ॥

इदानीं प्रकारान्तरेणार्धभागज्यानयनमाह ।

उत्क्रमसमखण्डगुणाद्व्यासादथवा चतुर्थभागाद्यत् ।
कृत्वोक्तखण्डकानि ज्यार्धानयनं न लघ्वस्मात् ॥ २३ ॥

इति ज्याप्रकरणम् ।

अथवोत्क्रमसमखण्डं समसङ्ख्यकज्याया उत्क्रमज्या तया गुणाद्व्यासात् किंविशिष्टात् चतुर्थभागाच्चतुर्विभक्ताद्यल्लब्धं तदुक्तखण्डानि क्रमोत्क्रमज्यावर्गयुतसमानि कृत्वा ज्यार्धानयनं प्राग्वत् कार्यम् । अस्मादानयनादन्यदानयनं न लघ्वस्तीति । अनेन प्रकारेण लाघवेन ज्यार्धानि सिध्यन्तीत्यर्थः ।

अत्रोपपत्तिः । 'त्रिज्योत्क्रमज्यानिहतेर्दलस्य'—इत्यादिभास्करविधिना स्फुटा । ज्योत्पत्तावन्ये विशेषा भास्करान्त्यज्योत्पत्तौ प्रसिद्धा एव ॥ २३ ॥

इति ज्याप्रकरणम् ।

अथ स्फुटगतिवासना ।

तात्रादौ स्पष्टीकरणे हेतुक्रमाह ।

कक्षामण्डलमध्यं भूमध्ये मध्यमः स्वकक्षायाम् ।
अनुलोमं मन्दोच्चात् प्रतिलोमं भ्रमति शीघ्रोच्चात् ॥ २४॥

भूमध्ये कक्षामण्डलस्य मध्यं केन्द्रमस्ति । मध्यमो ग्रहः स्वकक्षायां प्रतिवृत्ते मन्दोच्चादनुलोमं शीघ्रोच्चाच्च प्रतिलोमं भ्रमति । 'भूमेर्मध्ये खलु भवलयस्यापि मध्यम्'–इत्यादिना तथा 'मन्दोच्चतोऽग्रे प्रतिमण्डले प्राग्ग्रहोऽनुलोमं निजकेन्द्रगत्या'–इत्यादिना भास्करविधिनाऽपीयमेव स्थितिः ॥ २४ ॥

इदानीं नीचोच्चवृत्तभङ्गिमाह ।

नीचोच्चवृत्तमध्यं मध्ये तद्भ्रमति मध्यगः स्वोच्चात् ।
तत्परिधौ प्रतिलोमं मन्दोच्चाद्भ्रमति शीघ्रोच्चात् ॥ २५ ॥
अनुलोमं मध्यसमं भूस्थः पश्यति यतो न कक्षायाम् ।
स्पष्टं तन्मध्यान्तरमृणं धनं वा ग्रहे मध्ये ॥ २६ ॥

कक्षायां यत्र मध्यग्रहचिन्हं तस्मिन् मध्ये नीचोच्चवृत्तस्य मध्यं नीचोच्चवृत्तकेन्द्रं भवति तत् केन्द्रं च मध्यचलनाद्भ्रमति । शेषं भास्करभङ्ग्या स्फुटम् ॥ २५–२६ ॥

इदानीं नीचोच्चवृत्तभङ्ग्या शीघ्रफलं साधयति ।

कोटिफलं व्यासार्धात् पदयोराद्यन्तयोर्भवत्युपरि ।
द्वितृतीययोर्यतोऽधस्तद्युक्तोनं ततः कोटिः ॥ २७ ॥
कर्णस्तद्भुजफलकृतिसंयोगपदं तदुद्धृता त्रिज्या ।
भुजफलगुणितात्तद्धनुर्गणितेनैवं फलं शीघ्रे ॥ २८ ॥

स्पष्टार्थमार्याद्वयं भास्करोक्तभङ्ग्या ॥ २७–२८ ॥

संस्कृतपुस्तकानां सूचीपत्रम् । मूल्यम्

श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं· श्रीराममिश्र-
शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः .. .. ७।)
श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा .. ६)
श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा .. ३=)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः .. .. २।)
स्नेहपूर्त्तिः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं·स्वामिश्रीराममिश्रशास्त्रि-
प्रणीतो निर्विशेषाद्वैतनिराकरणपरः .. .. १॥=)
स्नेहपूर्त्तिसहितो वेदार्थसंग्रहः .. .. ३॥।)
शास्त्रदीपिका .. .. ६।)
सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायोस्वरूपम्, भाट्टच-
न्द्रिकोपेतम्, पं·स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् । १।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजपं·दामोदर-
शास्त्रिणा संशोधिता पूर्वार्द्धरूपा .. .. ५॥।)
तथा उत्तरार्द्धम् .. .. ८॥।)
माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण
श्रीसायणाचार्येण विरचिता .. .. ७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता ६॥)
श्रीतिरुन्तार्णवतरणिः । .. .. ६)
दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता .. .. ॥=)
जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता .. ५॥)
लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्याय·
मुक्तावल्याख्यया टीकया सहिता । .. .. ॥।)
सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना
विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम् । ॥।)
तत्त्वमुक्ताकलापः-सर्वार्थसिद्धियुतः, बोधायनीयार्षसिद्धान्तानुसारी विशिष्टाद्वै-
तब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्कि-
ककेसरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीवेङ्कटनाथदेशिकेन प्रणीतः ५॥=)
वेदान्तसिद्धान्तमुक्तावली, आर्थर्वेनिसप्राहबकृताङ्गलभाषानुवादयुता .. १॥।)
काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः .. .. २॥)
अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः .. .. १२)
आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्य-
काराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम् .. .. .. ॥।)
तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदी-
पाख्यटीकया सहिता । .. .. १॥।)

Digitized by Google

CONTENTS.

Page.

NYĀYASŪTRAVIVARAṆAM, Ed. Surendralāla Gosvāmin, Professor, Sanskrit College, Benares 513

BRĀHMASPHUṬASIDDHĀNTA, Edited with his own commentary by Mahāmahopādhyāya Sudhākara Dvivedin, Professor, Queen's College, Benares 529

Digitized by Google

65

HARVARD COLLEGE LIBRARY
NOV 6 1902
CAMBRIDGE, MASS.

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 10.] October, 1902. [Vol. XXIV.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1902.

Copyright on each article reserved.

Price Rs. 9-0 per annum.]

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
चित्रमीमांसा, अप्पयदीक्षितकृता तै॰ श्री रामशास्त्रिणा संशोधिता	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।=)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनाचार्य्येणेङ्गलण्डीयभाषायामनुवादिता ..	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणेङ्गलण्डीयभाषायामनूदितम्	४)
मानवधर्म्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	२।=)
श्रौतपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकोल्लूकशास्त्रि- संशोधिता	४)
काव्यप्रदीपः, पं॰ रामशास्त्रिभागवताचार्येण परिशोधितः	२॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	५॥)

Digitized by Google

दिना नाशादिति सन्तत्युच्छेदः यथा तैलवर्त्यादिनाशेन दीपसन्तत्युच्छेद इति भावः ॥ ६८ ॥

समाप्तमपवर्गपरीक्षाप्रकरणम् ॥

इति न्यायसूत्रे चतुर्थाध्यायस्याद्यमाह्निकम् ॥

Digitized by Google

अथ स्वतः प्रयोजनं सुखं दुःखाभावश्च। तत्र सुखमपि बहुतरदुःखानुषिद्धं चेद्धेयं दुःखाभावोऽपि कादाचित्कस्तथेत्यात्यन्तिकदुःखनिवृत्तिरूपापवर्गः परमपुरुषार्थ इति तल्लक्षितं परीक्षितं च तद्धेतुतया पदार्थतत्त्वज्ञानमप्युक्तम्। तत्र कीदृशतत्त्वज्ञानस्य साक्षान्मिथ्याज्ञाननिरसनद्वारापवर्गसाधनत्वमित्याकाङ्क्षोदयात् तदेव तत्त्वं परीक्षयति।

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः(१) ॥ १ ॥

अहङ्कारः स्थूलोऽहमित्यादिरूपः शरीरात्मग्रहः। तदेव मिथ्याज्ञानाज्ञानादिपदेनोच्यते। यद्बलात् रञ्जनीयेषु रज्यति कोपनीयेषु कुप्यति। दोषनिमित्तानां रूपादिविषयाणां शरीरादीनां च तत्त्वज्ञानादित्यर्थः। तत्र च शरीरादावनात्मत्वरूपतत्त्वज्ञानं विरोधिविषयकतया साक्षान्मिथ्याज्ञाननिवर्तकम्। तच्च ज्ञानं साक्षात्काररूपम्। तत्र च श्रवणमननिदिध्यासनानि साधनानि। रूपादीनामनित्यसुखोपधायकत्वदुःखोदर्कत्वादिनिबन्धनहेयत्वरूपतत्त्वभावनं तथा भोग्यकामिन्यादिशरीरे मांसासृगस्थिनिर्मितत्वपूयपूरितत्वादिनिबन्धनहेयत्वभावनं रञ्जनीयेषु वैराग्यद्वारा सहकारि। एवं कोपनीयेषु

मांसासृक्कीकसमयो देहः किं मेऽपराध्यति।
एतस्मादपरः कर्ता कर्तनीयः कथं मया ॥

इत्यादिभावनमपि तथैव सहकारि। वैराग्यं च रूपा-

(१) अर्थगतिं परिशोध्याचार्यैं सूत्रं पठति। दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिरिति तात्पर्यटीका। तत्र सिद्धान्तसूत्रमिति वृत्तिकृतः।

दावुपादेयत्वग्रहविरहेण तदभिलाषशून्यता । उपादेयत्वं च बलवदनिष्टाननुबन्धीष्टसाधनतेति ॥ १ ॥

दोषनिमित्तं विवृणोति ।

दोषनिमित्तं रूपादयो विषयाः सङ्कल्पकृताः[१] ॥ २ ॥

रूपादीत्यनेन गन्धादयस्तदाश्रयशरीरादीनि च गृह्यन्ते । सङ्कल्पकृता इदमुत्तमं रूपमेतद्दर्शनमिष्टमियं सुन्दरी ममोपभोगकरीत्यादिज्ञानरूपसङ्कल्पविषयीभूताः । तथा च तत्तत्सङ्कल्पादिना तत्रतत्र रागो जायते । एवं द्विष्टसाधनताबुद्ध्या क्वचिद् द्वेषो जायत इति ॥ २ ॥

सङ्कल्पे च को हेतुरित्याकाङ्क्षायामाह ।

तन्निमित्तं त्ववयव्यभिमानः[२] ॥ ३ ॥

तन्निमित्तं सङ्कल्पहेतुः । अवयविनि शरीरे ऽभिमान आत्मग्रहः । केचित्तु दोषनिमित्तानामितिसूत्रस्य देहादावनात्मत्वज्ञानं मिथ्याज्ञाननिवर्तकमित्यर्थः । ननु केषु रञ्जनीयेषु रज्यन् संसरतीति विवेकाय तानुपदिशति । दोषनिमित्ता इति द्वितीयसूत्रम् । तत्र सङ्कल्पः समीचीनत्वेन भावनम् । तद्विषयीकृता रूपादयो दोषस्य रागादेर्निमित्तम् । सुन्दरीयमिति जानन् रज्यति शत्रुरयमिति जानन् द्वेष्टि ते रूपादयो हेयत्वेन भावनीयाः प्रथमं ततः शरीरात्मविवेक इति । ननु सौन्दर्यादिकं पश्यतो रागादिक्लेशणोऽपि दुष्परिहर इति तन्निवृत्त्युपायं दर्शयिष्यन्नाह ।

---

(१) सूत्रम् । दोषनिमित्तं रूपादयो विषयाः सङ्कल्पकृता इति तात्पर्यटीका ।

(२) सूत्रम् । तन्निमित्तं त्ववयव्यभिमान इति तात्पर्यटीका ।

तन्निमित्तमिति तृतीयसूत्रम् । तत्रावयविनि तरुण्यादिशरीरे ऽभिमानः परिष्कारबुद्धिः तन्निमित्तं रागादिनिमित्तम् । तथा च सा बुद्धिर्हेया । अत एव भाष्यादौ परिष्कारबुद्धिरनुरञ्जनसंज्ञा सा हेया दोषदर्शनमशुभसंज्ञा सा भावनीयेति वदन्ति ॥ ३ ॥

समाप्तं तत्त्वज्ञानोत्पत्तिप्रकरणम् ॥

अथावयव्येव नास्ति कुतस्तदभिमानस्य दोषनिमित्तता । न चावयविनो द्वितीयाध्याये व्यवस्थापितत्वमेवेति किं पुनराशङ्कनमिति वाच्यम् । पूर्वोक्तव्यवस्थापकयुक्तौ दोषाभिधानतन्निराकरणार्थं पुनः स्थापनारम्भात् । न च किमर्थमवयविव्यवस्थापनं परमाणुपुञ्ज एवाभिमानस्य दोषनिमित्ततासम्भवादिति वाच्यम् । तथापि वस्तुगतिमनुरुध्यैव प्रसङ्गतस्तद्व्यवस्थापनादिति । तत्र संशयं प्रदर्शयति ।

विद्याविद्याद्वैविध्यात् संशयः(१) ॥ ४ ॥

संशय इत्यस्यावयविनीत्यादि । परमाणुर्द्रव्यसमवायी न वेत्याकारको द्रव्यं समवेतं न वेत्याकारको वा संशयः । तत्र द्रव्यत्वावच्छेदेन समवेतत्वाभावः सौगतस्य कोटिर्द्रव्यत्वसामानाधिकरण्येन समवेतत्वं नैयायिकानां कोटिरिति । हेतुमाह । विद्येति । विद्या यथार्थज्ञानमविद्या तदन्या तयोर्भेदेन ज्ञानद्वैविध्यादित्यर्थः । तथा चावयविप्रत्यक्षादौ प्रमात्वतदभावसहचरितज्ञानत्वलक्षणसाधारणधर्मदर्शनादिना प्रामाण्यसंशयेनावयविनि सन्देह इति भावः ॥ ४ ॥

(१) तत्र संशयप्रदर्शनाय सूत्रमिति वृत्तिकृतः ।

Digitized by Google

समाधत्ते ।

तदसंशयः पूर्वहेतुप्रसिद्धत्वात्(१) ॥ ५ ॥

तस्यावयविनो न संशयः पूर्वहेतुप्रसिद्धत्वात् प्रकर्षेण निर्णीतत्वादित्यर्थः ॥ ५ ॥

बाधकमाशङ्कते ।

वृत्त्यनुपपत्तेरपि संशयानुपपत्तिः(२) ॥ ६ ॥

वृत्त्यनुपपत्तेरिति । वृत्त्यनुपपत्तेरेवावयविस्वीकाराभावादवयविविरहनिर्णयादिति यावत् । संशयानुपपत्तिः संशयानुत्पादः स्यात् न त्ववयविनिर्णयादिति भावः । यद्वा वृत्त्यनुपपत्तेः समवेतत्वानुपपत्तेः समवेतत्वविरहनिर्णयादिति यावत् । अन्यत् पूर्ववत् । वृत्त्यनुपपत्तिं विवृणोति भाष्यकारः । कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः(३) । अवयवी हि एकैकावयवे कात्स्न्येन एकदेशेन वा वर्तते । तत्र नाद्यः । विषमपरिमाणत्वात् । अन्त्ये ऽपि तेनैवावयवेन अन्येन वा । नाद्यः । स्वस्मिन् स्ववृत्तिविरोधात् । नान्त्यः । अवयवान्तरस्यावयवान्तरावृत्तेरिति । ननु विशेषवृत्तित्वविरहे ऽपि सामान्यवृत्तितायां बाधकाभाव इत्यत आह तत्रैव । तेषु चावृत्तेरवयव्यभावः(४) । इदं सूत्रमिति केचित् । तेषु अवयवेषु

---

(१) इदं न्यायसूचीनिबन्धे वर्तते ।

(२) न्यायसूचीनिबन्धादिषु तु वृत्त्यनुपपत्तेरपि न संशय इति पाठः ।

(३) इदं न्यायसूचीनिबन्धे सूत्रत्वेन धृतम् । विश्वनाथपञ्चाननैस्तु वृत्त्यनुपपत्तिं विवृणोति भाष्यकार इत्यवतरणं दत्तम् ।

(४) इदमपि न्यायसूचीनिबन्धे सूत्रत्वेन धृतम् । विश्वनाथपञ्चाननास्तु तथापि कथमवयव्यभाव इत्यत्र भाष्यम् । तेष्वित्यादि धृत्वा व्याख्याय सूत्रमेवेदमित्यपि वदन्तीति प्राहुः ।

अवृत्तेः । विशेषाभावकूटस्य सामान्याभावसाधनत्वादिति भावः ॥ ६ ॥

नन्वतिरिक्तोऽवयवी समुदितावयववृत्तिरित्याशङ्क्य पूर्वपक्षी आह ।

पृथक् चावयवेभ्योऽवृत्तेः[१] ॥ ७ ॥

अवयवेभ्यः पृथगप्यवयवी नास्तीति शेषः । अवृत्तेः प्रत्येकवृत्तित्वस्य निरुक्तयुक्त्या असम्भवेन समुदायवृत्तित्वस्यासम्भवात् । प्रत्येकावृत्तिधर्मस्य समुदायावृत्तित्वनियमादिति भावः । न चावयविनोऽवृत्तित्वे क्षतिविरह इति वाच्यम् । तथा सति नित्यत्वप्रसङ्गात् ॥ ७ ॥

अथावयवी अवयवान्नातिरिच्यत इति तादात्म्येनैवावयवी अवयवे वर्तत इत्यत आह ।

न चावयव्यवयवाः[२] ॥ ८ ॥

अवयवा नावयवीत्यर्थः । अन्यथा तन्तुः पट इत्यादिप्रतीतिः स्यात् न स्याच्च तन्तुर्न पट इत्यादिप्रतीतिरिति भावः ॥ ८ ॥

सिद्धान्तयति ।

एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः[३] ॥ ९ ॥

एकस्मिन्नवयविनि । भेदाभावात् कात्स्न्र्यादिविशेषाभावात् । एकदेशेन न वर्तते कात्स्न्र्येन न वर्तत इत्यादिप्रयोगानुपपत्तेः । अप्रश्नः किं कात्स्न्र्येन वर्तते किमेकदेशेनेति

(१) नन्वास्तामवृत्तिरेवावयवीतिशङ्कायां पूर्वपक्षिसूत्रमिति वृत्तिकृतः ।
(२) इदं न्यायसूचीनिबन्धे वर्तते ।
(३) सिद्धान्तसूत्रमिति वृत्तिकृतः । इदमपि न्यायसूचीनिबन्धे वर्तते ।

Digitized by Google

प्रश्नो नेत्यर्थः । कार्त्स्न्यं हि अनेकाशेषत्वमेकदेशत्वं च समुदायत्वाश्रयैकव्यक्तिमात्रत्वं तदुभयमप्येकस्य न सम्भवतीति भावः ॥ ९ ॥

इतश्च वृत्तिविकल्पो न युक्त इत्याह ।

अवयवान्तराभावे ऽप्यवृत्तेरहेतुः(१) ॥ १० ॥

एकस्मिन्नवयवे ऽवयवान्तरस्याभावे ऽपि समुदितवृत्तेरवयविनोऽवृत्तितायां न हेतुः कपालत्वादिवदवयविनोऽवयवसमवेतत्वसम्भवादिति भावः ॥ १० ॥

तदसंशयः पूर्वहेतुप्रसिद्धत्वादित्यनेन स्मारितायाः सर्वाग्रहणमवयव्यसिद्धेरिति प्रागुक्तयुक्तेर्दूषणमुपक्रमते ।

केशसमूहे तैमिरिकोपलब्धिवत् तदुपलब्धिः(२) ॥ ११ ॥

तिमिरत्ववदनुपलम्भकेन दोषविशेषेण युक्तं तैमिरिकं चक्षुस्तेनोपलब्धिवत् तदुपलब्धिः परमाणुपुञ्जात्मकघटाद्युपलब्धिरित्यर्थः । तथा च यथा दोषविशेषशालिना चक्षुषा केशसमूहस्य प्रत्येकमगृह्णता समुदाय एकत्वेन गृह्यते तथा परमाणूनां प्रत्येकमगृह्णता तेन तत्समुदायात्मको घट एकत्वेन गृह्यत इति भावः ॥ ११ ॥

समाधत्ते ।

स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद् विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः(३) ॥ १२ ॥

---

(१) इदमपि न्यायसूचीनिबन्धे वर्तते ।

(२) केशसमूहे तैमिरिकोपलब्धिवत् तदुपलब्धिरिति सूत्रभाष्यवार्त्तिकानि पूर्वपक्षसिद्धान्तयोरतिरोहितार्थानीति तात्पर्यटीका । इदं न्यायसूचीनिबन्धे वर्तते ।

(३) पूर्वसूत्रटिप्पणी द्रष्टव्या । इदमपि न्यायसूचीनिबन्धे वर्तते ।

स्वमिन्द्रियम् । तथा च स्वविषयानतिक्रमेण स्वविषय एवेन्द्रियाणां पाटवे विषयग्रहणस्य पाटवं याथार्थ्यमिन्द्रियाणां मन्दभावे च सदोषत्वे च विषयग्रहणस्य मान्द्यमयाथार्थ्यम् । एवकारव्यावर्त्यमाह । नाविषय इति । अविषये तत्तदिन्द्रियायोग्ये प्रवृत्तिः तत्तदिन्द्रियप्रवृत्तिरित्यर्थः । अयं भावः । केशस्य चक्षुर्योग्यत्वेन तत्समूहस्यापि चक्षुषा ग्रहणम् । परमाणोश्च चक्षुराद्ययोग्यतया तत्समूहस्यापि तदयोग्यत्वाद् घटादेः पुञ्जत्वे तत्प्रत्यक्षं न स्यात् पुञ्जस्य प्रत्येकानतिरेकात् प्रत्यक्षप्रयोजकस्य महत्त्वस्य तत्राभावात् । न च महान् धान्यराशिरितिवद् घटो महानित्यादिप्रतीतिबलात् प्रत्येकावृत्तेर्महत्त्वस्य समुदाये स्वीकार इति वाच्यम् । महान् धान्यराशिरित्यादिप्रयोगस्याधिकसंख्यकधान्यनिबन्धनस्य भाक्तत्वात् अत्रापि तथाप्रयोगस्वीकारे प्रत्यक्षानुपपत्तिरेवेति ॥ १२ ॥

दोषाभिधानाय सूत्रम् ।

अवयवावयविप्रसङ्गश्चैवमाप्रलयात्(१) ॥ १३ ॥

एवमवयवावयविप्रसङ्गोऽवयवावयविप्रवाहस्त्वया आप्रलयात् प्रलयपर्यन्तं स्वीकार्यः । अन्यथा प्रलयव्याघातः स्यात् जन्यद्रव्यानधिकरणस्यैव तत्त्वात् । तथा च प्रलयानन्तरं पुनः सर्गो न स्यात् समवायिकारणस्याभावादिति भावः ॥ १३ ॥

(१) एतद्व्याख्यानावसरे तत्र प्रथमद्वितीयविकल्पावाश्रित्येदं सूत्रमिति तात्पर्यटीका । दोषान्तराभिधानाय सूत्रमिति वृत्तिकृतः ।

समाधत्ते ।

न प्रलयोऽणुसद्भावात्(१) ॥ १४ ॥

न प्रलयो न सर्वावयवनाशोऽणुसद्भावात् । तथा च परमाणुभिरेव द्व्यणुकादिक्रमेण स्थूलः सर्गो भविष्यतीति भावः ॥ १४ ॥

परमाणुरेव क इत्यत्राह ।

परं वा त्रुटेः(२) ॥ १५ ॥

त्रुटेस्त्र्यसरेणोः परं यदतिसूक्ष्मं परमाणुरित्यर्थः । वाशब्दो विश्रामावधारणे । अथवा त्रुटेरवयवो द्व्यणुकं तदवयवो वा परमाणुरिति वाशब्दो विकल्पार्थ इति । यद्वा त्रुटेः परं सूक्ष्मं परमाणुस्त्रुटावेव वा विश्राम इति विकल्पोऽभिमतः । नव्यास्तु अणुसद्भावादित्यपेक्षया विकल्पः । तथा च त्रुटेर्हेतोः परं परसर्गीयं जन्यद्रव्यमित्यर्थः । त्रुटेः सावयवत्वसाधकप्रागुक्तहेतोरप्रयोजकत्वादिति भावः ॥ १५ ॥

समाप्तमवयवावयविप्रकरणम् ॥

अथ विश्वस्य शून्यत्वात् क्व परमाणुसम्भावनेत्याशङ्कते ।

आकाशव्यतिभेदात् तदनुपपत्तिः(३) ॥ १६ ॥

तस्य निरवयवस्य परमाणोरनुपपत्तिः कुत आकाशव्यतिभेदात् सर्वत्रैवान्तर्बहिश्चाकाशसंयोगात् । त्वन्मत

(१) इदं न्यायसूचीनिबन्धे वर्तते ।

(२) इदमपि तथा ।

(३) आकाशव्यतिभेदादित्यादर्शपुस्तके विवरणे च पाठः । अथ विश्वस्य शून्यत्वात् क्व परमाणुसम्भावनेतिमतनिराकरणाय निरवयवप्रकरणम् । तत्र पूर्वपक्षसूत्रमिति वृत्तिकृतः । न्यायसूचीनिबन्धे ऽपीदं वर्तते ।

इत्यादि । तेन सर्वशून्यतावादिमते आकाशानभ्युपगमेऽपि न क्षतिः । तथा च सावयवत्वेन परमाणुरप्यनित्य इति सर्वशून्यतैव स्यादन्यथावयवधाराकल्पनेनानवस्था स्यादिति भावः ॥ १६ ॥

आकाशव्यतिभेदाभावे त्वाह ।

आकाशासर्वगतत्वं वा(१) ॥ १७ ॥

स्यादिति शेषः ॥ १७ ॥

समाधत्ते ।

अन्तर्बहिरिति कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभावः(२) ॥ १८ ॥

अन्तर्बहिःशब्दोऽवयवविशेषवाचकोऽवयवविशेषश्च कार्यद्रव्यस्य आकार्ये नित्ये परमाणौ तदभावोऽवयवाभाव इति तस्य नानित्यत्वं न चाकाशस्य सर्वगतत्वभङ्गः । अवयवाभावे हेतुमाह । कारणान्तरवचनात् । अवयवान्तरप्रसङ्गात् अवयवधाराप्रसङ्गेन मेरुसर्षपयोरविशेषप्रसङ्गादिति यावत् । यद्वा अन्तर्बहिरित्यत्र हेतुः कारणान्तरवचनादिति । कारणविशेषवचनात् कारणविशेषत्वेन कल्पनादिति यावत् ॥ १८ ॥

परमाणोर्निरवयवत्वेऽप्याकाशस्य सर्वगतत्वमुपपादयति ।

शब्दसंयोगविभवाच्च सर्वगतम्(३) ॥ १९ ॥

(१) एतद्व्याख्यावसरे संयोगमात्रं चोत्तरसूत्रेणानूद्यत इति वार्त्तिकम् । इदमपि न्यायसूचीनिबन्धे वर्तते ।

(२) इदमपि न्यायसूचीनिबन्धे वर्तते । तत्रान्तर्बहिश्चेति पाठः ।

(३) परसूत्रव्याख्यावसरे पठ्यते सूत्रे शून्यतावादिमते न सङ्गच्छते इति वृत्तिकृतः । न्यायसूचीनिबन्धे ऽपीदं वर्तते । वार्त्तिके तु सर्वसंयोगविभवाच्चेति पाठः ।

शब्दस्य संयोगस्य च विभवात् सर्वत्रोत्पादात् । सर्वगतम् सर्वगतत्वेन व्यपदिश्यते । गगनमिति शेषः । यद्वा शब्दसंयोगस्य शब्दानुमिततदनुकूलसंयोगस्य विभवादित्यर्थः । तथा च सर्वमूर्तसंयोगित्वमेव सर्वगतत्वं गगनस्येति भावः ॥ १६ ॥

ननु गगनस्य संयोगित्वे विष्टम्भादिकं स्यादित्यत आह ।

अव्यूहनाविष्टम्भविभुत्वानि चाकाशधर्माः(१) **॥ २० ॥**

व्यूहनं प्रतिहतस्य परावर्तनम् । विष्टम्भ उत्तरदेशगतिप्रतिबन्धः । आकाशे तयोरभावः निरपर्शत्वात् । विभुत्वं सर्वगतत्वम् । एतत्कथनं चाविरोधित्वसूचनाय । यद्वा व्यूहनं क्रिया विष्टम्भ आधाराधेयभावः । आकाशे तयोरभाव इत्यर्थः । विभुत्वं परममहत्त्वम् । चकाराद्विभागादयो ज्ञेयाः ॥ २० ॥

पूर्वपक्षी शङ्कते ।

मूर्तिमतां च संस्थानोपपत्तेरवयवसद्भावः(२) **॥ २१ ॥**

मूर्तिमतां च मूर्तिमतामेव सावयवानामेवेति यावत् । संस्थानोपपत्तेराकारविशेषोपपत्तेः । परमाणोः परिमण्डलाकारत्वश्रवणात् यद्यत् साकारं तत् सावयवमितिव्याप्त्या परमाणोरप्यवयवसद्भाव इत्यर्थः । यद्वा मूर्ति-

---

(१) पूर्वसूत्रटिप्पणी द्रष्टव्या । न्यायसूचीनिबन्धे ऽपीदं वर्तते । तत्र अव्यूहाविष्टम्भेति पाठः ।

(२) यद्यपि मूर्तिमतामिति सम्बन्धित्वमात्रेणोपात्तं सूत्र इति तात्पर्यटीका ।

मत्त्वं मूर्तत्वं तेन संस्थानवत्त्वमनुमाय संस्थानवत्त्वेन सावयवत्वं परमाणोरपीति प्रागुक्तयुक्त्या सर्वशून्यतैवेति समुदितपर्यवसितार्थः । मूर्तत्वमपि सावयवत्वसाधकमितिसूचनाय चकार इति ॥ २१ ॥

युक्त्यन्तरमाह ।

संयोगोपपत्तेश्च[१] ॥ २२ ॥

सावयवानामेव संयोगोपपत्तेः संयोगवत्त्वात् । तथा च संयोगवत्त्वेन सावयवः स्यादन्यथा संयोगस्य किञ्चिदवच्छिन्नत्वनियमेन परमाणौ संयोगावच्छेदकदौर्लभ्यं स्यादिति भावः । एवं च संयोगवत्त्वेन गगनादेरप्यवयवप्रसक्त्या सर्वशून्यतैवेति ॥ २२ ॥

सिद्धान्तमाह ।

अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः[२] ॥ २३ ॥

अप्रतिषेधो न सर्वशून्यता । अनवस्थाकारित्वात् प्रत्यक्षसिद्धघटादीनामपलापप्रसङ्गात् भावानामभावोपादानकत्वासम्भवात् । यद्वा अनवस्थाकारित्वाद् घटादीनामर्थक्रियाकारित्वाभावप्रसङ्गादिति । ननु प्रागुक्तयुक्त्यावयवधाराप्रसङ्ग इत्यतो हेत्वन्तरमाह । अनवस्थानुपपत्तेः । अनवस्थानुपपादकत्वात् निरुक्तहेतूनामनवस्थासम्पादकस्य परमाणोः सावयवत्वस्यासाधकत्वादिति यावत् । तथा च परमाणोर्मूर्तत्वमवच्छिन्नपरिमाणवत्त्वम् ।

---

(१) संयोगोपपत्तेश्च । सावयवत्वं संयोगित्वादिति सूत्रार्थः । नन्विदं सूत्रं संस्थानवत्त्वादित्यनेनैव चरितार्थमिति वार्त्तिकम् ।

(२) एवं न्यायसूचीनिबन्धे वर्तते ।

परिमण्डलाकारश्च निरवयवत्वमेव । एवं परमाणौ संयोगस्य व्याप्यवृत्तितयाऽवच्छेदककल्पकत्वासम्भवात् सम्भवे वा दिग्विशेषाणामेव तत्कल्पनादिति भावः । केचित्तु पूर्वोक्तयुक्त्या परमाणोर्निरवयवत्वप्रतिषेधो न युक्तः कुतः अनवस्थाकारित्वात् । प्रामाणिकीयमनवस्था स्यादत आह । अनवस्थानुपपत्तेश्चेति । सर्वेषामनवस्थितावयवत्वे मेरुसर्षपयोस्तुल्यपरिमाणापत्तिरिति । न च तत्संयोगावच्छेदका दिग्विभागाः । न वा शून्यता युक्ता निष्प्रमाणकत्वात् । निष्प्रमाणकशून्यत्वाभ्युपगमे किमपराद्धं पूर्णतयेत्याहुः ॥ २३ ॥

समाप्तं निरवयवप्रकरणम् ॥

क्षणिकविज्ञानमेवात्मा वास्तवपदार्थः । तच्च ज्ञानं विषयोपरागशून्यं बाह्यार्थस्तत्रारोपितो न सत्यः किं तु मिथ्यैवातोऽवयवशालित्वतद्रहितत्वविचारो विफल इति सौगतमतमपाकर्तुं पूर्वपक्षयति ।

बुद्ध्या विवेचनात्तु भावानां याथार्थ्यानुपलब्धिस्तन्त्वपकर्षणेन पटसद्भावानुपलब्धिवत्[1] ॥ २४ ॥

तुः प्रकरणविच्छेदार्थः । भावानां बुद्ध्या विवेचनादभेदोल्लेखात् । याथार्थ्यस्य भवदुक्तयाथार्थ्यस्य ज्ञानभेदलक्षणस्यानुपलब्धिरनुपपत्तिः । घट इति ज्ञानं जातमिति ह्यनुभूयते तत्र घट इति ज्ञानमित्यनेन घटज्ञानयोरभेद

(१) बाह्यार्थभङ्गनिराकरणमारभते प्रमेयत्वं ज्ञानत्वव्याप्यं न वेति संशयः तत्र पूर्वपक्षसूत्रमिति वृत्तिकृतः । न्यायसूचीनिबन्धे तु बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् तदनुपलब्धिरिति पाठः ।

उल्लिख्यते ततो न ज्ञानातिरिक्तो विषयः किं तु ज्ञानस्यैवाकारविशेषः। यथा पटे विविच्यमाने तन्तूनामेवापकर्षणादतिरिक्तं न वस्तु एवं तन्तुरपि नांशुव्यतिरिक्त इति। यद्वा बुद्ध्या उपादानभूताया विवेचनात् तत्तद्भावानां पूर्वं परतश्च सत्त्वेन प्रतीतेरन्तराले ऽपि तस्या एव सत्त्वात् तत्तद्भावानां याथार्थ्यानुपलब्धिः सत्यत्वाग्रहः मिथ्यात्वग्रह इति यावत्। यथा तन्तूनामुपादानभूतानां पूर्वापरीभावेनान्तराले ऽपि तेषामेव सत्त्वेन पटस्य सद्भावानुपलब्धिः सत्यत्वाग्रह इति। श्रुतिरपि। वाचारम्भनं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति ॥ २४ ॥

समाधत्ते।

व्याहतत्वादहेतुः(१) ॥ २५ ॥

उक्तदृष्टान्तस्य व्याघातात् निरुक्तो बाह्यार्थभङ्गहेतुर्नेत्यर्थः। तथाहि न हि पटस्य तन्तुता तन्तुतः पटो जायते पटो न तन्तुः पटेन प्रावरणं न तु तन्तुभिरित्यादिप्रतीतेस्तन्तुपटयोर्भेदसिद्धेः। एवं ज्ञानेनापि स्वस्मिन् पटाभेदो नोल्लिख्यते स्वाविषयकत्वात् अनुव्यवसायेन तु पटविषयकत्वं व्यवसाये समुल्लिख्यत इति। यद्वा व्याहतत्वात् प्रमाणाभावेन ज्ञानस्योपादानताव्याघातादुपादानोपादेययोरभेदव्याघाताच्चेत्यर्थः। यथा सत्त्वेन प्रतीत्या तन्तोः सत्त्वं तथा सत्त्वेन प्रतीत्या पटस्यापि सत्त्वमन्यथा व्यवहारविलोपश्च स्यादिति भावः ॥ २५ ॥

ननु तन्तुपटयोर्भेदे पार्थक्येन ग्रहणं स्यादित्यत्राह।

तदाश्रयत्वादपृथग्ग्रहणम्(२) ॥ २६ ॥

(१) इदं न्यायसूचीनिबन्धे वर्तते।
(२) इदमपि तथा।

तदाश्रयत्वात् तत्समवेतत्वात् अपृथग्ग्रहणं तन्त्वविषयकप्रत्यक्षेण पटाग्रहणमित्यर्थः । पटप्रत्यक्षसामग्र्यास्तन्तुप्रत्यक्षसामग्रीनियतत्वादिति भावः ॥ २६ ॥

ननु ज्ञानस्योभयवादिसिद्धत्वात् तेनैवोपपत्तौ कथमितरपदार्थकल्पनमित्यत आह ।

प्रमाणतश्चार्थप्रतिपत्तेः(१) ॥ २७ ॥

अर्थस्य घटादेः प्रतिपत्तेः सिद्धत्वात् । तथा च बाह्यवस्तूनां प्रत्यक्षसिद्धतयापह्नोतुमशक्यत्वादन्यथा ज्ञानमपि न सिध्येदिति भावः । चकाराद्बाधकविरहः समुच्चितः । न च घटादयो ज्ञानस्याकारविशेषा न पृथगिति वाच्यम् । आकारस्य विज्ञानातिरिक्तत्वे सिद्धमेव ज्ञानातिरिक्तं वस्तु विज्ञानस्वरूपत्वे च समूहालम्बने नीलाकारोऽपि पीताकारः स्यात् विज्ञानस्य स्वतोऽविशेषादिति । न चापोहरूपो नीलत्वादिर्विज्ञानधर्म इति वाच्यम् । नीलत्वादीनां विरुद्धानामेकस्मिन् समावेशासम्भवात् अन्यथा विरोधावधारणस्यैव दुरुपपादत्वात् । न च समूहालम्बनमेकं ज्ञानं न जायते किं तु शतपत्रवेधन्यायेन तत्र क्रमिकमेव जायत इति वाच्यम् । ज्ञानानन्त्यकल्पनापत्तेः । ज्ञातो घट इत्यादिप्रतीत्या ज्ञानघटयोर्भेदबोधनात् प्रत्यभिज्ञया घटादेः स्थैर्यसिद्धेश्च । एवं क्षणिकविज्ञानस्यात्मत्वे स्मरणासम्भव उत्तरस्मिन् संस्काराभावादित्युक्तप्रायम् ॥ २७ ॥

बाह्यार्थभङ्गे स्फुटतरव्याघातमाह ।

प्रमाणानुपपत्त्युपपत्तिभ्याम्(२) ॥ २८ ॥

(१) प्रमाणतश्चार्थप्रतिपत्तेः । यदस्ति तथा च यन्नास्ति यथा च तत् सर्वं प्रमाणत उपलब्ध्या सिध्यतीति । शेषं भाष्य इति वार्त्तिकम् । इदमपि न्यायसूचीनिबन्धे वर्त्तते । एतत्सूत्रस्य व्याख्यानन्तरं सुगमं भाष्यमिति तात्पर्यटीका ।

(२) इदं न्यायसूचीनिबन्धे वर्त्तते ।

Digitized by Google

प्रमाणानां चक्षुरादीनामुपपत्तौ चक्षुरादय एव बाह्यार्थाः तेषां प्रमाणतया तत्सिद्धत्वात् घटादयोऽपि । यदि चक्षुरादीनामनुपपत्तिरस्वीकारः तदा ज्ञानमपि न सिध्येत् प्रमाणाभावात् तथा च शून्यमेव जगत् स्यात् । न चेष्टापत्तिर्व्यवहारश्चारोपादेवेति वाच्यम् । निरधिष्ठानारोपासम्भवादिति भावः ॥ २८ ॥

ननु विज्ञानं स्वतः सिद्धं प्रमाणप्रमेयव्यवहारश्च न पारमार्थिक इत्याशङ्कते सूत्रद्वयेन ।

स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः(१) ॥ २९ ॥

मायागन्धर्वनगरमृगतृष्णिकावद्वा(२) ॥ ३० ॥

प्रथमसूत्रे प्रकृत्यात्मकमायाया अस्वीकारः परसूत्रे तत्स्वीकार इति विशेषः । यद्वा स्वप्नजाग्रद्दशाभेदेन दृष्टान्तद्वयमाह सूत्रद्वयेनेति ॥ २९ ॥ ३० ॥

समाधत्ते ।

हेत्वभावादसिद्धिः(३) ॥ ३१ ॥

तादृशाभिमानस्य हेत्वभावादसिद्धिः । भ्रमस्य दोषाधीनत्वाद् भवन्मते दोषाप्रसिद्धेः ज्ञानमात्रस्य सद्विषयकत्वाच्च । न चासद्विषयकप्रत्यये मायैव हेतुः तस्या अपि भवन्मते मिथ्यात्वादन्यथा तस्या एव बाह्यार्थस्य प्रस्तु-

(१) ननु प्रमाणप्रमेयव्यवहारो न पारमार्थिकः परं तु विज्ञानानि तत्तदाकारकाणि वासनापरिपाकवशादेव स्वाप्नप्रत्ययवदैन्द्रजालिकप्रतीतिवच्चाविर्भवन्तीत्याक्षेपेण शङ्कते सूत्राभ्यामिति वृत्तिकृतः । इदमपि पूर्ववत् ।

(२) पूर्वसूत्रटिप्पणी द्रष्टव्या । इदमपि न्यायसूचीनिबन्धे वर्तते ।

(३) तदेतद् दूषयति । हेत्वभावादसिद्धिः । तद्व्याचष्टे भाष्यकार इति तात्पर्यटीका । इदं न्यायसूचीनिबन्धे वर्तते ।

इदानीं मन्दकर्मणि कर्णः किमु न क्रियत इत्यत्र कारणमाह ।

त्रिज्याभक्तः कर्णः परिधिगुणो बाहुकोटिगुणकारः ।
असकृन्मान्दे तत् फलमाद्यसमं नात्र कर्णोऽस्मात् ॥ २९ ॥

'स्वल्पान्तरत्वान्मृदुकर्मणीह'–इत्यादिभास्करोक्तेन स्पष्टेयमार्या ॥ २९ ॥

इदानीं विशेषमाह ।

प्रतिपादनार्थमुच्चं प्रकल्पितं ग्रहगतेस्तथा पातः ।
भुक्तेरूनाधिकता मानस्य च भवति कर्णवशात् ॥ ३० ॥

इति स्फुटगतिवासना ।

ग्रहगतेः प्रतिपादनार्थमुच्चं प्रकल्पितं तथा पातश्च प्रकल्पितः । क्रान्तिवृत्तीयगत्यर्थमुच्चं विमण्डलीयगत्यर्थं पातः प्रकल्पित इति । कर्णस्य न्यूनाधिकवशात् भुक्तेर्बिम्बमानस्य च न्यूनाधिकता भवतीति । एवं मन्दस्पष्टग्रहे स्थितिर्भवति । भौमादीनां शीघ्रकर्णवशतश्च बिम्बमाने न्यूनाधिकता भवति परन्तु स्पष्टगतौ कर्णवशेन न न्यूनाधिकतोत्पद्यत इति छेद्यकेन सर्वं स्फुटम् । 'यः स्यात् प्रदेशः प्रतिमण्डलस्य' इत्यादि तथा 'उच्चस्थितो व्योमचरः सुदूरे' इत्यादि च भास्करोक्तमेतदनुरूपमेव ॥ ३० ॥

इति स्फुटगतिवासना ।

इदानीं योजनात्मककर्णानयनमाह ।

कक्षा व्यासार्धगुणा मण्डललिप्ताविभाजिता कर्णः ।
स्वकलाकर्णेन गुणः कर्णस्त्रिज्याहृतः स्पष्टः ॥ ३१ ॥

ग्रहकक्षा व्यासार्धेन त्रिज्यया गुणा मण्डललिप्ताभिश्चक्रकलाभिर्विभाजिता फलं मध्यमयोजनकर्णः स्यात् । स कर्णः स्वकलाकर्णेन स्फुटशीघ्रकर्णेन गुणस्त्रिज्याहृतः स्पष्टो योजनकर्णः स्यात् ।

अत्रोपपत्तिः । पूर्वार्धस्य परिधितो व्यासार्धानयनेन स्फुटा । त्रिज्यातुल्येन कलाकर्णेन मध्यो योजनकर्णस्तदा स्वेष्टकलाकर्णेन किमित्य-

नुपातेन स्फुटो योजनकर्णो भवति। 'लिप्ताश्रुतिघ्नस्त्रिगुणेन भक्तः'-इत्यादि भास्करोक्तमेतदनुरूपमेव ॥ ३१ ॥

इदानीं भूरविचन्द्राणां योजनव्यासानाह।

मृद्दहनजलमयानां
विष्कम्भो योजनैः क्षिनेन्दूनाम्।
शशिवसुतिथिभि-१५८१ र्यमप-
क्षशररसैः ६५२२ शून्यवसुवेदैः ४८० ॥ ३२ ॥

क्षिनेन्दूनां भू-रवि-चन्द्राणां किंविशिष्टानां मृद्दहनजलमयानां क्रमेण शशिवसुतिथिभिर्यमपक्षशररसैः शून्यवसुवेदैर्योजनैर्विष्कम्भो ज्ञेयः। भूगोलस्य मृण्मयस्य व्यासः = १५८१। सूर्यगोलस्याग्निमयस्य व्यासः = ६५२२। जलमयस्य चन्द्रस्य व्यासः = ४८०। योजनात्मको ज्ञेय इत्यर्थः।

अत्रोपपत्तिः। भास्करविधिना 'पुरान्तरं चेदिदमुत्तरं स्यात्'-इत्यादिना तथा 'बिम्बं रवेर्द्विद्विशरर्तुसङ्ख्यानि'-इत्यादिना तत्तुल्यासनया च स्फुटा ॥ ३२ ॥

इदानीं भूभाबिम्बमाह।

अर्कव्यासान्तरगुणमिन्दुस्फुटकर्णमर्ककर्णहृतम्।
प्रोह्य भुवो भूच्छाया विष्कम्भश्चन्द्रकक्षायाम् ॥ ३३ ॥

इन्दुस्फुटकर्णं अर्कव्यासान्तरगुणमर्ककर्णहृतं फलं भुवो भूव्यासात् प्रोह्य चन्द्रकक्षायां भूच्छायाविष्कम्भो भवति। 'भूव्यासहीनं रविबिम्ब-मिन्दुकर्णाहतम्-इत्यादि भास्करोक्तमेतदनुरूपमेव।

अत्रोपपत्तिः। भास्करोक्तेन विधिना स्फुटा। अनेन प्रकारेण चन्द्रकक्षायां भूभाव्यासो नायातीत्यस्य मीमांसा कमलाकरेण तत्त्ववि-वेकचन्द्रग्रहणाधिकारे समीचीना कृता। लाघवेन सूक्ष्मभूभाकलावि-म्बानयनं मदुक्तं यथा।

रवितनुदलजीवा लम्बनोत्था विहीना
क्षितिजजनितया तत्कार्मुकं कार्यमार्यैः।

द्विजपतिजपराख्यं लम्बनं तद्विहीनं
भवति वसुमतीभाबिम्बखण्डं सुसूक्ष्मम् ॥

अत्रोपपत्तिर्भूभावेक्षण त्रिकोणमित्या च सुगमा ।

यदि रविभूबिम्बयोर्बहिरुपान्तिभवा स्पर्शरेखा क्रियते तदा भूभाभोत्पद्यते यद्वशाच्चन्द्रबिम्बे मालिन्यमुपलभ्यते । भूभाभासाधनार्थमुपरिभूभानयनसूत्रे प्रथमपादे 'विहीना' स्थाने 'च युक्ता' तृतीयपादे 'तद्विहीन'मित्यत्र 'तद्युतं सत्' इति ज्ञेयम् । बहुधान्यविशेषार्थं मदीयं ग्रहणकरणं निरीक्षणीयमिति ॥ ३३ ॥

इदानीं कलात्मकबिम्बान्याह ।

तद्गुणितं व्यासार्धं शशिकर्णहृतं तमःप्रमाणकलाः ।
एवं त्रिज्या रविशशिविष्कम्भगुणा स्वकर्णहृता ॥ ३४ ॥

स्पष्टार्थम् । 'सूर्येन्दुभूभातनुयोजनानि त्रिज्याहतानि'–इत्यादि भास्करोक्तमेतदनुरूपमेव ।

अत्रोपपत्तिः । त्रैराशिकेन भास्करोक्त्या स्फुटा ॥ ३४ ॥

इदानीं छादकमाह ।

भूच्छायेन्दुं चन्द्रः सूर्यं छादयति मानयोगार्धात् ।
विक्षेपो यद्यूनः शुक्लेतरपक्षदृश्यन्ते ॥ ३५ ॥

यदि मानयोगार्धात् मानैक्यखण्डाद्विक्षेप ऊनस्तदा शुक्ले पक्षदृश्यन्ते पूर्णान्ते भूच्छाया चन्द्रं छादयति । इतरपक्षदृश्यन्ते दर्शान्ते चन्द्रः सूर्यं छादयति । 'भूभा विधुं विधुरिनं ग्रहणे पिधत्ते'–इति भास्करोक्तमेतदनुरूपमेव ॥ ३५ ॥

अथ ग्रहणवासना ।

तत्रादौ छादकनिर्णयमाह ।

महदिन्दोरावरणं कुण्ठविषाणो यतोऽर्धसञ्छन्नः ।
अर्धच्छन्नो भानुस्तीक्ष्णविषाणस्ततोऽस्याल्पम् ॥ ३६ ॥

यतोऽर्धसञ्छन्नश्चन्द्रः कुण्ठविषाणो भवत्यत इन्दोरावरणं छादकमानं महत् । भानुश्चार्धच्छन्नस्तीक्ष्णविषाणो भवति ततस्तस्मादस्यावरणमल्पमस्तीत्यवगम्यते । लघुपरिधौ महापरिधिखण्डितेन विषाणयोः परिधियोगबिन्द्वोः कुण्ठता महापरिधौ च लघुपरिधिखण्डितेन विषाणयोस्तीक्ष्णतोत्पद्यते । अतश्चन्द्रस्य छादकः पृथुतरः सूर्यस्याल्पतर इति । 'छादकः पृथुतरस्ततो विधोः'—इत्यादि भास्करोक्तमेतदनुरूपमेव ॥ ३६ ॥

इदानीं राहुकृतं ग्रहणं नेति वराहमिहिरादीनां मतं प्रतिपादयति ।

यदि राहुः प्राग्भागादिन्दुं छादयति किं तथा नार्कम् ।
स्थित्यर्धं महदिन्दोर्यथा तथा किं न सूर्यस्य ॥ ३७ ॥
किं प्रतिविषयं सूर्यो राहुश्चान्यो यतो रविग्रहणे ।
ग्रासान्यत्वं न ततो राहुकृतं ग्रहणमर्केन्द्वोः ॥ ३८ ॥
एवं वराहमिहिरश्रीषेणार्यभटविष्णुचन्द्राद्यैः ।
लोकविरुद्धमभिहितं वेदस्मृतिसंहिताबाह्यम् ॥ ३९ ॥

आर्याद्वयं स्पष्टार्थम् । एवं वराहमिहिरादिभी राहुकृतं रवीन्द्वोर्न ग्रहणमिति लोकविरुद्धं वेदस्मृतिसंहिताबाह्यं चाभिहितम् ॥ ३७—३९ ॥

इदानीं संहितामतमवलम्ब्य वराहादीन् निराकरोति ।

यद्येवं ग्रहणफलं गर्गाद्यैः संहितासु यदभिहितम् ।
तदभावे होमजपस्नानादीनां फलाभावः ॥ ४० ॥

गर्गाद्यै राहुवशतः संहितासु यद्ग्रहणफलमभिहितं तद्व्यर्थमेव यद्येवमेव वराहमिहिरादीनां मतमिति । तदभावे राहुकृतग्रहणाभावे । शेषं स्पष्टार्थम् ॥ ४० ॥

इदानीं लोकप्रथामाह ।

राहुकृतं ग्रहणद्वयमागोपालाङ्गनादिसिद्धमिदम् ।
बहुफलमिदमपि सिद्धं जपहोमस्नानफलमत्र ॥ ४१ ॥

स्पष्टार्थम् ॥ ४१ ॥

इदानीं राहुकृतं ग्रहणमित्यत्र स्मृतिवाक्यं प्रदर्शयति ।

स्मृतिषूक्तं न स्नानं राहोरन्यत्र दर्शनाद्रात्रौ ।
राहुग्रस्ते सूर्ये सर्वं गङ्गासमं तोयम् ॥ ४२ ॥

स्पष्टार्थम् ॥ ४२ ॥

इदानीं वेदवाक्यं राहुकृतग्रहणे प्रदर्शयति ।

स्वर्भानुरासुरिरिनं
तमसा विव्याध वेदवाक्यमिदम् ।
श्रुतिसंहितास्मृतीनां
भवति यथैक्यं तदुक्तिरतः ॥ ४३ ॥

'स्वर्भानुर्ह वा आसुरिः सूर्यं तमसा विव्याध'—इति माध्यन्दिनी श्रुतिः । अथ यथा श्रुतिसंहितास्मृतीनामैक्यं भवति तथा कथनमुचितमत एकवाक्यताप्रतिपादनार्थं तदुक्तिरत्रोचिता ॥ ४३ ॥

इदानीं स्वोक्तिमाह ।

राहुस्तच्छादयति प्रविशति यच्छुक्लपक्षदर्श्यन्ते ।
भूछायातमसीन्दोर्वरप्रदानात् कमलयोनेः ॥ ४४ ॥
चन्द्रोऽम्बुमयोऽधःस्थो यदग्निमयभास्करस्य मासान्ते ।
छादयति शमिततापो राहुश्छादयति तत् सवितुः ॥ ४५ ॥

इन्दोर्यद्बिम्बं शुक्लपक्षदर्श्यन्ते पूर्णान्ते भूछायातमसि भूभान्धकारे प्रविशति तदेव बिम्बं कमलयोनेर्ब्रह्मणो वरप्रदानाद्भूछायामाश्रित्य राहुश्छादयति । एवं मासान्ते दर्शान्तेऽग्निमयस्य भास्करस्य यद्बिम्बं जलमयः शमिततापोऽधःस्थश्च चन्द्रश्छादयति सवितुः सूर्यस्य तदेव बिम्बं चन्द्रच्छायामाश्रित्य राहुश्छादयतीति । भास्करोक्तिरप्येतादृशी ॥ ४५ ॥

इदानीं राहुतनुमाह ।

भूछायाव्याससमः शशिकक्षायां स्थितः शशिग्रहणे ।
राहुश्छादयतीन्दुं सूर्यग्रहणेऽर्कमिन्दुसमः ॥ ४६ ॥

शशिग्रहणे शशिकक्षायां स्थितो भूछायाव्याससमो राहुरिन्दुं सूर्यग्रहणे चेन्दुसमोऽर्कं सूर्यं च छादयति ॥ ४६ ॥

इदानीं राहुदर्शनं ग्रहणे किमु न भवतीत्याशङ्काह ।

यत् तदधिकं तमोमयराहुव्यासस्य सूर्यदृष्टत्वात् ।
नश्यति भूछायेन्द्वोर्व्याससमोऽस्माद्भवति राहुः ॥ ४७ ॥

तमोमयराहुव्यासस्य यन्मानं तदधिकं ताभ्यां भूभाचन्द्रव्यासाभ्यामधिकं तत् सूर्यदृष्टत्वात् तत्तेजसा नश्यति तस्माद्राहुर्भूछायासमश्चन्द्रमसो व्याससमश्चैव भवति । स चान्धकारमध्ये स्थितत्वाच दृश्यो भवतीति स्फुटम् ॥ ४७ ॥

इदानीं निर्गलितार्थमाह ।

भूछायेन्दुमतो हि ग्रहणे छादयति नार्कमिन्दुर्वा ।
तत्स्थस्तद्व्याससमो राहुश्छादयति शशिसूर्यौ ॥ ४८ ॥

अतो ग्रहणे भूछाया चन्द्रं वा चन्द्रः सूर्यं न छादयति । किन्तु तद्व्याससमस्तत्स्थो राहुरेव शशिसूर्यौ छादयतीति सिद्धान्तः ॥ ४८ ॥

इति ग्रहणवासना ।

अथ गोलबन्धाधिकारः।

तत्रादौ पूर्वापरयाम्योत्तरक्षितिजवृत्तान्याह।

प्राच्यपरं सममण्डलमन्यद्याम्योत्तरं क्षितिजमन्यत्।
परिकरवत् तन्मध्ये भूगोलस्तत्स्थितद्रष्टुः॥ ४९॥

पूर्वापरमेव वृत्तं सममण्डलम्। अन्यद्याम्योत्तरवृत्तम्। परिकरवत् कटिबन्धनवत् तदर्धेऽन्यत् क्षितिजम्। तन्मध्ये तेषां वृत्तानां गर्भीयकेन्द्रे तत्स्थितद्रष्टुरूस्य भूगोलस्योपरि स्थितो यो द्रष्टा तस्य भूगोलः कल्प्य इति॥ ४९॥

इदानीमुन्मण्डलमाह।

पूर्वापरयोर्लग्नं याम्योत्तरयोर्नतोन्नतं क्षितिजात्।
स्वाक्षांशैरुन्मण्डलमहर्निशोर्हानिवृद्धिकरम्॥ ५०॥

स्पष्टार्थम्। 'पूर्वापरक्षितिजसक्तम् ...विलग्नम्'—इत्यादि भास्करोक्तमेतदनुरूपम्॥ ५०॥

इदानीं विषुवन्मण्डलमाह।

विषुवन्मण्डलमूर्ध्वं सममण्डलतः स्थितं स्वकाक्षांशैः।
याम्येनोत्तरतोऽधः क्षितिजे प्राच्यपरयोर्लग्नम्॥ ५१॥

ऊर्ध्वं खस्वस्तिकम्। अधोऽधःस्वस्तिकम्। शेषं स्पष्टम्।
'पूर्वापरस्वस्तिकयोर्विलग्नम्'—इत्यादि भास्करोक्तं चिन्त्यम्॥ ५१॥

इदानीं क्रान्तिमण्डलमाह।

विषुवन्मण्डललग्नं मेषतुलादावुदक् कुलीरादौ।
जिनभागैर्याम्येन मृगादावपमण्डलमिहार्कः॥ ५२॥
पाताश्चन्द्रादीनां भ्रमन्ति भार्धे रवेश्च भूछाया।
पातादपमण्डलवद् विमण्डलानि स्वविक्षेपैः॥ ५३॥

स्पष्टार्थम्। 'क्रान्तिवृत्तं विधेयम्'—इत्यादि तथा 'क्रान्तिपाते च पाताद्भषट्कान्तरे' इत्यादि भास्करोक्तं चिन्त्यम्। आचार्यमतेऽयनाभावो

ज्ञेयः। पातादपमण्डलवदित्यनेन ग्रहाणां विमण्डलानि न्यस्तानीत्यस्ये सम्बन्धः।

इदानीं विमण्डलान्याह।

सौम्यं विमण्डलार्धं प्रथमं याम्यं द्वितीयमेतेषु।
चन्द्रकुजजीवमन्दा भ्रमन्ति शीघ्रेण बुधशुक्रौ॥ ५४॥

प्रथमं विमण्डलार्धं मेषादिराशिषट्कं विक्षेपांशैः सौम्यं द्वितीयमर्धं तुलादिषट्कं च याम्यं विक्षेपांशैर्बध्नीयात्। बुधशुक्रौ शीघ्रेण शीघ्रोच्चेन स्वस्वविमण्डले भ्रमतः। तयोः शीघ्रोच्चे विमण्डले भ्रमत इति शेषं स्पष्टार्थम्॥ ५४॥

इदानीं दृग्मण्डलमाह।

दृग्मण्डलार्धमूर्ध्वं यत् तत्परिधिस्थितं ग्रहं द्रष्टा।
पश्यति यतः क्षितिस्थस्तद्भ्रमति ततो ग्रहाभिमुखम्॥५५॥

यतः क्षितिस्थः क्षितिगर्भस्थो द्रष्टा यदूर्ध्वं दृग्मण्डलार्धं तत्परिधिस्थितं ग्रहं पश्यति ततस्तस्मात् कारणात् तद्दृग्मण्डलं ग्रहाभिमुखं भ्रमति। 'ऊर्ध्वाधरस्वस्तिककीलयुग्मे' इत्यादि भास्करोक्तं विचिन्त्यम्॥५५॥

इदानीं दृक्क्षेपमण्डलमाह।

क्षितिजापमण्डलयुतिर्लग्नं लग्नाग्रया दिशा लग्नम्।
दृक्क्षेपमण्डलं दक्षिणोत्तरं वित्रिभविलग्ने॥ ५६॥

क्षितिजक्रान्तिमण्डलयोर्यत्र युतिस्तदेव लग्नम्। दृक्क्षेपमण्डलं लग्नाग्रया दिशा लग्नं वित्रिभलग्ने वित्रिभलग्नस्थाने क्रान्तिमण्डले दक्षिणोत्तरं तिर्यग्भवति। लग्नाग्रा यद्युत्तरा तदा लग्नाग्रांशैर्दक्षिणसमस्थानात् पूर्वस्वस्तिकादिशि दक्षिणायां च लग्नाग्रांशैर्दक्षिणसमस्थानात् पश्चिमस्वस्तिकादिशि क्षितिजे लग्नं वित्रिभस्वस्तिकगतं दृक्क्षेपमण्डलं भवतीत्यर्थः। 'ज्ञेयं तदेवाखिलखेचराणाम्'—इत्यादि भास्करोक्तं विचिन्त्यम्॥५६॥

इदानीं द्वादशराशीनामहोरात्रवृत्तान्याह।

विषुवद्वद्बध्नीयात् क्रान्त्यंशसमान्तरेष्वजादीनाम्।

वृत्तत्रितयं व्यस्तं कर्क्यादीनां तुलादीनाम् ॥ ५७ ॥
विषुवद्दिग्गतोऽन्यन्मकरादीनां तदेव विपरीतम् ।
स्वाहोरात्राण्येषां व्यासाः पृथगेवमिष्टमपि ॥ ५८ ॥

स्वाहोरात्राणि क्रुज्या एषामहोरात्रवृत्तानां व्यासा ज्ञेयाः । एवमिष्टमहोरात्रवृत्तमपि पृथग्गोलोपरि निवेश्यम् । शेषं स्पष्टम् । 'ईप्सितक्रान्तितुल्येऽन्तरे'-इत्यादि तथा 'मध्य कल्प्या मेषाद्याः' इत्यादि च भास्करोक्तं विचिन्त्यम् ॥ ५७–५८ ॥

इदानीं राश्युदयाः किमु समा नेत्याशङ्क्याह ।

लङ्कासमपश्चिमगं प्राणेन कलां भमण्डलं भ्रमति ।
अपमण्डलस्य राशिर्द्वादशभागः क्षितिजलग्नाः ॥ ५९ ॥
यान्त्युदयं मेषाद्या यतस्तदुदया न कालसमाः ।
क्रान्तिवशाल्लङ्कायां तदूनताधिक्यमक्षवशात् ॥ ६० ॥

लङ्कासमपश्चिमगं भमण्डलं भचक्रमध्यप्रदेशरूपं नाडीमण्डलं प्राणेनैकेनासुना कलामेकां कलां भ्रमति । नाडीमण्डलस्यैका कलैकेनासुनोदेति । क्रान्तिमण्डलस्य द्वादशभागो द्वादशसमानभागो राशिरुच्यते । ते मेषाद्याः क्षितिजलग्ना यत उदयं यान्त्यतो लङ्कायां क्रान्तिवशात् तिरश्चीनत्वात् तदुदयाः कालसमाः कालेन समा न सन्ति । एवं स्वदेशेऽपि क्रान्तिवशादक्षवशाच्च तेषां राशीनामुदयेषु ऊनताधिक्यं भवति । 'यो हि प्रदेशोऽपममण्डलस्य तिर्यक्स्थितो यात्युदयं तथाऽस्तम्'–इत्यादि भास्करोक्तं चिन्त्यम् ॥ ६० ॥

इदानीं चरार्धयोः संस्थानमाह ।

क्षितिजोन्मण्डलयोर्यत् स्वाहोरात्रान्तरं चरदलं तत् ।
क्षितिजेऽग्रा प्राच्यपरस्वाहोरात्रान्तरांशज्या ॥ ६१ ॥

स्पष्टार्थम् । 'उन्मण्डलक्ष्मावलयान्तराले–

इत्यादि तथा 'क्ष्माजे धुरात्रसममण्डलमध्यभाग'–इत्यादि भास्करोक्तमेतदनुरूपं विचिन्त्यम् ॥ ६१ ॥

इदानीं शङ्कुदृग्ज्ययोः संस्थानमाह ।

स्वाहोरात्रे क्षितिजाद्दिनगतशेषोच्चता रवेः शङ्कुः ।
तस्माद्दिनगतशेषं शङ्कुकुमध्यान्तरं दृग्ज्या ॥ ६२ ॥

क्षितिजात् सकाशात् स्वाहोरात्रवृत्ते दिनगते वा पश्चिमकपाले दिनशेषे या रवेरुच्चता लम्बरूपा स शङ्कुर्भवति । तस्माच्छङ्कोःस्य त्रिप्रश्नाधिकारविधिना दिनगतशेषं च भवति । शङ्कुकुमध्यान्तरं शङ्कुमूलस्य कुमध्यस्य भूगर्भस्य चान्तरं दृग्ज्येत्युच्यते । रविकेन्द्रात् क्षितिजोपरि लम्बः शङ्कुः । शङ्कुमूलं भूगर्भान्तरं च दृग्ज्या भवतीत्यर्थः ॥ ६२ ॥

इदानीं प्रकारान्तरेण पुनस्तयोः संस्थानं शङ्कुतलं चाह ।

दृग्मण्डले नतांशज्या दृग्ज्या शङ्कुरुन्नतांशज्या ।
अर्कोदयास्तसूत्राद्दिनशङ्कोर्दक्षिणेन तलम् ॥ ६३ ॥

दिनशङ्कोर्दिवा शङ्कोस्तलं मूलमर्कोदयास्तसूत्राद्दक्षिणेन भवति । अर्कग्रहणमुपलक्षणार्थम् ।

शेषं स्पष्टार्थम् । 'दृष्टिमण्डलभवा लवाः कुजात्'—इत्यादि भास्करोक्तमेतदनुरूपं विचिन्त्यम् ॥ ६३ ॥

इदानीं दृग्गोलस्य दृश्यादृश्यत्वं लम्बनावनत्युत्पत्तौ कारणं चाह ।

दृश्यादृश्यं दृग्गोलार्धं भूव्यासदलविहीनयुतम् ।
द्रष्टा भूगोलोपरि यतस्ततो लम्बनावनती ॥ ६४ ॥

दृग्गोलार्धं दृग्मण्डलार्धं भूव्यासदलेन विहीनं कुपृष्ठगानां दृश्यखण्डं भूव्यासदलेन युतं चादृश्यखण्डं भवति । यतो द्रष्टा भूगोलोपरि भूपृष्ठे तिष्ठति ततस्तस्माल्लम्बनावनती भवतः । 'कुपृष्ठगानां कुदलेन हीनम्'—इत्यादि तथा 'यतः कुर्धाच्छ्रितो द्रष्टा'—इत्यादि भास्करोक्तमेतदनुरूपं विचिन्त्यम् ॥ ६४ ॥

इदानीं परमलम्बनावनती चाह ।

क्षितिजे भूदललिप्ताः कक्षायां इकूनतिर्नभोमध्यात् ।
अवनतिलिप्ता याम्योत्तरा रविग्रहवदन्यत्र ॥ ६५ ॥

नभोमध्यात् खस्वस्तिकात् कक्षायां ग्रहगोले दृग्मण्डले क्षितिजे या भूदललिप्ताः कुक्षवलिप्ताः सा दृङ्नतिर्दृग्लम्बनं परमुच्यते । अवनतिलिप्ता तत्र दृग्मण्डले याम्योत्तरा लम्बरूपा भवति । अन्यच्च ग्रहयोर्वा भग्रहयोर्युतावेवं दृग्लम्बननतिसंस्थानं विज्ञाय स्पष्टलम्बनादिकं रविग्रहवत् कार्यमिति दिग्मात्रमिहाचार्येण प्रदर्शितं ग्रहयुत्यादौ च विशेषतः प्रतिपादितमिति ॥ ६५ ॥

इदानीं दृक्कर्माह ।

सत्रिगृहक्रान्तिरुदग्दक्षिणयोस्त्रिज्यया हृतं वलनम् ।
विक्षेपगुणमृणधनं ग्रहेऽन्यदृक्कर्म चरदलवत् ॥ ६६ ॥

उदग्दक्षिणयोरुत्तरदक्षिणायनयोः सत्रिगृहक्रान्तिः सत्रिभग्रहक्रान्तिज्या वलनमायनं वलनं भवति । तद्विक्षेपेण गुणं त्रिज्यया हृतं ग्रहे ऋणं वा धनमायनं दृक्कर्म भवति । अन्यद्दृक्कर्माक्षजं दृक्कर्म चरदलवत् चरसाधनवज्ज्ञेयम् ।

अत्रोपपत्त्यर्थमुदयास्ताधिकारे ३–४ श्लोकयोरुपपत्तिर्विलोक्या । अत्रैव चतुर्वेदाचार्येण 'सत्रिगृहग्रहोत्क्रमज्यया क्रान्तिः साध्ये'त्यन्यथा व्याख्यातमत एव भास्करः 'ब्रह्मगुप्तकृतिरत्र सुन्दरी सान्यथा मधुनुर्गैर्विचार्यते' इत्याद्युक्तवान् ॥ ६६ ॥

इदानीं ग्रहर्क्षगोलयोः स्थिरवृत्तान्याह ।

कक्षामण्डलतुल्यं प्राच्यपरं दक्षिणोत्तरं क्षितिजम् ।
उन्मण्डलविषुवन्मण्डले स्थिराणि ग्रहर्क्षाणाम् ॥ ६७ ॥

पूर्वापरम् । दक्षिणोत्तरम् । क्षितिजम् । उन्मण्डलम् । विषुवन्मण्डलम् । सर्वं कक्षामण्डलतुल्यं समानं महद्वृत्तं च ज्ञेयम् । ग्रहर्क्षाणां गोलयोरेतानि स्थिराणि वृत्तानि सन्तीति ॥ ६७ ॥

इदानीं ग्रहाणां चलवृत्तान्याह ।

मन्दोच्चानां सशैलोच्चनीचवृत्तानि पञ्च शीघ्राणाम् ।
प्रतिमण्डलानि चैवं प्रत्येकं भास्करादीनाम् ॥ ६८ ॥

दृग्मण्डलविक्षेपापमण्डलानि क्षपाकरादीनाम् ।
षट्कं विमण्डलानां चलवृत्तान्येकपञ्चाशत् ॥ ६९ ॥

मन्दनीचोच्चवृत्तानि	— ७
भौमादीनां शीघ्रनीचोच्चवृत्तानि	— ५
मन्दप्रतिवृत्तानि	— ७
शीघ्रप्रतिवृत्तानि	— ५
दृग्मण्डलं दृक्क्षेपमण्डलं कक्षामण्डलं चेति सप्तानां ग्रहाणाम्	— २१
चन्द्रादीनां षड् विमण्डलानि	— ६
	५१

एवं चलवृत्तान्येकपञ्चाशत् सन्तीति ॥ ६८–६९ ॥

इदानीमध्यायोपसंहारमाह ।

यत् स्पष्टीकरणार्थं गोलादुत्प्रेक्ष्य तत् कृतं सर्वम् ।
गोलाध्यायः सप्तत्यार्याणामेकविंशोऽयम् ॥ ७० ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते गोलाध्यायो नामैकविंशतितमोऽध्यायः ॥ २१ ॥

इह मया यत् स्पष्टीकरणार्थं सर्वं कृतं तद्गोलादुत्प्रेक्ष्यावगम्य कृतमतः सर्वं सयुक्तिकं ज्ञेयमिति । शेषं स्पष्टार्थम् ॥ ७० ॥

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितो गोलविधौ सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्तनूतनतिलके गोलाध्यायो नामैकविंशोऽध्यायः ॥ २१ ॥

अथ यन्त्राध्यायः ।

तत्रादौ गोलप्रशंसामाह ।

मध्याद्यमिह यदुक्तं तत् प्रत्यक्षमिव दर्शयति यस्मात् ।
तस्मादाचार्यत्वं गोलविदो भवति नान्यस्य ॥ १ ॥

यस्मादिह सिद्धान्ते यन्मध्याद्यं गणितमुक्तमस्ति तत् सर्वं गोलवित् प्रत्यक्षमिव दर्शयति तस्माद्गोलविद एवाचार्यत्वं भवति नान्यस्येति ॥ १ ॥

इदानीं स्वगोलकथने कारणमाह ।

आचार्यैर्न ज्ञातः श्रीषेणार्यभटविष्णुचन्द्राद्यैः ।
गोलो यस्मात् तस्मात् ब्राह्मो गोलः कृतः स्पष्टः ॥ २ ॥

यस्मात् श्रीषेणार्यभटविष्णुचन्द्राद्यैर्गोलो न ज्ञातस्तस्मान्मयाऽयं ब्राह्मो गोलः स्पष्टः कृत इति ॥ २ ॥

इदानीं गणितगोलप्रशंसामाह ।

गणितज्ञो गोलज्ञो गोलज्ञो ग्रहगतिं विजानाति ।
यो गणितगोलबाह्यो जानाति ग्रहगतिं स कथम् ॥ ३ ॥

यो गणितज्ञः स गोलज्ञो भवति गोलस्य गणितक्षेत्रान्तर्गतत्वात् । यो गोलज्ञः स एव ग्रहगतिं विशेषेण जानाति । तस्माद्यो गणितगोलबाह्योऽस्ति स कथं ग्रहगतिं जानाति । न जानातीत्यर्थः ॥ ३ ॥

इदानीं यन्त्राध्यायारम्भे कारणमाह ।

गोलस्य परिच्छेदः कर्तुं यन्त्रैर्विना यतोऽशक्यः ।
संक्षिप्तं स्पष्टार्थं यन्त्राध्यायं ततो वक्ष्ये ॥ ४ ॥

यतो यन्त्रैर्विना गोलस्य परिच्छेदः सम्यग्विचारः कर्तुं गणकोऽशक्तो भवति ततो गोलस्य स्पष्टार्थं संक्षिप्तं यन्त्राध्यायमहं वक्ष्य इत्याचार्योक्तिः ॥ ४ ॥

इदानीं यन्त्राण्याह ।

सप्तदशकालयन्त्राण्यतो धनुस्तुर्यगोलकं चक्रम् ।
यष्टिः शङ्कुर्घटिका कपालकं कर्त्तरी पीठम् ॥ ५ ॥
सलिलं भ्रमोऽवलम्बः कर्णश्छाया दिनार्धमर्कोऽक्षः ।
नतकालज्ञानार्थं तेषां संसाधनान्यष्टौ ॥ ६ ॥

अतो धनुर्यन्त्रम् । तुर्यगोलं तुरीयम् । चक्रयन्त्रम् । यष्टिः । शङ्कुः । घटिका घटीयन्त्रम् । कपालयन्त्रम् । कर्त्तरी । पीठसंज्ञं यन्त्रम् । सलिलं जलम् । भ्रमः शाणः । अवलम्बोऽवलम्बसूत्रम् । कर्णश्छायाकर्णः । छाया शङ्कुच्छाया । दिनार्धं दिनार्धमानम् । अर्कः सूर्यः । अक्षः पलांशाः । अतो नतकालज्ञानार्थं सप्तदश कालयन्त्राणि सन्ति । तेषां यन्त्राणां मध्ये सलिलादीन्यष्टौ यन्त्रसंसाधनानि यन्त्ररचनामूलभूतानि सन्ति ॥ ५–६ ॥

इदानीं सलिलादिभ्यः किं क्रियत इत्याह ।

सलिलेन समं साध्यं भ्रमेण वृत्तमवलम्बकेनोर्ध्वम् ।
तिर्यक्कर्णेनान्यैः कथितैश्च नव प्रवक्ष्यामि ॥ ७ ॥

सलिलेन समं साम्यं साध्यम् । भ्रमेण शाणेन वृत्तं साध्यम् । अवलम्बकेनोर्ध्वमूर्ध्वाधरत्वं साध्यम् । कर्णेनान्यैः कथितैश्छायादिभिश्च यन्त्रस्य तिर्यक् तिर्यक्त्वं साध्यम् । एवमवशिष्टानि नव यन्त्राणि प्रवक्ष्याम्यहमित्याचार्योक्तिः ॥ ७ ॥

इदानीं धनुर्यन्त्रमाह ।

धार्यं धनुस्तथाऽन्यत् छायासाम्यं यथोन्नता भागाः ।
दिनगतशेषा घटिकाः स्वलम्बमुक्ता धनुर्मध्यात् ॥ ८ ॥

धनुर्यन्त्रं तथा धार्यं यथाऽन्यत् छायासाम्यं भवेत् । अत्रेतदुक्तं भवति । यस्मिन् दिने धनुर्यन्त्रेण कालज्ञानमभीष्टं तद्दिनसम्बन्धिक्रान्ति-चरादिना प्रतिघटिकोन्नतकालवशेन धनुर्यन्त्रकेन्द्रस्थापितेष्टप्रमाणकीलस्य छायाः प्रसाध्य स्वस्वोन्नतकालसम्मुखेऽङ्क्याः । दृष्टदिने तथा धनुर्धार्यं

यथा कीलच्छायाधनुरग्रयोरन्तरे परिधौ कीलच्छायासम्बन्धि गणितागतशङ्कुभागसमा भागाः स्युस्तथाऽग्रे वाऽवलम्बोऽपि वृत्तसूत्राकारो लगति । अतो धनुर्मध्यात् स्वलम्बभुक्ता भागा रविहृतमा भागास्तथा तत्राङ्कित उन्नतकालश्च पूर्वापरकपालयोर्दिनगतशेषा घटिकाः स्युः ।

अत्रोपपत्तिः । गोलयुक्त्यैव स्फुटा ॥ ८ ॥

इदानीं प्रकारान्तरेण यन्त्रं सूर्याभिमुखे कथं समं धार्यमित्येतदर्थमाह ।

धार्यं समं तथा वा ज्या छाया मध्यगा यथा भवति ।
अग्रादिष्टा घटिका ज्यामध्यच्छायया भुक्ताः ॥ ९ ॥

यथा ज्याछाया धनुषो ज्यायाः पूर्णज्यायाश्छाया मध्यगा धनुषो मध्यगा भवति तथा वा यन्त्रं समं धार्यम् । वृत्तमण्डलाकारं धार्यं यथा तत्पार्श्वयो रवेस्तुल्यं तेजो लगतीत्यर्थः । एवं ज्यामध्यच्छायया ज्याया धनुःपूर्णज्याया मध्येऽर्थात् केन्द्रे स्थापितो यः कीलस्तस्य छायया भुक्ता या धनुःकोट्यग्रादङ्किता घटिकास्ता इष्टा घटिकाः स्युः ॥ ९ ॥

गोलयुक्तिरेव वासनाऽत्र ज्ञेया ॥ ९ ॥

इदानीं प्रकारान्तरेणेष्टघटिका धनुःस्वरूपं चाह ।

घटिका स्वशङ्कुभागैः पृथग्गतैर्लम्बभूसमज्यार्धात् ।
साशीतिशततांशाङ्कं चक्रस्यार्धं धनुर्यन्त्रम् ॥ १० ॥

पृथग्गतैः स्वशङ्कुभागैर्लम्बभूसमज्यार्धाद्वा घटिकाः साध्याः । अत्रैतदुक्तं भवति । यदि स्वाभीष्टदिनेष्टकाले शङ्कुभागा एव विदितास्तदा धनुःकोट्यग्रात् तान् भागान् दत्त्वा तदग्राद्धनुर्ज्या या भूमिस्तस्या उपरि लम्ब एव यो ज्यार्धात् ज्याखण्डतो भवति स शङ्कुस्तस्मात् त्रिप्रश्नविधिनेष्टकान्तिचरादिनेष्टान्त्यामवगम्य घटिका ज्ञेया इति । चक्रस्य वृत्तस्यार्धं साशीतिशतताङ्कं चक्रार्धांशाङ्कं धनुर्यन्त्रं भवति ॥ १० ॥

इदानीं परोक्तघट्यानयनं निराकरोति ।

मध्यदिवसोन्नतांशैर्दिनार्धनाडीर्वदन्ति तुल्या ये ।
ते मूर्खास्तच्छाया इष्टच्छायासमा न यतः ॥ ११ ॥

Digitized by Google

ये मध्यदिवसोन्नतांशैर्दिनार्धनाडीस्तुल्या इष्टघटिकाः प्रकल्प्याभीष्टोन्नतांशैरनुपातेनेष्टा घटिका वदन्ति ते मूर्खाः सन्ति । यत इष्टघटीतो यदि दिनार्धघटिकाभिमध्योन्नतांशास्तदेष्टघटिकाभिः किमित्यनुपातेन य इष्टोन्नतांशा आयान्ति तच्छाया वेधोपलब्धेष्टकालिकच्छायासमा न भवन्तीति तेषामानयनमसत् ॥ ११ ॥

इदानीं यन्त्रेण नतोन्नतकालज्ञानार्थमाह ।

जीवां स्वाहोरात्रे परिकल्प्याग्रान्नतोन्नतत्रिज्याः ।
अनुपातात् कार्यास्तुर्यगोलके चक्रके चैवम् ॥ १२ ॥

स्वाहोरात्रे द्युज्यावृत्तेऽनुपातादृग्ज्या कोट्या पलकर्णस्तदा शङ्कुकोट्या किमित्यनुपातात् जीवामिष्टहृतिं प्रकल्प्य ततोऽग्राहनुःकोट्यग्रावतोन्नतत्रिज्याः कार्यास्तज्ज्यावशेन नतोन्नतकालौ कार्यौ । अत्रैतदुक्तं भवति । इष्टहृतिवशेन त्रिज्यानुपातेनेष्टान्त्याः कार्याः । तत्र चरसंस्कारेण सूत्रमुत्पाद्य तत्समां ज्यां धनुषि दत्त्वा धनुरग्राद्या घटिकास्ताश्चरसंस्कृतोन्नतकालघटिकाः । ज्याया धनुर्यन्त्राधरभागपर्यन्तं या घटिकास्ता नतकालघटिकाः । एवं गोलयुक्तिवशान्नतोन्नतकालौ तुर्यगोलके तुरीये चक्रे च भवत इति ॥ १२ ॥

इदानीं यन्त्रादेव नतोन्नतकालज्ञानार्थमाह ।

दिनघटिकाङ्कितयष्ट्यस्तनतज्याग्रमुन्नतज्यां च ।
दिङ्मध्ये च शलाका तच्छायाग्रान्नता नाड्यः ॥ १३ ॥

दिनघटिकाङ्कितयष्टिद्युज्या तस्याः सकाशात् प्रतिघटिकं दिङ्मध्यस्थापितशलाकाच्छाया प्रसाध्या सा रवितो व्यस्तदिक्का भवति । तत्र प्रतिघटिकोन्नतकालसम्बन्धिच्छायाग्रे तात्कालिकं नतज्याग्रं नतज्यामुन्नतज्यां नतकालमुन्नतकालं चाङ्कयेत् । एवमेकस्मिन् फलके प्रतिद्युज्यासम्बन्धिनीं नतकालाद्यङ्कितां भाभ्रमरेखामुत्पादयेत् । इष्टदिनेष्टकाले समधरातले यथादिक्के स्थापिते फलके दिङ्मध्यशलाकाच्छायाग्रं तद्दिनसम्बन्धिभाभ्रमरेखायां यत्र लग्नं तत्राङ्किता नाड्यो नता नाड्यः स्युः । एवं तत्राङ्कितोन्नतकालादित उन्नतकालादिज्ञानं भवतीति गोलयुक्तितः स्फुटम् ॥ १३ ॥

इदानीं धनुर्यन्त्रे विशेषमाह ।

धनुषः पृष्ठे द्रष्ट्रा वेध्या ज्यामध्यसंस्थया दृष्ट्या ।
इष्टान्तरं नतज्या धनुषि च्छायोन्नतज्यायाः ॥ १४ ॥
ज्यार्धं दृष्टेर्दृग्ज्यां नतजीवांशं कुमुन्नतज्यां च ।
धनुषि प्रकल्प्य योज्यं यद्युक्तं नाडिकाद्यं च ॥ १५ ॥

द्रष्ट्रा पुरुषेण धनुषः पृष्ठे ज्यामध्यसंस्थया पूर्णज्योपरिस्थापितनलकरन्ध्रगतया दृष्ट्या इष्टयद्दयोरन्तरम् । उन्नतज्यायाः सकाशात् धनुषि यन्त्रे नतज्या छाया चेत्यादि सर्वं पदार्था वेध्याः । एवं धनुषि धनुर्यन्त्रे दृष्टेर्ज्यार्धमेव दृग्ज्यां नतजीवांशं नतभागान् । कुं भूमिपर्यन्तमर्थात् यन्त्रे कल्पितक्षितिजपर्यन्तमुन्नतज्यां च प्रकल्प्य यन्नाडिकाद्यमुपयुक्तमस्ति तत् सर्वं योज्यं गोलयुक्तितः । तथैव यन्त्रचिन्तामणयादौ तुरीययन्त्रेऽङ्किताश्चोन्नतांशादयः प्रसिद्धाः सिद्धान्तविदाम् ॥ १४–१५ ॥

इदानीमन्यं विशेषमाह ।

अवलम्बनं शलाकां ज्यार्धं यष्टिं प्रकल्प्य वा धनुषि ।
भूम्युच्छ्रायाल्लम्बो यष्ट्युक्तैरानयेत् करणैः ॥ १६ ॥

वा धनुषि धनुर्यन्त्रे केन्द्रगां शलाकामवलम्बनमवलम्बसूत्रं ज्यार्धं चापानां ज्यार्धानि शलाकाप्रोतां यष्टिं च प्रकल्प्य यष्ट्युक्तैर्यष्ट्यादिभिरुदितैः करणैः साधनैर्भूम्युच्छ्रायात् क्षितिजोच्छ्रायाल्लम्बो शङ्कुभागादीन् गणकश्चानयेत् आचार्योक्तित एवं तथैव भास्करेण फलकयन्त्रे सर्वं रचितमिति ॥ १६ ॥

इदानीं तुर्यगोलमाह ।

अङ्कितमंशनवत्या धनुषोऽर्धं तुर्यगोलकं यन्त्रम् ।
घटिकानतोन्नतांशग्रहान्तराद्यं धनुर्वदिह ॥ १७ ॥

धनुषोऽर्धं कोदण्डखण्डमंशनवत्याऽङ्कितं तुर्यगोलकं यन्त्रं भवति । इहापि धनुर्यन्त्रवद्घटिकानतोन्नतांशग्रहान्तराद्यं सिध्यति ॥ १७ ॥

Digitized by Google

इदानीं चक्रयन्त्रमाह ।

परिधौ भगणांशाङ्कं मीनान्तं चक्रतो विद्धा ।
चक्रकयन्त्रं मध्याल्लम्बोऽत्र फलं धनुस्तुल्यम् ॥ १८ ॥

चक्रकयन्त्रं परिधौ मीनान्तं द्वादशराश्यङ्कं भगणांशाङ्कं च कार्यम् । अत्र परिधौ कल्पिताधारमध्याल्लम्बः कार्यः । अस्माच्चक्रतश्चक्रयन्त्राद्ग्रहादीन् विद्धा फलं धनुस्तुल्यं धनुर्यन्त्रसमं भवति । विशेषार्थं भास्करचक्रयन्त्रं तदीयगोलयन्त्राध्याये चिन्त्यम् ॥ १८ ॥

इदानीं यष्ट्या शङ्क्वाद्याह ।

यष्टिस्तिर्यग्धार्या नष्टच्छायावलम्बकः शङ्कुः ।
दृग्ज्यान्तरमनुपातात् स्वाहोरात्रार्धमग्रा च ॥ १९ ॥

क्षितिजवृत्तकेन्द्रगता यष्टिस्तथा धार्या यथा सा नष्टच्छाया स्यात् । एवं यष्टिव्यासार्धभवगोले यष्ट्यग्रे रविकेन्द्रं भवति तस्मात् क्षितिजोपरि योऽवलम्बकः स शङ्कुर्भवति । यष्टिमूलाच्छङ्कुमूलपर्यन्तमन्तरं दृग्ज्या भवति । अनुपातात् यष्टेरनुपातात् स्वाहोरात्रार्धं कुज्या तथाऽग्रा च साध्या । उदयकाले रविकेन्द्रोपरि यष्ट्यनुपातेनार्थाद्यष्ट्यग्रपातेन क्षितिजे तत्प्राग्बिन्द्वन्तरमग्रांशाः ततः पलकर्णेन द्वादशकोटिस्तदाऽग्रया किं जाता क्रान्तिज्या । तत्कोटिज्या कुज्या प्रसिद्धैव । 'यष्ट्यग्राल्लम्बोना ज्ञेया दृग्ज्या नृकेन्द्रयोर्मध्ये' इति तथा 'उदयेऽस्ते यष्ट्यग्रप्राच्यपरामध्यमग्रा स्यात्'-इति च भास्करोक्तं चिन्त्यम् ॥ १९ ॥

इदानीं यष्टियन्त्रमाह ।

परिलिख्य वृत्तमवनौ यष्टिव्यासार्धमन्यदस्यान्तः ।
स्वाहोरात्रार्धार्धे घटिकाषष्ट्याङ्कितं परिधौ ॥ २० ॥
यष्टिव्यासार्धेऽग्रायष्ट्यग्रान्तरसमज्यया धनुषि ।
घटिका द्वितीयवृत्ते याताः प्रागपरतः शेषाः ॥ २१ ॥

अवनौ समावनौ यष्टिव्यासार्धं वृत्तं परिलिख्यास्यान्तरेककेन्द्रकमन्यत्कुज्यावृत्तं च स्वाहोरात्रार्धार्धे स्वाहोरात्रार्धं कुज्या सेवार्धे व्यासवृत्तं

यस्य तच्च परिलिख्यास्य परिधौ घटिकाषष्ट्यङ्कितं कार्यम् । ततो यष्टि-व्यासार्धे गोले यत्र यष्टेरिष्टद्युतिर्जाता तत्र यष्टिः स्थिरा कार्या । क्षिति-जेऽग्रायास्तदग्रायस्य च यदन्तरं तत्समा या ज्या पूर्णज्या तया द्वितीयवृत्ते द्युज्यावृत्ते यद्धनुर्भवेत् तस्मिन् धनुषि या घटिकास्ताः प्राक्कपाले याता अपरतः पश्चिमकपाले शेषा दिनशेषा घटिकाः स्युः । 'त्रिज्याविष्कम्भार्धे वृत्तं कृत्वा दिनाङ्कितं तत्र' इत्यादि भास्करोक्तमेतदनुरूपमेव । एकस्मिन् दिने यदि द्युज्या स्थिरा स्यात् तदेवानेन विधिना कालज्ञानमिति स्फुटं सिद्धान्तविदाम् ॥ २०–२१ ॥

इदानीं प्रकारान्तरेण घटिकानयनमाह ।

यष्टेः स्वाहोरात्रार्धभाजिताऽन्तरदलाहता त्रिज्या ।
फलचापांशा द्विगुणाः षड्भिर्वा भाजिता घटिकाः ॥ २२ ॥

पूर्वमग्राग्रयोरन्तरं मित्वा यद्गृहीतं तस्य दलं कार्यम् । तेना-न्तरदलेन त्रिज्याऽऽहता यष्टेः स्वाहोरात्रार्धेन यष्टिव्यासार्धभवद्युज्यया भाजिता फलचापांशा द्विगुणाः षड्भिर्भाजिता वा घटिकाः स्युरिति ।

अत्रोपपत्तिः । अन्तरं यत्स्यंशपूर्णज्याऽतस्तदर्धं तदर्धज्या द्युज्या-व्यासार्धे ततोऽनुपातेन त्रिज्यावृत्ते परिणता कृता तस्याश्चापं द्विगुणमं-शात्मकं तत् षड्भिर्विभज्य घटिकाः कृता इति स्फुटम् ॥ २२ ॥

इदानीं यष्टियन्त्रात् प्रकारान्तरेण घटिकाज्ञानमाह ।

यष्टिव्यासार्धे वा घटिका शङ्कुतलादितो मूलात् ।
अवलम्बसूत्रयुक्त्या घटिका दिवसस्य गतशेषाः ॥ २३ ॥

वा यष्टिव्यासार्धे गोले शङ्कुतलादितो मूलात् शङ्कुतलाच्च घटिकाः साध्याः । शङ्कुतलात् शङ्कोश्चेष्टहृतिमानीय ततो द्युज्यानुपा-तेनेष्टान्त्यां सूत्रं चानीय त्रिप्रश्नोक्त्या घटिकाः साध्या इत्यर्थः । वाऽ-वलम्बसूत्रयुक्त्या दिवसस्य गतशेषा घटिकाः साध्याः । अर्थाद्गोलरचनां विनैव नष्टद्युतेर्यष्टेर्याग्रादवलम्बकं कृत्वा शङ्कुं विज्ञाय १९ सूत्रयुक्त्या द्युज्येष्टान्त्यादिना त्रिप्रश्नोक्त्या गतशेषा घटिका ज्ञेयाः ॥ २३ ॥

Digitized by Google

इदानीं यष्टियन्त्रेण वेधेन रविचन्द्रान्तरांशानाह ।

यष्टिव्यासार्धाद्भुवि वृत्तं भगणांशकं कृत्वा ।
यष्टी कीलप्रोते मूले पृथगग्रयोर्बद्धे ॥ २४ ॥
ताभ्यां सूर्यशशाङ्कौ वेध्यावग्रस्थितेन सूत्रेण ।
सूत्रज्ययाऽन्तरांशा ये तेऽर्कविभाजितास्तिथयः ॥ २५ ॥

यष्टिव्यासार्धात् समभुवि भगणांशकं चक्रांशाङ्कितं वृत्तं कृत्वा केन्द्रगतः कीलः कार्यः । कीलप्रोते तु यष्टी वृत्तव्यासार्धप्रमाणे कार्ये । किंविशिष्टे यष्टी मूले पृथगग्रयोर्बद्धे । यत्र कीले यष्टिमूलाग्रे ते एकत्र मिलिते कार्ये इत्यर्थः । ताभ्यां मूलमिलिताभ्यां यष्टिभ्यां मूलस्थदृष्ट्या युगपदेवैकयष्ट्यग्रगतो सूर्यशशाङ्कौ गणकेन यष्ट्यग्रयोर्गतं यत् सूत्रं तेन सूत्रेण वेध्यौ । तत् सूत्रं च रविचन्द्रान्तरांशपूर्णज्या गोलयुक्त्या भवति । अतस्तत्सूत्रज्यया पूर्णज्यया वितिवृत्ते यद्धनुस्ते रविचन्द्रयोरन्तरांशा भवन्ति । एवं येऽन्तरांशास्तेऽर्कविभाजिता द्वादशभक्तास्तिथयः स्युरिति ॥ २४–२५ ॥

इदानीं प्रकारान्तरेणान्तरांशानयनमाह ।

सूत्रार्धगुणा त्रिज्या यष्टिहृता फलधनुर्द्विगुणितं वा ।
रविचन्द्रान्तरमिष्टव्यासार्धोल्लिखितवृत्तस्य ॥ २६ ॥

पूर्वं यत् पूर्णज्यासमं सूत्रमागतं तस्यार्धेन त्रिज्या गुणा यष्टिहृता फलधनुर्द्विगुणितं वा रविचन्द्रान्तरं भवति । इष्टव्यासार्धोल्लिखितवृत्तस्यायं सम्बन्धः ।

अत्रोपपत्तिः । सूत्रार्धं यष्टिव्यासार्धे रविचन्द्रान्तरार्धज्या सा त्रिज्याव्यासार्धे परिणता । तद्धनुर्द्विगुणमन्तरांशा भवन्ति ॥ २६ ॥

इदानीं यष्टियन्त्रेण दिक्साधनमाह ।

मध्यधृताया यष्टेर्लम्बकशङ्कू प्रवेशनिर्गमने ।
क्रान्तिवशात् प्राच्यपरे मत्स्याद्याम्योत्तरे साध्ये ॥ २७ ॥

Digitized by Google

समावनाविष्टव्यासार्धेन लिखितस्य वृत्तस्य मध्येस्थापितकीलस्य छाया पूर्वकपालस्थे रवौ यत्र प्रतीच्यां परिधौ लगति स प्रवेशबिन्दुः । यत्र च पश्चिमकपालस्थे रवौ प्राचि लगति स निर्गमनबिन्दुः । तत्र प्रवेशनिर्गमने समये मध्यभृताया यष्टेर्नष्टद्युतेर्वोल्लम्बं विधाय द्वौ समौ शङ्कू साध्यौ । ताभ्यां तत्तत्कालक्रान्तिवशात् त्रिप्रश्नोक्त्या भुजान्तरं विधाय प्राच्यपरे साध्ये ताभ्यां मत्स्याद्याम्योत्तरे च साध्ये इति सर्वं त्रिप्रश्नाधिकारतः स्फुटम् ॥ २७ ॥

इदानीं भुजकोटिसाधनमाह ।

शङ्कुतलाग्रान्तरयुतिरन्यैकदिशोर्भुजो भुजस्य कृतिम् ।
दृग्ज्याकर्णकृतेः प्रोह्य पदं पूर्वापरा कोटिः ॥ २८ ॥

स्पष्टार्थम् । त्रिप्रश्नाधिकारे सर्वं स्फुटमेव प्रतिपादितम् ॥ २८ ॥

इदानीं यष्टियन्त्रेण पलभामाह ।

उदयास्तसूत्रशङ्क्वन्तरं हृतं शङ्कुनाऽर्कसङ्गुणितम् ।
विषुवच्छायैवं वा विनोदयास्तमयसूत्रेण ॥ २९ ॥

उदयास्तसूत्रशङ्क्वन्तरं शङ्कुतलं तदर्कसङ्गुणितं शङ्कुना हृतं फलं विषुवच्छाया पलभा भवति । उदयास्तसूत्रेण विनाऽपि वा पलभाज्ञानमेवं वक्ष्यमाणेन विधिना भवतीत्यस्याग्रे सम्बन्धः ।

अत्रोपपत्तिः । क्षेत्रत्रैराशिकानुपातेन स्फुटा ॥ २९ ॥

इदानीं भुजद्वयतः पलभाज्ञानमाह ।

प्राच्यपराशङ्कुतलान्तरभुजान्तरयुतिः समान्यदिशोः ।
द्वादशगुणिता विषुवच्छाया शङ्क्वन्तरविभक्ता ॥ ३० ॥

शङ्कुमूलप्राच्यपरान्तरं भुजः । एवमेकस्मिन् दिने भुजद्वयं ज्ञेयम् । तयोः समान्यदिशोरन्तरयुतिः कार्या सा द्वादशगुणिता शङ्क्वन्तरविभक्ता विषुवच्छाया भवति । 'भुजयोरेकान्यदिशोरन्तरमैक्यं रविहृतम्मि'-त्यादिभास्करोक्तमेतदनुरूपमेव ।

Digitized by Google

अत्रोपपत्तिः। भास्करविधिना स्फुटा सजातीयत्रिभुजयोर्भुजयोः कोट्योः कर्णयोरन्तरतो योगाद्वा तथैव सजातीयत्रिभुजोत्पन्नत्वात् ॥ ३० ॥

इदानीं रविज्ञानमाह।

शङ्कुप्राच्यपरान्तरशङ्कुतलैक्यमुदगन्तरं याम्ये।
लम्बगुणं यष्टिहृतं क्रान्तिज्यातो रविः प्राग्वत् ॥ ३१ ॥

शङ्कुप्राच्यपरान्तरं भुजः। शङ्कुतलं शङ्कुतलम्। उदग्भुजेऽनयोरैक्यं याम्ये भुजेऽन्तरमग्रा भवति। एवमैक्यान्तरं लम्बगुणं लम्बज्यया गुणं यष्टिहृतं त्रिज्याहृतं फलं क्रान्तिज्या भवति। अतः प्राग्वत् त्रिप्रश्नोक्तिवद्रविः साध्यः।

अत्रोपपत्तिः। त्रिज्याकर्णेन लम्बज्या कोटिस्तदाऽग्राकर्णेन किं जाता क्रान्तिज्या। शेषवासना स्फुटा ॥ ३१ ॥

इदानीं यष्ट्या गृहाद्यौच्च्यमाह।

अपसृतिरन्यशलाकागुणा शलाकान्तरेण भक्ता भूः।
भूः स्वशलाकागुणिता यष्टिविभक्ता गृहाद्यौच्च्यम् ॥ ३२ ॥

इष्टप्रमाणैका यष्टिर्धार्या। तस्या एकस्मिन्नग्रे लम्बरूपाऽङ्गुलादिभिरङ्किता विपुलैका शलाका बद्ध्वा दृढीकार्या यथा यष्टिशलाकाभ्यां कोणः समकोणो भवेत्। यष्ट्यन्याग्रसंस्थदृष्ट्या समधरातलस्थगृहाद्यौच्च्यमन्यया चलयष्ट्या विध्येत्। इयमन्या यष्टिर्यत्र शलाकायां लग्ना तस्माच्छलाकामूलपर्यन्तं सङ्ख्या वेधसम्बन्धिनी शलाका ज्ञेया। एवं प्रथमस्थानतो वेधं कृत्वा शलाकाप्रमाणं विज्ञाय प्रथमस्थानतस्तस्यामेव सरलरेखायामपसृत्य द्वितीयस्थानतो गृहाद्यौच्च्यं विध्वा तत्रापि शलाकाप्रमाणं जानीयात्। वेधस्थानयोरन्तरं चापसृतिरुच्यते। अपसृतिरन्यशलाकागुणा शलाकान्तरेण भक्ता तदा भूः स्वभूवेधस्थानगृहान्तरं भवति। भूश्च स्वशलाकागुणा यष्टिविभक्ता गृहाद्यौच्च्यं स्यात्।

अत्रोपपत्तिः। गृ उ = गृहोच्च्यम्। प्र मू = यष्टिः = द्वि मू। प्र = प्रथ



मवेधस्थानम् । द्वि = द्वितीयवेधस्थानम् । मू अ₁ = प्रथमवेधे शलाका = श_1 मूअ₂ द्वितीयवेधे शलाका = श_2 प्रद्वि = अपसृतिः = अ गप्र = भू_1 । गद्वि = भू_2 = $\text{भू}_1 + \text{अ}$ ।

सजातीयत्वेनतः

$$\text{गउ} = \frac{\text{भू}_1 \cdot \text{श}_1}{\text{य}} = \frac{(\text{भू}_1 + \text{अ})\text{श}_2}{\text{य}}$$

$\therefore$ $\text{भू}_1 \cdot \text{श}_1 = \text{भू}_1 \cdot \text{श}_2 + \text{अ} \cdot \text{श}_2$ । ततः $\text{भू}_1 (\text{श}_1 - \text{श}_2) = \text{अ} \cdot \text{श}_2$

$\therefore$ $\frac{\text{अ} \cdot \text{श}_2}{\text{श}_1 - \text{श}_2} = \text{भू}_1$ । एवम् $\text{भू}_2 = \frac{\text{अ} \cdot \text{श}_1}{\text{श}_1 - \text{श}_2}$ । शेषोपपत्तिः स्फुटा ॥ ३२ ॥

इदानीं प्रकारान्तरेण गृहाद्यौच्च्यानयनमाह ।

दृष्ट्या गुणिताऽपसृतिर्दृष्टिविशेषेण भाजिता भूमिः ।
भूमिः स्वदृष्टिभक्ता शलाकया सङ्गुणोच्छ्रायः ॥ ३३ ॥

समधरातले यष्टिरूर्ध्वाधरा लम्बरूपा धार्या । धरातले दृष्टिस्तथा चालनीया यथा दृष्टिर्यष्ट्यग्रं गृहाग्रं चैकसरलरेखायां स्युः । एवं कृते दृष्टियष्टिमूलयोरन्तरं यत् तदेवेह दृष्टिरित्युच्यते । अथ पुनः सैव यष्टिस्तस्यामेव सरलरेखायां तथैवोर्ध्वाधरा स्थाप्या । तद्वशतो द्वितीयवेधेऽपि दृष्टिस्थानं निश्चेयं तथा दृष्टियष्टिमूलान्तरं द्वितीयदृष्टिश्च ज्ञातव्या । द्वयोर्दृष्टिस्थानयोरन्तरं चात्रापसृतिरुच्यते । अपसृतिर्दृष्ट्या स्वदृष्ट्या गुणिता दृष्ट्योर्विश्लेषेणान्तरेण भाजिता स्वभूमिः स्यात् । सा भूमिः शलाकया यष्ट्या सङ्गुणा स्वदृष्टिभक्ता गृहाद्युच्छ्रायः स्यादिति ।

अत्रोपपत्तिः । ग उ = गृहौच्च्यम् । मू अ₁ = मू अ₂ = यष्टिः । मू प्र = प्रथमदृष्टिः = दृ_1 । मू द्वि = द्वितीयदृष्टिः = दृ_2 । प्र द्वि = अपसृतिः = अ । प्र ग = प्रथमभूमिः = भू_1 । द्वि ग = द्वितीयभूमिः = $\text{भू}_2 = \text{भू}_1 + \text{अ}$



ततः सजातीयक्षेत्रतः ।

$$\text{यु} = \frac{\text{य}\cdot\text{भू}_1}{\text{दृ}_1} = \frac{(\text{भू}_1 + \text{अ})\cdot\text{य}}{\text{दृ}_2}$$

ततः $\text{भू}_1\cdot\text{दृ}_2 = \text{भू}_1\cdot\text{दृ}_1 + \text{दृ}_1\cdot\text{अ}$

$\therefore\ \text{भू}_1 = \frac{\text{दृ}_1\cdot\text{अ}}{\text{दृ}_2 - \text{दृ}_1}$ । एवम् $\text{भू}_2 = \frac{\text{दृ}_2\cdot\text{अ}}{\text{दृ}_2 - \text{दृ}_1}$ । ततोऽनुपातेनोच्छ्रित्या-नयनं सुगममिति ॥ ३३ ॥

इदानीं गृहादिमूलवेधेन भूमिमाह ।

लम्बनिपातान्तरकं लम्बोच्च्यान्तरविभक्तमधिकगुणम् ।
भूर्लम्बान्तरगुणिता लम्बनिपातान्तरविभक्ता ॥ ३४ ॥

इष्टप्रमाणाया यष्टेर्मूलस्थदृष्ट्या यष्ट्यग्रगं गृहादिमूलं विध्येत् । यष्टिमूलाग्राभ्यां द्वौ लम्बौ कार्यौ । तयोर्लम्बनिपातयोरन्तरकं लम्बोच्च्ययोरन्तरेण विभक्तमधिकेन लम्बमानेन गुणं भूः स्यात् । लम्बान्तरगुणितेत्यादिरस्ये सम्बन्धः ।

अत्रोपपत्तिः । यष्टिमूलाद्गृहादिमूलपर्यन्तं रेखा कर्णः । यष्टिमूलादधिको लम्बः कोटिः । अधिकलम्बगृहादिमूलयोरन्तरभूमिर्भुजः । एवमेकं त्रिभुजम् । लम्बोच्च्यान्तरं कोटिः । यष्टिः कर्णः । लम्बनिपातान्तरभूमिर्भुजः । इदं द्वितीयं त्रिभुजं प्रथमसजातीयमतोऽनुपातेन भूम्यानयनं सुगममिति ॥ ३४ ॥

इदानीं भूमिज्ञाने वंशोच्च्यमाह ।

लब्धोनो दृग्लम्बो दृग्लम्बादग्रलम्बके हीने ।
अधिकेऽधिको गृहोच्च्यं तलाग्रके विद्धया दृष्ट्या ॥ ३५ ॥

इष्टप्रमाणयष्टेर्मूलस्थदृष्ट्या गृहाग्रं विध्येत् । यष्टिमूलाग्राभ्यां भुवि लम्बौ कार्यौ । मूलाल्लम्बो दृग्लम्ब इत्युच्यते । भूर्लम्बोच्च्ययोरन्तरेण गुणिता लम्बनिपातयोरन्तरेण भक्ता लब्धेन दृग्लम्बो हीनः कार्यो दृग्लम्बादग्रलम्बके हीने सति । अधिके चाधिकः कार्यस्तत्र गृहाद्योच्च्यं

भवेत् । एवं तलावधके ये तयोर्विवरुया वृष्ट्या भूम्योच्च्ये भवतः । भूमिज्ञानं तलवेधेनोच्च्यज्ञानं चाधवेधेन भवतीत्यर्थः ।

अत्रोपपत्तिः । लम्बनिपातान्तरेण लम्बोच्च्ययोरन्तरं तदाऽऽत्म-गृहाद्यन्तरभूम्या किं लब्धेन हीनो युतश्च दृग्लम्बो दृग्लम्बादधलम्बे हीनाधिके गृहाद्योच्च्यं भवतीत्यत्र क्षितितुये क्षेत्रे विरचय्य सर्वं स्फुटं निरीक्षणीयम् ॥ ३५ ॥

इदानीं प्रकारान्तरेण भूम्योच्च्यानयनमाह ।

दृष्टिर्दृग्लम्बगुणा विभाजिताऽधःशलाकया भूमिः ।
सकलशलाकागुणिता भूमिर्दृष्ट्या हृतोच्छ्रायः ॥ ३६ ॥

यस्मिन् धरातले गृहाद्योच्च्यं वस्तु वर्तते तस्मिन् धरातले ऊर्ध्वाधरा लम्बरूपेष्टप्रमाणा शलाका स्थाप्या । ततो दृष्टिस्तथा चाल्या यथा दृष्टिः शलाकाग्रं गृहादिमूलं चैकरेखायां स्युः । एवं तत्र दृगोच्च्यं दृग्लम्बः । दृगोच्च्यशलाकामूलयोरन्तरं भूमिर्दृष्टिरित्युच्यते । सा शलाका चाधःशलाका ज्ञेया । दृष्टिर्दृग्लम्बगुणाऽधःशलाकया विभाजिता भूमिः स्यात् । एवं तस्मिन्नेव धरातले तथा दृष्टिर्नियोज्या यथा दृष्टिः शलाकाग्रं गृहाग्रं चैकरेखायां स्युः । अत्र शलाका सकलशलाका । दृष्टिशलाका-मूलयोरन्तरं दृष्टिरित्युच्यते । भूमिः सकलशलाकागुणा दृष्ट्या हृतोच्छ्रायो भवति ।

अत्रोपपत्तिः । सजातीयक्षेत्रानुपातेन स्फुटा ॥ ३६ ॥

इदानीं प्रकारान्तरेण गृहोच्च्यमाह ।

मित्वा गृहैकदेशं विद्धेष्टशलाकया गृहं सर्वम् ।
प्रथमशलाकाभक्तं मितं द्वितीयागुणितमौच्च्यम् ॥ ३७ ॥

यस्मिन् धरातले लम्बरूपं गृहादि वर्तते तस्मिन् धरातले लम्ब-रूपोर्ध्वाधराङ्गुलादिभिरङ्किता शलाका स्थाप्या । ततो दृष्टिं तस्मिन्नेव धरातले कुत्रापि संस्थाप्य नलिकया वाऽ यष्ट्या ज्ञातोच्च्यं गृहैकदेशं विध्येत् । नलिका वाऽन्ययष्टिर्यत्र शलाकायां लग्ना तस्मात् शलाकामूलपर्यन्त

प्रथमा शलाका शलाकामूलदृष्टिस्थानान्तरं च दृष्टिर्ज्ञातव्या । पुनस्त-त्रस्थयैव दृष्ट्या गृहाग्रं चैकयष्ट्या विध्येत् । इयं यष्टिर्यत्र पूर्वशलाकायां लग्ना तस्मात् शलाकामूलपर्यन्तं द्वितीया शलाका ज्ञेया । अथ व्याख्या । गृहैकदेशं प्रथमशलाकावशेन मित्वा गणयित्वा धारयेत् । इष्टशलाकया च सर्वं गृहं गृहोच्च्यं विद्धा द्वितीया शलाका ज्ञातव्या । ततो गृहैकदे-शोच्च्यं मितं गणितं द्वितीयशलाकया गुणितं प्रथमशलाकया भक्तं गृहोच्च्यं स्यात् ।

अत्रोपपत्तिः । प्रथमशलाकया दृष्टितुल्यो भुजस्तदा ज्ञातोच्च्येन किं जाता भूमिः = $\frac{\text{ज्ञाभो}\cdot\text{दृ}}{\text{प्रश}}$ । ततो दृष्ट्या द्वितीयशलाका तदा भूम्या किं जातं गृहोच्च्यम् = $\frac{\text{द्विश}\cdot\text{ज्ञाभो}\cdot\text{दृ}}{\text{प्रश}\cdot\text{दृ}} = \frac{\text{द्विश}\cdot\text{यभो}}{\text{प्रश}}$ ।

अत उपपन्नम् ॥ ३७ ॥

इदानीं परमतं निराकरोति ।

यष्ट्या हृताच्छलाका त्रिज्याघाताद्धनुर्गृहान्तरकम् ।
यैरुक्तं मूर्खास्ते यतो न दृष्टान्तरं दृग्ज्या ॥ ३८ ॥

पूर्वश्लोकोक्तविधिना गृहाग्रवेधेऽन्ययष्टिर्यत्र शलाकायां लग्ना तस्माद्दृष्टिस्थानपर्यन्तं कर्ण एव यष्टिः । द्वितीयशलाका कोटिः । दृष्टिर्भुजः । शलाका त्रिज्यागुणा यष्टिहृता फलस्य धनुर्दृष्टिस्थाना-दृहमूलाग्ररेखयोरन्तरगः कोणो गृहान्तरांशाभिधस्त्रिकोणमित्या वास्तव एव सिध्यति । गृहाग्रकपयहस्य दृष्टान्तरं दृष्टिसंज्ञसमं दृग्ज्या भवेद्वा न । अतो 'यैराचार्यैः पूर्वफलचापसमं गृहान्तरकमुक्तं ते मूर्खाः सन्ति यतो दृष्टान्तरं दृग्ज्या नास्ती'ति वाग्बलमेतद्दूषणमिति सुधीभिश्चिन्त्यम् ॥३८॥

इदानीं शङ्कुमाह ।

मूले द्व्यङ्गुलविपुलः सूच्यग्रो द्वादशाङ्गुलोच्छ्रायः ।
शङ्कुस्तलाग्रं विद्धाऽग्रवेधलम्बाभृदुभयोः ॥ ३९ ॥

Digitized by Google

(शङ्कुस्तलार्यविद्धोऽयवेधलम्बादृजुर्ज्ञेयः ॥ ३९ ॥ *)

अयवेधलम्बादयन्त्रगतावलम्बादृजुर्लम्बाकारो ज्ञेयः । तलादाधारवृत्तकेन्द्रादग्रपर्यन्तं विद्धः सन्नत्र इत्यर्थः । शेषं स्पष्टम् ॥ ३९ ॥

इदानीं शङ्कुयन्त्रेण कालज्ञानमाह ।

छायां दृग्ज्यां दृष्टिं छायाकर्णमवलम्बकं शङ्कुम् ।
परिकल्प्य शङ्कुयन्त्रे योज्यं घटिकादि यष्ट्युक्तम् ॥ ४० ॥

शङ्कुयन्त्रे छायां दृग्ज्यां दृष्टिं छायाग्रशङ्कुमूल छायाकर्णं शङ्कुमवलम्बकं प्रकल्प्य यष्ट्युक्तं यष्टियन्त्रोक्तं घटिकादि सर्वं योज्यम् । यष्टियन्त्रात् सर्वं यथा साधितं तथाऽस्मादपि साधनीयमित्यर्थः ॥ ४० ॥

इदानीं घटीयन्त्रमाह ।

घटिका कलसार्धाकृति ताम्रं पात्रं तलेऽपृथु च्छिद्रम् ।
मध्ये तज्जलमज्जनषष्ट्या द्युनिशं यथा भवति ॥ ४१ ॥

ताम्रं ताम्रभवं पात्रं कलसार्धाकृति घटार्धप्रतिमं घटिका घटीयन्त्रं भवति । अस्य पात्रस्य तले मध्ये तथाऽपृथु च्छिद्रं कार्यं यथा यज्जलमज्जनषष्ट्या द्युनिशमहोरात्रमानं भवति । एवमेकनिमज्जनेनैका घटी भवतीति सर्वं स्फुटम् ॥ ४१ ॥

इदानीं कपालयन्त्रमाह ।

मध्याद्यस्वनतांशैः कपालकं दिक्स्थसूत्रमध्याग्रात् ।
व्यस्तोन्नतांशविवरे सूत्रैक्यापाततो नाड्यः ॥ ४२ ॥

मध्याद्यस्वनतांशैः कपालकं कपालयन्त्रं भवति । क्षितिजानुकारं दिगङ्कितं फलके वृत्तं विरचय्य इष्टदिने द्युज्यावरज्यादिना प्रत्यंशं नतांशं प्रकल्प्योन्नतघटिका मध्यनतांशावधि प्रसाध्य व्यस्तकपाले ता घटिकाः स्वस्वनतांशाये वृत्तपालावङ्क्याः । एवं कपालयन्त्रं भवति । इष्टकाले दृग्मण्डलाकारे धृते कपालयन्त्रे केन्द्रस्थकीलच्छायानुसारि केन्द्रगतं सूत्रं यत्र परिधौ लगति तत्राङ्किता नाड्य इष्ट घटिका भवन्ति । एवं

* इत्युत्तरार्धपाठः साधुः ।

दिक्स्थसूत्रमध्यापात् सूत्रैक्यापाततः सूत्रभयोर्यदैक्यं तस्यापाततो वृत्तपरिधौ संयोगतो व्यस्तोन्नतांशविवरे व्यस्तकपालस्योन्नतांशान्तरे नाड्यो भवन्ति गोलयुक्तितः ॥ ४२ ॥

इदानीं विशेषमाह ।

अथवा कपालके नाडिकादि सर्वं यथा धनुष्युक्तम् ।
कर्त्तरियन्त्रं स्थूलं कृतं यतोऽन्यैर्वदामि ततः ॥ ४३ ॥

अथवा यथा धनुषि धनुर्यन्त्रे सर्वं नाडिकादि यथोक्तं तथैव कपालकेऽपि ज्ञेयम् । यथान्यैर्यतः कर्त्तरियन्त्रं स्थूलं कृतं ततस्तस्मादहं सूक्ष्मं वदामीति ॥ ४३ ॥

इदानीं कर्त्तरीयन्त्रमाह ।

दिक्स्थितफलकद्वियुतिस्तले तदग्रस्थसूत्रयोर्मध्ये ।
कीलस्तच्छायाग्रात् कर्त्तर्यां नाडिकाः स्थूलाः ॥ ४४ ॥

अर्धवृत्तानुकारं फलकद्वयं कार्यम् । एकमधोऽर्धनाडीवलयानुकारमन्यदधोऽर्धयाम्योत्तरवृत्तानुकारम् । ततस्तले यथादिक्स्थितयोर्द्वयोः फलकयोर्युतिः कार्या यथैकं नाडीमण्डलधरातलेऽन्यत् स्वयाम्योत्तरमण्डलधरातले स्यात् । तदग्रस्थे ये पूर्वापरदक्षिणोत्तरानुकारे सूत्रे तयोर्मध्येऽर्थाद्वृत्तयोः केन्द्रे कीलः स्थाप्यो यथाऽयं कीलो ध्रुवयष्टिरिव भवेत् । एवमिदं कर्त्तरीयन्त्रं भवेत् । अस्यां कर्त्तर्यां तच्छायापातात् कीलच्छायापातात् स्थूला नाडिका इष्टघट्यो भवन्ति । इदमेव भास्कराचा 'भूस्थं ध्रुवयष्टिस्थं चक्रम्'—इत्यादिना नाडीवलयाख्यं यन्त्रमुदितम् । भास्करविधिना यदि रविक्रान्तिरेकस्मिन् दिने स्थिरा तदैवोन्नतघटिका वास्तवा गोलयुक्त्या भवन्ति परन्तु रवेः क्रान्तेः प्रतिक्षणं चलत्वान्नाडिकाः स्थूला भवन्तीत्याचार्योक्तं गोलयुक्तियुतं बुद्धिमद्भिश्चिन्त्यम् । अनेन यन्त्रेण नतकालज्ञानं सूक्ष्मं भवतीति सिद्धान्तविदां स्फुटम् ॥ ४४ ॥

इदानीं पीठयन्त्रमाह ।

इष्टस्यौच्च्यं समपीठं यष्टिव्यासार्धमन्तिकं परिधौ ।

६२०

दिग्भगणांशैर्मूर्धन्यग्रा*घटिकादिकञ्चक्रम् ॥ ४५ ॥

एकं वृक्षोत्थं वृक्षोत्थसमे प्रदेशे खे गतं यष्टिव्यासार्धमितिकं समपीठं समं चक्राकारं फलकं कार्यम् । परिधौ दिग्भिर्भगणांशैस्तथा मूर्धनि परिध्यवभागेऽग्राघटिकादिभिरवोचतघट्यादिभिश्चाङ्कं पीठसंज्ञं यन्त्रं चक्रयन्त्राकारं भवतीत्यर्थः ॥ ४५ ॥

तथा च तन्त्रः ।

चक्रं चोर्ध्वशलाकं वदन्ति पीठं सुसिद्धाख्यम् ।

(शिष्यधीवृ॰ यन्त्राध्या॰ श्लो॰ २५)

इदानीं यन्त्रान्तरमाह ।

नलको मूले विद्धस्तत्स्रुतिघटिकोद्धृतः समुच्छ्रायः ।
लब्धाङ्गुलैस्तु तैर्नाडिकाक्रियायन्त्रसिद्धिरतः ॥ ४६ ॥

एक इष्टप्रमाणो नलको मूले विद्धः कार्यः । स च जलैः पूर्णः कार्यः । अधोरन्ध्रेण यावतीभिर्घटीभिर्जलस्रुतिः स्यात् ताः स्रुतिघटिका ज्ञातव्याः । नलकस्य समुच्छ्रायस्तत्स्रुतिघटिकोद्धृतस्तैर्लब्धाङ्गुलैर्नलके चैकैको विभागोऽङ्कनीयः । अत एभ्यो विभागेभ्यो नाडिकाक्रियायन्त्रसिद्धिर्भवति । नाडिकाक्रियया यन्त्रसिद्धिर्भवतीत्यर्थः । एकविभागपर्यन्तं जलस्रुत्यैका घटी द्वितीयभागपर्यन्तं जलस्रुत्या घटीद्वयम् । एवमत्र कालज्ञानं भवति ।

अत्रोपपत्तिः । यदि स्रुतिघटिकाभिर्नलकोच्छ्रितिसमा जलस्रुतिस्तदैकया घट्या किं जाते कघटीसमकालजलस्रुतावुच्छ्रितिरिति ॥ ४६ ॥

इदानीं पुनर्यन्त्रान्तरमाह ।

घटिकाङ्गुलान्तरस्थैर्वीर्याङ्गुलकैर्घटीधृतैरन्यः ।
उपरि नरोऽधः सुषिरस्तिर्यक् कीलोऽस्य मुखमध्ये ॥ ४७ ॥

(घटिकाङ्गुलान्तरस्थैश्चीरिगुटकैर्घटीधृतैरङ्का ।

उपरि नरोऽधःसुषिरस्तिर्यक् कीलोऽस्य मुखमध्ये ॥ †

* घटिकादिभिश्चाङ्कम्–इति पाठः साधुः ।

† अयं पाठः साधुः ।

कीलोपरि गामिन्यां चीर्यांध्यं द्दपारदमलाबुतु । ?
स्रवति जले क्षिपति नरो गुटिकां कूर्मादयश्चैवम् ॥ ४८ ॥

(कीलोपरि गामिन्यां चीर्यां धृतपारदमलाबु तस्मिन्* ।)

अल्पविस्तारं विपुलदैर्घ्यं वस्त्रखण्डं चीरिरित्युच्यते । एकस्यां घट्यां मनुष्यमुखाद्यावद्दुस्त्रखण्डं तद्यबद्धसपारदालाबुना जलस्रावाघातेन बहिर्निःसरति तद्घटिकाङ्कुलमुच्यते । चीरिर्घटिकाङ्कुलान्तरस्थैर्गुटकैर्घटीधृतैरङ्क्या । घटिकाङ्कुलान्तरस्थैरेकद्वित्र्यादिघटिकाङ्कितगुटिकास्तत्र योज्या इत्यर्थः । इयं चीरिर्नराकारस्य यन्त्रस्याधोरन्ध्रस्य मध्ये स्थाप्या तदुपरि च नरः स्थाप्यो यथा चीरिर्नराधोरन्ध्रतः प्रविष्टा नरमुखस्थतिर्यक्कीलोपरिगा भवेत् । नरमुखाग्रे कीलोपरि यच्चीरिखण्डं तदग्रे पारदपूर्णमलाबु तुम्बं बध्नीयात् । तस्मिन् तथा जलधारा नलकादिना देया यथाधोगच्छताऽलाबुना घटिकया नरमुखादेकां गुटिकां बहिर्गच्छेत् । एवं जले स्रवति नरो नराकारयन्त्रं घटिकयैकां गुटिकां मुखाद्बहिः क्षिपति । एवं नराकारयन्त्रस्थाने कूर्मादयः कूर्मादीनामाकारा बुद्धिमता कार्या इत्यर्थः ॥ ४७–४८ ॥

इदानीं विशेषमाह ।

जलपूर्णकृतघटीभिः स्तनास्यकर्णादिभिर्जलं क्षिपति ।
पुरुषोऽन्यर्धासक्तं चक्रचतुष्कस्य कृतमुपरि ॥ ४९ ॥

(पुरुषोऽन्यस्याऽऽसक्ते †वक्त्रं पुरुषस्य कृतमुपरि ॥ ४९ ॥)

पुरुषो (नराकारयन्त्रं) रचनीयः । जलपूर्णकृता घटी घटीयन्त्रमस्य स्तने मुखे कर्णादौ वाऽन्तस्तथा योज्या यथाऽयं पुरुषः स्तनास्यकर्णादिभिरन्यस्य पुरुषस्य तदासक्ते वक्त्रे मुखे घटीमितेन कालेन जलं क्षिपति । एवमप्युपरि पूर्वश्लोके प्रतिपादितं यन्त्रं प्रकारान्तरेण कृतं भवेदित्यर्थः ॥ ४९ ॥

---

* अयं पूर्वार्धपाठः साधुः ।

† इत्युत्तरार्धपाठः साधुः ।

इदानीं पुनर्विशेषमाह ।

एवं वधूवरं नाडिकाङ्गुलैः संयुता घरे योज्या ।
युद्धानि मल्लगजमहिषमेषविविधायुधभृतां च ॥ ५० ॥
निगिरति गिरति घटिकाङ्गुलाङ्कितैः खण्डकैर्मयूरोऽहिम् ।
चीर्यामेवं गुडकैरुपरिस्थैर्ब्रह्मचार्याद्यैः ॥ ५१ ॥

(चीर्यामेवं गुटिकोपरिस्थितैर्ब्रह्मचार्याद्यैः ॥ ५१ ॥)*

कीलोत्क्षेपाभिहतः पटहः शब्दं करोति घण्टा वा ।
एवं यन्त्रसहस्राण्यनेन बीजेन कार्याणि ॥ ५२ ॥

एवं वधूवरमुखस्थतिर्यक्कीलोपरिगचीरिगतनाडिकाङ्गुलैस्तथैव वरे वधूर्योज्या यथा वध्वधोरन्ध्रगचीर्यवद्घालाबुनाऽधोयच्छता घटीमितेन कालेनैका गुटिका वरमुखाद्बहिर्निर्गत्य वधूमुखे प्रविशेत् । एवमनेनैव बीजेन घटीमितेन कालेन मल्ल-गज-महिष-मेष-विविधायुधभृतां च युद्धानि स्युः । मयूरो घटिकाङ्गुलाङ्कितैः खण्डकैरहिं सर्पं च निगिरति वा गिरति । एवं चीर्यां गुटिकोपरि स्थापितैर्ब्रह्मचार्याद्याकारैः कीलोत्क्षेपाभिहतः पटहो वा घण्टा शब्दं करोति । एवमत्र यन्त्रसहस्राणि भवन्ति ॥ ५०-५२ ॥

इदानीं स्वयंवहमाह ।

लघुदारुमयं चक्रं समसुषिरारान्तरं पृथगराणाम् ।
अर्धे रसेन पूर्णे परिधौ संश्लिष्टकृतसन्धिः ॥ ५३ ॥
तिर्यक्कीलो मध्ये ह्याधारस्थोऽस्य पारदो भ्रमति ।
छिद्राण्यूर्ध्वं भ्रमति चक्रमजस्रमेवाम्बरं भ्रमति ॥ ५४ ॥

(छिद्राण्यूर्ध्वमधोऽतश्चक्रमजस्रं स्वयं भ्रमति ॥ ५४ ॥)†

अराणामाराणाम् । संश्लिष्टकृतसन्धिः संश्लिष्टो मुद्रितः कृतः सन्धिश्छिद्रं यस्य चक्रस्य तत् । यस्य यन्त्रस्य मध्ये तिर्यक्कीलो मध्ये-

* इत्युत्तरार्धपाठः साधुः

† इत्युत्तरार्धपाठः साधुः

स्थाप्यश्चक्रस्यायस्कारशलाकावद्दृढाधारस्थः कार्यः । अस्य चक्रस्य पारदो रस आराणां छिद्राणि प्रति ऊर्ध्वमधश्च यतो भ्रमति अतस्तद्वाहष्ठं चक्रं स्वयमेवाजस्रं भ्रमति । 'लघुदारुजसमचक्रे समसुषिरारा: समान्तरा नेम्याम्'—इत्यादि भास्करोक्तमेतदनुरूपमेव ॥ ५३-५४ ॥

इदानीं विशेषमाह ।

छिद्रे स्वधिया क्षिप्त्वा समं यथा पारदं भ्रमति ।
कालसममिष्टमानैश्चक्रसमुत्तानमूर्ध्वं वा ॥ ५५ ॥

छिद्रे स्वबुद्ध्या समं पारदं क्षिप्त्वा तथा चक्रं स्थाप्यं यथा कालसमं कालानुसारि चक्रं समुत्तानं क्षितिजानुकारं वोर्ध्वमूर्ध्वाधरं जलयन्त्रवदिष्टमानैर्भ्रमति । एकभ्रमणेन यथेष्टमानसमं कालमुत्पादयेत् तथा वस्तुविशेषे लघुगुरुकाष्ठमयं चक्रं स्वल्पाधिकपारदसहितारं विरचयेदिति॥५५॥

इदानीं पुनर्विशेषमाह ।

कीलस्योपरिगामिनि तत्पर्ययसूत्रके धृतमलाबु ।
प्राग्वज्जलके प्रक्षिप्य नाडिका स्रवति पानीये ॥ ५६ ॥

येन तिर्यक्कीलेन सह चक्रमयस्कारशलाकावद्धृतं तस्मिन् सूत्रस्यैकमयं बद्ध्वा विपुलदैर्घ्यं सूत्रं वेष्टयेत् । तत् सूत्रं च पर्ययसूत्रकमुच्यते । तस्मिन् कीलस्योपरिगामिनि तत्पर्ययसूत्रकस्य द्वितीयाग्रेऽलाबु तुम्बं धृतं बद्धं कार्यम् । ततः प्राग्वज्जलकेऽधोरन्ध्रे जलं प्रक्षिप्य तथा जलाधारा प्रयोज्या यथा तद्घातेनाधोगच्छताऽलाबुना नाडिकया चक्रस्यैकं भ्रमणं भवेत् । एवं पानीये जले स्रवति नाडिकोत्पद्यते इत्याचार्याभिप्रायः ॥ ५६ ॥

इदानीं पुनर्विशेषमध्यायोपसंहारं चाह ।

करणैर्ज्याक्षिप्रचलनमेवं शरमोक्षणं स्वशब्दाश्च ।
अध्यायो द्वाविंशो यन्त्रेष्वार्यास्त्रिपञ्चाशत् ॥ ५७ ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते यन्त्राध्यायो नाम
द्वाविंशोऽध्यायः ॥ २२ ॥

प्रयोजनाभावादुपेक्षणमेवोचितम् । अत एवोक्तमापन्नकालमिति । ततश्चावश्योद्भावस्योद्भावनकालमापन्नस्य यदनुद्भावनं तत् पर्यनुयोज्योपेक्षणमित्यर्थः । निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणमिति सूत्रमुक्तार्थं गमयितव्यम् । प्राप्तपर्यनुयोज्यशब्दयोरर्हत्यर्थत्वात् । न चास्याप्रतिभासङ्करः प्रतिज्ञाहान्यादिषु स्खलितोपेक्षणेन सदुत्तरमाददानस्याप्रतिभाया असम्भवात् सम्भवाच्चोपेक्षणस्य । ननु न तावदिदं वादिनोद्भाव्यं पर्यनुयोज्यं मां त्वमुपेक्षितवानसीति स्वयमेव स्वदोषोद्भावनायोगात् । नापि प्रतिवादिना आत्मनैवात्मनि ग्रहायोगात् पर्यनुयोज्यत्वज्ञाने सत्युपेक्षणायोगाच्च । सत्यम् एतदाशङ्क्य परिहृतं वाचस्पतिमिश्रैः । सभापतिना वादिप्रतिवादिभ्यां वा पर्यनुयुक्तया परिषदा तन्निग्रहस्थानमुद्भावनीयमिति । विश्वरूपजयन्तयोः पुनः परमस्य शक्तिं जिज्ञासमानेन मया आभासप्रयोगः कृतः । सोऽप्यनेन मन्द-

---

विशेषानुद्भावनं पर्यनुयोज्योपेक्षणमित्यत्र तदेवोपपादयति । प्राप्तपर्यनुयोज्येति । लक्षणगतप्राप्ततज्ज्ञानापन्नकालनिग्रहव्यवच्छेदस्य लक्ष्यगतपर्यनुयोज्यशब्देनावश्योद्भाव्येतरव्यवच्छेदस्य प्रसिद्धत्वादित्यर्थः(?) । पर्यनुयोज्योपेक्षणं नाम तं प्रति न किञ्चिद्वचनं तथा सत्यप्रतिभेदमित्याशङ्क्याह । न चास्येति । क्षुद्रस्खलनेन तदनवधार्यमिति

मतिना नोद्भावित इति वदता वादिनोद्भावनीयमिति निश्चयः । वादे द्वयोरपि निग्रहात् परिषद एव विजयः । जल्पवितण्डयोस्तु साधनाभासेनापि प्रतिवादिनोद्धारखण्डनाद्वादी विजयत एव । अत्र त्रिलोचनवाचस्पतिप्रभृतीनां न काचिद्विप्रतिपत्तिरिति ॥ १८ ॥

अतन्निग्रहसम्प्राप्तं तन्निग्रहनिमित्ततः ।
निगृह्णतो निग्रहः स्यादयोग्यस्यानुयोगतः ॥ १९ ॥

सर्वथा निग्रहस्थानमप्राप्तो निग्रहस्थानान्तरप्राप्तावप्युद्भाव्यमाननिग्रहस्थानमप्राप्तश्चातन्निग्रहसम्प्राप्तमित्युच्यते । तमपि तेनैव निग्रहस्थानेन निगृह्णतो निरनुयोज्यानुयोगो नाम निग्रहस्थानं भवति ॥१९॥

तस्यावान्तरभेदमाह ।

अप्राप्तकाले ग्रहणं ह्यन्याय्याभास एव च ।
छलानि जातय इति चतस्रोऽस्य विधा मताः ॥ २० ॥

शेषः । तस्मिन् विश्वरूपजयन्तयोर्मते कथाभेदाद्विशेषमाह । वादे द्वयोरिति । द्वयोरपि निग्रहात् । अत्र प्रस्तुतविश्वरूपजयन्तावेव ॥ १८ ॥

तेनैवाप्राप्तेन निग्रहस्थानेनैव ॥ १९ ॥

तत्र छलजाती दर्शिते। प्रतिज्ञाहान्यादीनामाभासाः प्रबोधसिद्धौ प्रपञ्चिताः । यथा अनेकविकल्पस्फुरणेन विकल्पयतोऽनिष्टकल्पत्यागेन प्रतिज्ञाहानिः । प्रकरणाद्यापन्नविशेषाविष्करणेन प्रतिज्ञान्तरम् । नञ्प्रयोगमात्रेण विरोधः । स्वारोपितानभ्युपगमेन संन्यासः । स्वयमगृहीतस्य विशेषणस्य पुनरुत्कीर्तनेन हेत्वन्तरम् । वस्तुतः प्रस्तुतानुगुणस्याप्यापाततस्तथानध्यवसायेनार्थान्तरम् । आत्मनो

अनिष्टकल्पत्यागेनेति। शब्दो नित्यः कृतकत्वादित्युक्ते शब्दस्य नित्यत्वमनित्यत्वं वा त्वया साध्यते। आद्ये विरुद्धहेतुः द्वितीये त्वसिद्ध इति प्रत्युक्ते वादिना न मया नित्यत्वपक्षोऽङ्गीकृत इत्युक्ते तर्हि प्रतिज्ञाहान्या निगृहीतोऽसीत्यर्थः। प्रकरणाद्यापन्नेति । विप्रतिपन्नशब्दो नित्य इत्युक्तेर्विप्रतिपन्नविशेषणेन नित्यत्वेन सम्प्रतिपन्नं ध्वनिमयोप्यवर्णात्मकः शब्दो नित्य इति हि साध्यते तदा प्रतिज्ञान्तरेण निगृहीतोऽसीति । नञ्प्रयोगेति । शब्दो नित्यः कृतकत्वादित्युक्ते प्रतिज्ञायां तस्मिन् हेतौ नास्ति अतः प्रतिज्ञाहेत्वोर्विरोधात् प्रतिज्ञाविरोधेन निगृहीत इति । स्वारोपितेति । शब्दो नित्यः कृतकत्वादित्युक्ते विरुद्धः कृतकत्वहेतुः कथं शब्दनित्यत्वं साधयेदित्यनुयुक्तेन वादिना न नित्यत्वमस्मत्साध्यं किं त्वनित्यत्वमित्युक्ते तर्हि प्रतिज्ञासंन्यासेन निगृहीत इति । स्वयमगृहीतस्येति । शब्दो नित्यः सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वादित्युक्ते सामान्यवत्त्वे सतीति विशेषणम् अस्ति सामान्ये व्यभिचार इति दूषितेन वादिना सामान्य-

Digitized by Google

वैयाकरणत्वेन वाचकप्रयोगे ऽपि निरर्थकम् । आत्मनः परिषदेकदेशस्य वानवबोधेनाविज्ञातार्थम् । पौर्वापर्यायोगेऽपि स्वयमप्रतिसन्धानेनापार्थकम् । अनवधानाद्विपर्ययेणाप्राप्तकालम् । अन्यत्र व्यासङ्गादश्रुतेन न्यूनम् । पार्श्वस्थाद्युक्तेन हेत्वादिनाधिकम् । श्रुतिसामान्यमात्रेण पुनरुक्तम् । तदप्रसिद्धपदैरेवानुवादेनाननुभाषणम् । अनवबोधितायामपि परिषदि स्वावष्टम्भमात्रेणाज्ञानम् । उत्तरं वदतोपि स्वेदादिना प्रतिभाक्षयः । आवश्यकप्राणिधर्मेण विक्षेपः । सिद्धसाधनेन मतानुज्ञा । स्वदोषोद्भावनेन हेत्वाभासा इति निग्रहस्थानाभासाः । तथानुयोज्यत्वेपि प्रतिज्ञाहान्यादौ प्रतिज्ञान्तरादिस्थले ऽपि जातिः । वाक्छलादावपि छलत्वेनोपचाराच्छलादिसाधर्म्यसमादौ जातित्वेन प्रकरणसमादीति ॥ २० ॥

अप्राप्तकालग्रहणं तु स्वंस्वमवसरमप्राप्यातिक्रम्य वा निग्रहस्थानानामुद्भावनमिति । किमेषामुद्भावनकालो नियतः येन तदुल्लङ्घनं निग्रहहेतुः स्यात् ।

वरवे सतीति विशेषितस्य कथं व्यभिचार इत्युक्ते तर्हि हेत्वन्तरेण निगृहीत इति । वस्तुतः प्रस्तुतो नित्यः शब्दो नित्यं कृतकत्वात् कृतकश्च शब्दः अनभिव्यञ्जकप्रयत्नानन्तरोपलब्धिमत्वात् न विशेषणासिद्धो हेतुः प्रयत्नस्याभिव्यञ्जकत्वे प्रतिवादिवद्युगपत्सकलशब्दाभिव्यञ्जकत्वप्रसङ्गादित्युक्ते तर्हि हेत्वन्तरमति निगृहीत इति ॥ २० ॥

ऽोमित्याह ॥

उक्तग्राह्याः केचिदन्ये ऽनुक्तग्राह्यास्तथापरे ।
उच्यमानदशाग्राह्या इति कालस्त्रिधा स्थितः ॥ २१ ॥

नैतन्मया ज्ञायत इत्युक्तमेव ग्राह्यमज्ञानम् । तदुक्तिमन्तरेणापि जातमात्रमेव ग्राह्यं हेत्वन्तरादि । जायमानावस्थायामेव ग्राह्यमपशब्दार्थान्तरादि । तदिदानीमुपेक्षाकारणाभावादिति । उद्भावनकालस्त्रिधा व्यवस्थितः । तत्रोच्यमानग्राह्यमपशब्दादिकमुत्तरकालमुद्भावयतो निग्रहस्थानं भवति । एवमितरत्रापि दर्शयितव्यमिति । तदेतत्सर्वमभिप्रेत्योक्तम् अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोग इति ॥ २१ ॥

सिद्धान्तमेकमालम्ब्य तद्विरुद्धपरिग्रहे ।
अपसिद्धान्ततः सिद्धं निग्रहस्थानमक्षयम् ॥ २२ ॥

यस्य कस्यचिच्छास्त्रस्य सिद्धान्तमालम्ब्य कथायां प्रवृत्तायां मध्ये तत्सिद्धान्तविरुद्धार्थान्तरपरिग्रहे त्वपसिद्धान्तो नाम निग्रहस्थानं भवति । यथा एकप्रकृतयो महदादिविकारा एतद्रूपान्वितत्वात् घटवदित्युक्ते का प्रकृतिः के वा विकारा इति पृष्टः

साङ्ख्यो यदि यतः असन्तो भावा जायन्ते सा प्रकृतिः जननाशवन्तो भावा विकारा इति वदति। तदा स्वस्य सत्कार्यवादपरित्यागादपसिद्धान्त इति। न चान्यसिद्धान्तमाश्रित्य कथाप्रवृत्तिः सम्भवति। अन्यथा क्षणभङ्गसाधनं प्रयुञ्जानो बौद्धोऽस्फूर्त्तिको नैयायिकेन सिद्धसाधनतामुद्भाव्य निगृह्येतेति। न चास्य विरोधान्तर्भावः शङ्कनीयः। तस्यात्मीयवाक्यान्तरव्याघातात्मकत्वात्। अस्य च मूलाचार्यवाक्यव्याघातरूपत्वात्। न चायमागमविरोधः उभयप्रसिद्धप्रमाणभाववाक्यान्तरविरोधरूपत्वात् तस्य। यथा इदानीमिव सर्वत्र दृष्टान्ताधिकमिष्यत इति वदतो मीमांसकस्य सृष्टिप्रलयप्रतिपादकवैदिकवाक्यविरोधः। स्वाभ्युपगतप्रामाण्यतीर्थङ्करवाक्यविरोधात्मकोयमपसिद्धान्त इति विशेषः। अस्फूर्त्तिसमये ह्यस्मत्सिद्धान्तानभिज्ञोऽयमिति प्रतिवाद्यज्ञानादन्यथा व्याख्यास्यामीति शौण्डीर्यादेकदेशिमतं तदिति वैयात्याद्वास्योक्तिसम्भवः। सूत्रं तु सिद्धान्तमत्युपेत्यानियमात् कथाप्रसङ्गोपसिद्धान्त इति ॥ २२ ॥

हेत्वाभासाः प्रसंख्याता येन रूपेण लक्षिताः।
तेपि तेनैव रूपेण निग्रहस्थानसञ्ज्ञिताः ॥ २३ ॥

पूर्वं ये सावान्तरभेदाः सव्यभिचारादयः पञ्चप्रकारा हेत्वाभासा लक्षिताः ते ऽपि तेनैव हेत्वाभा-

Digitized by Google

स्वरूपेण निग्रहस्थानं भवन्ति । तदुक्तम् । हेत्वाभासाश्च यथोक्ता इति । तथैव निग्रहस्थानमिति शेषः । चकारेण साध्यविकलत्वादिदृष्टान्तदोषमनुपदर्शितान्वयत्वाद्युक्तिदोषमात्माश्रयत्वादितर्कप्रतिघातमनुक्तं त्रयमपि समुच्चिनोति । तेषां च हेत्वाभासान्तर्गतत्वात् पृथगनभिधानं तदनन्तर्गतावपि प्रतिज्ञाविरोधवत् स्वयमपि स्पष्टप्रतिपत्तित्वेन पृथगुद्भाव्यत्वाच्चकारेण समुच्चयः । तर्हि विरोधोपि समुच्चीयतां किं पृथगुपादानेन । नैवम् तस्यावयवान्तरे दूषणे ऽपि सम्भवेनासङ्कीर्णोदाहरणसम्भवात् । यद्येवं प्रतिकूलतर्का अपि दूषणे सम्भवन्तः पृथगुपादीयेरन् । सत्यम् उपात्ता एव सूत्रकारैरेव जात्युत्तरे तेषां प्रपञ्चितत्वादिति ॥ २४ ॥

एते हान्यादयो हेत्वाभासावसानान्ताः सर्वे ऽपि निग्रहहेतवो यथायथं सभासङ्क्षोभादिभिस्तत्कारणे जल्पवितण्डयोरुभयोरपि सम्भवन्ति अवश्योद्भावनीयाश्च । अन्यथा पर्यनुयोज्योपेक्षणप्रसङ्गात् । उद्भाविताश्च कथामपि पर्यवसाययन्ति । सर्वेषामपि जयपराजयव्यवस्थाहेतुत्वात् तन्मात्रफलत्वाच्च जल्पवितण्डयोरित्याह ॥

एते सम्भविनः सर्वे समुद्भाव्याश्च निग्रहाः ।

Digitized by Google

विच्छेदकाः कथायां च द्वयोर्जल्पवितण्डयोः ॥ २४ ॥

वादे तु निग्रहस्थानप्रकारचातुर्विध्यमाह ॥

चतुर्द्धा निग्रहगतिर्वादे ऽसम्भववर्जिताः ।
अनुद्भाव्यास्तथोद्भाव्याः कथाविच्छेदका इति ॥ २५ ॥

तत्रासम्भविनस्तावदाह ॥

अर्थान्तरमविज्ञातं हानिर्न्यासो निरर्थकम् ।
अपार्थकमिति प्रायः षट्कं वादेष्वसम्भवि ॥ २६ ॥

एतेषामर्थान्तरादीनां स्वाज्ञानसंवरणपराज्ञानप्रकाशनमात्रफलत्वेन प्रवृत्तेर्वादे च तदुभयासम्भवादसम्भावितत्वम् । प्रमादादिना कथञ्चित् तत्रापि सम्भवमाशङ्क्योक्तं प्राय इति ॥ २६ ॥

सम्भवे ऽप्यनुद्भावनीयानाह ॥

विक्षेपोऽप्रतिभाज्ञानं हेत्वन्तरमुपेक्षणाम् ।
साध्यान्तरं मतानुज्ञा वादे ऽनुद्भाव्यसप्तकम् ॥ २७ ॥

साध्यान्तरमिति प्रतिज्ञान्तरमुच्यते । प्रमादादिना सम्भवतामप्येषामनुद्भावनेनापि कथाप्रवृत्तौ तत्त्वनिर्णयाविघातादनुद्भाव्यतेति ॥ २७ ॥

587. In these passages, on the other hand, which treat of the unity of Self, there is no injunction to be carried out, since the object sought for results immediately from a knowledge of the reality.

588. It is likewise seen that, in the case of persons full of curiosity, their whole curiosity ceases as soon as the narrative is finished.

589. None of these narratives have the virtue of prescribing either acceptance or avoidance for one who hears them, being mere statements of fact.

590 and 591. Even where acceptance or avoidance is seen to follow upon hearing sentences like 'This way is infested with robbers' or 'This spot hides a treasure-trove,' such acceptance or avoidance is not the effect of the words whose force is exhausted by their teaching the bare fact, but the person acts or desists, prompted by his own passions etc.

592. Dragged on by the chain of greediness, he indulges in what he desires and avoids what he hates, not by virtue of the words.

593. But, is not a sentence implied, though not expressed by the speaker, to the effect 'do not go along this route,' or 'take out this treasure?'

594. Not so, for, the meaning of the word does not depend on the intentions of the speaker. Its meaning depends on the inherent force of the word itself and not on any other cause.

595. You too must perforce admit this, since, if the meaning of a word is dependent upon a speaker, the Scripture will be no authority at all.

Digitized by Google

596. A speaker may even desire a conflicting variety of objects; and, according to your contention, all of them must be considered to be meant by the word.[1]

597 and 598. When a learner, having in his mind a particular action or non-action, desires to know a thing by means of perception and such other proofs, it cannot be said by a man of sense that such action or non-action, though present in intention, is knowable by those very proofs, namely, perception etc.

599. It must also be admitted that with reference to the same object, one wishes to avoid it and another to gain it.

600. If the word could mean action, then every one will think of action, but not of indifference or avoidance. Further multiplicity of meanings is not recognised.

601. Even if it be granted that the passage prompts action, you cannot explain the context of words which are not injunctory.

602. Tell me if they convey their own word-meaning, or import mere action, or an action connected with the word-meaning.

603. If they only convey their word-meaning, how is the meaning of the sentence to be understood. Further, their utterance becomes vain, being unfit for promoting conduct (*vyavahāra*).[2]

604. If they imply an action connected with the word-meaning, then, since conduct is possible even without their signifying action, it is fruitless to assume action.

[1] There will thus be no unity of aim.

[2] If each word conveys only its stem-meaning, there will be no syntactical congruity.

Digitized by Google

605. If they import mere action, then no meaning can be gathered from a sentence which is a bare assertion of fact. Such an utterance will be useless.

606. Further, if a word imports mere action, then since there is no other action, it can have no connection with other words which signify the means etc.

607. And, if all words import action, then the meanings of the words will be unconnected, for want of mutual dependence.

608. Nor will any injunction of any special rite be signified. Every word will then import an injunction.

609. In the case of the connection between *sōma* and sacrifice etc., it is the injunction which implies it. For, prior to it, what reason can be urged for such connection?

610. If the established object of the injunction fails,[1] then there is nothing to be performed. If you say that the verb imports the connection prior to the injunction, then my contention wins.[2] The passage of the commentary, 'then the other for its sake etc.,' is also thus justifiable.[3]

611. If the understanding of the object as the thing to be accomplished can only be consequent upon understanding the injunction, then how can the injunction be understood as what ought to be done, in the absence of another injunction?

---

[1] Owing to want of connection between, for example, the *sōma* and the sacrifice.

[2] Namely, that the relation of a verb to its object can be understood without the aid of injunction.

[3] यद्येकस्मादपूर्वं तदेतरस्तदर्थं भविष्यति ॥

Digitized by Google

612. For want of such understanding, your very object must fail. Then the meaning of injunction which you insist upon, is lost, owing to non-performance.

613. If the injunction be understood as what ought to be done, even in the absence of another injunction, then the object too[1] can be so understood of its own accord.

614. If it be said that the object, not being by its nature something to be done, stands in need of an injunction for its own fulfilment, then that injunction too, not being by its nature the thing to be accomplished, will stand in need of the object for an explanation.

615. Thus injunction, to be an injunction, will depend upon the object. There will thus be mutual dependence, and injunction will lose its importance.

616. A thing to be done (*kārya*) is that which depends on human effort for its accomplishment, such as sacrifice etc. Injunction is not a *kārya*, because, by its very nature, it depends upon itself for its performance.[2]

617. A thing to be done cannot import another thing to be done. That which is not *kārya* can alone be made *kārya*.[3] Whiteness cannot exist in whiteness itself, but only in the cloth.

618 and 619. When a pot, an injunction, a sacrifice, etc., which have each their peculiar nature, are spoken of by appropriate words as having been accomplished, to

[1] Such as the sacrifice.

[2] It does not depend on human effort to understand an injunction as importing something to be done. That is the Mimāmsaka view.

[3] स्वतोऽकार्यं तद्रूपेयागादौ विधिना कार्यतेत्यर्थः. Anandagiri.

be accomplished and so on, there is no difference whatever in the manner in which the sound makes us know what is unknown. Thus activity is not dependent on injunction.

620. When the meaning of the word is understood, then, such activity as corresponds with the aim arises spontaneously and not by virtue of the mere sound or its meaning.

621. Who, therefore, being wise, will carry into execution that which is neither the means, nor the method, nor the fruit, nor the aim? Who can guess what its nature is.

622. The imperative force of the word is not the injunction, for it only implies injunction. Nor is it the mental effort, since, if so, it will become knowable by other proofs.[1]

623. It is not action, because it has no doer; not the fruit, since it is not desired; not the means, since it has not come into existence; nor anything else, being devoid of any proof.

624. Nor can a thing to be done be defined as that which is not touched by the past, present or future. For, from the mere utterance of the word 'pot,' the pot is not understood as the thing to be done, though the word does not refer to time.

625. An injunction is the activity of the person enjoined. How can it then be the meaning of the potential mood, which cannot be perceived by the senses?[2] How can such a thing be accomplished?

---

[1] The Mimāmsakas maintain that injunction cannot be known by any proof other than the Vedic word.

[2] Every human activity can be perceived by the senses.

Digitized by Google

626. It cannot be said that it implies injunction because it implies action; for, injunction being by nature unpredicable, its existence, origin, etc. cannot be the result of effort.

627. If injunction which is self-established be the means of attaining fruit, then, since the injunction is always so, the fruit too will exist for ever.

628. That alone will accomplish one's end, which depends on human effort. And, since injunction is unpredicable, it can never bear fruit.

629. Things to be done, such as sacrifice, etc., are those whose accomplishment is contemplated, and not things which are already existent, like the sky, or which are absolutely non-existent like a sky-flower.

630. If it be said that in the passage 'Sacrifice should be done,' the thing to be done is something different from sacrifice, then, in the passage 'the thing to be done should be done,' the thing to be done will be different from the thing to be done itself.

631. The same difference is seen in the passage "the thing to be accomplished is the performability of the injunction." Hence, it (*kāryatva*) is not an inherent attribute (*vastu-dharma*), but is only implied by the word.

632. Therefore, whatever is understood from the Vedas as the means for an object to be accomplished, that alone is *kārya*, being something to be done, and no other.

633. The potential mood etc. import an urging; tell me how it can signify injunction. The latter cannot be implied as the object of the urging, for the object is the action which is urged.

Digitized by Google

634. Even this urging cannot be other than teaching what is unknown, since it incidentally points out all the possible faults in the action and since there is no proof to the contrary.[1]

635. The urging is not identical with the potential mood etc., since the latter implies something else (*jnāpakatva*), and also because the same urging is implied, though the declensional forms are different.[2]

636. It cannot be the relation of the potential mood to the action designated, since such relation (*ṣakti*) cannot be expressed (*anabhidhēya*). Nor can it be the act of a prompter, for, there is no prompter in Scripture.

637. Thus the prompter is the Scripture which teaches the unknown truth as the means for the desired end; and such teaching is the urging.

638. So, too, the Scripture is authoritative only because it teaches the real nature of the Self, and not because of its prompting; for, the latter is absent in the case of direct perception and other proofs.[3]

639. Just as the injunction, carried out on the authority of Scripture, inevitably bears fruit; so too, the performance of the means[4] bears fruit.

640. And no failure of fruit, as in the case of the injunctory meaning, need be suspected; for, even the

[1] i. e. to the effect that प्रेरणा is not अज्ञातज्ञापनम् ॥

[2] Thus the लेट् form, जुहोति, and the लिङ् form, यजेत, both imply प्रेरणा.

[3] The authority of प्रत्यक्ष etc., does not depend on their प्रेरकत्व, but because they make known what is unknown.

[4] Therefore the potential mood does not imply injunction, but only sacrifice etc. as the means to the end.

Digitized by Google

means is authorised by Scripture. Failure of fruit is only in the case of human plans.

641. Sacrifice and other actions are not found always to bear subsequent fruit, even in secular practice. Hence there is no fallacy in the general syllogism "because it is an act etc."[1]

642. In the same way as the potential mood etc., by their own inherent force, imply an injunction unaffected by time, they also likewise import sacrifice etc. There is thus no difference.

643. Moreover, by this interpretation, there will be a connection between the means and the end, and not the farce of an intervening gap as in the other interpretation of the potential mood etc.

644. Succession is assumed only when there is no direct connection,[2] and not in any case where there is such connection. But even this condition does not exist in this case as it does elsewhere.

645. In the Scriptural passage, the brownness, though connected with the purchase, is seen to produce the result only as distinguishing the instrument. It is not independent, for, if so, it will be useless.[3]

646. The sacrifice, though connected with the injunction, will not in any way bring about its fulfilment without producing the fruit. And since there is no such fruit, it ceases to be a means.

---

[1] यागादिक्रियाऽनन्तरफला क्रियात्वान्मर्दनवत्· There is no fallacy of अनैकान्तिक here, since all actions do not bear future fruit, and acts like सेवा etc. form an exception.

[2] e. g. in अरुणया क्रीणाति, or he purchases *sōma* with a brown cow.

[3] The brownness affects the purchase only as an attribute of the instrument, viz. the cow.

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् । मूल्यम्

श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं॰ श्रीराममिश्र-
शास्त्रिप्रणीतप्रकाशिकाविषमपदटिप्पणीसमेतः .. .. ७।)

श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा .. ६)

श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा .. ३=)

वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः .. .. २।)

भेदपूर्त्तेः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं॰स्वामिश्रीराममिश्रशास्त्रि-
प्रणीतो निर्विशेषाद्वैतनिराकरणपरः .. .. १॥=)

भेदपूर्तिसहितो वेदार्थसंग्रहः .. .. ३॥।)

शास्त्रदीपिका .. .. ६।)

सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-
न्द्रिकोपेतम्, पं॰स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् । १।)

काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजप॰दामोदर-
शास्त्रिणा संशोधिता पूर्वार्द्धरूपा .. .. ५॥।)

तथा उत्तरार्द्धम् .. .. ८॥।)

माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण
श्रीसायणाचार्येण विरचिता .. .. ७॥)

काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता ६॥)

श्रीतिलकसार्णवतरणिः । .. .. ६)

विग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता .. .. ॥=)

जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता .. ५॥)

लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्याय-
मुक्तावल्याख्यया टीकया सहिता । .. .. ॥।)

सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना
विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम् । ॥।)

तत्त्वमुक्ताकलापः-सर्वार्थसिद्धियुतः, बोधायनीयार्षसिद्धान्तानुसारी विशिष्टाद्वै-
तब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्कि-
ककेसरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीवेङ्कटनाथदैशिकेन प्रणीतः ५॥=)

वेदान्तसिद्धान्तमुक्तावली, आर्यवीनिस्साहबकृताङ्गलभाषानुवादयुता .. १॥।)

काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः .. .. २॥)

अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः .. .. १२)

आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्य-
काराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम् .. .. ॥।)

तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदी-
पाख्यटीकया सहिता । .. .. १॥।)

CONTENTS.

Page.

NYĀYASŪTRAVIVARAṆAM, Ed. Surendralāla Gosvāmin, Professor, Sanskrit College, Benares 577

BRĀHMASPHUṬASIDDHĀNTA, Edited with his own commentary by Mahāmahopādhyāya Sudhākara Dvivedin, Professor, Queen's College, Benares 593

THE TĀRKIKARAKṢĀ AND SĀRASAMGRAHA OF VARADARĀJA, with the glosses Niṣkaṇṭakā of Mallinātha Kolācala and Laghudīpikā of Jñānapūrṇa, Ed. Vindhyeçvarīprasāda Dvivedin, Librarian, Sanskrit College, Benares 625

THE SAMBANDHAVĀRTIKA OF SUREṢVARĀCHĀRYA, Translated by S. Venkataramana Aiyar, B. A., B. L., High Court Vakil, Triplicane, Madras 633

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 11.] November, 1902. [Vol. XXIV.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1902.

Copyright on each article reserved.

Price Rs. 9-0 per annum.]

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अक्षररश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविकासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
विधिमीमांसा, अप्पयदीक्षितकृता तै॰ श्री रामशास्त्रिणा संशोधिता .. .	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।≈)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनाचार्य्येणाङ्गलदेशीयभाषायामनुवादिता ..	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणाङ्गलदेशीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	२।≈)
श्रौतपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकोल्लूरशास्त्रि- संशोधिता	४)
काव्यप्रदीपः, पं॰ रामशास्त्रिभागवताचार्येण परिशोधितः	२॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	५॥)

Digitized by Google

त्वात् । एवमेकस्या एव मायाया आरोपहेतुत्वे कार्यवैचित्र्यानुपपत्तिः तन्नियामकानामवयवविशेषाणां निमित्तहेतूनां दृष्टादृष्टानां च कल्पने मायास्वीकारस्यान्याय्यत्वादिति ॥ ३१ ॥

ननु हेत्वभावात् स्वप्नविषयाभिमानोऽपि न सिध्येदित्यत आह ।

स्मृतिसङ्कल्पवच्च स्वप्नविषयाभिमानः पूर्वोपलब्धविषयः(१) ॥ ३२ ॥

स्मृतौ सङ्कल्पे च यथा पूर्वोपलब्धिर्हेतुस्तथा स्वप्नप्रत्ययेऽपि स्वप्नप्रत्ययस्योपनीतभानरूपत्वादिति भावः । न च स्वप्ने स्वमपि खादति निजशिरःखण्डनमपि पश्यति न त्विदं पूर्वोपलब्धमिति वाच्यम् । स्वस्य खादनस्य निजशिरसः खण्डनस्य च खण्डशः पूर्वोपलब्धत्वात् । स्वप्नेऽपि प्रत्येकस्मृत्या दोषवशात् भ्रमरूपविशिष्टप्रत्ययजननात् । अथात्र को दोष इति चेत् तादृशस्मृत्युपघायकोद्बोधकादृष्टविशेषादेरेव दोषत्वात् । एवं मृगतृष्णादावपि दोषविशेष एव नियामक इति । एवं च न कोऽपि भ्रमोऽसद्विषयक इति दृष्टान्तासिद्धिरिति भावः ॥ ३२ ॥

ननु भ्रमस्य सतो वैशिष्ट्यावगाहित्वे कथं तत्प्रतिरोध इत्यत आह ।

मिथ्योपलब्धेर्विनाशस्तत्त्वज्ञानात् स्वप्नविषयाभिमानविनाशवत् प्रतिबोधे(२) ॥ ३३ ॥

(१) इदं न्यायसूचीनिबन्धे वर्तते । तत्र च पूर्वोपलब्धविषय इति नास्ति ।

(२) इदमपि तथा । तत्र च प्रणाशवत् प्रतिबोध इति पाठः ।

मिथ्योपलब्धेर्मायागन्धर्वनगरादिज्ञानस्य । विनाशः प्रतिरोधः । तत्त्वज्ञानात् वास्तविकार्थसंसर्गज्ञानात् । प्रतिबोधे जाग्रद्दशायां स्वप्नविषयाभिमानप्रतिरोधवदित्यर्थः । तथा च स्वप्ने यथानुभवो जायते तथानुभवो जाग्रद्दशायां दोषरूपकारणविरहान्न भवति । तथा प्रतिबन्धकयथार्थज्ञानसत्त्वान्न भ्रमात्मकविशिष्टज्ञानं प्रतिबन्धकाभावस्यापि कारणत्वादिति भावः ॥ ३३ ॥

ननु कुतो यथार्थज्ञानमित्यत आह ।

बुद्धेश्चैवं निमित्तसद्भावोपलम्भात्(१) ॥ ३४ ॥

एवं याथार्थ्यम् । निमित्तीभूतात् सतो भावस्योपलम्भात् सम्बन्धादित्यर्थः । तथा विशेष्यविशेषणसम्बन्धाधीनं ज्ञानं यथार्थमिति भावः । यद्वा बाह्यार्थस्येव ज्ञानस्याप्यसत्त्वं केचिद्वदन्ति तन्मतं निरस्यति । बुद्धेश्चैवमिति । एवं बाह्यार्थस्येव बुद्धेरपि सत्त्वं निमित्तसद्भावोपलम्भात् सहेतुकत्वेन प्रमितत्वात् । न ह्यलीकं सहेतुकमहेतुकत्वे च कादाचित्कत्ववैचित्र्ये न स्यातामिति भावः । केचित्तु भ्रमस्य सद्विषयत्वे प्रमात्वं स्यादित्यत आह । बुद्धेरिति । एवं प्रमात्वम् । निमित्तस्य प्रकारस्य सद्भावः सत्त्वं यत्र । तथा च शुक्तिरजतयोः सत्यत्वे ऽपि शुक्तौ रजततादात्म्याभावान्न तद्बुद्धेः प्रमात्वमिति भाव इत्याहुः । अत्र चोपलम्भपदमनतिप्रयोजनकं बोध्यमिति ॥ ३४ ॥

ननु मायागन्धर्वनगरादिभ्रमे ऽसन्मात्रविषयकत्वं मृगतृष्णादौ सति तेजसि सतो जलस्यावगाहनात् सद्विषयकत्वमिति भ्रमस्य द्वैविध्यं तत्राद्यदृष्टान्तेन प्रपञ्चग्रह-

(१) इदमपि न्यायसूचीनिबन्धे वर्तते ।

स्यासन्मात्रविषयकत्वं साध्यम् । यदि च भ्रममात्रस्य सद्विषयकत्वं तदा कथं भ्रमस्य द्वैविध्यमित्यत आह ।

तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः[१] ॥ ३५ ॥

तत्त्वं भ्रमधर्मिगतविषयबाधादिरूपो धर्मः प्रधानं माया अविद्याविशेष इति यावत् । तयोर्भेदेनेत्यर्थः । यद्यपि ऐन्द्रजालिकाविद्यारूपदोषाधीनभ्रमोऽपि विषयबाधाधीनस्तथापि मायातदतिरिक्तदोषभेदेन भ्रमस्य द्वैविध्यव्यवहार इति भावः । यद्वा भ्रमस्य सद्विषयकत्वे प्रमात्वमपि स्वीकार्यं तत् कथमुपपद्यते प्रमात्वभ्रमत्वयोर्विरोधादित्यत आह । तत्त्वेति । तत्त्वं प्रकारीभूतो धर्मः प्रधानं विशेष्यीभूतो धर्मी तेषां भेदात् । द्वैविध्योपपत्तिः एकस्मिन् भ्रमत्वप्रमात्वयोरुपपत्तिः । तथा च विषयभेदान्न विरोध इति भावः । केचित्तु सर्वत्र विशिष्टबुद्धौ विशेष्ये विशेषणसम्बन्धो हेतुर्लाघवात् न तु प्रमामात्रे वैशिष्ट्यबुद्धित्वमपेक्ष्य प्रमात्वस्य गुरुत्वादिति । रज्जुसर्पादिस्थले रज्जूपादानकः सर्पो जन्यत इति कल्प्यते तत्सम्बन्धमादायैव भूतलमिदं सर्पवदिति प्रत्ययो जायते अयं सर्प इत्यभेदप्रत्ययश्च जायते। न चानन्तसर्पकल्पने गौरवं फलमुखगौरवस्यादोषत्वात् । एवं चाद्यन्तवत्त्वेन रज्जुसर्पादिवत् प्रपञ्चस्यापि मिथ्यात्वं मन्यत इत्यसद्विषयकत्वं भ्रमत्वं सन्मात्रविषयकत्वं प्रमात्वमिति वदन्ति । तन्न । भ्रमविशिष्टबुद्धेः क्लृप्तेनैवोपपत्तौ मिथ्यानन्तसर्पादिकल्पनायां मानाभावात् । न च तादृशकार्यकारणभाव एव मानं भ्रमस्थले व्यभिचारात् तादृश-

(१) द्वैतमपि तथा ।

कार्यकारणभावस्यैवासिद्धेः। तत्रार्थक्रियाकारित्वाभावेन सर्पादिबाधस्यावधारणात् यत्र च व्यभिचारः सन्दिग्ध-स्तत्रैव लाघवस्य कार्यकारणभावनियामकत्वात् फलमुख-गौरवस्यादोषत्वमपि तत्रैवेति। न च भ्रमस्य विशिष्टबुद्धि-त्वे किं मानमिति चेत् प्रवृत्तिजनकत्वस्यैव तत्र मानत्वात् लाघवेन तद्विशेष्यकतत्प्रकारकप्रवृत्तौ तादृशज्ञानत्वेनैव हेतुत्वात्। भ्रमस्य धर्मधर्मिविषयकत्वमात्रस्वीकारे समूहा-लम्बनाद्वैलक्षण्यापत्तेश्च तद्वैलक्षण्याय प्रकारान्तरकल्पने गौरवादिति दिक्॥ ३५॥

समाप्तं बाह्यार्थभङ्गनिराकरणप्रकरणम्॥

ननु शास्त्रात् तत्त्वज्ञाने ऽपि मिथ्याज्ञानदर्शनात् तादृशतत्त्वज्ञानं न मिथ्याज्ञाननिवर्तनक्षममिति चेत् तादृशतत्त्वज्ञानस्य परम्परयोपयोगित्वमित्यभिप्रायेणाह।

समाधिविशेषाभ्यासात्(१) ॥ ३६॥

मिथ्याज्ञाननिवर्तनक्षमतत्त्वज्ञानोत्पत्तिरिति शेषः। स्वात्मनि सम्यक् चित्ताधानं समाधिः। सम्यक्पदं विष-यान्तरव्यावर्तनाय। विशेषपदं च देहादिभिन्नत्वप्रकार-कत्वलाभाय। अभ्यासः तद्द्वारा। श्रुतिरप्याह। आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति। निदिध्यासनपदेन समाधिरेवोच्यते सन्प्रत्ययार्थस्याविव-क्षितत्वात्। अग्निहोत्रं जुहोति यवागूं पचतीत्यत्रेवार्थक्रमेण श्रवणाद्यनन्तरं दर्शनं बोध्यम्। श्रवणादित्रयाणां पाठक्रमो ज्ञेय इति॥ ३६॥

---

(१) अस्योत्तरं सूत्रम्। समाधितत्त्वाभ्यासादिति तात्पर्यटीका। तत्र वाक्यमेव पाठः। न्यायसूचीनिबन्धे तु समाधिविशेषाभ्यासादिति पाठः।

ननु विषयान्तरसञ्चारतद्धेतुरागादिनैयत्यात् कथं समाधिसिद्धिरित्याशङ्कते सूत्राभ्याम् ।

नार्थविशेषप्राबल्यात्(१) ॥ ३७ ॥

क्षुधादिभिः प्रवर्तनाच्च(२) ॥ ३८ ॥

अर्थविशेषस्य स्त्रीपुत्रादेः प्राबल्यादुत्कटरागसन्तानात् । तथा च स्वकारणाधीनतदनुसन्धानमेव समाधिविरोधि । एवं क्षुत्तृष्णादिप्रवर्तितभोजनाद्यनुसन्धानमपीति भावः ॥ ३७ ॥ ३८ ॥

शङ्कां निरस्यति ।

पूर्वकृतफलानुबन्धात् तदुत्पत्तिः(३) ॥ ३९ ॥

पूर्वकृतस्य निष्कामकर्मणः श्रवणादेश्च फलमदृष्टविशेषस्तदनुबन्धात् तत्सहकृतश्रवणादितस्तदुत्पत्तिः समाध्युत्पत्तिरित्यर्थः । आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यत इतिभगवद्वचनात् । अनेकजन्मसंसिद्धस्ततो याति परां गतिमितितदुक्तेश्च ॥ ३९ ॥

पुत्रादिस्नेहाद्यनुबन्धनिरासाय योगाभ्यासस्थानमाह ।

अरण्यगुहापुलिनादिषु योगाभ्यासोपयोगः(४) ॥ ४० ॥

---

(१) एतदाक्षेपसूत्रमवतारयति । यदुक्तं सति हि तस्मिन्निति । इन्द्रियविषयैरपहृतमनसो न धारणा । तथा च तदभ्यासाभावान्न तत्त्वसाक्षात्कार इति सूत्रार्थ इति तात्पर्यटीका । आक्षिपति सूत्राभ्यामिति वृत्तिकृतः ।

(२) पूर्वसूत्रटिप्पणी द्रष्टव्या । न्यायसूचीनिबन्धे ऽपीदं वर्तते । तत्र क्षुदादिभिरिति पाठः ।

(३) सूत्रम् । पूर्वकृतफलानुबन्धात् तदुत्पत्तिः । पूर्वकृतः समाधिः तस्य फलं संस्कारः तस्यानुबन्धः स्थेमा तस्मादिति सूत्रार्थ इति तात्पर्यटीका ।

(४) योगाभ्यासोपदेश इति न्यायसूचीनिबन्धे पाठः । इदं न सूत्रं भाष्यमिति केचिदिति वृत्तिकृतः ।

आदिना पवित्रनिर्जनस्थानपरिग्रहः। तत्र स्थिरचित्तता स्यादिति भावः। इदं भाष्यमिति केचित् ॥ ४० ॥

तटस्थः शङ्कते।

अपवर्गेऽप्येवं प्रसङ्गः(१) ॥ ४१ ॥

एवं प्रसङ्गोऽर्थविशेषप्राबल्याद् विषयभासप्रसङ्गः ॥ ४१ ॥

समाधत्ते।

न निष्पन्नावश्यम्भावित्वात्(२) ॥ ४२ ॥

मोक्षदशायां न विषयरागादिः निष्पन्नस्य शरीरस्य रागादौ हेतुत्वेनावश्यम्भावित्वादवश्यमपेक्षणीयत्वात्। तथा च तदानीं शरीरविरहेण न रागादिरिति भावः ॥ ४२ ॥

एतदेव स्पष्टयति।

तदभावश्चापवर्गे(३) ॥ ४३ ॥

तदभावः शरीरविरहः। ननु तदानीं कथं शरीरविरह इत्यतः समुच्चयार्थश्चकारः। तेन शरीरपरिग्रहबीजादृष्टविरहलाभः। श्रुतिश्च। अशरीरं वावसन्तं प्रियाप्रिये न स्पृशत इति। वावेति सम्बोधनं वावसन्तमिति यङ्लुगन्तं वा। प्रियाप्रिये सुखदुःखे ॥ ४३ ॥

योगाङ्गान्याह।

तदर्थं यमनियमाभ्यासात्मसंस्कारोपयोगाच्चाध्यात्मविध्युपायैः(४) ॥ ४४ ॥

(१) इदं न्यायसूचीनिबन्धे वर्तते।

(२) सति शरीरे बाह्यविशेषयोर्ज्ञानोत्पत्तिकारणत्वं नान्यथेति सूत्रार्थ इति। वार्त्तिकम्। सिद्धान्तसूत्रम्। न निष्पन्नेत्यादि तात्पर्यटीका।

(३) इदं न्यायसूचीनिबन्धे वर्तते।

(४) न्यायसूचीनिबन्धे तु यमनियमाभ्यामात्मसंस्कारो योगाच्चेति पाठः।

तदर्थमपवर्गार्थम् । यमानाह पातञ्जलसूत्रम् । अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमा[1] इति । तत्र वाङ्मनःकायैः परपीडावर्जनमहिंसा । सत्यं यथार्थभाषणम् । अस्तेयमदत्तादानरूपपरस्वहरणराहित्यम् । ब्रह्मचर्यमष्टाङ्गमैथुनवर्जनम् । तथा चोक्तम् ।

स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।
विपरीतं ब्रह्मचर्यं तदेवाष्टाङ्गलक्षणम् ॥ इति ।

अपरिग्रहः शरीरधारणाद्यनुपयुक्तार्थासङ्ग्रहः । नियमानाह तत्रैव । शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमा[2] इति । तत्र शौचं बाह्यमाभ्यन्तरीयं चेति द्विविधम् । तदुक्तम् ।

शौचं तद् द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा ।
मृज्जलाभ्यां स्मृतं शौचं भावशुद्धिस्तथान्तरम् ॥

सन्तोषो यदृच्छालाभसन्तोषोऽलाभे चाविषादः । तपः कामानशनम् । तपो नानशनात् परमितिस्मृतेः । अनशनं कामानशनम् । तपःपदेनात्र न चान्द्रायणादिपरिग्रहः तेषां समाधिविरोधित्वात् । स्वाध्यायो मन्त्रजपोपनिषद्ग्रन्थपाठः । ओमित्येव ध्येयं यथात्मानमुपनिषद्मावर्तयेदितिश्रुतेः । ओमिति ब्रह्मपरमन्त्रोपलक्षणम् । ईश्वरप्रणिधानं परमेश्वरमानसोपचारपूजनश्रवणमननादिरूपम् । ईश्वरमुपासीतेतिश्रुतेः तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशके-

(१) योगसूत्रम् २ पादे ३० सूत्रम् ।
(२) योगसूत्रम् २ पादे ३२ सूत्रम् ।

Digitized by Google

नेत्यादिश्रुतेश्च। अनुवचनमनुमानम्। तेन वेदानुमानाभ्यामित्यर्थः। ध्यानधारणे अपि ईश्वरप्रणिधानान्तर्गते। तत्र धारणामाह पातञ्जलसूत्रम्। देशबन्धश्चित्तस्य धारणेति(१)। देशे हृदयाकाशादौ चित्तस्य बन्धो विषयान्तरपरित्यागेन प्रत्यवस्थानम्। ध्यानं च परमेश्वरपरमाविष्टचित्तता। ध्यानमेवातितरामीश्वरनिष्ठं समाधिः। एवं च श्रवणमनननिदिध्यासनानि जीवात्मपरमात्मनोर्द्वयोरेव विधेयानि। यद्वा धारणा प्रत्येकावयवध्यानं ध्यानं च युगपत् सर्वावयवध्यानमिति। अथवा अभ्यासः समाधिरुच्यते। चकारादासनप्राणायामप्रत्याहारा बोध्याः। तत्रासनं पद्मस्वस्तिकादि। प्राणायाम उक्तो योगशास्त्रे। तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेद(२) इति। तस्मिन् आसनस्थैर्ये। श्वासप्रश्वासपदेन प्राणवायोर्निर्गमप्रवेशरूपगतिविशेषौ बहिरिन्द्रियाणां स्वस्वविषयवैमुख्येनावस्थानं प्रत्याहारः। एवं च यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानीति सिद्धम्। एतैर्य आत्मसंस्कार आत्मशुद्धिस्तदुपयोगात्। आत्मविद्युपायैरिति तत्त्वं जानीयादिति शेषः। उपयोगादित्यत्र पञ्चम्यर्थः प्रयोज्यत्वम्। जानीयादित्यत्र ज्ञाने ऽन्वयः। यमादीनामात्मसंस्कारकत्वमाह योगशास्त्रे। योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेरिति(३)। अथवा यमादीनामात्मसंस्काराणां शमादीनामुपयोगात् सहकारादित्यर्थः। शमादयश्च शमदमोपरतितितिक्षासमाधानश्रद्धाः। तत्र शमो मनोनिग्रहः। दमो बाह्येन्द्रियनिग्रहः। एतेन कामादयो निरस्ताः। उपरतिः काम्यकर्म-

(१) योगसूत्रम् ३ पादे १ सूत्रम्।
(२) योगसूत्रम् २ पादे ४९ सूत्रम्।
(३) योगसूत्रम् २ पादे २८ सूत्रम्।

स्त्यागः ऐहिकामुष्मिकफलवैतृष्ण्यं च । तितिक्षा शीतोष्णादिसहिष्णुता । समाधानं निगृहीतस्य मनसः श्रवणादौ प्रवृत्तिः । श्रद्धा शास्त्रेषु गुरुवाक्ये च विश्वासः । तथा च श्रुतिः । शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदिति । आत्मनि हृदयादौ । आत्मविद्युपायैरित्यनेनात्मानात्मविवेकात्मश्रवणादिपरिग्रहः ॥ ४४ ॥

योगाङ्गेषु शास्त्रस्योपयोगमाह ।

ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः[१] **॥ ४५ ॥**

ज्ञायते ऽनेनेति ज्ञानं शास्त्रं तद्ग्रहणं तदध्ययनम् । अभ्यासस्तदधीनदृढतरसंस्कारः । तद्विद्यैस्तत्त्वशास्त्रज्ञैः सह संवादः । स्वानुभवदार्ढ्यायायं कार्य इति शेषः । अयं च योगाङ्गानुगुणः ॥ ४५ ॥

संवादप्रकारमाह ।

तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोऽर्थिभिरनसूयुभिरभ्युपेयात्[२] **॥ ४६ ॥**

तं तत्त्वज्ञम् । सब्रह्मचारी सतीर्थः । विशिष्टः प्रकृष्टज्ञानवान् । श्रेयोऽर्थी मुमुक्षुः । विजिगीषुताव्यावृत्त्यर्थमनसूयुभिरिति ॥ ४६ ॥

प्रकारान्तरमाह ।

प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे[३] **॥ ४७ ॥**

---

(१) इदमपि न्यायसूचीनिबन्धे वर्तते ।

(२) इदमपि तथा । क्वचिदनसूयिभिरिति पाठः ।

(३) तत्रेदं सूत्रमुपतिष्ठते । प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्व इति तात्पर्यटीका ।

वाशब्दो निश्चयार्थः । अर्थित्वे तत्त्वबुभुत्सायां मुमुक्षायां वा सत्यां प्रयोजनार्थं तत्त्वनिर्णयार्थं प्रतिपक्षहीनं प्रतिकूलपक्षहीनं तथाभ्युपेयादित्यन्वयः । तथा च भाष्यम् । स्वपक्षसमवस्थापनाय स्वदर्शनं परिशोधयेदिति । तत्त्वनिर्णीषुतया न पक्षपात इति भावः ॥ ४७ ॥

समाप्तं तत्त्वज्ञानविवृद्धिप्रकरणम् ॥

ननु वादेनैव तद्विद्यैः सह संवाद इत्युक्तं तदा जल्पवितण्डयोः क उपयोग इत्यत आह ।

तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत्[१] ॥ ४८ ॥

तत्त्वाध्यवसायस्य तत्त्वनिर्णयस्य संरक्षणं परोक्तदूषणाहिताप्रामाण्यशङ्कानिरसनं तदर्थं जल्पवितण्डे पूर्वमुक्ते इत्यर्थः । तद्विद्यानां विरुद्धकोट्यनुपस्थापनात् तैः सहसंवादे वीतरागाणां मुमुक्षूणां जल्पवितण्डयोः कदाचिदुपयोगितामात्रं न तु तयोरावश्यकतेति भावः ॥ ४८ ॥

विवादस्थल एव तयोरावश्यकतेत्याह ।

ताभ्यां विगृह्य कथनम्[२] ॥ ४९ ॥

विगृह्य विग्रहं कृत्वा । ताभ्यां कथनं न्यायादिप्रयोग इत्यर्थः । तथा च त्रयीबाह्यैरेव विवादे जल्पवितण्डादरः । मुमुक्षूणां तु तादृशैर्न संवादः समुचित इति भावः ॥ ४९ ॥

(१) तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवदिति सूत्रमिति तात्पर्यटीका ।

(२) ताभ्यां विगृह्य कथनमिति सूत्रमिति तात्पर्यटीका ।

ननु वेदज्ञा अपि नानाविधतत्त्वमाचक्षते तत्र किं समीचीनमित्यत आह ।

तत्त्वं तु बादरायणात्[1] ॥ ५० ॥

तुरवधारणे । बादरायणात् बादरायणाख्यव्यासप्रणीतशास्त्रादेव तत्त्वमवधार्यमित्यर्थः । अयमभिप्रायः । प्रत्यक्षस्य सदोषेन्द्रियजन्यत्वसम्भवेनाप्रामाण्यशङ्कासम्भवात् तथानुमानस्य दुष्टहेतुजन्यत्वशङ्कयाऽप्रामाण्यशङ्केति उपमानस्य शक्तिमात्रग्राहकतया च नादरातिशयः। यथार्थदर्शी भगवानेव वेदं प्रणीतवानिति वेदस्यैव प्रधानप्रामाणतया तेन स्वमुखत एवोक्तानां तत्त्वानां व्यासेन युक्तिभिर्दृढीकृततया तदुक्तानि तत्त्वान्यादरणीयानि । अस्माभिस्तु वेदविमुखे विवादनिरसनाय वेदाभिहितमन्यथापि व्याख्याय प्रत्यक्षानुमाने पुरस्कृत्य तत्त्वान्यभिहितानीति नात्रादरणमिति सूचितमिति। यद्वा तुः प्रधानार्थः। तेन प्रधानतत्त्वं परमेश्वरः व्यासप्रणीतशास्त्रादवसेयः । तेन तदवतारादिबाहुल्यं प्रणीतमिति भावः । अथवा तुः समुच्चयार्थः । तत्त्वं निरुक्तात्मतत्त्वं बादरायणात् बादरायणोक्तपरमेश्वरोपासनादितः साक्षात् कर्तव्यम् । तेन तदवतारतदङ्गजनतदङ्गनियमादीनां विशेषतः प्रणयनात् । अस्माभिस्तु बहिर्मुखनिरासाय पदार्थतत्त्वानि केवलं निरूपितानीति ॥ ५० ॥

समाप्तं तत्त्वज्ञानपरिपालनप्रकरणम् ॥

इति चतुर्थाध्यायस्य द्वितीयमाह्निकम् ॥

इति न्यायसूत्रे चतुर्थोऽध्यायः ॥

इति श्रीराधामोहनगोस्वामिभट्टाचार्यविरचिते न्यायसूत्रविवरणे चतुर्थाध्यायविवरणं समाप्तम् ॥

(१) इदं तु न्यायसूचीनिबन्धन्यायसूत्रोद्धारभाष्यवार्त्तिकतात्पर्यटीकाविश्वनाथवृत्तिप्रभृतिषु न दृश्यत इति न ज्ञायते कुतस्त्यमिदं सूत्रमिति ।

Digitized by Google

न्यायसूत्रविवरणे

पञ्चमोऽध्यायः ।

अथावसरतः कर्तव्येषु जातिनिग्रहस्थानविभागतद्विशेषलक्षणतत्परीक्षणेषु प्रथमतः क्रमप्राप्तं जातिविभागमाह ।

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः(१) ॥ १ ॥

अत्र च साधर्म्यादीनां कार्यान्तानां द्वन्द्वः तैः समा इत्यर्थात् साधर्म्यसमादयश्चतुर्विंशतिर्जातय इत्यर्थः । अत्र जातेर्विशेष्यत्वात् समाशब्दः स्त्रीलिङ्ग इति । अग्रिमसूत्रेषु समशब्दः पुंलिङ्ग इति तत्र प्रतिषेधो विशेष्य इति भाष्यादयः । केचित्तु तद्विकल्पादितिसूत्रस्थविकल्पस्यैव विशेष्यत्वम् । तथा चैते साधर्म्यसमादयो जातिविकल्पा जातिभेदा इत्यर्थः । एवमग्रिमसूत्रेष्वपीत्याहुः । समीकरणार्थं प्रयोगः सम इति वार्त्तिकम् । यद्यपि नैतावता समीकरणं तथापि समीकरणोद्देश्यकत्वमस्त्येव ॥ १ ॥

---

(१) जातेः संक्षेपेणोक्ताया विस्तरो वक्तव्य इतीदमारभ्यते साधर्म्यादिसूत्रमिति वार्त्तिकम् । प्रागुक्तजातिसामान्यलक्षणानन्तरं जिज्ञासिता सङ्कीर्णाऽधिगत्यर्तिजिज्ञासायां विशेषलक्षणावतारानुकूलजिज्ञासाप्रयोजकं विभागोद्देशसूत्रकम् साधर्म्यवैधर्म्येत्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

Digitized by Google

साधर्म्यवैधर्म्यसमौ लक्षयति ।

साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ(१) ॥ २ ॥

साधर्म्यं साध्यत्वाभिमताधिकरणवृत्तिर्धर्मः वैधर्म्यं साध्यत्वाभिमतानधिकरणावृत्तिर्धर्मस्ताभ्यामन्वयिदृष्टान्तघटिते व्यतिरेकिदृष्टान्तघटिते वा उपसंहारे वादिना स्वसाध्यसाधनाय न्यायप्रयोगे कृते प्रतिवादिना तद्धर्माभ्यां व्याप्त्यनपेक्षसाधर्म्यवैधर्म्याभ्यां तद्विपरीतसाध्याधिकरणवृत्तितदनधिकरणावृत्तिधर्माभ्यामिति यावत् । विपर्ययस्य तद्विपरीतसाध्यस्योपपत्तिरापादनम् । तस्मात् साधर्म्यं समं यत्र जातौ सा साधर्म्यसमा साधर्म्यं समं यत्र प्रयोगे स साधर्म्यसम इति वा । एवं वैधर्म्यसमादौ व्युत्पत्तिर्बोध्या । यथा शब्दोऽनित्यः कृतकत्वाद् घटवद् व्यतिरेकिना व्योमवदित्युपसंहृते नैतदेवं यद्यनित्यघटसाधर्म्यात् नित्यव्योमवैधर्म्याद् वा कृतकत्वात् शब्दोऽनित्यः स्यात् तदा नित्याकाशसाधर्म्यादनित्यघटवैधर्म्याद्वा अमूर्तत्वात् नित्यः स्यात् शब्दः कोऽत्र विशेष इति । अत्र साधर्म्यवैधर्म्यावेव गमकतया वादिनोपन्यस्तावित्यभिमानेन प्रयोगः । सत्प्रतिपक्षदेशनाभासे चेमे । अनैकान्तिकदेशनाभासेति वार्त्तिकेऽनैकान्तिकपदं सत्प्रतिपक्षपरम् । एकान्ततः साध्यसाधकत्वविरहव्युत्पत्तेः ॥ २ ॥

(१) तत्र सर्वत्र प्रत्यवस्थानप्रकारेषु साधर्म्यवैधर्म्योपस्थितेवाक्यकत्वात्? (आवश्यकत्वात्) तद्विशेषज्ञाने च तत्सामान्यज्ञानस्योपजीव्यत्वात् तत्रापि तद्व्यतिरेकगर्भत्वात् वैधर्म्यस्य पश्चाद्भावे तयोर्लक्षणाय सूत्रम् । साधर्म्यवैधर्म्याभ्यामित्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

अनयोरसदुत्तरत्वमाह ।

गोत्वाद् गोसिद्धिवत् तत्सिद्धिः(१) ॥ ३ ॥

लाघवेन गोत्वस्यैव गोपदशक्यतावच्छेदकतया गोत्वहेतुना यथा गोसिद्धिः गोपदव्यवहारविषयतासिद्धिर्गोत्वस्य गोपदव्यवहारविषयताव्याप्तिमत्त्वेनाधिकबलत्वात् तथा तत्सिद्धिः शब्दे कृतकत्वेनानित्यत्वव्याप्येनानित्यत्वसिद्धिः। न त्वमूर्तत्वेनाव्याप्येन नित्यत्वसिद्धिः व्याप्तिपक्षधर्मतायालिङ्गहेतोरेव साधकत्वादन्यथा प्रमेयत्वादिना ह्रदादावपि वह्निः सिध्येदिति भावः। केचित्तु गोत्वाद् गोत्वव्यञ्जकात् सास्नादितः गोसिद्धिः तादात्म्येन गोः सिद्धिर्यथा तथा तत्सिद्धिरित्यन्यत् पूर्ववदित्याहुः ॥ ३ ॥

सत्प्रतिपक्षदेशनाभासप्रकरणम् ॥

क्रमप्राप्तं जातिषट्कं लाघवेनैकसूत्रेण निरूपयति ।

साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः(२) ॥ ४ ॥

साध्यदृष्टान्तयोरित्यत्र साध्यपदमनुमितिविषयपरम्। तेन साध्यपक्षयोर्लाभः। तथा चानुमितिविषयस्य दृष्टान्तस्य वा यो धर्मस्तद्विकल्पात् तदापादनेन साध्यानुमितिविरोधात्। उभयसाध्यत्वाच्च साध्यदृष्टान्तान्यतरवृत्तिधर्म-

---

(१) युक्ताङ्गहीनत्वप्रदर्शनार्थमनयोः प्रत्युत्तरं सूत्रम्। गोत्वाद् गोसिद्धिवत् तत्सिद्धिरित्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

(२) अथ वैविध्यात्मकविकल्पानां साधर्म्यादिनिरूप्यत्वात् साध्यदृष्टान्तधर्मविकल्पजातिप्रभवजातिषट्कप्रकरणम्। तल्लक्षणाय सूत्रम्। साध्यदृष्टान्तयोर्धर्मविकल्पादित्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

साध्यत्वाच्च उत्कर्षसमादयः षड्त्यर्थः । तत्राविद्यमान-धर्मारोप उत्कर्षस्तेन सम उत्कर्षसमः । एवमुत्तरत्रापि । विद्यमानधर्मापचयोऽपकर्षः । वर्ण्यावर्ण्यसाध्येति भावप्रधानो निर्देशः । वर्ण्यत्वं सन्दिग्धसाध्यकत्वमवर्ण्यत्वं तद-भावः विकल्पो व्यभिचारः साध्यत्वमनुमितिविधेयत्वम् । तत्रोत्कर्षसमलक्षणम् । व्याप्तिमपुरस्कृत्य पक्षदृष्टान्तान्यतरस्मिन् साध्यसाधनान्यतरेण पक्षदृष्टान्तान्यतराविद्यमानधर्मस्य भावरूपस्य प्रसञ्जनमित्यर्थः । विद्यमानस्य प्रसञ्जनाभावादविद्यमानत्वलाभः । यथा शब्दोऽनित्यः कृतकत्वादितिवादिप्रयोगे घटे रूपसहचरितमनित्यत्वं कृतकत्वं शब्दवृत्ति स्यात् शब्दोऽपि रूपवान् स्यात् । एवं शब्दे श्रावणत्वसहचरितकृतकत्वं घटे ऽपि स्यात् घटः श्रावणः स्याद-विशेषात् । न चैवमर्थान्तरमिति वाच्यम् । विपर्यये साधनपक्षदृष्टान्तवैकल्यगमकत्वात् । असिद्धिदेशनाभासेयम् । क्वचित् साध्यस्य पक्षवैकल्यगमकतया बाधदेशनाभासा । क्वचिच्च साध्यस्य दृष्टान्तवैकल्यगमकतया विरुद्धदेशनाभासेति । साधर्म्यसमायां साध्यसाधनातिरिक्तेन साध्यविपर्ययसाधनमतो नाविशेष इति । पक्षदृष्टान्तान्यतरस्मिन्नन्यतरधर्मस्याभावरूपस्य साध्यसाधनान्यतरेणापादनमपकर्षसमा । यथा घटः शब्दे नीरूपत्वसहचरितकृतकत्ववान् नीरूपः स्यादिति । इयमपि दृष्टान्तवैकल्यादिदेशनाभासेति । पक्षवृत्तिहेतुना दृष्टान्ते सन्दिग्धसाध्यकत्वादिरूपपक्षत्वापादनं वर्ण्यसमा । यथा शब्दोऽनित्यः कृतकत्वादित्यादिप्रयोगे पक्षे पक्षतासहचरितकृतकत्वादिकं यदि घटादौ स्वीक्रियते तदा घटादिकमपि सन्दिग्धसाध्यः स्यादिति । सर्वत्रैव हेतुमति साध्यसंशयादनुपसंहारिहेतुदेशनाभासेयं भवति । यदि दृष्टान्ते हेतुर्न स्वीक्रियते साधनविकलो

दृष्टान्तः स्यादिति भावः। दृष्टान्तहेतुना पक्षे ऽसन्दिग्धसाध्यकत्वादि रूपपक्षत्वाभावापादनमवर्ण्यसमा। दृष्टान्ते घटादौ कृतकत्वादिहेतुरनित्यत्वादिरूपसाध्यसन्देहविशेष्यत्वाभावसहचरितः तादृशहेतुरेव पक्षे शब्दे स्वीकार्यो ऽन्यथा तस्य गमकत्वाभावात् पक्षे गमकहेत्वभावात् स्वरूपासिद्धिः स्यादिति पक्षे तादृशहेतुः स्वीकार्य इति शब्दादौ पक्षे सन्दिग्धसाधकत्वादिरूपपक्षत्वाभावादाश्रयासिद्धिरित्यसिद्धिदेशनाभासेयम्। दृष्टान्ते हेतुर्यादृशस्तादृशहेतुः पक्षे चेत् तदा गमक इत्यभिमानेनेदम्। व्यभिचारितासम्बन्धेन पक्षदृष्टान्तवृत्तिधर्मेण हेतौ साध्यव्यभिचारापादनं विकल्पसमा। यथा शब्दोऽनित्यः कृतकत्वादित्यादौ कृतकत्वे हेतौ गुरुत्वस्य दृष्टान्तधर्मस्य व्यभिचारितासम्बन्धेन सत्त्वात् कृतकत्वमनित्यत्वस्यापि व्यभिचारि स्यात् गुरुत्वस्यानित्यत्वस्य च दृष्टान्तवृत्तित्वाविशेषादित्यनैकान्तिकदेशनाभासेयम्। पक्षवृत्तिनानुमितिविषयत्वरूपधर्मेण पक्षतावच्छेदकादौ साध्यतुल्यतापादनं साध्यसमा। यथा शब्दत्वस्यानित्यत्वानुमितिविषयत्वे ऽनित्यत्ववत् शब्दत्वमपि प्राक् शब्दे ऽनिश्चितं स्यात् प्रागसिद्धस्यैवानुमितिविषयत्वादिति पक्षतावच्छेदकविशिष्टपक्षस्याप्रसिद्धा आश्रयासिद्धिरित्यसिद्धिदेशनाभासेयमपीति। केचित्तु साध्यदृष्टान्तयोर्धर्मविकल्पादित्यस्य पक्षे दृष्टान्ते चान्यतरस्मिन् धर्मविकल्पो धर्मस्य वैचित्र्यं तच्च क्वचित् सत्त्वं क्वचिदसत्त्वम्। साध्यते ऽत्रेतिव्युत्पत्त्या साध्यपदस्य पक्षपरत्वात्। हेतुरयमुत्कर्षसमादिपञ्चकेषु। उभयसाध्यत्वाच्चेति साध्यसमायां हेतुरिति। साध्यसाधनान्यतररूपस्य विकल्पात् सत्त्वाद्विद्यमानधर्मारोप उत्कर्षसमः व्याप्तिमपुरस्कृत्य पक्षदृष्टा-

एवं करणैर्जलधाराप्रवाहसाधनैर्धनुर्ज्यायाः क्षिप्रचलनं शीघ्रचलनं भवति येन शीघ्रं शरमोचणं शरप्रक्षेपणं च भवति । जलधाराप्रवाहविकारेणैव खशब्दा मेघगर्जनानि भवन्तीति । शेषं स्पष्टार्थम् ।

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितो यन्त्रविधौ सुधाकरेण ॥

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्तनूतनतिलके यन्त्राध्यायो द्वाविंशः ॥ २२ ॥

Digitized by Google

अथ मानाध्यायः ।

तत्रादौ केन केन मानेन के के पदार्था गृह्यन्त इत्याह ।

सौरेणाब्दा मासास्तिथयश्चान्द्रेण सावनैर्दिवसाः ।
दिनमासाब्दपमध्या न तद्विनाऽर्केन्दुमानाभ्याम् ॥ १ ॥

सौरेणाब्दाः । चान्द्रेण मासास्तिथयश्च । सावनैर्दिवसा दिन-मासाब्दपा मध्या ग्रहाश्च गृह्यन्ते । तत् सावनमानं चार्केन्दुमानाभ्यां विना न भवति । सौरचान्द्राभ्यां विनाऽहर्गणसाधनं न भवतीत्यर्थः ॥ १ ॥

इदानीं मानान्याह ।

मानानि सौरचान्द्रार्क्षसावनानि ग्रहानयनमेभिः ।
मानैः पृथक् चतुर्भिः संव्यवहारोऽत्र लोकस्य ॥ २ ॥

सौरं चान्द्रमार्क्षं सावनमिति मानानि सन्ति । एभिर्मानैर्ग्रहानय-नमेभिश्चतुर्भिः पृथक् पृथगत्र भुवि लोकस्य प्राणिनो व्यवहारो भवति । 'ज्ञेयं विमिश्रं तु मनुष्यमानम्'—इत्यादि भास्करोक्तमेतदनुरूपमेव ॥ २ ॥

इदानीं विशेषमाह ।

युगवर्षविषुवदयनर्त्त्वहर्निशोर्वृद्धिहानयः सौरात् ।
तिथिकरणाधिकमासोनरात्रपर्वक्रियाश्चान्द्रात् ॥ ३ ॥
यज्ञसवनप्रमाणग्रहगत्युपवाससूतकचिकित्साः ।
सावनमानाज्ज्ञेयाः प्रायश्चित्तक्रियाश्चात्र ॥ ४ ॥

पर्वक्रिया पूर्णान्तदर्शान्तक्रिया दर्शयागादि । सवनं पुंसवनादि । प्रमाणं द्रव्यदानादौ प्रमाणदिनादि । शेषं स्पष्टम् । 'वर्षायनर्तुयुगपूर्व-कम्'—इत्यादि भास्करोक्तमेतदनुरूपमेव ॥ ३-४ ॥

इदानीं नक्षत्रसावनप्रशंसामाह ।

नक्षत्रसावनदिनात् सूर्यादीनां स्वसावनदिनानि ।
यस्मात् तस्मादार्क्षं दुरधिगमं मन्दबुद्धीनाम् ॥ ५ ॥

Digitized by Google

यस्मात् सूर्यादीनां स्वस्वसावनदिनानि नक्षत्रसावनदिनादेव सिद्धानि भवन्ति ('भभमास्तु भगणैर्विवर्जिता यस्य तस्य कुदिनानि तानि वा'-इति भास्करोक्त्या स्फुटम् ।) तस्मान्मन्दबुद्धीनां मध्ये ज्ञातुं मानं दुरधिगममतीव कठिनमित्यर्थः । तदेव सूक्ष्मं विवेचनीयमन्यथा ग्रहसाधनानि समीचीनानि न भवन्तीत्याचार्याशयः ॥ ५ ॥

इदानीं नव मानान्याह ।

मानुष्यदिव्यपित्र्यब्राह्मार्क्षयष्टावमूर्त्तकालस्य ।
उक्तानि ज्ञानार्थं बार्हस्पत्यं नवममन्यत् ॥ ६ ॥

अमूर्त्तकालस्याव्यक्तात्मककालस्य ज्ञानार्थं मानुष्यं मानचतुष्टयम् । दिव्यं दैवं पित्र्यं ब्राह्ममन्यच्च बार्हस्पत्यमिति नव मानान्युक्तानीति ॥ ६ ॥

इदानीमृतूनाह ।

द्वौ द्वौ राशी मकरादृतवः षट् सूर्यगतिवशाद्भाज्याः ।
शिशिरवसन्तग्रीष्मा वर्षाशरदः सहेमन्ताः ॥ ७ ॥

मकराद्द्वौ द्वौ राशी षट् ऋतवः सूर्यगतिवशाद्भाज्या विभाजनीया इति । शेषं स्पष्टार्थम् । 'मृगादिराशिद्वयभानुभोगात् षट् चर्तवः स्यु.'-इत्यादि श्रीपत्युक्तमेतदनुरूपमेव ॥ ७ ॥

इदानीं भूभादैर्घ्यं भूभामानं चाह ।

भूव्यासगुणो भक्तः कर्कव्यासान्तरेण रविकर्णः ।
भूमध्याद्भूछाया दीर्घत्वं चन्द्रकर्णोनम् ॥ ८ ॥
शेषं भूव्यासगुणं दीर्घत्वहृतं शशाङ्ककच्छायाम् ।
तमसो व्यासः शशिकर्णहृतस्त्रिज्यागुणो लिप्ताः ॥ ९ ॥

स्पष्टार्थम् । उपपत्तिश्च भूभासाधनक्षेत्रानुपातेन स्फुटा ॥ ८-९ ॥

इदानीं प्रकारान्तरेण भूभामाह ।

रविकर्णहृता त्रिज्या कर्कव्यासान्तराहता शोध्या ।
त्रिज्याभूव्यासवधात् शशिकर्णहृतात् तमोव्यासः ॥ १० ॥

Digitized by Google

स्पष्टार्थम् ।

अत्रोपपत्तिः । योजनात्मकभूभाव्यासः $= \text{भूव्या} - \frac{\text{चक}(\text{रव्या} - \text{भूव्या})}{\text{रक}}$

इयं त्रिज्यागुणा चन्द्रकर्णहृता जाता भूभाबिम्बकलाः

$$= \frac{\text{त्रि}\cdot\text{भूव्या}}{\text{चक}} - \frac{\text{त्रि}(\text{रव्या} - \text{भूव्या})}{\text{रक}} \text{ ।}$$

अत उपपन्नं यथोक्तम् ॥ १० ॥

इदानीं प्रकारान्तरेण भूभामानमाह ।

भूव्यासेन्दुगतिवधात् कर्कव्यासान्तरार्कभुक्तिवधम् ।
प्रोह्येन्दुमध्यभुक्त्या तिथिगुणयाऽऽप्तं तमोव्यासः ॥ ११ ॥

स्पष्टार्थम् ।

अत्रोपपत्तिः । पूर्वश्लोकेन भूभाबिम्बकलाः

$$= \frac{\text{त्रि}\cdot\text{भूव्या}}{\text{चक}} - \frac{\text{त्रि}(\text{रव्या} - \text{भूव्या})}{\text{रक}}$$

$$= \text{२चन्द्रपरलम्बनकलाः} - \frac{\text{त्रि}\cdot\text{भूव्या}(\text{रव्या} - \text{भूव्या})}{\text{रक}\cdot\text{भूव्या}}$$

$$= \frac{\text{२चग}}{\text{१५}} - \frac{\text{२रग}(\text{रव्या} - \text{भूव्या})}{\text{१५ भूव्या}}$$

$$= \frac{\text{२चग}\cdot\text{भूव्या} - \text{२रग}(\text{रव्या} - \text{भूव्या})}{\text{१५भूव्या}}$$

$$= \frac{\text{चग}\cdot\text{भूव्या} - \text{रग}(\text{रव्या} - \text{भूव्या})}{\text{१५ भूव्याद}}$$

आचार्यमते भूव्यासदलं स्वल्पान्तराच्चन्द्रमध्यगतिकलासममत उपपन्नं यथोक्तम् ॥ ११ ॥

इदानीमध्यायोपसंहारमाह ।

योऽधिकमासावमरात्रसम्भवज्ञः स वेत्ति मानानि ।
आर्याद्वादशभिरयं मानाध्यायस्त्रयोविंशः ॥ १२ ॥

इति श्रीब्राह्मस्फुटसिद्धान्ते मानाध्यायस्त्रयोविंशः ॥ २३ ॥

Digitized by Google

यो गणकोऽधिकमासावमरात्रसम्भवज्ञः स एव सौरादिमानानि वेत्ति यतः सौरचान्द्रमानाभ्यां सम्यग्ज्ञाताभ्यामधिमासज्ञानं चान्द्रसावनमानाभ्यां च क्षयाहज्ञानं भवति । शेषं स्पष्टम् ॥ १२ ॥

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितो मानविधौ सुधाकरेण ।

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्तनूतनतिलके मानाध्यायस्त्रयोविंशः ॥ २३ ॥

अथ संज्ञाध्यायः ।

तत्रादौ संज्ञाकथने कारणमाह ।

यस्मात् संप्रतिपत्तिर्न संज्ञया संज्ञिनो विना तस्मात् ।
लोके प्रसिद्धसंज्ञा रूपादीनां शशाङ्काद्याः ॥ १ ॥

यस्मात् संज्ञया विना यः संज्ञितः पदार्थस्तस्य संप्रतिपत्तिः प्राप्तिः परिचयो वा न भवति तस्मात् लोके रूपादीनां रूपवतां पदार्थानां शशाङ्काद्याः प्रसिद्धसंज्ञाः सन्ति । ये ये रूपवन्तस्ते ते संज्ञावन्तः । संज्ञां विना परिचयो न भवतीत्यर्थः ॥ १ ॥

इदानीं सिद्धान्त एक एवेति प्रतिपादयति ।

युगपद्युगादिरुदयाद्याम्यायां भास्करस्य वारुण्याम् ।
रात्र्यर्धात् सौम्यायामस्तमयाद्दिनदलादैन्द्र्याम् ॥ २ ॥
अयमेव कृतः सूर्येन्दुपुलिशरोमकवसिष्ठयवनाद्यैः ।
यस्मात् तस्मादेकः सिद्धान्तो विरचितो नान्यः ॥ ३ ॥

कस्यचिन्मते भास्करस्य याम्यायां लङ्कायामुदयाद्युगवद्युगादिः । अन्यमते तदैव वारुण्यां रोमकपत्तने रात्र्यर्धाद्युगादिः । अन्यमते तदैव सौम्यायां सिद्धपुरेऽस्तमयाद्युगादिः । अन्यमते च तदैवैन्द्र्यां यमकोट्यां दिनदलाद्युगादिः । एवं देशविशेषेणोदयास्तादिकालः सूर्यस्य जातो वस्तुत आकाशे सूर्यस्य स्थितिश्च मेषादावेवातो ग्रहगणनायामेव सर्वत्र एक एवायं सिद्धान्तः सूर्येन्दुपुलिशरोमकवसिष्ठयवनाद्यैः कृतः । यस्माद्देशविशेषस्य भिन्नभिन्नकालवशेन ग्रहगणनायां भेदो न भवति तस्मात् सूर्याद्यैर्वस्तुत एक एव सिद्धान्तो विरचितो नान्य इति सिद्धान्तविदां सर्वं स्फुटम् ॥ २–३ ॥

इदानीं कस्मिन्नंशे सूर्यसिद्धान्तादयो भिन्ना इत्याह ।

यदि भिन्नाः सिद्धान्ता भास्करसङ्क्रान्तयो विभेदसमाः ।
स स्पष्टः पूर्वस्यां विषुवत्यर्कोदयो यस्य ॥ ४ ॥

यदि सौरादयः सिद्धान्ता भिन्नास्तर्हि विभेदसमा भास्करसङ्क्रान्तयः सन्ति। रविसङ्क्रान्तिसमय एक एव तेषां सौरादीनां गणनया नायाति तेन हेतुना सिद्धान्ता भिन्नाः। तेषां कतमः स्फुट इत्याह स स्पष्ट इति। यस्य गणनया विषुवति मेषतुलादौ पूर्वस्यां दिश्येव प्राक्स्वस्तिकबिन्दावर्कोदयो वेधेनोपलभ्यते स एव स्पष्टः स्फुटो ज्ञेय इति। यद्युदयकाल एव रविर्मेषतुलादिगस्तदैवैवं भवत्यन्यथा तारतम्येन स्व्युदयेन सिद्धान्तगणना परीक्षणीयेति ॥ ४ ॥

इदानीं स्वसिद्धान्तोत्तरार्धेऽनुक्रमणिकामाह।

तन्त्रपरीक्षा गणितं मध्यमगत्युत्तरादयः पञ्च।
कुट्टाकारो वेधश्छन्दश्चित्युत्तरं गोलः ॥ ५ ॥
यन्त्राणि मानसंज्ञाख्याताध्यायाश्चतुर्दश ब्राह्मे।
अध्यायचतुर्विंशतिराद्यैर्दशभिर्युताध्यायैः ॥ ६ ॥

उत्तरार्धे तन्त्रपरीक्षाध्यायः। गणितं गणिताध्यायः। पञ्च मध्यमगत्युत्तरादयोऽधिकाराः सन्ति। मध्यगत्युत्तराध्यायः। स्फुटगत्युत्तराध्यायः। त्रिप्रश्नोत्तराध्यायः। छेद्यकाध्यायः। शृङ्गोन्नत्युत्तराध्यायः। कुट्टाकाराध्यायः। छन्दश्चित्युत्तराध्यायः। गोलो गोलाध्यायः। यन्त्राणि यन्त्राध्यायः। मानसंज्ञाध्यायः। ख्याताध्यायः संज्ञाध्यायोऽयमेव। एवमुत्तरार्धे ब्राह्मे सिद्धान्ते चतुर्दशाध्यायाः सन्ति। एत आद्यैर्दशभिरध्यायैर्युता अध्यायचतुर्विंशतिश्च ग्रन्थे ज्ञेयेति ॥ ६ ॥

इदानीं ग्रन्थरचनकालमाह।

श्रीचापवंशतिलके श्रीव्याघ्रमुखे नृपे शकनृपाणाम्।
पञ्चाशत्संयुक्तैर्वर्षशतैः पञ्चभिरतीतैः ॥ ७ ॥
ब्राह्मः स्फुटसिद्धान्तः सज्जनगणितज्ञगोलवित्प्रीत्यै।
त्रिंशद्वर्षेण कृतो जिष्णुसुतब्रह्मगुप्तेन ॥ ८ ॥

श्रीव्याघ्रमुखे नृपे पृथ्वीं शासति। किंविशिष्टे नृपे श्रीचापवंशतिलके। शकनृपाणां पञ्चाशत्संयुक्तैः पञ्चभिर्वर्षशतैरतीतैरर्थात् पञ्चाशदधिकपञ्चशतशके। शेषं स्पष्टम् ॥ ७–८ ॥

इदानीमस्मिन् सिद्धान्ते गणितेन लाघवेन करणग्रन्थवत् फल-सिद्धिः किमु न कृतेत्याशङ्क्याह ।

गणितेन फले सिद्धिर्ब्राह्मे ध्यानग्रहे यतोऽध्याये ।
ध्यानग्रहो द्विसप्ततिरार्याणां न लिखितोऽत्र मया ॥ ९ ॥

यतो ब्राह्मे ब्रह्मकृते ध्यानग्रहे ध्यानग्रहनाम्न्यध्याये गणितेन फले मान्दादिफलसाधने लाघवेन सिद्धिः कृताऽतोऽत्रार्याणां द्विसप्ततिर्ध्यानग्रहोऽध्यायः पुनरुक्तिदोषभयान्मया न लिखित इति ॥ ९ ॥

इदानीं ग्रन्थसंख्यामाह ।

भटब्रह्माचार्येण जिष्णोस्तनयेन गणितगोलविदा ।
आर्याष्टसहस्रेण स्फुटसिद्धान्तः कृतो ब्राह्मः ॥ १० ॥

आर्याणामष्टाधिकैकसहस्रेण । शेषं स्पष्टार्थम् ॥ १० ॥

इदानीं सूर्यग्रहणे चन्द्रशङ्कुः किमु न कृत इत्याशङ्क्याह ।

भग्रहयुतिवच्छङ्कुर्विंत्रिभलग्नाद्रविग्रहोक्तिसमः ।
शशिनः कर्मबहुत्वात् न कृतोऽतो भास्करग्रहणे ॥ ११ ॥

भग्रहयुतिवद्रविग्रहोक्तिसमः शशिनो वित्रिभलग्नाच्छङ्कुः कर्मबहुत्वात् महताऽऽयासेन भवति। अतो मया भास्करग्रहणे शशिशङ्कुर्न कृतः प्रयोजनाभावात् । इयमार्या निष्प्रयोजना ॥ ११ ॥

इदानीं प्रश्नविशेषमाह ।

आग्नेये नैर्ऋत्ये वेष्टदिने संस्थितस्य योऽर्कस्य ।
शङ्कुच्छाये कथयति वर्षादपि वेत्ति सूर्यं सः ॥ १२ ॥

इष्टदिने आग्नेये वा नैर्ऋत्ये कोणवृत्ते संस्थितस्यार्कस्य वा यो वर्षादपि वर्षपर्यन्तकालेनापि शङ्कुच्छाये कथयति स एव सूर्यं वेत्तीति ।

अस्योत्तरं कोणशङ्कोरानयनेन स्फुटम् ॥ १२ ॥

इदानीमध्यायोपसंहारमाह ।

अत्र मया यन्नोक्तं गोलादुत्प्रेक्ष्य धीमता वोह्यम् ।
आर्यात्रयोदशोऽयं संज्ञाध्यायश्चतुर्विंशः ॥ १३ ॥

इति श्रीमदाचार्यजिष्णुसुतब्रह्मगुप्तविरचिते ब्राह्म-
स्फुटसिद्धान्ते संज्ञाध्यायश्चतुर्विंशतितमः
सम्पूर्णतामगमत् ॥ २४ ॥

अत्र मया यत् किञ्चिन्नोक्तं तत्सर्वं धीमता गणकेन गोलादुत्प्रेक्ष्य ऊह्यम् । गोलबोधे हीदमेव फलं यदनुक्तमपि बुद्धिमता ज्ञायते । शेषं स्पष्टम् ॥ १३ ॥

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितो नामविधौ सुधाकरेण ॥

इति श्री कृपालुदत्तसूनुसुधाकर द्विवेदिविरचिते ब्राह्मस्फुटसिद्धान्त-
नूतनतिलके संज्ञाध्यायश्चतुर्विंशतितमः सम्पूर्णतामगमत् ॥

Digitized by Google

अथ ब्रह्मगुप्तकृतो ध्यानग्रहोपदेशाध्यायः ।

तत्रादौ चैत्रादौ मासगणानयनमाह ।

पञ्चाशत्संयुक्तैर्वर्षशतैः पञ्चभिर्विना शाकः ।
त्रिष्ठोऽर्कैर्वसुवेदैर्नवचन्द्रैस्ताडितः क्रमशः ॥ १ ॥
पञ्चाब्धियुतोऽधः षष्टिभाजितो लब्धियुक् सरसवेदः ।
*मध्यमराशिर्विश्वैर्विभाजितोऽभ्यधिकमासाः स्युः ॥ २ ॥
तैरुपरितनो युक्तो मासगणोऽभ्यधिकशेषकः शुद्धः ।
घटिकादिको भचक्राद्रविरविशेषो भवेद्वादिः ॥ ३ ॥

शाकः खपञ्चपञ्चोनस्त्रिधा स्थाप्यः । एको रविभिर्गुणः । द्वितीयो वसुवेदैस्तृतीयो नवचन्द्रैश्च गुणः । अधोराशिः पञ्चाब्धि-४५ युतः षष्टि-भाजितः फलं मध्यराशौ क्षेप्यम् । तत्रैव रसवेदाश्च ४६ क्षेप्याः । एवं संस्कृतो मध्यो मध्यमराशिः अधमाङ्कविश्वैर्विभाजितोऽधिमासाः स्युः । तैरधिमासैरुपरितनो राशिर्युक्तो मासगणश्चान्द्रो भवति ।

अत्रोपपत्तिः । एकस्मिन् वर्षेऽधिमासः $= \frac{१५९३३००००००}{४३२००००००००}$

$$= \frac{५३११ \times ३०००००}{१४४८० \times ३०००००} = \frac{५३११}{१४४००} = \frac{५३११ \times १३१}{१३१ \times १४४००}$$

$$= \frac{\frac{५३११ \times १३१}{१४४००}}{१३१} = \frac{४८\frac{१६}{४०}}{१३१}$$ स्वल्पान्तरात् ।

अयमिष्टैः सौरवर्षैर्गुणोऽधिमासाः स्युः । शेषोपपत्तिः स्फुटाः । ४५ । ४६ अस्य क्षेपस्योपपत्तिरन्यान्ते द्रष्टव्या ।

सौरवर्षचैत्राद्योर्मध्येऽधिमासशेषो मासात्मकश्चान्द्रस्तच्चालनं कल्पचान्द्रमासैः कल्पसौरमासास्तदाऽधिशेषेण किं लब्धं राश्यादि चालन-

---

* मध्यः अधमाङ्कविश्वैः-इति पाठः साधुः ।

$$\text{मृणम्} = \frac{\text{५१८४०००००००}}{\text{५३४३३३००८००}} \times \frac{\text{अधिशे}}{\text{१३१}} = \frac{\text{१७२८००} \times \text{३०००००}}{\text{१७८१११} \times \text{३०००००}} \times \frac{\text{अधिशे}}{\text{१३१}}$$

$$= \frac{\text{१७२८००}}{\text{१७८१११}} \times \frac{\text{अधिशे}}{\text{१३१}} \text{ ।}$$

इदं नवगुणं चतुर्भक्तं लब्धं नक्षत्रात्मकं चालनं षष्टिगुणं जातं घट्यात्मकम् ।

$$= \frac{\text{१७२८००} \times \text{९} \times \text{अधिशे} \times \text{६०}}{\text{१७८१११} \times \text{४} \times \text{१३१}} = \frac{\text{१७२८००} \times \text{१३५} \times \text{अधिशे}}{\text{१७८१११} \times \text{१३१}}$$

$$= \frac{\text{२३३२८०००} \times \text{अधिशे}}{\text{२३३३२५४१}} = \text{अधिशे । स्वल्पान्तरात्}$$

सौरवर्षादौ रविर्भचक्रेण नक्षत्रसप्तविंशत्या समोऽतो भचक्रादधिशेषघटीसमचालनं विशोध्य चैत्रादौ भावी रविर्ज्ञेय इति स्फुटम् ॥ १–३ ॥

इदानीं चैत्रादौ दिनादिकं तिथिध्रुवसाधनमाह ।

रूपेण रूपरामैः खसायकैस्ताडितो गणो युक्तः ।
षड्भिर्वेदैर्धृत्या वासरघटिकाविघटिकाः स्युः ॥ ४ ॥
खखरसलब्धं च गणाद्घटिकासु नियोजयेत् तिथिध्रुवकाः ।
रव्यादिकस्तदुदये चैत्रादावर्कचन्द्रौ च ॥ ५ ॥

गणो मासगणो रूपेण १ दिनेन रूपरामै–३१ घटीभिः खसायकै-५० विघटीभिस्ताडितो दिनादिस्थाने क्रमेण षड्भि–६ वेदै–४ र्धृत्या १८ युक्तः । गणान्मासगणात् खखरसै ६०० र्यल्लब्धं घट्यात्मकं फलं तद्घटिकासु नियोजयेत् तदा वासरघटिकाविघटिकाश्चैत्रादौ तिथिध्रुवकाः स्युः । वासरश्च रव्यादिको ज्ञेयस्तदुदये च चैत्रादावर्कचन्द्रौ मध्यमौ भवतः । नक्षत्रात्मको रविश्च पूर्वं साधितो दर्शान्ते चैत्रादौ तावानेव चन्द्रश्चेति ।

अत्रोपपत्तिः । एकस्मिन् चान्द्रमासे सावनदिनादि २९ । ३१ । ५० । ६ सप्ततष्टं जातम् = १ । ३१ । ५० । ६ = १ । ३१ + $\frac{१}{६००}$ । ५० । अनेन

मासगणो गुणितो ग्रन्थारम्भतेपयुक्तोऽभीष्टे चैत्रादौ तिथिध्रुवो भवेदिति स्पष्टम् । क्षेपोपपत्तिर्ग्रन्थान्ते द्रष्टव्या ॥ ४-५ ॥

इदानीं चन्द्रकेन्द्रसाधनमाह ।

मासगणो यमगुणितः पृथक् कृतस्वोद्धृतः फलसमेतः
सार्धाष्टयुतो वसुयमविभक्तशेषो विधोः केन्द्रम् ॥ ६ ॥

यम-२ गुणितो मासगणः पृथक् स्थाप्यः कृतस्व-२५१ भक्तः पृथक्स्थः फलेन सहितः कार्यस्ततः सार्धाष्टयुतः । योगो वसुयमै-२८ विभक्तः शेषश्चन्द्रस्य केन्द्रं भवति ।

अत्रोपपत्तिः । एकस्मिन् चन्द्रकेन्द्रभगणे वसुयमा २८ विभागाः कृताः । तद्विभागजातीयमेव केन्द्रमत्र साध्यते ।

कल्पे चन्द्रभगणाः = ५७७५३३००००००

चन्द्रोच्चभगणाः = ४८८१०५८५८

केन्द्रभगणाः = ५७२६५१९४१४२

एते कल्पचान्द्रमासभक्ता जातमेकस्मिन् चान्द्रमासे भगणात्मकं केन्द्रम्

$$= \frac{५७२६५१९४१४२}{५३४३३३००००००} = १ + \frac{३८३१८९४१४२}{५३४३३३००००००} ।$$

अत्र प्रयोजनाभावाद्भगणं त्यक्त्वा भगणशेषं वसुयमैः संगुण्य हरेण विभज्य लब्धमभीष्टभागात्मकं केन्द्रमेकस्मिन् चान्द्रमासे

$$= २ + \frac{१०७४४०८९९४ \times ४}{१३३५८३२५००० \times ४} = २ + \frac{२}{२५१}$$ स्वल्पान्तरात् । सार्धाष्टसंख्या ग्रन्थारम्भे क्षेपमानं तदुपपत्तिश्च ग्रन्थान्ते द्रष्टव्या । अत उपपन्नं केन्द्रानयनम् ॥ ६ ॥

इदानीमिष्टमासादौ रव्यानयनमाह ।

चैत्रादिमासगुणिते द्वे नक्षत्रे क्षिपेत् सहस्रांशौ ।
घटिकैकादशयुक्ते *सार्धेन फलेन सहिते च ॥ ७ ॥

* सार्धेन फलेन रहिते चेति पाठः साधुः ।

Digitized by Google

द्वे नक्षत्रे घटिकैकादशयुक्ते सार्धैकेन पलेन रहिते च चैत्रादितो ये गतचान्द्रमासास्तैर्गुणिते चैत्राद्युद्भवरवौ फलं क्षिपेत् तदेष्टमासादौ नक्षत्रादिको रविर्भवेत् ।

अत्रोपपत्तिः । कल्परविभगणाः = ४३२०००००० । सप्तविंशतिगुणाः कल्पचान्द्रमास-५३४३३३००००० भक्ता जातमेकस्मिन् चान्द्रमासे नक्षत्रात्मकं रविमानम् $= \frac{\text{४३२००००००० × २७}}{\text{५३४३३३०००००}} = \frac{\text{१४४०० × ३००००० × २७}}{\text{१७८१११ × ३०००००}}$

$= \frac{\text{१४४०० × २७}}{\text{१७८१११}} = \frac{\text{३८८८००}}{\text{१७८१११}} = \text{२}\,\frac{\text{३२५७८}}{\text{१७८१११}}$ शेषं षष्ट्या गुणं हरभक्तमेवं नक्षत्रादिकं रविमानम् = २ । १० । ५८½ स्वल्पान्तरात् ।

तद्रूपान्तरम् = $\frac{\text{न}}{\text{२}}$ । $\frac{\text{घ}}{\text{११}}$ − (१½) प० । इदमिष्टमासगुणं तज्जो नक्षत्रादिको रविर्भवेत् । शेषोपपत्तिः स्फुटा ॥ ७ ॥

इदानीं प्रतिमासं शशिकेन्द्रतिथिध्रुवक्षेपावाह ।

नाड्यर्धेन समेतं भद्वितयं प्रक्षिपेच्च शशिकेन्द्रे ।
रूपं रूपहुताशाः खशराश्च तिथिध्रुवे क्रमशः ॥ ८ ॥

प्रतिमासं शशिकेन्द्रे नक्षत्रद्वितयं नाड्यर्धेन सहितं तिथिध्रुवे च क्रमशो दिनादौ रूपं १ रूपहुताशाः ३१ खशराश्च ५० इति प्रक्षिपेत् ।

अत्रोपपत्तिः । ६ श्लोकेनैकस्मिन् चान्द्रमासे शशिकेन्द्रमानम् ।

$= \text{२} + \frac{\text{२}}{\text{२५१}} = \text{२ न} + \frac{\text{१}}{\text{२}}\,\text{घ}$ स्वल्पान्तरात् । अत्रैकस्मिन् भचक्रे अष्टाविंशतिनक्षत्राणि कल्पितानीति शशिकेन्द्रानयन एव प्रतिपादितम् । तिथिध्रुवक्षेपमानं च सप्ततष्टं चान्द्रमाससावनमानं दिनादि १ । ३१ । ५० स्फुटमेव । अत्राधिकं ६ विपलमानं त्यक्तं पलात्मकमानपर्यन्तमेव गणिते ग्राह्यत्वादिति स्फुटम् ॥ ८ ॥

इदानीं प्रतिदिनचालनमाह ।

वारं दद्यात् प्रतिदिनमब्धिपलोनां परित्यजेत् नाडीम् ।
केन्द्रे क्षिपेद्भमेकं *भद्वितयफलं घटीचतुष्कमिते ॥ ९ ॥

* मूलस्थफलं घटीचतुष्कमितम्-इति पाठः साधुः ।

प्रतिदिनं प्रतिचान्द्रदिनं तिथिध्रुवे दिनमेकं दद्याद्योजयेत् । अक्षिपलोनामेकां नाडीं च परित्यजेत् । शशिनः केन्द्रे च प्रतिचान्द्रदिनमेकं भं नक्षत्रं घटीचतुष्कमितं भूतस्वफलं घटीचतुष्कं भूतस्व–२५१ हृतं फलं घट्यात्मकं च क्षिपेत् ।

अत्रोपपत्तिः । त्रिंशत्तिथ्यात्मके चान्द्रमासे सावनदिनादि २९ । ३१ । ५०। इदं त्रिंशद्धृतं जातमेकस्मिन् चान्द्रदिने तिथिध्रुवे क्षेपकमानम्

$$= \frac{२९ । ३१ । ५०}{३०} = ० । ५९ । ४ = १ \text{ दि} - ५\frac{१}{६} \text{ प॰} = १ \text{ दि॰} - (१ \text{ घ} - ४ \text{ प}$$

एवमेकस्मिन् चान्द्रमासे शशिकेन्द्रं नक्षत्रात्मकम् $= ३० \frac{२}{२५१}$ ।

(६ सूत्रे भगणात्मकं केन्द्रं २८ संगुण्य नक्षत्रात्मकं यदि क्रियते तदा $३० \frac{२}{२५१}$ समुत्पद्यते ।) इदं त्रिंशद्धृतं जातमेकस्मिन् चान्द्रे दिने केन्द्रे क्षेपकमानम् $= \frac{३० + \frac{२}{२५१}}{३०} = १ + \frac{२}{३० \times २५१} = १ + \frac{२ \times ६०}{३० \times २५१}$ घटी $= १$ न $+ \frac{४}{२५१}$ घटी । अत उपपद्यते यथोक्तम् ।

भद्वितयेन भद्वितयमानेन १२० घटिकामितेन हृते घटीचतुष्कमिते यत् फलं घट्यात्मकं तदपि क्षिपेदित्येके 'भद्वितयफलं घटीचतुष्कमिते' इति पाठानुसारेण व्याख्यां कुर्वन्ति । अनेन '२५१' स्थाने १२० इयं स्थूला सङ्ख्योत्पद्यतेऽत एव मया पाठान्तरमुपनिबद्धम् ॥ ९ ॥

इदानीं देशान्तरसंस्कारमाह ।

उज्जयिनीयाम्योत्तररेखायाः प्राग्धनं क्षयः पश्चात् ।
योजनषष्ट्या नाडी चरदलमपि सौम्यदक्षिणयोः ॥ १० ॥

योजनषष्ट्यैका नाडी उज्जयिनीयाम्योत्तररेखायाः प्राग्धनं पश्चात् क्षयो भवति । एवं सौम्यदक्षिणयोर्गोलयोश्चरदलं चरासवोऽपि धनं क्षयश्च क्रमेण बोध्या इति ।

अत्रोपपत्तिः । यदि स्पष्टभूपरिधियोजनैः षष्टिघटिकास्तदा

देशान्तरयोजनैः किं जाता देशान्तरनाडी = $\frac{६० देयो}{स्पभूप}$ । आचार्येण स्थूल-स्पष्टभूपरिधिः = ३६०० योजनानि गृहीतः । ततो जाता देशान्तरना-डिका = $\frac{देयो}{६०}$ । धनर्णवासना चरधनर्णवासना च गोलयुक्त्या स्फुटा ॥१०॥

इदानीं चन्द्रसाधनमौदयिकरविसाधनं चाह ।

तिथयो दशभागोना
रविणा समन्विता शशी भवति मध्यः ।
तिथ्यंशाढ्याः शोध्या-
स्तिथिभोगजनाडिकाः केन्द्रात् ॥ ११ ॥

(तिथयो दशभागोना रविणा सहिताः शशी भवति मध्यः ।
तिथिभोगनाडिकाश्च द्विगुणोडुहृता रवेः शोध्याः ॥ *)

स्वदशभागोनास्तिथयो नक्षत्रात्मकं रविचन्द्रयोरन्तरं भवति । ता रविणा नक्षत्रात्मकसूर्येण सहिता नक्षत्रात्मको मध्यः शशी भवति । तिथिभोगनाडिका द्विगुणा उडु-२७ हृताः फलं नक्षत्रघटिका भवन्ति ता रवेः शोध्यास्तदा नक्षत्रादिको रविरुदये भवति ।

अत्रोपपत्तिः । तिथौ तिथौ रविचन्द्रयोर्द्वादशभागा अन्तरमतस्तिथयो द्वादशगुणा भागात्मकं रविचन्द्रयोरन्तरम् = १२ ति । चक्रांशैः सप्तविंशतिर्नक्षत्राणि तदेष्टान्तरेण १२ति अनेन किम् । जातं नक्षत्रात्मकमन्तरम् = $\frac{२७ \times १२ ति}{३६०} = \frac{२७ ति}{३०} = \frac{९ ति}{१०} = ति - \frac{ति}{१०}$ । एवं तिथ्यन्ते रविचन्द्रौ जातौ । तिथ्यन्तसूर्योदययोर्मध्ये तिथिभोगनाडिकास्तत्सम्बन्धिनक्षत्रात्मकचालनेन रवौ रहित उदये रविर्भवति । तिथिभोगघटिकाश्च सावनाः प्रसिद्धाः । एकस्मिन् सावनदिने रविगतिः = ५९' । ८'' = ३५४८'' । अतो नक्षत्रात्मिका गतिः = $\frac{३५४८}{६० \times ८००}$ । यदि घटीषष्ट्या रवेरियं नक्षत्रात्मिका गतिस्तदा तिथिभोगघटिकाभिः किं लब्धं नक्षत्रा-

* इति पाठः साधुः ।

त्मकमृणचालनं षष्टिगुणं जातं घट्यात्मकम् $= \frac{३५४८}{६० \times ८००} \times \frac{भोघ \times ६०}{६०} =$

$\frac{३५४८ \times भोघ}{६० \times ८००} = \frac{२ \times १७७४ \times भोघ}{४८०००} = \frac{२ भोघ}{\frac{४८०००}{१७७४}} = \frac{२ भोघ}{२७}$ स्वल्पान्तरात् ।

अत उपपन्नो मच्छोधितः पाठः ॥ ११ ॥

इदानीमौदयिकार्थं चन्द्रस्य तत्केन्द्रस्य च चालनमाह ।

तिथिभोगनाडिकास्तु द्विगुणा रसगुणोद्धृताः शोध्याः ।
पञ्चाशीत्यधिकोनास्तिथिनाड्यः शोधयेत् शशिनः ॥ १२ ॥

(पञ्चाशीतिलवोनास्तिथिनाड्यस्ताश्च शोधयेच्छशिनः ।
षष्ट्यंशाढ्याः शोध्यास्तिथिभोगजनाडिकाः केन्द्रात् ॥१२॥) *

स्पष्टार्थेयमार्या ।

अत्रोपपत्तिः । रविचालनवदत्रापि चन्द्रगतिः $= ७९०' । ३५'' = ४७४३५''$ । नक्षत्रात्मिकागतिः $= \frac{४७४३५}{६० \times ८००}$ । अतो रविवन्नक्षत्रघट्यात्मकं चालनम् $= \frac{४७४३५ भोघ \times ६०}{६० \times ८०० \times ६०} = \frac{४७४३५ भोघ}{६० \times ८००} = \frac{९४८७ भोघ}{१२ \times ८००}$

$= \frac{९४८७ भोघ}{९६००} = भोघ - \frac{११३ भोघ}{९६००} = भोघ - \frac{भोघ}{८५}$ स्वल्पान्तरात् ।

एवं चन्द्रकेन्द्रगतिः $= ७९०' । ३५'' - ६' । ४१'' = ७८३' । ५४''$ $= \frac{४७०३४''}{६०}$ । चक्रकलाभिरष्टाविंशतिर्नक्षत्राणि तदा चन्द्रकेन्द्रगतिकलाभिः किम् । जाता नक्षत्रात्मिका चन्द्रगतिः $= \frac{४७०३४ \times २८}{६० \times २१६००} =$

$\frac{४७०३४ \times ७}{६० \times ५४००} = \frac{२३५१७ \times ७}{६० \times २७००} = \frac{२६१३ \times ७}{६० \times ३००} = \frac{८७१ \times ७}{६० \times १००} = \frac{६०९७}{६०००}$ । (यतश्चन्द्रकेन्द्रसाधने चक्रकलास्वष्टाविंशतिनक्षत्राणि कल्पितानि) । ततो रविवन्नक्षत्रघट्यात्मकं चालनम् $= \frac{६०९७ भोघ \times ६०}{६००० \times ६०} = \frac{६०९७ भोघ}{६०००}$

$= भोघ + \frac{९७ भोघ}{६०००} = भोघ + \frac{भोघ}{६२}$ स्वल्पान्तरात् । इहाचार्येण सुखार्थं ६२ स्थाने ६० गृहीता । अत उपपद्यते मच्छोधितः पाठः ॥

---

* (अयं पाठः साधुः) ।

इदानीं रविचन्द्रकेन्द्राणां राशिमानमाह ।

त्रिगुणं सप्तविभक्तं
नगाद्रयोऽंशा रवेरुच्चम् ।
विकलाष्टकसंयुक्ता
नवबाणा लिप्तिका ५९ । ८ रवेर्भुक्तिः ॥ १३ ॥

(रविचन्द्रौ वेदगुणौ नन्दविभक्तौ राश्यादिकौ केन्द्रम् ।
त्रिगुणं सप्तविभक्तं नगाद्रयोऽंशा रवेरुच्चम् ॥ १३ ॥)*

विकलाष्टकसंयुक्ता
नवबाणा लिप्तिका ५९ । ८ रवेर्भुक्तिः ।
खनवनगाः शीतांशोः
पञ्चत्रिंशद्विलिप्ताश्च ॥१४॥

स्वोच्चोनं केन्द्रमिनो नवभिर्लिप्ताशतैस्ततो जीवाः ।
विषमे भुक्तस्य समे भोग्यस्य सदैव केन्द्रपदे ॥ १५ ॥

नक्षत्रात्मकौ रविचन्द्रौ वेद-४ गुणौ नव-९ भक्तौ तदा राश्यादिकौ भवतः । चन्द्रकेन्द्रं च त्रिगुणं सप्तहृतं राश्यादि भवेत् । नवभिर्लिप्ताशतैराचार्येण षोडशांशये केका जीवा पठिता । अतः केन्द्रान्नवभिर्लिप्ताशतैस्ततो जीवाः साध्या इत्युक्तम् । विषमे केन्द्रपदे भुक्तस्य समे च सदैव भोग्यस्य जीवा कार्या । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । यदि सप्तविंशतिनक्षत्रैर्द्वादश राशयस्तदा नक्षत्रात्मकेन रविणा वा चन्द्रेण किम् । एवं द्वादश गुणः सप्तविंशतिर्भागहारः । गुणहरौ त्रिभिरपवर्तितौ जातो गुणः ४ । हरश्च ९ । केन्द्रराश्यानयने चक्रकलास्वष्टाविंशतिनक्षत्रात्मकविभागत्वात् । यदि वसुयमे-२८ नक्षत्रैर्द्वादश राशयस्तदा नक्षत्रात्मककेन्द्रेण किम् । अत्र गुणभागहारौ चतुर्भिरपवर्तितौ । जातो गुणः ३ । हरः ७ । अत उपपन्नं सर्वम् । शेषवासना चातिसरला ॥ १३–१५ ॥

---

* अयं पाठः साधुः ।

इदानीं ज्याखण्डानि केन्द्रज्यासाधनं चाह ।

त्रिंशत्सनवरसेन्दु-
जिनतिथिविषया गृहार्धचापानाम् ।
अर्धज्याखण्डानि
ज्याभुक्तैक्यं सभोग्यफलम् ॥ १६ ॥

गतभोग्यखण्डकान्तरदलविकलवधाच्छतैर्नवभिराप्तैः ।
तद्युतिदलं युतोनं भोग्यादूनाधिकं भोग्यम् ॥ १७ ॥

त्रिंशत् नवभिः षड्भिरिन्दुना सहिता ३९ । ३६ । ३१ । जिन-२४ तिथि-१५ विषया-५ अत्र गृहार्धचापानां पञ्चदशभागमानां ज्याखण्डानि सन्ति । चापकला नवशतैर्विभक्ताः फलसंख्यासमानां ज्याखण्डानामैक्यमेव ज्याभुक्तैक्यं ज्ञेयम् । शेषकला भोग्यखण्डेन गुणा नवशतैर्भक्ताः फलमेव भोग्यफलं ज्ञेयम् । ज्याभुक्तैक्यं भोग्यफलेन सहितमभीष्टज्या भवति । अत्र स्फुटाद्भोग्यखण्डाज्ज्या सूक्ष्माऽन्यथा स्थूला भवति । सूक्ष्मं भोग्यखण्डं कथं सिध्यतीत्याह गतभोग्येति । गतभोग्यखण्डयोरन्तरस्य दलमर्धं कार्यम् । तस्य विकलस्य शेषस्य च वधात् नवभिः शतैर्यानि आप्तानि तैस्तद्युतिदलं गतैष्यखण्डयोगदलं युतं कार्यं यदि तद्युतिदलं भोग्यादूनम् । यदि तद्युतिदलं भोग्यादधिकं तदा तैराप्तैस्तद्युतिदलमूनं कार्यम् । क्रमज्याकरणे हीनमुत्क्रमज्याकरणे युतं तद्युतिदलं कार्यं तत्रैव तद्युतिदलस्य भोग्यादधिकाल्पत्वादिति । 'यातैष्ययोः खण्डकयोर्विशेषः–' इत्यादि भास्करोक्तमेतदनुरूपमेव । भास्करेण खार्क-१२० मितेऽत्राचार्येण च खतिथि-१५० मिता त्रिज्या गृहीता ।

अत्रोपपत्तिः । यदि ९०० = प्र । ज्याप्र = ३९ ।

चापम् = इ · प्र + शे । ज्या (इ · प्र) = ज्याग, तत्कोटिज्या च = कोज्याग ।

तदा ज्योत्पत्तिविधिना ज्याचा

$$= \frac{\text{ज्याग} \cdot \text{कोज्याशे} + \text{ज्याशे} \cdot \text{कोज्याग}}{\text{त्रि}} \quad \cdots \quad (1)$$

$\text{गतखण्डम्} = \text{ज्याग} - \text{ज्या}(\text{ग} - \text{प्र})$

$\text{एष्यखण्डम्} = \text{ज्या}(\text{ग} + \text{प्र}) - \text{ज्याग}$

$$\text{तद्युतिदलम्} = \frac{\text{ज्या}(\text{ग}+\text{प्र}) - \text{ज्या}(\text{ग}-\text{प्र})}{2} = \frac{\text{ज्याप्र} \cdot \text{कोज्याग}}{\text{त्रि}} \text{ ।}$$

$$\text{तदन्तरदलम्} = \frac{2\,\text{ज्याग} - \{\text{ज्या}(\text{ग}+\text{प्र}) + \text{ज्या}(\text{ग}-\text{प्र})\}}{2}$$

$$= \text{ज्याग} - \frac{\text{ज्याग} \cdot \text{कोज्याप्र}}{\text{त्रि}}$$

$$= \frac{\text{ज्याग} \cdot \text{उज्याप्र}}{\text{त्रि}}$$

$$\text{ज्याशे} = \frac{\text{ज्याप्र} \cdot \text{शे}}{\text{प्र}} \text{ स्वल्पान्तरात् ।}$$

$$\text{कोज्याशे} = \sqrt{\text{त्रि}^2 - \text{ज्या}^2\text{शे}} = \sqrt{\text{त्रि}^2 - \frac{\text{ज्या}^2\text{प्र} \cdot \text{शे}^2}{\text{प्र}^2}}$$

$$= \text{त्रि} - \frac{\text{ज्या}^2\text{प्र} \cdot \text{शे}^2}{2\,\text{त्रि} \cdot \text{प्र}^2} \text{ स्वल्पान्तरात् ।}$$

(१) समीकरणेऽनयोरुत्थापनेन

$$\text{ज्याच} = \frac{\text{ज्याग}\left(\text{त्रि} - \frac{\text{ज्या}^2\text{प्र} \cdot \text{शे}^2}{2\,\text{त्रि} \cdot \text{प्र}^2}\right)}{\text{त्रि}} + \frac{\text{कोज्याग} \cdot \text{ज्याप्र} \cdot \text{शे}}{\text{त्रि} \cdot \text{प्र}}$$

$$= \text{ज्याग} - \frac{\text{ज्याग} \cdot \text{ज्या}^2\text{प्र} \cdot \text{शे}^2}{2\,\text{त्रि}^2 \cdot \text{प्र}^2} + \frac{\text{कोज्याग} \cdot \text{ज्याप्र} \cdot \text{शे}}{\text{त्रि} \cdot \text{प्र}}$$

$$\text{अतो ज्याच} - \text{ज्याग} = \frac{\text{कोज्याग} \cdot \text{ज्याप्र} \cdot \text{शे}}{\text{त्रि} \cdot \text{प्र}} - \frac{\text{ज्याग} \cdot \text{ज्या}^2\text{प्र} \cdot \text{शे}^2}{2\,\text{त्रि}^2\,\text{प्र}^2}$$

$$= \frac{\text{शे}}{\text{प्र}}\left(\frac{\text{कोज्याग} \cdot \text{ज्याप्र}}{\text{त्रि}} - \frac{\text{ज्याग} \cdot \text{ज्या}^2\text{प्र} \cdot \text{प्र}^2 \cdot \text{शे}}{2\,\text{त्रि}^2 \cdot \text{प्र}^3}\right)$$

$$= \frac{\text{शे}}{\text{प्र}}\left(\text{युद} - \frac{\text{ज्याग} \cdot \text{उज्याप्र} \cdot \text{शे}}{\text{प्र}}\right)$$

$$= \frac{\text{शे}}{\text{प्र}}\left(\text{युद} - \frac{\text{अंद} \cdot \text{शे}}{\text{प्र}}\right)$$

अत्र कोष्ठकान्तर्गतसंख्या यदि भोग्यखण्डं स्फुटं कल्प्यते

तर्हि $\text{ज्याच} - \text{ज्याग} = \frac{\text{शे} \cdot \text{स्फुभोखं}}{\text{प्र}}$ । अत इदं सूक्ष्मं भोग्यफलं

ज्याभुक्तैक्ये गतज्यामिते योज्यं तदा वास्तवासन्ना सूक्ष्मज्या स्यात् । एतेन भास्करोक्तमप्युपपद्यते ।

उत्क्रमज्याकरणे भोग्यखण्डस्योपचयत्वात् क्षयस्थाने धनं भवतीति स्फुटम् । जीवातश्चापानयने भोग्यखण्डस्फुटीकरणं च भास्करविधिना ज्ञेयम् । तत्रैव* बापूदेवशास्त्रिकृतं गौरवानयनं च विचिन्त्यमिति ॥१६–१८॥

इदानीं रविचन्द्रयोर्मन्दफलानयनमाह ।

स्वाष्टांशोना सवितुर्द्विगुणा ज्या शीतगोः फलं लिप्ताः ।
स्वफलमृणं चक्रार्धादूने केन्द्रेऽधिके मध्ये ॥ १८ ॥

सवितुः सूर्यस्य केन्द्रज्या स्वाष्टांशोना । शीतगोश्चन्द्रस्य च केन्द्रज्या द्विगुणा तदा तयोः क्रमेण लिप्तात्मकं मन्दफलं भवति । केन्द्रे चक्रार्धात् षड्राशितः ऊने मध्ये स्वफलं स्वमन्दफलमृणं कार्यम् । अधिके तुलादिकेन्द्रे च मध्ये धनं कार्यमित्यर्थत एव सिध्यति ।

अत्रोपपत्तिः । रविपरममन्दफलकलाः = १३०½ स्वल्पान्तरात् । चन्द्रस्य च ३०० कलाः । ततोऽनुपातो यदि त्रिज्यातुल्यकेन्द्रज्यया परममन्दफलकलास्तदेष्टकेन्द्रज्यया किं जाता

$$\text{रविमन्दफलकलाः} = \frac{१३०\tfrac{१}{२} \times \text{ज्याके}}{१५०}$$

$$\frac{(१३० \times ८ + ४)\ \text{ज्याके}}{१५० \times ८} = \frac{१०४४\ \text{ज्याके}}{१५० \times ८} = \frac{७\ \text{ज्याके}}{८}\ \text{स्वल्पान्तरात् ।}$$

$$\text{एवं चन्द्रमन्दफलकलाः} = \frac{३००\ \text{ज्याके}}{१५०} = २\ \text{ज्याके ।}$$

अत उपपन्नम् ॥ १८ ॥

इदानीं रविचन्द्रयोर्गतिफलसाधनमाह ।

नगभूरुद्रविभाग्यं खण्डं चन्द्रं विवस्तुलवं द्विगुणम् ।
भुक्तिफलं स्वमृणं स्यात् कुलीरमकरादिके केन्द्रे ॥ १९ ॥

* द्रष्टव्यं तच्छोधितसिद्धान्तशिरोमणौ पृ· ६१ ।

Digitized by Google

केन्द्रज्याकरणे रवेर्यद्भोग्यखण्डं तच्चक्षभू-१९ हृद्रवेर्भुक्तिफलं स्यात् । चान्द्रं चन्द्रसम्बन्धि यद्भोग्यखण्डं तद्विवसुलवं स्वाष्टांशोनं द्विगुणं च चन्द्रभुक्तिफलं स्यात् । तद्गतिफलं कुलीरमकरादौ केन्द्रे क्रमेण स्वमृणं स्यात् ।

अत्रोपपत्तिः । प्रथमचापेन नवशतमितेन भोग्यखण्डं तदा केन्द्रगत्या किमिति लब्धमद्यतनश्वस्तनकेन्द्रज्ययोरन्तरं तेन या मन्दफलकलास्तदेव गतिफलम् । तद्यथा । रवेः केन्द्रगतिः $=$ ५९' । ८'' ॥

केन्द्रज्यान्तरम् $= \frac{(५९' । ८'')\ \text{भोग्यं}}{९००}$ । १८ सूत्रेणानेनान्तरेण मन्दफलकला एव रवेर्गतिफलम् $= \frac{७\ (५९' । ८'')\ \text{भोग्य}}{८ \quad ९००} = \frac{७ \times ३५४८ \times \text{भोग्य}}{७२०० \times ६०}$

$= \frac{२४८३६\ \text{भोग्य}}{४३२०००} = \frac{\text{भोग्य}}{१७}$ स्वल्पान्तरात् ।

एवं चन्द्रस्य केन्द्रगतिः $=$ ७९०' । ३५'' $-$ ६' । ४१''

$=$ ७८३' । ५४'' $=$ ७८४' स्वल्पान्तरात् ।

ततो गतिफलं पूर्वोक्तेन विधिना

$= \frac{२ \times ७८४\ \text{भोग्य}}{९००} = २ + \frac{१९६ \times ४ \times \text{भोग्य}}{२२५ \times ४} = २ + \frac{१९६ \times ७ \times \text{भोग्यं}}{२२५ \times ७}$

$= २ + \frac{७\ \text{भोग्यं}}{\frac{१५७५}{१९६}} = २ + \frac{७\ \text{भोग्य}}{८}$ स्वल्पान्तरात् । अत उपपन्नम् ।

धनर्णवासना भास्करविधिना स्फुटा ॥ १९ ॥

इदानीं चन्द्रे भुजफलसंस्कारं तिथौ फलसंस्कारं चाह ।

भांशोऽर्कफलस्येन्दौ रविवद्द्या विशोधिते तथा स्वोच्चे ।
रविफलमिनवच्च तिथौ चान्द्रे व्यस्तं स्फुटार्काप्तम् ॥ २० ॥

इन्दौ मध्यमचन्द्रेऽर्कफलस्य यो भां-२७ शः स रविवद्देयः । तथा इन्दौ स्वोच्चे विशोधितेऽर्थाच्चन्द्रमन्दकेन्द्रे च स रविफलभांशो रविवद्देयः । ततः संस्कृतचन्द्रकेन्द्रात् मन्दफलमानेयं चन्द्रस्येत्यर्थः । इनवद्धनमृणं वा यथा रविमन्दफलमागतं तच्चान्द्रे चन्द्रमन्दफले व्यस्तं संस्कार्यं संस्कृतमंशात्मकं फलमर्काप्तं द्वादशभक्तं फलं तिथौ देयं तदा स्फुटं तिथिमानं भवेदिति ।

अत्रोपपत्तिः । स्फुटार्कोदयतश्चन्द्रसाधनार्थे रविभुजफलसंस्कार-आनीतः । तदानयनोपपत्तिश्च 'भाप्तं च द्युमणिफलं तद्वे–' इत्यस्य खण्डलाघवस्य वासनायां मत्कृतोपपत्तिरवलोक्या । रव्यूनचन्द्रतस्तिथिसाधनं भवति । अतो मध्यमतिथौ रविफलोनचन्द्रफलं द्वादशभिर्विभज्य संस्कार्यम् । अतो रविफलव्यस्तसंस्कृतचन्द्रफलं द्वादशहृतमित्युपपद्यते ॥ २० ॥

इदानीं केन्द्रत एव तिथिसंस्कारयोग्यं घटिकात्मकं मन्दफलमाह ।

पञ्चेषुपञ्चयुगगुण-
यमचन्द्राश्चन्द्रकेन्द्रजफलानि ।
त्रिकुभुवस्वरहिते … … …
तथा सूर्ये … … … ॥ २१ ॥

(द्विद्विद्वित्रिकुभूतान्युच्चविरहिते तथा सूर्ये ॥ २१ ॥)*

एकस्मिन् पादेऽष्टाविंशतिनक्षत्रात्मककेन्द्रसङ्ख्या ७ तत्र प्रतिनक्षत्रं चन्द्रमन्दफलघटीभवान्यन्तरखण्डानि पञ्चेषुपञ्चेत्यादीनि । एवं सूर्ये स्वोच्चविरहिते तथैव चन्द्रकेन्द्रवत् केन्द्रे क्रियमाणे प्रतिनक्षत्रं रविमन्दफलघटीभवान्यन्तरखण्डानि द्विद्विद्वीत्यादीनि ज्ञेयानि ।

अत्रोपपत्तिः । एकस्मिन् चक्रे २८ चन्द्रकेन्द्रभानि पूर्वं कल्पितानि । अतो वृत्तपादे नवतिभागात्मके सप्त भानि । एकैकस्मिन् भे स्वल्पान्तरतस्त्रयोदशभागाः अतः ।

भानि =	१	२	३	४	५	६	७
भागाः =	१३	२६	३९	५२	६५	७८	९०
केन्द्रज्याः =	३४	६५	९४	११७	१३५	१४६	१५०
मन्दफलकलाः =	६८	१३०	१८८	२३४	२७०	२९२	३००
द्वादशहृता घटिकाः =	५ । ४०	१० । ५०	१५ । ४०	१९ । ३०	२२ । ३०	२४ । २०	२५ । ०
अन्तराणि =	५ । ४०	५ । १०	४ । ५०	३ । ५०	३ । ०	१ । ५०	० । ४०

* अयमेवाचार्योक्त इत्यवगम्यते ।

आचार्येणैतेषां स्थाने स्वल्पान्तरात् क्रमेण—५ । ५ । ५ । ४ । ३ । २ । १ ता अन्तररूपा निरवयवघटिका गृहीताः । अत्र प्रथमस्थाने महती स्थूलता तत्र वस्तुतोऽर्धाधिके रूपं ग्राह्यमिति नियमेन षड्घट्यः समुचिताः ।

एवं तत्कोटिज्यावशतः क्रमेण रविमन्दफलकलाः 'स्वाष्टांशोना सवितु'रित्याचार्यैर्गृहीताः ।

मंफक्र = ३०	५७	८२	१०२	११८	१२८	१३१
द्वादशहृता घट्यः = २।१०	४।४५	६।५०	८।३०	९।५०	१०।४०	१०।५५
अन्तराणि = २।३०	२।१५	२।५	१।४०	१।२०	०।५०	०।१५

आचार्येणैतेषां स्थाने स्वल्पान्तरात् क्रमेण—२ । २ । २ । २ । १ । १ । ० ता अन्तरात्मका निरवयवघटिकाः पठिताः ॥ २१ ॥

इदानीं तिथिसाधनमाह ।

अर्कोनचन्द्रलिप्ताः खयमस्वरभाजिताः फलं तिथयः ।
गतगम्ये षष्टिगुणे भुक्त्यन्तरभाजिते घटिकाः ॥ २२ ॥

स्पष्टार्थम् । स्पष्टाधिकारेण स्फुटोपपत्तिश्च ॥ २२ ॥

इदानीं भयोगसाधनमाह ।

भान्यश्विन्यादीनि ग्रहलिप्ताः खखवसूद्धृता लब्धम् ।
भुक्तिहृते गतगम्ये दिवसाः षष्ट्याहते घटिकाः ॥ २३ ॥
रविचन्द्रयोगलिप्ताः खखवसुभिर्भाजिताः फलं योगः ।
गतगम्ये षष्टिगुणे गतियोगविभाजिते घटिकाः ॥ २४ ॥

स्पष्टार्थम् । स्पष्टाधिकारस्य ६३ श्लोकसमा प्रथमार्या । द्वितीयायै तत्रैव टीका विलोक्या ॥

इदानीं करणानयनमाह ।

व्यर्केन्दुकला भक्ताः खरसगुणैर्लब्धमूनमेकेन ।
चरकरणानि ववादीन्यगताच्छेषात् तिथिवदन्यत् ॥ २५ ॥

अगताद्भोग्यात् । शेषाद्गतात् । अन्यद् भुक्तभोग्यघटिकादिकं तिथिवत् साध्यम् । शेषं स्पष्टार्थम् ॥ २५ ॥

इदानीं स्पष्टान्ते भौमादिसाधनमाह । तत्रादौ भौमसाधनम् ।

अङ्कै रुद्रैः सिद्धैर्गजैर्यमैरर्कवत्सरान् गुणयेत् ।
शैलैर्विश्वैर्गुणितैरष्टवह्निभिर्योजयेद्भौमः ॥ २६ ॥

(अङ्कै ६ रुद्रैः ११ सिद्धै-२४ र्गजैः ८ सुरैरर्कवत्सरान् गुणयेत् ।
शैले ७ र्वसुभिः ८ कुगुणे-३१ रिभाग्निभि ३८ र्योजयेद्भौमः ॥ २६ ॥) *

अत्रोपपत्तिः । भौमभगणविकलाः कल्पसौरवर्षविहृता जातेऽस्मिन् सौरवर्षे भौमविकलामितिः $= \frac{२१६०० \times ६० \times \text{भौम}}{४३२०००००००} = \frac{५० \times ६० \text{ भौम}}{१०००००००}$

$= \frac{३ \text{ भौम}}{१००००} = \frac{३ \times २२९६८२८५२२}{१००००} = \frac{६८९०४८५५६६}{१००००} = ६८९०४८'' \; \frac{५५६६}{१००००}$

$= ६८९०४८'' + ३३'''$ स्वल्पान्तरात् $= ११४८४'$ । $८''$ । $३३''' = १९१^{\circ}$ । $२४'$ । $८''$ । $३३''' = \overset{\text{रा}}{६}$ । ११° । $२४'$ । $८''$ । $३३'''$ ।

एते राश्याद्या इष्टसौरवर्षैर्गुणाः क्षेपयुक्ता अभीष्टसौरवर्षे राश्याद्यो भौमः स्यात् ।

अत्राचार्योक्तलिखितसंख्याभिर्विलोमेन कल्पे कुजभगणाः स्वल्पान्तरात् २२९६८२६३०८ एते सिध्यन्ति ।

अत्र पाठपठितभगणेभ्यः कलिगताब्देभ्य ३७२९ एभ्यो विकलात्मकः कुजः $= \frac{\text{कुभ} \times १२ + ३० \times ६० \times ६० \times \text{गव}}{४३२००००००००} = \frac{\text{कुभ} \times ३ \text{ गव}}{१००००}$

$= \frac{\text{कुभ} \times ११८७}{१००००} = \frac{२२९६८२८५२२ \times ११८७}{१००००} = २५६९४६२०६७'' \; \frac{५६१४}{१००००}$

$= \overset{\text{रा}}{०}$ । $\overset{०}{१}$ । $२०'$ । $४८''$ स्वल्पान्तरात् । अयं कल्पादिकुजेन $\overset{\text{रा}}{११}$ । २९° । $३'$ । $५०''$ अनेन युतो जातः क्षेपः $= \overset{\text{रा}}{०}$ । ८° । $३१'$ । $३८''$ ।

इदानीं बुधशीघ्रानयनमाह ।

शशिना जिनैः रन्ध्रैः
षड्वह्निभिर्हृतादब्दात् ।

* अयं पाठः साधुः ।

शशिना द्विपैर्यमैश्चतुरब्धिभि-
रन्वितं भवति बुधशीघ्रम् ॥ २७ ॥

(शशिना १ जिनैः २४ शराब्धिभि-४५ रङ्कैः षड्वह्निभिर्हताब्दात् ।
शशिना १ द्विपैः ८ सुरै-३३ श्चतुरब्धिभि-४४ रन्वितं बुधशीघ्रम् ॥ २७ ॥)*

अत्रोपपत्तिः । भौमवद्बुधशीघ्रविकलामितिरेकस्मिन् सौरवर्षे

= ३ बुशीभ / १०००० = ३ × १७९३६९९८९८४ / १०००० = ५३८१०९९६९५२ / १०००० = ५३८१०९९" ६९५२ / १००००

= ५३८१०९९" + ४१‴ = ८९६८४′ । ५९″ । ४१‴ = १४९४° । ४४′ । ५९″ । ४१‴ = रा ४९ । २४° । ४४′ । ५९″ । ४१‴ = रा १ । २४° । ३४′ । ५९″ । ४१‴ ।

आचार्योक्तलिखितसंख्याभिर्विलोमेन कल्पे बुधशीघ्रभगणा १७९३७०३२००० एते सिध्यन्ति ।

अत्र भौमसाधनवत् कलिगताब्देभ्य ३०२९ एभ्यो मध्यमाधिकारे पाठपठितभगणेभ्यश्च विकलात्मकबुधशीघ्रम् ।

= बुभ × ३ गव / १०००० = १७९३६९९८९८४ × १११८७ / १०००० = २००६६१२०७६३″ ४००८ / १००००

= रा १ । १२° । २६′ । ३″ अयं कल्पादिबुधशीघ्रेण रा ११ । २७° । २४′ । २९″
नेन युतो जातः क्षेपः = १ । ९° । ५०′ । ३२″
आचार्योक्तक्षेपः = १ । ८ । ३३ । ४४
अन्तरम् = १ । १६ । ४८

इदानीं गुरोरानयनमाह ।

रूपेण १ खेन ० कुयमै-२१ रङ्गै-६ र्नवभिश्च करणाब्दाः ।
गुणिता युक्ता वेदैः कुयमैस्त्रियमैश्च भवति गुरुः ॥ २८ ॥

(रूपेण १ खेन ० कुयमै २१ रङ्गैश्च करणाब्दाः ।)†

अत्रोपपत्तिः । पूर्ववद्गुरुविकलामितिरेकस्मिन् सौरवर्षे

* अयं पाठः साधुः ।
† अयं पाठः साधुः ।

$= \frac{३ \text{ गुभ}}{१००००} = \frac{३ \times ३६४२२०४५५}{१००००} = \frac{१०९२६७१३६५}{१००००} = १०९२६७'' \frac{६३६५}{१००००}$

$= १०९२६७'' + ६'''$ स्वल्पान्तरात् $= १८२१' । ७'' । ६''' = ३०° । २१' ।$
$७'' । ६''' = \overset{रा}{१} । ०° । २१' । ७'' । ६'''$

आचार्योक्तसंख्याभिर्विलोमेन कल्पे गुरुभगणा ३६४२२०५०० एते सिध्यन्ति ।

मध्यमाधिकारे पाठपठितगुरुभगणेभ्यः कलिगताब्देभ्य ३७२९ एभ्यो भौमसाधनवद्वन्यारम्भे विकलात्मको

गुरुः $= \frac{\text{गुभ} \times ३ \text{ गव}}{१००००} = \frac{३६४२२०४५५ \times ११९८७}{१००००} = ४००४६०१३५'' \frac{२०८५}{१००००}$

$= \overset{रा}{४} । २३° । २२' । १५''$ अयं कल्यादिगुरुणा-$\overset{रा}{११}$ । २९° । २७' । ३६''

ऽनेन युक्तो जातः क्षेपः $= ४ । २२ । ४९ । ५१$

आचार्योक्त क्षेपः $= ४ । २१ । २३ । ०$

अन्तरम् $= १ । २६ । ५१$

इदानीं शुक्रशीघ्रानयनमाह ।

शैलैस्तिथिभी रुद्रैर्यमविषयैः सागरैर्गुणिताः ।
वसुभिरनिलैर्जिनैः षड्गुणैश्च युक्तं भृगोः शीघ्रम् ॥ २६ ॥

अत्रोपपत्तिः । पूर्ववदेकस्मिन् सोरवर्षे शुक्रशीघ्रोच्चविकलामितिः

$= \frac{३ \text{ शुशीभ}}{१००००} = \frac{७०२२३८९४९२ \times ३}{१००००} = \frac{२१०६७१६८४७६}{१००००} = २१०६७१६'' \frac{८४७६}{१००००}$

$= २१०६७१६'' + ५१''' = ३५१११' । ५६'' । ५१''' = ५८५° । ११' । ५६'' ।$
$५१''' = \overset{रा}{१९} । ५१° । ११' । ५६'' । ५१''' = \overset{रा}{०} । १५° । ११' । ५६'' । ५१'''$

आचार्योक्तसंख्याभिर्विलोमेन कल्पे शुक्रशीघ्रभगणा ७०२२३७५५६ एते सिध्यन्ति ।

मध्यमाधिकारे पाठपठितेभ्यः शुक्रशीघ्रभगणेभ्यः कलिगताब्देभ्य ३७२९ एभ्यो भौमसाधनवद्वन्यारम्भे शुक्रशीघ्रविकलामितिः

$= \frac{\text{शुभ} \times ३ \text{ गव}}{१००००} = \frac{७०२२३८९४९२ \times ११९८७}{१००००} = ७८५५९४७१२४'' \frac{७००४०}{१००००}$

= रा ८ । ७° । ३२′ । ४″ । अयं कल्पादिशुक्रशीघ्रोच्चेन रा ११ । २८° । ४२′ । १४″

अनेन युतो जातः क्षेपः = रा ८ । ६° । १४′ । १८

आचार्योक्तक्षेपः = ८ । ५ । २४ । ३६

अन्तरम् = ० । ४९ । ४२

इदानीं शन्यानयनमाह ।

शून्येन द्वादशभिर्द्वादशभिः खेषुभिस्त्रयोदशभिः ।
गुणिता युता रसैरब्धिभिस्त्रिविषयैर्दशभिरार्किः ॥१०॥

अत्रोपपत्तिः । पूर्ववदेकस्मिन् सौरवर्षे शनिविकलामितिः = $\frac{३ शभ}{१००००}$

$= \frac{१४६५६७२९८ \times ३}{१००००} = \frac{४३९७०१८९४}{१ ०००} = ४३९७०'' \frac{१८९४}{१००००} = ४३९७०'' + ११'''$

= ७३२′ । ५०″ । ११‴ = १२° । १२′ । ५०″ । ११‴ = रा ० । १२° । १२′ । ५०″ । ११‴

आचार्योक्तसंख्याभिर्विलोमेन कल्पे शनिभगणा १४६५६७३८९ एते सिध्यन्ति ।

यन्त्रारम्भे कलिगताब्दाः = ३१७९ + ५५० = ३७२९ एभ्यः शनि-विकलात्मकः = $\frac{१४६५६७२९८ \times १२ \times ३० \times ६० \times ६० \times ३७२९}{४३२००००००००}$

$= \frac{१४६५६७२९८ \times ३ \times ३७२९}{१००००}$

$= \frac{१४६५६७२९८ \times १११८७}{१००००} = १६३९६४८३८'' \frac{०४३}{१००००}$

= २७३२७४८′ । ५८″ = ४५५४५° । ४८′ । ५८″ = रा १५१८ । ५° । ४८′ । ५८″ = रा ६ । ५° । ४८′ । ५८″ अयं कल्पादिशनिना रा ११ । २८° । ४६′ । ३४″ युतो जातो यन्त्रादौ क्षेपकः = रा ६ । ४° । ३५′ । ३२″

अथाचार्योक्तः = ६ । ४ । ५३ । १०

अं = + १७′ । ३८″

इदानीं राह्वोरानयनमाह ।

गगनेन नवचन्द्रैः कुयमै रसाब्धिभिः संवरेण हृताः ।
रुद्रैः खवेदैर्युक्ता राश्यादिकः पातः ॥ ३१ ॥

(गगनेन नन्दचन्द्रैः कुयमे रसाग्निभिरम्बरेण हृताः ।
रुद्रैस्त्रिखखवेदैर्युक्ता राश्यादिकः पातः ॥ ३१ ॥)*

अत्रोपपत्तिः । पूर्ववदेकस्मिन् सौरवर्षे चन्द्रपातविकलामितिः

$$= \frac{३ \text{ पाभ}}{१००००} = \frac{२३२३१११६८ \times ३}{१००००} = \frac{६९६९३३५०४}{१००००} = ६९६९३'' \frac{३५०४}{१००००}$$

$= ६९६९३'' + २१''' = ११६१' । ३३'' । २१''' = १९^{\circ} । २१' । ३३'' ।$
$२१''' = \overset{\text{रा}}{०} । १९^{\circ} । २१' । ३३'' । २१'''$

आर्यभटानुपातेन $\frac{३ \text{ पाभ}}{१००००} = \frac{२३२२२६००० \times ३}{१००००} = \frac{६९६६७८०००}{१००००}$

$= ६९६६७'' \frac{८०००}{१००००}$

$= ६९६६७'' + ४८''' = ११६१' । ७'' । ४८'''$

$= १९^{\circ} । २१' । ७'' । ४८''' = \overset{\text{रा}}{०} । १९^{\circ} । २१' । ७'' । ४८'''$

अत्रापि भौमसाधनवद्रव्यारम्भे कलिगताब्दतः पातविकलाः

$$= \frac{\text{पाभ} \times १ \text{ गव}}{१००००} = \frac{२३२३१११६८ \times १११८७}{१००००} = २५९८८६५०३'' \frac{६४१६}{१००००}$$

$= \overset{\text{रा}}{६} । १०^{\circ} । ४१' । ४३''$ । अयं कल्पादिपातेना $\overset{\text{रा}}{५} । ३^{\circ} । १२' । ५८''$

नेन युतो जातः क्षेपः $= \overset{\text{रा}}{११} । १३^{\circ} । ५४' । ४१''$

आचार्योक्तक्षेपः $= ११ । १३ । ४० । ००$

अन्तरम् $= १४ । ४१$

इदानीं ग्रहानयने विशेषमाह ।

सर्वाणि स्थानानि क्रमतः स्वहरैर्नयेदुपरि ।
एवं रव्यब्दान्ते ग्रहध्रुवा मध्यमाः स्युस्ते ॥ ३२ ॥

* अयं पाठः साधुः ।

सर्वाणि राश्यादीनि स्थानानि क्रमतः स्वहरैरुपरि नयेत् । प्रतिविकलाः षष्टिहृताः फलं विकलासु योज्यम् । विकलाः षष्टिहृताः फलं कलासु योज्यम् । एवं स्वहरैरुपरि नयेदित्यर्थः । शेषं स्पष्टार्थम् ॥ ३२ ॥

इदानीं प्रकारान्तरेण भौमादीनाह । तत्रादौ भौमानयनमाह ।

पृथगर्को दशगुणितो वसुशरचन्द्रैर्हृतः फलेन युतः ।
दलितो भौमध्रुवके क्षेप्यः स्यान्मध्यमो भौमः ॥ ३३ ॥

स्पष्टार्थम् ।

अत्रोपपत्तिः । कल्पे रविभगणाः = ४३२०००००० ।

भौमभगणाः = २२९६८२८५२२ ।

अनयोर्निष्पत्तिः = $\frac{२२९६८२८५२२}{४३२००००००००} = \frac{११४८४१४२६१ \times २}{२१६००००००० \times २}$

$= \frac{११४८४१४२६१}{२१६००००००००}$

$$= \cfrac{१}{१ + \cfrac{१}{१ + \cfrac{१}{७ + \cfrac{१}{२ + \cfrac{१}{१ + \cfrac{१}{१ + \cfrac{१}{५ + \cfrac{८९६६३८}{४७२६६१९}}}}}}}}$$

अस्मादासन्नमानानि

$\frac{१}{१}, \frac{१}{२}, \frac{८}{१५}, \frac{१७}{३२}, \frac{२५}{४७}, \frac{४२}{७९}, \frac{२३५}{४४२}, \ldots$

आचार्येणेद—$\frac{२३५}{४४२}$ मासन्नं गृहीतम् । अनेनार्को गुण्यो भौमः स्यात्तो भौमः = $\frac{२३५}{४४२}$ × रवि = $\frac{१}{२}$ रवि × $\frac{२३५}{२२१}$ = $\frac{१}{२}$ रवि (१ + $\frac{१४}{२२१}$)

= $\frac{१}{२}$ रवि (१ + $\frac{१४ \times १०}{२२१०}$) = $\frac{१}{२}$ रवि (१ + $\frac{१०}{१५८}$) स्वल्पान्तरात् ।

अत उपपन्नम् । शेषवासना सुगमा ॥ ३३ ॥

Digitized by Google

इदानीं बुधानयनमाह ।

चतुराहतोऽब्धिगुणितः पृथक् च सप्ताहतोऽब्धिधृतिभक्तः ।
फलसंयुतो विधेयो ज्ञचलभुक्तो ह्यशीघ्रं स्यात् ॥ ३४ ॥

स्पष्टार्थम् ।

अत्रोपपत्तिः । कल्पबुधशीघ्रभगणाः = १७९३६९९८९८४

रविभगणाः = ४३२००००००

$$\text{तयोर्निष्पत्तिः} = ४ + \frac{६५६९९८९८४}{४३२००००००}$$

$$\text{अथ}\cdot \frac{६५६९९८९८४}{४३२००००००} = \frac{१६४२४९७४६ \times ४}{१०८००००००० \times ४} = \frac{८२१२४८७३ \times २ \times ४}{५४०००००० \times २ \times ४}$$

$$= \frac{८२१२४८७३}{५४००००००}$$

$$= \cfrac{१}{६ + \cfrac{१}{१ + \cfrac{१}{१ + \cfrac{१}{२ + \cfrac{१}{१ + \cfrac{१}{४ + \cfrac{१}{२ + \cfrac{४०६६०}{१०६७४४१}}}}}}}}$$

अत आसन्नमानानि $\frac{१}{६}, \frac{१}{७}, \frac{२}{१३}, \frac{५}{३३}, \frac{७}{४६}, \cdots$

$\frac{७}{४६} = \frac{२८}{१८४}$ इदमाचार्येण गृहीतम् । ततो निष्पत्तिमानम् $= ४ + \frac{७ \times ४}{१८४}$

अनेन रविर्गुणो बुधशीघ्रमानम् $= ४र + \frac{७ \times ४र}{१८४}$ ।

शेषवासना चातिसुगमा ॥ ३४ ॥

इदानीं गुरुशनिराहूनयनमाह ।

सप्तहतस्त्रिघस्रहृतो गुरुः शनिर्द्विगुणितो नवेषुहृतः ।
द्विगुणितो रसधृतिहृत् राहोर्भगणाच्च्युतः कृतघ्नः ॥ ३५ ॥

अत्रोपपत्तिः । पूर्ववत् $\frac{\text{गुभ}}{\text{रभ}} = \frac{३६४२८६४५५}{४३२००००००००}$

$$= \cfrac{१}{११ + \cfrac{१}{१ + \cfrac{१}{६ + \cfrac{१}{५ + \cfrac{४६६६७८५}{६२०४२३५}}}}}$$

अत आसन्नमानानि $\frac{१}{११}, \frac{१}{१२}, \frac{७}{८३}$ ... ...

$\frac{७}{८३}$ इदमाचार्येण गृहीतम् ।

$$\frac{\text{बुभ}}{\text{रभ}} = \frac{१४६५६७२९८}{४३२००००००००} = \cfrac{१}{२९ + \cfrac{१}{२ + \cfrac{७४७०५८२}{९६५४८३५८}}}$$

अत आसन्नमानानि, $\frac{१}{२९}, \frac{२}{५९}$ ... ...

$\frac{२}{५९}$ इदमाचार्येण गृहीतम् ।

एवम् । $\frac{\text{शं·पा भ}}{\text{रभ}} = \frac{२३२३११९८}{४३२००००००००} = \cfrac{१}{१८ + \cfrac{१}{१ + \cfrac{१}{१ + \cfrac{१}{२ + \cfrac{४६३८६२४}{४४५८६०८४}}}}}$

अत आसन्नमानानि

$\frac{१}{१८}, \frac{१}{१९}, \frac{२}{३७}, \frac{५}{९३}$ ... ...

$\frac{५}{९३} = \frac{१०}{१८६}$ इदमाचार्येण गृहीतम् । अत उपपद्यते सर्वम् ॥ ३५ ॥

रवीनां शुक्रचलानयनमन्येषां चलं चाह ।

त्रिगुणो दलितः स्वद्वादशांशयुक्तः सितचलं भुवं स्यात् ।
तात्कालिकं चलं स्याद्रविरन्येषां ज्ञशुक्रयोः स्तः ॥ ३६ ॥

अन्येषां भौमगुरुशनीनां रविरेव तात्कालिकं चलं शीघ्रोच्चमस्ति। तथा रविरेव मध्यमौ ज्ञशुक्रौ स्तः । शेषं स्पष्टम् ।

अत्रोपपत्तिः । पूर्ववत् $\frac{\text{शुशीभ}}{\text{रभ}} = \frac{७०२२३८९४९२}{४३२०००००००}$

$$= १ + \cfrac{१}{१ + \cfrac{१}{१ + \cfrac{१}{१ + \cfrac{१}{२ + \cfrac{१६११५६३६}{५३२८३१५२४}}}}}$$

अत आसन्नमानानि

$$\frac{१}{१}, \frac{२}{१}, \frac{३}{२}, \frac{५}{३}, \frac{१३}{८} \cdots \cdots$$

$\frac{१३}{८} = \frac{१३ \times ३}{८ \times ३} = \frac{३९}{२४} = \frac{३६}{२४} + \frac{३}{२४} = \frac{३}{२} + \frac{३}{२ \times १२}$ इदमासन्नं गृहीतम् । ततो जातं सितचलम् $= र\left(\frac{३}{२} + \frac{३}{२ \times १२}\right)$

$= \frac{३ र}{२} + \frac{३ र}{२} \cdot \frac{१}{१२}$ अत उपपन्नं सितचलानयनम् ।

शेषवासना स्फुटा ॥ ३६ ॥

इदानीं भौमादीनां मन्दोच्चांशानाह ।

मन्दांशा नगरवयो भगमाः खनगेन्दवः खनन्दाश्च ।
यमतत्त्वानि तदूनान्मध्याज्ज्या सूर्यवत् ग्राह्या ॥ ३७ ॥

भौमादीनां मन्दांशा मन्दोच्चांशाः क्रमेण १२७° । २२७° । १७०° । ९०° । २५२° । एते सन्ति । तदूनान्मध्याद्ग्रहात् सूर्यवज्ज्या ग्राह्या । मन्दोच्चेन हीनो मध्यो मन्दकेन्द्रम् । सूर्यकेन्द्रवत् तस्य गतगम्यस्य ज्या केन्द्रभुजज्या ग्राह्येत्यर्थः ।

अत्रोपपत्तिः । मन्दोच्चानामल्पगतित्वात् सुखार्थं बहुकालोपयोगित्वात् स्वसमये स्थिरांशाः पठिताः । शेषवासना चातिसुगमा ॥ ३७ ॥

पदार्थाः	पृष्ठाङ्काः
जातिलक्षणम्	१५८
विशेषलक्षणम्	१५९
समवायलक्षणम्	१६०
संशयलक्षणम्	१६५
प्रयोजनलक्षणम्	१६८
दृष्टान्तलक्षणम्	१६८
सिद्धान्तलक्षणम्	१७०
सिद्धान्तभेदाः	१७१
अवयवलक्षणम्	१७४
अवयवभेदाः	१७४
प्रतिज्ञालक्षणम्	१७६
हेतुलक्षणम्	१७७
उदाहरणलक्षणम्	१८०
उपनयलक्षणम्	१८१
निगमनलक्षणम्	१८२
तर्कलक्षणम्	१८५
तर्काङ्गानि	१८६
निर्णयलक्षणम्	२०४
कथालक्षणम्	२०५
कथाभेदाः	२१०
वादलक्षणं तत्फलं च	२१०
जल्पवितण्डालक्षणम्	२१२
हेत्वाभासलक्षणम्	२१६
हेत्वाभासभेदाः	२१७
छललक्षणम्	२३९
छलभेदाः	२४०
जातिलक्षणम्	२४७
जातिभेदाः	२५१
जातेः सप्ताङ्गानि	३०९
निग्रहस्थानलक्षणम्	३१८
निग्रहस्थानभेदाः	३१९

अथ
तार्किकरक्षाग्रन्थस्य पदार्थनिरूपणक्रम-
सूचीपत्रम् ।

पदार्थाः	पृष्ठाङ्काः
मङ्गलाचरणम्	१
उपोद्घातः	२
प्रमालक्षणम्	६
प्रमाभेदाः	११
प्रमाणलक्षणम्	११
प्रमालक्षणे मतान्तराणि	१३
प्रमाणभेदाः	५५
प्रमाणभेदे मतान्तराणि	५६
प्रत्यक्षलक्षणम्	५७
प्रत्यक्षभेदाः	५९
अनुमानलक्षणम्	६४
व्याप्तिलक्षणम्	६५
अनुमानस्यावान्तरभेदाः	८०
उपमानलक्षणम्	८५
उपमानभेदाः	८६
आगमलक्षणम्	९४
प्रमेयलक्षणम्	११८
आत्मलक्षणम्	११९
शरीरलक्षणम्	१२०
इन्द्रियलक्षणम्	१२२
अर्थलक्षणम्	१२४
बुद्धिलक्षणम्	१२४
मनोलक्षणम्	१२४
प्रवृत्तिलक्षणम्	१२६
दोषलक्षणम्	१२७
प्रेत्यभावलक्षणम्	१२७
फललक्षणम्	१२८
दुःखलक्षणम्	१२८
अपवर्गलक्षणम्	१२९
द्रव्यादिपदार्थोद्देशः	१३०
द्रव्यलक्षणम्	१३२
द्रव्यपरिसंख्यानम्	१३२
पृथिव्यादिचतुष्टयनिरूपणम्	१३४
आकाशनिरूपणम्	१३७
कालनिरूपणम्	१३७
दिङ्निरूपणम्	१३७
गुणलक्षणम्	१३९
रूपादिलक्षणम्	१४१
कर्मलक्षणम्	१५६
कर्मभेदाः	१५७

पदार्थाः	पृष्ठाङ्काः
सिद्धान्तभेदाः	१७०
सिद्धान्तलक्षणम्	१७०
स्नेहलक्षणम्	१४७
स्पर्शलक्षणम्	१४२
स्मृतिलक्षणम्	२०
स्वाश्रयव्यापिगुणकथनम्	१५४
स्वाश्रयसमवेतारम्भकगुण-कथनम्	१५३

पदार्थाः	पृष्ठाङ्काः
हेतुलक्षणम्	१७७
हेतुसमः	२८४
हेत्वन्तरम्	३३०
हेत्वाभासनिरूपणम्	२१६
हेत्वाभासभेदाः	२१६
हेत्वाभाससङ्कशङ्कासमाधिः	२३५

पदार्थाः	पृष्ठाङ्काः
प्रसङ्गसमः	२७४
प्राप्तिसमः	२६९
प्रेत्यभावलक्षणम्	१२७
फललक्षणम्	१२८
बाह्येन्द्रियग्राह्यगुणकथनम्	१५०
बुद्धिलक्षणम्	१२४
भूतगुणकथनम्	१५२
मङ्गलाचरणम्	१
मतानुज्ञा	३५२
मनोलक्षणम्	१२४
मूर्तामूर्तगुणकथनम्	१५०
मूर्तैकगुणकथनम्	१५०
यावद्द्रव्यभाविगुणकथनम्	१५४
रसलक्षणम्	१४२
रूपलक्षणम्	१४२
वर्ण्यसमः	२६०
वादफलम्	२१०
वायुगुणकथनम्	१४९
वायुनिरूपणम्	१३४
विकल्पसमः	२६३
विक्षेपः	३५२
वितण्डानिरूपणम्	२१२
विभागजगुणकथनम्	१५२
विभागलक्षणम्	१४४
विरुद्धनिरूपणम्	२२०
विशेषलक्षणम्	१५९
विशेषसमः	२८७
वैशेषिकगुणकथनम्	१५०
व्याप्तिलक्षणम्	६५
व्याप्तिलक्षणे सौगतमतनिरासः	८२
शक्तेः पदार्थान्तरत्वखण्डनम्	१६४
शरीरस्य लक्षणम्	१२१
संख्यायाः पदार्थान्तरत्वखण्डनम्	१६४
संख्यालक्षणम्	१४४
संयोगजगुणकथनम्	१५२
संयोगलक्षणम्	१४४
संशयलक्षणम्	१६५
संशयसमः	२८०
संस्कारलक्षणम्	१४७
समवायलक्षणम्	१६०
समानजात्यारम्भकगुणकथनम्	१५२
सम्भवानुमानान्तर्भावप्रकारः	११६
सविकल्पकप्रत्यक्षलक्षणम्	९०
सव्यभिचारनिरूपणम्	२१६
साक्षात्प्रतीतिः प्रत्यक्षमिति-मतनिरासः	३०
सादृश्यस्य पदार्थान्तरत्वखण्डनम्	१६४
साधर्म्यवैधर्म्यसमौ	२५३
साध्यसमः	२६६
सामान्यगुणकथनम्	१५०

Digitized by Google

पदार्थाः	पृष्ठाङ्काः	पदार्थाः	पृष्ठाङ्काः
परत्वापरत्वलक्षणम्	१४५	प्रमाणभेदे प्रत्यक्षादिक्रमनि-	
परिमाणलक्षणम्	१४४	र्देशे हेतुः	५५
पर्यनुयोज्योपेक्षणम्	३५४	प्रमाणलक्षणम्	११
पाकजोत्पत्तिप्रकारः	१५५	प्रमाणलक्षणे तथागतमतानु-	
पुनरुक्तम्	३४६	वर्तिनः	१४
पृथक्त्वलक्षणम्	१४४	प्रमाणलक्षणे प्राभाकराः	१९
पृथिवीगुणकथनम्	१४८	प्रमाणलक्षणे बौद्धवादः	१९
पृथिवीनिरूपणम्	१३४	प्रमाणलक्षणे मतान्तराणि	१३
प्रकरणसमः	२८३	प्रमाणलक्षणे मीमांसाचार्यमतम्	३९
प्रतिज्ञान्तरम्	३२५	प्रमाणलक्षणे शालिकनाथमतम्	२२
प्रतिज्ञालक्षणम्	१७६	प्रमाणलक्षणे सौगतमतम्	१३
प्रतिज्ञाविरोधः	३२७	प्रमाणानि नैयायिकमतसिद्धानि	५६
प्रतिज्ञासंन्यासः	३२९	प्रमाणानि पौराणिकमतसिद्धानि	५६
प्रतिज्ञाहानिः	३२०	प्रमाणानि प्राभाकरमतसिद्धानि	५६
प्रतिदृष्टान्तसमः	२७१	प्रमाणानि भाट्टमतसिद्धानि	५६
प्रतिधर्मसमा जातिः	२५१	प्रमाणानि वेदान्तिमतसिद्धानि	५६
प्रत्यक्षद्वैविध्यम्	५९	प्रमाणानि सांख्यमतसिद्धानि	५६
प्रत्यक्षभेदे नैयायिकमतम्	६३	प्रमाणे कणादमतसिद्धे	५६
प्रत्यक्षलक्षणम्	५७	प्रमाणे जैनमतसिद्धे	११७
प्रत्यक्षलक्षणे शाब्दिकमतम्	६१	प्रमाणे सुगतमतसिद्धे	५६
प्रत्यक्षलक्षणे सौगतमतम्	६०	प्रमाभेदाः	११
प्रदेशवृत्तिगुणकथनम्	१५४	प्रमालक्षणम्	६
प्रमाणं चार्वाकमतसिद्धम्	५६	प्रमेयलक्षणम्	११८
प्रमाणपदार्थस्य प्रथमं निरू-		प्रयत्नलक्षणम्	१४५
पणे हेतुः	६	प्रयोजनलक्षणम्	१६८
प्रमाणभेदाः	५५	प्रवृत्तिलक्षणम्	१२६

पदार्थाः	पृष्ठाङ्काः
केवलान्वयिलक्षणम्	७२
क्रियाहेतुगुणकथनम्	१५४
गन्धलक्षणम्	१४२
गुणलक्षणम्	१३९
गुरुत्वलक्षणम्	१४६
छलभेदाः	२४०
छललक्षणम्	२३९
जलगुणकथनम्	१४९
जलनिरूपणम्	१३४
जल्पनिरूपणम्	२१२
जातिः	२४१
जातिबाधकसंग्रहः	१३१
जातिलक्षणम्	१५८
जातेः सप्ताङ्गानि	३०९
तमोद्रव्यत्वशङ्कासमाधिः	१३३
तर्कभेदाः	१८६
तर्कलक्षणम्	१८५
तर्कस्य विषयकारणप्रयोजनानि	१९०
तर्काङ्गानि	१८७
तार्किकरक्षाग्रन्थस्य ग्रन्थान्तरेभ्यो वैशिष्ट्यम्	५
तेजोगुणकथनम्	१४९
तेजोनिरूपणम्	१३४
दिग्गुणकथनम्	१४९
दिङ्निरूपणम्	१३७
दुःखलक्षणम्	१२८

पदार्थाः	पृष्ठाङ्काः
दृष्टान्तलक्षणम्	१६८
दृष्टान्ताभासशङ्कासमाधिः	२३६
दोषलक्षणम्	१२७
द्रवत्वलक्षणम्	१४६
द्रव्यलक्षणम्	१३२
द्रव्याणि	१३२
द्रव्यादिपदार्थषट्के कौमारिलमतम्	१६३
द्रव्यादिपदार्थषट्के प्राभाकरमतम्	१६३
द्रव्यादिपदार्थषट्कोद्देशः	१३०
द्वेषलक्षणम्	१४५
धर्मलक्षणम्	१४८
निगमनलक्षणम्	१८२
निग्रहस्थाननिरूपणम्	३१८
नित्यसमः	३००
नित्यातीन्द्रियगुणकथनम्	१५१
निमित्तकारणगुणकथनम्	१५४
निरनुयोज्यानुयोगः	३५६
निरनुयोज्यानुयोगभेदः	३५६
निरर्थकम्	३३३
निर्णयलक्षणम्	२०४
निर्विकल्पकप्रत्यक्षलक्षणम्	६०
न्यूनम्	३४२
पक्षादीनां लक्षणानि	७८
परत्वारम्भकगुणकथनम्	१५३

पदार्थाः	पृष्ठाङ्काः
अवयवलक्षणम्	१७४
अवर्ण्यसमः	२६२
अविज्ञातार्थम्	३३५
असमवायिकारणगुणकथनम्	१५४
असमानजात्यारम्भकगुणकथनम्	१५३
असिद्धनिरूपणम्	२२३
असिद्धभेदाः	२२४
आकाशगुणकथनम्	१४९
आकाशनिरूपणम्	१३७
आगमलक्षणम्	९४
आत्मगुणकथनम्	१४९
आत्मलक्षणम्	११९
आप्तलक्षणम्	९५
इच्छालक्षणम्	१४५
इन्द्रियलक्षणम्	१२२
ईश्वरस्यापि प्रामाण्यम्	११
उत्कर्षसमः	२५७
उत्क्षेपणादीनां लक्षणानि	१५८
उदाहरणभेदाः	१८०
उदाहरणलक्षणम्	१८०
उपनयलक्षणम्	१८१
उपपत्तिसमः	२८९
उपमानत्रैविध्याय वाक्यार्थत्रैविध्यम्	८६
उपमानफलम्	८९

पदार्थाः	पृष्ठाङ्काः
उपमानलक्षणम्	८४
उपमानस्य प्रमाणान्तरान्तर्भावे शङ्कासमाधिः	९१
उपलब्धिसमः	२९०
उपाधिद्वैविध्यम्	६९
उपाधिलक्षणम्	६६
उपोद्घातः	२
उभयकारणगुणकथनम्	१५४
उभयजारम्भकगुणकथनम्	१५३
एकैकवृत्तिगुणकथनम्	१५०
ऐतिह्यनिरूपणम्	११६
ऐतिह्यशब्दान्तर्भावप्रकारः	११७
ऐतिह्यस्य शब्दे ऽन्तर्भावः	९६
कथाङ्गानि	२०६
कथाङ्गेषु मतान्तराणि	२०७
कथाभेदाः	२१०
कथालक्षणम्	२०५
कर्मजगुणकथनम्	१५२
कर्मभेदाः	१५७
कर्मलक्षणम्	१५६
कर्मसमः	३०६
कारणगुणपूर्वकगुणकथनम्	१५१
कालगुणकथनम्	१४९
कालनिरूपणम्	१३७
कालातीतनिरूपणम्	२२८
केवलव्यतिरेकिलक्षणम्	७३

अथ

सटीकतार्किकरक्षाग्रन्थे निरूपितानां पदार्थानामकारादिक्रमेण सूचीपत्त्रम् ।

पदार्थाः	पृष्ठाङ्काः
अकारणगुणकथनम्	१५४
अकारणगुणपूर्वकगुणकथनम्	१५१
अज्ञानम्	३५०
अधर्मलक्षणम्	१४८
अधिकम्	३४४
अननुभाषणम्	३४७
अनित्यसमः	२९८
अनुत्पत्तिसमः	२७८
अनुपलब्धिसमः	२९३
अनुमानद्वैविध्यं प्रकारान्तरेण	८०
अनुमानभेदाः	७०
अनुमानलक्षणम्	६४
अनुमानलक्षणे आचार्यमतम्	६५
अनेकाश्रितगुणकथनम्	१५०
अन्तःकरणग्राह्यगुणकथनम्	१५१
अन्वयव्यतिरेकिलक्षणम्	७८
अपकर्षसमः	२५९
अपवर्गलक्षणम्	१२९
अपसिद्धान्तः	३५९
अपार्थकम्	३३८

पदार्थाः	पृष्ठाङ्काः
अपेक्षाबुद्धिजन्यगुणकथनम्	१५२
अप्रतिभा	३५१
अप्राप्तकालम्	३३९
अप्राप्तिसमः	२७१
अभावनिरूपणम्	१६३
अभावप्रत्यक्षान्तर्भावप्रकारः	१०२
अभावस्य प्रत्यक्षेऽन्तर्भावः	९६
अमूर्तैकगुणकथनम्	१५०
अयावद्द्रव्यभाविगुणकथनम्	१५४
अर्थलक्षणम्	१२४
अर्थशब्दवाच्यत्वं द्रव्यादीनाम्	१४४
अर्थान्तरम्	३३२
अर्थापत्तिनिरूपणम्	९७
अर्थापत्तिसमः	२८५
अर्थापत्तिसम्भवयोरनुमानेऽन्तर्भावः	९६
अर्थापत्त्यनुमानान्तर्भावप्रकारः	१०१
अवयवभेदे नैयायिकमतम्	१७४
अवयवभेदे मीमांसकमतम्	१७५
अवयवभेदे सौगतमतम्	१७५

Digitized by Google

न्यायविद्याविदग्धस्य मीमांसापारदृश्वनः ।
इयं वरदराजस्य कृतिर्विजयतेतराम् ॥

आलोड्य दुस्तरगभीरतरान् प्रबन्धान्
वाचस्पतेरुदयनस्य तथापरेषाम् ।
सारो मयात्र समगृह्यत वावदूकै-
र्नित्यं कथासु विजिगीषुभिरेष धार्यः ॥

इति श्रीवरदराजविरचिते तार्किकरक्षाव्याख्याने सारसंग्रहे तृतीयः परिच्छेदः ॥

समाप्तमिदं वरदराजविरचितं सारसंग्रहाभिधानं न्यायप्रकरणम् ॥

शिवमस्तु ॥

सर्वैश्वर्यनिजावासं सर्वविद्यानिसेवितम् ।
श्रीयज्ञेश्वरहरेः सूनुं श्रीविष्णुस्वामिगुरुं नुमः[1] ॥

इति श्रीज्ञानपूर्णकृता वरदराजीयसारसंग्रहटीका लघुदीपिका समाप्ता ॥

मङ्गलमस्तु ॥

---

(१) श्रीयज्ञेश्वरहरेः सूनुमित्यत्र श्रीविष्णुस्वामिगुरुमित्यत्रापि श्रीशब्दप्रयोग उपचारार्थः अन्यथा छन्दोभङ्गापत्तेः ॥

Digitized by Google

सम्भवत उद्भावनीयानाह ॥

न्यूनाधिकापसिद्धान्तविरोधाननुभाषणम् ।
पुनरुक्तं(१) विपर्यासो वादेषूद्भाव्यसप्तकम् ॥ २८ ॥

न्यूनत्वादिदोषदूषितस्य साधनस्य तत्त्वावसायहेतुत्वाभावात् न्यूनत्वादिकमुद्भाव्यं तत्समाधानेन कथा प्रवर्तनीया । न त्वेते कथाविच्छेदहेतवो भवन्तीति ॥ २८ ॥

हेत्वाभासो हि कारणं तथा निरनुयोज्यानुयोग इति च निग्रहस्थानद्वयं सम्भवादुद्भावनीयं कथाविच्छेदकं चेत्याह ॥

वादे कथावसानस्य हेत्वाभासो हि कारणम् ।
तथा निरनुयोज्यानामनुयोग इति द्वयम् ॥ २९ ॥

इति वरदराजकृता तार्किकरक्षा समाप्ता ॥

हेत्वाभासेन साध्यस्यासिद्धेस्तत्परित्यागेन सम्यग्घेतूपादानावश्यम्भावात् सर्वोपक्रान्ता कथा विच्छिद्यत एव । निरनुयोज्यानुयोगश्च तत्त्वावसायानङ्गं कथाभासप्रबन्धहेतुत्वेन कथापर्यवसानहेतुर्भवति । केचित्तु वादसूत्रे सिद्धान्ताविरुद्धः पञ्चावयवोपपन्न इति च विशेषणोपादानादपसिद्धान्तः स्वसिद्धान्तसिद्धावयवपरिमाणन्यूनतामधिकतां च कथाविच्छेदनिमित्तमित्याचक्षत इति ॥ २९ ॥

(१) पुनरुक्तिः—पा॰ B पु॰ ।

647. Nor do you approve of any other circumstance which intervenes before the fulfilment of the injunction. Thus, owing to the non-production of fruit, it has no connection even with the injunction.

648. Therefore, on the authority of Scripture, you must accede to the production of fruit, though the same is unperceived. It will be so, even for me.[1]

649. Since I accept the authority of Scripture, the fruit will come into existence for me even in the future. But for you it must be prior;[2] and, if it fails, the sacrifice too fails as a means.

650. If the production of fruit is made to result from the fulfilment of the injunction, then since according to you, there is no diversity of injunction, all kinds of fruits will result at once from a single performance.

651. If it be said that the fruit is determined by the particular rite with which the injunction is connected, that is the very reason why the injunction does not produce fruit, since the latter depends on the nature of the rite.

652. Moreover, that which merely distinguishes is unreal. But he who contends that all is real knows that the Scripture which treats of the means and the end is authoritative.

653. Thus, injunction has no place even in your chapter on ritual. It will be explained in detail how it finds no place also in the chapter on the unity of the Self.

[1] i. e. even under the contention that the meaning is not injunctory, the springing of fruit is accepted and the injunction therefore rendered vain.

[2] i. e. prior to the fulfilment of the injunction. The acceptance of the intermediate springing up of fruit would make the assumption of a second fulfilment useless.

Digitized by Google

654. The sentence "the self should be realised" is not a commandment for knowing the thing itself, since it depends on the meaning of the verb, and since it can have no application to the thing.

655. Whether the unity of self is accomplished or not, injunction is out of place in either case. Neither the sky nor the sky-flower stands in need of any human effort.

656. Nor can the injunction refer at least to the realisation, for, thus it will be liable to the fallacy of mutual dependence; namely, the injunction will depend upon the realisation, and the realisation upon the injunction.

657. Nor can it be said to be incidentally implied, like the sacrificial post etc.,[1] by the Vedic passage itself; for, the unity of Self is self-established whereas the sacrificial post etc. have to be brought into existence.

658. If, however, Scripture reveals the established reality, then, Scripture will be intelligible in that light, the passage in question[2] will refer to that reality alone, and injunction will become useless.

659. The passage "all is Self etc." is not inapplicable to the reality, so that there is no incompleteness in meaning to warrant the importation of an injunctory word.

660. The knowledge that the Self is Brahman needs no injunction at all, for, it springs spontaneously in him who has heard the passage.

---

[1] यथा यूपादि यूपे पशुं बध्नातीत्यादि विधिशेषतया यूपं तक्षतीत्यादिनाऽर्प्यंते तथा ब्रह्मणोऽपि द्रष्टव्य विधिशेषत्वेन सत्यज्ञानादिवाक्येनार्पणम्· Anandagiri.

[2] सत्यं ज्ञानमनन्तं ब्रह्म etc.

661. A knowledge of the injunction "sacrifice must be done" does not depend upon another injunction. If it depends, there will be no end to the chain. Nor can that other injunction depend on the first, which is merely confined to the rite.

662. When the thing to be done is understood, then the subsequent action is the result of injunction; and the knowledge of the injunction is derived from the action. Thus there will be mutual dependence.

663. If knowledge of Self springs from the word itself, the individual need not be incited to action for want of fruit. If it does not so spring, injunction is much more needless, since there is no reason for activity at all.

664. If, even after the springing of such knowledge, one be enjoined with a view to greater certainty, tell me whether that certainty of yours is derived from the word itself or from any other source.

665. If it is derived from the word, it is liable to the same objection as formerly.[1] If something else is brought in, then Scripture will become dependent.

666. "But injunction is necessary to dispel what is not to the purpose. For, the purpose will be understood when the thing to be known is pointed out."

667. Not so. For, it is a general rule both in secular and Vedic practice that words convey their especial meanings by their own virtue and not by reason of any injunction.

[1] See verse 663 *supra*.

668. Thus, too, from secular and Vedic sentences, their unqualified meaning is understood. Therefore no injunction is needed.

669. The capacity of Vedic study in bearing direct fruit[1] is the same in the case of the unity of self as in the case of rites. Hence injunction is without use in this instance.

670. If this act (of studying) depend upon another act, then the whole meaning will not at once be implied. Then, in the manner aforesaid,[2] no injunction need be supposed at all.

671. It is said that knowledge stands in need of injunction to accomplish the aim; for, all fruit depends on injunction, as, otherwise, there will be disregard of fruit.

672. Apart from the elucidation of the thing to be known, there is no other fruit of knowledge as in the case of rites. Hence no injunction need be assumed for this purpose.

673. Even if the fruit[3] has reference to the knower, of what use is injunction, since, even without injunction, it results alike in the case of the knower, or the means of knowledge, or the thing known?

674. "But a passage which, being devoid of injunction, treats of what is already existent and is thus merely explanatory (*anuvādaka*), can have no authority at all, since it is amenable to other proofs (than Scripture.)

---

[1] i. e. in bringing out its own meaning.

[2] See verse 667 *supra*.

[3] viz. the understanding of the thing to be known.

Digitized by Google

675. "But, if the injunctory meaning be conceded, this would gain independent authority, like the passage about the *jyōtishṭoma* sacrifice, etc., being untouched by other proofs."

676. If *Brahman* is capable of other proofs, it would be so even if an injunction is assumed. And if it is not capable of other proofs, it would be so even in the absence of any injunction.

677. Is the explanatory character of the passage by reason of the thing being already existent, or because it is known by other proofs? In the former case, it will not be a mere explanation, even if the thing be already existent.

678. Can a passage, which, unaided by any other proof, teaches an existent thing, be otherwise than independent, or can the aim (*Brahman*) fail to result of its own accord?

679. A meaning that is the product of human intellect might stand in need of other proofs; but not a Vedic passage, though it treats of an existent thing, because of the absence of all human agency.

680. From the mere fact that the thing is already existent, a different proof need not be assumed in any case; for the proof so assumed will likewise stand in need of other proofs.

681. A proof, in no instance, depends on another proof merely because it is a proof. A proof is termed as such, only because it teaches what is not taught by any other proof.

Digitized by Google

682. If a passage teaches the thing to be known without the aid of any other proof, then it becomes a proof by itself. There is no other definition of a proof than the above.

683. Even if the proof which makes known the object stands in need of another proof, then too, the former will be independent of the latter, since both the proofs serve only one and the same end.[1]

684. If it be said that the former proof is no proof for want of something unknown which it can make known,[2] then, since the same is the case with the other proof also, let the former proof have reference only to knowledge.[3]

685. The fact of a thing being unknown can be established either by a proof, or by some other means, or by itself. Tell me too how the fact of a thing being known can be established?[4]

686. Since the unknown nature of the thing exists even before the application of the proof, the nature of being so unknown can in no way be the subsequent result of such proof.

687. If the character of being unknown is amenable to proofs, like a pot etc., then this will become the

[1] i. e. revealing the nature of *Brahman*. The first proof here referred to is the verbal authority of the *Vedas*.

[2] Because *Brahman* is नित्यसिद्धः.

[3] Though knowledge exists before a study of the word, yet it is hard for the student to understand at the outset that such knowledge has already revealed its object. To make this clear, it may serve as a proof.

[4] Since this too is open to the same uncertainty.

Digitized by Google

inherent nature of the thing and it will therefore remain ever unknown.

688. The same argument applies to ideas of doubt and falsity. Hence everything in practice (*vyavahāra*) must fail.

689. If the proof is a proof though the unknown nature of the thing remains the same before and after, may not the same be said of a thing known which is entirely different from a thing unknown?[1]

690. If it be said to be dependent (on the other proofs) on account of their reference to the same object, then all proofs would in like manner become dependent.

691. For one and the same entity, all the organs of sense afford proof. Thus, as above stated, even touch and sight would become false with reference to matter.

692. Even a secular injunction, like the eating of the *harītakī* fruit, would become independent by reason of the absence of other proofs.

693. This is no fault; for, in secular practice, there is a sense of duty resulting from human knowledge, and hence there is need for other proofs. But the contrary is the case in the *Vēdas*.

694. It being thus, the independent authority of Scripture is not dependent upon injunction; for, there is such dependence only where human knowledge comes in.

695. "Not so. The independent authority of the *Vēdas* is because the dependence is solely on injunction. But there is need of other proofs in secular practice, because action (*viniyōga*) is predominant."

[1] Thus the Vedic word might be a proof too.

Digitized by Google

696. Not so. When it is granted that words and their meanings are the same both in secular practice and in Scripture, it is not possible to speak of any such difference between them.

697. When the real nature of a thing is established either by its own virtue or otherwise, there is no need for a different proof, for, it will be useless for establishing such nature.

698. Or, if the thing already existent has become apparent either by itself or otherwise, then too a different proof will be needless for a thing which is already apparent.

699. Therefore other proofs ought not to be assumed merely because a thing is already established (*siddha*). There is need for other proofs in the case of human speech, and hence they find a place there.

700. If it be said that some verb is necessary to bring word-meanings into mutual relation, then let such verb alone be assumed; for, is it not established without an injunction ?

701. Even if a verb is needed, it is not any verb that is required. If it be selected on account of its appropriateness, then there are such verbs, like "thou art" etc. in Scripture.[1]

702. There is no act to be enjoined, since the verbs "thou art," etc. are intransitive. Nor is any non-existent thing to be brought into existence, since the Self is eternal.

703. As the passage teaches the unconnected Self, there is no meaning of connection.[2] Nor does the word

[1] e. g. तत्त्वमसि, सोऽहमस्मि, etc.

[2] i. e. connection between the Self and the individual soul.

संस्कृतपुस्तकानां सूचीपत्रम् ।	मूल्यम्
श्रीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं० श्रीराममिश्रशास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः	७।)
श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा	६)
श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा	३=)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः	२।)
शेषपूर्त्तिः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं० स्वामिश्रीराममिश्रशास्त्रिप्रणीतो निर्विशेषाद्वैतनिराकरणपरः	१॥=)
शेषपूर्त्तिसहितो वेदार्थसंग्रहः	३॥)
शास्त्रदीपिका	६।)
सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टचन्द्रिकोपेतम्, पं० स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् ।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजपं० दामोदरशास्त्रिणा संशोधिता पूर्वार्द्धरूपा	५॥)
तथा उत्तरार्द्धम्	८॥)
माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता	७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता	६॥)
श्रीतिङन्तार्णवतरणिः ।	६)
दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता	॥=)
जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता	५॥)
लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्यायमुक्तावल्याख्यया टीकया सहिता ।	॥)
सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम् ।	॥)
तत्त्वमुक्ताकलापः-सर्वार्थसिद्धियुतः, बोधायनीयार्थसिद्धान्तानुसारी विशिष्टाद्वैतब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्किककेसरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीमद्वेङ्कटनाथदेशिकेन प्रणीतः	५॥=)
वेदान्तसिद्धान्तमुक्तावली, आर्थर्वीनिस्साहबकृताङ्गलभाषानुवादयुता	१॥)
काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः	२॥)
अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः	१२)
आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्यकाराणां परमगुरुणा श्रीमद्यामुनाचार्यस्वामिना प्रणीतम्	॥)
तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदीपाख्यटीकया सहिता ।	१॥)

CONTENTS.

Page

NYĀYASŪTRAVIVARAṆAM, Ed. Surendralāla Gosvāmin, Professor, Sanskrit College, Benares 641

BRĀHMASPHUṬASIDDHĀNTA, Edited with his own commentary by Mahāmahopādhyāya Sudhākara Dvivedin, Professor, Queen's College, Benares 657

THE TĀRKIKARAKṢĀ AND SĀRASAMGRAHA OF VARADARĀJA, with the glosses Niṣkaṇṭakā of Mallinātha Kolācala and Laghudīpikā of Jñānapūrṇa with Contents and Index, Ed. Vindhyeçvarīprasāda Dvivedin, Librarian, Sanskrit College, Benares ... 689

THE SAMBANDHAVĀRTIKA OF SUREṢVARĀCHĀRYA, Translated by S. Venkataramana Aiyar, B. A., B. L., High Court Vakil, Triplicane, Madras 697

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 12.] December, 1902 [Vol. XXIV.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1902.

Copyright on each article reserved.

Price Rs. 9-0 per annum.]

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
विधिमीमांसा, अप्पयदीक्षितकृता ते· श्री रामशास्त्रिणा संशोधिता	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।≡)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टेनाचार्य्येणेङ्गलण्डीयभाषायामनुवादिता ..	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणेङ्गलण्डीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	३॥≡)
शीतपदार्थनिर्वचनम्	३)
शब्दार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकाल्लूकशास्त्रि- संशोधिता	४)
काव्यप्रदीपः, पं· रामशास्त्रिभागवताचार्येण परिशोधितः	२॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	५॥)

Digitized by Google

न्तान्यतरस्मिन् साध्यसाधनान्यतरधर्मेणाविद्यमानधर्मप्रसञ्जनमुत्कर्षसम इति फलितार्थः । यथा शब्दोऽनित्यः कृतकत्वादित्यादावनित्यत्वं कृतकत्वं घटे रूपसहचरितमतः शब्दोऽपि रूपवान् स्यात् । तथा च विवक्षितविपरीतसाधनाद् विशेषविरुद्धो हेतुस्तद्देशनाभासेयम् । एवं श्रावणशब्दसाधर्म्यात् कृतकत्वाद् घटोऽपि श्रावणः स्यादविशेषात् । वस्तुतस्तु श्रावणत्वापादनेऽर्थान्तरमित्युक्तलक्षणे दृष्टान्तपदं साध्यपदं च न देयम् । अपकर्षसमायां तु धर्मविकल्पो धर्मस्य सहचरितधर्मस्य विकल्पोऽसत्त्वम् । तथा च पक्षदृष्टान्तान्यतरस्मिन् व्याप्तिमपुरस्कृत्य सहचरितधर्माभावेन हेतुसाध्यान्यतराभावप्रसञ्जनमपकर्षसमा । यथा शब्दोऽनित्यः कृतकत्वादित्यत्र यद्यनित्यत्वसहचरितघटधर्मात् कृतकत्वादनित्यः शब्दस्तदा कृतकत्वानित्यत्वसहचरितघटधर्मरूपवत्त्वव्यावृत्त्या शब्दे कृतकत्वस्यानित्यत्वस्य च व्यावृत्तिः स्यात् । आद्येऽसिद्धिदेशनाभासा द्वितीये बाधदेशनाभासा । एवं शब्दे कृतकत्वसहचरितश्रावणत्वस्य संयोगादावनित्यत्वकृतकत्वसहचरितगुणत्वस्य च व्यावृत्त्या घटादौ कृतकत्वस्यानित्यत्वस्य च व्यावृत्तिः स्यादिति । दृष्टान्ते साध्यसाधनवैकल्यदेशनाभासापीयम् । न च वैधर्म्यसमाप्यत्रैवान्तर्भाविता स्यादिति वाच्यम् । उपधेयसङ्करेऽप्युपाधेरसङ्करात् । वर्ण्यसमायां तु साध्यः सिद्ध्यभाववान् सन्दिग्धसाध्यकादिर्वा तस्य धर्मो हेतुस्तस्य विकल्पात् सत्त्वात् दृष्टान्ते वर्ण्यत्वस्य सन्दिग्धसाध्यकत्वस्यापादनं वर्ण्यसमा । तदयमर्थः । पक्षवृत्तिहेतुर्हि गमकः स च त्वया दृष्टान्तेऽपि स्वीकार्यस्तथा च दृष्टान्तस्यापि सन्दिग्धसाध्यकत्वात् सपक्षवृत्तित्वानिश्चयादसाधारणो

हेतुरित्यनैकान्तिकदेशनाभासेयम्। सन्दिग्धसाधकवृत्तिर्हेतुर्यदि न दृष्टान्ते तदा साधनविकलो दृष्टान्तः स्यादिति। अवर्ण्यसमायां तु दृष्टान्ते सिद्धसाध्यके यो हेतुरूपो धर्मस्तस्य विकल्पात् सत्त्वात् पक्षे शब्दादावसन्दिग्धसाधकत्वापादनम्। दृष्टान्ते हेतोर्यादृशत्वं तादृशहेतुरेव गमक इत्यभिमानेनेदमापादनम्। यथा शब्दोऽनित्यः कृतकत्वादित्यत्र निश्चितसाध्यकघटादिवृत्तिर्हेतुः पक्षे ऽपि स्वीकार्योऽन्यथा स्वरूपासिद्धिः स्यात्। तथा च पक्षे ऽपि दृष्टान्ततुल्यतापत्त्या सन्दिग्धसाध्यकत्वलक्षणपक्षत्वाभावादाश्रयासिद्धिरिति। असिद्धिदेशनाभासेयम्। विकल्पसमायां तु पक्षे दृष्टान्ते च यो धर्मस्तस्य विकल्पो विरुद्धः कल्पो व्यभिचारित्वम्। उपलक्षणं त्वेतत्। अन्यवृत्तिधर्मस्यापि बोध्यम्। तथा च कस्यचिद्धर्मस्य किञ्चिद्धर्मव्यभिचारदर्शनेन धर्मत्वाविशेषात् प्रकृतहेतोः प्रकृतसाध्यव्यभिचारापादनं विकल्पसमा। यथा शब्दोऽनित्यः कृतकत्वादित्यत्र कृतकत्वस्य गुरुत्वव्यभिचारदर्शनाद् गुरुत्वस्य नित्यत्वव्यभिचारदर्शनात् नित्यत्वस्य मूर्तत्वव्यभिचारदर्शनाद् धर्मत्वाविशेषात् कृतकत्वमप्यनित्यत्वव्यभिचारि स्यादिति। अनैकान्तिकदेशनाभासेयम्। पक्षदृष्टान्तादेः प्रकृतसाध्यतुल्यतापादनं साध्यसमा। अयमाशयः। एतत्प्रयोगे साध्यस्यैवानुमितिविषयत्वम्। तथा च पक्षादेरनुमितिविषयत्वात् साध्यवत् साध्यता स्यादतः साध्यसमा। तथाहि पक्षादेः पूर्वं सिद्धत्वे साध्यत्वाभावान्नानुमितिविषयत्वं पूर्वमसिद्धत्वे पक्षादेरज्ञानादाश्रयासिद्ध्यादयस्तद्देशनाभासा चेयम्। सूत्रे उभयसाध्यत्वादित्यस्य उभयं पक्षदृष्टान्तौ तद्धर्मौ हेत्वादिस्तत्साध्यत्वं तदधीनानुमितिविषयत्वं साध्यस्येव पक्षादेरपीति तुल्यत्वापादनमिति।

लिङ्गोपहितभानमते लिङ्गस्याप्यनुमितिविषयत्वात् साध्यसमत्वं हेतोश्च साध्यत्वे हेतुमान् दृष्टान्तोऽपि साध्य इत्याशय इत्याहुः ॥ ४ ॥

एतासामसदुत्तरत्वे बीजमाह ।

किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः(१) ॥ ५ ॥

किञ्चित्साधर्म्याद् व्याप्तिपक्षधर्मतासहितात् साधर्म्यविशेषात् । उपसंहारसिद्धेः साध्यसिद्धेः । उपसंह्रियते यदिति व्युत्पत्त्या उपसंहारपदस्य साध्यपरत्वात् । वैधर्म्यादेतद्विपरीताद् व्याप्तिनिरपेक्षसाधर्म्यमात्रात् प्रतिषेधो न सम्भवतीत्यर्थः । तथा चोत्कर्षसमादिषु निरुक्तापादकानां व्यभिचारित्वान्न वाद्युक्तप्रतिषेधकत्वमन्यथा प्रमेयत्वरूपासाधकसाधर्म्यात् तद्दूषणमप्यसम्यक् स्यादिति भावः ॥ ५ ॥

ननु निरुक्तानामनापादकत्वे पक्षे यद्धर्मसहचारो हेतौ तद्धर्मवत्त्व एव हेतुमतो दृष्टान्ततेति कथं सङ्गच्छतामत आह ।

साध्यातिदेशाच्च दृष्टान्तोपपत्तेः(२) ॥ ६ ॥

साध्यातिदेशाच्च निश्चितसाध्यकत्वाच्च । हेतुमतो दृष्टान्ततोपपत्तेरित्यर्थः । चकारात् सन्दिग्धसाध्यकत्वादेव पक्षतोपपत्तिर्न तु दृष्टान्तवृत्तियावद्धर्मवत्त्व एव पक्षता

---

(१) एतत् सूत्रं त्यक्त्वा न हेत्वर्थापरिज्ञानादिति सूत्रार्थ इति वार्त्तिकम् । आसां दुष्टत्वमूलप्रतिपादनपरं सूत्रम् । किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेध इत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

(२) अवर्ण्यावर्ण्यसाध्यसमेषु व्याघातान्तरमपि सूत्रयति साध्यातिदेशाच्च दृष्टान्तोपपत्तेरित्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

पक्षदृष्टान्तयोरविशेषापत्तेरिति बोध्यम् । केचित्तु वर्ण्यावर्ण्यसाध्यसमास्तु समाध्यन्तरमाह । साध्यातिदेशाच्चेति । दृष्टान्ते हि साध्यमतिदिश्यते तावतैव दृष्टान्तत्वमुपपद्यते न त्वशेषो धर्मः पक्षदृष्टान्तयोरभेदापत्तेः । पक्षादेरपि साध्यसमत्वमेतेन प्रत्युक्तम् । दृष्टोऽन्तो दृष्टान्तः पक्षः तस्माद् वह्निमानित्यन्ते पक्षकीर्तनात् । तथा च साध्यस्यातिदेशात् साधनात् पक्ष इत्युच्यते न तु पक्षः साध्यतेऽतिप्रसङ्गादिति भाव इत्याहुः ॥ ६ ॥

समाप्तं जातिषट्कप्रकरणम् ॥

क्रमप्राप्तौ प्राप्त्यप्राप्तिसमौ लक्षयति ।

प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याऽविशिष्टत्वादप्राप्त्याऽसाधकत्वाच्च प्राप्त्यप्राप्तिसमौ[(१)] ॥ ७ ॥

साध्यं कार्यं ज्ञाप्यं वा । हेतोरिति । कारणत्वे ज्ञापकत्वे वा वादिना उपन्यस्ते सतीति शेषः । प्राप्तिपक्षे आह । प्राप्त्याऽविशिष्टत्वात् । हेतोः साध्यस्य च प्राप्तित्वाविशेषात् । अप्राप्तिपक्षे आह । अप्राप्त्या साध्येन सह सम्बन्धाभावेनातिप्रसङ्गेनासाधकत्वाच्च यौ प्रयोगौ तौ प्राप्त्यप्राप्तिसमौ ये जाती ते इति वा । तथा च प्राप्त्याऽविशेषादनिष्टापादनेन प्रत्यवस्थानं प्राप्तिसमा । अप्राप्त्याऽसाधकत्वादनिष्टापादनेन प्रत्यवस्थानमप्राप्तिसमा । तत्राद्ये घटेन सम्बद्धो दण्डो घटकारणमित्युच्यते तदा घटो

(१) साध्यसमलक्षणज्ञानस्य सम्बन्धविषयत्वेन सम्बन्धविशेषव्याप्यव्याप्तिसमज्ञानहेतुत्वं प्राप्तिज्ञानस्य वाप्राप्तिबुद्ध्याविति सङ्गत्या प्राप्त्यप्राप्तिविकल्पोपक्रमजातिद्वयप्रकरणमारभत इत्यादिना यतत् सूत्रं धृत्वा व्याख्यावसरे तथापि हेतोरित्यनन्तरं पठा तदेत्यध्याहार्यं तस्य सूत्रे गुणत्वादित्युक्तमन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायैः ।

Digitized by Google

दण्डकारणं स्यात् सम्बद्धत्वाविशेषादित्यनिष्टापादनम् । एवं ज्ञाप्यस्य वह्नेः प्रागेव सम्बद्धत्वं ज्ञातमस्तीति चेद् वह्निज्ञानमेव धूमज्ञानं जनयेदविशेषादित्यापादनम् । द्वितीये घटेनासम्बद्धो दण्डो घटकारणमित्युच्यते तदा दण्डः पटस्यापि कारणं स्यादसम्बद्धत्वाविशेषात् । एवं धूमो यद्यसम्बद्धोऽपि वह्निं ज्ञापयति तदा वह्न्यभावमपि ज्ञापयेदविशेषादित्यनिष्टापादनम् । इमे प्रतिकूलतर्कदेशनाभासे ॥ ७ ॥

अनयोरसदुत्तरत्वमाह ।

घटादिनिष्पत्तिदर्शनात् पीडने चाभिचारादप्रतिषेधः[1] ॥ ८ ॥

दण्डादिसत्त्व एव घटनिष्पत्तिदर्शनाच्छत्रुपीडने च श्येनयागादीनामव्यभिचारान्नोक्तापादनेन प्रतिषेध इत्यर्थः । तथा च कार्यनियतपूर्ववर्तिन एव कारणत्वं न तु प्रागपि कार्यमपेक्षितम् । पटादौ दण्डादेर्व्यभिचारादेव न कारणत्वमन्यथा लोकवेदसिद्धकार्यकारणभावोच्छेदे त्वदुक्तहेतुरप्यसाधकः स्यादिति भावः । एवं ज्ञाप्यज्ञापकभावोऽप्यवसेयः ॥ ८ ॥

समाप्तं प्राप्त्यप्राप्तिसमजातिद्वयप्रकरणम् ॥

क्रमप्राप्तौ प्रसङ्गसमप्रतिदृष्टान्तसमौ लक्षयति ।

---

(१) अत्र प्रत्युत्तरसूत्रम् । घटादिनिष्पत्तिदर्शनादित्यन्वीक्षानयतत्त्वबोधीयवर्धमानोपाध्यायलेखदर्शनाद् घटादिनिष्पत्तिदर्शनादित्येतन्मात्रं तन्मते सूत्रपाठ इति निश्चीयते । तात्पर्यटीकायामपि घटादिनिष्पत्तिदर्शनादिति सूत्रमिति दृश्यते । पीडने चाभिचारादिति क्वचित् पाठः ।

दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ[१] ॥ ९ ॥

कारणं प्रमाणं तस्यानपदेशादनभिधानात् । प्रत्यवस्थानम् दृष्टान्तस्य साध्यवत्त्वे किं प्रमाणमित्यभिधानं प्रसङ्गसम इत्यर्थः । यद्यपीदं सदुत्तरमेव तथापि दृष्टान्तस्य साध्यवत्त्वे प्रमाणं वाच्यं तत्रापि च प्रमाणान्तरमित्यनवस्थाप्रत्यवस्थाने तात्पर्यम् । तदुक्तमाचार्यैः । अनवस्थाभासप्रसङ्गः प्रसङ्गसम इति । एतन्मते हेतोर्हेत्वन्तरमित्यनवस्थापि प्रसङ्गसम एव । पूर्वमते तु हेत्वनवस्थादिकं वक्ष्यमाणाकृतिगणेष्वन्तर्भूतमिति विशेषः । अनवस्थादेशनाभासा चेयम् । प्रतिदृष्टान्तेनेति सावधारणम् । तेन प्रतिदृष्टान्तमात्रबलेन प्रत्यवस्थानं प्रतिदृष्टान्तसमः । मात्रपदेन हेतोः पक्षधर्मताव्युदासः नातः साधर्म्यसमान्तर्भावः । यथा यदि घटदृष्टान्तेनानित्यः शब्दस्तदाकाशदृष्टान्तेन नित्य एव किं न स्यादिति बाधः प्रतिरोधो वा । बाधप्रतिरोधान्यतरदेशनाभासेयम् ॥ ९ ॥

प्रसङ्गसमस्यासदुत्तरत्वमाह ।

प्रदीपोपादानप्रसङ्गनिवृत्तिवत् तद्विनिवृत्तिः[२] ॥ १० ॥

प्रदीपस्य घटादिप्रकाशकस्य उपादानप्रसङ्गनिवृत्तिवत् प्रकाशकान्तराकाङ्क्षानिवृत्तिवत् । तद्विनिवृत्तिः दृष्टान्ते

(१) अप्राप्तिसमज्ञानस्याभावविषयतया तद्विशेषणकप्रसङ्गसमधीहेतुत्वं तदुत्तरस्य सम्बन्धविषयतया साधनघटितप्रतिदृष्टान्तसमधीहेतुरूपतया सङ्गत्या सूत्रम्। दृष्टान्तस्य कारणानपदेशादित्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

(२) प्रसङ्गसमदोषवर्णकसूत्रम् । प्रदीपोपादानप्रसङ्गनिवृत्तिवत् तद्विनिवृत्तिरित्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

साध्यवत्त्वप्रमाणाकाङ्क्षाविनिवृत्तिरित्यर्थः । तथा च यथा प्रदीपस्य स्वप्रकाशत्वं स्फुटं तथा दृष्टान्ते साध्यवत्त्वमपि लोकप्रसिद्धस्यैव दृष्टान्तत्वेन कथनात् । अथवा हेतोः साध्यसहचारज्ञानार्थं दृष्टान्तापेक्षा न तु दृष्टान्तदृष्टसाधनाद्यपेक्षा अनुपयोगात् । यथा घटादिप्रकाशकविवेचने प्रदीपापेक्षा न तु तत्प्रकाशकाद्यपेक्षापि । कथमन्यथा त्वदीयदूषणोपन्यासोऽपि तत्रानवस्थाप्रसङ्गेनाकाङ्क्षाया अनिवृत्तेरिति भावः ॥ १० ॥

प्रतिदृष्टान्तसमे दूषणमाह ।

प्रतिदृष्टान्ताहेतुत्वे च नाहेतुर्दृष्टान्तः[(१)] ॥ ११ ॥

प्रतिदृष्टान्तस्याहेतुत्वे साध्याभावासाधकत्वे दृष्टान्तोऽपि अहेतुः साध्यासाधक इति प्रतिबन्दिर्नेत्यर्थः । तथा च हेतौ व्याप्तिग्रहस्य साध्यसाधकत्वेन तदर्थमपेक्षितं साध्यसाधनसहचारज्ञानं दृष्टान्तोपन्यासो जनयतीति दृष्टान्तस्य हेतुता । प्रतिदृष्टान्तस्य च वाक्यं केवलं साध्याभावज्ञापकतया न बाधकता न वा सत्प्रतिपक्षोत्थापकता व्याप्त्याद्यबोधनादिति भावः ॥ ११ ॥

समाप्तं प्रसङ्गसमप्रतिदृष्टान्तसमप्रकरणम् ॥

क्रमप्राप्तमनुत्पत्तिसमं लक्षयति ।

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः[(२)] ॥ १२ ॥

प्रागुत्पत्तेरिति । पक्षदृष्टान्तयोरिति शेषः । तथा च

---

(१) प्रतिदृष्टान्तसमे प्रत्युत्तरसूत्रम् । प्रतिदृष्टान्ताहेतुत्वे च नाहेतुर्दृष्टान्त इत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः । एवं प्रतिदृष्टान्तहेतुत्वे चेति न्यायसूचीनिबन्धे ऽपि पाठः ।

(२) अनुत्पत्तिसमस्थाने ऽभावविषयप्रतिदृष्टान्तज्ञानस्य हेतुत्वादनन्तरमनुत्पत्तिसमसूत्रम् । प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसम इत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

Digitized by Google

पक्षदृष्टान्तयोरुत्पत्तेः पूर्वं तत्र कारणस्य साधनस्याभावात् प्रत्यवस्थानमनुत्पत्तिसमः । यथा घटो रूपवान् गन्धात् पटवदितिप्रयोगे घटोत्पत्तेः पूर्वं तत्र गन्धाभावेन स्वरूपासिद्धिः पटोत्पत्तेश्च पूर्वं तत्र गन्धाभावेन दृष्टान्तासिद्धिश्चेति । असिद्धिदेशनाभासेयम् । अथवा प्रागुत्पत्तेरिति । साधनाङ्गानामिति शेषः । तेन साध्यसाधनपक्षदृष्टान्तानामपि लाभः । तथा च घटादावुत्पत्तिक्षणे रूपाद्यनुत्पादात् तदानीं रूपाद्यभावमादाय बाधासिद्धी । तथा कारणाभावादित्यस्य बाधासिद्धिप्रतिबन्धकसत्त्वेन कारणाभावादित्यर्थः । तथा चोत्पत्तेः पूर्वं हेतुसाध्याभावेन प्रत्यवस्थानं लक्षणम् । जातित्वे सतीति विशेषणं देयम् । तेनोत्पत्तिक्षणावच्छिन्नो घटो गन्धवानित्यादौ बाधेन प्रत्यवस्थाने नातिव्याप्तिः ॥ १२ ॥

अत्रासदुत्तरत्वमाह ।

तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः(१) ॥ १३ ॥

उत्पन्नस्य पक्षादेः । तथाभावात् साधनाङ्गत्वाद् घटादिरूपभावत्वाद्वा । कारणोपपत्तेः हेतुमत्त्वात् साध्यवत्त्वाच्च न कारणप्रतिषेध इत्यर्थः । तथा च हेत्वभाववत्पक्षोऽसिद्धिरनुत्पन्ने च तस्मिन् अधिकरणत्वासम्भवेनासत्त्वेन च तदसम्भवात् । एतेन दृष्टान्तासिद्धिरपि व्याख्याता । एवं हेत्वादीनां यदाकदाचित् सत्त्वेनैव साधनाङ्गता बोध्या ॥ १३ ॥

समाप्तमनुत्पत्तिसमप्रकरणम् ॥

(१) दोषचिन्तासूत्रम् । तथाभावादित्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

क्रमप्राप्तं संशयसमं लक्षयति ।

सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयसमः[1] ॥ १४ ॥

सामान्ये गोत्वादौ दृष्टान्ते घटादावैन्द्रियकत्वं समानं नित्यत्वानित्यत्वान्यतरसहचरितत्वेन तुल्यं तस्मिन् । नित्यानित्यसाधर्म्यात् नित्यत्वानित्यत्वसहचरितैन्द्रियकत्वरूपसाधर्म्यवत्त्वज्ञानात् । शब्दे ऽनित्यत्वसंशयापादनं संशयसमः । इदं च शब्दे ऽनित्यत्वसाध्यकस्थलाभिप्रायेणोक्तम् । लक्षणं तु संशयकारणात् संशयापादनेन प्रत्यवस्थानमिति । साध्यान्तरस्थले ऽप्युदाहरणं बोध्यम् । साधर्म्यादित्युपलक्षणम् । तेन क्वचिदसमानधर्मदर्शनेन संशयापादने ऽपि संशयसमः । तथा च शब्दोऽनित्यः कृतकत्वादितिप्रयोगे गमकात् कृतकत्वाद् यथाऽनित्यत्वं निर्णीयते तथा संशायकादैन्द्रियकत्वादनित्यत्वं सन्दिह्यतामित्यापादनाकारः । तथा च संशयसामग्रीसत्त्वात् कोटिद्वयनिश्चयानुत्पादात् प्रतिप्रक्षदेशनाभासेयम् ॥ १४ ॥

अत्र समाधानम् ।

साधर्म्यात् संशये न संशयो वैधर्म्यादुभयथा वा संशये ऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः[2] ॥ १५ ॥

साधर्म्यात् समानधर्मदर्शनात् । संशये आपाद्यमाने

(१) संशयस्य विरोधिनिरूप्यत्वात् विरोधस्य चाभावगर्भत्वादभावविषयानुत्पत्तिसमस्य हेतुत्वेन तदनन्तरं संशयप्रकरणाय सूत्रम् । सामान्यदृष्टान्तयोरित्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

(२) अस्य प्रत्याख्यानसूत्रम् । साधर्म्यात् संशय इत्यादि तात्पर्यटीका । अत्र दुष्टत्वमूलसूत्रम् । साधर्म्यात् संशय इत्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

Digitized by Google

ऽपि न संशयः। वैधर्म्याद् विशेषधर्मदर्शनरूपाविरोधित्वात्। उभयथा वा विशेषदर्शनस्यासत्त्वे सत्वे च। संशये संशयाभ्युपगमे। अत्यन्तसंशयप्रसङ्गः संशयानुच्छेदप्रसङ्गः। सामान्यस्य समानधर्मदर्शनस्य। नित्यत्वानभ्युपगमात् नित्यसंशयजनकत्वानभ्युपगमात्। तथा चात्यन्तसंशयस्वीकारोऽपसिद्धान्त इति भावः। अप्रतिषेधः न भवदुक्तसत्प्रतिपक्ष इत्यर्थः। यद्वा सामान्यस्य गोत्वादेर्नित्यत्वानभ्युपगमान्नित्यत्वानिर्णयप्रसङ्गात्। तत्रापि साधारणधर्मप्रमेयत्वादिना संशय एव स्यात् कुतो भवदुक्तसाधारणधर्मदर्शनादिनिबन्धनप्रतिरोध इति भावः॥ १५॥

समाप्तं संशयसमप्रकरणम्॥

क्रमप्राप्तं प्रकरणसमं लक्षयति।

उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः(१)॥ १६॥

उभयसाधर्म्यादुभयसहचारादन्वयसहचाराद्व्यतिरेकसहचाराद्वा। प्रक्रियायाः प्रक्रान्तविपरीतसाध्यस्य सिद्धेः पूर्वमेव सिद्धेः। तथा चाधिकबलत्वेनारोपितप्रमाणान्तरेण बाधितप्रत्यवस्थानं प्रकरणसमः। यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते नैतदेवं श्रावणत्वेन नित्यत्वसाधकेन बाधात्। बाधदेशनाभासेयम्। यद्वा उभयसाधर्म्यादन्वयव्यतिरेकसहचारेणैन्द्रियकत्वादिग्रहात्। प्रक्रियासिद्धेः प्रकृष्टक्रियासाधनं विपरीतसाधनमिति यावत्। तत्सिद्धेः। तथा च विपरीतसाध्यान्वयव्यतिरेकसहचरितधर्मदर्शना-

(१) बाधस्य विपरीतप्रमात्वाद् वैपरीत्यस्य च प्रतिधीर्मानिकल्पत्वात् तस्य च संशयोत्पादकत्वा सूत्रम्। उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसम इत्यन्वीक्षायपत्रस्य बोधे वर्धमानोपाध्यायाः।

दिना प्रतिपक्षविधया प्रकृतसाध्यसिद्धिविरोधेन प्रत्यवस्थानं प्रकरणसमः । सत्प्रतिपक्षदेशनाभासेयम् ॥ १६ ॥

अत्र दूषणमाह ।

प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः[१] ॥ १७ ॥

प्रतिपक्षात् विपरीतसाध्यसाधकत्वेनाभिमतात् श्रावणत्वादितः । प्रकरणसिद्धिद्वारा मदीयसाध्यस्य यः प्रतिषेधः तदनुपपत्तिः । प्रतिपक्षोपपत्तेः त्वत्पक्षापेक्षया प्रतिपक्षस्य मदीयपक्षस्य उपपत्तेर्बलवत्त्वेन स्वसाध्यसाधकतयोपपत्तेः । बलवत्त्वं च व्याप्तिपक्षधर्मतयेति । केचित्तु प्रतिपक्षस्य मदीयपक्षस्य उपपत्तेः त्वत्पक्षापेक्षया पूर्वं साधनात् । अयमाशयः । श्रावणत्वेन पूर्वं नित्यत्वस्य साधनात् यो बाधः स नोपपद्यते पूर्वसाधितत्वस्य बलवत्त्वाभावात् कदाचित् कृतकत्वेनानित्यत्वस्यापि पूर्वं साधनादिति तत्पक्षप्रतिषेधोऽपि स्यादित्याहुः । यद्वा प्रतिपक्षादुभयसहचरितधर्मदर्शनात् प्रकरणसिद्धेः प्रकृतसाध्यसिद्धेर्यः प्रतिषेधस्तस्यानुपपत्तिः कुतः प्रतिपक्षस्य मदुक्तसाधनस्याधिकबलत्वेनोपपत्तेरित्यर्थः ॥ १७ ॥

समाप्तं प्रकरणसमप्रकरणम् ॥

अहेतुसमं लक्षयति ।

त्रैकाल्यासिद्धेर्हेतोरहेतुसमः[२] ॥ १८ ॥

---

(१) दुष्टत्वमूलसूत्रम् । प्रतिपक्षादित्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

(२) प्रकरणसमस्य बाधदेशनाभासमात्रनिरूप्यत्वादहेतुसमस्याप्यभावविशेषणत्वेन तद्गत्या सूत्रम् । त्रैकाल्यासिद्धेर्हेतोरहेतुसम इत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः । त्रैकाल्यानुपपत्तेर्हेतोरहेतुसम इति न्यायसूचीनिबन्धे पाठः ।

त्रैकाल्यं कार्यकालतत्पूर्वापरकालाः तेन हेतोरसिद्धेः हेतुत्वासिद्धेर्यत् प्रत्यवस्थानमहेतुसम इत्यर्थः। अयमर्थः। दण्डादिकं घटादेर्न पूर्ववर्तितया कारणं तदानीं घटादेरभावात् कस्य कारणं स्यात्। अत एव नोत्तरवर्तितयापि। नापि समानकालवृत्तितया समानकालवर्तिनोः सव्येतरविषाणयोरिव विनिगमनाविरहेण मिथो हेतुत्वापत्त्या कारणत्वासम्भवात्। एवं च कारणमात्रखण्डने ज्ञापकत्वमपि खण्डितं भवतीति। प्रतिकूलतर्कदेशनाभासेयम् ॥ १८ ॥

अत्रोत्तरमाह।

न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः[१] ॥१९॥

त्रैकाल्येन या हेतोरसिद्धिरुक्ता सा न कुतो हेतुतः साध्यसिद्धेः पूर्ववर्तिनो हेतोरेव कार्योत्पादात् ॥ १९ ॥

अत्र विप्रतिपत्तौ प्रतिबन्दिमाह।

प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः[२] ॥ २० ॥

हेतुफलभावखण्डने प्रतिषेधस्याप्यनुपपत्तिः प्रतिषेद्धव्यस्य वाद्युक्तसाधनस्य न प्रतिषेध इत्यर्थः। यद्वा प्रतिषेधानुपपत्तेः प्रतिषेधकानुपपत्तेरित्यर्थः ॥ २० ॥

समाप्तमहेतुसमप्रकरणम् ॥

(१) विरोधः सूत्रार्थ इति वार्त्तिकम्। प्रत्युत्तरसूत्रम्। न हेतुत इत्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः। न हेतुतः कार्यसिद्धेरिति क्वचित् पाठः।

(२) एवमनभ्युपगमे तवापि व्याघात इत्याह। प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः। चकारः प्रत्युत्तरसमुच्चयार्थ इति व्याख्यातमन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायैः। वर्तते चेदं न्यायसूचीनिबन्धे।

अर्थापत्तिसमं लक्षयति ।

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः(१) ॥ २१ ॥

अर्थापत्तितो व्याप्तिमपुरस्कृत्यानुपपत्तिदर्शनेन । प्रतिपक्षसिद्धेः वायुक्तसाधनप्रतिषेधात् प्रत्यवस्थानमर्थापत्तिसम इति । यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते एकविशेषविधानमन्यविशेषप्रतिषेधं विनानुपपन्नमित्यर्थापत्त्या शब्दभिन्नस्य नित्यत्वसिद्ध्या दृष्टान्तासिद्धिर्विरोधिनी । एवं कृतकत्वादनित्य इत्युक्ते ऽर्थादापन्नमन्यस्मान्नित्य इति अनुमानादनित्य इत्युक्ते ऽर्थात् प्रत्यक्षान्नित्य इतिसिद्ध्या बाधः । एकविशेषविधेः सर्वत्रान्यविशेषनिषेधफलकत्वमित्यभिमानेनेदम् । सर्वदोषदेशनाभासेयम् ॥ २१ ॥

अभिमानं निरस्य दूषयति ।

अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः(२) ॥ २२ ॥

अनुक्तस्य अनुक्तमात्रस्य । अर्थापत्तेरेकविशेषविधिना अर्थापत्तिबलेन साधने । पक्षहानेः त्वदीयपक्षहानेरप्युपपत्तिः स्यात् त्वयाऽनुक्तत्वात् । प्रतिवन्देरनुत्तरत्वादाह । अनैकान्तिकत्वाच्चेति । एतस्यार्थापत्तेरनैकान्तिकत्वात् । न त्वदुक्तप्रतिषेध इति शेषः । न हि विशेषविधिमात्रं विशेषनिषेधफलकमपि तु सति तात्पर्ये क्वचित् । न

(१) अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः । उदाहरणपुरःसरं सूत्रं योजयति अनित्यः शब्द इतीति तात्पर्यटीका । अहेतुसमानन्तरमर्थापत्तिसमप्रकरणमाह । अर्थापत्तित इत्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

(२) अस्य प्रत्यादेशमसूत्रमिति वार्त्तिकम् । अत्र प्रत्युत्तरं सूत्रम् । अनुक्तस्यार्थापत्तेरित्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

हि नीलो घट इत्युक्ते सर्वमन्यदनीलमिति सर्वत्र प्रतिपद्यत इति ॥ २२ ॥

समाप्तमर्थापत्तिसमप्रकरणम् ॥

अविशेषसमं लक्षयति ।

एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेरविशेषसमः(१) ॥ २३ ॥

एकस्य धर्मस्य हेतोः कृतकत्वादेरुपपत्तेः पक्षे दृष्टान्ते च सत्त्वात् । अविशेषे साध्यवत्त्वेन पक्षदृष्टान्तयोरविशेषस्वीकारे । सद्भावोपपत्तेः सतो भावः सत्त्वं तस्यैकस्य सर्वत्रोपपत्तेः । सर्वाविशेषप्रसङ्गात् साध्यविरहवत्त्वादिना सर्वेषामविशेषप्रसङ्गात् अविशेषप्रसङ्गं विषयीकृत्य । प्रयोग इति शेषः । अविशेषसम इत्यर्थः । प्रतिकूलतर्कबाधादिदेशनाभासेयम् ॥ २३ ॥

अत्रोत्तरमाह ।

क्वचिद्धर्मोपपत्तेः क्वचिच्चानुपपत्तेः प्रतिषेधाभावः(२) ॥ २४ ॥

क्वचिदुपपादके । धर्मस्य साधनप्रयोजकधर्मस्य व्याप्त्यादेः सत्त्वात् क्वचिच्चासत्त्वात् । प्रतिषेधाभावः त्वदुक्तप्रतिषेधस्यासम्भवः । तथा च कृतकत्वादावनित्यत्वस्य

(१) सर्वोपपत्तेरनुपपत्तिनिरूप्यत्वेनाभावनिरूप्यत्वमविशेषस्याप्यभावनिरूप्यत्वमित्येकनिरूप्यत्वसङ्गत्या सूत्रम् । एकधर्मोपपत्तेरित्यादि न्यायवार्त्तिकतात्पर्यबोधे वर्धमानोपाध्यायाः ।

(२) क्वचित्तद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेरिति क्वचित् सूत्रपुस्तके तात्पर्यटीकान्यायवार्त्तिकतात्पर्यबोधयोश्च पाठः । अस्य प्रत्याख्यानसूत्रम् क्वचिदित्यादि तात्पर्यटीका । तत्र दोषमूलत्वप्रतिपादनार्थं सूत्रम् । क्वचित्तद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभाव इत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

व्याप्तिसत्त्वात् तेन तत्साधनं सत्तादौ च नित्यत्वादि-व्याप्तिविरहेण न तेन सर्वत्र नित्यत्वादिसिद्धिरिति भावः ॥ २४ ॥

समाप्तमविशेषसमप्रकरणम् ॥

उपपत्तिसमं लक्षयति ।

उभयकारणोपपत्तेरुपपत्तिसमः(१) ॥ २५ ॥

उभयं पक्षप्रतिपक्षौ तयोः कारणस्य प्रमाणस्योप-पत्तेरुपपादनादित्यर्थः । तथा च व्याप्तिमपुरस्कृत्य यत्कि-ञ्चिद्धर्मेण वादिपक्षदृष्टान्तेन प्रतिपक्षसाधनेन प्रत्यव-स्थानमुपपत्तिसमः । यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते शब्दे नित्यत्वं प्रमाणसिद्धमैन्द्रियकत्वसहचारात् त्वदभि-मतमदभिमतान्यतरत्वाद्वा यथाऽनित्यत्वमिति बाधः प्रतिरोधो वा तद्देशनाभासेयम् ॥ २५ ॥

अत्र दूषणमाह ।

उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः(२) ॥ २६ ॥

उपपत्तेर्मदुक्तसाध्यसिद्धेः कारणस्य प्रमाणस्याभ्य-नुज्ञानात् त्वयापि दृष्टान्तीकरणेन स्वीकारात् । अप्रति-षेधः न मदुक्तसाध्यं त्वयापि प्रतिषेद्धुं शक्यम् । स्वीकृ-तस्यापि प्रतिषेधे स्वसाध्यमपि त्वया कथं न प्रतिषिध्यत इति भावः ॥ २६ ॥

समाप्तमुपपत्तिसमप्रकरणम् ॥

---

(१) अविशेषसमोपपत्तिसमयोरुपपत्तिसमगर्भत्वात् तयोरन्तर्भावकृत्या सूत्रम् । उभयकारणोपपत्तेरुपपत्तिसम इत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

(२) विरोधः सूत्रार्थ इति वार्त्तिकम् । दोषचिन्तासूत्रम् । उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेध इत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः

Digitized by Google

उपलब्धिसमं लक्षयति ।

निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः(१) ॥ २७ ॥

निर्दिष्टस्य वाद्युपन्यस्तस्य कारणस्य साधनस्य पक्षसाध्यसाधनानामेकतरस्याभावेऽप्युपलम्भात् पक्षादीनामेकतरस्योपलम्भात् प्रत्यवस्थानमुपलब्धिसमः । यथा पर्वतो वह्निमान् धूमादित्युक्ते वह्निर्न धूमसाध्यः धूमं विना आलोकादिनाप्युपलम्भात् तथा धूमो न वह्निसाधको द्रव्यत्वसाधकत्वेनोपलम्भादित्यसाधकत्वस्य परामर्शेऽप्रामाण्यग्रहसम्पादकत्वेन कारणीभूतपरामर्शविरहरूपासिद्धिस्तद्देशनाभासेयम् । एवं पर्वतो न वह्निमान् वह्निविरहिणोऽपि पर्वतस्योपलम्भादिति बाधदेशनापि । तथा वह्निर्न पर्वतवृत्तिर्महानसवृत्तितयोपलम्भादित्यपि बाधदेशनेति दिक् ॥ २७ ॥

अत्रोत्तरमाह ।

कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः(२) ॥ २८ ॥

कारणान्तरादपि वाद्युपन्यस्तसाधनभिन्नसाधनादपि । तद्धर्मोपपत्तेर्निरुक्तधर्मोपलम्भाद् यः प्रतिषेध उक्तः स नेत्यर्थः । अयमाशयः । न हि वयं धूमस्यैव साधकत्वमुच्यते न वैकस्य साधकत्वमन्यस्य साधकत्वं विरुणद्धि ।

(१) उपपत्तिसमे कारणं निरूपकमिह तु तदभावस्तस्य च प्रतियोगिनिरूप्यत्वमहत्त्वा सूत्रम् । निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसम इत्यन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

(२) अस्य प्रत्याख्यानसूत्रम् । कारणान्तरादपीत्यादि तात्पर्यटीका । अत्र तदुत्तरसूत्रम् । कारणान्तरादपीत्यादि अन्वीक्षानयतत्त्वबोधे वर्धमानोपाध्यायाः ।

Digitized by Google

इदानीं भौमादीनां मन्दफलानयनमाह ।

रदगुणिता सप्तहृता
  कुजस्य सौम्यस्य नगगुणा त्रिहृता ।
द्विगुणा हि फलं सूरे-
  र्द्विगुणाग्निविभाजिता स्फुजितः ॥ ३८ ॥

त्रि*गुणा त्रिंशद्रक्ता रविजस्य फलस्य मन्दफललिप्ताः ।
मन्दफलयुतोनं स्वशीघ्रोच्चाच्छोधयेन्मध्यम् ॥ ३९ ॥

स्पष्टाधिकारोक्तमन्दपरिधिना भौमादीनां स्वल्पान्तरात् परममन्दफलकलाः ।

भौ = ६७०′ । बु = ३६२′ । गु = ३१४′ । शु = १०५′ । श = ४७६′

ततो यदि त्रिज्यया परममन्दफलकलास्तदा केन्द्रज्यया किम् ।

जाता मन्दफलकलाः

$$\text{भौ} = \frac{\text{६७० ज्याके}}{\text{१५०}} = \frac{\text{६७ ज्याके}}{\text{१५}} = \frac{\text{६७} \times \text{३२ ज्याके}}{\text{१५} \times \text{३२}} = \frac{\text{६७} \times \text{३२ ज्याके}}{\text{४८०}}$$

$$= \frac{\text{३२ ज्याके}}{\frac{\text{४८०}}{\text{६७}}} = \frac{\text{३२ ज्याके}}{\text{७}} \text{ स्वल्पान्तरात् ।}$$

$$\text{बु} = \frac{\text{३६२ ज्याके}}{\text{१५०}} = \frac{\text{७ ज्याके}}{\text{३}} \text{ स्वल्पान्तरात् ।}$$

$$\text{गु} = \frac{\text{३१४ ज्याके}}{\text{१५०}} = \text{२ ज्याके स्वल्पान्तरात् ।}$$

$$\text{शु} = \frac{\text{१०४ ज्याके}}{\text{१५०}} = \frac{\text{२ ज्याके}}{\text{३}} \text{ ।}$$

$$\text{श} = \frac{\text{४७६ ज्याके}}{\text{१५०}} = \text{३ ज्याके} + \frac{\text{२६ ज्याके}}{\text{१५०}} = \text{३ ज्याके} + \frac{\text{ज्याके}}{\text{६}} \text{ स्वल्पान्तरात् ।}$$

इदानीं स्फुटग्रहार्थं संस्कारमाह ।

तस्माच्छीघ्रफलदलं स्वमृणं वा मन्दसंस्कृते दत्त्वा ।
प्राग्वन्मन्दफलमतः सकलं मान्दग्रहात् कुर्यात् ॥ ४० ॥

---

* (त्रिगुणायैर्भैर्युक्ता)

† (मन्द्रपदे)

तस्मात् पृथक् सितादिशीघ्रोच्चविवर्जितात् (स्फुटं केन्द्रम्।)
तस्मात् शीघ्रफलेन* संस्कृतः स्फुटो जायते स्पष्टः॥ ४१ ॥

मन्दफलयुतोनं मध्यं शीघ्रोच्चाच्छोधयेदेवं शीघ्रकेन्द्रं भवति। तस्माच्छीघ्रफलं कृत्वा तदर्धं स्वं वा क्षयं यथागतं मन्दसंस्कृते मन्दफलसंस्कृते मध्यग्रहे दत्त्वा तं मध्यग्रहं प्रकल्प्यातः प्राग्वत्पुनर्मन्दफलं साध्यं तद्यथागतं सकलं सम्पूर्णं मध्यग्रहे देयम्। एवं गणको मन्दग्रहं मन्दस्पष्टं कुर्यात्। तस्मात् पृथक् स्थापितात् शुक्रादिशीघ्रोच्चविवर्जितात् स्फुटं केन्द्रं द्वितीयं शीघ्रकेन्द्रं कुर्यात्। तस्मात् पुनः शीघ्रफलं साध्यम्। तेन संस्कृतमन्दः पृथक् स्थापितो मन्दस्पष्टश्च संस्कृतः। एवं स्पष्टो ग्रहो जायते। लाघवेन शीघ्रफलसाधनार्थमग्रे खण्डानि वक्ष्यति।

अत्रोपपत्तिः। उपलब्धिरेव ॥ ४०-४१ ॥

इदानीं लाघवेन शीघ्रफलानयनार्थं पिण्डमाह।

भागीकृतचलकेन्द्रे त्रिगुणे खाग्न्युद्धृते फलं पिण्डः।
षड्राश्यधिके चक्राद्विशोध्य शेषेण पिण्डः स्यात् ॥ ४२॥

(भागीकृतचलकेन्द्रे त्रिगुणे खाब्ध्युद्धृते फलं पिण्डः।)†

चलकेन्द्रस्य भागाः कर्त्तव्याः। केन्द्रे षड्राश्यधिके चक्रात् राशिद्वादशकात् केन्द्रं विशोध्य शेषस्य भागाः कर्त्तव्याः। भागास्त्रिगुणाः खाब्ध्यु ४० द्धृताः फलं फलसमो गतपिण्डः स्यात्।

अत्रोपपत्तिः। उच्चनीचयोः शीघ्रकर्णस्य वैलक्षण्यादाचार्येण केन्द्रषड्राशिमध्ये सत्र्यंशत्रयोदशभागवृद्ध्या भौमादीनां चलकेन्द्राणि प्रकल्प्य तेभ्यः शीघ्रफलान्यानीय तद्भागा नवगुणाः पिण्डाङ्काः पठिताः। ते षड्राशिमध्ये सार्धत्रयोदश पिण्डाङ्का भवन्ति। त्रयोदश चतुर्दशपिण्डयोर्मध्ये च केन्द्रान्तर ४०/१ मस्य दलं २०/१ मिदमस्तीति चिन्त्यम्। इष्टकेन्द्रभागेषु कियन्तः पिण्डाङ्का गता एतदर्थमनुपातः। यदि ४०/१ केन्द्रभागैरेकः

* संस्कृतमन्दश्च जायते स्पष्टः। अयं पाठः साधुः।

† अयं पाठः साधुः।

पिण्डस्त्वेष्टकेन्द्रांशैः किम् । जातो गतपिण्डः । शेषफलानयनार्थमग्रे वक्ष्यति ।

इदानीं शेषसंबन्धि पिण्डावयवानयनमाह ।

पिण्डान्तरेण गुणिते शेषे खाब्ध्युद्धृते क्रमाद्देयम् ।
उत्क्रमविधौ विशोध्यं गतपिण्डे शीघ्रफलमेतत् ॥ ४३ ॥

शेषे पिण्डान्तरेण गतैष्यपिण्डयोरन्तरेण गुणिते खाब्ध्यु ४० द्धृते फलं क्रमादुपचयात् गतपिण्डत एष्यपिण्डेऽधिके गतपिण्डे देयम् । उत्क्रमविधावपचयाद्गतपिण्डत एष्यपिण्डेऽल्पे फलं गतपिण्डे विशोध्यं तदेतत् संस्कृतं शीघ्रफलं शीघ्रफलसंबन्धि पिण्डमानं भवेत् ।

अत्रोपपत्तिः । यदि चत्वारिंशत्समेन त्रिगुणशेषेण गतैष्यपिण्डयोरन्तरं लभ्यते तदाऽभीष्टत्रिगुणशेषेण किमित्यनुपातेन स्फुटा । धनर्णोपपत्तिश्चातिसुगमा ॥ ४३ ॥

इदानीं विशेषमाह ।

पिण्डाभावे विकलं गुणयेदाद्येन पिण्डकेन ततः ।
गणयन्ते तु खवेदैस्तदेव फलमत्र बोद्धव्यम् ॥ ४४ ॥

चलकेन्द्रे त्रिगुणे खाब्ध्युद्धृते यदि फलं शून्यं तदा पिण्डाभावः स्यात् । तस्मिन् पिण्डाभावे विकलं शेषमाद्येन पिण्डेन गुणयेत् ततो गुणनफलानि खवेदै ४० र्गणयन्ते विभज्यन्ते । अत्र यत् फलं तदेव शीघ्रफलसंबन्धि पिण्डमानं बोद्धव्यं ज्ञातव्यमित्यर्थः ।

अत्रोपपत्तिः । प्राग्वद्यदि खवेदमितेन त्रिगुणशेषेण प्रथमपिण्डमानं लभ्यते तदेष्टत्रिगुणशेषेण किं जातं शेषसंबन्धि फलं गतपिण्डाभावात् तदेव शीघ्रफलसंबन्धि पिण्डमानम् । एतदनुक्तमपि बुद्धिमता ज्ञायते । आचार्येण बालावबोधार्थं लिखितम् ॥ ४४ ॥

इदानीं विश्वमिते गतपिण्डे विशेषमाह ।

पिण्डे चतुर्दश विश्वैर्गुणिते नखोद्धृते विकलाः ।
लब्धेन विश्वपिण्डो रहितः शेषं फलं भवति ॥ ४५ ॥

(पिण्डे चतुर्दशेऽथ्ये विश्वविगुणिते नखोद्धृते विकले ।) *

चतुर्दशसंख्यक शीघ्रपिण्डे सति विकले शेषे विश्वविगुणिते त्रयोदशसंख्यकपिण्डेन गुणिते नखै २० र्हृते यल्लब्धं भवेत् तेन लब्धेन विश्वपिण्डस्त्रयोदशसंख्यकः पिण्डो रहितः शेषं फलं शीघ्रफलसंबन्धि पिण्डमानं भवेत् ।

अत्रोपपत्तिः । त्रयोदशचतुर्दशपिण्डयोरन्तरे ^{२०}_{१} केन्द्रान्तरमस्ति । इति पूर्वमेव ४२सूत्रे प्रतिपादितम् । चतुर्दशपिण्डमानं शून्यसमम् । अतोऽनुपातो यदि विंशतिमितेन त्रिगुणांशेन विश्वचतुर्दशपिण्डयोरन्तरं विश्वपिण्डसमं लभ्यते तदेष्टशेषेण किं लब्धेन विश्वपिण्डो रहितश्चतुर्दशपिण्डस्याल्पत्वात् शेषं शीघ्रफलसंबन्धि पिण्डमानं भवेत् ॥ ४५ ॥

इदानीं पिण्डतः शीघ्रफलमाह ।

पिण्डफलनवमभागो भागादिफलं ग्रहेषु वा स्वमृणम् ।
चलकेन्द्रे मेषादौ तुलादिके कारयेत् क्रमशः ॥ ४६ ॥

पिण्डफलस्य नवमांशो भागादि शीघ्रफलं भवेत् । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । नवगुणितं भागादि शीघ्रफलमेव पिण्डाङ्काः पठिता इति ४२सूत्रे प्रतिपादितम् । अतः पिण्डफलं नवहृतं भागादि शीघ्रफलं भवति । धनर्णवासना स्पष्टाधिकारतः स्फुटा ॥ ४६ ॥

इदानीं भौमस्य चतुर्दशपिण्डानाह ।

वसुवेदा युगनन्दाः खवेदचन्द्राः समुद्रवसुचन्द्राः ।
वसुयमयमा रसनभोरामा नन्दाग्निरामाश्च ॥ ४७ ॥
मोक्षगुणा रसरसरामा विलोचनाब्धिगुणाः ।
वसुवसुयमा वसुदिशो नभश्च कुजशीघ्रपिण्डाः स्युः ॥४८॥

(वसुवेदा युगनन्दाः खवेदचन्द्रा समुद्रवसुचन्द्राः ।
वसुयमयमा वियदगयमास्तथा रसनभोरामाः ॥ ४७ ॥

* अयं पाठः साधुः ।

Digitized by Google

गोऽग्निगुणा गोऽस्त्रगुणा रसरसरामा त्रिलोचनाब्धिगुणाः ।
वसुरसयमा वसुविशो नभश्च कुजशीघ्रपिण्डाः स्युः ॥ ४८ ॥) *

क्रमेण चतुर्दश पिण्डाः = ४८ । ९४ । १४० । १८४ । २२८ । २७० । ३०६ । ३३९ । ३५९ । ३६६ । ३४२ । २६८ । १०८ । ० ॥ अत्र महत्तमपिण्डो नवभक्तो भौमस्य परमं शीघ्रफलम् = $\frac{३६६}{९}$ = ४०° । ४०′ ॥

अत्रोपपत्तिः ।

केन्द्रांशाः = १३° । २०′ ॥ २६° । ४०′ ॥ ४०° । ०′ ॥ ५३° । २०′ ॥ ६६° । ४०′ ॥
८०° । ०′ ॥ ९३° । २०′ ॥ १०६° । ४०′ ॥ १२०° । ०′ ॥
१३३° । २०′ ॥ १४६° । ४०′ ॥ १६०° । ०′ ॥ १७३° । २०′ ॥

खार्कमिते व्यासार्धे

केन्द्रज्या = २७ । ४० ॥ ५३ । ४० ॥ ७७ । ०० ॥ ९६ । ०० ॥ ११० । ०० ॥ ११८ । ०० ॥ ११९ । १९ ॥
केन्द्रकोटिज्या = ११६ । २० ॥ १०७ । ०० ॥ ९२ । ०० ॥ ७१ । २० ॥ ४७ । २० ॥ २१ । ०० ॥ ७ । ०० ॥
अन्त्यफलज्या = ७८ । ०० ॥ ७८ । ०० ॥ ७८ । ०० ॥ ७८ । ०० ॥ ७८ । ०० ॥ ७८ । ०० ॥ ७८ । ०० ॥
स्पष्टा कोटिः = १९४ । २० ॥ १८५ । ०० ॥ १७० । ०० ॥ १४९ । २० ॥ १२५ । २० ॥ ९९ । ०० ॥ —७१ । ०० ॥
शीघ्रकर्णः = ११७१६″ ॥ ११५५८ ॥ १११९८ ॥ १०४५२ ॥ १०००६ ॥ ९२४२ ॥ ८३३२ ॥
शीघ्रफलज्या = १०·५६६ ॥ २१·७३१ ॥ ३२·१८१ ॥ ४२·१७८ ॥ ५१·४४६ ॥ ५६·७५३ ॥ ६७·०२८ ॥
शीघ्रफलम् = ५°·०५ ॥ १०°·४ ॥ १५°·६ ॥ २०°·६ ॥ २५°·५ ॥ २९°·८ ॥ ३४°·१३ ॥
९ × शीफ = ४५·४५ ॥ ९३·६ ॥ १४०·४ ॥ १८५·४ ॥ २२९·५ ॥ २६८·२ ॥ ३०७·२ ॥
केन्द्रज्या = ११४ । ४० ॥ १०४ । ०० ॥ ८७ । ०० ॥ ६५ । ४० ॥ ४१ । ०० ॥ १४ । ०० ॥
केन्द्रकोटिज्या = ३४ । २० ॥ ६० । ०० ॥ ८२ । ०० ॥ १०० । ०० ॥ ११३ । ०० ॥ ११८ । ४० ॥
अन्त्यफलज्या = ७८ । ०० ॥ ७८ । ०० ॥ ७८ । ०० ॥ ७८ । ०० ॥ ७८ । ०० ॥ ७८ । ०० ॥
स्पष्टा कोटिः = ४३ । ४० ॥ १८ । ०० ॥ ४ । ०० ॥ २२ । ०० ॥ ३५ । ०० ॥ ४० । ०० ॥
शीघ्रकर्णः = ७३४३″ ॥ ६३३३ ॥ ५२२६ ॥ ४१५५ ॥ ३२३५ ॥ २५०२ ॥
शीघ्रफलज्या = ७२·८६९ ॥ ७६·८५४ ॥ ७७·९११ ॥ ७३·९६४ ॥ ५९·३१४ ॥ २६·१८७ ॥
शीघ्रफलम् = ३७°·६ ॥ ३९°·९ ॥ ४०°·६ ॥ ३८°·२ ॥ २९°·६ ॥ १२°·६ ॥
९ × शीफ = ३३८·४ ॥ ३५९·१ ॥ ३६५·४ ॥ ३४३·८ ॥ २६६·४ ॥ ११३·४ ॥

* अयं पाठः साधुः ।

यथा पिण्डेषु महान्तरं न भवेत्तथा साधितसूक्ष्मपिण्डसंख्या समवलम्ब्य मया पिण्डान् संशोध्य मूलार्ये संशोधिते ॥

आचार्यपिण्डाः = ४८ । ९४ । १४० । १८४ । २२८ । २७० । ३०६ ।

मत्साधिताश्च = ४६ । ९४ । १४० । १८५ । २३० । २६८ । ३०७ ।

आचार्यपिण्डाः = ३३९ । ३५९ । ३६६ । ३४२ । २६८ । १०८ । ० ॥

मत्साधिताश्च = ३३८ । ३५९ । ३६५ । ३४४ । २६६ । ११३ । ० ॥

इदानीं बुधपिण्डानाह ॥ ४७–४८ ॥

गुणरामाः षट्करसा वसुनन्दागजविलोचनशशाङ्काः ।
सागरविषयशशाङ्का नगनगचन्द्राः कृताङ्कभुवः ॥ ४९ ॥
वेदनखा जलधिनखा वसुवसुचन्द्रास्तुरङ्गविषयभुवः ।
तुरगदिशो रसरामा नभश्च पिण्डाश्च शशिसूनोः ॥ ५० ॥

बुधस्य क्रमेण चतुर्दश पिण्डाः = ३३ । ६६ । ९८ । १२८ । १५४ । १७७ । १९४ । २०४ । २०४ । १८८ । १५७ । १०७ । ३६ । ० ॥

अत्र महत्तमपिण्डो २०४ नवभक्तो बुधस्य परमं शीघ्रफलम् $= \frac{२०४}{९}$ = २२° । ४०' । अस्य ज्याऽन्त्यफलज्या = ४६ । ४ खार्कमिते व्यासार्धे ।

अत्रोपपत्तिः । भौमपिण्डसाधनवदत्रापि

केन्द्रज्या	= २७ । ४० ॥	५३ । ४० ॥	७७ । ०० ॥	९६ । ०० ॥	११० । ०० ॥	११८ । ०० ॥	११९ । २० ॥
केन्द्रकोटिज्या	= ११६ । २० ॥	१०७ । ०० ॥	९२ । ०० ॥	७१ । २० ॥	४७ । २० ॥	२१ । ०० ॥	० । ०० ॥
अन्त्यफलज्या	= ४६ । ४ ॥	४६ । ४ ॥	४६ । ४ ॥	४६ । ४ ॥	४६ । ४ ॥	४६ । ४ ॥	४६ । ४ ॥
स्वको	= १६२ । २४ ॥	१५३ । ४ ॥	१३८ । ४ ॥	११७ । २४ ॥	९३ । २४ ॥	६७ । ४ ॥	३६ । ४ ॥
शीक	= ६८८४ ॥	६०३२ ॥	६४८५ ॥	६०६६ ॥	८६५४ ॥	८१४४ ॥	७५३४ ॥
शीघ्रफलज्या	= ७· ७३ ॥	१५·३३ ॥	२२ ४४ ॥	२९·१६ ॥	३५· १३ ॥	४०· ०५ ॥	४३· ७८ ॥
शीफ	= ३°· ७ ॥	७°· ३ ॥	१०°· ७ ॥	१४· ०८ ॥	१७°· ०६ ॥	१९· ५२ ॥	२१· ५ ॥
९ × शीफ	= ३३· ३ ॥	६५· ७ ॥	९६°· ३ ॥	१२६· ७२ ॥	१५३· ५४ ॥	१७५· ६८ ॥	१९३· ५ ॥
केन्द्रज्या	= ११४ । ४० ॥	१०४ । ०० ॥	८७ । ०० ॥	६५ । ४० ॥	४१ । ०० ॥	१४ । ० ॥	
केन्द्रकोटिज्या	= ३४ । २० ॥	६० । ०० ॥	८२ । ०० ॥	१०० । ०० ॥	११३ । ०० ॥	११८ । ४० ॥	
अन्त्यफलज्या	= ४६ । ४ ॥	४६ । ४ ॥	४६ । ४ ॥	४६ । ४ ॥	४६ । ४ ॥	४६ । ४ ॥	
स्वको	= ११ । ४४ ॥	१३ । ५६ ॥	३५ । ५६ ॥	५३ । ५६ ॥	६६ । ५६ ॥	७२ । ३६ ॥	

Digitized by Google

शीक =६८९६" ॥ ६२९६ ॥ ५६४८ ॥ ५०९८ ॥ ४७०६ ॥ ४६३३ ॥
शीघ्रफज्या =४५·९५ ॥ ४५·६५ ॥ ४२·५१ ॥ ३५·६० ॥ २४·०१ ॥ ८·३५ ॥

शीफ= २२°·६ ॥ २२°·५ ॥ २०°·८ ॥ १७°·३ ॥ ११° ५· ॥ ३°·९८ ।

९ × शीफ = २०३·४ ॥ २०२·५ ॥ १८७·२ ॥ १५५·७ ॥ १०३·५ ॥ ३५·८२ ॥

आचार्यपिण्डाः= ३३ । ६६ । ९८ । १२८ । १५४ । २०७ । १९४ ।

मत्साधिताः = ३३ । ६६ । ९६ । १२७ । १५४ । १७६ । १९४ ।

आचार्यपिण्डाः=२०४ । २०४ । १८८ । १५७ । १०७ । ३६ । ० ।

मत्साधिताः= २०३ । २०३ । १८७ । १५६ । १०४ । ३६ । ० ।

इदानीं गुरोः पिण्डानाह ।

धृतिरसगुणाश्च खशराः षट्करसा गजनगा रसाष्टौ च ।
खाङ्काश्च भुजगवसवः सागरवसवः समुद्रनगाः ॥ ५१ ॥
भुजगशरा रसरामा *रसेन्दवः पिण्डकाः सूरेः ।
चक्राद्विशुद्धशेषः स्फुटो भवेत् सिंहिकासूनुः ॥ ५२ ॥

गुरोः क्रमेण चतुर्दश पिण्डाः =१८ । ३६ । ५० । ६६ । ७८ । ८६ । ९० । ८८ । ८४ । ७४ । ५८ । ३६ । १६ । ० । अत्र महत्तमपिण्डे ९० नवभक्तः परमं शीघ्रफलम् = १०° । अस्य ज्यान्त्यफलज्या = २१ स्वार्क-मिते व्यासार्धे ।

गगनेन नवचन्द्रैरित्यादि३१श्लोकविधिना यः पातः स चक्राद्विशुद्धः शेषः सिंहिकासूनू राहुः स्फुटो भवेदिति ।

अत्रोपपत्तिः । भौमपिण्डसाधनवदत्रापि

केन्द्रज्या = २७।४०॥ ५३ ।४०॥ ७७ ।००॥ ९६ ।०० ॥ ११०। ०० ॥ ११८।०० ॥ ११६ । २० ॥
केन्द्रकोटिज्या=११६।२०॥ १०७।००॥ ९२ ।००॥ ७१। २० ॥ ४७ । २० ॥ २१ । ०० ॥ ७ । ०० ॥
अन्त्यफलज्या = २१। ००॥ २१।००॥ २१ ।००॥ २१। ०० ॥ २१ । ०० ॥ २१ । ०० ॥ २१ । ०० ॥
स्पको =१३७ ।२०॥ १२८।००॥ ११३।००॥ ९२। २० ॥ ६८ । २० ॥ ४२। ०० ॥ १४ । ०० ॥
शीक = ८४०६"॥ ८३२८ ॥ ८२०४ ॥ ७९९२ ॥ ७७७० ॥ ७५१५ ॥ ७२१० ॥
शीफज्या = ४' १५ ॥ ८· १२ ॥ ११·८२ ॥ १५· १३ ॥ १७· ८३ ॥ १९· ७८ ॥ २०·८३ ॥

* विधवे खमितिपाठः साधुः ।

शीफ	=	१·९७ ॥	३·८७ ॥	५·६२ ॥	७·२० ॥	८·४८ ॥	९·४२ ॥ ९·९२ ॥
९ × शीफ	=	१७·७३ ॥	३४·८३ ॥	५०·५८ ॥	६४·८० ॥	७६·३२ ॥	८४·७८ ॥ ८९·२८ ॥
केन्द्रज्या	=	११४।४० ॥	१०४।०० ॥	८७।०० ॥	६५।४० ॥	४१।०० ॥	१४।०० ॥
केन्द्रकोटिज्या	=	३४।२० ॥	६०।०० ॥	८३।०० ॥	१००।०० ॥	११३।०० ॥	११८।४० ॥
अन्त्यफलज्या	=	२१।०० ॥	२१।०० ॥	२१।०० ॥	२१।०० ॥	२१।०० ॥	२१।०० ॥
स्फको	=	१३।२० ॥	३९।०० ॥	६१।०० ॥	७९।०० ॥	९२।०० ॥	९७।४० ॥
शीक	=	६९०७" ॥	६६६४ ॥	६३७५ ॥	६१६४ ॥	९०४४ ॥	५९२० ॥
शीफज्या	=	२०·८५ ॥	१९·६७ ॥	१७·१८ ॥	१३·४२ ॥	८·५३ ॥	२·९८ ॥
शीफ	=	९·९२ ॥	९·१७ ॥	८·१८ ॥	६·३५ ॥	४·०७ ॥	१·४२ ॥
९ × शीफ	=	८९·२८ ॥	८४·३३ ॥	७३·६२ ॥	५७·१५ ॥	३६·६३ ॥	१२·७८ ॥

आचार्यपिण्डाः = १८ । ३६ । ५० । ६६ । ७८ । ८६ । ९० ॥

मत्साधिताः = १८ । ३५ । ५१ । ६५ । ७६ । ८५ । ८९ ॥

आचार्यपिण्डाः = ८८ । ८४ । ७४ । ५८ । ३६ । १६ । ० ॥

मत्साधिताः = ८९ । ८४ । ७४ । ५७ । ३७ । १३ । ० ॥ ५१–५२ ॥

इदानीं शुक्रपिण्डानाह ।

खशराः शतं खतिथ्यः सागरनन्देन्दवोऽङ्कजिनाः ।
गुणगुणरामाः कुनगगुणाः शून्यखाम्बुधयः ॥ ५३ ॥
कुञ्जरचन्द्रसमुद्रा गजाभ्रवेदा नभोऽम्बुधिज्वलनाः ।
गगनशिलीमुखचन्द्रा वियच्च पिण्डाः सुरारिगुरोः ॥ ५४ ॥

(खशराः शतं खतिथ्यस्तथाङ्कनन्देन्दवोऽङ्कजिनाः ।
खाङ्कयमाः सुररामाः कुनगगुणाः शून्यखाम्बुधयः ॥ ५३ ॥
कुञ्जरचन्द्रसमुद्रा गजाभ्रवेदा नभोऽम्बुधिज्वलनाः ।
गगनशिलीमुखचन्द्रा वियच्च पिण्डाः सुरारिगुरोः ॥ ५४ ॥) *

शुक्रस्य क्रमेण चतुर्दश पिण्डाः ५० । १०० । १५० । १९९ । २४६ । २९० । ३३३ । ३७१ । ४०० । ४१८ । ४०८ । ३४० । १५० । ० । अत्र महत्तमपिण्डो ४१८ नवभक्तः परमफलम् = $\frac{४१८}{९}$ = ४६° । २६′ । ४०″ । अस्य ज्याऽन्त्यफलज्या = ८६ । ४१ स्वार्कमितव्यासार्धे ।

* अयं पाठः साधुः ।

अत्रोपपत्तिः । भौमपिण्डसाधनमत्रापि

केन्द्रज्या = २७।४० ॥ ५३ ।४० ॥ ७७।०० ॥ ९६।०० ॥ ११०। ०० ॥ ११८। ०० ॥ ११९। २० ॥
केन्द्रकोटिज्या = ११९। २० ॥ १०७।०० ॥ ९२।०० ॥ ७१।२० ॥ ४७।२० ॥ २१ ।०० ॥ ७ ।०० ॥
अन्त्यफलज्या = ८४। ४१ ॥ ८४।४१ ॥ ८४।४१ ॥ ८४।४१ ॥ ८४।४१ ॥ ८४।४१ ॥ ८४।४१ ॥
स्पको = २०३।१ ॥ १९६। ४१ ॥ १७८।४१ ॥ १५८। १ ॥ १३४। १ ॥ १०७।४१ ॥ ७९। ४१ ॥
शीक = १२२६४ ॥ १२०६० ॥ ११६७४ ॥ ११०६४ ॥ १०४०२ ॥ ९५८५ ॥ ८६०६ ॥
शीफज्या = १०·७० ॥ २३·१३ ॥ ३४·३० ॥ ४५ ०० ॥ ५५·०० ॥ ६४·०२ ॥ ७२·०८ ॥
शीफ = ५°·५७ ॥ ११°·०७ ॥ १६°·६५ ॥ २२°·१० ॥ २७°·३७ ॥ ३२°·३७ ॥ ३७°·१० ॥
९ × शीफ = ५०·१३ ॥ ९९·६३ ॥ १४९·८५ ॥ १९८·९ ॥ २४६·३३ ॥ २९१·३३ ॥ ३३३·९ ॥
केन्द्रज्या = ११४। ४० ॥ १०४।०० ॥ ८७।०० ॥ ६५ । ४० ॥ ४१ ।०० ॥ १४ ।०० ॥
केन्द्रकोटिज्या = ३४ । २० ॥ ६० । ०० ॥ ८२। ०० ॥ १००। ०० ॥ ११३।०० ॥ ११८। ४० ॥
अन्त्यफलज्या = ८४ ।४१ ॥ ८४ । ४१ ॥ ८४ ।४१ ॥ ८४ ।४१ ॥ ८४ ।४१ ॥ ८४ ।४१ ॥
स्पको = ५२।२१ ॥ २८ ।४१ ॥ ४ ।४१ ॥ १३ ।१६ ॥ २८ । १६ ॥ ३१ । ५६ ॥
शीक = ७५४४ ॥ ६४४२ ॥ ५२२७ ॥ ४०५१ ॥ २९२३ ॥ २०९५ ॥
शीफज्या = ७८·८२ ॥ ८३·९५ ॥ ८६·६५ ॥ ८४·२५ ॥ ७२·९५ ॥ ३४·७५ ॥
शीफ = ४१°·२२ ॥ ४४°·६२ ॥ ४६°·४३ ॥ ४४·८३ ॥ ३७°·६२ ॥ १६°·८७ ॥
९ × शीफ = ३७०·९८ ॥ ४०१·५८ ॥ ४१७·८७ ॥ ४०३·४७ ॥ ३३८·५८ ॥ १५१·८३ ॥
आचार्यपिण्डाः = ५० । १०० । १५० । १९९ । २४६ । २९० । ३३३ ॥
मत्साधिताः = ५० । १०० । १५० । १९९ । २४६ । २९१ । ३३४ ॥
आचार्यपिण्डाः = ३७१ । ४०० । ४१८ । ४०८ । ३४० । १५० । ० ॥
मत्साधिताः = ३७१ । ४०२ । ४१८ । ४०४ । ३३९ । १५२ । ० ॥

यथा महदन्तरं न भवेत्तथाऽऽदर्शार्थं मया शोधिते षष्ठपिण्डत्रुटिश्च पूर्णीकृतेति ॥ ५३–५४ ॥

इदानीं शनिपिण्डानाह ।

रुद्रा छियमाः कुगुणा वसुरामाः सागराम्बुनिधयश्च ।
वसुवेदा गजवेदाः षडब्धयो लोचनाम्बुधयः ॥ ५५ ॥
पञ्चगुणाः सप्तयमा रसचन्द्राः षड् नभश्च रविसूनोः ।

शनेः क्रमेण चतुर्दश पिण्डाः — ११ । २२ । ३१ । ३८ । ४४ । ४८ । ४८ । ४६ । ४२ । ३५ । २७ । १६ । ६ । ० । अत्र महत्तमपिण्डो ४८

नवभक्तः परमं शीघ्रफलम् $= \frac{३२}{६}$ = ५°।२०'। अस्य ज्यान्त्यफलज्या = ११। १२ खार्कमिते व्यासार्धे।

अत्रोपपत्तिः। भौमपिण्डसाधनवदत्रापि

केन्द्रज्या	=२७। ४०॥ ५३। ४०॥ ७७। ००॥ ९६। ००॥ ११०। ००॥ ११८। ००॥ ११९। २०॥
केन्द्रकोटिज्या	=११६। २०॥ १०७। ००॥ ९३। ००॥ ७१। २०॥ ४७। २०॥ २१। ००॥ ७। ००॥
अन्त्यफलज्या	= ११। १२॥ ११। १२॥ ११। १२॥ ११। १२॥ ११। १२॥ ११। १२॥ ११। १२॥
स्पको	=१२७। ३२॥ ११८। १२॥ १०४। १२॥ ८२। ३२॥ ५८। ३२॥ ३२। १२॥ १८। १२॥
शीक	=७८३० ॥ ७७८६ ॥ ७७२५ ॥ ७५६६ ॥ ७४७६ ॥ ७३३६ ॥ ७१६५ ॥
शीफज्या	=२· ३७ ॥ ४· ६० ॥ ६· ७० ॥ ८· ४८ ॥ ९· ८८ ॥ १०· ८० ॥ ११· २० ॥
शीफ	=१°· १३ ॥ २°· १८ ॥ ३°· १८ ॥ ४°· ०३ ॥ ४°· ७० ॥ ५°· १२ ॥ ५°· ३३ ॥
९ × शीफ	=१०· १७ ॥ १९· ६२ ॥ २८· ६२ ॥ ३६· २७ ॥ ४२· ३० ॥ ४६· ०८ ॥ ४७· ९७ ॥
केन्द्रज्या	=११४। ४०॥ १०४। ००॥ ८७। ००॥ ६५। ४०॥ ४१। ००॥ १४। ००॥
केन्द्रकोटिज्या	=३४। २०॥ ६०। ००॥ ८२। ००॥ १००। ००॥ ११३। ००॥ ११८। ४०॥
अन्त्यफलज्या	=११। १२॥ ११। १२॥ ११। १२॥ ११। १२॥ ११। १२॥ ११। १२॥
स्पको	=२३। ८॥ ४८। ४८॥ ७०। ४८॥ ८८। ४८॥ १०१। ४८॥ १०७। २८॥
शीक	=६६६६ ॥ ६८६३ ॥ ६७३१ ॥ ६६२७ ॥ ६५८५ ॥ ६५०३ ॥
शीफज्या	=१०· ९७ ॥ १०· १३ ॥ ८· ६८ ॥ ६· ६५ ॥ ४· २० ॥ १· ४३ ॥
शीफ	=५°· २२ ॥ ४°· ८३ ॥ ४°· १३ ॥ ३°· १७ ॥ २°· ०० ॥ ०°· ६८ ॥
९ × शीफ	=४६· ९८ ॥ ४३· ४७ ॥ ३७· १७ ॥ २८· ५३ ॥ १८· ०० ॥ ६· १२ ॥

आचार्यपिण्डाः— ११ । २२ । ३१ । ३८ । ४४ । ४८ । ४८ ।

मत्साधिताः — १० । २० । २९ । ३६ । ४२ । ४६ । ४८ ।

आचार्यपिण्डाः— ४६ । ४२ । ३५ । २७ । १६ । ६ । ०० ।

मत्साधितः — ४७ । ४३ । ३७ । २९ । १८ । ६ । ०० ।

पिण्डमानमिति साधितं मया शीघ्रकर्णवशतः पराज्यया।
जीवया लघुफलस्य विद्वरैश्चिन्तनीयमखिलं च चिद्वरैः ॥ ५५ ॥

इदानीं भौमादीनां मध्यगतीर्मृदुगतिफलानि चाह।

रूपगुणा ३१ बाणजिनाः २४५
शर ५ चरणाच ९६ यम २ गुणाः ३ क्रमशः ॥ ५६ ॥

मध्यमभुक्तिकलाः स्युः

षड्भि २६ रदाः ३२ खं वसु ८ *शका ११ विकलाः ।

मन्दगुणिता भुक्तिः

खखनवविहृता भुक्तिः स्यात् ॥ ५७ ॥

(मन्दत्रिगुणिता भुक्तिः खखनवविहृता स्वभुक्तेः स्यात् ॥ ५७ ॥)†

ग्रहवत् तन्मन्दफलं मृदुकेन्द्रवशात् स्वमृणं तदूनां च ।

भौमादीनां मध्यमा गतिकलाः क्रमेण भौ ३१। बुधी २४५ । गु ५ । शुक्री ९६ । श २ । रा ३ । कलानामथ एता विकलाश्च भौ २६ । बुधी ३२ । गु० । शुक्री ८ । श ० । रा ११ ॥ भुक्तिर्भौमादीनां मृदुकेन्द्रगतिर्मन्दोच्चानामत्यल्पगतित्वाद्ग्रहमध्यगतिरेव मन्दत्रिगुणिता मन्दभोग्यखण्डेन विगुणिता खखनवो ९०० हृता फलमद्यतनश्वस्तनमन्दकेन्द्रज्ययोरन्तरं स्यात् । इदमन्तरमेव केन्द्रज्यां प्रकल्प्य ग्रहवत् ३८–३९ सूत्रतस्तन्मन्दफलं साध्यं तच्च भुक्तेः फलं मृदुगतिफलं भवति । तच्च स्वमृदुकेन्द्रवशात् कुलीरादौ केन्द्रे धनं मकरादावृणं कार्यं मध्यमगतौ । एवं मन्दस्पष्टा गतिः स्यात् । तदूनां शीघ्रगतिं शीघ्रोच्चगतिमित्यर्थे सम्बन्धः ॥

अत्रोपपत्तिः । रवमन्दगतिफलसाधनवत् स्फुटा ॥ ५६–५७½ ॥

इदानीं शीघ्रगतिफलमाह ।

शीघ्रगतिं सङ्गुणये-

द्वं शीघ्रस्य खण्डेन ॥ ५८ ॥

पिण्डान्तरेण खार्कै- १२०

र्लिप्ताद्यं स्यात् फलं गतेः शीघ्रम् ।

स्वमृणं क्रमोत्क्रमविधौ

‡चतुर्दश विधिश्च पिण्डको गुणकः ॥ ५९ ॥

---

* नगाश्विविकलाः–इति पाठः साधुः ।

† अयं पाठः साधुः ।

‡ चतुर्दशो विश्वपिण्डको गुणकः–इति पाठः साधुः ।

Digitized by Google

हरस्वगतिरेवं वहुणात्याज्ये भुक्ते ।

(*शरसहरो गतिरेवं बहु ऋणमानं स्वमन्दभुक्तेश्चेत् ।)

-पद्लिते द्वे द्वे स्तकाले कारयेत् स्फुटा भुक्तिः ॥ ६० ॥

(भुक्त्यपरहिते वक्रां तत्काले कारयेद्भुक्तिम् ॥ ६० ॥)†

मन्दस्फुटगत्यूनां शीघ्रगतिं शीघ्रोच्चगतिं शीघ्रकेन्द्रगतिं तां शीघ्रस्य खण्डनार्थात् पिण्डान्तरेण पिण्डयोर्गतैष्यपिण्डयोरन्तरेण सङ्गुणयेत् सार्कैः १२० विभजेल्लिप्तात्मकं फलं तद्गतेः शीघ्रं फलं स्यात् । तच्च क्रमोत्क्रमविधौ स्वमृणं स्यात् । गतपिण्डत एष्यपिण्डेऽधिके धनमल्पे ऋणमित्यर्थः । अथ यदि चतुर्दशश्चतुर्दशपिण्ड एष्यो भवेत् तदा शीघ्रकेन्द्रगतेर्गुणको विश्वपिण्डो हरश्च षष्टिर्भवेत् । शीघ्रकेन्द्रगतिं त्रयोदशपिण्डप्रमाणेन सङ्गुण्य षष्ट्या विभजेत् फलं तदा गतेः शीघ्रफलं स्यादित्यर्थः । मन्दस्फुटा गतिः शीघ्रगतिफलसंस्कृता स्फुटा गतिः स्यात् । एवं यदि मन्दस्फुटगतेः शीघ्रगतिफलमृणं बहु स्यात् तदा ऋणमाने भुक्त्यपरहिते मन्दस्फुटगतिरहिते सति शेषं तत्काले वक्रां भुक्तिं कारयेद्ग्रहस्य इति शेषः ॥

अत्रोपपत्तिः । यदि चत्वारिंशन्मितेन भागात्मकेन त्रिगुणशेषेण गतैष्यपिण्डयोरन्तरं लभ्यते तदा त्रिगुणकेन्द्रगतिभागसमशेषेण किं पिण्डस्य नवगुणत्वात् फलं नवहृतमद्यतनश्वस्तनशीघ्रफलयोरन्तरं भागात्मकं तत् षष्टिगुणं जातं कलात्मकं शीघ्रगतिफलम्

$$=\frac{(\text{गपि} \sim \text{शेपि})\ \text{३शीकेग}}{४० \times ९ \times ६०} \times ६० = \frac{(\text{गपि} \sim \text{शेपि})\ \text{शीकेग}}{१२०}\ ।$$

त्रयोदशचतुर्दशपिण्डयोरन्तरे केन्द्रांशाः -$\frac{{}^\circ}{२}$ इति पूर्वं ४८सूत्रे प्रतिपादितम् । तत्र गतैष्यपिण्डान्तरं चतुर्दशपिण्डाभावात् त्रयोदशपिण्डसममतः शीघ्रगतिफलसाधने तत्र केन्द्रगतेस्त्रयोदशपिण्डो गुणः षष्टिहरो भवेत् । धनर्णवासना चातिसुगमा ॥

---

* अयं पाठः साधुः ।

† अयं पाठः साधुः ।

(नवतिपयोधिविभक्ता इत्यादि आर्याषट्कं खण्ड-खाद्याच्चिन्त्यम् ?)

(नवतिथयोऽष्टिविभक्ता इति पाठः साधुः)

(खण्डखाद्यस्थश्लोकाश्चेते ।

नवतिथयो १५९ऽष्टि १६ विभक्ताः
पञ्चरसा ६५ वसु ८ हृता दश १० त्रिहृताः ।
विषुवच्छायागुणिताः
स्वदेशजाश्चरदलविनाड्यः ॥ ६१ ॥

नवतिथयो १५९ विषुवतीगुणिताः षोडशविभक्ताः फलं पलात्मकं स्वदेशे प्रथमं चरखण्डम् । पञ्चरसा ६५ विषुवतीगुणा वसु ८ हृताः फलं द्वितीयं चरखण्डम् । एवं दश १० पलभाहतास्त्रि ३ हृतास्तृतीयं चरखण्डं भवतीति ।

अत्रोपपत्तिः । एकाङ्गुलपलभादेशे चाचार्यमतेन क्रमेण पलात्मकानि चरखण्डानि प्रख = १५९/१६ । द्विखं = ६५/८ । तृख = १०/३ एतानि पलभागुणानि स्वदेशे भवन्तीति स्फुटा वासना । भास्कराचार्येण १५९/१६, । ६५/८-अनयोः स्थाने क्रमेण १०, ८ संख्ये गृहीते । अत उक्तं 'दिङ्नागसत्र्यंशगुणैर्विनिघ्नी पलप्रभे'त्यादि ॥ ६१ ॥

ज्याः केन्द्रं स्फुटभानुं
कृत्वा ये राशयश्चरार्धानि ।
भुक्तानि भोग्यगुणिता-
च्छेषात् खखधृतिहृतात् तु फलम् ॥ ६२ ॥

स्फुटभानुं केन्द्रं कृत्वा तस्य भुजः साध्यस्तच्च चरार्धानि ज्या ज्याखण्डानि प्रकल्प्य केन्द्रभुजे ये राशयस्तन्मितानि भुक्तानि ज्याखण्डानि भवन्ति । शेषात् केन्द्रभुजशेषकलामानाद्भोग्यचरखण्डगुणात् खखधृति-१८०० हृतात् फलं च गतचरखण्डयोगे चेप्यमेवमभीष्टं पलात्मकं चरमानं भवेत् ।

अत्रोपपत्तिस्त्रैराशिकेन स्फुटा ॥ ६२ ॥

गतिपादं पादोनां गतिं विशोध्यास्तकाल उदये च ।
संसाधितस्य तस्य ग्रहस्य चरकर्म चान्यस्य ॥ ६३ ॥

निशीथकालिकग्रहे गतिचतुर्थांशं चतुर्थांशोनां गतिं च विशोध्य क्रमेणास्तकाले उदये च ग्रहो भवति । एवं तस्य रवेर्वाऽन्यस्य ग्रहस्य संसाधितस्य मध्ये चरकर्म कार्यम् । अस्ते उदये वा ग्रहे चरकर्म देयं न दिनार्धे निशीथे चेति स्फुटं सिद्धान्तविदामिति ॥ ६३ ॥

चरदलविनाडिकागति-
कलावधात् खखरसाग्नि ३६०० लब्धकलाः ।
ऋणमुदयेऽस्तमये धन-
मुत्तरगोलेऽन्यथा याम्ये ॥ ६४ ॥

स्पष्टार्थम् । उपपत्तिश्च 'चरघ्नभुक्तिर्द्युनिशासुभक्ते'त्यादिना भास्करोक्तेन स्फुटा ॥ ६४ ॥

पञ्चदश हीनयुक्ताश्चरार्धनाडीभिरुत्तरे गोले ।
याम्ये युक्तविहीना द्विसङ्गुणा रात्रिदिननाड्यः ॥ ६५ ॥

स्पष्टार्थम् । उपपत्तिश्च 'चरघटीसहिता रहिता क्रमात् तिथिमिता घटिका खलु गोलयो'रित्यादिना भास्करविधिना स्फुटा ॥ ६५ ॥

मिश्रेष्टान्तरगुणिता भुक्तिर्दिवसे निशादले प्रथमे ।
षष्ट्या विभज्य लब्धं विशोध्य तात्कालिको भवति ॥६६॥

दिवसे दिनेष्टकाले वा प्रथमे निशादले निशीथतोऽर्वाक् चेष्टकाले मिश्रस्य रात्र्यर्धकालस्य स्वेष्टकालस्य च यदन्तरं तेन भुक्तिर्ग्रहगतिर्गुणा फलं षष्ट्या विभज्य लब्धं निशीथकालिकग्रहाद्विशोध्य शेषं तात्कालिको ग्रहो भवति । एवं निशीथानन्तरेष्टकाले लब्धं निशीथकालिकग्रहे संयोज्य तात्कालिकग्रहः कार्य इत्यनुक्तमपि बुद्धिमता ज्ञायत इति ।

अत्रोपपत्तिस्त्रैराशिकेन स्फुटा ॥ ६६ ॥)

क्रान्त्ययुतिवियोगादक्षपदेः शोधिते दिनदले भा ।
भाश्रुतिकृत्योः कृतमनुयुतानयाकृत्वकर्षः स्यात् ॥ ६७॥

(क्रान्त्यक्षयुतिवियोगाच्चक्रपदात् शोधिते दिनदले भा ।
भाश्रुतिकृत्योः कृतमनुयुतेऽनयोः कृतिरकर्षस्य ॥)*

क्रान्त्यक्षयोर्युतिवियोगात् त्रिप्रश्नोक्त्या मध्यनतांशाः साध्याः । नतांशमाने चक्रपादाच्च्युतेः शोधिते शङ्कुचापमाने विदिते सति त्रिप्रश्नाधिकारविधिना शङ्कुना मध्यनतांशज्या तदा द्वादशाङ्गुलशङ्कुना किमित्यनुपातेन दिनदले मध्याह्ने भा छाया साध्या । छायाकर्णकृत्योः कृतमनुयुतेऽनयोः सत्योरकर्षस्यापरस्य कृतिः क्रमेण भवति । छायाकृतिः कृतमनु १४४ युता छायाकर्णकृतिस्तथा छायाकर्णकृतिः कृतमनु–१४४ भिन्ना छायाकृतिर्भवतीत्यर्थः ।

अत्रोपपत्तिः । त्रिप्रश्नाधिकारविधिना स्फुटा ॥ ६७ ॥

इदानीमिष्टकाले स्थूलं छायाकर्णमाह ।

षड्गुणिता गतशेषा नाड्यो दिवस विभाजिताज्यातत् ।
दिनदलकर्मगुणाः स्वानया त्रिभज्याभक्तं फलं कर्णः ॥६८॥

(षड्गुणिता गतशेषा नाड्यो दिवसार्धभाजिता तज्ज्या ।
दिनदलकर्णगुणाऽऽप्तानया त्रिभज्या फलं कर्णः ॥)†

गतशेषा नाड्य उन्नतकालः । षड्गुणिता दिनार्धभाजिता यत् फलं स्यात् तत्संख्यया ज्या साध्या । यल्लब्धं तत्संख्यकानां १५ सूत्रे लिखितानां ज्याखण्डानां योगः कार्यः सा ज्या भवतीत्यर्थः । एवमियं ज्या स्थूलेष्टान्त्या ज्ञातव्येति । त्रिभज्या दिनार्धकर्णेन गुणाऽनया पूर्वसाधितया स्थूलेष्टान्त्याऽऽप्ता फलं स्थूल इष्टकाले छायाकर्णो भवतीति ।

अत्रोपपत्तिः । यदि दिनदलोन्नतकालेन नवतिभागास्तदेष्टोन्नतकालेन किं लब्धा भागाः षष्टिगुणाः कलास्ताः खखनवो ९०० हृता लब्धाः

* अयं पाठः साधुः ।
† अयं पाठः साधुः ।

$= \frac{\text{९० उका} \times \text{६०}}{\text{दिव} \times \text{९००}} = \frac{\text{६ उका}}{\text{दिव}}$ । लब्धसंख्यकानां ज्याखण्डानां योगः स्थूलेष्टान्त्या जाता । ततो यदि दिनार्धान्त्यया स्थूलतया त्रिज्यासमया दिनार्धकर्णो लभ्यते तदेष्टान्त्यया किं व्यस्तानुपातेन जात इष्टकर्णः

$= \frac{\text{दिक} \times \text{त्रि}}{\text{इ अं}}$ । अत उपपन्नम् ॥ ६८ ॥

इदानीमिष्टकर्णात उन्नतकालमाह ।

दिनदलकर्णे त्रिभ*ज्यागुणे श्रवणोद्धृते फलस्य धनुः ।
द्युदलगुणं तिथिभक्तं दिनगतशेषासवः क्रमशः ॥ ६९ ॥

धनुर्दिनार्धगुणं पञ्चदशभक्तं फलं क्रमशः पूर्वापरकपालयोर्दिनगतशेषासवो भवन्ति । शेषं स्पष्टार्थम् ।

अत्रोपपत्तिः । पूर्वप्रकारवैपरीत्येन

धनुः $= \frac{\text{९०} \times \text{६०} \times \text{उका}}{\text{दिव}}$ । अतो घट्यात्मक उन्नतकालः

$= \frac{\text{दिव} \times \text{ध}}{\text{९०} \times \text{६०}}$ । अयं ३६० गुणो जातोऽस्वात्मक उन्नतकालः

$= \frac{\text{दिव} \times \text{ध}}{\text{१५}}$ । अत उपपन्नम् ॥ ६९ ॥

इदानीं ज्यातश्चापानयनमाह ।

ज्याखण्डोने शेषे गुणिते नवभिः शतैरशुद्धहृते ।
क्षेप्याणि शुद्धखण्डैर्गुणितानि शतानि नव चापम् ॥ ७० ॥

ज्यामाने ज्याखण्डैः १५ सूत्र पठितैरूने शेषे नवशतैर्गुणितेऽशुद्धखण्डहृते लब्धे शुद्धखण्डैः शुद्धखण्डसंख्याभिर्गुणितानि नवशतानि क्षेप्याणि तदा चापं भवति ।

अत्रोपपत्तिः । ज्यासाधनवैपरीत्येन सुगमा ॥ ७० ॥

इदानीमुपसंहारमाह ।

इति तिथिनक्षत्रदिनभाद्यादिकसिद्धौ ब्रह्मगुप्तेन ।
द्वासप्तत्यार्याणां संक्षिप्तोऽतिस्फुटश्चैषः ॥ ७१ ॥

* त्रिज्याभिहते—इति पाठः साधुः ।

स्पष्टार्थम् ॥ ७१ ॥

इदानीमयं कस्मै न दातव्य इत्याह ।

दुर्जनकृतघ्नशठप्रतिकञ्चुककारिणे न दातव्यः ।
ध्यानग्रहाधिकारो जिष्णुसुतब्रह्मगुप्तकृतः ॥ ७२ ॥

इति श्रीब्रह्मगुप्तकृतो ध्यानग्रहोपदेशाध्यायः समाप्तः ।

प्रतिकञ्चुककारी पिशुनः । शेषं स्पष्टम् ॥ ७२ ॥

मधुसूदनसूनुनोदितो यस्तिलकः श्रीपृथुनेह जिष्णुजोक्ते ।
हृदि तं विनिधाय नूतनोऽयं रचितो ध्यानखगे सुधाकरेण ॥ १ ॥

अपहाय दशावतारलीलां प्रकृतिर्वामकलामलङ्करोति ।
परिहाय सुपात्रमत्र लोकाः सकलाः सङ्कुलयन्ति को। कुपात्रम् ॥ २ ॥

या ब्रह्मगुप्तकृतिरत्र सहस्रसूचे-
नानाप्रकारकरणेन च भास्करेण ।
मन्दीकृता पृथुवृथातिलकेन सेयं
विद्योतिता निजकरेण सुधाकरेण ॥ ३ ॥

ये भास्करादिकृतिपारगता नवीने
चापप्रपञ्चजविधौ कुशलाः सुशीलाः ।
श्रीमत्सुधाकरकृतं तिलकं निधाय
सज्ज्योतिषेऽत्र विहरन्तु त एव धीराः ॥ ४ ॥

कृपालुसूनुना सुधाकरद्विवेदिना सुतं
परात्परं निधाय मानसे सुकोशलापतेः ।
गजेषुनन्दभूमिहायने मघौ सिते गुरौ
सुरामजन्मसत्तिथावकारि सोपपत्तिका ॥ ५ ॥

सन् १९०१ मार्चमासस्याष्टाविंशतिदिने श्रीजानकीरमण-
चरणसरोजरजःप्रसादेनायं तिलकः सम्पूर्णतामगात् ।

इति श्रीकृपालुदत्तसूनुसुधाकरद्विवेदिविरचितो ब्रह्मगुप्तकृतध्यान-
ग्रहोपदेशाध्यायतिलकः समाप्तः ॥

Digitized by Google

अथ ध्यानग्रहोपदेशाध्याये क्षेपसाधनम् ।

२ श्लोके पञ्चचत्वारिंशत् षष्टिभक्ता फलम् = $\frac{४५}{६०}$ = $\frac{३}{४}$ इदं स्थूलत्वेन त्र्यंशमेव मध्यराशावाचार्येण प्रक्षिप्तम् ।

'अथ सरसवेदयुक्त' एतदर्थम्—

"गोद्रीन्दुद्रिकृताङ्कदस्रनगगोचन्द्राः—१९७२९४७१७९ शकाब्दान्विताः" इति भास्करोक्त्या खपञ्चपञ्च—५५० मिते शके कल्पगताब्दाः =१९७२९४७७२९ । * वर्षादावधिशेषज्ञानायाऽनुपातः, कल्पसौरवर्षैः कल्पाधिमासा लभ्यन्ते तदेष्टसौरवर्षैः क इति जाता इष्टाऽधिमासाः = $\frac{१९७२९४७७२९ \times १५९३३००००००}{४३२००००००००}$ = $\frac{१९७२९४७७२९ \times ५३११}{१४४००}$

(१) कल्पगताब्देषु हरभक्तेषु शेषम् = ३७२९ * *

(२) $\frac{३७२९ \times ५३११}{१४४००}$ = $\frac{१९८०४७१९}{१४४००}$ = १३७५ $\frac{४७१९}{१४४००}$ ।

(३) यद्येतावति १४४०० हरे ४७१९ क्षेपकोऽयं तदैतावति १३१ क इति संचारितः क्षेपकः = $\frac{४७१९ \times १३१}{१४४००}$ = $\frac{६१८१८९}{१४४००}$ = ४२ $\frac{१३३८९}{१४४००}$ = ४३स्व०

अतोऽत्र 'सगुणवेदः' इति पाठः सम्यगिति सिध्यति ।

(१) १४४,००) १९७२९४७७,२९ (१३७०१० = लब्धिः ।

५३२

१००६

१४७

* * ३७२९ = कलिगताब्दाः ।

(२) ५३११

३७२९

३७२९

३७२९

१११८७

१८६४५

१९८०४७,१९ (१३७५ = कलिमुखाद् गताधिमासाः ।

Digitized by Google

५४०
१०८४
७६७
४७१६
१३१
(३) ———
४७१६
१४१५७
४७१६
———
६१८१,८६ (४२ = क्षेपकः
४२१
१३३८६ = शेषम् ।

* लब्धिः = १३७०१० । गुणः = ५३११ । अनयोर्घातः—

१३७०१०
१३७०१
४११०३
६८५०५
———
७२७६६०११० = कल्पारम्भे गता अधिमासाः ।
१३७५ = कल्पारम्भाद् ग्रन्थारम्भशकावधि गता अधिमासाः ।
———
७२७६६१४८५ = कल्पादितो ग्रन्थारम्भशकावधि गता अधिमासाः ।

४ शशाङ्कक्षेपसाधनम्—

पूर्वसाधिताः कल्पगताब्दाः १९७२९४७०२९ मासीकृताः २३६७५३७२३४८ पूर्वसाधितैः ७२७६६१४८५ अधिमासैर्युता जाताश्चान्द्रमासाः = २४४०३०३४२३३ । कल्पचान्द्रमासैः कल्पकुदिनानि लभ्यन्ते तदैभिः किमिति जातो वर्षारम्भसमीपस्थमध्यमदर्शान्तकालिकः कुदिनगणः

$$= \frac{२४४०३०३४२३३ \times १५७७९१६४५००००}{५३४३३३००००} = \frac{२४४०३०३४२३३ \times १०५१९४४३}{३५६२२२} \text{ ।}$$

सप्तगुणितहरेण २४९३५५४ नेन गुण्यगुणकयोस्तक्षणाय न्यासः—

२४९३५५४) २४४०३०३४,२३३ (९७८६
२२४४१९८६
———
१९६१०४८२
१७४५४८७८
———
२१५५६०४३

१०५१९४४३ (४
९९७४२१६
———
५४५२२७ = गुणकशेषम्

१९६४८४३२
―――――
१६०७६११३
१४९६१३२४
―――――
१११४७८९ = गुण्यशेषम् ।
५४५२२७ = गुणकशेषम् ।
―――――
७८०३५२३
२२२९५७८
२२२९५७८
५५७३९४५
४४५९१५६
५५७३९४५
―――――
३५६२२२) ६०७८१३०६२१०३ (१७०६२७६ सप्ततष्टे शेषं वाराः = ५
३५६२२२
―――――
२५१५९१०
२४९३५५४
―――――
२२३५६६२
२१३७३३२
―――――
९८३३०१
७१२४४४
―――――
२७०८५७०
२४९३५५४
―――――
२१५०१६३
२१३७३३२
―――――
१२८३१
६०
―――――
७६९८६० (घट्यौ २ ।
७१२४४४
―――――
५७४१६
६०
―――――
३४४४९६० (पलानि ९ २/३ स्व० ।
३२०५९९८
―――――
२३८९६२

अत्र वर्त्तमानवारार्थं ५ स्थाने ६ संख्या गृहीताऽऽचार्येण तथा २ स्थाने ४, ९ स्थाने च १८ संख्या गृहीता। एवमत्र घटीद्वयं पलनवकं चाधिकं गृहीतमाचार्येणेति ज्योतिर्विद्भिश्चिन्त्यम् ।

६ श्लोकक्षेपसाधनम् ।

पूर्वसाधिताः कल्पगताब्दाः = १९७२९४७७२९ । एते द्वादशगुणिता जाताः सौरमासाः = २३६७५३७२७४८ । इष्टशका — ५५० इत्यत्र गताधिमासाः = १३७०१० × ५३११ + १३७५ = ७२७६६१४८५ *

इष्टचान्द्रमासाः = २३६७५३७२७४८ + ७२७६६१४८५ = २४४०३०३४२३३

कल्पचान्द्रमासैः कल्पचन्द्रमन्दकेन्द्रभगणाः कल्पचान्द्रमासोना लभ्यन्ते तदैभिः क इति जातं भगणात्मकं चन्द्रकेन्द्रम् = $\frac{२४४०३०३४२३३ \times ३८३१८९४१४२}{५३४३३३००००००}$

१	२४४०३०३४२३३
२	४८८०६०६८४६६
३	७३२०९१०२६९९
४	९७६१२१३६९३२
८	१९५२२४२७३८६४
९	२१९६२७३०८०९७

१	५३४३३३
२	१०६८६६६
३	१६०२९९९
५	२६७१६६५
६	३२०५९९८
७	३७४०३३१
८	४२७४६६४
९	४८०८९९७

४८८०६०६८४६६
९७६१२१३६९३२
२४४०३०३४२३३
९७६१२१३६९३२
२१९६२७३०८०९७
१९५२२४२७३८६४
२४४०३०३४२३३
७३२०९१०२६९९
१९५२२४२७३८६४
७३२०९१०२६९९

५३४३३३०००००) ९३५०९८४३९२४४५८१.६३०८६ (१७५००२९३६२
५३४३३३
४००७६५४
३७४०३३१
२६७३२३३
२६७१६६५
१५६८९२४

* २ श्लोकक्षेपसाधनं द्रष्टव्यम् ।

१०६८६६६

५००२५८४
४८०८६६७

१९३५८७५
१६०२९९९

३३२८७६८
३२०५९९८

१२२७७०१
१०६८५६६

१५९०३५६३०८९ = भगणशेषम् ।
२८

१२७२२८५०४६८८
३१८०७१२६१७२

४४५२६६७,६६५०८ (८ [illegible] = $८\frac{१}{२}$ इत्य०
४२७४६५

१७९३३३६६५०८

अथवाऽऽचार्येण सुखार्थं छन्दोऽनुरोधाद् वा $८\frac{१}{२}$ स्थाने $८\frac{१}{२}$ गृहीतेति कल्प्यते ।

Digitized by Google

भूमिका ।

नित्यं श्रीजानकीजानिर्जयतीह जगत्पतिः ।
अनन्तो जगदाधारशेषोऽभूद्यस्य सेवया ॥

अथ ब्रह्मगुप्तोऽस्य सिद्धान्तस्य २४ अध्याय पृ. ४००

श्रीचापवंशतिलके श्रीव्याघ्रमुखे नृपे शकनृपालात् ।
पञ्चाशत्संयुक्तैर्वर्षशतैः पञ्चभिरतीतैः ॥
ब्राह्मः स्फुटसिद्धान्तः सज्जनगणितज्ञगोलवित्प्रीत्यै ।
त्रिंशद्वर्षेण कृतो जिष्णुसुतब्रह्मगुप्तेन ॥

इति लेखानुसारेण शके ५२० प्रादुरभूत् ।

अथ 'जिष्णुसुत'–इति लेखात् तथा

शशिदृक्पाथें यद्विविभलग्नेषुणाऽथ संस्करणम् ।
जिष्णुजमतं तदुक्तं न मन्मतं वच्मि युक्तिमिह ॥

इति भास्करीयगणिताध्यायसूर्यग्रहणाधिकारवचनाद्भास्करग्रन्थे बहुशेनादृग्लेखाच्चास्य पिता जिष्णुगुप्त एवास न संशयः । बहूनां मतेऽयं विष्णुगुप्तस्य पौत्रो गुप्तपदान्ताद्वैश्यकुलोद्भूतो रीवाननगराधिपतेर्व्याघ्रभटेश्वरस्य प्रधानज्योतिषी किलासीत् (द्रष्टव्या गणकतरङ्गिणी पृ १६–१७)

संप्रति यूरपदेशीयविदुषामन्वेषणेन गुर्जरदेशमध्ये भिनमालनामग्राम एवास्य जन्मस्थानं सिद्ध्यति (See Indian Antiquary, XVII., p. 192, July, 1888.)

श्रूयते चास्य महाकरणस्य खण्डखाद्याख्यस्य टीकायां वरुणकृतायामाचार्यविशेषणं 'भिल्लमालकाचार्य' इति । अस्माद्गुर्जर-

देशीयगणकानां मुखकथातोऽपि ब्रह्मगुप्तस्य जन्मस्थानं भिल्लमालकः संप्रति भिनमालनाम्ना प्रसिद्ध एव सिध्यति ।

अयं भिनमालनामा ग्रामो गुर्जरदेशोत्तरसीम्नि मालव-(मारवाड) देशतो दक्षिणभागे, आबूपर्वतलूणीनद्योर्मध्ये तत्पर्वता-द्वायुकोणे पञ्चयोजनान्तरे संप्रति प्रसिद्धः ।

तन्त्रपरीक्षाध्याये पृथूदककृतटीकायां 'कुलक्षोभेयमाचार्यस्ये'ति लेखात् (द्रष्टव्यमस्य ग्रन्थस्य १६० पृष्ठम्) मन्मतेऽयं नीचानां भिल्लादीनां पुरोहितोऽतो भिल्लमालकाचार्यत्वेन प्रसिद्धो नीचकुलोद्भवः । नहि देशस्य कश्चिदाचार्यो भवतीति भृशं बुद्धिमद्भिर्विचिन्त्यम् ।

संप्रत्युपलब्धताम्रपट्टादिलेखाद्गुर्जरदेशे ख्रीष्टशक ७५६—९४१ मध्ये चावडवंशीया राजान आसन् तथा चीनदेशीयहुएनसंग (Hieun Thsang) चरलेखानुसारेण तेषां राजधानी च 'भिलमाल' आसीदित्यत्र न संशयः । चावडवंशीया एव ब्रह्मगुप्तोक्तचापवंशीया राजान इतीतिहासतत्त्वविदामनुमितिः । मन्मते चापवंशीयो व्याघ्रमुखनामा कश्चिन्नरपतिः सिन्धु (पञ्जाब) देशे बभूव (See Archæological Survey of India Reports, Vol. XIV., p. 65, Sunit.)

यद्वंशीयाः सप्तदशमुद्राः सिन्धु (पञ्जाब) देशे लुधियानानामस्थाने चोपलब्धास्तथा यन्निदेशतः कश्चिद्विद्वान् बगदादनगरे खलीफाआलमन्सूर निकटे जगाम । (See Alberuni's India by Dr. E. C. Sachau, Vol. II., p. 15.)

इदानीमपि ब्रह्मगुप्तस्य करणग्रन्थो बहुत्र सिन्धु-(पञ्जाब) देशे प्रसिद्धः । तदीयकरणखण्डखाद्यानुसारेण सारणीतो बहुत्र तद्देशे गणकाः पञ्चाङ्गं च रचयन्ति ।

एतत्कृतस्यास्य सिद्धान्तग्रन्थस्यैका प्रतिः काशिकराजकीय-पाठालयतो द्वितीया डा· थिबोसाहिबमहाशयतस्तृतीया चायोध्या-नरेशप्रधानज्योतिर्विच्छ्रीयज्ञदत्तशर्मणो मया लब्धा । डा· थिबोमहा-शयस्य पुस्तकं कस्य चिद्दक्षिणादेशीय (Deccan College, Poona.) डे· का· पुस्तकस्य प्रत्यन्तरम् । इदं पुस्तकं तथा पं· श्रीयज्ञदत्तपुस्तकं चैकमातृकमेव । इदं पुस्तकत्रयमतीवाशुद्धं बहुत्र स्खलितं चास्ति ।

यत्पुस्तकानुसारेण व्यक्ताव्यक्ताध्याययोर्द्वादशाष्टादशसंख्य-योरङ्गलभाषायामनुवादः कोलब्रूकसाहिबेन कृतस्तत्पुस्तकमेतत्त्रयतो भिन्नमित्यसंशयं विभाति पाठविभेदात् । तत्पुस्तकस्य कुट्टकाध्यायः संप्रति इण्डिया-आफिस-सरस्वतीभवने वर्तते (See Catalogue of the Sanskrit Manuscripts in the Library of India Office Part V., p. 995.)

पृथूदककृताऽस्य सिद्धान्तस्य टीका* या कोलब्रूकसाहिबेन भारतवर्षे ह्युपलब्धा सा च संप्रति लण्डननगरे इण्डिया-आफिस-सरस्वतीभवने वर्तते । तस्या एका प्रतिर्मद्द्वारेण श्री डा· थिबो-साहिबमहाशयेनोत्पादिता साऽपि संप्रति मन्निकटेऽस्ति । अहो इण्डिया-आफिस-सरस्वतीभवने अस्य पुस्तकस्य पुटकबन्धनकाले-ऽनवधानतया पत्राण्यसङ्गतानि जातानि, बहुत्र खण्डितानि च सन्ति । तानि कदाचिदनुपयुक्तपत्राणां मध्ये स्युरिति तेषां सम्यग-

---

* इदं पुस्तकं कस्य चिन्मैथिलाक्षरैर्लिखितस्य पुस्तकस्य प्रत्यन्तरमिति निःसंशयं प्रतिभाति । ११ पत्रे ६ शून्यस्य स्थाने ७ इति लेखात् । एवमन्यत्रापि । विसर्गात् परतः 'क' स्थाने 'क्क' इति लेखात् । यथा १२ पत्रे ६ पङ्क्तौ । तथा विसर्गस्थाने 'स' इति लेखात्, यथा १२ पत्रे १ पङ्क्तौ । वाक्यविरामेऽपि सन्धिकरणात् । यथा गोलाध्यायस्य २१ पत्रे २ पङ्क्तौ 'सर्वमुपपन्नमुक्तमथागमेन । कुत्रचित् 'न्त' स्थाने 'न्न' इति लेखात् । एकस्मिन् पत्रे मैथिलाक्षरे 'श्रीगणेशाय नमः' इति लेखाच्च ।

न्वेषणं समुचितम् । (See Catalogue of the Sanskrit Manuscripts in the Library of India Office, Part V., p.993—995.)

मया महताऽऽयासेन तत्प्रति-पाठक्रम एवं नियोजितः ।

गोलाध्यायभाष्यम् १—४५ आदौ खण्डितम् ।

मध्यमाधिकारभाष्यम् ४५—५६ ।

अत्र मध्यमाधिकारे ३१श्लोकपर्यन्तमेव भाष्यम् ।

ततः स्पष्टाधिकारस्य २६श्लोकतट्टीकाऽऽरब्धा ६०पत्रतोऽत्र प्राचीनसंख्या पत्रोपरि १, तथा ११५, ।

अग्रेऽत्र ६८ पत्रमसङ्गतम्, यत्र प्राचीनसंख्या ६ ।

ततः ८० पत्रपर्यन्तं संलग्नग्रन्थस्त्रिप्रश्नाधिकारस्य ६ श्लोकपर्यन्तं टीका । अत्र प्राचीनपत्रसंख्या २८ । ततस्त्रिप्रश्नाधिकारस्य २०श्लोकतट्टीका, पत्रसंख्या प्राचीना १ तथा १५६, नवीना २१८ । अग्रे संलग्नग्रन्थस्य त्रिप्रश्नाधिकारस्य ३३श्लोकपर्यन्तं टीकाऽन्तिमपत्रप्राचीनसंख्या ५ तथा १६३, नवीना संख्या च २२२ । ततश्चन्द्रग्रहणाधिकारस्य ४ श्लोकटीकाऽऽरब्धा प्राचीनपत्रसंख्या १ तथा २६० । नवीना संख्या च २५० । ततः सूर्यग्रहणस्य २३ श्लोकपर्यन्तं टीका । अन्तिमप्राचीनपत्रसंख्या ३६ तथा २३२, नवीनासंख्या च २६२ । इण्डिया-आफिस-पुस्तकपुटके चेयमन्तिमपत्रसंख्या । ततो ग्रहयुत्यधिकारस्य ११ श्लोकतट्टीकारब्धा यत्र प्राचीनपत्रसंख्या १ तथा १६४, नवीना संख्या २२३ । ततो मध्यगत्युत्तराध्यायस्य

४० श्लोकपर्यन्तं संलग्नग्रन्थो यत्रान्तिमप्राचीनपत्रसंख्या ११६ नवीना संख्या च १०८ । ततो मध्यगत्युत्तराध्यायस्य ४५श्लोकटीकाऽऽरब्धा । अत्र प्राचीनपत्रसंख्या १२० नवीनसंख्या च १०६ । ततस्त्रि-

प्रश्नोत्तराध्यायस्य ४६ श्लोकपर्यन्तं टीका । अत्रान्तिमप्राचीनपत्र-संख्या ४६ तथा १५८, नवीना संख्या च २१७ ।

एवमत्र ।

खण्डितगोलाध्यायस्य । खण्डितमध्यमाधिकारस्य । खण्डितस्पष्टाधिकारस्य । खण्डितत्रिप्रश्नाधिकारस्य । खण्डितचन्द्रग्रहणाधिकारस्य । खण्डितसूर्यग्रहणाधिकारस्य । खण्डितग्रहयुत्यधिकारस्य । भग्रहयुत्यधिकारस्य । तन्त्रपरीक्षाध्यायस्य (दूषणाधिकारस्य) । गणिताध्यायस्य (पाटीगणितस्य) । खण्डितमध्यगत्युत्तराध्यायस्य । स्फुटगत्युत्तराध्यायस्य । खण्डितत्रिप्रश्नोत्तराध्यायस्य च टीका वर्तते ।

सर्वेष्वपि पुस्तकेषु 'संसाध्य स्पष्टतरं बीजं नलिकादियन्त्रेभ्य' इत्यादिश्लोको मध्यमाधिकारे नास्ति । मया गणकतरङ्गिण्यां मल्लारिकृतग्रहलाघवटीकातो व्यलेखि (द्रष्टव्या गणकतरङ्गिणी पृ. १८–१९) ।

उपलब्धमूलपुस्तकत्रये पञ्चविंशतितमेऽध्याये वस्तुतो ब्रह्मगुप्तकृतो ध्यानग्रहोपदेशाध्यायो वर्ततेऽतो मयाऽयं पृथक्त्वेन तन्नाम्ना मुद्रितः । अत्र बहुत्र स्खलितानि पदानि तानि गणितेन संशोध्य मुद्रितान्यपि सुधीभिर्भृशं विचिन्त्यानि ।

अस्य सिद्धान्तस्य चतुर्विंशतितमेऽन्तिमे संज्ञाध्याये (पृ. ४०८)

गणितेन फले सिद्धिर्ब्राह्मे ध्यानग्रहे यतोऽध्याये ।

ध्यानग्रहो द्विसप्ततिरार्याणां न लिखितोऽत्र मया ॥

इति नवमश्लोकेन ध्यानग्रहोपदेशाध्यायस्य रचनेतत्सिद्धान्तरचनातः पूर्वं विभाति परन्तु तत्राहर्गणसाधनप्रकारेण सिद्धान्त-

Digitized by Google

रचनाकाल एवास्य रचना सिध्यति (द्रष्टव्यमस्य ग्रन्थस्य पृ·) तथा 'नक्षत्रयोऽष्टविभक्ता' इत्यादिगद्येन (द्रष्टव्यमस्य ग्रन्थस्य पृ·) खण्डखाद्यरचनातः पश्चात् सिध्यति ।

मन्मते केन चिदनभिज्ञेनेदं गद्यं प्रक्षिप्तं वस्तुतः खण्डखाद्यश्लोका ये मया टीकायां लिखितास्ते ध्यानग्रहोपदेशाध्यायस्था एव पश्चादाचार्येण लाघवार्थं खण्डखाद्ये च पुनर्लिखितास्त इति ।

अस्य सिद्धान्तस्य द्वादशाध्याये गणिताध्याये पाटीगणितरूपे मया पाठकानां विनोदाय निजटीकायां चतुर्वेदाचार्यपृथूदकटीकात उदाहरणानि संहृत्य लिखितानि । अष्टादशाध्याये कुट्टकाध्यायसंज्ञे च कोलब्रूकानुवादानुसारेण द्विचाणि त्रुटितवृत्तानि नूतनानि तदर्थबोधकानि रचितानि तथा तदीयाः सूत्रसंख्याश्च सर्वत्र विलिखिताः । विंशतितमाध्यायस्य छन्दश्चित्युत्तराभिधस्याशयः संप्रति मनसि न स्फुरति । अतो मूलग्रन्थोपलब्धा भाषा एव विलिखितास्ताश्च बुद्धिमद्भिर्भृशं विचिन्त्यास्तदर्थतोऽहमप्यनुग्राह्योऽन्येष्वपि सर्वेष्वध्यायेषु मत्संशोधितान्यपि पदानि पुनर्विचारणीयानीति बुद्धिमत्सु सुजनेषु मदीयाऽभ्यर्थना ।

Digitized by Google

अत्र ग्रन्थे भग्रहयुत्यधिकारसमाप्तपर्यन्तं ग्रन्थसंख्या ३७६ (द्रष्टव्यमस्य ग्रन्थस्य १४४ पृ.)

तन्त्रपरीक्षाध्याये ग्रं सं.	६३	
गणिताध्याये	६६	
मध्यगत्युत्तराध्याये	४८	(आचार्यलेखानुसारेणैकार्यात्रुटिः)
स्फुटगत्युत्तराध्याये	५५	(आचार्यलेखानुसारतोऽप्येकार्याऽधिका)
त्रिप्रश्नोत्तराध्याये	६०	
ग्रहणोत्तराध्याये	४७	(आचार्यलेखानुसारतोऽप्येकार्याऽधिका)
शृङ्गोन्नत्युत्तराध्याये	१०	
कुट्टकाध्याये	१०२	(आचार्यलेखानुसारतोऽप्येकार्यात्रुटिः)
शङ्कुच्छायादिज्ञानाध्याये	२०	
छन्दश्चित्युत्तराध्याये	१६	(आचार्यलेखानुसारेणार्याद्वयत्रुटिः)
गोलाध्याये	७०	
	६३६	
यन्त्राध्याये	५७	(आचार्यलेखानुसारेणार्याचतुष्टयमधिकम्)
मानाध्याये	१२	
संज्ञाध्याये	१३	
सर्वश्लोकसंख्या	१०२१	

आचार्यलेखानुसारेण सर्वश्लोकसंख्या १०२० । अत्र संज्ञाध्यायस्योपसंहारश्लोकं हित्वा द्वादशार्या हीनाः क्रियन्ते तर्हि १००८ इयमाचार्योक्ता संख्याऽऽयातीति बुद्धिमद्भिर्विचिन्त्यम् । (द्रष्टव्यमस्य ग्रन्थस्य पृ. ४०८)

ध्यानग्रहोपदेशाध्याये 'नवतिशयोऽष्टिविभक्ता इत्याद्यार्याषट्कं खण्डखाद्याच्चिन्त्यमित्यत्र षट्क-स्थाने सप्तकं भवेत् । तर्हि उपसंहार श्लोकं हित्वा द्वासप्ततिरार्याणां भवति ।

खण्डखाद्ये वस्तुतः ६–७ श्लोकौ चालनसाधकावेवम् ।

'मिश्रेष्टान्तरगुणिता भुक्तिर्दिवसे निशादले प्रथमे ।
रात्र्यर्धेऽभीष्टान्तरहृता परे त्विष्टमिश्रयोगेन ॥
मिश्रेणोदयकाले रात्र्यर्धेनास्तमयकाले ।
षष्ट्या विभज्य लब्धं विशोध्य तात्कालिको भवति' ॥

षट्क-पदानुरोधान्मया प्रथमार्यापूर्वार्धे द्वितीयोत्तरार्धे चोपयुक्तं गृहीत्वैकार्या षष्ठी मूलग्रन्थे स्थापितेति सुधीभिरूह्यम् ।

यत्सिद्धान्तभवप्रकारविलसत्सत्सूत्ररत्नाकराद्-
द्वित्राणि भ्रमतः समालभत तत्सूत्राणि विद्भास्करः ।
तेने तैश्च शिरोमणिं निजगुणैः सांवत्सराणां वर-
स्तस्यामुं तिलकं सुधाकरकृती चक्रे जगन्मोहनम् ॥

अनुचितानि पदानि सुबुद्धितो गणितगोलजचारुविचारतः ।
बत विशोध्य वदन्तु महोदया इति निवेदयतीह सुधाकरः ॥

सुधाकरद्विवेदी ।

REPRINT FROM THE PANDIT.

ब्राह्मस्फुटसिद्धान्तो

ध्यानग्रहोपदेशाध्यायश्च ।

गणकचक्रचूडामणिश्रीब्रह्मगुप्तविरचितः ।

महामहोपाध्यायसुधाकरद्विवेदिकृतनूतन-
तिलकसमेतः ।

BRĀHMASPHUṬASIDDHĀNTA

AND

DHYĀNAGRAHOPADEṢĀDHYĀYA,

BY BRAHMAGUPTA,

EDITED WITH HIS OWN COMMENTARY

BY

MAHĀMAHOPĀDHYĀYA SUDHĀKARA DVIVEDIN,

Professor, Queen's College, Benares.

BENARES:

PRINTED AT THE MEDICAL HALL PRESS.

1902.

Digitized by Google

विषयानुक्रमः ।

मध्यमाधिकारः	...	...	पृ०	१–२२
स्पष्टाधिकारः	...	...	...	२३–४७
त्रिप्रश्नाधिकारः	...	...	...	४८–७१
चन्द्रग्रहणाधिकारः	...	...	...	७२–७८
सूर्यग्रहणाधिकारः	...	...	...	७९–९२
उदयास्ताधिकारः	...	...	...	९३–९९
चन्द्रशृङ्गोन्नत्यधिकारः	...	...	...	१००–१०७
चन्द्रच्छायाधिकारः	...	...	...	१०८–१११
ग्रहयुत्यधिकारः	...	...	...	११२–१२२
भग्रहयुत्यधिकारः	...	...	...	१२३–१४६
(पूर्वो ग्रहाध्यायो)				
तन्त्रपरीक्षाध्यायः	...	...	...	१४७–१७१
गणिताध्यायः	...	...	...	१७२–२१४
(पाटीगणितम् । अत्र परिकर्मविंशतिरष्टौ व्यवहाराश्च सन्ति)				
मध्यगत्युत्तराध्यायः	...	...	...	२१५–२३५
स्फुटगत्युत्तराध्यायः	...	...	...	२३६–२५५
त्रिप्रश्नोत्तराध्यायः	...	...	...	२५६–२७४
ग्रहणोत्तराध्यायः	...	...	...	२७५–२८९
शृङ्गोन्नत्युत्तराध्यायः	...	...	...	२९०–२९३
कुट्टकाध्यायः	...	...	...	२९४–३४७
(अत्र कुट्टक-धनर्णादि-सङ्कलितादि-एकवर्णानेकवर्णभावित-समीकरण-वर्गप्रकृतय उदाहरणानि च सन्ति)				
शङ्कुच्छायादिज्ञानाध्यायः	...	...	...	३४८–३५६
कल्पस्थित्युत्तराध्यायः	...	...	...	३५७–३५८
गोलाध्यायः	...	...	...	३५९–३८०
यन्त्राध्यायः	...	...	...	३८१–४०१
मानाध्यायः	...	...	...	४०२–४०५
संज्ञाध्यायः	...	...	...	४०६–४०९
ध्यानग्रहोपदेशाध्यायः	...	...	...	४१०–४४९
शेषसाधनम्	...	...	...	४५०–४५४

Digitized by Google

Digitized by Google

अथ
सटीकतार्किकरक्षाग्रन्थे उद्धृतानामाचार्याणां सूचीपत्रम् ।

आचार्याः	पृष्ठाङ्काः
अक्षचरणः	४
अक्षपादेन	५५
अक्षपादैः	१५०
अन्ये	१३३ । २३३ । ३३७
अन्येषाम्	१७०
अपरे	१३
आचार्याणाम्	३३७
आचार्याः	६५ । ८६ । १७४ २०५ । २१३ । २२० । २२१ । २५० २६३ । ३४१
आचार्यैः	३१९ । ३५०
उदयनस्य	३६४
एकदेशिनः	२२३
कणभुजा	१४१
कणादः	५६
काणादाः	१३४
काश्यपः	१४४
किरणावलीकाराः	१९३
कुमारिलाः	१६३
केचन	१३ । ५६ । २०६

आचार्याः	पृष्ठाङ्काः
केचित्	१३ । १११ । १३३ । १३८ २०७ । २३५ । २७३ । २७६ । ३३७ । ३४१ । ३६३
केषाञ्चित्	१७०
कौमारिलाः	१६३
गुरवः	१६३
गौतमः	३११
गौतमेन	२१७
गौतमे मते	१३
चार्वाकाः	५६ । ३०६
जयन्तः	३४७
जरन्नैयायिकाः	१८३
जैनजनाः	११७
टीकाकारः	२४८ । २४९
तथागतमतानुवर्तिनः	१४
तात्पर्यपरिशुद्धिकाराः	१८६ । २४८
तार्किकस्य	२३१
त्रिलोचनस्य	३३७ । ३५६
नास्तिकः	२१६
नैयायिकाः	६ । ६३ । १७३ । २१५ । ३६०

आचार्याः	पृष्ठाङ्काः
न्यायाचार्याः	२५०
न्यायाचार्यैः	७७
न्यायैकदेशिनः	५६
पत्तिलमुनिः	४
पौराणिकाः	५६
प्रबोधसिद्धिकारः	३४३
प्रभाकरः	५६ । १६३
प्राभाकराः	१९
बौद्धस्य	१८९
बौद्धादीन्	२०
बौद्धानाम्	३३५
बौद्धः	३०६ । ३६०
बौद्धाः	३०७
भाट्टाः	५६
भाष्यकारः	८९ । २४८
भूषणकारादयः	३५१
भूषणकारः	३३७ । ३४१ । ३५३
मनुना	१९५
मीमांसकानाम्	७३ । ३३५ । ३६०
मीमांसकाः	९२ । १७५
मीमांसाचार्याः	३९ । १९५
मूलाचार्याः	३६०
वाचस्पतिप्रभृतीनाम्	३५६
वाचस्पतिमिश्रैः	३५५

आचार्याः	पृष्ठाङ्काः
वाचस्पतेः	३६४
वार्त्तिककाराः	१६७ । २४८
विश्वरूपजयन्तौ	३५० । ३५५
विश्वरूपादयः	३४०
वृद्धाः	११६
वेदान्तिनः	५६ । ३०६
वैतण्डिकाभिमानी	२१५
वैशेषिकः	१६६
व्यासः	१८४
शाब्दिकाः	६१
शालिकानाथेन	२२
सर्वानित्यत्ववादी	७२
सांख्यः	१६६ । ३६०
सांख्याः	५६
सुगतमतानुवर्त्तिनः	१७५
सुगतः	५६
सूत्रकारस्य	२४८ । २५२
सूत्रकारः	१२० । १२५ । २१५ । २८८ । ३१२
सूत्रकारैः	९६ । १२९ । १७३ । २८४ । ३६१
सौगताः	१३ । ६० । ८२ । १७५ । २१५ । ३४३

Digitized by Google

अथ

सटीकतार्किकरक्षाग्रन्थे उद्धृतानां ग्रन्थानां सूचीपत्त्रम् ।

ग्रन्थाः	पृष्ठाङ्काः
आत्मतत्त्वविवेकः	१७९ । १८९ १९४ । २०३
काणादतन्त्रम्	१३० । १७३
कुमारसम्भवम्	७४
टीका	२०३ । २०९ । ३०८
न्यायकुसुमाञ्जलौ	१०७
प्रबोधसिद्धिनामनि परिशिष्टे	३१०
प्रबोधसिद्धौ	१८९ । ३०८ । ३५७
भारते	१८४
भाष्यम्	२०३ । ३०८
मीमांसा	१९५
मीमांसावृत्ता	२१५
लक्षणमालायाम्	१७९
वार्त्तिकम्	२०३ । २०९ । २४९ २५० । ३०८
श्रुतिः	१४८
सूत्रम्	१६१ । १६२ । १६७ । १७१ । २४७ । २५३ । २५६ । २६८ । २७१ । २८० । २८१ । २८२ । २८४ । २८५ । २९२ । २९८ । ३०० । ३०३ । ३०८ । ३१६ । ३२४ । ३२५ । ३४३ । ३४४ । ३५० । ३५१ । ३५३ । ३५५ । ३६०

अथ
सटीकतार्किकरक्षाव्याख्यायां कोलाचलमल्लिनाथसूरिविरचितायां निष्कण्टकायामुद्धृतानामाचार्याणां
सूचीपत्त्रम् ।

आचार्याः	पृष्ठाङ्काः
अक्षचरणः	४
अक्षपादः	५५
अमरः	१६४
आचार्याः	३ । ४४ । ८६ । १०६ । १४६
उदयनाचार्यः	६५ । १९७
उदयनः	१२ । ५२ । ८९ । ९१ । ७७ । ९४ । १०१ । १३१ । १७९ । १८६ । २०३ । २०५ । २१३
कणादः	१४१
किरणावलीकारः	१५९
केचित्	८२ । ८५ । १६०
गुरवः	२१
गुरुमतम्	१६४
चार्वाकः	१९८
नैयायिकः	२२७ । २४४
न्यायाचार्याः	५८
पक्षिलः	४
पीलुपाकवादी	१५५
प्राभाकराः	१९ । ३० । १११ । ११५ । १४१ । १५५ । १६१
बुद्धः	१५ । २०९
बौद्धः	७४ । ८४ । १८९
भट्टपादः	६०
भाट्टाः	१४१
भाष्यकारः	४ । १५२
भूषणः	१४१
भूषणीयाः	५६
मनुः	१९५
मीमांसकः	५१ । ७३ । १०२ । १२४ । १५५ । १८२ । २२७ । २४४
मीमांसागुरुः	२०
मीमांसाचार्याः	३९
वाचस्पतिः	७७
वाचस्पत्याचार्याः	२०९
वार्त्तिककारः	४
वृत्तिकारः	१४०
वृद्धः	११५ । १७३
वैशेषिकैकदेशी	१३३
वैशेषिकाः	१३६ । १६६
शबरः	९२
शाक्याः	८२
शाब्दिकाः	६१
सांख्याः	१४१ । १४४ । १६६
सौगताः	६१ । ८२
सूत्रकारः	४ । ४४ । ६३ । ९६ । १२० । १२५ । २२६

Digitized by Google

अथ

सटीकतार्किकरक्षाव्याख्यायां कोलाचलमल्लिनाथसूरि-विरचितायां निष्कण्टकायामुद्धृतानां ग्रन्थानां सूचीपत्रम् ।

ग्रन्थाः	पृष्ठाङ्काः
आचार्यवाचस्पतिटीका	७७
आत्मतत्त्वविवेकः	१८६
उदयनाचार्यवचनम्	१२
उदयनादिग्रन्थः	५४ । १७५
कणादसूत्रम्	१३२
कारिका	३ । ३२ । ४० । ९२
किरणावली	६८ । ७७
गुरुमतम्	११ । २८
जरन्नैयायिकमतम्	१८४
टीका	५ । २०९
तात्पर्यटीका	२०९
तात्पर्यपरिशुद्धिर्नामोदयनविरचिता वाचस्पतिकृतवार्त्तिकतात्पर्यटीकाव्याख्या	१८६
निकषः	१६१
न्यायकुसुमाञ्जलिटीका	४६
न्यायकुसुमाञ्जलिः	५८ । ६८ । ७६
न्यायैकदेशिमतम्	२३५
न्यासोद्द्योतः	३९
पञ्चकाव्यटीका	३९

ग्रन्थाः	पृष्ठाङ्काः
परमगुरुभट्टपादमतम्	३९
परिशिष्टम्	१९०
प्रबोधसिद्धिः	१९०
प्रमेयपारायणम्	१६४
प्रशस्तपादभाष्यनिष्कण्टका	७६ । १३९
भट्टकारिका	१०९ । ११७
भाष्यम्	५
मीमांसामतम्	२१५
वार्त्तिकम्	५ । १११ । १४६ । १७०
शालिका	९ । २० । २२ । ३० । ९२ । ११३ । १३३
श्रुतिः	२
समानतन्त्रसूत्रम्	१२१
सूत्रम्	४ । ५ । ५५ । ७१ । ११९ । १२० । १२२ । १३८ । १९२ । २०५ । २११ । २१८
सौगतमतम्	२१५
सौगतवाक्यम्	१४

अथ

सटीकतार्किकरक्षाव्याख्यायां ज्ञानपूर्णविरचितायां लघुदीपिकायामुद्धृतानामाचार्याणां सूचीपत्रम् ।

आचार्याः	पृष्ठाङ्काः
चार्वाकाः	२७१
जयन्तः	३५६
नैयायिकः	३३३
बौद्धाः	२७१ । २९४ । ३०४ । ३०८
भाष्यकारः	२९४
मीमांसकाः	२५७ । ३३३
यज्ञेश्वरहरिः	३६४
विष्णुस्वामी	३६४
विश्वरूपः	३५६
शुद्धोदनिः	३३५
सूत्रकारः	२९२ । २९६ । ३१२ । ३१९ । ३४२

अथ
सटीकतार्किकरक्षाव्याख्यायां ज्ञानपूर्णविरचितायां लघुदीपिकायामुद्धृतानां ग्रन्थानां
सूचीपत्रम् ।

ग्रन्थाः	पृष्ठाङ्काः
भाष्यम्	२५२ । ३१०
वार्त्तिकम्	२५२
व्याकरणादिमतम्	३२७
सूत्रम्	२५१ । २७१ । ३१० । ३२४

Digitized by Google

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् । मूल्यम्

ीभाष्ये प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं॰ श्रीराममिश्र-
शास्त्रिप्रणीतकाचित्काविषमपदटिप्पणीसमेतः .. .. ७।)

ीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा .. ६)

ीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा .. ३=)

ेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः .. .. ३।)

ेदपूर्त्तेः प्रथमो बिन्दुः सत्सम्प्रदायाचार्य्य·स्वामिश्रीराममिश्रशास्त्रि-
प्रणीतो निर्विशेषाद्वैतनिराकरणपरः .. .. १॥=)

ेदपूर्त्तिसहितो वेदार्थसंग्रहः .. .. ३॥।)

ास्त्रदीपिका .. .. ६।)

ङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-
न्द्रिकोपेतम्, पं॰स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् । १।)

ाशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजप·दामोदर-
शास्त्रिणा संशोधिता पूर्वार्द्धरूपा .. .. ५॥।)

तथा उत्तरार्द्धम् .. .. ८॥।)

माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्य्यसोदरेण
श्रीसायणाचार्येण विरचिता .. .. ७॥)

काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता ६॥)

श्रीतिङन्तार्णवतरणिः । .. .. ६)

दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता .. .. ॥=)

जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता .. ५॥)

लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्याय-
मुक्तावल्याख्यया टीकया सहिता । .. .. ॥।)

ं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना
ुरेण श्रीमदनन्तदेवेन विरचितम् । ॥।)

ाद:-सर्वार्थसिद्धियुतः, बौधायनीयार्षसिद्धान्तानुसारी विशिष्टाद्वै-
ननिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्कि-
हरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीहवेङ्कटनाथदेशिकेन प्रणीतः ५॥=)

ान्तमुक्तावली, श्रार्थर्वेनिस्ब्राहबकताङ्गलभाषानुवादयुता .. १॥।)

स्य इङ्गलण्डीयभाषानुवादः .. .. ३॥)

हताया इङ्गलण्डीयभाषानुवादः .. .. १२)

ायम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्य-
ाणां परमगुरुणा श्रीहयामुनाचार्यस्वामिना प्रणीतम् .. .. ॥।)

श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदी-
पाख्यटीकया सहिता । .. .. १॥।)

Digitized by Google

CONTENTS.

Page.

NYĀYASŪTRAVIVARAṆAM, Ed. Surendralāla Gosvāmin, Professor, Sanskrit College, Benares 705

BRĀHMASPHUṬASIDDHĀNTA, Edited with his own commentary with Preface and Contents, &c. by Mahāmahopādhyāya Sudhākara Dvivedin, Professor, Queen's College, Benares 721

THE TĀRKIKARAKṢĀ AND SĀRASAMGRAHA OF VARADARĀJA, with the glosses Niṣkaṇṭakā of Mallinātha Kolācala and Laghudīpikā of Jñānapūrṇa with Contents and Index. Ed. Vindhyeçvarīprasāda Dvivedin, Librarian, Sanskrit College, Benares ... 757

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

3 2044 055 326 607

DEC 4 1929

Digitized by Google

Digitized by Google